प्राचीनटिप्पनी-समवेता ।

श्रीगोपालचम्पूः ।

(उत्तरचम्पूः)

गौड़ीयसम्प्रदायाचार्य्यवर्य्य-

श्रीमज्जीवगोस्वामि-प्रणीता ।

परमहंसपरिव्राजकाचार्य्यस्वामिश्रीप्रकाशानन्दसरस्वती शिष्य-

श्रीनित्यस्वरूप ब्रह्मचारिणा

सम्पादिता ।

श्रीकृष्णचन्द्रभागवतभूषण-

सरस्वत्युपाधिक-

श्रीशचीनन्दनगोस्वामिभ्या

संशोधिता ।

ताड़ाशाधिपति श्रीराधाविनोदैकजीवन श्रीवृन्दारण्यवासि राजर्षि-

राय वनमालि राय वाहादुरस्य सम्पूर्ण साहाय्येन श्रीवृन्दा-

वनधामस्थ "श्रीमद्देवकीनन्दना"ख्य

स्वकीयमुद्रणयन्त्रालये

श्रीनित्यस्वरूप ब्रह्मचारिणा

मुद्रिता प्रकाशिता च ।

सम्वत् १९६१ ।

मूल्यं रौप्यक-पञ्चकम् ५) ।

भूमिका।

—:○:—

इह खलु जगत्यां बहूनि काव्यप्रहसनचम्पूनाटकादीनि सन्ति, पठनपाठने च तेषामधिकतया वर्त्तते। किन्तु तानि तु प्राकृतनायकनायिकाभावभावितत्वाच्छ्रीभगवच्चरणसरसीरुहारूढ़भावभावुकानां भव्यजनानां भावनाऽभावायैव कल्प्यन्ते, अतो न च समर्थास्तु तेषां प्रीतिमापादयितुं। मन्ये तदर्थमेव रचितवान् किल निखिलविद्वद्कुलचूड़ामणिः प्रज्ञाविक्रमाक्रान्तविबुधगुरुः प्रकटितकाव्यकृतिविजिताविबुधगुरुः सकलकविकुलमदविमर्दीकृतकाव्यघटनाघटमानकौशलकदम्बः श्रीकृष्णचरणपङ्कजचञ्चरीकः श्रीगौड़ेश्वरसम्प्रदायप्रदायादः श्रीमत्कृष्णचैतन्यपार्षदप्रवरः श्रीमज्जीवगोस्वामिपादः; नीरधिरिव निखिलकाव्यलक्ष्मीप्रसूतिं, सुधाकरमिव सिद्धान्तनिचयसुधाकरं, शुचिरसयुक्तमपि शुचिरसयुक्तं, मधुसूदनास्वाद्यमपि न मधुसूदनास्वाद्यं, श्रुतिरसायनमपि न कर्म्मठश्रुतिरसायनं, नवभक्तिगम्यमपि न नवभक्तिगम्यं, जीवकृतिसिद्धमपि न जीवकृतिसिद्धं, प्राकृतकाव्यविशेषकमपि न प्राकृतकाव्यविशेषकं, श्रीगोपालचम्पूसमाख्यमेतत् परमोपादेयफलं श्रीमद्भागवताख्यकल्पद्रुमाद्यदशमस्कन्धीयाभिनवनवतिशाखानां। समवर्णि चैतत् कविना ग्रन्थरत्नं श्रीमद्भागवतदशमस्कन्धीयां श्रीभगवतस्त्रिधाविष्कृतधामश्रीवृन्दावनमथुराद्वारकाभिधधामाचरितचरितरीतिमुरीकृत्य। क्वचित् क्वचिच्च भाववशात्, परममाधुर्य्यधुर्य्यश्रीमन्नन्दनन्दनललितलीलामृततुरङ्गिणीविमज्जितान्तःकरणबहिर्वृत्तिकश्रीमच्छुकदेवविपर्य्यस्तवर्णिततच्चेष्टितचयपर्य्यायक्रममनुक्रम्यैव। रचनाचातुरीचतुरशिरोमणिः स्वयं कृतो गोपालिगोपालिकारमणविदग्धस्य श्रीमाधवस्य रसिक-

स्वजनाभिरक्ष्यमाणरहस्यलीलासन्दोहसुधां तल्लीलारसिकरसनभक्तकुल-
देवान् पाययितुमरसिकबहिर्मुखपूर्वदेववञ्चनार्थं सुदुर्बोधदुर्बोध-
वाग्भङ्गीविलसितद्रढिमभाण्डाभिगुप्तां विधाय वसुधायां मोहिनीचित्र-
चरित्रमभिनीतवान् । अये श्रीमन्नन्दराजजीवनकन्दनन्दनपरममाधुरी-
वहित्रचित्रचरित्रपवित्ररसविशेषभावनचतुराः सन्तः, आस्वाद्यतामा-
स्वाद्यतां कलयन्तः सन्तः सन्ततमस्याममृतवाहिन्यां वाप्यामाप्यायनमनो-
हरहरिलीलापीयूषं । हंहो! संख्यावन्तः प्रेक्षावन्तश्चेद्भवन्तस्तर्हि श्रीहरि-
लीलासन्दर्भगर्भसमीक्षादीक्षया प्रेक्षया प्रेक्ष्यतां प्रेक्ष्यतां नयविभवविज्ञ-
विषमविषमयसंसृतिसृतिपर्य्यटनसंघटनतृट्परीतपरीतदखिलवासना—
भावभावनभवभावनगोकुलकुलललनाराधाकुलश्रीमद्गोकुलपतेरनुपम—
स्वोपमपवित्रचरित्रवर्णनमाधुर्य्यविस्मयचमत्कृतचातुर्य्यपूरणं पूरणकुलं
श्रीमद्गोपालचम्पूरस्य । ग्रन्थोऽयं पूर्वचम्पूत्तरचम्पूसमाख्यविभाग-
द्वयेन समजनि । तत्र पूर्वचम्पूमनु मनुष्यलीलाभिनयवतः श्रीभग-
वतः कृष्णस्य ललितलीलामाधुरीपूराणि त्रयस्त्रिंशत्पूरणानि सन्ति । तेषु
पूर्ववर्तिन्यां द्वाभ्यां श्रीगोलोकविलासः कथितः। एकेन तु वर्णितोऽवनी-
तलावतीर्णस्यास्य वृन्दावनश्रीवृन्दावननामवनस्य कस्मिंश्चिद्गोकुला-
कुलश्रीगोकुलसमाख्यस्थानविशेषे आनन्दयशोदातः श्रीनन्दयशोदात-
स्त्रैलोक्यमोहनमदनमोहनस्य श्रीराधामोहनस्यानुपमाविर्भावः। ततस्त्वे-
केन नवाविर्भूतस्य तस्य जातकर्मनन्दोत्सवादिकक्षाकलितं । तदनन्तर-
मवशिष्टैर्विशिष्टैः स्तुतैस्तुतैस्तस्याद्यबालस्य बाल्याद्यकैशोरान्तलीला-
माधुरीलहरीसन्दोहः सन्दर्भितः । उत्तरचम्पूस्तु सप्तत्रिंशत्पूरणैः सम्पू-
रिता । तत्र च श्रीमथुराद्वारकाभिधधामद्वये वसतः सतः श्रीकृष्णस्य
कंसासुरमारणादिविक्रमा अनुक्रमिताः । अतः किञ्चिद्विशेषविविदिषा
चेदस्य सूचीपत्रं द्रष्टव्यं सुधीभिः । बङ्गीयताड़ाशभूपति-
-श्रीमद्राधाविनोदपदकोकनदषट्पदश्रीमद्राजर्षिवनमालिरायबाहादुरस्य
सम्पूर्णसाहाय्येन शुद्धधीभिः सुधीभिः संशोध्य च सम्प्रतं

साम्प्रतं प्राचीनसमीचीनटिप्पनीसहितं निरवनूलं ग्रन्थरत्नमिदं मुद्रितं । प्रार्थितश्चैतत् श्रीमद्भाषाविनोदविनोदपद्कुवलययुगलसमया मया कालवशात् तिरोहितप्रायं प्रायशो यशोयवनिकायमानं कवि-कुलानामरो विपुलश्रमेण श्रमणेन चानेन समुद्धृत्य संस्कृतं धार्म्मीला-मार्य्यतामाधायिभिः काव्यकण्ठैः कविभिः कण्ठभूषणभूषणत्वेनेति । अज्ञानवधानतः केषाञ्चिदक्षराणां क्षरणं विपर्य्ययो वा भविता तच्च परिशोध्य सकरुणनयनैरालोकनीयं । भो भोः सम्भूसमज्ञा ! गुणज्ञाः ! मद्नल्पश्रमलिङ्गप्रलिङ्गस्वरूपं फलमिदं सरसरसनै रसनैपुण्यवद्भिः पुण्यवद्भिर्गुणवद्भिर्भवद्भिः सादरमद्रसम्मदतो भूयो भूयः स्वादं स्वादं सफलीक्रियतां युष्मदीयमस्मदीयञ्च मानुजं जनुरिति ।

विज्ञप्तिरियं विनयविनम्रकन्धर—

श्रीनित्यस्वरूपब्रह्मचारिणः ।

उत्तरचम्पू-सूचीपत्रम्।

—:○:—

प्रथमपूरणे व्रजानुरागसागरप्रथनं।—

तत्र प्रथमं तावन्मङ्गलशंसनं, पूतनावधादिकेशिवधान्तां लीला-मुद्दङ्क्य श्रीभगवतो निरतिशयमाधुर्य्यगवसायवर्णनं, गोलोके श्रीकृष्णसनाथसभासमासीनश्रीनन्दमहाराजप्रश्नतः स्निग्धकण्ठस्य मङ्ग-लाचरणं, ततः कथाप्रारम्भः, श्रीराधासौभाग्याधिक्यवर्णनं, श्रीराधायाः प्रेमविहारादिकं निर्व्वर्ण्य स्निग्धकण्ठस्य प्रेमवैवश्यं, श्रीकृष्णतत्प्रेयसी-नामसमोर्द्ध्वसौन्दर्य्यवर्णनं, व्रजसुन्दरीणामन्यत्र मिथ्याविवाहं स्थाप-यित्वा श्रीकृष्ण एव तासां तात्त्विकोद्वाहस्थापनं, मधुमङ्गलेन सह श्रीकृष्णस्य राधाङ्गनाविषयककथोपकथनं, तद्विशेषविविदिषार्थं मधुमङ्गलप्रस्थापनं, श्रीकृष्णस्य गमनक्रमात् कलङ्कश्रवणजातभिया श्रीराधामनुसृत्य विलापः, ततो मधुमङ्गलतो वान्धवकर्त्तृकं राधादि-निरोधं श्रुत्वा श्रीकृष्णस्य चिन्ता, तद्दिनकथासमापनं ॥ १—२४ ॥

द्वितीयपूरणे अक्रूरक्रूरतापूरणं।—

तत्र प्रथमं तावत् श्रीकृष्णस्य कंसवधविषये चिन्ताचयवर्णनं, देवर्षेर्व्रजसमागमोट्टङ्कनं, श्रीकृष्णस्य व्रजागमनवर्णनं, वनमध्ये दूरात् परस्परदर्शनतः श्रीकृष्णाक्रूरयोः सन्तर्कणं, श्रीराधाकृष्णयोस्तात्-कालिकशोभावर्णनं, कृतप्रणाममक्रूरमवलोक्य साभ्युत्थानं, श्रीकृष्णेन तदुत्थापनं, श्रीरामकृष्णाभ्यां तं स्वालयं नीत्वा तदुचिताभ्यर्थनादिकं,

रहसि श्रीकृष्णाक्रूरयोः कुशलप्रश्नमुखसंलापः, श्रीनन्दादीन् प्रति कंसस्य धनुर्यागाह्वानकथनं, मथुरागमनविधौ श्रीकृष्णेन सह नन्दादीनां मिथः कथोपकथनं, भाविविरहशङ्कातो मुह्यतः ससमाजव्रजराजस्य श्रीकृष्णेन परिसान्त्वनं,घोषणातः श्रीकृष्णस्य मथुरागमनं श्रुत्वा गोपीनां विरहभावशावल्यं खेदश्च ॥ २५—५२ ॥

तृतीयपूरणे माथुरपुरस्थानप्रस्थानं ।—

तत्र प्रथमं तावत् गणकवाक्यतः नन्दयशोदाभीतिनिवारणं, नन्दादिभिः श्रीकृष्णस्य गोकुलप्रस्थितिसमये व्रजवासिनां सप्रणयोक्तिः, श्रीकृष्णेन तेषां सान्त्वनं, ततः सान्त्विततानां गोपानां प्रस्थानं, मथुरां यान्तं श्रीकृष्णं निशम्य व्रजसुन्दरीणां विलापः, श्रीकृष्णस्य तत्प्रेयसीनाञ्च सस्वेदजलकुङ्कुमरागेण साश्रुकज्जलभागेन च मिथः पत्री निर्म्मितिः, विरहव्यथितानां श्रीराधादीनां श्रीकृष्णातीतचरितपानं ॥ ५३—६९ ॥

चतुर्थपूरणे मथुरान्तःप्रवेशनिर्द्देशः ।—

तत्र प्रथमं तावत् अक्रूरस्य ब्रह्मतीर्थमज्जनवृत्तान्तसूचनं, ततः मथुराप्रवेश-तद्वर्णनं, मथुरां प्रविशति श्रीकृष्णे खेचर्य्यादीनां वार्त्तानिचयः, श्रीकृष्णेन सपरिकररजकनाशनं, श्रीकृष्णस्य वायकं प्रत्यनुग्रहः, श्रीकृष्णेन सुदाममालाकारस्य मनोऽभीष्टपूरणं, कुब्जाया ऋज्वीकरणं, श्रीकृष्णेन धनुर्भङ्गः, शकटावमोचनं गत्वा श्रीरामकृष्णयो— र्विश्रमणं, श्रीराधासदसि श्रीकृष्णानुमोदितकथकयोः कुब्जाकथाकथनं ॥ ७०—१०३ ॥

पञ्चमपूरणे कंसविध्वंसनं ।—

तत्र प्रथमं तावत् कुवलयापीड़ध्वंसनं, श्रीकृष्णमुद्दिश्य पुरस्त्रीणां कथोपकथनम्, चानूरमुष्टिकनाशनं, कंसवधः, श्रीरामकृष्णयोरुग्रसेनसम्भाषणं श्रीकृष्णोग्रसेनयोः सम्वादः, श्रीकृष्णेन उग्रसेनाय राजमुकुटसमर्पणं, श्रीकृष्णस्य श्रीनन्दश्रीदामादीन् प्रति निजनिजावासगमनादेशः, प्रेतानां कार्य्यसन्निधानानन्तरं पितृभवनं गत्वा श्रीकृष्णरामाभ्यां पितृमातृनमस्करणं, श्रीकृष्णेन उद्धवसम्मिलनं, सहरामोद्धवकृष्णेन कंसपत्नीनां वाष्पनिर्व्वापणं, उग्रसेनाय सिंहासनदानं, श्रीरामकृष्णोद्धवैः सह श्रीवसुदेवस्य नन्दसमीपगमनं, स्वगृहे भोजनाय वसुदेवेन नन्दादीनां निमन्त्रणं, व्रजवन्दिभिः श्रीकृष्णावन्दनं, कथान्ते श्रीराधिकासदसि स्निग्धकण्ठस्य सम्वादः ॥ १०४—१४४ ॥

षष्ठपूरणे व्रजपतिविसर्ज्जनकष्टकष्टं ।—

तत्र प्रथमं तावत् यदुराजसभायां श्रीकृष्णस्य गोकुलगमनप्रार्थना, तद्विषये पुरवासिनां निषेधः, प्रसङ्गतः श्रीकृष्णस्य नन्दनन्दनत्वस्थापनं, रुदता नन्देन बाहुभ्यां श्रीकृष्णमालिङ्ग्य तन्मुखसन्दर्शनं, श्रीनन्दं प्रति श्रीकृष्णस्य प्रबोधमयवचनं, नन्दकृष्णयोः परस्परं कथोपकथनं, स्वजननीयशोदासान्त्वनार्थं श्रीदामहस्ते श्रीकृष्णेन स्वहस्तलिखितलिपिप्रदानं, श्रीकृष्णं प्रति श्रीदाम्नः काकुवचनं, श्रीकृष्णेन मधुमङ्गलं प्रति व्रजागमनस्वमङ्गलकामनापूर्व्वकभगवतीपूजनादेशः, स्तोककृष्णसुबलौ प्रति श्रीकृष्णेन सादरमयवचननिजालङ्कारप्रदानं, समागतवसुदेवाद्यैः नन्दादीन् प्रति यथोपयुक्तरत्नपरिच्छदादिसमर्पणं नन्दादीननुज्ञाप्य वसुदेवादिभिः सह श्रीकृष्णस्य पुरगमनं, बलं प्रति श्रीनन्दस्य सखेदवचनं व्रजं प्रत्यागमनञ्च ।

व्रजेशव्रजप्रवेशो नाम सप्तमं पूरणम् ।—

अष्टमपूरणे अध्ययनसपष्टप्रतिष्ठं ।—

सान्दीपनिवन्दनं,सान्दीपनिना सह तयोः स्वपरिचयविषयककथोपकथनम्, सान्दीपनिना तदन्तेवासिनः प्रति रामकृष्णयोः प्रशंसनम्, सान्दीपनितत्पत्न्योः रामकृष्णादिविषयककथोपकथनम्, गुरुपत्नीनिदेशतः श्रीकृष्णादीनां काष्ठाहरणगतप्रसङ्गवर्णनम्, सान्दीपनिना श्रीरामकृष्णयोरध्ययनविषयकप्रशंसनम्, गुरुगृहे वाससमये निशायां जाग्रत्स्वप्नावस्थायामेव अग्रजं प्रति सजलनयनस्य श्रीकृष्णस्य व्रजवृत्तान्तकथनम्, तत् श्रुत्वा सजललोचनस्य श्रीरामस्य श्रीकृष्णम्प्रति सान्त्वनमयवचनम्, ततः भ्रातृद्वयस्य निद्रा, निद्राभङ्गान्ते व्रजनागरीरुद्दिश्य श्रीकृष्णस्य सखेदवचनमिति ॥ १८०—२०३ ॥

गुरुतनयसमानयनं नवमं पूरणम् ।—

तत्र विषयाः—श्रीरामकृष्णयोरध्ययनसमापनानन्तरं सान्दीपनिना तयोः समावर्त्तनवर्त्तनम्, श्रीरामकृष्णकर्त्तृकगुरुदक्षिणाप्रदानसमये पत्नीनिदेशतः सान्दीपनेस्तौ प्रति जलधिमग्नस्वतनयप्रार्थनम्, गुरोरादेशतः श्रीरामकृष्णयोः प्रभासतीर्थगमनम्, श्रीरामकृष्णदर्शनतः समुद्रस्यानन्दोत्थस्वभाव-तत्प्रणमन-स्तवनादि,श्रीकृष्णसमुद्रयोः कथोपकथनम्, श्रीकृष्णेन पञ्चजनं निहत्य शङ्खग्रहणम्, ततः श्रीरामकृष्णयोर्यमपूरगमनम्, श्रीकृष्णेन शङ्खनादस्वदर्शनदानादिभिः नरकस्थसर्व्वपापिमोचनम्, श्रीकृष्णमवलोक्य यमस्य तं प्रति प्रणति-स्वभाग्यमहिमदैन्यतामयवचनम्, यमेन सह श्रीकृष्णस्य गुरुपुत्रविषयकविविधकथोपकथनम् । ततः गुरुपुत्रमादाय गुरुगृहगमनानन्तरं आचार्य्यदम्पत्यौ प्रति दक्षिणाप्रतिरूपकत्वेन तत्पुत्रप्रदानम्, श्रीरामकृष्णदर्शनार्थं अन्तेवासिनामागमनम्, अवन्त्यधिपतिना श्रीरामकृष्णौ स्वगेहं नीत्वा तौ प्रति बहुसम्मानम्, गुरोराज्ञामवलम्ब्य तयोः मथुरागमनतद्विवरण-

कृष्णयोः सतोः कृष्णं प्रति स्निग्धकण्ठस्य मनःकष्टवर्णनमिति ॥ २४९—१८३ ॥

उद्धवस्फुरदुद्धवं नाम द्वादशं पूरणम् ।—

तत्र प्रथमं मुहूर्त्तं मूर्च्छाभावप्राप्तां श्रीराधां प्रति सखीनां विलापवचनम्, उद्धवस्य श्रीकृष्णतत्प्रेयसीगणमाहात्म्यकथनम्, ततः गोपीगणं प्रति उद्धवस्य श्रीकृष्णकथितसम्वादप्रकाशनम्, उद्धवं प्रति श्रीराधादीनां श्रीकृष्णविषयकविविधवचनम्, नानाविधतत्त्वोपदेशेन उद्धवस्य गोपीगणसान्त्वनम्, नन्दादीनामनुमोदनानन्तरं उद्धवस्य मथुरागमनम्, उद्धवगमने व्रजवासिनां रोदनं, उद्धवागमनापेक्षायां श्रीकृष्णस्य चाञ्चल्यादि, श्रीकृष्णं प्रति उद्धवस्य व्रजवासिनामवस्थावर्णनम्, यशोदाप्रदत्तभोज्यादि—नन्दादिप्रदत्तहारादिप्राप्त्यनन्तरं श्रीकृष्णस्य रोदनादिवर्णनं ॥ २८४—३२१ ॥

जरासन्धबन्धनं नाम त्रयोदशं पूरणम् ।—

तत्र प्रथमं मधुकण्ठस्य श्रीकृष्णकर्तृकसैरिन्ध्रीगृहगमनविषयकचिन्तनम्, मथुरातो व्रजम्प्रति दूतद्वयस्यागमनम्, ताभ्यां नन्दं प्रति माथुरमङ्गलकथनं, ततः पुनरागतदूतद्वयस्य नन्दं प्रति मथुरायां जरासन्धागमनकारण-तद्युद्ध-श्रीकृष्णकर्तृकतद्बन्धन-तदनुमोचन जरासुतानुताप-स्वगृहगमनादिकथनम्, श्रीकृष्णं प्रति व्रजबन्दिनां जरासन्धबन्धनविषयकवन्दनम्, श्रीराधामाधवसदसि मधुकण्ठस्य जरासिन्धुयुद्धादिवर्णनमिति ॥ ३२२—३४१ ॥

यवनजराभवनिर्जयजवं चतुर्द्दशं पूरणम् ।—

तत्र विषयाः—अग्रजानुजादिभिः सह नन्देन स्वपुत्रस्य सत्त्व-शत्रुनाशनकस्वस्त्ययनं, जरासन्धसंग्रामविवरणं, श्रीकृष्णेन विदर्भ-नगरगमन कथकैशिकाभीष्टपूरणं, ततः जरासन्धनिर्व्वन्धं श्रुत्वा मथुरा-गमनं, द्वारकापुरीनिर्म्माणं, योगवैभवेन द्वारकायां यादवानां नयनं, कालयवनकर्त्तृकमथुराक्रमणं, मुचुकुन्ददृष्ट्या तस्य निधननिवरणं, श्रीरामकृष्णयोः म्लेच्छकोटिनाशनं, स्वधाम्नि तद्धनादिप्रेरणं, अष्टो-विंशतिसेनापरिवृतमागधस्य पुनः मथुरागमनं, तद्भयादिव श्रीराम-कृष्णयोः प्रवर्षणपर्व्वतारोहणं, जरासन्धेन तद्दाहः, श्रीरामकृष्णौ दग्धौ इति मन्यमानस्य तस्य ततो निवर्त्तनं, श्रीरामकृष्णयोर्द्वारकागमनं, व्रजवन्दिनां पुरःश्लोकविषयमुद्दिश्य श्रीकृष्णवन्दनं,श्रीराधामाधवसदसि स्निग्धकण्ठस्य वचनमिति ॥ ३४२—३७८ ॥

श्रीबलभद्रविवाहभद्रप्रपञ्चः पञ्चदशं पूरणम् ।—

तत्र प्रथमं तावत् श्रीकृष्णद्वारकागमने नन्दादीनां परस्परं मन्त्रणाभयवचनं, प्रसङ्गतः द्वारकावर्णनं, द्वारकायां कुकुद्मिमहाराज-स्यागमनं, द्वारकापतिना सह तस्य स्वकन्याविवाहविषयकविवरणं, श्रीबलदेवविवाहवर्णनं, ततो नन्दादीन् प्रति श्रीराधादिसखीः प्रति च श्रीकृष्णस्य पृथक् पृथक् पत्रिकाप्रेरणं, तेषां तासाञ्च तं प्रति पत्रप्रदानं, कथकस्य पूरणसमापनविवरणवर्णन—मिति ॥ ३७९—३९१ ॥

रौक्मिणीपाणिपीड़नक्रीड़नं षोड़शं पूरणम् ।—

तत्र विषयाः—व्रजराजसभायां स्निग्धकण्ठस्य कथारम्भः, ततः श्रीकृष्णसमीपे कस्यचित् विप्रस्यागमनं, तं प्रति श्रीकृष्णस्य पूजनं

ततः आगमनकारणजिज्ञासा, विप्रस्य श्रीकृष्णं प्रति रुक्मिणी-लिखितपत्रप्रदानं, श्रीकृष्णानुमत्या विप्रकर्त्तृकपत्रपठनं, श्रीकृष्णस्य विदर्भनगरगमनं, तत् श्रुत्वा स्नेहानुगततया विपक्षकर्त्तृकानिष्टशङ्कया श्रीबलदेवस्य तत्र गमनं, ततः रौक्मिणीहरणप्रवन्धवर्णनं, श्रीराम-कृष्णयोर्विपक्षपराजयपूर्व्वकरुक्मिवैरूप्यकरणं, रौक्मिण्या सह तयो-र्द्वारकागमनं, श्रीकृष्णविवाहविषये नन्दस्यानुमतिसमानयनार्थं द्वार-कातः श्रीवसुदेवप्रेरितयोर्दूतयोः नन्दसमीपे आगमन-प्रणाम-कुशलादि-कथन-वसुदेवलिखितपत्रप्रदानं, सर्व्वैः सह परामृश्य नन्दस्य श्रीकृष्ण-विवाहविषयकस्वानुमोदनपत्रप्रेरणं,ततः श्रीकृष्णकर्त्तृकरौक्मिणीपाणि-ग्रहणं, व्रजवन्दिनां श्रीकृष्णवन्दनं, श्रीराधासदसि स्निग्धकण्ठस्य श्रीकृष्णविवाहविषयकप्रवन्धवर्णनमिति ॥ ३९२—४२६ ॥

समाप्तपरविवाहसप्तकं सप्तदशं पूरणम ।—

तत्र प्रथमं मथुरातः समागतदूतयोः नन्दादीन् प्रति रुक्मिणी-पुत्रप्रद्युम्नहरणविवरणवर्णनं,ततः स्यमन्तकोपाख्यानं,द्वारकायां श्रीकृष्ण-कर्त्तृकजाम्ववतीसमानयनं, सत्राजिते मणिप्रदानं, स्वभयापनयनार्थं सत्राजितः श्रीकृष्णं प्रति स्वकन्यासत्यभामाप्रदानं, व्रजवन्दिनां श्रीकृष्णवन्दनं, श्रीरामकृष्णयोर्हस्तिनापुरगमनं, निद्रितसत्राजितं हत्वा, शतधन्वना तन्मणिग्रहणं, तैलद्रोण्यां मृतं प्रास्य सत्यभामायाः श्रीकृष्णसदनगमन-तद्वृत्तान्तकथनं, तया सह श्रीरामकृष्णयोर्द्वारका-गमनं, ततः श्रीकृष्णेन शतधनुर्हननं, श्रीरामस्य मिथिलागमनं, ततः श्रीरामकृष्णयोरिन्द्रप्रस्थगमनमिलनादिसमयोचितकार्य्यसमाधानं, श्रीरामस्य द्वारकागमनं, श्रीकृष्णकर्त्तृककालिन्दीग्रहणविषयकविवरणं, पाण्डवादीन् रक्षित्वा कालिन्द्या सह तस्य द्वारकागमनं, सूर्य्यस्य

द्वारकागमनं, श्रीकृष्णस्य पाण्डौ कालिन्दीसमर्पणं, श्रीकृष्णस्य मित्रविन्दासत्यालक्ष्मणानां यथाक्रमं पाणिग्रहणं, मधुकण्ठस्य श्रीराधामाधवसदसि अष्टमहिषीनां नामधेयपरिचयविषयकविविधवाक्यवर्णनमिति ॥ ४२७—४८६ ॥

नरकसंहरण-पारिजातहरण-युगपदष्टसहस्रयुगकन्यापाण्याग्रहणमष्टादशं पूरणम् ।—

तत्र इन्द्रस्य द्वारकागमनविवरणं, श्रीकृष्णं प्रति तस्य नरकासुरदौरात्म्यविषयवर्णनं, श्रीकृष्णकर्त्तृकनरकासुरविनाश-तद्विवरणं, पृथिव्याः श्रीकृष्णं प्रति स्तवनं, नरकासुरहृतषोडशसहस्रकन्यानां श्रीकृष्णं दृष्ट्वा स्वस्वव्यवहारादिविविधवचनं, श्रीकृष्णकर्त्तृकतद्द्वारकाप्रेरणविवरणं, सत्यभामया सह श्रीकृष्णस्य स्वर्गगमनादितिकुण्डलप्रदानदेवनिर्यातनपूर्वकपारिजातहरणं, सत्याद्रिपारिजातं गृहीत्वा तया सह श्रीकृष्णस्य द्वारकागमनं, ततो नरकासुरहृतकन्यानां पाणिग्रहणं, व्रजवन्दिनां श्रीकृष्णं प्रति वन्दनं, । राधामाधवसदसि राधादि—सखीः प्रति श्रीकृष्णकर्त्तृकदिव्यालङ्कारादिप्रेरणविषयककथावर्णनमिति ॥ ४८७—५१४ ॥

स्वाणेशविजयनिर्देशमेकोनविंशं पूरणम् ।

तत्र प्रथमं तावत् व्रजराजसभायां मधुकण्ठस्य कथारम्भः, ततः श्रीकृष्णपुत्रप्रद्युम्नस्य शम्बरविनाशविवरण-सरतिस्वगृहगमनतद्विवरणं, स्यमन्तकं गृहीत्वा अक्रूरस्य काशीपलायन-यागदानाद्यनुष्ठानं, श्रीकृष्णेन स्वेच्छया द्वारकायामरिष्टप्रादुर्भावमुत्पाद्य श्रीकाशीधामतोऽक्रूरसमानयनं, अक्रूर एव मणिं धारयतु श्रीकृष्णस्य इत्यङ्गी-

कारः, अनिरुद्धविवाहे वलदेवकर्तृकरुक्मिकालिङ्गादिविनाश-तद्विवरणं,उषायाः स्वप्नेऽनिरुद्धदर्शनं,तत्सख्याः चित्रलेखायाः द्वारकातो योगप्रभावेणानिरुद्धसमानयनं, उषया रममाणस्यानिरुद्धस्य वाणेन वन्धनं, श्रीनारदमुखादनिरुद्धस्य वाणकर्तृकवन्धनश्रवणानन्तरं उग्रसेनादेशतः द्वादशाक्षौहिणीसेनासहितस्य श्रीकृष्णस्य वाणासुरपुरगमनं, वाणयादवयुद्धविवरणं, यादवकर्तृकदानवसेनानिपातनं, श्रीकृष्णस्य वैष्णवज्वरेण शैवज्वरपोड़नं, शैवज्वरकर्तृककृष्णस्तवनं, कृष्णेन वाणवाहुच्छेदनं, श्रीशिवेन श्रीकृष्णस्तवनं, कृष्णस्य वाणं प्रत्यनुग्रहः, उषानिरुद्धाभ्यां सह श्रीकृष्णादीनां द्वारकागमनं, व्रजराजादीनां सान्त्वनार्थं व्रजं प्रति कृष्णेन दूतप्रेरणं, व्रजराजं प्रति दूतद्वयस्य कृष्णोक्तसान्त्वनमयवचनकथनं, व्रजवन्दिनां पूरणरथविषयमुल्लेख्य श्रीकृष्णस्तवनं, श्रीराधामाधवसभायां मधुकण्ठस्य सुवलपत्रान्तःकृष्णदत्तसान्त्वनमयपत्रपठनं, कथकेन समापनमिति वर्णितं ॥ ५१५-५४२ ॥

रामव्रजागमनकामनापूरणं नाम विंशं पूरणम् ।—

तत्र विषयाः— श्रीकृष्णेन श्रीवलरामं प्रति व्रजागमनविषयकस्वाभिप्रायप्रकटनगोपगोपीगणविषयकविविधकथनं, वलस्य व्रजसदनगमनभावावेशसदेशरूपगोपरूपधारणं,नन्दगृहं गत्वा तं प्रति यशोदां प्रति च वलस्याभिवादनं,वलं प्रति तयोः सादरसम्भाषणाशीर्वादादि,वलस्य नन्दादिगुरुजनयशोदादिगुरुपत्नीजनवयस्यकृष्णप्रेयसीस्वप्रेयसीभिः सह पृथक् पृथक् यथासम्भवं मिलनाभिवादनकुशलप्रश्न सादरवचनकथोपकथनं, स्वस्मिन्नासक्तवतीनां गोपीनां गन्धर्वविधिना विवाहः यमुनाकर्षणतन्मोचन-स्वप्रेयसीसहितविहारादितत्त्वसिद्धान्तवर्णनं ॥ ५४३—५७१ ॥

एकविंशपूरणे पौण्ड्रकायुद्धसंग्रामश्रवणजरामद्वारकाधाम
प्रति गमनं ।—

तत्र प्रथमं तावत्, व्रजराजसदसि मधुकयठस्य कथारम्भः, ततो मथुरातः समागतदूतद्वयस्य नन्दादीन् प्रति द्वारकावृत्तान्तकथनं, श्रीकृष्णेन पौण्ड्रककाशीराजनिपातनं, काशीराट्पुत्रस्य सुदक्षिणस्य श्रीशिवाराधनं, शिवात् वरप्राप्तिः, तद्बलात् श्रीकृष्णेन सह तद्युद्धं, श्रीकृष्णकर्त्तृकतन्निपातनं, बलदेवस्य द्वारकागमने व्रजवासिनामवस्था-वर्णनं, बलेन सह श्रीकृष्णस्य व्रजविषयककथोपकथनं, व्रजस्यावस्थां श्रुत्वा कृष्णस्यावेशान्तरं, व्रजवन्दिनां, पुण्ड्रकवधादिविषयमुल्लेख्य, कृष्णस्तवनं, श्रीराधामाधवसभायां कथकस्य शुकशिक्षादिविविध-विषयवर्णनमिति ॥ ४७२—५८६ ॥

द्वाविंशपूरणे द्विविदहस्तिनपुरध्वस्तिः ।—

तत्र प्रथमं सोद्धवश्रीबलदेवस्य व्रजागमनं, व्रजवासिनां आश्वास-वाक्येन कृष्णविरहव्याधिविदुरीकरणं, नरकासुरविनाशात् क्रोध-परतन्त्रस्य द्विविदस्य कृष्णाश्रितदेशोपद्रवीकरणं, वैरतकपर्व्वते स्वप्रियाभिः सह रममाणस्य रामस्य समीपे द्विविदस्यागमनकिलकिल-शब्दकरणं तं प्रति गोपीनां परिहसनं, श्रीरामस्य तेन सह युद्ध-तन्नाशनं, साम्बेन लक्ष्मणाहरणं, तेन सह भीष्मादीनां युद्धं, भीष्मादि-कर्त्तृकसाम्बबन्धनं, दुर्य्योधनादीन् प्रति उग्रसेनादेशं विज्ञापनार्थं बलदेवस्य हस्तिनपुरगमनं, दुर्य्योधनं प्रति उग्रसेनकथितसाम्बमोचना-देशः, तदादेशास्वीकरणात् बलेन गङ्गायां हस्तिनपुरक्षेपणं, निरुपायं निरीक्ष्य लक्ष्मणया सह साम्बमग्रे विधाय बलं प्रति कुपुणां काकुक्तिः, तेषु तस्यानुग्रहः, वधूपुत्राभ्यां सह सङ्कर्षणस्य द्वारकागमनं, व्रज-वन्दिनां श्रीरामवन्दनं, श्रीराधामाधवसभायां कथकस्य सङ्कर्षण-विषयककथा, ततः समापनं ॥ ५९०—६०५ ॥

पुरुसुखक्षेत्रकुरुक्षेत्रयात्रानाम त्रयोविंशपूरणं

तत्र विषयाः, श्रीभागवतीयक्रममुल्लेख्य सिद्धान्तकरणं, श्रीव्रजेश्वर्य्या सह श्रीव्रजेश्वरस्य कुरुक्षेत्रतीर्थगमनविषयकमन्त्रणा, श्रीव्रजराजं प्रति प्रेयसीः प्रति च श्रीकृष्णस्य पत्रिकाप्रेरणं, व्रजवासिनां कुरुक्षेत्रगमनं, श्रीवसुदेवरामकृष्णैः सह नन्दादिव्रजवासिनां मिलन-कुशलसम्भाषण–यथायोग्याशीर्व्वाद–प्रणामालिङ्गनादि, व्रजेश्वरीं प्रति रोहिणीदेवक्योः प्रशंसनमयवचनं, व्रजरमाणामवस्थावर्णनं, श्रीकृष्णस्य समासक्तिकथनं, श्रीकृष्णस्य व्रजसुन्दरीणाञ्च परस्परावलोकने तत्समयोचितजातावस्थावर्णनं, श्रीकृष्णकर्त्तृकस्वप्रेयसीप्रसादना-लिङ्गन–चुम्बन–सान्त्वनामयवचनं, श्रीकृष्णस्य तत्प्रेयसीनाञ्च परस्परं कथोपकथनं, गोपीभिः सह तस्य विहारः, ततः श्रीकृष्णप्रभृति-यादवैः सह समागतयुधिष्ठिरादीनां परस्परं सादरसम्भाषणा-लिङ्गनप्रणामकुशलप्रश्नादि वर्णितं ॥ ६०६–६३५ ॥

व्रजवासिव्रजव्रजनं नाम चतुर्व्विंशपूरणं।

तत्र प्रथमं तावत्, सूर्य्यग्रहणे समागतमुनीनां श्रीकृष्णं प्रति विनयवचनस्वस्वमनोगतभावजल्पनं, तान् प्रति वसुदेवस्य कर्त्तव्या-कर्त्तव्यविषयनिवेदनं, वसुदेवस्य प्रश्नमाकर्ण्य नारदस्य तान् मुनीन् प्रति तत्प्रश्नकारणवर्णनं, मुनिगणकर्त्तृकयज्ञकरणोपदेशतत्-समाधानं, वसुदेवस्य नन्दं प्रति सखेदवचनं, स्वगृहगमनाय नन्दस्य वसुदेवं प्रति स्वमतप्रकाशनं, श्रीरामकृष्णौ प्रति वसुदेवेन नन्द-प्रार्थितविज्ञापनं, श्रीकृष्णव्रजगमनविषयमुल्लेख्य वसुदेवेन सह श्रीरामस्य कथोपकथनं, श्रीकृष्णस्य व्रजगमनविषये वसुदेवस्या-ङ्गीकारः, श्रीरामकृष्णोद्धवैः सह नन्दसमीपं गत्वा वसुदेवस्य तं प्रति यथोपयुक्तविविधवाक्यवर्णनं, नन्दादीनां व्रजगमनसमये जाता-

---

शुद्धसम्विदुद्भवमन्त्रणातन्त्रंनाम पञ्चविंशपूरणम् ।

षड्विंशपूरणे जरासन्धतत्कृतवन्धराजवृन्दमोचनम् ।

उनत्रिंशपूरणे भाविकथाप्रयाणप्रथानूनं ।

तत्र श्रीकृष्णागमनविषयकप्रमाणनिरूपणं, पूर्णमासीवृन्दयोः परस्परं श्रीकृष्णकर्त्तृकव्रजागमनविषयकसिद्धान्तस्थिरीकरणं पूर्णमास्याः वृन्दां प्रति कृष्णागमनविषयकस्वस्वप्नविवरणमितिवर्णितं ॥ ७३७–७७८ ॥

त्रिंशपूरणे पुनर्व्रजदेशकेशवप्रवेशशंसनं ।—

तत्र प्रथमं तावत् दन्तवक्रस्य राजसूययज्ञानुपस्थितकारणनिर्द्धारणं, शिशुपालनिधनविवरणावगतान्तरं शिवमाराध्य हिरण्याक्षवत् तस्मात् वरप्रापणं ततः श्रीकृष्णेन सार्द्धं युद्धकामस्य तस्य मथुरागमनं नारददन्तवक्रयोः कथोपकथनं, नारदवाक्येन श्रीकृष्णस्य मथुरागमनदन्तवक्रविदूरथनाशनं ततः व्रजागमनं श्रीकृष्णं निरीक्ष्य व्रजवासिनामवस्थाकथनं, श्रीयशोदानन्दौ प्रति पौर्णमासीवचनं, व्रजवासिनः प्रति श्रीकृष्णस्य यथायोग्यसादरसम्भाषणालिङ्गनाभिवादनादि, ततः तस्य स्नानालङ्कार-परिधान-भोजनादि, व्रजवन्दिनां श्रीकृष्णवन्दनं, श्रीराधा-सभायां मधुकण्ठस्य श्रीकृष्णागमनविषयक कथावर्णनमिति ॥ ७७९–८११ ॥

एकत्रिंशपूरणे श्रीराधादिवाधासमाधानं ।

तत्र विषयाः, व्रजपुरपुरन्ध्रीभिः सह विराजमानायाः श्रीयशोदायाः सदने सखिभिः सह श्रीकृष्णस्य गमनं, ततः मातापुत्रयोर्व्यवहारः, ततः श्रीनन्दसभागते कृष्णे नन्दादिगोपगणदेवद्विजादीनां व्यवहारविवरणं, व्रजेश्वरादिभिर्वृद्धैः स्ववयस्यैश्च सह श्रीकृष्णस्य गोदर्शनार्थं गोष्ठगमनं, कृष्णं दृष्ट्वा गवादीनां व्यवहारः, तस्य गोगृहगमनदुग्धदोहनादि, श्रीकृष्णे व्रजविराजमाने दारुकस्य

चिन्तनं, पूर्णमासीकृष्णयोः परस्परकथनं, पूर्णमास्याः चिन्तनं; श्रीराधादीन् प्रति तस्या आशीर्व्वादः, ततः वृन्दापौर्णमास्योः परामर्शः, श्रीराधायाः समीपे पौर्णमास्याः पत्रीप्रेरणं, ततः राधा-बाधासमाधानं, श्रीकृष्णं प्रति पौर्णमास्या वचनम् ततः समापनम् वर्णितमिति ॥ ८१२-८४२ ॥

द्वात्रिंशपूरणे सर्व्वसमाधानपर्व्वपर्व्वणि ।

तत्र प्रथमम् सरथं सारथिमवलोक्य सन्दिग्धचित्तान् श्रीनन्दादीन् प्रति श्रीकृष्णस्य वचनम्, श्रीकृष्णं प्रति व्रजवासिनां व्रजवासविषयकनिवेदनं, श्रीकृष्णस्य दारुकम् प्रति रोहिणीवलदेवोद्धवशुकशारिकादिसमानयनविषयकविज्ञापनं, दारुकस्य द्वारकागमनं, श्रीरोहिणीवलोद्धवानां व्रजागमनं, तेषामागमने व्रजवासिनामानन्दोत्थविवरणं, स्तोककृष्णसुबलकर्त्तृकवेणुशृङ्गादिप्रदानपूर्व्वकरामकृष्णालङ्कृतकरणं, उद्धवद्वारा श्रीकृष्णप्रेयसीः प्रति वलस्याशीर्व्वादप्रेरणं, श्रीकृष्णविवाहार्थं पौर्णमास्या यशोदानन्दौ प्रति विज्ञापनं, यशोदानन्दाभ्यां सह पौर्णमास्याः श्रीकृष्णविवाहविषयककथोपकथनं, व्रजवासिनां प्रत्ययार्थं पौर्णमास्या विष्णुमायासमानयनं, विष्णुमायायाः नन्दादिव्रजजनान् प्रति श्रीराधादिभिः सह श्रीकृष्णस्य विवाहसम्मतिप्रदानं, ततस्तस्याः अन्तर्धानं, श्रीराधादीनां विवाहानङ्गीकरणं, पूर्णमासीस्मृतिवशात् दुर्व्वाससो व्रजागमनं, व्रजवासिनः प्रति तस्य विवाहविषयसम्मतिप्रदानं, राधादीनामग्निपरीक्षणं, तस्यान्तर्द्धानं, पौर्णमास्या व्रजराजसदनगमनं, तत्कुलविषयकविविधविवरणकथनं, ज्योतिर्व्विद्भिर्लग्नस्थिरीकरणं, श्रीरामकृष्णयोस्तिलकप्रदानं, मधुमङ्गलस्य वचनं, पूरणसमापनमितिवर्णितं॥ ८४३-८८२ ॥

त्रयस्त्रिंशपूरणे श्रीराधामाधवाधिवासप्रसाधनं ।—

तत्र प्रथमं श्रीरामविवाहक्षणमनूपलक्षणं कृष्णविवाहमङ्गल-प्रसङ्गसङ्गतकरणं ततः श्रीराधाकृष्णयोरधिवासे गोपीनां सङ्गीतं वरस्नपनवेशरचनादि, श्रीराधायास्तत्सखीनाञ्च परस्परमुक्तिप्रत्युक्ति-विषयविवरणं, सखीनां श्रीराधाधिवाससमयकमङ्गलसङ्गीतं, श्रीराधायाः स्नपनाङ्गनाञ्जनपरिधानवेशादि, मुखसन्दर्शनाय कस्याश्चित् सख्या श्रीराधाहस्ते दर्पणसमर्पणं, सखीसहितश्रीराधावचनं श्रीराधाकृष्णयोरधिवासविवरणसमाधानवर्णितमिति ॥८८३-९०६ ॥

विविधालङ्कारमयराधाकृष्णालङ्कारसमयमयं चतुस्त्रिंशपूरणं

तत्र प्रथमं वरवधूव्यवहारवर्णनं ततः श्रीराधिकायाः श्रीकृष्णस्य च स्नपनमङ्गलवेशरचनाप्रत्येकावयवसौन्दर्य्यविवा-होपयोगिवसनपरिधानादिवर्णनम् ॥ ९०७-९३५ ॥

पञ्चत्रिंशपूरणे श्रीराधामाधव-विवाहनिर्व्वाहः ।

तत्र प्रथमं श्रीव्रजराजकर्त्तृकनान्दीमुखादिसम्पादनं वर-यात्रायां विविधवाद्यवादनदेवीगणकर्त्तृकपुष्पवर्षणकृष्णरूप-दर्शनोत्थमुग्धभावमङ्गलसङ्गीततत्समयोचितसर्व्वविवरणनिरूपणं श्रीकृष्णमवलोक्य मुग्धानां देवानां देवीनाञ्च दौहिकाद्यवस्थां दृष्ट्वा मधुमङ्गलस्य तान् प्रति यष्टिप्रदर्शनादिविविधपरिहसनं, श्रीकृष्णागमनं श्रुत्वा श्रीराधाया अवस्थाकथनं, वृषभानुकर्त्तृक-नान्दीमुखादिकार्य्यसम्पादनं, वरकन्याकुलानां व्यतिमिलनो-पवेशनसम्भाषनादि, विमानचारिणीनां परिचितापरिचितदेवीनां प्रेममयवचनं, चन्द्रशालिका विराजमानानां नारीणां, नर्म्मगालि-शर्म्मसङ्गीतं श्रुत्वा मधुमङ्गलस्य गालिप्रदानादिविविधपरिहास-

वचनं, अन्तपुरमायान्तं वरं दृष्ट्वा पुरवनितानां कृतानुष्ठानं वृष-भानुकर्त्तृकयथाविधिकन्याप्रदाननारीगणाचारादिविविधविवरणं श्रीकृष्णस्य वधूभिः सह स्वभवनगमनं श्रीव्रजेश्वर्य्या नववधू-लालनं, ततः पूरणसमापणवर्णितमिति ॥ ९३९–९७५ ॥

षट्त्रिंशपूरणे श्रीमाधवराधादिव्यतिषङ्गदिव्यमङ्गलम्।

तत्र प्रथमं तावत् श्रीराधामाधव-सभायां मधुकण्ठस्निग्ध-कण्ठयोरनुक्रमेण कथारम्भः, ततः सन्मिलनव्यापारे श्रीकृष्णस्य तत्प्रेयसीनाञ्च सङ्कोचादिव्यवहारविवरणं पौर्णमासीवचनानु-सारतः गोविन्दं प्रति वृन्दाया वचनं, वृन्दाकृष्णयोः परस्परं कथनं, कृष्णेन सह राधादीनां मिलनार्थं बृन्दापौर्णमास्यो-रूपायनिद्धारणमयवचनं श्रीकृष्णपौर्णमास्योः परस्परं मिलन-विषयकप्रस्तावनं वृन्दायाः स्वमनः प्रति स्वकीयपत्नी-परकीय-पत्नी-व्यवहारविषयकवचनं, पौर्णमास्यादेशतः नारायणाराध-नार्थं राधादीन् प्रति यशोदायाः बचनं, मधुमङ्गलेन सह श्रीकृष्णस्य निकुञ्जगमनं, श्रीकृष्णं प्रति मधुमङ्गलस्य परि-हासवचनं श्रीराधादीनां निभृतकुञ्जगमनं पौर्णमासीनिदेशतः व्रीडितचित्तानां श्रीराधादीनां, कुञ्जाभ्यन्तरविराजितकृष्णसदन-गमनं एकासनगतराधाकृष्णवर्णनपूजनादि, सखीनां कुञ्जतो बहिर्गमनं, तयोर्मिलनादि, सखीनां प्राभातिकरागमयसङ्गीतं, ललिताविशाखयोः सम्वादः, श्रीकृष्णं प्रति श्रीराधायाः स्वसखी-ललिताविशाखादि सङ्गविषयकप्रार्थनं, ततः रासकुञ्जभङ्गस्वस्व-गृहगमनं विविधलीलावर्णितमिति ॥ ९७६–१०२९ ॥

सप्तत्रिंशपूरणे सर्व्वसुखसम्पदवलोकश्रीगोलोकदेशप्रवेशः

तत्र प्रथमं श्रीव्रजराजं प्रति श्रीकृष्णस्य कालिन्दीदक्षिण-पारगतवृन्दावनगमनविषयकनिवेदनं, श्रीकृष्णं प्रति श्रीनन्दस्य वचनं, मधुकण्ठस्य मानसिकवाचिकविवरणं, श्रीकृष्णं प्रति गोपानां वचनं, गोपगोपीवृन्दगोलोकधामनयनाय दारुकं प्रति श्रीकृष्णस्य रथसुसज्जितकरणादेशः, श्रीनन्दादिव्रजवासिनां रथारोहणगोलोकधामप्रवेशः, तद्धामतद्धामस्थसर्व्वपरिकरविवरणगोचारणादिविविधलीलानिरूपणं, व्रजवन्दिनां श्रीकृष्णं प्रति वन्दनं मधुकण्ठस्य श्रीराधाकृष्ण-सदसि कथाप्रथनं, श्रीराधादिकाः प्रति श्रीकृष्णस्य धामविषयकविवरणकथनं, श्रीकृष्णं प्रति श्रीराधादीनां वचनं, श्रीराधादिकाः प्रति श्रीकृष्णस्य वृन्दावनधामशोभातत्रस्थजीवस्वस्वजात्युचितव्यवहार दर्शनार्थमनुमोदनमयवचनं, स्वप्रेयसीभिः सह रासक्रीडनं, मधुकण्ठस्निग्धकण्ठौ प्रति श्रीकृष्णादीनामनुग्रहः, श्रीराधाकृष्णौ प्रति तयोर्वरप्रार्थनं, पूर्व्वचम्पूकथामनुविन्दमानानां सख्यानन्दिनीनां कासाञ्चित् वन्दिनीनां श्रीराधां प्रति वन्दनं, मधुकण्ठस्निग्धकण्ठयोः स्वभवनगमनं, सुखातिशयलभमानानां मधुमङ्गलादीनां स्वस्वगृहगमनं, परमानन्दवतीनां ललितादिसखीनां स्वस्वावसरविसरानुरूपसेवोपयोगितत्तद्वस्तूपादानप्रदानमय— राधाकृष्णसेवनं, श्रीराधाकृष्णयोः दिव्यशय्याशयनमिलनादि, ग्रन्थसमापनकालनिर्द्धारणं ग्रन्थकारस्य विज्ञापनवर्णितमिति ॥ १०२८—१११७ ॥

सम्पूर्णमिदं श्रीगोपालचम्पूत्तरचम्पूसूचीपत्रम् ।

ॐतत्सत् ।

———

श्रीगोपालचम्पूः ।

उत्तरचम्पूः ।

प्रथमपूरणम् ।

श्रीराधाकृष्णाभ्यां नमः ॥

श्रीकृष्ण ! कृष्णचैतन्य ! ससनातनरूपक ! ।
गोपालरघुनाथाप्त ! व्रजवल्लभ ! पाहि माम् ॥

सम्पूर्णासीदाशु गोपालचम्पू-
रेषां यस्मादाशयादेव पूर्वा ।
एषा तस्मादुत्तराप्युत्तरा(१) स्या-
देवं देवं तं कमन्यं भजेम(२) ॥

अथानुपूर्व्या पूर्वकथानुकथनीया । अस्ति किल कलितनिखिलवृन्दावनं वृन्दावनं नाम वनं ।

---

(१) श्रेष्ठा । (२) अपि न कमपीत्यर्थः ।

यत्र ज्योतिश्चक्रमिव व्योम्नि, धर्म इव धर्मिणि, तत्त्वनिर्णय इव वेदे, सुखमिवाभीप्सितलाभे, रस इव विभावादिवर्गे, षाड्गुण्यमिवात्मनि, स्वयमिव स्वप्रेमणि, नारायण इव परमव्योम्नि, सर्वेषामाश्रयः स च कृष्णः स्वतृष्णाग्जनानुभवनीयतया निजां(१) निजाश्रयणीयतामुरीकरोति ॥

यत्र चान्तर्धानविद्यया विद्यमानमस्मदादीनामालोकमतीतं धाम गोलोकनाम समामनन्ति ॥

यत्र च गोलोके सकलचिन्तामणीयमानचिन्तालेशः केशवः सर्वानन्दभासिनां तद्वासिनां प्रेम नाम पञ्चमपुमर्थसम्पत्पर्य्युदञ्चन(२)प्रपञ्चसञ्चयव्यसनममुञ्चंस्तद्वशत एव यथायथं पुत्रादितया विलसन्न कुत्रापि व्यभिचरति ॥

तादृशात्तस्मादेव च निष्क्रम्य रम्यतया तैः सममसमं प्रकाशमानः स खलु खलनाशनस्तदिदं जगदपि कदाचित्प्रमदयति । दिव्यनृत्यनायक इव नेपथ्यस्थानात् ॥

---

(१) निजं नित्ये स्वके त्रिषु ।
(२) स्याद्दर्पा पर्य्युदञ्चनं ।

अथ तद्वत्तत्र प्रविशति च ।

तदेवं स्थिते वाञ्छितसदन्तवक्रदन्तवक्रसंयदु-दन्ततः[१] परतः पुनस्तेषां वक्ष्यमाणप्रमाण-लक्ष्यतया तत्प्रदेशप्रवेशः स यदा बभूव तदा कदा-चिदनवद्य हरिभक्तिविद्याविशारदसर्वमनोरथपारद-श्रीनारदकृपाकूपारतरङ्गलब्धतत्प्रसङ्गसारौ मधु-कण्ठस्निग्धकण्ठाभिधसूतप्रभवनवकुमारौ श्रीमद्-व्रजमहेन्द्रतत्कुमारादिभिर्विराजमानं तदेव सदन-मासदतां ॥

तदा च तदाचरितनियोगं परि तदेकवृत्तितया तन्त्रीनियन्त्रितगीतयन्त्रतुल्यौ परमकुल्यौ परस्परं कथकतां कथङ्कथिकता[२]मपि मुहुः सम्प्रथय्य सर्वशर्मशीलां श्रीकृष्णस्य व्रजलीलां कथाया-मुन्मीलयामासतुः ॥

तत्र च; तस्य पितृपैतामहं वृत्तं पूर्वं तौ वृत्तं[३] कुर्वन्तौ त[४]च्चरितभव्यमयनव्यकाव्यस्यापि तद्दि-वा[५]चरितवन्तौ जन्मवृत्तेन च जन्मवृत्तमिव ।

---

(१) वाञ्छितः सतामन्तो येन सच वक्रः कुटिलश्च यो दन्त-वक्रस्तस्य संयदुदन्ततः मारणवृत्तान्तात् ।

(२) स्यात् कथङ्कथिकः प्रष्टेति त्रिकाण्डशेषः ।

(३) अधीतं ।　(४) कृष्ण ।　(५) अधीतमिव ।

समनन्तरञ्च यद्विचित्रं तस्य चरित्रं सक्रमतया समवर्ण्यतां ॥

तच्चेत्थमुत्तरकथा-प्रथनार्थमनुस्मर्य्यते । अहो ! येन खलु पूतना पूतनारी वभूव । शकटः सकटवल्लघुतया पतनमवाप । तृणावर्त्तस्तृणावर्त्तवद्विघटिताङ्गतां गतवान् । अर्जुनयुगलं चार्जुनवत्कृतमनुग्रहं जग्राह । तत्र वत्सकस्तद्वत्सकः(१) वकस्तु वक एव ॥

व्योमश्च व्योमवदेव भवितुं युक्तः । आस्तामपीदं । तदिदं तु तत्रातिचित्रं । यदहो ! अघोऽप्यनघ आसीत् । कालीयश्च मुक्तकञ्चुक(२)इव जीवन्नेव निर्मुक्ततयाभिधीयते इति ॥

तदेवमपि परमवीर्य्यशाली शालीनता(३)वशम्वदतया निजज्यायसि यशः सम्वलयन् धेनुकप्रलम्वौ तत्प्रतापानलज्वालायां लम्वमानौ यच्चकार तेन लब्धमधुराचारताप्रचारश्चायं नश्चेतसि विकारसारमासादयति ॥

अहो ! निजजनेषु सौहृद्यहृद्यतां तस्य पश्य । यः खलु तानवन् दवहुताशनमपि निजाशनमाचचार ।

---

(१) तद्वत् अर्जुनवत् स वत्सकः कः अपि तु न कोऽपीत्यर्थः ।
(२) निर्मुक्तो मुक्तकञ्चुकः । (२) सुशीलता ।

वर्षगणनया पौगण्डो[१]ऽप्यविकलाङ्गतया वामभुजं गिरिच्छत्रं परि प्रचण्डं दण्डं चकार । हंहो ! तस्य वहलकुतूहलतामपि कलय । योऽयं कुदर्शनतां प्राप्तमपि सुदर्शनं सुदर्शन[२]मेव निर्मितवान् । शङ्खचूडनाम्नः खल्वस्य मणिचूडता न युक्ता स्यादितीव यत्ततया वित्तस्य[३]यत्तवित्तस्य तस्य शङ्ख-[४] मात्रावशेषतया चूडामणिमपजहार । अरिष्टं रिष्टं[५]चकार । केशिनः प्रत्यय[६]माकृष्य तदर्थेन[७] चात्मनि कृतार्थतां[८]प्रकृष्य केशवतां[९] निर्देशयामास ॥

किञ्च ।—

या जन्म श्रीरजनि गदिता या च कौमारशोभा
या पौगण्डद्युतिरघरिपोर्या च कैशोरलक्ष्मीः ।
एका सा सा हृदयमहरन्नस्तदा द्रागिदानीं
संहत्यामूस्तदथ वलवल्लोभतः क्षोभयन्ति ॥

(१) पौगण्डः कौमारपरवयाः । पक्षे विकलाङ्गस्तु पोगण्डः ।
(२) शोभनं दर्शनं ।
(३) ख्यातस्य । (४) ललाटास्थिन च शङ्खः ।
(५) हिंसितं । (६) चेतनां । श्लेषे तद्धितमिदं ।
(७) पक्षे मत्वर्थीयरूपस्य इति प्रत्ययस्य अर्थ इव अर्थो यत्र व प्रत्ययेन । केशाद्वोऽन्यतरस्यामिति तत्र प्रत्ययान्तरं ।
(८) कृतकृत्यतां । पक्षे कृताभिधेयतां ।
(९) केशाद्वोऽन्यतरस्यां ।

पित्रोर्वात्सल्यमादिस्थितवयसि मुकु-
न्दस्य पौगण्डभावे
सख्यं तेषां बहूनां किमपि मृगदृशां
नव्यतारुण्य लक्ष्म्यां।
स्मारं स्मारं मनो नश्चलति न पुरतः
किन्तु तत्राथ भूपः
सम्भूयास्ते गृहान्तर्निधिमिव वणिजः
सुष्टुदूरं प्रयातुः॥ इति॥

त(१)द्देवमपि त(२)त्तुलया तत्पोषार्थमुद्यमान्तरं कुर्वन्तः परामृशामः। यद्यपि तत्र तत्र मोहनता-धुर्य्यं तन्माधुर्य्यं तौ सूतसुतौ यथायोगं व्यञ्जितवन्तौ॥ तथापि "न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुत" इति रीत्या ब्रजसतृष्णेन श्रीकृष्णेन भक्तदुःखभार-निःसारविशारदस्य श्रीनारदस्य सम्वादमनु तस्य यदुनिगम(३)गमनं पुनर्ब्रजागमनं गोलोकधामसङ्ग-मनमपि समासाद्वर्णितवन्तौ॥
तत्तत् सर्वं वर्ण्यमानमवकर्ण्य दिनान्तरे लब्धान्तरे पूर्ववदेव पूर्वाह्णे श्रीकृष्णसनाथसभाभासमानः

---

(१) वनिज। (२) निधि। (३) पुर।

श्रीव्रजनाथप्रधानः सव्रजजनस्तद्गमनादिकस्य व्यासं[१]तावेव पप्रच्छ ॥

यतः ।—

यद्यप्यन्तःपीडा प्रतन[२]निजदुःख-श्रवणात-
स्तथावद्भाता स्यात्तदपि मनुजास्तन्न जहति ।
व्रणं शुष्कीभावं गतमपि निजं ते स्मृततया
वलात्पीडं पीडं निविडमनुभूतं विदधति ॥

अथवा ।—

चिराद्बन्धौ लब्धेऽप्यसुखमभितो याति न तदा
गृहीत्वा तत्कण्ठं न यदि विलपेत्तत्प्रियतमः ।
सदा शालीनस्तु स्वयमिदमकुर्वन् व्रजजन-
स्तथा कृष्णस्ताभ्यां सदसि कथकाभ्या[३]मकथयत् ॥

अथ पृष्टौ च तौ सुखदुःखस्पृष्टौ श्रीरामचन्द्र-सभायां कुशलवाविवास्यां श्रीकृष्णचन्द्रसभायां प्रतुष्टुवाते ॥

तत्र प्रथमतः स्निग्धकण्ठः समुत्कण्ठतया वभाषे ॥

तत्र च मङ्गलाचरणं ।—

गीर्देवीमनुयामः, सकलश्रुतिसारभागवतरूपां ।
यद्रससिद्धान्ताभ्यां, नवमपि काव्यं प्रमाणतां याति ॥

---

(१) विस्तारं । (२) पुरातन । (३) करणभूताभ्यां ।

अथ पूर्वचम्पूमनुस्मृत्य कथा ।—

दिनं दिनं चैवमनन्दि स व्रजः
कृष्णेन कृष्णः स भृशं व्रजेन च ।
सिताख्यपक्षः सितकान्तिना यथा
सिताख्यपक्षेण यथा सितद्युतिः ॥

तदेवमपि ।—

कृष्णायासीत्तस्य(१) तृष्णा समन्ता-
त्तृष्णायै वा कृष्ण इत्यत्र भेदः ।
नाभूदित्थं पूरुषं स्वप्रकृत्या
युक्तं विज्ञास्तत्र दृष्टान्तयन्ति ॥

पिपासूनां नीरं क्षुदुदयवतामन्नमभितः
प्रतप्तानां शीतं हिमजडहृदां तप्तिनिकरः ।
यथा तद्वत् कृष्णः समजनि यदा गोकुलभुवां
तदा वैयग्र्यं स प्रतिजनसुखाय प्रतिगतः(२) ॥

तातस्तद्भ्रातृवर्गस्तदखिलभगिनीभर्तृजामातृमुख्या
माता मातुः पितुश्च स्वसृमुखमहिला-
स्तद्वदन्ये च ये ये ।

---

(१) व्रजस्य । (२) प्राप्तः ।

सर्वेषामेव तेषां युगपदपि वसन्नन्तरे वासयंश्च
स्वान्त[1]स्तान् वासुदेवश्रुति[2]भणितमिव
व्यञ्जयामास कृष्णः ॥

सुरपतिमणिमानिताङ्गलक्ष्मीः
शरदिजसारससारहारिनेत्रः ।
निखिलमतिगतिः कथं न स स्या-
त्पितृजननीसुखमाधुरीधुरीणः ॥

ध्याने कूर्मवदीक्षणे शकलि[3]वद्घ्राणग्रहे धेनुव-
त्स्पर्शे पक्षिवदस्य पोषणपरौ शश्वद्व्रजेशावमू ।
नित्यं नित्यमुदञ्चदुत्कलिकिकामाशां चिराद्वर्द्धितां
कैशोरे प्रतिपद्य सुष्ठुफलितां जाड्यं मुदा जग्मतुः ॥

सद्भ्रातृतां स्वमनु तस्य समीक्ष्य रामः
फुल्लाङ्गतां प्रतिदिनं गतवान् यथा तु ।
शेषप्रमाणतनुतां तनुयादसौ किं
दिष्ट[4]क्रमादिति जनामतिमिष्टवन्तः[5] ॥

मुख्यः प्राणास्तद्विभेदाश्च यद्वत्
कृष्णस्तद्वत् श्रीलदामादयश्च ।

---

(१) स्वमध्ये ।　　(२) उपनिषत् ।
(३) मीन ।　　(४) काल ।　　(५) मेनिरे ।

एकात्मानः शश्वदुद्दिश्य चैकं
कार्य्यं यत्ते यान्ति तत्तद्विहारं ॥

येषां सेव्यः समजनि स हरिः सेवकानां निजानां
तेषां प्राणप्रतिकृतिरभवद्देहसादृश्यभाजां ।
साहाय्यं तं (१)प्रति त(२)मपि विना
　　　　ते(३)न तिष्ठन्ति सो(४)ऽपि
न्यास्थत्तत्र(५) स्वमिति बुधमता
　　　　तेषु(६) दृष्टान्ततेयं ॥

वत्सगोष्ठ(७)विपिनादि चेद्व्रजेद्
घ्राणतर्पणमघारिसौरभं(८) ।
तर्हि तत्र धवलावलिर्भवे-
द्रागजागरधरा न चान्यदा ॥

श्रद्दध्यान्न जगद्यदस्य तु गुणैर्वन्या(९)श्च ते प्राणिनः
सन्ति द्रागनुगाः परस्परमपि प्रीणन्ति यद्द्वेषिणः ।
यद्येवं स्वयमेव सोऽपि भगवान् श्रीयुक्तवैयासकिः
श्रीमद्भागवताख्यवज्रलिपिभिर्निष्टङ्कयेन्नाग्रतः ॥

तत्तद्यद्यपि शर्मजातमभवद्गोष्ठे तथाप्यच्युत-
द्वेषाय प्रहितान्मुहुर्निजभटात् कंसेन भीरुत्थिता ।

---

(१) कृष्णं ।　(२) कृष्णं ।　(३) सेवकाः ।
(४) कृष्णः ।　(५) सेवकेषु ।　(६) सेवकेषु ।
(७) कर्त्तृ ।　(८. कर्म्म ।　(९) वनोद्भवाः ।

तस्मादत्र[1] न तर्हि शान्तिरजनीत्युन्नीय लीलामिमां
चित्तं धूतभयामिहानवरतं निर्वक्तुमन्विच्छति ॥

अथ तद्दुःखं स्मरन्तं व्रजेश्वरं प्रति सान्त्वनं समापनमाह स्म ।—

गोष्ठे दुःखागदङ्कारः कुलालङ्कार एष ते ।
सर्वां शङ्कां पुनर्धुन्वन्नर्वागङ्कागतस्तव ॥इति॥

तदेवं श्रीव्रजेश्वर-सभान्तः प्रातःकथा कथिता । यस्यां सव्यवधानदेशे निवेशेन श्रीव्रजेश्वर्यादयः श्रीराधादयश्च प्रतिनिजकर्णमभ्यर्णित[2] वर्णावर्णि चक्रुः ॥

अथ पूर्ववदेकान्ते कान्ते विराजमानश्रीकान्ते श्रीराधिकानिशान्ते[3] निशान्त[4]स्तत्कथाशेषः संश्लेषमवाप ॥

यत्र च स्निग्धकण्ठ उवाच ।—

स्वयं लक्ष्मीरप्यच्युतहृदि गताप्यन्यवपुषा
तपस्तप्त्वा यं क्वाप्यलभत न रासादिमहसि ।
तमेतं गोविन्दं वशितमनुविन्दन् व्रजरमा-
गणाः शर्माविन्दन् कियदिनि कथं कः कथयतु ॥

---

(१) व्रजे । (२) निकटित ।
(३) गृहमध्ये । (४) रात्रिमध्ये ।

प्रसादं यं स्वप्नेऽप्यलभत न लक्ष्मीरपि हरे-
स्तमेतं श्रीगोप्यः समदधत रासादिमहसि ।
अहो ! यस्या भाग्यं स्पृहितमपि ताभिर्न कलितं
किमस्या राधायाः कवयतु कविस्त(१)न्मयसुखं ॥

इति ॥

अथ क्षणामुष्णीभूय तूष्णीम्भूय च पुनराह ।—

तथापि भ्रातर्मधुकराठ ! तदिदं मुक्तकण्ठं पुन-
रनुवदितुं शक्तिर्न प्रसक्ता भवति ॥

यतः ।—

कुलीनानां श्लाघ्या निजकुलज-लोकैः परिवृति-
स्तथार्य्याणां रीतिर्यदपि किल तासामविचला ।
तथाप्युच्चैस्तत्तद्विचलनकृतिध्वस्तनिखिला
मुकुन्दप्रेमार्त्तिर्मम हृदि विमोहं प्रथयति ॥

पुनः सास्त्रं श्रीराधामुखमीक्षमाणा उवाच ।—

खरांशोरंशुस्पृग्वपुरिव खरांशोर्मणिततति-
र्विधोः कान्तिस्पर्शिस्थितिरिव विधो रत्नविततिः ।
मुहुर्ज्वालां हन्त ! द्रवमपि वहन्ती यद्भव-
न्मुरारेर्दिङ्मात्राद्भ्रमयति तदेषा(२)मम मनः ॥

---

(१) प्रसाद । (२) श्रीराधा ।

तदेवमेवावृत्त्या पुनरपि तत्तद्विषयमुवाच ॥

यथा ।—

यदा दृष्टिं यातः कथमपि हरिस्तासु स तदा
परं[१] स्फूर्त्तिभ्रान्तिं रचयति पुरावन्न तु परं[२] ।
यदा स्पृष्टिं प्राप्तः क्वचिदपि तदापि प्रथमव-[३]
त्तदेतद्वैयग्र्यं मम हृदयमुच्चैर्दलयति ॥
तदेतद्वैयग्र्यं वृषरवि[४]सुतायामधिगमा-
द्विदूरं[५] यद्भुतं हसति किमु वा रोदिति यदा ।
तदा तस्या हासे स्फुरति निखिलं हृष्यतितरां
तथा रोदे ग्लानिं कलयतितरां हा ! जगदपि ॥
यदा रासानन्दप्रभृतिहरिलीला सुवलिता-
स्तदा गोप्यः सत्यं परमपरमं शर्म समयुः ।
परं यातायातं रचयदभितस्तद्विरहजं
महादुःखं तासां हृदयमसकृन्मर्दयति नः ॥
प्रियाणां सर्वासां परमुपरि राधां प्रणयवा-
नसाधारण्येन स्वहृदि स पुरा लालयति[६] यत् ।
तदेतन्नः सर्वं सुखमहह ! हा ! नाथ ! रमणो-
त्यदः स्तोकश्लोकः पिबति किमहं वच्मि करवै ॥

---

(१) केवलं । (२) साक्षात्कारं ।
(३) स्फूर्त्तिवत् । (४) वृषभानु ।
(५) विचारातीतं । (६) लालयति स्म ।

इदं स्मारं स्मारं ज्वलति मम धीर्य्यद्व्रजमृगी-
दृशां लज्जालूनां हरिमनुरतिर्व्यक्तिमगमत् ।
तदास्तां राधायाः सविधुमिव तं तत् स्फुरणकृ-
त्प्रभावायाः[1] पश्यन् दृशमनृजुय[2]न्मां विदहति[3]॥

अन्यत्पश्यति कृष्णमन्यवचने
कृष्णं ब्रवीत्यन्यवाक्
श्रुत्या कृष्णमहो ! शृणोति सततं
या गोपसुभ्रूततिः ।
तस्यां किं वत ! गोपनं प्रवलतां[4]
यद्यश्नुवाना[5]स्फुटं
राधाया जडता न हि प्रवलतां[6]
यायादमूदृश्यपि ॥

अथ वल्लवीवल्लभस्यापि तथा कथा प्रथनीया ॥

एका श्रीर्यद्दृशे भाति तद्दृशे सुखसन्ततिः ।
श्रीकोटीर्विशयन् कृष्णस्त[7]त्कोटिं स्फुटमर्हति ॥

---

(१) तस्य हरेः स्फुरणकृत् प्रभावो यस्याः ।
(२) कुटिलं कुर्वन् ।
(३) तदास्तां राधायाः सविधुमिव तस्य स्फुरणकृ-
त्प्रभायास्तं द्रष्टुर्दृशि कुटिलता मां विदधाति । इति च पाठः ।
अत्रपाठे । तस्य कृष्णस्य । तं कृष्णं । द्रष्टुर्जनस्य
(४) प्रकर्षेण वलतां भजतां ।
(५) अमूदृश्यश्नुवानेत्यन्वयः । (६) प्रवलत्वं । (७) सुख ।

तथापि लीलारसविशेषवशतया तदानीमन्यथा प्रथयापि सन्तः समपश्यन्त ॥

यथा ।—

म्लानौ म्लानिं रुचौ रोचिः प्रेयसीनामनुव्रजन् ।
वीक्षितः सोऽयमन्तर्ज्ञैर्वृत्तीनां[१] वृत्तिमा[२]निव ॥
गाम्भीर्य्यान्मुरशत्रोः
　　　　स्फुटमब्धेरिव न भाति कार्श्यादि ।
किन्तु त[३]दन्वयिजीवन[४]
　　　　धाराणां[५] तेन[६] त[७]च्च तर्क्येत ॥
यद्यपि तासां लाभे, हरिणा न स्वैरता याता[८] ।
तदपि स्वस्मिन्नभिमति,मात्रे[९]शश्वत्कृतार्थता मेने॥
आस्तां व्रजसुभ्रूणा,मभिसृतिसङ्केतधामामिलनादि ।
स्वैरस्थितिरपि तासा,मवकलिताकृष्णमु[१०]न्मुदं
　　　　कुरुते ॥
वलिमुषिता निजलक्ष्मी,रिव लब्धुं ताः[११]सदोत्कतां
　　　　यातः ।

---

(१) कृष्यादिजीविकानां ।　　(२) कृषीवलादिः ।
(३) पक्षे समुद्रानुगत ।　　(४) श्लेषे जल ।
(५) प्रेयसीनां ।　　(६) कार्श्यादिना ।
(७) कार्श्यादि ।　　(८) प्राप्ता ।　　(९) अभिमानमात्रे ।
(१०) उत् उच्चैः ।　　(११) कर्मभूताः ।

कृष्णश्चिन्तामणिव,त्तासु च राधामचिन्तयन्नितरां ॥

निमेषः कल्पः स्यादपि नयनपक्ष्माचलवर-
स्तथा दृग्वार्य्याऽधिर्व्रजवररमाः पश्यति हरौ ।
तदीदृग्भावः किं समचरदमूभ्यस्त(१)मथवा
ततो(२)ऽमू(३)रित्येवं द्वयमपि न निर्णीतिमयते ॥

किमेषा स्फूर्त्तिर्मे व्यतिमिलनकर्त्री वनितया
तया किम्वा साक्षात्कृतिरिति विवेकाविदुर(४)धीः ।
हरिः स्वान्तज्वालावलयितवपुः क्वापि वलव-
त्प्रफुल्लाङ्गः क्वापि प्रतिमुहुरुदग्रं भ्रमममगात् ॥

तदेवं दुःखनिगीर्णं(५) यथाकथञ्चन यद्वर्णितं यच्चा-न्य(६)दितोऽप्यतितरां वर्णयितुमभ्यर्णीक्रियते तत् खलु सर्वायत्यां परमसुखगत्याः प्रत्यासत्तये सम्पत्स्यते दूर्गम(७)कूपमरुभूभुवामनूप(८)गमनाय दुर्गलङ्घनवत्(९) ॥

---

(१) कृष्णं । (२) कृष्णात् ।
(३) प्रेयसीः । (४) अविज्ञ ।
(५) दुःखेन गिलितं । (६) मथुरादिसम्बन्धि ।
(७) दुर्लभ । (८) जलप्रायमनूपं स्यात् ।
(९) दुर्गमकूपमरुभूभुवस्थानीयं व्रजलीलावर्णनं दुर्गमलङ्घन-स्थानीयं मथुरादिलीलावर्णनं अनूपगमनस्थानीयं पुन-र्व्रजागमनवर्णनं ।

न च वर्णनायां तस्यै(१) संपत्स्यत इत्येव वक्तव्यं ॥ पश्यत पश्यत तदेतद्राधामाधवनिर्वाधव्यतिमिलन-निर्वर्णनायां सम्प्रत्यपि सम्पद्यते । यत एव च यत्किञ्चित्तद्वर्णायितुं शक्यते ॥

तच्च वर्णनं यथा ।—

एवं कृष्ण-कृष्णप्रियाणां कृतसम्मोहेन महाभावाधिरोहेण समं पूर्णं कैशोरमपि तूर्णमायातं ॥

तत्र श्रीकृष्णस्य यथा ।—

श्रीगोपाधिपदुग्धसिन्धुजनितं सत्कीर्त्तिशुभ्रं स्फुर-
त्कृष्णाभावलितं सुदीर्घनयन(२)ज्योतिर्विधूताम्वुजं ।
गोपीनेत्रचकोरजीवनरुचिं कामप्रचाराकरं
कैशोरामृतपूर्णमव्ययकलं गोविन्दचन्द्रं भजे ॥

तासां यथा ।—

वक्त्रेन्दुस्फुटनेत्रकैरवरुचिः पाण्डूभवद्गण्डभू-
र्वक्षोजन्मसहस्रपत्रमुकुलामन्दावलिभ्राजिता(३) ।
न्यस्तव्यनितम्वविम्वपुलिनश्रीकारिणी श्रीहरे-
राभीरी नवयौवनस्थितिरधाज्ज्योत्स्नेव नेत्रप्रथां(४)॥

(१) परमसुखगतिप्रत्यासत्तये ।

(२) चन्द्रपक्षे सुदीर्घं नयनं प्रापणं यस्य ।

(३) वक्षो जन्म एव सहस्रपत्रमुकुलस्तेन अमन्दा । आभीरीपक्षे वलिभ्राजितेति पृथक् पदं । (४) हरेरित्यन्वयः ।

तदेवमुभयेषां नवयौवनसागरपरमानुरागसुधाकरयोः परस्परं भूरि परिपूरिताकरयोः सर्वत्र प्रचारः सञ्चचार ॥

सञ्चरति च तस्मिन् यदेव तासां पूर्वं कृष्णकर्त्तृकपरिणयनापनयनाय(१)गर्गः किल व्यञ्जितं चकार तदेव(२)लोकमस्तोकशङ्कासञ्जित(३)माचचार ॥

यदि कृष्णेन सममासामङ्गसङ्गः स्यात्तदार्वागेव सर्बमेव गोकुलं तद्विरहाकुलं स्यादिति ।

गर्गवचनमेव च मातरपितरादिभिः कृष्णाय तासां वितरं विघ्ननिघ्नं चकार ॥

यत्र च साक्षाद्योगमाया कृष्णं वरिवस्यन्ती स्वात्मनो गोपनाय पूर्णिमा नाम्ना तपस्यन्ती कृच्छ्रवश्यन्ती(४) गत्यन्तरमपश्यन्ती तासामन्यत्र विवाहं मृषाभाववहमेव निर्वाहयामास । सर्वत्रानल्पस्वप्नकल्पनायामपि प्रायतया(५) जागरप्रायतया प्रचारणात् ॥

तथा तासां पत्याभासाङ्गसङ्गमश्च भङ्गमासादयामास ॥

---

(१) विवाहदूरीकरणाय ।　(२) व्यञ्जनं ।
(३) मिलितं ।　(४) कृच्छ्रवश्या इवाचरन्ती ।
(५) दीर्घया ।

तथैव हि "नासूयन्खलु कृष्णाये"त्यादिरीत्या शुकेनेव श्रीशुकेन दिग्दर्शिता ॥

तदेवं सति स च ताश्च परमतर्षकृताकर्षतया प्रच्छन्नतया च परस्परं सङ्गमहर्षमपि कथञ्चिदाचितं चक्रुः ॥

अथ पूर्वोक्तरीत्या तासां सन्निहितलोकेषु प्रतीत्या महानुरागस्य क्रमादवगमाद्गुरुभिर्मनसि भावितभाविकृष्णसङ्गमाशङ्कतया वचसि तु विभावितवधूजनवनगमनकलङ्कतया निर्मिते निरोधे मिलद्दुद्बोधे[१] वलानुजन्मा द्विजन्मानं नर्मप्रियसखतयानुवर्त्तमानं नाम्ना मधुमङ्गलतया समाम्नातं तत्प्रसङ्गसङ्गतं चकार ॥

कथं राधादीनामागमनवाधावहून्यहान्यधिकृत्य दृश्यत इति ॥

मधुमङ्गल उवाच ।—

पुरूणां गुरूणां निरोध एव निदानतया तत्र वोधविषयीभवति ॥

श्रीकृष्ण उवाच ।—

अहो ! तत्तदपि रहोवृत्तं किं गुरूणां कर्णेषु वृत्तं ॥

(१) प्रचुरे इत्यर्थः ।

मधुमङ्गल उवाच ।—

नान्तर्बहिरपि यस्यां, स्फुरति ज्ञानं मनोविकृतौ ।
एकस्यापि न तस्या, न व्यक्तिः स्यादमूदृशां किमुत ॥

श्रीकृष्ण उवाच ।—

पूर्वमपि पूर्वाहिरन्तर्गमने तासु नवयौवनं गतासु गुरुनिरोधः पुरुरेवासीत् । अधुना तु कीदृगधिकः ॥

मधुमङ्गल उवाच ।—

यद्यपि नास्मन्मुखतः सुखतया निःसरति रतिप्रतिकूलमिदं तथापि भवत्प्रश्नप्रथात एव कथाविषयीक्रियते ॥

तथा च श्रुतं मया खल्विदं विश्रुतं कुलपालिकानां तासु[१] गालिदानमवकल्पयतां ॥

किं धिग्ध्यायसि हन्त ! निश्वासिषि किं
वर्त्मानि किं प्रेक्ष्यसे
किं सख्या मुखमत्र पश्यसि कुचौ
किं दृग्जलैः सिञ्चसे ।
मूर्च्छामृच्छसि किन्तरां किमसकृ-
त्कृष्णेति वर्णद्वयं
तस्यं जल्पसि किं पुनः पुलकितां
कम्पञ्च तन्तन्यसे ॥ इति ॥

(१) प्रेयसीषु ।

अथ कुलपालिका पालिकाया[१]स्तासां[२]दूनता-कर्य्या ननान्दुः प्रति स्वं मातरं प्रतिवचनचर्य्या दिग्वर्णनं चावकर्ण्यतां ॥

दृग्वीथीं कुलपालिकाः श्रुतिपथं
तासां[३] कथा नासिका-
वर्त्मानेकसुगन्धिधूपरचना वब्रुर्मया योजिताः ।
तस्याः कृष्णमयी दशा मनसि या
सा केन यत्नेन वा
गच्छेदावृततां ततो जननि ! किं
मह्यं वृथा कुप्यसि ॥ इति ॥

तदेवं वर्ण्यमानमाकर्ण्य क्षणं सम्लानवर्णं निवर्ण्य च पुनरसावस्या वार्त्ताया विशेषानुवर्त्तनाय मधुमङ्गलं प्रस्थाप्य चिन्तां चान्तः प्राप्य विचारयति स्म ॥

तमेतं जनरवं मम गुरवश्चानुभवमानीतवन्तः सन्ति प्रायशः परमयशसः पितरश्च तत्र कर्णावितरं करिष्यन्ति ॥

तर्हि किन्तरामन्तरायमिममन्तरयिता ॥

---

(१) कुलपालिकाश्रेष्ठायाः ।　(२) प्रेयसीनां ।
(३) कुलपालिकानां ।

इति त्वरां शून्यायमानमनाः पुनश्चिन्तयामास ॥

इतो व्यवधानमेव खलु कलुषतां गतस्य मम निधानं भवति ॥

तथाहि ।—

कलङ्को यत्र स्यादपरिहरणीयार्थकृतक-[1]
स्ततो दूराद्वाव्यं कुलजनिजनेनैवमुचितं ।
स कालाल्लुप्तः स्याद्भवति हि च तत्र[2] प्रतिविधि-
स्तदस्मान् मे गोष्ठाद्व्यवहितिरकष्टं प्रभवति ॥

येषां पित्रादीनां, स्नेहो मम जीवनं गोष्ठे ।
अहह! कुदैवादभितः, सङ्कोचस्तेभ्य एव सञ्जातः ॥

अथ पुनरन्यथा चिन्तयामास ।—

प्राणास्त्यजन्तु देहं, देहः प्राणानपि त्यजतु ।
हरिगोप्यस्तु मिथस्ताः, प्राणाः कथमिव
मिथस्त्याज्याः ॥

पुनस्तदपि चान्यथा चकार ।

एकस्मिन्नावासे दम्पत्योर्भवति दुःसहो विरहः ।
तस्माद्दूरे गमनं समयं गमनीयतां नयति ॥

किन्तु हा! वृषभानुभानुकीर्त्तिदाकीर्त्तिदायिनि! ।
हा! जन्मत एव मन्मनस्तया सन्मनस्ताधायिनि! ॥

---

(१) कृत्रिम । (२) कलङ्के ।

हा ! कुमारतामारभ्य कायवाङ्मनःसुकुमारता-पर्वणा सर्वहर्षिणि ! ।

हा ! मद्विना भावभावनाज्वालाजालसमुत्कर्षित-तर्षिणि ! ॥

हा ! गत्यन्तररहिततया कथञ्चित् किञ्चिन्मां सङ्गम्य च मुहुरसङ्गम्य दुःखदग्धे ! ।

हा ! दयिते ! दयिते ![1] मयि विस्रब्धे ! सम्प्रति दुष्टुनिष्ठुरतया मया त्यक्तुमिष्यमाणा कथं जीविष्यसि ? ।

हा ! सर्वसुखाधिके ! राधिके ! कुत्र वामुत्र गमिष्यसीति ॥

अथ मधुमङ्गलः सङ्गम्य तदिदमरम्यं निवेदयामास ।—

निरचिन्वंस्ते सर्वे, राधादीनां निरोधसातत्यं ।
यस्मा[2]दृहपाल्यस्ता, हरिणी[3]रेता निरुन्धते
परितः ॥ इति ॥

तदेवं पर्य्यगपर्य्यवस्यादिदं तया चिन्तया लब्धुं चामूरसम्भावनया भावनया समयं गमयितु-

(१) दयायुक्ते ।　　(२) निश्चयात् ।
(३) श्लेषे मृगीः उत्तमस्त्रीश्च ।

मसमर्थः स्खलदर्थः सतृष्णः स तु कृष्णः सव-
योभिः सममेव रममाणास्त्रिया मां विरमयति
स्मेति कृतं हृन्मर्मभङ्गकरेणातिप्रसङ्गेन ।

तदेतदुक्त्वा कथकः समापनमाह ।—

राधे ! न युक्तमुक्तं स्यान्मुक्त[१]शातमथापि वां ।
मिथः प्रेमभरं व्यक्तुं वक्तुमुद्यतवानहं ॥
पुरा कथेयं कथिता मुरारेरागवृंहणी ।
पश्य सोऽयं प्राणनाथः प्रसादं तव वाञ्छति ॥

तदेवं यथा कथा तथा लीलाप्रथामुपलभमाना-स्तदन्ते च तस्याः सम्प्रति नास्तितायां विश्वस्ति[२] कृताश्वस्तिका निजनिजभवनं सर्व एव सानन्दं पर्वतया जग्मुः ॥

श्रीराधामाधवौ च निजशय्यागृहं सुखमय्या स्पृहया गृहयाञ्चक्राते[३] ॥

इति श्रीमदुत्तरगोपालचम्पूमनु व्रजानुराग-
सागरप्रथनं नाम प्रथमं
पूरणम् ॥

---

(१) त्यक्त ।　　(२) विश्वास ।
(३) गृह ग्रहणे चौरादिकः कथादिषु ।

द्वितीयं पूरणम् ।

अथापरेद्युः प्रभातविराजमानायां सव्रजयुवराज-व्रजराजसभायां कथा; यथा ।—

मधुकण्ठ उवाच ।—

अथ केशिवधात् पूर्वस्यां क्षपायां लब्धक्षयाया-मरुणे चारुणे जाते स खलु कमलेक्षणाश्वपलेक्षणा-तया क्षणकतिपयमिदं चिन्तयामास ॥

अहो! स्वप्नः सोऽयं। यत्र मञ्चात् कृतस्रंसनः कंसः स मया समाकृष्ट इव दृष्टः। सम्प्रत्याशु च तदेव प्रत्यासन्नं । यदद्य श्वः केशी मदभिनिवेशी भवन् यमस्य प्रतिवेशी भविता ॥

तदनन्तरं कंसध्वंसनमेव प्रसक्तं। प्रसक्ते च तस्मिन्मम निगम(१) एव गमनं समयलब्धतया युक्तिविस्रब्धं(२) ।

यतस्तस्य(३) मत्(४) त्रस्तस्य न खल्वत्र यात्रा युक्तिपात्रायते ।

(१) नगर। (२) युक्त्या विश्वासास्पदं ।
(३) कंसस्य। (४) मत्तः।

तस्य चाद्यापि वृष्णिषु तर्जनायामनारतस्य[१] मयि च दुर्जनविसर्जनायामविनाकृतस्य[२] विनाशनं विना तत्र चात्र च मतिपितुरुभयकुलं भयाकुलं स्यादिति ॥

अथ पुनश्चिन्तयति स्म ।—

हन्त ! हन्त ! यदि कार्य्यपर्य्यायतस्तत्र सुविलम्बः सम्भवति तदा मन्मात्रादिप्राणानां नात्राङ्ग सङ्गमङ्ग[३] तर्कयामि ॥

ततश्च ।—

मातुर्नेत्रचकोरचन्द्रवदनस्तातस्य दृक् चातक-
श्रेणीवारिभृदन्यगोकुलजनस्याप्यक्षिपद्मांशुमान् ।
सोऽहं तान् परिहृत्य हन्त ! गमनं
कुर्वीय चेत्तर्ह्यहो !
चन्द्रादित्रयवन्ममापि भविता धिग्वातचक्रभ्रमः ॥

तदेवमेवमम्बुजलोचने शय्यायामेव चिरं रचितशोचने सहसा केशी सदेशी बभूव ।

अस्य च निग्रन्थनं[४] प्रथमग्रन्थत एव कथया ग्रन्थन[५]माससाद ।

---

(१) निरन्तरस्य । (२) अरहितस्य ।
(३) पुनः । (४) हिंसनं । (५) मथनां ।

अथ श्रीगोपेश्वरीलालयस्तु लाल्यमानधवलाकला पङ्कुलात्पाल्यमानयशास्त्रिदशालयमुनेरहः सह-भावमाससाद ।

यत्र च संशयानुशया[१]तिशयमयमानं[२] मुनिस्तं विभावितया[३] भावितत्तल्लीलया सान्त्वयामास ॥

ततः समस्तशस्त्रपालः श्रीगोपालस्तं विसर्ज्य प्रसज्यमानमनस्तापतयापि वहिरुपहितसर्वसुख-श्रीमुखप्रकाशतया सखिरामारामतया च सहगोव्रजं व्रजमाजगाम ॥

यथा ।—

दाम्ना दाम्ना सुरसुमनसां स्वर्गिभिः पूज्यमानं
साम्ना साम्ना द्रुहिणसदसां वीथिभिः स्तूयमानं ।
नाम्ना नाम्ना सपशुपशुपां सम्मुखान्निर्मिमाणां
धाम्ना धाम्ना[४]सुखदमखिलः[५]प्राप तं दृश्यमानं ॥

अत्र च सुराणां वचनं ।—

इन्दोरभ्युदयात्परं विकसति द्राक् कैरवाणां गणाः
सिन्धुः क्षुभ्यति कान्तिपानमयते दूराच्चकोरव्रजः ।

---

(१) अनुताप ।　　(२) अय गतौ ।
(३) प्रकाशितया ।　　(४) काम्या काम्या ।
(५) व्रजलोकः ।

गोपाः पश्य मुदा मुरारिकलनादेषा(१)मशेषां दशां
गच्छन्तोऽप्यतितृप्तिलावशतया धावन्ति यावद्गति ॥
इति ॥

तदेवं ।—

आलोकः(२) प्रीतिभाजां कृति(३)वलनिकरः
किङ्कराणां हृदन्तः-
सारः सख्यस्थितानां हृदि लसदसव-
स्तातमात्रादिकानां ।
आत्मारामान्तराणां(४)हरिरिह समगा-
त्केशिनं घातयित्वा
गेहं यर्ह्येष तर्हि प्रतिनिजमगमं-
स्ते(५) च देहं प्रसिद्धाः ॥

स्वेनाम्बानिरमञ्छयत्तमथ दृशी रं व्यमुञ्चत्पिता
सर्वेऽन्ये परिफुल्लदङ्गवलितां रोमाञ्चितामाश्विषुः ।
अन्यच्च क्वचन स्फुरद्वचनतातीतं तदासीद्यदा
हत्वा केशिनमाव्रजत् कलकलान्दोलिव्रजं स प्रभुः ॥

(१) कैरवादीनां ।
(२) दर्शनरूपः । (३) क्रिया । (४) प्रेयसीनां ।
(५) प्रीतिभाजादयः । आलोकादयः । यावत् कृष्णो नागत-
स्तावदालोकादयो देहाद्बहिरासन्निति भावः ।

ततश्च प्रातरतुलोत्पातकातरतया नातिसम्भालितलालनवितरौ मातरपितरौ पुत्रं परि समाश्लेषितरौ[1] गृहापनस्नेहालपन[2]स्नपनदिव्यवासः पटवाससमर्पणालेपा[3]नुलेपप्रथनया तं क्षणकतिपयं विश्रमयामासतुः । यतस्तं सदा कोमलमेव कलयाम्बभूवतुर्युद्धादिसमये तु नारायणव्यक्तीकृततात्कालिकशक्तिमयमिति ॥

अथ गवां दोहनावसरावरोहः स्यादिति सर्वसुखपालः श्रीलगोपालः स्वयमग्रजेन सममग्रीभूय तदीयसामग्रीकरकिङ्कर-निकरमाहूय तासामग्रीयभूभागमागतवान् । आगतमात्रे च तत्र सरामश्यामगात्रे ॥

हुङ्कारघोषरचिताखिलशब्दमोषः
स्राग[4]ब्दकान्तिममुमास्तृत[5]धेनुसङ्घः ।
वत्सान् विनापि वलवत्स्नव[6]मेष तै[7]स्तं[8]
सद्वत्सलः सहवलः शवलं चकार ॥

---

(१) समाश्लेषिणां श्रेष्ठौ । (२) प्रापणा ।
(३ भोजन । (४) स्रागर्थे स्राक्चास्ति ।
(५) लुब्धकर्त्तरि । (६) स्नु प्रस्रवणे । (७) वत्सैः ।
(८) धेनुसङ्घं ।

तत्र तु ॥

सर्वं चकार स हरिः परितः पुराव-
द्ध्रे सुरर्षिवचसा तु विदूनमन्तः ।
यद्यप्यदस्तदपि तस्य निजव्रजाय
प्रत्यागतिर्हृदि कृता स्थिरतां पुपोष ॥

तथाहि ।—

तस्य भावानामुद्भावना ।—

कंसं हन्तुं प्रयाणि स्फुरति पितृमुखप्रेमतद्विघ्नरूपं
देवर्षेर्वाङ्न मिथ्या कथमथ विरहं
हा ! सहेय व्रजस्य ।
निर्णीतेऽप्यत्र(१) जाते कृत(२)मसुखमये-
नास्य चिन्तामलेन
स्मर्त्तव्यं तत्तु नित्यं यदिह सुखमयं
वैभवं भाविसङ्गे ॥

इत्यचिन्त्यत चानेन रथः कश्चन चैक्ष्यत ।
महतां हृदये याति प्रतिविम्वं हि विम्वतां ॥

रथस्थपुरुषस्य दर्शने तु ।—

रथी निरस्त्रः स्याद्दून इति कृष्णेन तर्कितं ।
कंसात्कस्मादसावागादित्यन्यैरपि शङ्कितं ॥

---

(१) विरहे । (२) मर्व ।

तदा च वारुणीमनुरक्तः पतनसक्तः स दिननाथः कृतनदीनाथपाथःक्राथः स्वमालोकं लोकमपि तमसि वेशयामास ॥

सत्यं सूर्य्यस्तुर्य्य,प्रहरस्यान्तं ययौ किन्तु ।
सवलहरिः प्रतिहरितं, हारिततिमिरं व्यधान्निजं किरणं ॥

तत उन्मुखतां यातेषु गोपजातेषु समसुन्नमितकर्णसङ्घातेषु च तदवलोकनसतृष्णौ वल-कृष्णौ रथस्थः स दूरत एवाक्रूरः साक्षात् परिचितिं विनापि परिचितवान् ॥

यतः ।—

चक्षुरेव परिचायकं भवे-
द्रूपमात्र इति गीः सतां मता ।
तादृशा[१]मनुभवे तु कर्णयो[२]-
र्दृष्टिशक्तिरपि कृष्टिमृच्छति ॥
अस्तु तावदनयोः सुरूपता
नीलरत्नविधुलोभिशोभयोः ।
अङ्घ्रिचिह्नमपि चित्रसन्निभं
दूरतोऽपि तममूमुहन्मुहुः ॥

---

(१) श्रीकृष्णसदृशानां ।　(२) सप्तमी ।

तयोस्तादृशरूपमपि निरूपितवान्; यथा ।—

एकः श्यामद्युतीनामभिमतविभव-
स्याधिदेवावतार-
स्तत्सध्यूङ्शुभ्रशोभासमुदयसुभगा-
भोग[१] सारप्रसारः ।
तत्रादिर्वस्त्रकान्तिप्रचितिभगवती[२]
कृष्णलक्ष्मीप्रचारः
किञ्चान्यः कान्तवासश्छविशवलनया
सृष्टपूर्वा[३]नुकारः ॥

तथा ।—

आद्यः कृष्णाम्बुजश्रीविजयिमुखमहा-
शोभयादत्तमोद-[४]
स्तत्सध्यूङ्पुण्डरीकद्युतिपरिचयाजि-
दङ्करोचिर्विनोदः ।
तत्रादिर्नेत्रशोभाविरचितरुचिमत्खञ्जनद्योतनोदः[५]
किञ्चान्यश्चक्षुरन्तारुण[६]कुसुमरजः
पिञ्जरा[७] लिप्रतोदः[८] ॥

---

(१) आभोगः परिपूर्णता ।
(२) प्रचितिरेव भगवती उत्तमेत्यर्थः ।
(३) श्रीकृष्ण । (४) वाक्यार्थस्तु पीताम्बर इत्यर्थः ।
(५) खण्डनार्थोऽपि वर्त्तते । (६) गुण । (७) मूच्छित ।
(८) नेत्रस्यारुणावर्णेन तादृशभ्रमरं प्रनुदतीति धर्मंगपथाः ।

तथा ।—

आद्यः श्रीकुण्डलान्तर्भ्रमुखसुखकृद्
　　　　द्योतगण्डस्थलीक-
स्तत्सध्यूडूशश्च दकश्रुतिकिरणालस-
　　　　त्कर्णिका[1]भावलीकः ।
तत्रादिश्चापवल्लूमिलतिलकुसुमघ्राणवाणच्छवीकः
किश्चान्यस्तद्द्वितीय[2]द्युतिजितविलस-
　　　　त्कामचेतोगवीकः[3] ॥

तथा ।—

आद्यः स्वर्नाथ[4]रत्नद्युतिभुजभुजगद्योतिरत्नैर्विचित्र-
स्तत्सध्यूडूपुष्परागाभिधमणि[5]रचित-
　　　　स्तम्भ[6]जिद्बाहुचित्रः ।
तत्रादिः श्रीलनीलच्छविनिकष[7]दुरः
　　　　स्वर्णरेखापवित्रः
किश्चान्यः क्रोडभासाशिवगिरि[8]मणिभू-
　　　　कान्ति सम्पल्लवित्रः[9] ॥

---

(१) कर्णभूषा ।
(२) तत्सदृशेत्यर्थः ।　(३) मनोरथः ।　(४) इन्द्र ।
(५) शुभ्ररत्नविशेषः ।　(६) गर्व ।
(७) निकषवदाचरतु ।　(८) कैलास ।
(९) लुञ छेदने ।

तथा ।—

आद्यः साङ्गाधराङ्गच्छाविकाविकविता-
वर्द्धिनानर्द्धि[१] युक्त-
स्तत्सध्यूङ् तद्वदेव प्रतिलव[२]रुचिरः
सर्वविद्वद्भिरुक्तः ।
तत्रादिः पद्मजिह्मां निजकटक[३]रवा-
येव पद्यां प्रयुक्तः
किश्चान्यस्तत्सहायाविव निजचरणौ
चालयन् भीप्रयुक्तः ॥

तथा ।—

आद्यः सार्द्राङ्गनीलप्रगुण[४]तरुलता-
हस्तताशस्तखेल-
स्तत्सध्यूङ् कन्दुकार्थं कृतहलतुलया
शाखया लब्धमेलः ।
तत्रादिः सङ्कुचद्वीरवयवनिचयव्याप्तये क्लृप्तचेलः
किश्चान्यस्तस्य तद्वान्मिलनकृतिकृते
वीक्षितागामिवेलः ॥ इति ॥

---

(१) नाना ऋद्धि । (२) क्षण ।
(३) श्लेषे सेना । (४) सरल ।

किञ्च ।—

शिती[१]सतडि[२]दंशुकौ सदवतंसवाम[३]श्रुती
पुरु[४]प्रभवरोहिणी[५] सुखसुतौ[६]
वलाख्यया[७]न्वितौ ।
सकेलिमित[८]धेनुकौ[९] परिहृतान्यजन्मास्पदौ
ददर्श वलकेशवौ कलभवत्स वत्सान्तरे ॥

अपि च ।—

असितमणिसुवर्णवर्णवासः[१०]
कटिघटितामलशृङ्गवेणुसङ्गौ ।
करधृतपटुपट्टशुल्वयष्टी
सुबालि-हरी हरतः स्म चित्तमस्य ॥

दर्शनमात्रतश्च निश्चलनफलयात्रः कम्पसम्पत्पात्र-शङ्कुव[११]त्पुलकसङ्कुलगात्रतया सहसा सहसारं रथादवततार ।

---

(१) शिती धवलमेचकौ ।
(२) तडित्सदृशः । पक्षे तडित्वान् ।
(३) मनोहर । पक्षे सव्य ।　(४) प्रचुर । पक्षे पुरुवंश ।
(५) पक्षे धेनु ।　(६) पार्थिवे तनये सुतः ।
(७) वलाख्येव । पक्षे वलाख्यया ।
(८) परिमित । पक्षे हिंसित ।　(९) पक्षे असुर ।
(१०) वासः कट्योरन्तरे ।　(११) तुल्य ।

अवतीर्य्य च विकीर्य्यमाणाङ्गतया साङ्गमेव प्रणनाम। त[1]न्मात्रपरिणामतया विशश्राम च। निजपितृव्यतादितायान्तु बभ्राम[2]।

यतः।—

प्रभावानुभवीयः स्यात्प्रभावस्तस्य कारणं।
गुरुलाघवभावाय[3] सर्वमेवान्यथान्यथा॥

तदेवमविरामं प्रणाममेव प्रसजति तस्मिन् गावः पराः पयः सवयः समवायेन दुह्यन्तां नीयताञ्च तद्गृहानिति निदिशन्नतीवादरसङ्कर[4]तया सङ्कर्षणसहायः कृपापूरतः पुरतः संहाय[5]स चायं सिंहायमानसंहननः साभ्युत्थानं[6] कराभ्यां तमुत्थापयामास।

स तु गद्गदगदा[7]न्न तु स्वनाम गदितुं शशाक।

ततश्च प्रवयःपशुपचयेषु विरचिततत्परिचयेषु त[8]द्वयग्रताकातरौ तौ भ्रातरौ पितृव्यताव्यवहारमपि विस्मृत्य तमालिङ्गनेनादृत्य निजनिजपाणिना तत्पाणिं विधृत्य स्वालयमेवानिन्यतुः। हरिस्तु

(१) प्रणाम। (२) भ्रान्तः।
(३) वृद्धये। (४) मिलित। (५) सङ्गत्य।
(६) अभ्युत्थानन्तु गौरवमिति चीरः।
(७) रोगात्। (८) अक्रुरस्य।

सद्व्यवहारं समाहरन्नग्रजमेव तत्र निजाग्रेसरं चकार ॥

अथ स याथातथ्यमातिथ्यप्रथमभागं स्वागतादिकं प्रथयित्वा सहानुजन्मा रोहिणीजन्मा रससम्पन्मयं भोज्यप्रचयं तस्मै वलयामास ॥

भुक्तवते तु तस्मै मुखवासनं[१]मुखवास[२]मुखं[३] ससुखं समर्पयामास ॥

तदनन्तरमेव च श्रीमद्व्रजराजं प्रति तं भाजयामास ॥

तत्र च ।—

अक्रूरं प्रणतं मिलन् व्रजपतिः कंसोत्थदुःखं स्मरन्
सास्राशीर्वचसाखिलक्लमहरं यद्यद्गुणैस्तुष्टुवे ।
सारल्येऽप्यलमस्य तादृशि मनः-क्रौर्य्ये तदीयं स्मर-
च्चित्तं[४]क्षुभ्यति जाज्वलीति मम हा !
　　　　　भस्मीभवत्यद्य च ॥

अथ तेन[५]विश्रामायादिष्टं वासमासज्य पर्य्यङ्कोपविष्टं सम्मानिततया सुखाविष्टं पुनस्ताभ्यां कृत-

---

(१) आमोदी मुखवासनः ।
(२) चन्द्रचन्दनमालादिकं ।　　(३) मुखवासादिकं ।
(४) कथकोक्तिः ।　　(५) व्रजराजेन ।

जननीसम्भृतभोजनाभ्यां सह रहसि निविष्ट-मक्रूरं स्वयं कृष्णास्त[१]द्दर्शनतः समुद्बुद्धकंसवधादि-तृष्णास्तादिदमिष्टं पप्रच्छ ॥

यत्र च क्रमचातुरी साधुरीतिरियं सर्वसुखधुरीणतां वहति ॥

किन्तात ! सौम्य ! सुखमागतमत्र शम्वः
किन्तत्र[२] कंसहतकेन हते चिरस्य[३] ।
तौ जीवतः किमिव वा पितराविदानीं
किम्वा तवागमनमङ्गलवीजमासीत् ॥

अथाक्रूर उवाच ।—

तस्य यादववीरेषु वैरानुवन्धः खलु भवता कृतानुसन्ध एव । विशेषतस्तु देवकीविवाहगताह-मारभ्य यः स च भवच्छ्रवसि सच्यमान एवास्ते । मद्विधस्तु तत्र वर्त्मशतपर्विका[४]स्तम्ववदेव वर्वर्त्ति ॥

वसुदेवसहोदरदेवभागपुत्रः परमशुद्धः स उद्धव-नामापि भवद्विरहव्याधिः पवनव्याधि[५]तयाभिधीयत इत्युर्वरित इवास्ति ॥

(१) अक्रूरस्य ।
(२) पुरि । तत्र कीदृशे । (३) अव्ययमिदम् ।
(४) दूर्वा । (५) वातुल ।

श्रीकृष्ण उवाच ।—

तदेतदपि ज्ञायते । साम्प्रतन्तु सप्रतीकं(१)कथ्यतां ॥

अक्रूरस्तु परितो निरीक्ष्य तदिदं सूक्ष्माक्षरमुवाच ।—

अथ श्रीनारदस्तु त्वादृशि विजयसुखसारदस्तादृशि(२)दुर्जन्मपारद इति स(३)तव व्रजप्रेमावृतस्य तस्य(४) च भयेनास्तृतस्य युयुत्सायामुत्साहनाय देवक्याः सप्तमाष्टमगर्भतया युवामनुचितमिव सूचितवान् ॥

आदौ देवक्या गर्भः खलु रोहिण्यां मायया लब्धसन्दर्भः कृतः श्रीवसुदेवः पुनस्तां मायामपि यशोदायां लब्धसम्भवां विज्ञाय देवक्याः सम्भूतं त्वां त(५)त्पर्य्यङ्के निधाय तां(६)तस्यां(७)लब्धसम्भवां चकारेति ॥

श्रीकृष्ण उवाच ।—

ममेदमाश्चर्य्यमिव भाति ॥

---

(१) साङ्गं । (२) कंससदृशे । (३) नारदः । (४) कंसस्य । (५) यशोदायाः । (६) मायां । (७) देवक्यां ।

अक्रूर उवाच ।—

श्रीमदानकदुन्दुभिमुखादप्यद्वन्द्वीभवन्नहमनेन[१] सफलितकर्णद्वन्द्वीभवन्नस्मि ॥

अथ श्रीकृष्णः क्षणं विलक्ष इव निरीक्ष्य सहसा तदिदमन्तश्चिन्तितमवाप ॥

आं आं तदिदमलुप्तज्ञानस्यापि मम व्रजस्नेहावेशवशात्पुरतः स्फुरन्नासीत् ॥

सम्प्रति तु विस्मृतस्वप्नवन्निमित्तं प्राप्य स्फुरति स्म ॥

"वहूनि सन्ति रूपाणि नामानि च सुतस्य त" इति "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज" इति च व्रजावितारं श्रीमत्पितरं प्रति गर्गसिद्धान्तवर्गमेते न पर्य्यालोचितवन्तः सन्ति ।

यत्खलु व्रजावित्र्यां श्रीमन्मदीयसवित्र्यां लब्धजठरवासया मायया सह द्विभुजतया लब्धहृत्कमलवासस्य मम श्रीदेवक्या हृदयसम्भवदुदयमद्रूपविशेषचतुर्भुजरूपाच्छादनप्रार्थनायां[२] तत्र सञ्चारः सम्पन्न इत्यस्याप्रतिपन्नतया[३] तन्मात्रप्रतीतिमागतवन्तः ।

(१) इतीत्यन्तेन पूर्ववृत्तेन ।

(२) देवकीकर्तृकप्रार्थनायां ।　(३) अबुद्धतया ।

भवतु मया तु पितृव्यतायाः पितृतायाश्चानुसर्त्त-व्यतया कर्त्तव्य एव तयोरुद्धार इति ।

स्पष्टं चाचष्ट । ततस्ततः ? ॥

अक्रूर उवाच ।—

ततश्च वसुदेववधसमुद्यतं तमधमं सान्त्वतः शमयित्वा भ्रमयित्वा च स तु क्रतुभुग्मुनिर्यथायथं गतः ॥

तत्र गते तूच्छृङ्खलः कंसः कालायसशृङ्खलया सनिर्वन्धं तव पितरौ ववन्धेति ॥

अथ भ्रातरावुभावपि सास्रावश्रावयतां । तर्हि किं पित्रोरेव सन्देशप्रवेशाय भवदायातं(१) जातं ॥

अक्रूरः सलज्जमुवाच ।—

नहि नहि; किन्तु कंसस्य तौ खलु निजयातना-मपि सहेते । न खलु भवच्छ्रवसि च तत्पातनां । किन्तु तदिदमहमेव निवेदयामि ॥

भवद्भ्यां यदि जाताभ्यां गताभ्यां योग्यतामपि ।
पित्रार्त्तिर्न निवर्त्तेत पुत्रीया(२)कुत्र वर्त्ततां ॥इति॥

श्रीकृष्णस्तु तत्रोद्वेगं हृदि निगूह्य सावज्ञमुवाच ।—कंसः किं नाम शशंस ? ॥

---

(१) आगमनं ।　　(२) पुत्रेच्छा ।

अक्रूर उवाच ।—

शंसनं तस्य कति प्रतिशंसानि । तात्पर्य्यं तु पर्य्यगिद-मेव पर्य्यवसीयतां(१) । भूतराजधनुर्महव्याजतः स्व-समाजं साहाय्यमानाय्य दुर्मन्त्रणायास्मान् प्रतार्य्य तत्कुतूहलकलनाय प्रजान्तरवद्भवन्तावपि निज-व्रजवन्तावस्मद्द्वारैवाजुहाव यदर्थं त(२)देवेति ॥

रामः सहासमाह स्म ।—

बृंहित(३)क्षुधि सिंहेमत्तमतङ्गजबृंहितं(४)खल्विदं ॥

श्रीकृष्ण उवाच ।—

भवतु वयमपि समागम्य तमपि वलिमर्पयित्वा भूतेशं तर्पयिष्यामः । किन्तु तद्भूतराजसभाजनं कदा ॥

अक्रूर उवाच ।—चतुर्द्दश्यामिति ।

तदेवं शेषं विशेषमपि पृष्टवेषं(५)विधाय श्रीकृष्णः प्राह ।—

विचारादस्माकं परममङ्गलमेव यस्मादिदं तस्मा-च्छ्रीमत्पितृचरणेषु गोचरमाचराम ॥

---

(१) निश्चीयतां ।　(२) तात्पर्य्यं ।　(३) वर्द्धित ।
(४) फणिगर्जितं ।　(५) तुल्यं ।

तदेवमुक्त्वा तं तस्मि[1]न्नेव मुक्त्वा[2] स रामस्तत उत्थाय पितृपरिसरमाजगाम ॥

अथ त[3]दादेशादुपवेशानन्तरं तेन वीक्षितमुखकञ्जः समञ्जदञ्जलिवचसा तदिदं व्यञ्जयामास ॥

तात ! मङ्गलवृत्तं किमपि वृत्तमस्ति किन्तु युगपदेव पर्वेव सर्वेभ्यः श्रावयितव्यं ॥

अथ व्रजराजः सन्देहमन्देहतया सानन्दमिवोपनन्दादीनानाययामास ॥

यत्र च किञ्चिदपि विहितापिधानविधानाः श्रीव्रजेश्वरीप्रधाना लब्धसन्धाना[4] जाताः । ततः सुखमुपविष्टेषु तेषु शिष्टेषु श्रीविष्टरश्रवाः किञ्चिदिह सन्निवाचष्ट । अस्मान् प्रति सम्प्रति भोजक्षितिभृदिष्ट इव सन्दिष्टवानस्ति ।

यत्प्रजानिभाः प्रजा यूयमिह महेशधनुर्महामहे सहेशाः सहशावकाः सावकाशमागच्छत ।

विशेषतस्तु निजवीर्य्यतः समीर्य्यमाण[5]निजदर्शनतृष्णौ रामकृष्णौ चेति ॥

---

(१) स्थाने । (२) मुञ्चतेः । (३) पितुः ।
(४) ता अभ्यागता इति वाक्यार्थः । (५) प्रेर्य्यमाणा ।

व्रजराज उवाच ।—

भवन्मन इदं किं मनुते । यद्भवति वसुदेवाद्भव-वति[१]चास्मिंस्तस्य प्रीतिर्भवतीति ।

श्रीकृष्णः सस्मितमुवाच ।—

यद्यन्यथा स्यात्तथापि वृथापथ एव तन्मनोरथः यद्भवत्प्रभावबलसंहितस्य[२] बलसहितस्य मम कः खल्वहितमाहितं[३] कुर्वीत ।

यत एव खल्वावल्य[४]वल्यमाने बाल्येऽपि मम पूतनादयस्ते धूततामापन्नाः । किमुत तद्बलत एव वलितां वल्गमानाभ्यामावाभ्यां बकवत्सकमुखानां सुखादेव प्रतिरित्सनं[५] जातमिति ॥

तत्र च ।—

बक एकं गिलस्तावदघः सर्वङ्गिलः स्थितः ।
इन्द्रः सर्वङ्कषस्तेषु कंसकः कं समीयति[६] ॥

तदेतन्निशम्य मिथो निशाम्य च सम्यगप्रति-पत्ति[७]पराहतेषु तेषु मात्रादिषु च कृतयात्राभ-प्राणालिषु पुनरुवाच ।

---

(१) बलदेवे । (२) मिलितस्य । (३) अर्पितं ।
(४) नैर्बल्य । (५) हिंसनं ।
(६) समामिवाचरति । (७) अविचार ।

गोकोटिभिर्घटितकोटिनामस्माकमन्यस्मिन्नटितुमपि घटना न दृश्यते । राज्ञामाज्ञामतिक्रम्याऽपयाने च तदागमनमयं भयं भवत्येव । किमुत स्थाने ॥

ततः सङ्कोचं विना तत्रास्मद्गमनमेव तस्य शमनमुपलभामहे ।

तदेतदाकर्ण्य सर्वैवर्ण्यमुपनन्दं प्रति श्रीमान्नन्दः प्राह स्म ।—किं कर्त्तव्यमिति ॥

स चोवाच ।—

तत्र गम्यमिति सम्यगेवाह वत्सः । अगतिर्नाम कामं तस्य क्रोधमस्य च भयं बोधयति गतिस्तु तं(१) त (२)दप्यपगमयति ॥

किञ्च ।—

यदपूर्वमपूर्व(३)पूर्वमपि रक्षां कुर्वदासीत्तदेव सर्वमर्वाञ्चमप्यापद्वारं(४) तारयिष्यति ।

अथ तदेवं युक्तिं वलयति गोपालवलये प्रभावभावपूर्णपूर्णिमा च तूर्णमेव तत्रागता ।

(२) क्रोधं । (२) भयं ।
(३) अदृष्टं । (४) समूहं ।

ततश्च व्रजराजेन कृते प्रश्ने सा सस्नेहमुवाच ।
भवन्नन्दनस्य मथुराप्रयाणो सर्वानन्द एव स्यात् ।
कंसादयः सर्व एव नृशंसा ध्वंसाय सम्पत्स्यन्ते ॥

किन्तु व्रजागतावस्य विलम्वसम्वलनं पश्याम
इति यथायुक्तमध्यवस्यन्तु[1] ॥

उपनन्द उवाच ।—

अविलम्वागमनाद्विलम्वागमनमपि श्रेय एव
वैरिशमनन्तु यदि स्यादिति गमनमेव वरं रमणीयं ॥

ततः सर्वेऽपि गत्यन्तरमसङ्गत्य सङ्गतमिदमुच्यत
इति प्रोच्य किञ्चिदप्यननुशोच्य श्रीमन्मुखं विलोच्य
श्रीकृष्णं प्रश्नविषयं कृतवन्तः । तत्र गन्तव्यता कदा
मन्तव्या ॥

श्रीकृष्ण उवाच ।

गतिश्च प्रातस्त्रयोदश्यां युक्तिवश्यां पश्यामः ।
चतुर्दश्यां खलु महस्तन्महनीयतामाप्स्यति ॥

तदेवं सान्तःपरिदेवनेह[2]मेवेह पश्यति व्रज-
नरदेवे सर्वेऽप्यूचुः ।

---

(१) निश्चिन्वन्तु ।
(२ सान्तःपरिदेवना ईहा यत्र तत् यथास्यात् ।

सर्वं घोषमनुघोषणा सद्य एवासाद्यतां । यथा प्रातरेव गोपाः सोपायना राजसभामभियान्तीति ।

अथ श्रीमन्नन्दराजश्च समाजं व्याजहार । भगवत्या सम्मते भवतां मते सर्वमेव मङ्गलं सङ्गंस्यत इति भद्रमादिश्यन्तां दिश्यादिश्या गोपाः प्राभृत-(१) प्रभृतिकृते ॥

तदेवं लब्धानुमतिर्वृन्दावनपतिर्निजपरिचारकानादिदेश । कथ्यतामिदमुत्तारं(२) त्तुत्तारं प्रतीति ॥

तदेवं विज्ञाय व्रजराज्ञी तु मोहेनाज्ञी भवन्ती न किञ्चिदपि वक्तुं व्यक्तुं(३) वा शशाकेति वदन् मधुकण्ठश्च निरुद्धकण्ठस्तद्वदेवासीत् ।

अथ कथायाः सभायामपि तद्वदेव मोहं गच्छति ससमाजे व्रजराजे तस्य चरणराजीवयुगं युगपद् गृह्णन् व्रजयुवराजः पुनस्तमाजीवयन्नुवाच ।

तात ! कथं कातरायसे ? यथापूर्वं कथामात्रं खल्विदं सोऽयमहं पुनर्भवदनुध्यानरम्यतया कंसं

---

(१) उपायन । (२) उच्चैस्तारं यथा स्यात् ।
(३) कर्तुं ।

निर्द्दम्य चिरात्पुनरागम्य भवद्दृष्टिपथानुवर्त्तीभवन्नेवास्मीति ॥

ततः सपुलकपालितमङ्कपालयति[१] व्रजभूपाले सर्व एवाखर्वमानन्दगर्वमुवाहेति कथायां शान्तप्रथायां मधुकण्ठ उवाच ।—

कुत्र वा रमतां पुत्रस्तवान्यत्र व्रजाधिप ।
भक्तानुकम्पासम्पाती[२] पश्य ते वश्य एव सः ॥

अथ श्रीकृष्णकृतमहसि राधासदसि च रात्रिकथायां मधुकण्ठः सगद्गदमुवाच ।—

अयि ! सम्प्रति श्रीमाधवेन हृतविरहवाधे ! श्रीराधे ! पुरावृत्तमवधीयतां ।

स्फूर्जथुप्रतिमभूर्जितं तदा-
घोषणां सपदि घोषमन्वभूत् ।
य[३]द्बभूवुरपराः पराहता
हा ! हता इव च गोपसुभ्रुवः[४] ॥

तथा सति ।—

काश्चिन्म्लानाननास्तच्छ्रवणादहनज-
ज्वालया काञ्चनासन्

(१) आलिङ्गति सति । अङ्कपाली परिष्वङ्ग इति त्रिकाण्डशेषः । तां करोति ।
(२) युक्तः । (३) यस्मात् ।
(४) राधिकादिका इति वा पाठः ।

क्षीणाङ्गस्रस्तवेषा जडनिभवपुषः
काश्च काश्चिद्विचिन्ताः ।
ता एताः केन वर्ण्या य इह निज-हार्दे
स्पृष्टतद्भावकष्टः
किम्वा तत्स्पृष्टिशून्यः स च स च य(१)दलं
जाड्यमेव प्रयाति ॥

अथ निशि रमणीनां मूर्च्छनं निर्ममे या
धिदुदयमपि कल्ये(२)घोषणा सैव चक्रे ।
वपुषि दहनतप्ते भेषजं तेन तप्ति-
र्विषमपि विषदुष्टे श्रेष्ठमिष्टं भिषग्भिः ॥

लब्धचेतनानां चासां कंसादाशङ्कायामपि प्रस्तु-
तातङ्कायां देवताकलित(३)मिव रक्षणाय(४)फलितं
किञ्चिदन्यदिदं भावप्रभावचेतितं(५) पौर्णमास्या च
पुरतो निश्चितीकृतं चेतसि स्फुरति स्म ॥

यस्मिन्नघः कालियकाद्रवेयः
केशी तथारिष्टवृषश्च नष्टः ।
कंसश्च तस्मिन्मृत एव स स्या-
न्न तत्र शङ्का-लवकोऽपि भाति ॥इति॥

---

(१) यस्मात् । (२) प्रातः ।
(३) आकस्मिकमित्यर्थः । (४) प्राणरक्षणाय ।
(५) ज्ञापितं ।

तदेवं विश्वस्य सम्मतं विश्वस्य[१] पुनश्चिन्त-
यन्ति स्म ।—

वकी-रिपोः कंसजयेऽपि सिद्धे
शङ्केमहि स्वार्थविनष्टिमेतां ।
भवेदसौ यादवराजधान्यां
राजेति गोष्ठे कथमत्र तिष्ठेत् ॥

ग्रामीणा वयमिह गोपवर्ग-कन्या
नागर्य्यः पुरमनु सन्ति राजपुत्र्यः ।
कृष्णस्तु ग्रहिलमना गुणेषु तस्मा-
दस्यान्तः कथमिव नः प्रति स्मृतिः स्यात् ॥

निमेषः कल्पः स्याद्यदवकलने यस्य विपिने
गतौ यत्कृच्छ्रं तत्कलयति न[२] आत्मा न तु परः ।
मधोः पुर्य्यां तस्य व्रजनमथ राज्याय यदिदं
कथं तद्वास्माकं वत ! किमपि धैर्य्यं कलयतु ॥

अस्माकं रागजातिर्वत ! लषति न नः[३]
शर्म तस्यापि राज्यं
किन्त्वेकान्तस्थमिच्छत्यनुलवमपि तं
सेवितुं प्राणकान्तं ।

(१) प्रतीत्य ।　　(२) अस्माकं ।
(३) अस्माकं ।

आत्माप्यन्तर्धिया तद्दृगमृत[1]विरहं
मीमवच्छङ्कमान-
स्त[2]त्प्रागेवातिशुष्यन् गणयति न परं
नापरं किञ्चनात्र ॥

हा ! तस्य स्मितचारुवक्त्रवलयं खेलाञ्चिनेत्राञ्चलं
चित्रानन्दविधायिगीर्विलसितं लीलाकुलं लोकनं ।
साक्षात्कृत्य न जातु तत्तदुपमां
चासोढ या[3]विघ्नधी-
स्त्यागार्त्तिं यदि सा सहेत गरलं
तत्रामृतं वेत्ति न ॥

तदेवं चिन्तातुराः पुराय कृतयात्रं श्यामगात्रं विलोकितुं निष्कलङ्काशङ्काः सर्वा एवाभिद्रवन्ति स्म । यात्राविधानं तु प्रातरभिधानं यास्यति ॥

तदेतदभिधाय मधुकण्ठः प्रतिपत्ति[4]विपत्तितः स्तब्धतां लब्धवति माधवे राधां तु समुद्यन्मूर्च्छा-वाधां निरीक्ष्य मङ्क्षुपुनराह स्म ॥

राधे ! पूर्वकथा सेयं न तु साम्प्रतिकी स्थितिः ।
पश्य त्वद्वदनं म्लानं पश्यन्म्लायति सोऽप्यसौ ॥

---

(१) मीन पक्षे जलं । (२) विरहस्य ।
(३) स्त्री । (४) ज्ञान ।

तदेवं क्षुधि भोजनमिव तदन्ते संयोगरसमेव परिवेष्य सर्वानपि सुखेन विशेष्य कथकयुगलं निजावासं समाससाद । श्रीराधा-माधवौ च निज-मोहन-मन्दिरमिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
अक्रूरक्रूरतापूरणं नाम
द्वितीयं पूरणम् ॥

तृतीयं पूरणम् ।

अथ श्रीकृष्णाकृतमहसि श्रीव्रजराज-सदसि प्रातःकथायां स्निग्धकण्ठ उवाच ।—

अयि ! श्रीव्रजराज ! राजमानश्रीहरिमुखरुचि-विराजमान ! पुनरिममितिहासमवभासयामः(१) ॥

अथ रात्रावविशिष्टस्वल्पमात्रायां यात्रामात्राया(२)मपि पात्रा(३)चितगात्रायां रामभ्रात्रा रचितेन पूतनादिवधाचरितेन सम्बद्धा विरुदावल्यः प्रावल्यतः स्तुतिकृद्भिः प्रस्तुतिमापिताः सर्वानेव गर्वादुत्साहयामासुः ॥

वर्त्ततां तावदन्येषां वार्त्ता । यत्र तत्पितरौ च कंसध्वंसनमपि सिद्धमिति मत्वा नन्दितरौ(४) वन्दिभ्यः कृतबहुधनवितरौ वभूवतुः ॥

---

(१) प्रकाशयामः । (२) मात्रा परिच्छदे दध्यादिके ।
(३) अमत्र । (४) तरप् ।

श्रीव्रजेशगृहिणी-गतिं गता
रोहिणी न पृथगत्र वर्ण्यते ।
प्रातिविम्वरुचिवर्णनं पुन-
र्जल्पतां[1] भजति विम्ववर्णने ॥

अथ प्रस्थानस्थमङ्गलवेलायामारब्धमेलायां पुनस्तन्मन्त्रणाय यन्त्रणाय[2] लब्धवैयग्र्यावेशयो र्व्रजेशयोर्ज्योतिर्निपुणाः शकुनज्ञानसद्गुणाश्च द्वारि सङ्गम्य रम्यजनद्वारा तावात्मगमनमधिगमया- मासुः ॥

अनन्तरमन्तःपुर एव ताननन्तरितान्[3] विधाय तदानीमुचितदानीयनिधानपात्रपाणी शपथं सम्प्र- थय्य तौ प्रच्छन्नं पप्रच्छतुः ॥
सर्वमनुभवद्भिर्भवद्भि किमवधीयत इति ॥

ते प्रोचुः ।—

कथमयं नितान्तसुखवृत्तान्त एकान्ततया पृच्छ्यते ।
सर्वेषां पुरत एव सोऽयं पुरस्कर्त्तव्यः ॥

तथाहि ।—

भीतिं मा कुरुतं व्रजक्षितिपती युष्मत्तनूजः स्फुटं
कंसं ध्वंसगतं विधाय भविता त्रैलोक्यलक्ष्मीपतिः ।

(१) उक्ततां । (२) सङ्कोचनाय । (३) अव्यवहितान् ।

यद्वां कीर्त्तिकलापनर्त्तितमुखी शश्वन्त्रिलोकी भवे[१]-
द्वेदः पञ्चमवेद[२]तन्त्रसहितः साक्षित्वमत्राप्स्यति ॥

अथ तेभ्यश्च वह्वीमंहतिं[३]संहतिं[४]विधाय हृदि सुखं निधाय शरणतया ध्यातनारायणचरणयोरनयोः[५] परिवारितभृत्यौ कृतप्रातःकृत्यौ तावेतौ सखिसमेतौ निकाममभिषितदनुजौ रामरामानुजौ समाजग्मतुः ॥

समागम्य च तयो[६]रोहिणी सहितयोः पदारविन्दानि वन्दित्वा तदङ्कपालि[७]सङ्गशालितया चिरं नयनयोः स्पन्दित्वा स्थितयोरेतयोरेकद्वादिक्रमेण शतातिक्रमेण सर्वेऽप्यन्तरङ्गालब्धसम्भ्रमतरङ्गास्तदन्तःपुरमागताः ॥

अथ मद्र[८]ङ्करदीपभद्रनिपादीनां[९] मध्यमध्यासीनासनयोः सार्द्रनयनयोरनयोर्विकसद्वदनाम्बुजयोरग्रजानुजयोः सर्वतः खर्व[१०]विचारतया स्थितेषु सर्वेषु स पुनरक्रूरः क्रूरस्तदेतद्वाहिः प्रदेशतः

---

(१) सम्भावना ।　　(२) पुराण ।
(३) दान ।　　(४) समूहं ।
(५) सतोः ।　　(६) मातापित्रोः ।
(७) अङ्कपाली परिष्वङ्गः ।　　(८) मद्रं भद्रं ।
(९) मङ्गलपूर्णकलस । निपोघटः ।　　(१०) नन्यू ।

सन्दिदेश: । सर्वमङ्गलसङ्गतं कथमेतल्लग्नं सम्यग्न यात्रा लग्नं क्रियत इति ॥

ततश्च ताविमौ शूराणामग्रिमौ कंसघाताय लब्धतृष्णौ रामकृष्णौ चित्रायमाणानां पित्रादीनां चरणवन्दनायानन्दनाय च मधुरं विधुरता(१) विधूनन(२)मपि गदन्तौ गद्गदवर्णराशिभिराशीरनुगामनुज्ञामादाय प्रसादायतसम्पदा(३) यदा तत्स्थानात् प्रस्थानाय पदारविन्दं ददानावदृश्येतां तदा तदादीनां सम्मदालिभिः सममद्वन्दतां(४) विन्दद्दिव्यदुन्दुभिद्वन्द्ववृन्दवाद्यमशेषाभिवाद्यतया समुल्ललास ॥

तथा च श्रीकृष्णमुद्दिश्य श्लोकयन्ति ।—

कंसध्वंसकृते यदा निजगृहात् कृष्णेन यात्रा कृता
तर्ह्यारम्भत एव दुन्दुभिशतं वृन्दारकैर्वादितं ।
आस्तामन्यकथा यथा स च पिता
माता च सा चिन्तया
कान्तात्मापि मुदं समस्तभविका
नन्दस्य मूलं ययौ ॥

(१) दुःखिता । (२) यथा स्यात् ।
(३) आयतसम्पदेति कर्मधारयः । (४) सन्देहराहित्यं ।

अथ रथस्थाने सानेकवेदादिघोषमङ्गलपोषं कृतागमनयोरनयोः सर्वतः सर्वमेव गोकुलं बभूव ॥

तत्र चैकतः श्रीव्रजराजादयः परतस्तु तदीय-जायादय इति स्थिते प्रस्थितेरनुज्ञापनाय पणायति[१]परितः कृताञ्जलिसञ्जने कञ्जलोचने सर्वेऽप्यूचुः ॥

अस्माभिर्भवता प्रस्मारित[२]सर्वैः सर्वैरपि भवता सममेवागमनीयं ॥

यतः ।—

माता भस्त्रेव सेयं वकशमन ! तव त्वद्वशाश्वासवर्गा
सोऽयं तातश्च तद्वत् किमपरमखिलं
गोकुलं तादृगेवं ।
सर्व्वेषां शश्वदन्तर्हृदि वससि यत-
स्त्वं ततस्त्वां विना किं
गेहैरर्थैः शरीरैरसुभिरपि भवेत्
प्राणिनां गोकुलस्य ॥

तदेवमस्त्रस्तम्भं लम्भयत्सु गोपसभासत्सु तादृश-दृशा श्रीकमलदृशा स्वयमुक्तं ॥

(१) स्तुवति । (२) विस्मारित ।

यूयं मे प्राणतोऽपि प्रियतमसुहृदो यन्निमित्तं दवाग्निं
मेनेऽहं पानकाभं तमपि गिरिवरं कन्दुकप्रायमेव ।
यद्यप्येतन्न युक्तं वचसि रचयितुं स्यादथापि क्षमं वः ।
पश्यंस्तत्तद्यथा प्रागकरवमधुना तद्वदेव प्रवच्मि ॥

मातुर्जीवनमेव तातचरणाः किञ्च व्रजावासिना-
मात्मानस्तनया मम प्रियतमा

गच्छन्तु साकं मया ।

तिष्ठेयुर्बत ! येऽपि ते पुनरमी स्पष्टं जनन्यास्तथा
धेनूनां चरणान्ययाद्विदधतां मत्प्राणरक्षामिह ॥

किञ्च ।—

श्रीमत्पितृचरणानां प्रतिनिधि(१)तया तत्तत्प्रति
विधि(१)रचनाय तदग्रजयुग्मं व्रजनिष्ठमेव तिष्ठतात् ॥

अङ्गप्रत्यङ्गरूपतया तदनुजयुग्मन्तु सङ्गमेव सङ्ग-
च्छतात् ॥

अथ तत्र तत्र यत्नतस्तेषु तेषु युक्तेषु(२)यथायथं
नियुक्तेषु यथा यथा मातृतद्भ्रातृप्रभृतिषु पितृभ्रातृ-
स्वभ्रातृप्रचितिषु चानुज्ञापनसमापनं तथा तथा
वर्णनं लुप्तवर्णपदतामाप्नोतीत्यलमतिप्रसङ्गेन ॥

किन्तु तेषां कंसहनने ऽतिविलम्बं विना प्रत्याग-

(१) प्रतीकार ।　　(२) योग्येषु ।

मने च नासम्भावनासीदितीदमेव विषीदन्मर्मता-
मतिचक्रामेति ।

कथां समाप्य स्निग्धकण्ठः पुनरुवाच ।—

यन्मयेदं पुरा(१)वृत्तं(२)पुरावृत्तं प्रतीयतां ।
राजन् ! सुरारिहन्तायं तव क्रोडे मुरान्तकः ॥

तदेवमापातिरम्यं निशम्य श्रीव्रजराजेन च तं परस्परास्रसार्द्राङ्गतयालिङ्गितं निशाम्य सर्वेऽप्या-नन्दगर्वेण निजनिजगम्यं जग्मुः ॥

यदा श्रीव्रजराज्ञी तमन्तरङ्गद्वाराहूय भूयः परिरभ्य नवमिव लभ्यं चकार ॥

अथ रात्रिकथायामारब्धप्रथायां श्रीराधामाधव-योरग्रतः स्निग्धकण्ठ उवाच ।—

अयि ! सम्प्रति सन्ततलब्धकृष्णासञ्जने(३) तत्कान्तिनर्त्तितनेत्रखञ्जने ! सर्वाधिके ! श्रीराधिके ! पुनरिदं पुरावृत्तं कर्णावृत्तं क्रियतां ॥

अथवा तदा रथपथमागते ससमाजे व्रजयुव-राजे तत्प्रेयसीनां वृत्तं मन्मतिवृत्तिमतिवृत्तं कथं कथयितुं शक्नोमि ॥

---

(१) पूर्वं ।   (२) अधीतं कथितमित्यर्थः ।
(३) मिलने ।

तथाहि ।—

मूर्खत्वं निर्घृणत्वं हरिहरणमिह
क्रौर्य्यमक्रूरनाम्ना[1]
सर्वेषां वुद्धिलोपं शकुनसुभगता-
कल्पनं चात्र कृत्ये ।
धातुः पश्येति शश्वद्विकलितवचसा-
मार्य्यगोष्ठीगतानां
धीराणामप्यमूषां भ्रमजनितदशा
हन्त ! मां दन्दहीति ॥
नोपालभ्यो विधाता स तु भवति पर-
स्तद्वदक्रूरनामा
किन्त्वेष प्राणनाथः स्वविरहकृदुपा-
लभ्यते नन्दपुत्रः ।
एवं तासां मृदूनामपि दुतहृदय-
ज्वालरूपैर्विलापै-
रद्यापि स्मर्य्यमाणैः प्रतिपदमपि न-
स्तप्यते चित्तवृत्तिः ॥
आभि[2]र्भाग्यं वधूनां मधुनगरभुवां
यन्नुतं[3] भाविकृष्ण-

(१) नामकरणेन । (२) प्रेयसीभिः । (३) स्तुतं ।

प्रेत्याथं हन्त ! तस्माद्गतिरपि च निजा

तत्र चैषीति शङ्के ।

इच्छां चासां मृदूनां स्वयमपि रहसि

प्रेक्ष्यमाणो निजाङ्के

लज्जाविस्तारभाजामसकृदहह ! तां(१)

चिन्तयित्वा दुनोमि ॥

तासां नातिप्रतीतिं मधुपुरगमने

श्रीहरेः कुर्वतीनां

वज्राणां पाततुल्यः शिरसि यदभव-

त्तद्रथारोहजल्पः ।

तस्मान्निन्दा कृता यद्व्रजपतिसदसा-

मप्यमूद्दाग्भिरुच्चै-

र्दुःखप्राचुर्य्यमेतन्मम विकलयति

स्वान्तमद्यापि हन्त ! ॥

आयातप्राणसख्यो वयमिह निकटाः(२)

कोटयः प्राणनाथं

प्रत्यावृत्तं वितन्मः किमिव गुरुजना

नः करिष्यन्ति नाम ।

---

(१) तां इच्छामित्यन्वयः । (२) सत्यः ।

इत्थं तास्तं द्रवन्तीर्मृदु चरितवतीरप्यलं तीव्रभावाः
क्षिप्ताश्वक्रु[१]र्यदन्ये तदिह मम वला-
त्प्राणघातं करोति ।
हा ! हा ! सा रासगोष्ठी नवनवमिलनो-
ल्लासशश्वद्विलासा
तल्लीलाकल्पवल्ली समुदयजनुषा-
मङ्कुरश्रीः क्व याता ।
हा ! धिग्याक्रूरनाम्ना कितवनृपतिना
दीक्षिता[२] गोपगोष्ठी
सेयं तत्सर्वनाशिन्यजनि कुत इति
क्रोशिका[३] मां दहन्ति ॥
आस्तां रासादिलीलावलिरपि ललिता
हा! दिनान्ते निशान्ते
ऽप्यश्नन् गोभिर्विलासी सहसखिनिचयः
साग्रजः कृष्णचन्द्रः ।
अस्मान्नेत्रान्तलक्ष्मीविलसितकलया
पुष्टवान् सुष्ठु यस्तं
गोपास्तूर्णं नयन्ति क्व सम[४]मिति गिरो
गोपिका मां तुदन्ति ॥

---

(१) अन्ये कर्त्तारस्ताः क्षिप्ताश्वक्रुः । (२) शिक्षिता ।
(३) प्रेयस्यः । (४) युगपत् ।

तदेवं स्थिते ।—

राधा यद्यपि मूर्च्छिता समभवत्तस्यास्तथापि प्रिय-
श्चित्तान्तः स्फुरति स्म तद्वदभितो
यद्वच्छताङ्गं गतः[१] ।

सोऽयं यद्यपि दृष्टिकृष्टिमकरोदस्याः सकाशान्निज-
क्षोभाद्विभ्यदियं तथाप्यनुदिशं
हा ! तद्दृशि व्यानशे[२] ।

तस्यां सभायां रुरुदुर्यदेता
गोविन्द ! दामोदर ! माधवेति ।
तत्र स्मृतेऽद्यापि मनो ममेदं
खेदं भजत् प्राणभृतिं न वष्टि ॥

एवं वत ! सुदतीनां, रुदतीनामप्यरुन्तुदः स रथी ।
अक्रूरः क्रूरमना, दूरं हरिमहृत सूरजापूरं ॥

कृष्णस्तन्मुख्यवर्गस्तदनुगतरथस्तत्पताकातदुद्य-
द्धूलीनां पालिरित्थं क्रममनु निमिष-
प्रोज्झितं वीक्षमाणा ।

प्रत्यावृत्तौ निराशा व्रजयुवतिततिः प्राणमत्यक्ष्यदेव
प्राक् चेन्नात्मा गतिस्वीकृतिकृति[३]लिपिभिः
सत्य[४]मत्र व्यधास्यत् ॥

(१) यद्वद्रथं प्राप्तः । (२) व्याप्तवती ।
(३) निपुण । (४) शपथं ।

यद्यपि सुरमुनिकथिता
स्वस्यागतये विलम्बिता ज्ञाता ।
तदपि च वलविततृष्णो
नास्यां[1] कृष्णेन नादृतिः कलिता ॥

तत्र तस्य तासाञ्च सस्वेदजलकुङ्कुमरागेण साश्रुकज्जलभागेन च मुहुर्मिथोलिखिता दूत्यसङ्गत-मधुमङ्गलपत्रिकाः[2] पत्रिका यथा ।—

आयास्याम्याशु हत्वा तमघिमधुपुरं
　　　　कंसमप्यस्ति दूरं
वत्साद्या घातधाम्नः[3] पुरमपि किमद-
　　　　स्तत्प्रियाः कुत्र दुःखं ।
किन्त्वन्यत्प्रार्थितं यद्भवदभिरुचितं तद्विधत्त प्रसत्त्या[4]
प्राणे प्राणेश्वरीभिर्मयि किमपि परं
　　　　हन्त ! मन्तव्यमन्तः ॥

गच्छन्नेष त्वमद्य स्फुरसि दयित ! भोः !
　　　　कंसघातं विधाय
स्वीकर्त्तुं राजतां तत्कथमथ भवतादागतिस्ते व्रजाय ।

---

(१) विलम्बितायां ।
(२) पत्रं वाहनं ।　(३) वत्सासुरादिवधस्थानात् ।
(४) प्रसादेन ।

तस्मादस्माभिरर्थ्यं तदिदमिह भवां-
स्तत्र नानाविराज-
त्तीर्थे सर्वार्थदे नः स्मृतिमनु ददता-[(१)]
मञ्जलीनां त्रयाणि ॥

नालं मे राज्यलिप्सा कथमपि वलते
निर्मिमे तत्र सत्यं[(२)]
कंसं हत्वा यदूनां सुखमभिवलय-
न्नस्मि चायातकल्पः[(३)] ।
वद्धः स्यात् कृष्णसारः सपदि विधिवशा-
त्तर्हि किं पार्थिवादे-
र्मानस्तस्मिन्सुखाय प्रभवति न वनं
नापि कान्तासुसङ्गः ॥

वृन्दं क्रीडावनानां वहुविधमभितो
ऽप्यस्ति तत्राथ राज्ञां
कन्या वह्व्योऽपि कान्तास्तव विभववशा-
दुद्भविष्यन्ति धन्याः ।
तत्तल्लाभे मनस्ते कथमिह भविता-
स्मासु वा किं तपोभि-

---

(१) ददाने ।　　(२ शपथं ।　　(३) तुल्यः ।

लब्धे भोगे विचित्रे पुनरपि तनुमा-
नीहते वन्यवृत्तीः ॥

सत्यं ताः केलिवन्या विदधति लषितं
सर्वतः सत्यमेव

क्षोणीपालादिकन्याः परमगुणगणा-
स्तोत्रभाजः स्फुरन्ति ।

सत्यं(१)कुर्वे त्रिलोकी मम न हि रतिदा
नापि तत्रस्थरामा

यद्वद्वृन्दावनं मे तदनुगतरमा यद्वदेता भवत्यः ॥

सा ते सर्वाङ्गशोभा वत ! समधिगता
येन नेत्रेण येन

श्रोत्रेणाश्रावि वंशी समगमि वपुषा
येन च स्पर्शलक्ष्मीः ।

तेनैवालम्भि दूरं गमनमवगतं तेन सन्दिष्टमुग्रं
तेन स्वं विप्रलब्धं रचितमिति हहा !
जीवितं धिग्विधिं धिक् ॥

येयं दृष्टिर्मया वश्छविपरिकलना-
त्कृष्यते या श्रुतिर्वा-

---

(१) शपथं ।

दूरस्था रुध्यते या तनुरपि मलिना-

द्रव्यते[1]सव्यपेक्षं[2] ।

यद्येतास्तत्र तत्र प्रतिकृतिकृतये न ह्यधीना मम स्यु-

स्तर्ह्येताः स्वैरिणीर्वा कथमहमहह !

प्राणसख्यः सहेय ॥

अक्रूरक्रूरभावं विधिरशुभविधिं मित्रमामित्रचर्य्यां

यस्यामस्यां दशायां सरभसमगम-

त्तत्र कान्यस्य वार्त्ता ।

अस्मज्जीवोऽप्यजीवस्थितिमिह नियतं

प्राप्नुयादेवमत्र

स्वामिन्न व्याधिव[3]त्तत्प्रतिविधि[4]रुदिया-

त्कालकल्पे विलम्बे ॥

आयास्याम्येव शीघ्रं न खलु मम मन-

स्यन्यवार्त्तास्ति काचित्

काचिद्वा दैवतः स्यात्तदपि न भवती-

र्जातु दीनास्त्यजानि ।

या या मध्ये मदार्त्तिर्मुहुरिह भविता

तां पुनः स्वप्नरूपां

---

(१) दूरीक्रियते दूरस्य द्रवः । (२) सापेक्षं ।
(३) व्याधाविव । (४) प्रतिकृतिः ।

मा शङ्कध्वं यथा प्रागसति च विरहे
शङ्कमाना बभूव(१) ॥ इति ॥

एतावन्मानमन्यासां वाचिकं हरिणाजनि ।
राधाया मूकतानूक(२)ममितं य(३)त्तु निर्ममे ॥

ततः स्ववृन्देन निशान्तमापिता
बलेन बालास्तदुरीकृतागतिं ।
प्राचीनत(४)द्रीतिशतेन निश्चितां
विनिर्मिमाणा मुहुरेव तां जगुः ॥

तदेवं स्निग्धकण्ठस्य कथितमनु व्यथितमनसि श्रीराधिकादिसदसि विकलः कमललोचनः स्वयमेव समवोचत ॥

राधे ! श्रवसि नावेशं कुरु किन्तु विलोचने ।
वृत्तं स(५)न्मन्यसे हन्त ! वर्त्तमानं न वीक्ष्यसे ॥

तदेतन्निशम्य रम्यं तन्मुखं निशाम्य शाम्यत्पीडा सव्रीडा तत्कालवलमानशीतलनयनजलविन्दुभिस्तत्पदारविन्दद्वन्द्वमिन्दीवराक्षी शिरसा निषेवमाणा सुचिरं सिषेच ॥

---

(१) यूयं । (२) कर्त्तृ शीलान्वयावनूके द्वे इत्यमरः ।
(३) वाचिकं कर्म्म । (४) कृष्णस्य । (५) वर्त्तमानं ।

अथ सर्वेषां सुखसन्दोहे सम्भृतदोहे सर्वे पर्वेव लभमाना निजनिजालयं सम्बभूवुः ।
श्रीराधामाधवौ च मोहनमन्दिरं विन्दतः स्मेति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
माथुरपुरस्थानप्रस्थानं नाम
तृतीयं पूरणम्

चतुर्थं पूरणम् ।

ततः ।—

श्रीव्रजयुवराजविराजमानव्रजराजकारितप्रथायां प्रातःकथायां मधुकण्ठ उवाच ।—

अथ सम्प्रति श्रीव्रजराजलोचनसुखदवेषः स एष श्रीव्रजयुवराजस्तदा स्वमातरं कातरमनस्तया गृहगमनं प्रति प्रतिकूलमनसं मत्वा क्रोशमर्द्धमर्द्धं गत्वा तस्या भावान्तराय काञ्चित् काञ्चिद्भोजनादि-सामग्रीमग्रीयमग्रीयं पथि श्रममपनेतुमिव प्रहितैः स्वहितैर्याचितवान् ॥

ततस्तद्द्वारा तत्प्रयाणक्रमवचने तद्याचितरचने चावेशाद्देश्मप्रवेशः कालातिक्रान्तावक्लेशलेशश्च तस्या वृत्तः ॥

अथ यावद्व्रजेश्वरादयः स्वस्वशकटं घटयन्ति स्म तावन्निजरथं प्रथमानजवतया वामया गत्या गान्दिनीसुतः कालिन्दीतीर्थविशेषं प्रत्यासादित-वान् ॥

कदाचिद्दर्शनञ्च निवर्त्त्यैयातामेताविति व्रजस्थाना द्दष्टिवञ्चनाय ॥

ते तु सरलप्रज्ञास्तत्कौटिल्यगतिमविज्ञाय दक्षिणाया गत्या मधुपुरीदिशमुरीकृतवन्तः ॥

यदा चाक्रूरस्तत्र माध्याह्निकं धर्मकर्म कुर्वन्नपूर्वकमपि विगतभवं(१) भगवद्विभवं पश्यन्नश्यदुत्तालगतिता(२)मवाप ॥

तदा तु ते किं तावदिदमिति सचिन्ताः पथि व्यथिततया चिरं तस्थुः ॥

अक्रूरे वारिमग्ने रहसि रथगतौ रामकृष्णौ व्यधत्तां
वार्त्तामाविश्य यां यां शृणुत मम मुखा-
दद्य सङ्क्षेपतस्तां ।
किं किं पुर्य्यां विधेयं तदिदमिदमहो !
तत्र वा संशयः कः
किं गोष्ठे तत्तु भाग्यं स्मरति मयि मुहुः
कण्ठमश्रं रुणाद्धि ॥

अथ चिराल्लब्धदृष्टिपथे च सरामकृष्णातद्रथे पुरस्कृतश्रीमन्नन्दाः सर्व्वे सानन्दा वभूवुः ॥

---

(१) प्रपञ्चातीतं ।
(२) नश्यन्ती उत्तालगतिर्यस्य तां ।

ततश्च ।—

तत्रैव क्षणमुपविश्य परस्परमुपदिश्य मन्त्रं वलयित्वा दैवमेव च सदैव सहायतया कलयित्वा वल्लववलयः पुरः[१]पुरतः स्थलं चलति स्म ॥

तत्र तत्र च पथिकानां भाग्यप्रथिमा केन वर्ण्यतां ॥

यत्र हि ।—

पुराद्विदूरादथ[२]यद्गतागतं
जना व्यधुर्ये परितोऽपि ते पथि ।
आकस्मिकं वीक्ष्य हरेर्मुखाम्बुजं
विसस्मरुस्त[३]द्वपुषो दृशोरपि ॥

स पुरं प्रविशन्देवीखरमाविश्य दक्षिणे ।
ववास[४]या तत्र नाम्ना खरवासेति तां व्यधात् ॥

अद्यापि तां जनाः सर्वे मथुरायाः परिक्रमे ।
दक्षिणे सुष्ठु कुर्वन्तः स्पृश्यन्ते पूर्वया मुदा ॥

तत्र च ।—

सर्वसुखाय काम्य[५]मुपवनं निशाम्य स्वयं रथादवतीर्य कीर्यमाणतत्प्रदेशतया शकटघटावमोचनं विधाय पुनरक्रूरं सन्निधाय स्वं प्रति सम्प्रति निजनिकायगमनाय कृतयत्ने तत्र[६]स्वार्थविद्रत्ने समयान्तर-

(१) पुर्य्याः । (२) वेतिशेषः । (३) गतागतं ।
(४) वासृशब्दे कुत्सायां । (५) कमनीयं ।
(६) अक्रूरे ।

मेव तद्योग्यमिति समयमभिधाय कृततद्विसर्ज्जनः पिपालयिषितसज्जनः सायमासाद्य वाद्यमानदिव्यवादित्रं विचित्रं तत्पुरं रामपुरःसरतया सखिभिर्वलितं सदेशः श्रीकेशवः प्रविवेश ॥

यत्र तेन दृश्यमाना नगरी तं पश्यन्तीव व्यदृश्यत ॥

तथा हि ।—

यस्याः खलु स्वस्मिन्नभिमुखानि गोपुराणि मुखानीव तेन लक्षितानि ॥

तानि च स्फटिकघटिततया स्मितच्छविशवलितानीव ॥

अक्षीणानि गवाक्षलक्षाणि पुनरक्षाणीव ॥

तानि च विलक्षणानिजेक्षणतया क्षपितनिमेषाणीव ॥

मणिकुट्टिमपटलानि[1] महाट्टालकपटलानि[2] निटिलानी[3]व ॥

तानि च लडह[4]वड्डवडभी[5]कुटतया निजेक्षणपर्वणि धृतमुकुटानीव ॥

---

(१) पटलं छदि ।　(२) समूहाः ।　(३) शिरांसि ।
(४) सुन्दर ।　(५) वड्भीचन्द्रशालिकेति त्रिकाण्डशेषः ।

गोपुरपुरस्ताद्गतानि तोरणशतानि चिल्लीवलया-
नीव ॥

तानि(१)च मन्दवातसम्पातकम्पाकुलतयास्तोक-
स्वावलोकजातभावभङ्गीसङ्गीनीव ॥

लब्धशिल्पिपाटवानि हाटककपाटयुगलानि कान्ति-
सम्पदन्तःशोभमानदन्तकुलानीव ॥

तानि च समुद्घटिततया स्वीयसुन्दरता(२)वन्दना-
र्थं(३)व्यादीयमानानीव ॥

हाटकसङ्कटित(४)शक्रनीलालीनि (५)भृङ्गाटकनिल-
यादीनि स्वकान्तिस्फुरदन्तःकरणचक्राणीव ॥

तानि च स्वा(६)वलोककल्लोकवलनया(७)समुल्ल-
सितानीव ॥

स्वर्णरत्नकृतयत्नानि विटङ्क(८)रत्नानि विचित्राल-
ङ्करणानीव ॥

तानि च धृतापारशिखिपारावतरावबारतया
त(९)त्कौतुकचाञ्चल्यसञ्जित(१०)शिञ्जितानीव ॥

---

(१) तोरणशतानि ।
(२) कृष्णसुन्दरता । (३) स्तुत्यर्थं । (४) आकीर्णां ।
(५) श्रेणयः । (६) कृष्ण । (७) रचनया ।
(८) पारावतादिगृह । (९) कृष्णदर्शनरूप ।
(१०) योजित ।

विधातुरपि चमत्कारकारणानि विविधधातुप्राचीराणि प्रशस्तवस्त्राणीव ॥

तानि च सम्प्रति समुज्ज्वलितवर्णतया पत्रोर्णानी[१]व ।

परितो विद्योतमानान्युद्यानानि परिवारवलयानीव ॥

तानि च नानापुष्पफलवलनया तत्तदुपहारसम्वलितानीव ॥

सेयं स्वयमेव प्रतिवीथिसफलरम्भाक्रमुकस्तम्भारोपपूर्णकुम्भसम्भारैः सपुलकेव च सम्भाविता ।

परितः परिष्कृततीरगम्भीरपरिखानीरेण स्वेदाम्बुनेव सम्वलिता च विलोक्यते स्म ।

अथ लब्धपुरप्रवेशे वृन्दावनेशे वृन्दावनचरितमस्य दृष्टव[२]चरीणां खेचरीणां तदा काचिदन्यदा च काचिदियं वर्णना निर्वर्णनीया ॥

तथाहि ।—

पश्यत पश्यतासूर्य्यम्पश्या अप्येताः कृष्णदर्शनमहसि सर्वंसहतया ललाटन्तपतपनतप्ततां गता-

(१) पत्रोर्णं धौतकौशेयं ।　　(२) निष्ठा ।

स्तथा वाचंयमा अप्यमूः स्वनिवारकान् प्रति पुनरप्रियम्वदतापदतया परन्तपतामापुरिति ॥

यत्र सति[१] ।—

अपूर्वं पूर्वेन्दर्मन्यसितसितचन्द्रौ विलसत-
स्तदूर्द्धं हर्म्याग्रे किल कमलवन्या विकसति ।
वकीजिद्रामौ वा वनविहृतिशीलाविह पुरे
निरीक्षन्ते रामा यदि तदतिचित्रं विजयते ॥

अहह ! मधुपुरीयं कृष्ण-माधुर्य्यसङ्गा-
ल्लसति मधुपुरीव प्रेक्ष्यतामालिवर्ग ! ।
अपि च सुवदनाभिश्चन्द्रशालाः समन्ता-
दतिजवमधिरूढाश्चन्द्रशालाः[२] स्फुरन्ति ॥

एताः कुण्डलितैककर्णलतिका दत्ताञ्जनैकेक्षणा
लाक्षारञ्जनमञ्जुलैकचरणाः सम्वस्त्रितैकस्तनाः ।
इत्येकैकविधा हरिं प्रतिययुस्तन्नाद्भुतं मन्यतां
यस्मादाययुरेकसर्ग[३]गतितामाकर्ण्य तस्या गतिं ॥

स्नानेन द्रुतमुज्झितेन वपुषि प्सानेन हृन्मारुते
व्रीडेनाभिनिवेशमात्मनि जवा-
दुज्झन्त्य[४]एव स्त्रियः ।

---

(१) तदेतत् खेचरीणां वचनमनूद्य कथकेन स्वयमुद्यते स्म ।
(२) चन्द्राणां गृहाणि तत्पुरुषः । (३) एकतान ।
(४) व्रीडेन उज्झितेनात्मनि अभिनिवेशं उज्झन्त्यः ।

वस्त्राणां च विपर्ययेण निखिल-
व्यत्यासविज्ञापिकाः
श्रीकृष्णं परितः समाययुरमू-
र्धिष्ण्यादधिष्ण्या[१]दपि ॥

मनांसि तासामरविन्दलोचनः
कर्षन्नपि द्रागददान्महोत्सवं ।
गजेन्द्रलीलेन मृगेन्द्रविक्रमे-
णाम्भोधिजानन्दकरेण चात्मना[२] ॥

आसीद्य[३]च्छुतमेव मानसहरं तद्दृष्टिवर्त्मागतं
तच्चाथ स्वयमेव दृष्टिसुधया स्वं सेक्तुमुद्यन्महः ।
आकृष्यात्मनि[४] तच्च[५]लोचनगुणे
नासन् यदा तास्तदा
तत्स्फूर्त्तिच्छविगह्वरस्थिततया तद्दूरतां नाविदुः ॥

पद्मिन्यस्ताश्चलतनुयुजः फुल्लवक्त्रारविन्दाः
प्रासादाग्रं हरिपरिचयायाधिरूढाः समन्तात् ।
याव[६]द्यावत्पथि सुमनसां[७] वृष्टिमाचेरुरुच्चै-
स्तावत्तावद्दत सुमनसां[८] वृद्धिमेवाभिजग्मुः ॥

---

(१) बहिः प्रदेशात् ।　(२) देहेन ।　(३) महः ।
(४) मनांसि ।　(५) महः ।　(६) यथा स्यात् ।
(७) पुष्पाणां ।　(८) कर्म्मधारयः ।

तदेतत्खेचरीणां वचनमनूद्य कथकेन स्वयमुच्यते स्म ॥

तेऽमी विप्रा मम शिरसि सम्वासमासादयन्तो
ये दुर्ध्वंसं सुरमुनिवरैरप्यवज्ञाय कंसं ।
सद्गन्धाम्भः कुसुमदधिभिः साक्षतैः पूर्णपात्रैः
प्रत्युद्गम्य स्वयमनुययुः कृष्णमभ्यर्च्चनाय ॥

ऊचुः सर्वेऽपि पौरा यदपि पशुभृत-
स्तेऽपि सर्वेऽतिपुण्या-
स्तन्नारीणां तथापि स्फुटतरमहिमा
मोहमन्तस्तनोति ।
एता माधुर्य्यपूरं न तु परमपरं चेतसा सन्दधानाः
कृष्णं रामञ्च लोकाद्भुतमहत्वपुषं शश्वदालोकयन्ति ॥

तदेवं स्थिते तत्रावस्थिते च कौतुकसतृष्णे श्रीकृष्णे कृतपरिजनसङ्गसङ्गततया रङ्गकारः कश्चिन्नर्द्दद्दर्द्दभसहस्रमर्द्दयं(१)स्तिर्य्यग्वर्त्मना पर्य्यागात् ॥

पर्य्यागते च तस्मिन्नसावसन्मानमर्द्दनः । क्रीडाधृतगोवर्द्धनश्चिन्तितवान् ॥

नूनमनूनवर्गस्य दूनसर्वस्य(२) तस्य(३) सपरि-

---

(१) चालयन् । (२) बहुव्रीहिः । (३) कंसस्य ।

करस्य पर्व्वपरिधानसामग्री सम्यग्प्रीतिरियमनेन प्रणीय[१]नीयते ॥

पुरप्रवेशाय मङ्गलं चेदमात्मनो वेशाय नेष्यामः। तस्मात्प्रथमतस्तत्[२]पराहतिपुण्याहं निर्व्वाहयं-स्तावदेनं याचनरचनेन जातक्रोधमाचर्य्य पुनरति-चर्य्य[३]स्फुटमपचर्य्य च तदेतदाच्छादनवृन्द-माच्छिनदानीति ॥

प्रकाशमपि सहासाभासमाह स्म ।—
"देह्यावयोः समुचितान्यङ्ग ! वासांसि चार्हतोः ।
भविष्यति परं श्रेयो दातुस्ते नात्र संशयः" ॥इति॥

रजकः स तु रजसा तमसा च मनसि व्याप्तः सर्व्वत्र लब्धख्यातेस्तस्य दानवारातेः[४]प्रभावं शृण्वन्नपि न हृदि स्पृष्टवान् ॥

त[५]त्पर्य्यवसायिवस्त्राणाममीषां त[६]त्प्रभावादेव तत्र समागमं कंसप्रभावादेवेति परामृष्टवान् ॥

तेन[७]तेन[८]दृशि व्याप्तश्च फणाधारीन्द्रवारीन्द्र-नाकचारीन्द्रप्रभृत्युपहारी कृतदीव्यद्दिव्यवस्त्रसम्व-स्त्राणामपि तस्य[९] न दृष्टवान् ।

---

(१) रचयित्वा । (२) कंस । (३) अतिक्रम्य ।
(४) कृष्णस्य । (५) कृष्ण । (६) कृष्ण ।
(७) रजसा । (८) तमसा । (९) कृष्णस्य ।

ततश्चासावुद्धासुरासुरभावस्तदनुभावमननुभूय दूयमानतया वहु जहास ॥

"ईदृशान्येव वासांसि नित्यं गिरिवनेचराः । परिधत्ते"त्यादिना ॥

तदनु च ।—

उपहसन्तमसन्तममुं सरन्
सरजसं रजकं व्रजराजजः ।
निजकरं कलयन्(१)करवालभं
सपदि लाव(२)निभं विलुलाव तं ॥

अपाव्रजन्नथ रजका हरेर्दिशः(३)
पटास्तु ते स्फुटमलुठन् दृशोः पथि ।
स्वयं ययुर्यदभजमानता(४)ममी(५)
समासजन्निह(६)भजमानता(७)मिमे(८) ॥

तदा च स्वकान्तिभिः कान्तीकृतघस्त्र(९)वस्त्राणां परःसहस्रमजस्रसुन्दरपुरन्दरस्तदिदं तदिदं गृह्यतां गृह्यतामिति सखिभिः प्रार्थ्यमानतया विचार्य्य

---

(१) कुर्वन् । (२) पत्त्रिभेद ।
(३) सकाशात् ।
(४) अभक्ततां । (५) रजकाः । (६) कृष्णे ।
(७) योग्यतां । युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ।
(८) पटाः । (९) दिनं ।

तेषु स्वपरिवार्य्य[1]मसकृन्निःसार्य्य सहसहज-सहचरवारः परिधार्य्य निर्द्धार्य्य[2]चूड़ामणितया सर्वनिर्द्धार्य्यः सन्मत्तवनगजराज इव नगर्य्यामयं विजहार । विहरति च विहसद्बहुसख्या[3]वस्मिन् प्रख्यातगुणतया सर्व्वातिशायकः कश्चिद्वायकः[4] समस्तमल्लतल्लजलीलासमुचितविरचितचेलालङ्कार-मतल्लिकां वलयामास ॥

यः खलु खलकंसभिया ब्रजमब्रजन्नपि निज-सम्बन्धिजनगत्यागत्यासन्न[5]सुखसम्पन्नतद्वार्त्ततया तं द्रष्टुमार्त्तमानस आसीत् ॥

सम्प्रति तु ।—

अपूर्व्वमेकमत्रासीत्पूर्व्वं नैक्ष्यत यत्कचित् ।
तस्मै सद्यो ददौरूप्यं[6]सारूप्यं स्वस्य केशवः ॥
दृष्टस्त[7]च्छायया[8]स्पृष्टः कुर्व्वंस्तद्वेषमेष यः ।
त्यक्तस्तु न तया[9]व्यक्तं सारूप्यं त[10]न्न्यरूप्यत ॥

अथवा तत्र तदावेशमेव प्रशंसामः ॥

---

(१) परिवारयोग्यं ।
(२) निर्द्धार्य्यः कार्य्यकर्त्तेत्याद्यमरः ।
(३) वहुव्रीहिः ।　　(४) सौचिकः ।
(५) गतागतासन्न ।
(६) ददौरूप्यमित्येकं पदं । प्रकर्षेण ददौ ।　　(७) कृष्णः ।
(८) प्रतिविम्बेन ।　　(९) छायया ।　　(१०) तस्मात् ।

तथा हि ।—

पेशस्कार्य्यावेशात्, कीटस्तद्रूपतां चिरादेति ।
कृष्णावेशः किं नहि, वायकमाश्वेव कृष्णवत्कुरुतां॥

तं वायकप्रकरनायकमस्मि(१) वन्दे
निर्म्मञ्छयामि शिरसातिरसात् प्रणौमि ।
यश्चित्रसीवनपटं मणिवेशवेशं(२)
वेशं न्यवेशयदलं बलकेशवाङ्गे ॥

अथ यः खलु मथुरागारः परमसुभगाचारः कश्चिन्मालाकारः सुदुष्प्रापपुष्पाय प्रायशः श्रीवृन्दावनं मुहुर्विन्दति स्म ।

विन्दन्नपि स खलु धन्यः श्रीमद्वन्यवेशं केशवमपि पश्यति स्म ॥

पश्यन्नपि तत्राविश्य पुष्पाहरणमपदिश्य तत्र चाभिनिविश्य यत्र यत्र यदासौ हरिर्विहरति तत्र तत्र च पुष्पहारमुपहारमुपहारं भ्रमति स्म ॥

तदप्यास्तामहो ! तत्रात्मीयसख्यसुखधाम्नः सुदाम्नः समनाम्नि मित्रतामपि सोऽयं तोयदसुन्दरः स्वयमुरीकरोति स्म ॥

---

(१) अस्मीति निपातः अहमित्यर्थे । (२) तुल्यं ।

तथा च सति स खल्वत्र वसतीति सम्प्रति सहसा सह सहचारिभिर्विचारितवता परमसच्चरित-वतानेन नागरान् पृच्छता तेभ्यः सुखमुखरतां यच्छता तस्य गृहमेवानुजगृहे ॥

स हि पूर्वमेव तदागमनमवकलय्य रिक्तपाणि-तया मिलने दोषं संशय्य सुकुमारकुसुमसमूह-चितां तदुचितां मालां विरचय्य गन्तव्यमिति तत्रासज्य स्थितवान् ॥

अथ यत्र स एकचित्ततया रहसि मर्म्मवित्त[१]-तुल्यं माल्यं निर्म्मिमाणस्तद्वदवहितस्वहितमहित-जनसहित आसीत्तत्पर्य्यन्तमप्यकृतजल्पस्वल्प-सखिसेवितपर्य्यन्तौ तावेतौ गतवन्तौ ॥

तत्र कृतगमनयोः पुनरनयोः परमरमणीयपरिमल-दलितकुसुमसमूहसौरभरभसवले त[२]द्ववधेयतां गते समाधेरुत्थित इव स महाभागधेयः सुदाम-नामधेयः सन्ततनिजध्येयमेव रूपं निध्येयता[३]-मनैषीत् ॥

---

(१) धन। (२) मालाकारे।
(३) दृश्यतां।

निध्यायन्नेव च लज्जानम्रता कम्रतरः पुलककुल-सङ्कुलकलेवरः शीघ्रतातिरसात् केवलेन शिरसा नत्वा वरासनादिकमपि दत्त्वा सद्भाग्यतयात्मानं मत्वा गद्गदनिगदतया स्तुवंस्तयोरनयोर्भक्तिपर्य्यन्तं प्रसादं मत्वा(१)सखिसमेतावेतावादृत्य दिव्यमालादि-भिरलङ्कृत्य दूरानुव्रजनपूर्वकं विससर्ज ॥

तत्रालङ्कारसमये कोऽप्येष विनोदचमत्कारविशेषः सञ्जातः ॥

या काचिद्दिव्यमाला सामि(२)कृतापि दीव्यन्ती बभूव ॥

यामेव मुहुः पश्यन्तं तं पश्यन्मालाकारः स-लज्जतया नम्रतासज्जदाकारः सम्भृताशी(३)रासीत् ॥

तामेव शीघ्रमेव सह परिवारेण विरचय्य तस्मिन् पर्य्यर्पयामासेति ॥

विसृष्टिसमये चेदं साभिवादनदैन्यं निवेदयामास ॥

हन्त ! यदि दूरं तस्यापि तस्यातिपर्य्यन्तभू-रागम्यत तदा सर्वप्राणातावलसद्भ्यां भवद्भ्यां साव-धानतया भाव्यमिति ॥

---

(१) प्राप्य । (२) अर्द्ध ।
(३) मनोरथः ।

विसृष्टावेतौ तु पुष्पवन्तौ(१) दुष्प्रधर्षतेजसा सर्वं खर्वयामासतुः ॥

अत्रेदं मच्चित्तमध्यमध्यारोहति ॥

भक्ताः सन्ति सहस्रशः स्फुटममी
श्रीकृष्णमन्विच्छव-
स्तेष्वासन्नतदीयचारुचरणा राजन्ति चानेकशः ।
वन्दे तं तु सुदामदामरचनाचुञ्चुं य(२)दन्वेषयन्
श्रीकृष्णः सबलः स्वयं गृहमसा-
वर्थीव तस्यान्वगात् ॥

अथ तत्र पथि चायं हरिः सर्वचमत्कारकारणं किमपि कौतुकं चकार ॥

यथा ।—

काञ्चित्कुब्जां सुवक्त्रां स्फटिकजघटभा-
गङ्गरागं वहन्तीं
याचित्वामुं विलिम्पन्निजवपुरमुना
स्वानपि भ्राजयित्वा ।
तामृज्वीं सम्विधाय स्वगुणमहिमभि-
र्विस्मितीकृत्य लोकान्

---

(१) श्लेषेण चन्द्रसूर्यौ । एकयोक्त्या पुष्पवन्तौ दिवाकर-निशाकरौ ।

(२) यस्मात् ।

शोकान् कंसे निधाय स्वयमघदमन-

स्तत्र भूपश्चुकूर्द ॥

अत्रेदं विचारयामः ।—

लालसीति यदि हार्द्द[१]मार्जवं

कृष्णभक्तिमनु वाह्यमन्यथा ।

वाह्यमप्यलमृजु प्रजायते

साक्ष्यमायतमिह त्रिवक्रया ॥

आर्द्दय[२]द्रजकं कुब्जान्तानन्यान्स समार्द्धयत्[३] ।
कंसस्तेना[४]पि तेना[५]पि ध्वंसमेव प्रपन्नवान् ॥
सद्भावं[६]च प्रभावञ्च प्रेक्ष्यभावञ्च तस्य तं ।
यथायथमथानर्च्चुः पथा लब्धं वणिक्पथाः[७] ॥
अत्रापि तेषां वाणिज्यमेव विलक्षणमुत्प्रेक्ष्यते ॥

यथा ।—

वहुलोकाद्वहुधा वणिज्यया

फलमन्वर्ज्जितवन्त एव ते ।

अघशत्रो[८]र्यदिह स्वयं न त-

न्न पितार्ज्जन्न पितामहादयः ॥

---

(१) हृदयसम्बन्धि । (२) अपीडयत् ।
(३) ऋधुवृद्धौ । (४) अर्द्दनेन ।
(५) समर्द्धनेन । (६) साधुत्वं ।
(७) वणिक्पथा वणिजः । (८) कृष्णात् सकाशात् ।

ततः पौरान् पृच्छन्नयमथ मखस्थानमनुय[१]
न्निरस्तस्तत्पालैः प्रसृततररक्ताच्चिविकृतैः ।
धनुः कर्षन् हर्षाल्लघु यदभनक् तन्न हि जनः
कदेत्यद्धा द्रक्ष्यन्न यदि तदकूजिष्यदभितः ॥

क्रेङ्कारं यदकृत चाप[२]मैशमुच्चै-
र्निर्भेत्तुं वकरिपुणा विनम्यमानं ।
तत्कंसं ज्ञपयदिवाय[३]मत्र कः स्या-
द्भूतेशः पतिरुपग[४]श्च यत्र नेशे ॥

तत्र च विशेषः ।—

कोटी[५]द्वे शतकोटिहस्तगजराडन्तप्रभे लस्तकः[६]
स्तम्भभ्रान्तिकृदेकवज्रघटितः कृत्स्नं[७] महद्यत्र[८]च
दिव्यं तत्त्रिपुर[९]प्रधूननधनुर्वाह्यं त्रिशत्या नृणा-
मर्च्चिर्भिः परिचर्च्चिताखिलहरिच्चक्रे विभिन्नं हरिः ॥

तदा च ।—

शेषः स्वे मूर्द्ध्नि घूर्णां समुदितिरपि[१०] दि-
ग्दन्तिनां दन्तभेदं

---

(१) गच्छन् । (२) क्लीवमपि ।
(३) अयमित्यारभ्य कविवचनं । (४) समीपगः
(५) अग्रभागौ । (६) लस्तकस्तु धनुर्मध्यं ।
(७) अङ्गं । (८) धनुषि ।
(९) महेश । (१०) समुदायः ।

छेदं ब्रह्मा स्वधाम्नस्त्रिजगदमनुत
　　　　ध्वस्तमुच्चैः समस्तः ।
नाश्चर्यं तद्यदेतत् कुलिशकाठिनता-
　　　　कूटजित्कोट्यखण्ड-
ब्रह्माण्डध्वंसचण्डं हरधनुरमुना
　　　　खण्डदण्डं व्यधायि ॥

तथापि ।—

कृष्णो वाम्मुग्यदासीद्धनुरमरपते-
　　　　स्त[१]द्धनुस्त्रोटजाग्नि-
स्तस्मिन् विद्युद्धुताशः कटकटितरवः
　　　　स्फूर्ज्जितं गर्ज्जितश्च ।
कालः सोऽवग्रहान्तच्छ्रणातुलिततया
　　　　सज्जनानां विभातः
कल्पान्तप्रावृष[२]स्तु स्फुरणवलनया
　　　　दुर्ज्जनानामदीपि ॥

ततश्च हन्यतां हन्यतामिति जङ्घन्यमानेषु[३] जेघ्नीयमानेषु[४] च माशाब्दिकेषु[६] सैनिकेषु ॥

---

(१) हर ।　　(२) वर्षायाः ।
(३) कुटिलं गच्छत्सु ।　(४) पुनः पुनर्घ्नत्सु । हिंसार्थे घ्नीभावः ।
(५) गंति वदत्सु ।

कदारोप्या मौर्वी धनुषि वत ! कृष्यापि च कदा
शरस्तत्तद्यत्नाद्रिपुमनु विसृज्यः स स कदा ।
इतीवायं कृष्णः स्फुटमुपहसंस्तस्य धनुषः
कृताभ्यां खण्डाभ्यां परवलमहन्नाशु सवलः ॥

अथ तत्र कंसस्य वड्वडभीमारूढवता केनचित् प्रश्नोत्तराणि ।—

हंहो ! क्रेङ्कारराव: किमिति धनु[1]रगा-
च्छ्याम एकः सशुभ्रः
किन्तस्मात्तस्य वेदीं पददलितभुवं
निर्म्ममे वक्षि किं धिक् ।
आस्तां तत्सावहेलं तदपि निजवला-
दुद्धृतं लघ्वकार्षी-
द्दाः ! किन्तद्देव ! वक्ष्ये किमिव पुनरदः
सैन्ययुक्तं ममर्द्द ॥ इति ॥

एवं कंसस्य वस्त्रं सहरजकपति[2]
स्वैरमाच्छिद्य[3] भूय-
श्चायं छित्त्वा ससैन्यं प्रहितमपि वलं
तेन[4]सम्मर्द्य शश्वत् ।

---

(१) कर्म्म । (२) वस्त्रविशेषणं ।
(३) वस्त्रमाकृष्य रजकं छित्त्वा । (४) कंसेन ।

निःशङ्कावेशलेशः पुरविभवममुं प्रेक्षमाणो विजह्रे
योऽयं स श्रीव्रजेशप्रभवकुलमणिर्मां प्रमत्तं करोति ॥

वीर्य्यप्रागल्भ्यतेजःस्फुरितसुभगतां
वीक्ष्य पौराः समन्ता-
देतौ श्रीकृष्णरामौ विबुधवरतया
मन्यमाना जजल्पुः ।

हंहो ! पश्य प्रतापच्छविरविमनयो-
राशु पश्यन्निरंशुः
सोऽयं विश्वप्रसिद्धो रविरपि नियतं
प्रत्यगद्रौ निलिल्ये ॥

ततश्च तस्य[(१)]सङ्घट्टनार्थं[(२)] निजनिकटादटत्युद्भटे कटके भयात्कंसेन कृतविघटने तस्य[(३)]कूटता[(४)]न्तरमवधाय तमवज्ञाय सखिभिः सङ्घटितखेलौ लब्धवेलौ शाकटवाटमेवाटतुः ॥

शकटावासमासज्य च सोऽयमधर्म्मवतां वधः परमधर्म्म एवेति तत्कर्म्मानन्तरं स्नानं परित्यज्य चरणमात्रमवनिज्य ताभ्यां पयसा सिक्तं भुक्तमुपभुज्यते स्म ॥

---

(१) श्रीकृष्णस्य । (२) क्षोभणार्थं ।
(३) कंसस्य । (४) छलकर्म्मान्तरं ।

तत्र मां द्रवयति हरिणा, सायं शकटावमोचने भुक्तं ।
यत्पाथेयं मात्रा, सदयं क्षीरोपसेचनं प्रहितं ॥

तदेवं कथिते सर्वस्मिन्नपि व्रजजने व्यथिते मधुकण्ठः पुनः समापयन्नुवाच ।—

यत्कंसघाताय गतं वकारिणा
स्वप्नायितं तद्व्रजराज ! मन्यतां ।
पश्याग्रतस्ते वयसा नवश्रिया
तेनैव भाति स्वयमब्जलोचनः ॥

तदेवं ससमाजः श्रीव्रजराजस्तं नेत्रेण गात्रेण च यथायथमालिङ्गन् सर्वाङ्गरिङ्गत्प्रमदमुल्ललास ॥

अथ श्रीकृष्णकृतमहसि राधिकासदसि च कथावशेषः ॥

यथा मधुकण्ठ उवाच ।—

यावद्गोष्ठात्प्रतस्थे पुरमघविजयी
तावदारभ्य सभ्या
वीरार्हं तस्य शर्मप्रकरमधिजगुस्तत्तदुल्लासवाग्भिः ।
अन्तर्विज्ञाः प्रियाणां विरहजकदनं
श्वासदैर्घ्येण मध्ये
मध्ये संलक्ष्य दुःखाददह ! मुहुरपि
श्वासरोधं समीयुः ॥

यदा ता नागर्य्यः[(१)] किल निजविलोकाय समयु-
स्तदा सत्यं तासामनुमुखमपश्यद्वकरिपुः ।
तथा तत्राप्येष स्पृहितमकरोदित्यपि श्रुतं
व्रजस्त्रीसारूप्यं यदिह मृगयामास परितः ॥

तदेतावदपि श्रीराधादीनां कृताशीर्भिर्गीर्भिरेव सम्पन्नं ॥

तथा हि ।—श्रीशुकवचनं ॥

"गोप्यो मुकुन्दविगमे विरहातुरा या
आशासताशिष ऋता मधुपुर्य्यभूवन् ।
सम्पश्यतां पुरुषभूषणगात्रलक्ष्मीं
हित्वेतरान्नु भजतश्चकमेऽयनं श्रीः" ॥इति॥

अथ कथासदसि वलिता श्रीललिता सोत्प्रासं पप्रच्छ ॥

भवेत्स्त्रीमात्रस्पृहित[(२)]मप्यनुगृहीतममूदृशां[(३)] ।
यत्किमपि नाकार्य्यमार्य्यचरिताना । कुब्जायां सुचरितन्तु कथं न्युब्जीकृतं[(४)] ॥

श्रीकृष्णस्तु तत्प्रथकौ कथकौ ससङ्कोचमालोचयन्नुवाच ।—

---

(१) माधुर्य्यः । (२) भावे निष्ठा ।
(३) श्रीकृष्णसदृशानां । (४) ह्रस्वीकृतं प्रात.कथायां ।

भवन्ताविह मम मर्म्मानुभवन्तावेव स्त इति तां कथां यथावद्वदतां ॥

कथकावूचतुः ।—

श्रीमति ! ललिते ! श्रूयतां ॥

यः खलु करुणाशील,स्तस्य विचार्य्या प्रवृत्तिर्न ।
निखिलोपेक्षितजीवे, वाढं यस्यार्द्रता भवति ॥

किञ्च ।—

कुतुकी कुतुकाकृष्टो, ऽप्यतिकरुणाश्चेद्दरिद्रवश्यः
स्यात् ।
अत्र हि केशवकुब्जा, वृत्तं[१] वृत्तं सुधीसहस्रेण ॥

अथ तयोर्मधुकण्ठ एवोवाच ।—

तथा चानेन[२] पुरस्तादिदं विचारितं ।
चन्द्रति[३] बदनविलासा-
दष्टावक्रति[४] तथाङ्गकौटिल्यात् ।
तस्मादेषा पृच्छ्या
तरलति चित्तं हि कौतुकात्परितः ॥

आं आं सा खल्वेषा सैरिन्ध्री कंसाय गन्धसन्धायिनी भवति ॥

---

(१) अधीतं ।　(२) श्रीकृष्णेन ।　(३) आचारार्थे क्विप् ।
(४) अष्टवक्र ऋषिस्तद्वदाचरति ।

यत्खल्वेकाकिनी कलितप्रयत्नं गन्धभाजनरत्नं सनिर्बन्धं कराभ्यां रुन्धाना[1]राजावरोधमनुरुन्धाना[2]तर्क्यते ॥

तस्मादस्त्रमिव तस्य पर्वणि शस्तमिमं निर्हारिणं गन्धमपि निर्हराणि। किन्तु स्त्रीयं खलु लोभयितव्या। न तु रजकवत् क्षोभयितव्या। लोभः पुनरस्यां कुरूपताघटितकुटिलाङ्गतया स्फुटं पुरुषसङ्गरहितायामनङ्गरङ्गजन्यत एव सुकरः स्यात् ॥

अनङ्गरङ्गमपि लब्धमदङ्गावलोकनाया नान्यतः पर्य्यालोचयामि ॥

तस्मादहमेव तन्निर्वहनं सममर्म्मविलासनर्म्मणा निर्म्मिमीय ॥

तदेवं विचार्य्य चतुराचार्य्यः स्पष्टमाचष्ट।—

वरोरु! गन्तुमुत्कतां गता का त्वमसि? ॥

सोवाच।—

सुन्दरास्य! दास्यहमस्मि ॥

श्रीकृष्ण उवाच।—कस्य? ॥

सोवाच।— कंसस्य ॥

---

(१) आवृणवती। (२) वाञ्छति।

श्रीकृष्ण उवाच ।—

रामाशिरोमणि ! किं नामासि ? ॥

सा सलज्जमुवाच ।—

शुभगशक्र ! त्रिवक्रेति ॥

श्रीकृष्णः सगणः सहासमुवाच ।—

तर्हि सान्वयः खल्वयमाह्वयः ? ॥

पुनः श्रीकृष्ण उवाच ।—

सर्वाङ्ग-ग्लेपन[१]हरणमनुलेपनमिदं कस्य ? ॥

सा सहासमाह स्म ।—

विदग्धशेखर ! या यस्य किङ्करी सा तदर्थमेव सर्वं चरीकरीति ॥

श्रीकृष्ण उवाच ।—

मधुरभाषिणि ! दासी कापि स्वामिसम्मता कापि तदुदासीनस्थलगामितया नातितन्मता दृश्यते ॥

सोवाच ।—

सुवदन ! तदपि सत्यं वदसि; साहन्तु तस्य सम्मता न तावदन्यथा मता ॥

---

(१) ग्लेप दैन्ये ।

सर्वे सोपहासमूचुः ।—

परमरमणीयाङ्गीयं कथमिव तदङ्गीकारं न धारयतु[१] ॥

श्रीकृष्णा उवाच ।—

तथ्यं कथ्यतां । क्व नु तस्य सम्मतासि ? ।

सा सप्रणयरोषमुवाच ।—

दृष्टमपि कथमिदं पृष्टं क्रियते ? । वहलपरिमलशर्म्मण्यस्मिन्ननुलेपकर्मण्येव ॥

श्रीकृष्णा उवाच ।—

स्फुटमन्याश्च त्वादृशिम्मन्या धन्यास्तस्य विद्यन्ते ॥

सोवाच ।—

सन्तु नाम; किन्तु मद्भावित[२]मेव भोजपते रतेर्भावनाय कल्पते ॥

श्रीकृष्णा उवाच ।—

यदि न गर्ह्यम्मन्यसे तर्ह्यहमस्य भाजनमभ्यस्य सौरभ्यमनुभवितुमिच्छामि ॥

सोवाच ।—

गुरुभ्यः शपे तुभ्यं ममाप्रदातव्यं किमपि नास्ति ॥

श्रीकृष्णा उवाच ।—

एवं चेदावाभ्यां तदिदं तावद्वितर ॥

---

(१) चुरादि ।　　(२) वसितं ।

सा तु सानुरागास्मितमाह स्म ।—

विश्वाद्भुतनवयुवानौ युवां विना कस्तावदेतादृगामोदपात्रपात्रतामर्हति ॥

ततो यदृच्छया सर्वमेव प्रतीच्छतां ॥

अथ सखायः परस्परं नीचैरिव सहासमूचुः ।—

हन्त ! द्वयमपि चकमे कामिनीयं ॥

श्रीकृष्णस्तु तां स्तुतां विदधत् प्रत्युवाच ।—

तर्ह्यचिरादेव तव भविकं भविष्यतीति ।

तदेवं श्रीकृष्णस्य परमरमणीयरूपविलासहासस्नपितलपितमाधुरीणां सा धुरीणाचिन्ता ताभ्यां द्वाभ्यामपि पर्व्वकृते कृतं सर्वमपि तदनुलेपनं रचितार्पणं चकार ॥

यत्खलु गौरमेचकभागाभ्यां द्विधाकृतमुदयच्चान्द्रमसविम्व(१)मिव सान्द्रमपि सलिलाविरलतया किल वस्तुतस्तु श्रीनिधिकरसान्निधिवशतया तदखिलेषु सखिषु च पर्य्याप्तिमवाप ॥

कृष्णस्तत्र सुपीतपीतनमयीं चर्च्चां दधद्द्युते
रामः श्यामकुरङ्गनाभिमुखसद्गन्धाश्रिया शोभया ।

(१) तद्यथा कलङ्कांशे कृष्णमपरांशे गौरं ।

यद्वाद्विद्युदितद्युतिर्विजयते विद्युत्व[१]दुद्यत्तनु-
र्यद्वाद्विस्फुरदङ्गसङ्गररुचिश्चादभ्र[२]शुभ्रद्युतिः ॥

अथ पुनः कथासदसि लज्जाप्रथाकरकथाविशेष-प्रत्यासन्नतया सन्नकण्ठे मधुकण्ठे सस्मितं ललिता ललाप ।

अग्रिममपि कौतुकमव्यग्रं कथ्यतां । यत्र युष्म-दीशितुरस्य वेशः[३] स्वार्थान्तराय सम्पद्यते स्म ॥

मधुकण्ठः समाधानमधत्त ॥

तदेवं तयानुरज्य चर्चया सज्यमानः सोऽयं पूतनादीनामपि पूतनाविधायी दीनदयानुयायी चिन्तयामास ॥

एषा खलु रुचिराननाप्यङ्गसारल्यवैकल्यात् कलि-तहृच्छल्या मयि च कृतानुकूल्या कृपयानुपाल्या स्यादापाततस्तु ममावलोकनं तच्छल्यमस्या निर्द-ल्यमानं कर्त्तुमर्हतीति ।

स्पष्टं चाचष्ट ।—

त्रिवक्रे ! त्वामवक्रां कर्त्तुमनुज्ञां याचे ।—

---

(१) मेघ । (२) पूर्णा ।
(३) श्लेषे वेशो वेश्याजनसमाश्रयः ।

अथ सा च तां वाचं नर्म जानती सस्मित-मुवाच —

अथ किं ? किन्तु कथमिव ॥

श्रीकृष्ण उवाच ।—ग्रहणविशेषचातुर्य्येति ॥

ततश्चाखर्वं सखिसभासत्सु हसत्सु सा सरोमाञ्च-मुवाच ।—

तर्हि मम वासगृहमासद्यतां ॥

श्रीकृष्णः स्वयमपि विहसन्नाह स्म ।—

न तावदत्र तावती प्रक्रिया तर्क्या ॥

विश्वस्य चमत्काराय विश्वस्य(१)सम्प्रत्येव सन्नि-धाय पश्य ॥

अथ तस्यां सकम्पं सन्निदधत्यां सर्वस्य च पश्यत-श्चमत्कारं व्यस्यन्नसौ नटकलामिव घटयामास ॥

यथा ।—

पदे पदाभ्यामामृश्य कुब्जकं वामपाणिना ।
तर्ज्जनीमध्यमाभ्यान्तु चिवुकं तामृजुं व्यधात् ॥

ततस्तस्याः पृष्ठाद्यवयवततेः सा कुटिलता(२)

---

(१) प्रतीत्य । (२) कर्त्री ।

कटाक्षं[1]स्थौल्य[2]न्तु स्तनजघनशक्थि[3]

स्फुटमगात् ।

मुकुन्दस्य स्पर्शान्न तदिदमपूर्व्वं भवति य-

त्परासां सुभ्रूणामपि सुभगता ता[4]मभिगता ॥

अथ हलहलायमानं[5] कोलाहलं लोकश्चित्र-

तया यं कलयामास ॥

तद्विशेषस्तु न केनचित् प्रस्तूयेत । किन्तु शुभग-

ङ्करण्या तस्य विद्यया सुभगम्भावुकायास्तदनन्तर-

वृत्तेन तु तस्या वृत्तेनेदं परामृशामः ॥

सम्पत्तिः किल गर्वमाशु तनुते दैन्यं विपत्तिर्बला-

देवं शास्त्रकथा वृथा न जगति स्यादेतदाकल्यतां ।

कुब्जा सा किल रूपयौवनकलासम्पद्वती यद्बभू-

वह्निवाशु हरेश्चकर्ष रभसादस्योत्तरीयाञ्चलं ॥

ईशितां यदि भजेत दुर्गत-[6]

स्तर्ह्यपि स्फुरति नीतिरस्य न ।

एहि वीर ! भज मां स्मरातुरा-

मित्युवाच जनधाम्नि कुब्जिका ॥

---

(१) कर्म्म ।　(२) कर्त्तृ ।　(३) कर्म्म ।

(४) कुब्जां ।　(५) अनुकरणं ।

(६) दरिद्रः ।

ललितोवाच ।—

यद्येव मनन्त(१)लीलस्य खल्वस्य सा भोगवती(२) जाता तदास्मद्विधातलस्पर्शिता स्थितिरपीयं तस्याः सदृशतां याता ।

तस्मादग्र्यूमेवाव्यग्रतया कथ्यतां ।

मधुकण्ठः ससङ्कोचमुवाच ।—

ततश्च परमदयालुः कौतुकपरतया सोऽयं सर्व्वातिशयालुरपि लज्जालुतां सज्जन् समान-वयसः सवयसः कौमारादेकारामं राममपि सस्मितं निशामयंस्तद्वचनमयं स्मयं बिभ्राणः प्राह स्म। —

"एष्यामि ते गृहं सुभ्रु ! पुंसामाधिविकर्षणं ।
साधितार्थोऽगृहाणां नः पान्थानां त्वं परायणं" ॥
इति ॥

ललिता सस्मितमुवाच ।—

अहो ! महद्भिर्यदुक्तं तदेव युक्तमपश्याम ॥

विशाखोवाच ।—किन्तदुच्यतां ॥

---

(१) श्लेषे अनन्तः शेषः ।
(२) श्लेषे भोगवतीनाम नागपुरी ।

ललिता सहासमुवाच ।—

प्रासादीयति यः कुट्यां पर्य्यङ्कीयति मञ्चके ।
तस्य सन्तोषशीलस्य कुब्जिकाप्यप्सरायते ॥ इति ॥

किञ्चिदिव विहस्य श्रीराधोवाच ।—

स्वानुरोधः(१) खलु परानुरोधाय(२) स्यात्तत्कथमयमेवं(३) न ब्रूयात् ? ॥

मधुकण्ठ उवाच ।—

भवतीषु तावदयं(४) तादृश एव तत्र पुनर्वयमीदृशं परामृशामः ॥

कृपालूनां दीनः स्वमभि यदि दृग्मात्रमयते
तदा सर्व्वा तेषां भवति विभुता तस्य वशगा ।
त्रिवक्रायां कृष्णः क्षणिककुतुकाद्दृष्टिमदधा-
दहो ! सासीत्प्रेयस्यनुकृतिकृते वल्गितबला ॥

तथापि तु ।—

करुणाशीलः सोऽयं, सकुतुकलीलः समन्ततः स्फुरतु ।
प्रभवेदेनं बन्धुं, बन्धुं राधे ! तवैव सत्प्रेम ॥

---

(१) अनुरोधः स्मृतः कामे परच्छन्दानुवर्त्तने ।
(२) परपारवश्याय ।
(३) गृहमेष्यामीत्यादि ।
(४) श्रीकृष्णः ।

तदेवं राधामाधवौ मिथः सुखापने कथासमापने मोहनमन्दिरमेवाविन्देतां ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
मथुरापुरान्तःप्रवेशनिर्देश-
श्चतुर्थं पूरणम् ॥

पञ्चमं पूरणम् ।

अथ श्रीकृष्णेन भासमानायां श्रीव्रजराज-सभायां पुनः प्रातःकथा यथा ।—

स्निग्धकण्ठ उवाच ।—

अथ रजनिरजानि ॥

प्रजातायाञ्च यस्यां वहुशिवायमाना(१) शिवा(२) श्रीकृष्णं प्रति शिवा जाता कंसं प्रति स्फुटमाशिवेति स्थिते तस्यां रजन्यां स्वप्न-जागरयोस्तस्य(३) महाभयजनन्यां व्यतीतायां स पुनर्दम्भी गम्भीरं मल्ललीलारम्भं सम्भृतवान् ॥

ततश्चाल(४)ङ्कृतानां चालङ्कृतानाञ्च शुभ्रमञ्चप्रपञ्चानामधिमध्यमध्यस्तं रङ्गस्थलं भ्राजमानचित्रविरचनं वभ्राजे ॥

विद्युद्भ्राजमानादभ्रशरदभ्राणां(५) तारकितं नभ इव ॥

---

(१) शृगालीयमाना। (२) देवी। (३) कंसस्य। (४) अत्यर्थं। (५) मध्ये।

तत्राप्युन्नततममञ्चमञ्चन् कंसः स्वयमखिलदुर्ज्जनराजावतंसति स्म।

त[1]न्तु राजाधिपतागर्व्वग्रस्ततया सम्भवदपि त्रस्ततायामेव पर्य्यवस्यति स्म॥

तत्र च।—

अक्रूरानकदुन्दुभी पदकृत स्वे मञ्चके प्रान्तयोः
पौरीणां गणभाजि[2] देवकसुतां
नन्दादिकान् दूरगे।
किञ्च द्वारि गजं दधे कुवलयापीडं निजाग्रस्थले
मल्लान् कूटतया स भोजनृपति-
स्तस्मान्न कः क्षुभ्यति॥

तत्र च।—

कंसाज्ञयासीद्यद्वाद्यमत्र मल्लकलोचितं।
तदेवमङ्गलं जज्ञे प्रस्थाने रामकृष्णयोः॥

अथ तयोर्निजतदनर्गलताव्यञ्जनाय स्वयमनागम्य प्रथमप्रस्थापितस्थविरगोपवर्गयोः कृतप्रातःकृतिसर्गयोर्यदा रङ्गपुरद्वारपुरप्रदेशप्रवेशः समजनि तदा तु लोककोलाहलत एव सर्व्वस्तत्कलयामास।

---

(१) उच्चस्थलोपवेशनं। (२) मञ्चके।

ततश्च सदोत्कटं[1] मदोत्कटं गलत्कटं[2] नगो[3] वा नागो वेति निर्णिनीषता कृतव्रीडं कुवलयापीडं निष्पीडयितुमंशुकमापीडञ्च दृढीकुर्व्वन्नग्रजसखिव्रजकृतानुव्रजनः सुरेतरमर्द्दनः स्वयमग्रेसरतामवाप ।

स्निग्धा न्यषेधन् ये तत्र गिरा स्वं शत्रवस्तथा ।
उभयांस्तान् स्मितेनैव पश्यन् द्विपमगाद्धरिः ॥

ततश्च श्रीहरिणा ।—

तद्वर्त्मप्रार्थनं तत्कुपितगजमपि प्रार्दनं तन्निजाङ्ग-
स्याभीक्ष्णं तस्य[4]शुण्डारदपदवलनं[5]
ततो मोचनञ्च ।
तत्पुच्छाकर्षणं तद्भ्रमणमभिमुखीभूय तत्ताडनं त-
द्विद्रुत्य द्राक् पतित्वा द्रवभरमनु नि-
ष्पातनं[6] सम्भ्रमय्य ॥
तद्दद्भ्यां वञ्चिताभ्यां क्षितिहतिवलनात्
क्षोभणं तत्पुनश्च
प्रत्यासद्याग्रहस्तग्रहणरचनया स्रंसनं भूमिपृष्ठे ।

---

(१) उत्कटो मनोहरः । मदोत्कट इत्यत्र क्षीरस्वामिना तथा व्याख्यानात् ।
(२) गलद्गण्डं ।　(३) गिरिः ।　(४) गजस्य ।
(५) प्रवेशः ।　(६) गजस्य ।

तद्दृष्माक्रम्य तत्तद्दशनविघटनं तेन तद्घातनञ्च
द्रष्टृन् सिन्धोस्तरङ्गप्रतिभमनयदुन्मज्जनं मज्जनञ्च ॥

युग्मकं ॥

हस्तिनः कथिते घाते हस्तिपां[(१)] तत्कथा वृथा ।
मल्ले क्षुण्णे तु तत्स्थानां यूकानां तत्किमुच्यतां ॥

तदा चायं विशेषः ॥

पर्य्यटन्नट एवायं सिंह एव स संहरन् ।
भिन्दन् भिदुरमेवेति करिणा हरिरैक्षयत ॥

हत्वा नागं दन्तयुग्मं गृहीत्वा
भ्रात्रे प्रादात्कंसशत्रुस्तदेकं ।
एको निर्म्मात्यावयोर्यद्यशस्त-
द्विष्टं दिष्टं स्यात्समन्तादितीव ।

कुञ्जरं हरिरघातयद्बलो
ऽप्यत्र रक्तमदविन्दुमिश्रितः ।
पारिपार्श्विकतया तदन्तिके
छाययेव यदसौ तदाभ्रमत् ॥

तदेवं गीर्व्वाणा अपि यद्बृंहितवाणा[(२)]द्भयमयमानास्तत एव किल शश्वदस्वप्नानाम्नाय्य स्वप्ना

---

(१) षष्ठीबहुवचनं ।　　(२) बृंहितमेव वाणः ।

जाताः सोऽयं कुवलयापीड़ः करी दानवारिवरीयानपि दानवारि[१]कृतदान[२]मासवानिति ते पुनर्लेखाविस्मयेन लेखा इवासन् ।

तत्र च सति कंसं प्रति सहसा न कश्चन भिया शशंस ॥

तदनु च ।—

पूर्व्वाहलुण्ठितनृपांशुकशोभितांशू
सद्यो विघातितमहागजदन्तपाणी ।
तद्रक्तदानरचिताङ्गदकङ्कणौ तौ
तादृग्गणैर्विविशतुर्नृपतेः पुरस्तात् ॥

शौर्य्यमेव पुरुषस्य भूषणं
यत्र हेयमपि याति गेयतां ।
दन्तिरक्तमदविन्दवस्तनुं
कंस-संसदि तयोररूरुचन् ॥

द्विषन्तो भीष्माङ्गं ददृशुरजितं तर्हि पुरतस्तटस्था मध्यस्थं प्रणयमनसः शर्म्मवपुषं ।
विशेषं तत्रापि स्फुटमाधययुस्ते वहुविधं
यथा भावस्तद्वद्युगपदयमुच्चैर्विभवति ॥

(१) श्रीकृष्ण । (२) खण्डन ।

वर्ण्यं तद्वा कियदिह भवेत्तस्य माधुर्य्यवर्य्यं
जीवत्कंसेऽप्यथ सदसि यद्वान्दितं[1] लोकलक्षैः ।
तेजस्तद्वा कतिपयमितः कथ्यतां यत्र मग्नं
प्राणान्तं तं मृतमिव सुरा मेनिरे भोजराजं ॥

अथागतौ च गृहीतमृणालनालहस्तहस्तिनाविव धृतदन्तिदन्तौ बृहदुरस्वन्तौ सोऽयमेव किमिति सावहेलशंसनेन कंसं विलोक्य तौ श्लोक्यचरितौ तं पृष्ठदेशपरामृष्टं कुर्व्वन्तौ तत इतो दृष्टिविसृष्टिं चक्रतुः ॥

ततश्च परिवृत्य श्रीहरिः पुनरहो पश्य त्रिदिवस्य वर्त्मार्द्धमेवानुवर्त्तमानः सोऽयं वर्त्तते तस्मात्तत्र प्रस्थापनमस्य नातिदुरवस्थापमिति हसित्वा सखिभिरखिलैः सह लसित्वा च परस्परं परं वृत्तं वर्त्तयामास ।

अथ स्वहतगजरक्तरक्ततया प्रलयकालव्यक्तनीललोहितायमानता[2]पात्रस्य गात्रस्य विलोकनमात्रतः प्राप्ततेजोध्वंसं कंसं काविमाविति शंसन्तं पार्श्ववर्त्तिनः प्रोचुः ।—एतावेव ताविति ॥

---

(१) स्तुतं । (२) रुद्रायमाणता ।

कंस उवाच ।—

अनयोः करयोः किं दृश्यते । गात्रं वा केन चित्रपात्रं कृतं ?

सर्वेऽप्यूचुः ।—

कुवलयापीडस्य दन्ताविवाकल्येते । गात्रञ्च तद्रक्त-रक्तं भवेत् ॥

कंसः ससंरम्भदम्भमुवाच ।—

हंहो ! अहोवलिताद्वयमपि वाङ्मात्रपात्राय-माणमिदमसम्भवं ॥

अथ पुनरदत्तोत्तरेषु भयोत्तरेषु च तेषु स्वयमेव तयोः प्रभावस्तं वोधयामास ॥

यतः ।—

यदि त्वं रे कंस ! स्वयमसि वली तर्हि धिगमुं
कथं द्वारे नागं कलयसि न तत्र स्वकवपुः ।
रदाभ्यां स श्रेयानिति यदि तदा वामिव कथं
न तौ गृह्णासीति ध्वनितममुकाभ्यां स्वकलया ॥

तदेवं सति ।—

सोऽयं पूतनिकामहन् शकटकं व्यावर्त्तयन्तं मरु-दैत्यं मार्द्दयदर्ज्जुनद्वयमपि प्रार्द्दत्तदित्यादिकं ।

श्रीमद्गोकुलकेलिमस्य कलय[1]ल्लोकः पुरा पश्यत-
स्तांस्तर्ह्याईयदद्य चाईयति भोः !

पश्यापरान् शृण्वतः ॥

तत्र च नयनयोर्विस्तारणया ताभ्यां तयोः सकलमपि रूपं युगपत्पातुमिव वर्णनारसरसनाय रसनायाश्चालनया निखिलमपि माधुर्य्यं लेढुमिव तल्लाभपर्व्वगर्व्वतः स्फुटनासापुटयोः फुल्लनया ताभ्यां समस्तमपि सौरभ्यमभ्यन्तरे प्रवेशयितुमिव मुहुरप्यस्ताभ्यां हस्ताभ्यां निर्देशनया ताभ्यां साङ्गमप्यङ्गमालिङ्गितुमिवेहमाने सुखञ्च सचमाने सुरनरसर्गे शव्दायमाने च चित्रवादित्रवर्गे सर्व्वेषां मुखतः सर्व्वसुखदस्तुतिः प्रस्तुतिमवापेति स एष तत्प्रभावविशेषः शश्वद्भावनामाभिभवन् विभवति स्म ॥

यत्र कंसेन युद्धाय पूर्व्वमेव प्रेरिता विपरीतवादितायामपि मल्लाः स्तुतावेव पर्य्यवसिताः ॥

तथाहि ।—

तदेवं स्थिते क्रूरधामा चाणूरनामा शशंस ।

यत्र हे नन्दसूनो ! हे रामेति निरादरपितृनाम्ना

(१) वदन् ।

विना च तन्नाम्ना सम्बोधनद्वयमन्यथा बोधनाय प्रवर्त्तितमपि सरस्वत्या तद्वागिन्द्रियं स्तुत्यर्थमेव नर्त्तितमासीत् ॥

हे पितृनाम्ना स्वनाम्ना च सुचरितसमुदाचारकुमारद्वयतया समानावतार ! श्रूयतामिति ॥

श्रीकृष्ण: सस्मितमुवाच ।—काममाज्ञाप्यतां ॥

चाणूर उवाच ।—

भवतोर्भागधेयं चेतसि कियदाधेयतामाप्नोतु ॥

श्रीकृष्ण उवाच ।— कीदृशं ? ॥

चाणूर उवाच ।—

तेऽमी महाराजचरणा भवतोरनुग्रहमयदिदृक्षाचरणा विराजन्त इति ॥

श्रीकृष्ण उवाच ।—

सत्यं; किञ्चिदस्मत्कृत्यं पुनरुपदिश्यतां ॥

चाणूर उवाच ।—

सङ्गतमेवेदं भवतः सङ्गीर्णं । तथापि युवयोरितः शश्वत्पराङ्मुखतानास्मान् सुखयति ॥

श्रीकृष्ण उवाच ।—

वयं वनेचरा नरा न राजगणे गणेयानां नीतिमुन्नीतिमानयामः ॥

सम्प्रति तु भवदुपदेशमेवानुसरन्तः सदेशरूपमाचरिष्यामः ॥

चाणूर उवाच ।—

सम्प्रति युवां प्रति राजवर्य्यचरणा यदादिशन्ति तत्पुनराचर्य्यतां ॥

श्रीकृष्णः सविनयमिवाह स्म ।—

मल्लतल्लज ! यथायथमादिश्यतां ॥

चाणूर उवाच ।—

अस्माभिः सह भवन्तावथ क्रीडासुखमनुभवन्ताविह भवतां ॥

श्रीकृष्ण उवाच ।—

वालानामस्माकं क्रीडावलोचनं राज्ञां रोचनमेव। किन्तु युष्माभिरिति शोचनमेव प्रतिपद्यते ॥ तस्माद्भवतामेव तदिदमुपहासप्रकाशनं । न तु तत्र भवतां राजविभववतामुपपद्यते ॥

चाणूर उवाच ।—

राजचरणेभ्य एव शपे राज्ञामेवेयमाज्ञा ॥

श्रीकृष्ण उवाच ।— कथमिव ?

चाणूर उवाच ।—

बालस्त्वं न हि पूतनादिदलना-
दासीर्न वाविद्यथाः(१)
पोगण्डः क्षितिभृद्विधारणमुखक्रीडाकुलव्यापृतेः ।
नैवायं घटसे किशोर इति च प्रत्यक्षदिग्दन्तिव-
द्दन्तिप्रार्द्दन(२)तान्तकर्म्मरचनाद्राज्ञस्ततः कौतुकं ॥

अयन्तु तव ज्यायान् प्रलम्वाद्यालम्भकर्म्मणा ज्यायानेव ॥

श्रीकृष्ण उवाच ।—

वृथास्मद्द्वेषादेव पापात्तेषामन्यथापत्तिर्जाता पर्व्वतश्च लब्धमखपर्व्वतया शतपर्व्वपाणेर्गर्व्वखर्व्वनार्थं स्वयमेव तथा जातः । स्वयन्तु वयं यथावदेव सर्व्वथा वर्त्तामहे ।

धनुरपि पुरातनतया पुरा घुणाकीर्णमिव जीर्णं वहद्भिर्दूराद्विकीर्णतया स्वयमेव दीर्णं मत्स्पर्शमात्राद्विशीर्णं जातं ॥

कुवलयापीडश्च पीडयितुं द्रवन्नपद्रवन्तं मामनासाद्य सद्यः पृथिव्यन्तर्दन्ताववगाढावाचरंस्तावाक्रष्टुं न

---

(१) प्रभवः । (२) कदर्थः ।

शशाक परन्तु प्रघट्टयमानतया त्रुट्यन्तावेव घटयन् स्वप्राणानपि विघटयामासेति ॥

तत्र तत्र शीघ्रता घ्राता लोकेन लोकेन पुनरहमेव तत्र कारणतया घटयामासे ॥

तथा हस्तिपा अपि तदधस्ताद्धस्तिमापन्ना एव विपन्ना इति मान्यथा मथाः[(१)] ॥

चाणूर उवाच ।—

भवतानुचितमेव सङ्कुचितचित्ती भवता तदिदमपलप्यते। राजमहाशयास्तु तत्र तत्र न जातानुशयाः[(२)] ॥

प्रत्युत चिराय निजान्तिकस्थापितानां गर्व्वितानां गर्व्वदमनार्थमेव तत्र प्रस्थापितानां तेषां वृथा कृतपालनविशेषाणां परीवर्त्ताद्भवन्तावेव केवलावात्मबलाय कल्पयितुमिच्छन्ति ॥

श्रीकृष्ण उवाच ।—

तदतीवास्माकं विस्मापकं माग्यं। किन्त्वात्मनात्मनः स्तुत्याः प्रस्तुत्या लज्जामहे। यदेतं महाराज-

---

(१) मंस्थाः। लुङि मन्यते रूपमिदं।

(२) आततापाः।

मिन्द्रपदमपि प्रापयितुं सेवां करिष्यामः । तथापि मल्लविद्यायां न वयं कृतविद्या इति सङ्कुचति चित्तं ॥

चाणूर उवाच ।—

एतदप्यपलपितं वृथा मा कृथाः । यच्छ्रुतं विश्रुतमिदं । गोपाः खलु गोपालनं कुर्व्वन्तः सदास्माकं विद्यामभ्यस्यन्तीति । तस्मादकपटतयास्माभिर्युष्माभिरपि राज्ञामाज्ञा पालनीया । न तु चालनीया ॥

श्रीकृष्ण उवाच ।—

तथापि वन्यानामस्माकं न धन्या तद्विद्या विद्यत इति सद्यस्तावद्युष्मच्छिक्षामाचरन्तः स्वयं राज्ञसंज्ञपनाय [१] च सम्पत्स्यामहे ॥

अथ तदेतत्पर्य्यन्तमुदन्तं सन्तन्य दन्तिदन्तद्वयं कंसपुरतस्तद्वक्षसीव मङ्क्षु सङ्कुवन्निखन्य मुष्टिकेन मुष्टिप्रहारहतप्रलम्बभ्राचाणूरेण चानूरुविहगानुजवाहनः ससञ्ज । लब्धवलप्रशस्तिना महाहस्तिनाभिनवतया दीव्यद्दिव्यसिंह इव ॥

(१) सम्यगज्ञापनाय । श्लेषे मारणाय ।

तत्र च ।—

हस्ताहस्ति भुजाभुजि प्रथयतोरङ्घ्र्यङ्घ्रि चाभून्मह-
ज्जानूजानु कटाकटि प्रथनया क्रोधः समुद्भूतवान् ।
मुष्टामुष्टि तलातलि प्रथमकं पश्चान्यदासीत्तयो-
र्युद्धं तद्धरिमल्लयोर्वहुविधं वुद्धं कियत्कल्पतां ॥

किन्तु चाणूरकं कृष्णः कामपालश्च मुष्टिकं ।
हस्तरोधं दधत्कंसे श्वासरोधं विनिर्म्ममे ॥

एकं तत्र वभूव चित्रमखिलज्ञानातिदूरं यथा
साङ्गं स्वाङ्गमकर्षि यर्हि हरिणा विन्यासि तद्यर्हि च ।
व्यत्यासः स्फुरति स्म तर्हि वलव-
न्मल्ले तु किञ्चास्फुर-
द्दूरादप्यसकृत् पविप्रतिनिधि-
घातादिकानां विधिः ॥

सत्यं प्राहरतां मल्लावपि माधव-रामयोः ।
जवाद्वहूयमानौ तौ न तु तल्लक्ष्यतां गतौ ।
तदेवं स्थिते तत्प्रभावमननुभवतामनुभवतामपि
कंसं प्रत्येव दोषशंसनमासीत् ॥

तत्र पूर्व्वेषु मल्लानामपि यथा ।—

तत्र चादौ तेषां भावनेयं ॥

एतौ स्यातां सुष्ठु बालौ बलिष्ठौ
किन्तु श्रेष्ठां मल्लविद्यां न वित्तः ।
तस्मात् कस्माद्भूभृदस्मान्मृधेऽस्मिं-
स्तद्विद्यानां पारगान् वा नियुङ्क्ते ॥

अन्ते तु ।—

ज्ञात्वाप्युच्चैस्ताविमौ मल्लविद्या-
शास्त्रज्ञानामादिविज्ञानविज्ञौ ।
हा ! धिग्मौढ्यादेव कंसोऽयमस्मा-
नेतद्युद्धे भीरुकोऽपि न्ययुङ्क्त ॥

तथान्येषामपि नारीप्रचुराणामक्रूराणां कंसाय दोषशंसनं यथा ।—

क्व मल्ला वज्राद्रिप्रतिमवपुषः क्वातिमृदुला-
विमौ बालौ तस्मादिह यु(१)दनुमन्तॄन्
धिगधिपात् ।
कथं वा ते निन्द्या न खलु वयमस्मिन् सदसि ये
सतां द्विष्टे दृष्टिं सकुतुकमिवामी वितनुमः ॥
धिगस्मत्पुण्यं यत्कथमपि हरेर्वीक्षणलव-
ऽप्यभूदुत्पातोऽयं प्रणयिजनताराक्षसनिभः ।

(१) युद्ध ।

व्रजन् वन्यां प्रातर्व्रजमपि विशन् सायमसुकः
सुखं यासां स्त्रीणां वहति वरपुण्याः परममूः ॥
धिगस्मान् याः कंसाद्भयमनुसृता नाम च हरेः
समर्था वक्तुं न व्रजवरदृशस्ताः कति नुमः ।
सदा या गायन्ति स्वगृहबहुकर्म्मण्यपि गुणां-
स्तदीयान् शश्वत्त[1]हृदि च विहरन्ति प्रतिपदं ॥

कस्यातुलं फलमिदं यदमुष्य रूपं
लावण्यसारमसमं स्वत एव सिद्धं ।
एकान्तधाम विभुतायशसोः समन्ता-
दृग्भिः सदा नवनवाभममूः पिबन्ति ॥

तासां प्रेम्णः परममहिमा शक्यते केन वक्तुं
पश्यास्माकं त[2]मनुगतवच्चित्तमेत[3]द्विहाय ।
यद्गोविन्दः श्रममयरुचाप्येष सर्व्वस्य चेतः
कर्षत्यर्व्वागपि तदनुगः सुष्ठु सङ्कर्षणाख्यः ॥
क्रुद्धं शत्रुमभिद्रवन्नपि हरिः स्मेराननाब्जे रसो-
ल्लासाद्घर्म्मजलं दधद्विलसति
स्वां सौम्यतामत्यजन् ।

---

(१) कृष्णा ।　　(२) तत्प्रेममहिमानं ।
(३) वक्ष्यमाणं ।

यद्रामः स्फुटशोणनेत्रवदनस्तत्कोपतः शोभते
तद्वास्यं प्रकृतिर्यदेष स हरेः साक्षात्प्रतापानलः ॥

एते श्रीवसुदेवनन्दवलिताः श्रीदेवकीसंहिताः[१]
सर्व्वे साधुजनाश्च मादृशगिरा दीप्तान्तरज्वालया ।
यस्मा[२]त्तीव्रनिभालनं विदधतः क्षुभ्यन्ति कंसे मुहु-
स्तस्मादस्य[३]विनाश एव चिरता-
भानं विना सेत्स्यति ॥

अथ तत्प्रभावमनुभवतां कंसे दोषशंसनं यथा ।—

सोऽयं मूर्खः स्वान्तरे भीत एव
न्यास्थन्मल्लान् यः पुरस्तान्मुरारेः ।
यद्वद्व्याधः कोऽपि सङ्कोपितात्मा
सिंहस्याग्रे न्यस्यति ग्रामसिंहान् ॥

यः पूतनादिवलमस्य निनाय नाशं
शक्रगर्व्वमपि खर्व्वयति स्म सर्व्वं ।
यः सर्व्वसर्ज्जकममूमुहदूहवर्ज्जं
तं भोजराडभिभवन् किल[४] वाढमीष्टे ॥

---

(१) संहता वा पाठः ।　(२) हेतोः ।
(३) कंसस्य ।　(४) सोपहासे ।

क्व कृष्णः स्वप्रकाशात्मा मल्लसङ्घः क्व तामसः ।
युद्धं पश्यानयोश्चित्रं तेजस्तिमिरयोरिव ॥

सङ्घर्षेऽपि मिथः स्पृष्टिर्नेक्ष्यते कृष्ण-मल्लयोः ।
आद्यस्य शक्तिवैशिष्ट्यात्तेजस्तिमिरयोरिव ॥

उच्छूनत्वं क्षतजमपि न प्रेक्ष्यते द्वेषिगात्रे
दैत्यारातेर्न यदुदयते कश्चिदौद्धत्यलेशः ।
पश्यामुष्य द्विषदभिमुखं वीर्य्यवर्य्यं(१)विषाभं
भेदं भेदं द्विषि निखिलकं मर्म्म चूर्णं चकार ॥

सूक्ष्माग्निस्तृणमण्डले पविरगे कुम्भाङ्गजः सागरे
चण्डांशुस्तिमिरे तथा मुररिपोर्नामापि सर्व्वांहसि ।
तद्वन्नन्दसुतः स एष विजयी रङ्गस्थलान्तर्महा-
सारस्फारकदङ्गसङ्घवलिते मल्ले पुरः प्रेक्ष्यतां ॥

अत्र कृष्णस्य संग्रामे दृश्यतां परमाद्भुतं ।
चाणूरः पीड्यते तेन बुक्का(२)कंसस्य भिद्यते ॥

मूढस्तथाप्यसौ वज्रमुष्टिभ्यां हरिमार्दयत् ।
स ताभ्यां हृदि लग्नाभ्यां सम्मदात्पुलकं दधे ॥

तदेवं सपरिदेवनं सदेवनं च लोके विलोकमाने ।

(१) कर्त्तृ ।
(२) हृदन्तर्म्मांसपिण्डः । नस्तोऽयं शब्दः ।

अथाग्रहीद्धरिरपि तं सकृद्धस-
न्नविभ्रम[1]न्नभसि च यं निभालयन्।
उवाच धिग्मृत इति वाढरीढया-
प्यपोथयद्भुवि नृपतेः प्रपश्यतः ॥

मुष्टिकेनास्तथा मुष्टया तुष्टिं लङ्घवतः स[2] च।
वलस्य तलघातं यन् प्राणघातमपद्यत ॥

अग्रे व्यग्रतयाङ्गसङ्गमभितः सम्यग्रयात्कम्पय-
न्नुग्रम्पश्यतयाक्षियुग्ममसकृत् क्षिप्तीकृतं क्षोभयन्।
रामश्यामलनामकालदलितः कंसस्य वर्त्मादिशन
द्राग्मल्लः स स लोकमन्यमगमद्विश्वत्र[3]चित्रदृशि ॥

क्रीडां कृत्वाथ ताभ्यां वकदलनवलौ
तत्र विज्ञाय नाति-
प्रावीण्यं तावत्रज्ञावलितमकिरतां
क्षोणिपृष्ठे यदा तु।
तर्ह्यागात्कूटनामा य इह शलयुत-
स्तोशलो यश्च तं तं
सद्यो वामाङ्घ्रिहस्तप्रहरणदलिती-
कृत्य नृत्यं व्यधत्तां ॥

---

(१) भ्रमयामास। (२) मुष्टिकः। (३) सर्वत्र।

अथापरेषां मल्लानां समुदायेन(१)समं सममपि (२)समुदायं(३)कर्त्तुं समुदाय(४)मेव मेनाते ॥

ते तु ।—

हतेषु तेषु मल्लेषु शृगाली(५)मागताः परे ।
पश्यतो हासयामासुः कृष्णरामप्रधानकान् ॥

जेतुं प्रस्थापिताः प्राक् त्रिदिवमपि मया
तत्कसेनाधिनाथा-
स्तद्वत्प्रस्थाप्य नागं नृप ! तव रचिता-
स्तत्कृते चाद्य मल्लाः ।
एवं तद्वत्मसौख्यं तव विरचयता-(६)
नन्दतः स्वीयमित्रैः
क्रीडा कार्य्येति कंसं सदसि किल दिशं-
स्तत्र चिक्रीड कृष्णः ॥

भ्रात्रोर्विक्रीडतोर्मित्रैर्मध्ये मध्ये पराजयः ।
तौ हित्वा पश्य कंसस्य
स्वान्तं सङ्क्रान्तवान्मुहुः ॥

(१) समूहेन । (२) युगपदपि । (३) युद्धं ।
(४) सानन्दलाभं । मुदा सह वर्त्तमानो य आयो लाभस्तं ।
(५) विद्रवस्तु शृगाली स्यादिति त्रिकाण्डशेषः ।
(६) मया ।

तदेवं मैत्रेयिकया[१] चित्रीयमाणौ धन्येन चातुर्व्वर्ण्येन निर्व्वर्ण्यमानौ समानमानौ सवयसः सम्मानयमानौ रामरामानुजनामानौ द्यावापृथिव्यनवद्यवाद्यविद्यामनुविद्य प्रमोदाद्विद्योतमानौ दिव्यनृत्यप्रतिमल्लतया लब्धमल्लतालमानौ तत्पर्व्वणः सर्व्वतः समाहृतविमानौ सुमनोभिः सुमनोभिः कृतमानौ घटिकामेकामखिलानेकायना[२]न्निर्म्ममतुः ॥

तदसहमानः सहमानः[३] कंसस्तु द्रविणवलयोरेकपर्य्याय तयेवाभेदमालक्ष्य गोपद्रविणहरणादिलक्षणवक्ष्यमाणनिजवचःप्रचारणालक्ष्यतः सव्यहस्तस्य छिन्नचारमस्ततया स्ववादित्रं निषिषेध ॥

तत्र च निषिद्धे सिद्धेश्वरवादित्रे तु शुद्धतया सिद्धेः तदिद्धे हिततया सहितं सखिवर्गसहिततया च वल्गु यदवलगद्यच्च व्रजदेवं वसुदेवमुग्रसेनमप्युद्दिश्य तस्य तत्तदुग्रं वचनमशृणोत्तद्द्वयमपि स्वच्छिद्रवाधाय लक्ष्यं विधाय सहसा सहसाननतया पर्य्यङ्कप्लवमानः स्वैरी कंसवैरी तस्मादकस्मात्कंसमञ्चोपर्य्येव पर्य्यैक्ष्यत ॥

---

(१) मैत्रेयिका मित्रयुद्धमिति त्रिकाण्डशेषः ।
(२) अनन्यवृत्तीन् । (३) सगर्व्वः ।

यत्र कंसेन सह तेन दुःसहं श्रीहरेर्विग्रह[1]तेज एव विग्रहकरमासीत् ॥

अथ समुपागतध्वंसः कंसश्च स्वं पराजयमाना[2] तस्मात्पराजयमान[3]मना धैर्य्यं हित्वा खड्गचर्म्मणी गृहीत्वा यद्विचचार तेनापि दुर्द्धर्षः सहर्षगतिः स एष व्रजकुलगतिस्तत्केशग्राहिता निर्व्वाहितां कथमवाप तत्खल्वसावपि वोढुं शशादवशतापन्नः शशवन्न शशाक । लोकस्तु तदिदं श्लोकयामास ॥

श्येनः कपोतमिव पञ्चमुखः करीन्द्रं
वज्रो गिरिं विकिरराट् कटुकाद्रवेयं ।
कंसं निगृह्य सहसा वशयन् स एव
क्रीडां करोति परितः पृथुमञ्चमञ्चन् ॥

तदेवं लोके कृतश्लोके हरिणा गृहीतकेशः स भोजेशः प्राणानामर्द्धं पूर्व्वं मुमोच निजाघ्राततया[4] मञ्चादवाञ्चंस्त्वर्द्धमिति हरिरपि तच्छीघ्रतां वोढुं योद्धुम्मनस्तावशान्न शशाक ॥

कंसस्य केशा हरिणा विकृष्टाः
प्राणाश्च तन्मुष्टिगता वभूवुः ।

(१) देह । (२) पराजितं कुर्व्वाणात् ।
(३) असहमान । (३) आक्रान्ततया ।

चित्रं न चेदं स्मर तस्य वाल्ये
तत्पूतनास्तन्यविकर्षणाञ्च ॥
पतत्खड्गचर्म्मा गलद्रत्नवर्म्मा
भ्रमत्सर्व्वकेशः स्खलन्मूर्द्धवेशः।
स मञ्चादधस्ताज्जनानां पुरस्ता-
दनेनाधिरूढः पपाताऽतिमूढः ॥

प्रागासीत् स्तब्धपक्ष्मा भयमनु स यथा
तद्वदेव प्रमीतः(१)
कंसोऽयं तेन मृत्युं गत इति निखिलै-
र्भीरुभिर्नाभ्यभाषि।
श्रीकृष्णस्तत्प्रतीतं सपदि विरचयन्
हस्तिवत् सिंहवर्य्यः
सावज्ञं तं विसंज्ञं सदसि तत इतः
क्ष्मां च कर्षंश्चकर्ष ॥

ततो जयजयध्वनिप्रसितवाद्यकोलाहल-
प्रसूनघनवृष्टियुक् स्तुति(२)दिवस्पृथिव्यास्पदैः।
कृतप्रमदवर्द्धनः सपदि कंसचिद्वर्द्ध(३)न-
श्चिरं निजगणार्च्चितः स्थगितवुद्धिरासीदसौ ॥

---

(१) हतः। (२) यथा स्यात्।
(३) वृधु च्छेदने।

कंसध्वंसनशंसनप्रथनभृद्गीर्व्वाणगीर्व्वान्धव[१]-
घोवाद्योत्तमगन्धसन्धकुसुमासाराच्चिरभ्यर्च्चितः।
भूमिस्थाप्यतिभूमितागतमहो-[२]भूमा तदा भूयसा-
नन्दस्पन्दभरेण भावितया हारी हरिर्भाव्यतां॥

ततश्च।—

यदा कङ्कादयो भ्रातुर्निर्वेशायात्र संययुः।
साहाय्याय[३]तदा रामः परिघेणार्द्दति स्म तान्॥

अथ हरिवंशादिमिश्रीभूतश्रीभागवतमतप्रभूततया कथां प्रथयिष्यामः॥

यथा।—

तदेवं श्रीमान्गोविन्दः स्वयं नन्दित्वा श्रीमन्नन्दराजेन साकं विन्दमानं श्रीमदानकदुन्दुभिं वन्दित्वा तं मोचयित्वा सर्व्वानपि रोचयित्वा श्रीदेवकीमप्यनुसन्धाय तथा सन्धाय गृहाय बृहन्महिलाभिः सह सम्विधाय यथासन्धमन्यानपि लब्धसम्बन्धान् धृतानन्दान् विधाय कंसेन कृतबन्धनस्य हृतधनस्य तज्जनकस्य मोचनार्थमपि जनानभिधाय मतङ्गजव्रजेनापि कष्टं सुष्टुदुष्करं कंसकलेवरमीषत्करतया वामकरेण कचनिकरे विकृष्य

(१) सहाय। (२) तेजः। (३) भ्रातुरिति शेषः।

तद्वर्त्मपरिखां परि परिहृष्यल्लोकसार्थ्या[१] वृतपितृद्वयानुगन्तृकतया विश्रान्तितीर्थमनु विश्रान्तिमवाप ॥

तदनु सङ्कर्षणादयश्च कङ्कमुखान् सङ्कर्षन्तः सर्व्वेषां हर्षं वर्षन्तः कृतकर्षप्राणानाममित्राणां पर्षदं[२] चक्रुः ॥

परस्परप्रधने निधनं गतान् भुवर्लोकात्पतितान् क्रव्या[३]ल्लोकानिव यान् सभ्याः पश्यन्ति स्म ॥

तदेवं स्थिते साधूनां मनसि च सुस्थिते ॥

श्रीमन्नन्दमहाशया द्रुततरं प्रस्थापयन् यं नरं
गोष्ठं कंसविनाशशंसनकृते प्रागादयं तद्यदा ।
तस्मा[४]त्तर्हि न केवलाः सुखमया

वाद्यस्वनास्तां पुरी-
माप्ताः किन्तु जनाश्च केचिदिह[५] ये

तद्यौगपद्यं[६] ययुः ॥

ततश्च मृतप्रियतयाननुसंहितसंहनन[७]क्रियतामापन्नाः कंसादिस्त्रियस्तत्रागत्य गत्यन्तररहिताः

(१) समूह । (२) पर्षत्सभा । (३) राक्षस ।
(४) जनाद्धेतोः । गोष्ठाद्वा । (५) पुर्य्यां ।
(६) शब्देन सममागताः शीघ्रमागता इत्यर्थः ।
(७) देह ।

स्व-स्वपत्यङ्कमाश्लिष्य द्विष्यमाणनिजप्राणा रोदनं कुर्व्वाणा रोदनं[1] विजहुस्तथा तन्मातरश्च कातरतामवापुः ॥

तत्र च ।—

चिह्नानि दयितघ्नानि निह्नुवानाः पुराभवन् ।
कंसस्त्रियः शृगार्त्या तद्व्यक्तयामार्ज्जन् ह्रियं हरेः ॥

तथापि ।—

रोदनं सपदि रोदनं तथा
तन्निशम्य च निशाम्य चाजितः ।
स्वं सताप[2]मवमत्य सत्यकृ-
त्ताः ससान्त्वमभितोऽप्यसान्त्वयत् ॥

सान्त्वयन्नप्यमूः कृष्णो न विवेद स्वसान्त्वनं ॥
इति तत्र नियुज्यान्यात् निन्युस्तं यदवः पुरं ॥

तत्र च पुर्य्यन्तरुपप्लवं व्याजमाचरितवन्तः । यदा चाक्रूरं स्वगृहाय निनीषन्तं निषिध्यन्नीतिविध्यग्रणीर्निजावरजगृहमेव व्रजराजः साग्रजं तं निनाय ॥

उपवेशयामास च यथा ।—

मध्ये कृष्णं राममप्यत्र कृत्वा
पार्श्वद्वन्द्वे शौरिनन्दावभूतां ।

(१) अश्रु । (२) संहित ।

अग्रे व्यग्रा यादवप्राग्र्यलोका-
स्ते सङ्गन्तुं सुष्ठु सम्मर्द्दमापुः ॥

द्वयं तन्मेलनायासीदशेषाणां तदग्रतः ।
ज्यायसां गोपभूभर्त्ता गान्दिनेयः कनीयसां ॥

अथ तं कंसदारादिरोदनं सन्तानतः सन्तप्तमेव सन्तं श्रीमन्तं पुत्रापराधराहुकलितमुखविधुश्रीराहुकः(१) सङ्गत्य गत्यन्तररहितः स्वहितसहितः कनकदण्ड(२) लाञ्छितक्षितिपमण्डनमण्डलमग्रतो निधाय मूर्द्धानमवाग्रं विधाय तस्थौ ॥

तं पुनरवधाय श्रीमन्नन्दसहितानकदुन्दुभिरुत्तस्थौ ।
उत्थितयोश्च तयोरामरामानुजावपि तादृगवस्थौ बभूवतुरनुबभूवतुश्च सोऽयमिति ॥

अनुभूय च विदूय भूयसादरेण सम्भूय दरेण धूयमानममुमुग्रसेननामानं प्रणामपुरःसरतया पुरत एव निवेशनया पुरश्चक्रतुः ॥

स तु सुतसु(३)तता(४)पराधसम्बाधसङ्कोचतः शोचन्निदमवोचत ॥

---

(१) उग्रसेनः । (२) छत्र ।
(३) सुष्ठु । (४) विस्तारित ।

यद्यपि मन्तुविधातुः, स्वजनः सुजनेऽभिधातुमर्हेन्न ।
तर्ह्यप्यनन्यगतिता, वलवत्येतं[१]प्रलापयति[२] ॥

श्रीकृष्ण उवाच ।—काममादिश्यतां ॥

उग्रसेन उवाच ।—

स एवाधिपतिर्भूम्यां यस्तामस्मविनाशनः ।
विध्वस्तशार्व्वराद्भानोरन्यः कः स्यादहर्पतिः ॥
वृद्धो यः स तु वृद्धानामेव वर्त्मा[३]नुवर्त्ततां ।
अकूलकालजवगः[४] कः कुर्य्यात्प्रतिकूलतां ॥
तस्मादिदं छत्रादिकं स्वेन सत्रा[५]क्रियतामिति ॥

श्रीकृष्ण उवाच ।—

राजंस्तव तनूजस्य मद्विहितविनाशनता सर्व्वैरेव निशामिता । कथमिव तामन्यथयानि ॥

किन्तु मम तन्नाशनतायामुपलक्षणता परं लक्ष्यते । यस्माद्भवद्विधविषयकापराधमयकाल एव तत्र परं कारणं । मया तु लब्धबुद्धिवलतया स्ववशायामपि दशायां ज्ञातमपि तद्वैरमवज्ञातं ॥

---

(१) स्वजनं । (२) प्रलापोऽनर्थकं वचः ।
(३) वनगमनादिकं ।
(४) अपारकालजवगतः । पुनः परावृत्तो न भवति । वृद्धः पुनस्तरुणो न भवति । मया राज्यं न ग्राह्यमित्यर्थः ।
(५) सह ।

बाल्यदशायां तत्किल न ज्ञातमेव । तथापि तेन पूतनादियूथं क्रमशः प्रस्थापितं । तादृशकालेनैव च संस्थापितं ॥

तथा हि ।—

स्तन्यान्मां तुदती बकी[१] खलमरु-
त्कर्षैश्छलात्संहरन्
वत्साख्यो निगिरन् बको मयजनि-
र्विच्छेदयन्मित्रकैः ।
भुञ्जानः सगणां फणी[२]हृतबलं
कुर्व्वन् प्रलम्बः स च
धेनुक्ता तुरगो गिलन् स्वयमन-
श्यद्दूषणं किं मम ॥

योऽयं वा तनयस्तव स्वयमसावक्रूरकं प्रेषयन्
मामानाय्य निघातयन् कुवलयापीडेन मल्लैः पुनः ।
युष्मत्कुत्सनभर्त्सनश्रवणजान्मन्तोर्मया भीरुणा
प्रायश्चित्तकृता धृतः कचतटे तस्मादकस्मान्मृतः ॥

तस्मात्तस्य सजातीयविजातीयबालाङ्गिलस्य मातुलाहे[३]र्मारणमपि तदुद्यमकारणमेव जातं ॥

(१) स्वयमनश्यदित्यन्वयः । (२) अघः ।
(३) पन्न सर्पविशेषस्य ।

न तु मदीहास्पदीकृतं । तथा च सति कथमिव राज्यं प्राज्यतया मह्यं रोचतां । स एष चाव्यभिचारिसङ्कल्पस्य मम सङ्कल्पः प्रतिकल्पं सत्यवचसामपि जल्पाविषयोभविष्यति ॥

यथा ।—

अहं स एव गोमध्ये गोपैः सह वनेचरः ।
प्रीतिमान् विचरिष्यामि कामचारी यथा गजः ॥
एतावच्छ्रुतशोऽप्येवं सत्येनैव ब्रवीमि ते ।
न मे कार्य्यं नृपत्वेन विज्ञाप्यं क्रियतामिदं ॥
भवान् मान्योऽस्तु राजा मे यदूनामग्रजः प्रभुः ॥
इति ॥

तदेवमस्य सर्व्वेऽपि सुशीलतामनुशीलयन्तस्तदेतन्मुखमाधुर्य्यपूर्य्यमाणासलिलकलिलविलोचनाः क्षणाकतिपयं तदवस्थमेव तस्थुः ॥

श्रीमदानकदुन्दुभ्यादयः कतिपये बिभ्यति स्म । श्रीमन्नन्दादयस्तु नन्दन्ति स्मेति स्थिते तं[१] स्वतः परतश्च भीतमालोचयन् पुनः श्रीकृष्णः प्राह स्म ॥

विराट्[२]कुलमिदं सम्प्रति विराड्[३]जातं । ततो

(१) उग्रसेनं । (२) क्षत्रिय । (३) विगतराजं ।

यदि भवान् पतिता[१]मिमामुर्व्वीमुर्व्वीपतिता-मुरीकुर्व्वीत तदा दिनकतिपयं वयमपि साहायक-माहरिष्यामः ॥

न चेत्सद्य एव गोकुलं प्रपद्य तदनवद्यसुखमभि-मुखमानयिष्याम इति ॥

तदेवं केशवस्याभिनिवेशतः सर्व्वेषामप्यन्यथा क्लेशतस्तं भोजेशं तूष्णीकामेव पुष्णन्तं श्रीगोकुल-प्रेमतृष्णः सोऽयं श्रीकृष्णः स्वयमेव सनिर्व्वन्धं मुकुटवन्धवन्धुरं करोति स्म ॥

तं प्रति सर्व्वेण सम[२]मगर्व्वेण मूर्द्धानमानम्य स्वयमसावावेदयामास ॥

राजंस्तस्य वीरगतिं गतस्य सत्कारकारणं भवत्पुरःसराः सर्व्वेऽपि वयमनुसरामः ॥

श्रीमत्पितरौ तु लब्धश्रमविसरौ निजनिजावास-मेवासीदतामिति ॥

श्रीदामादीन् प्रति च जगाद ।

आवां तावत् क्रूरकर्म्मणि प्रतिरुद्धाविति भवन्त एव श्रीमत्पितृचरणानुगतिमनुभवन्तः शकटा-वरोह एव रात्रिं क्षिपन्त्विति ॥

---

(१) स्खलितां ।　　(२) सह ।

ततस्तथा विधाय पुनर्विश्रान्तिं सन्निधाय तरणिभि-स्तरणिदुहितुरुत्तरतीरे मृतकान्निधाय तेषां प्रेत-कार्य्यं सम्विधाय श्रीमदानकदुन्दुभि-भवनमेव सह-रामः समाजगाम । आगम्य च सर्व्वेषामगम्यं त(१)दवरोधमवरुन्धानः सावधानममू मातरपितरौ-नमश्चकार ॥

किन्तु स्वप्रभावानुभवाल्लब्धपितृभावावत एवा-सम्भवन्तौ(२) तत्र भवन्तौ तावनुभूय दूयमान इव तथा निवेदयामास ॥

यथास्मद्व्रजराजद्वन्द्ववदेव निर्द्वन्द्वसदयतामयहृदय-तया तं वल्ववलितं तावालिङ्गन्तावनिङ्गव(३) द्बहु-समयमासाते स्म ॥

यतः ।—

रसयति न हि यावन्माधुरीमस्य ताव-
न्नयति मनसि भक्तस्तीव्रभावं प्रभावं ।
स कथमितरथा वा श्रीशुकः शश्वदेतत्
स्फुटमधुरिमभाजं श्रीव्रजं सुष्ठु नौति ॥

---

(१) वसुदेव ।　　(२) अमिलन्तौ ।
(३) स्थावरवत् ।

अथ श्रीमदानकदुन्दुभिना समं वहिरागत्य स्वयमेवानुस्मृत्य भृत्यवत्सलः श्रीवत्सलक्ष्मा दिदृक्षया निर्निमिषपक्ष्मा सर्व्वशर्म्मदयशाः सङ्कोचवशात्पूर्व्वं दूरत एव लब्धनिजालोचनपूरमुद्धवमारादनुगृहीतजनद्वारा सानुग्रहं गृहादाजुहाव ॥

ततश्च ।—

अन्योन्यं मिलति स्म यर्ह्यभिनवं
तर्हि स्वयं नाविदत्
कोऽहं कुत्र कदा क एत इति स
प्रेयान् स च श्रीप्रभुः ।
किञ्चादूरगताश्च तन्न विविदुर्यत्तत्र सिद्धान्तितां
को गच्छेन्निजतत्त्वमेतदनयोः प्रेमा परं वेत्ति हि ॥

अथ रामेण समं रामानुजः सव्याजमानकदुन्दुभेः किञ्चिदन्तरितमश्रुन्नमुञ्च न मुञ्चन्नासीत् ।

अश्वित्वा च शीतलितविरहमयस्वहृदयवाष्पाकारया निजवाष्पधारया मुहुरपि तन्मुखनिरीक्षणपूर्व्वकतदालिङ्गनपर्व्वणि तमन्तरङ्गतयाभिषिञ्चन्निवालोकयत ॥

अथ सहरामोद्धवः श्रीशूरोद्भवमनुज्ञाप्य भोजराज-गृहं प्राप्य कंसपत्नीनां वाष्पं निर्व्वाप्य राज-

सभायामुग्रसेनं सहयादवसेनमानाय्य तवैव राज्यं न्याय्यमिति प्रत्याय्य सिंहासनं स्वीकार्य्य पुनः श्रीशूरजनिकाय्यमागतवान् ॥

ब्रह्माण्डकोटीश्वरतातितुच्छा
यस्येक्ष्यते विष्णुपदेशिता च ।
सा तस्य गोलोकमहेन्द्रसूनोः
काम्या कथं कंसकराज्यलक्ष्मीः ॥

अथ सदुद्धवलसदुद्धवसहिताभ्यां ताभ्यां सह महारथमुह्यमानमनोरथमारुह्य स पुनरानकदुन्दुभिर्व्रजमहीपतिं प्रति मिलनाय विशङ्कटं तदीयशकटव्रजमाजगाम ॥

आगम्य च गाढालिङ्गनतया सङ्गम्य रम्यस्वजनसम्वलितेन तेन सह परस्परं लब्धध्वंसकंसकृतचरोपद्रववार्त्तां वर्त्तयामास ॥

वर्त्तयित्वा च पुनः प्रार्थयामास ॥

यावत् स्थितिस्तावदस्मद्गृह एव स्वगृह इव सर्वैः सह भोक्तव्यमिति ॥

ततश्च प्रतिदिनमेवं निर्व्वर्त्तमाने महापर्व्वणि सरामः श्रीरामानुजः पलायितयादवचयसमा-

चयनमयनवराज्यप्राज्यस्थापनकर्म्मसमये राज-सभायां श्रीवसुदेवस्य सभायां वा विराजते स्म ॥

अन्तरान्तरा च शकटावरोहमासाद्य श्रीदामाद्य-निजमित्रैः सह विचित्रं क्रीडति स्मेति ॥

अथ दिनकथां समापयतः स्निग्धकण्ठस्य वचनं यथा ।—

कंसं निहतवान् यः प्राक् सोऽयं क्रोडगतस्तव ।
द्वीपात् प्रत्यागतं वित्तमिवैतं पश्य गोप ! ते ॥

अथ तत्र कथायां समाप्तप्रथायां परमानन्दिनः श्रीमद्व्रजवन्दिनस्तदिदं पठन्ति स्म ॥

जय कृतमथुराप्रवेशभावुक ! ।
माथुरजनतासुभगम्भावुक ! ॥
नानाविलसितनन्दितनागर ! ।
नगरवधूजनमोहननागर(१) ! ॥
सरजककंसकवसनादायक(२) ! ।
कृतरुचिवायिनि निजरुचिदायक ! ॥
भक्तगणे धृतकरुणापूरक ! ।
मालाकारमनोरथपूरक ! ॥

---

(१) विदग्ध । (२) छेदक । पक्षे ग्राहक ।

तनुततकुब्जाचन्दनचित्रक ! ।
कुब्जावक्रिमहातिकृतचित्रक ! ॥
कंसमखस्थितधनुरनुयोजक[1] ! ।
नगरजनानां सुखशतयोजक ! ॥
कंसधनुर्मखधनुरनुभङ्गद ! ।
तदसहनोद्धतयोद्धृषु भङ्गद ! ॥
हस्तिपमनु निजवर्त्मसमर्द्दक[2] ! ।
तस्मिन् धृतरुषि हस्तिविमर्द्दक ! ॥
भ्रात्रा सह करिदन्तविभूषण ! ।
रङ्गं प्रविशन् भोज[3]विभूषण[4] ! ॥
गजरक्ताद्दिभिरङ्गं परि चित ! ।
वहुविधभावैर्विविधं परिचित ! ॥
जगति समन्तादप्रतिमल्लक[5] !
कंसाग्रे हततत्प्रतिमल्लक[6] ! ॥
सदसि समस्ते नास्तिसमोहन[7] ! ।
मल्लनटनकृतविश्वविमोहन ! ॥

---

(१) प्रच्छक ।　　(२) याचक ।
(३) वंश ।　　(४) उष रुजायां ।
(५) प्रतिस्पर्द्धिरहित ।　　(६) मल्लमल्ल ।
(७) नास्ति समस्य ऊहनमपि यत्र । नास्तीत्यव्ययेन बहुव्रीहिरयम् ।

कंसज(१)गुरुनिन्दनकम्पाकुल ! ।
दृष्टिविकीर्णद्युति शम्पाकुल ! ॥
प्लुतिलीलाकृतमञ्चक्षोभक(२) ! ।
क्रीडाविक्रमकंसक्षोभक ! ॥
सहसा मञ्चात् कंसनिपातक ! ।
तेन ध्वस्तत्रिजगत्पातक ! ॥
अखिलजनानां दुःखविमोक्षद ! ।
कंसस्यापि च सहसा मोक्षद ! ॥
मोचितवसुदेवादिकवन्धक ! ।
साधुसुखं प्रति धृतनिर्व्वन्धक ! ॥
विश्रान्तिं प्रति कंसाकर्षक ! ।
व्यञ्जितनिजवलवलयोत्कर्षक ! ॥
कंसपितरि जितराज्यनिधायक ! ।
निजयशसाखिलशर्म्मविधायक ! ॥
व्रजतः पोष्याखिलनिस्तारक ! ।
पुनरपि च व्रजसुखविस्तारक ! ॥
जय जय जय जय जय जय जय जय ।
जय जय जय जय जय जय जय जय वीर ! ॥

---

(१) निन्दनविशेषण । (२) वहुव्रीहौ कप् ।

तदेवं कथकयोः कथया वन्दिनां वन्दनप्रथया च लब्धावधानपोषाः श्रीकृष्णलाभसन्ततसन्तोषाः सर्व्वे यथास्वं तदानुकूल्यसुखमर्ज्जयामासुः ॥

अथ लब्धप्रथायां रात्रिकथायां श्रीराधामाधवयोरग्रतः स्निग्धकण्ठ उवाच ।—

तदेतत्प्रमदवृत्ते स्थिते प्रतिलवमपि गोकुलं प्रस्थिते च तत्प्रदेशतः सन्देशः श्रीमत्केशवसदेशमागतः ।

तत्रान्येषां प्रातः प्रस्तोतव्यः । सम्प्रति तु कंसपितरि राज्यार्पणस्य श्रवणतः किञ्चिदवाञ्चितभयमयचिरविरहक्लमानां व्रजरमाणामतिनिभृतस्वस्तिमुखसम्भृतः सोऽयमाकर्ण्यतां ॥

विरहस्तव गोपाली-
दयित मिथो ! याः सपत्नीश्च ।
रञ्जयति स्म समस्ताः
प्राणात्[(१)] कथमहह ! ता विरञ्जयति ॥
विपिनं सदनं यासां
सदनं पिविनं वभूव गोपीनां ।

---

(१) प्राणोऽपानः समानश्चेतिवदेकत्वं ।

तासां त्वद्वियुजां किं
मृतिजीवनयोर्विपर्य्ययो न स्यात् ॥
यासां चन्दनचन्द्र-
प्रभृति च वस्तुप्रतापनं भवति ।
हरिरहितानां तासां, वह्निः किं वत !
न शीततामयिता ।
विश्लेषस्तव भद्रः, क्लेशं स हरेद्भवन्नेव ॥
आशा सेयं धृष्टा, त्वत्सृष्टा तत्र विघ्नमातनुते ।
भवता मर्य्यादार्थं, यः खलु पर्य्यापितः कालः ।
कालः स भवन्नघ,हरलवशः कल्पाय कल्पतेऽस्माकं
॥ इति ॥

अत्र चेदं श्रीराधासखीनां तदनुपद्यमानं[१] पद्यं ॥

अघहरविरहव्रणाता
न हि नः कृच्छ्राय तादृशे[२] श्रयति ।
राधालवणिमगलनं
यदि वलनं तत्र नापि कुर्व्वीत ॥

(१) तत्पूर्वोक्तमनुगच्छत् ।
(२) चतुर्थी ।

तत्र कारणमन्यदन्यदस्तु । तदिदं तु महदेव दुःसहं ॥

आनीतं घृतपायसान्नमनया कृष्णाय किञ्चित्त्वया-
लभ्यं तस्य मया च शीघ्रमनयो-
नाम्ना शुक ! स्वन्यतां[१] ।
इत्थं प्रातरनूद्य नित्यमपि तां राधां मुहुः शारिका
वृन्दारण्यनिवासिनी मधुपुरक्ष्मानाथतो तुद्यते ॥

एवं प्रियसखीलेखं वाचकस्य वकीरिपोः ।
लुम्पत्कल्पस्तदावाष्पः स्थैर्य्यकल्पमचीक्लृपत् ॥

तदेतत्कथारम्भ एव तासां श्वासानां वहिर्निष्क्रमणमिव वीक्ष्य स्निग्धकण्ठः सोत्कण्ठं समापयन्नाह स्म ।—

राधे ! योऽयं दयित-
स्त्वयि दयितः कथमनार्द्रतामयिता ।
तव तनुलतिकामस्त्रैः, सिञ्चति पश्याम्बुदश्यामः ॥

तदेवं मधुरोपसंहारेण व्याहारेण सर्व्वमानन्दयन्तावमन्दप्रेमानन्दमन्दिरतया वन्दिनावमू तेन सह यथास्वमावासं विन्दतः स्म ॥

---

(१) लब्धव्यं शुक ! तन्मया च मधुरं नाम्ना स्तं तन्यताम् । कुत्रचित् एवमपि पाठो दृश्यते ।

श्रीराधागोविन्दौ च कन्दर्पमन्दिरं इति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
कंसविध्वंसनं नाम पञ्चमं
पूरणम् ॥

षष्ठं पूरणम्

अथ श्रीगोविन्दकृतमहासि व्रजेन्द्रसदसि प्रातः कथा प्रथामाप ॥

यत्र मधुकण्ठ उवाच ।—

तदेवं कंसमारणानन्तरमुच्चावचवारणाय[1] यत्र कुत्रचिद्गतयादवकुलाकारणाय समुद्भूतकंसपक्ष-निर्हारणाय च व्रजागमनायालब्धावसरे कंसहरे तत्पर्य्यन्तवृत्तं प्रतिलवमपि श्रवसि वृत्तं कुर्व्वता-मुपनन्दादीनां सानन्दानामपि विलम्बाशङ्काशङ्कु-सङ्कुलानां सन्देशः प्रविवेश यथा ।—

हरेर्माता भक्तं तदवधि न भुङ्क्ते तदनुगा-
स्तथा तस्मिन् गोपाः प्रतिमुहुरुपायान्ति विधुराः ।
किमन्यद्वक्तव्यं व्रजमनुगतं यत्पशुकुलं
वनस्थं यद्वा तन्निखिलमिह शीर्य्यद्विलपति ॥इति॥

---

(१) उपद्रवनिवारणाय ।

अथ कुतश्चिन्मनःस्थसङ्कोचतः सम्प्रति प्रतिगमनाद्विरम्य भाविलीलासूचनदेवर्षिवचनस्मरणात्तदेव च नियम्य सहमानतां वहन्नपि तदेवं निशम्य सम्यगुत्सुकतया गम्यमेवेति मनः पुनः सङ्गम्य सोऽयं व्रजप्राणव्रजः स्वाग्रजं रहो निर्व्याजं व्याजहार ॥

आर्य्य ! तत्र भवतात्र साहाय्यं धार्य्यतां ॥

अहं पुनर्व्रजमेव व्रजानीति ॥

स पुनः सास्रमुवाच ।—

भ्रातर्भवन्तं विना मम सर्व्वं विनाशमायातीति न मया किमपि स्यात् ॥

श्रीकृष्ण उवाच ।—तर्हि किं कार्य्यं ? ॥

स उवाच ।—

यदूनुग्रसेनानुगतान् विधाय द्रुतमुभाभ्यामेवावाभ्भां गोकुलं गन्तव्यं ।

तदिदं मयापि भव्यं निवेदयितव्यमासीत् दिष्ट्या[१] स्वयमेव दिष्टया[२] तदुट्टङ्कितं ।

अथ श्रीकृष्णस्तेन साकं श्रीवसुदेवविनाकृतयदुकुलविराजमानयदुराजसभाया गत्वा क्षणादवसरञ्च मत्वा तदिदं निवेदनमुद्रया वेदयामास ।

---

(१) भद्रं । (२) आज्ञप्त्या ।

मम किञ्चिद्विज्ञप्तिरस्तीति ॥

सर्व्वे ससम्भ्रममूचुः ।—

काममाज्ञाप्यतां ॥

श्रीकृष्ण उवाच ।—

सम्प्रति भवन्तः सर्व्वे स्वभवनमेव समागतवन्तः । राजमहाशयाश्च निजराजासनमेवासनं विधाय यथापूर्व्वं भवतां पर्व्ववितनितारः । मया पूर्व्वमपीदं निवेदनं चक्रे ॥

यन्मह्यं राज्यं न रोचते किन्तु मम वृन्दावनमेव सुखवृन्दाय कल्पत इति ॥

तदेवमवधाय मुखावलोकनं व्यतिविधाय सत्सु सभासत्सु विकद्रुनामा यदुवृद्धः समृद्धक्षोभमाचचक्षे ।

पूर्व्वमस्माकमेकः कंसक एव ध्वंसक आसीत् । त[1]द्वलादन्ये पुनरस्माभिर्न गण्येषु कृताः[2] । भवता प्रमापिते[3] तु तस्मिन् प्रचुरप्रमाणास्तद्विधा[4] जाताः । यतो जरासन्धादयस्तत्सम्बन्धाहितनिर्ब्बन्धाः कोटयः प्रसारितशस्त्रकोटयः सन्ति ।

---

(१) कंस । (२) न गणिता इत्यर्थः ।
(३) हते । (४) कंसतुल्याः ।

तस्माद्भवन्मात्राश्रयप्रणायनीयप्राणात्राणायात्रा यदवः स्वयं यथावदवस्थाप्यन्तां संस्थाप्यन्तां(१) वा।

किञ्च।—

"अस्यास्त्वामष्टमो गर्भ" इति गीर्वाणवाणी-सन्दर्भसाक्षितया भवानस्माकमेव सत्यमपत्यं न तु गोपत्यधिपानामित्यस्मत्प्रत्यवस्थापनमेव भवता प्रत्यहमाचरणीयं ॥

तेषामपकारकारकश्च न कश्चन सम्प्रति भातीति यथाभव्यं स्यात्तथा व्यवहर्त्तव्यमिति किमधिकं मर्म्म-व्यञ्जनया साधूनां शत्रुजित्सु परमधर्म्मवित्सु ॥ अथ तदेतदनतिक्रम्यं(२) निशम्य सम्यग्वाचं संयम्य दुर्मना इव तस्मादपगम्य श्रीवसुदेवदेवकीभ्यां धर्म्मं हर्म्यमागम्य श्रीरामेण सममेव तावनु निवे-दयामास ॥

श्रीमत्पितरावाज्ञावितरणायावधानमत्राधत्तां ॥

तावूचतुः।—हन्त! तत् किं? ॥

श्रीकृष्ण उवाच।—

यद्व्रजलोकं विलोकं विलोकमागच्छावः ॥

अथ तदेतदवधार्य्य तौ तूष्णीकामेवापुष्णीतां ॥

---

(१) संस्था मृत्युः। संस्थापनं मारणं। (२) नातिक्रमार्हं।

तौ हि पूर्व्वमुग्रसेनमुकुटवन्धमनु तद्वचनप्रवन्ध-माकर्ण्य वैवर्ण्यमेवासन्नौ स्तः ॥

यः खल्वव्यभिचारितया वैशम्पायनादिभिरपि हरिवंशादिषु प्रचारित एवास्ति ॥

यथा दर्शितमहं स एव गोमध्य इत्यादि ॥

जानाते(१)स्म च तावस्य मनोवृत्तं । यद्व्रजगमने लब्धसङ्गमने सर्व्वमसौ विस्मरतीति ॥

ततश्चिरादेवमूचतुः ।—

ततः परिहृतावेव चिरलब्धश्वासरूपाभ्यां युवाभ्या-मावामिति ॥

तत्राक्रूरस्य जनन्या च विचारतः क्रूरमिदं प्रोक्तं । यद्यत्र व्रजजनानां गमनागमनमस्ति तर्हि व्रज एवायमस्तीति गमनं वास्य कथं निरोधविषयी-क्रियते इति ॥

अथ सर्व्वे तस्या मुखं पश्यन्तश्चिरं विमृश्य तस्थुः ।

तदेवं सति पुनर्व्विविक्तमिताभ्यां रामाजिताभ्या-मक्षीणमषडक्षीणमिदं निर्णीक्तं विविक्तं ॥

---

(१) ज्ञाजनोर्जा ।

तदिदमावाभ्यां सरलतया परमनयोर्गुरुचरणयो-र्निवेदितं ॥

तत्पुनरमूभ्यां स्वानिष्टं वितर्क्य प्रत्यादिष्टं(१) गुर्व्वा-ज्ञालङ्घनन्तु न मङ्गलाय कल्पेत ॥

यदाज्ञापालनाय परममर्य्यादः स खलु रघुवर्य्यः प्राज्यां राज्यमपि परित्यज्य नवभार्य्यया सह राक्षस-चर्य्याभीषणामपि वनं वाढमवगाढं चकार ॥

तदाज्ञालङ्घनस्य परामृश्यते च फलं। जरासन्धा-दयस्त्वस्मत्सम्बन्धेन कृतानुसन्धे ब्रजेऽप्युत्पातं पातयिष्यन्तीति प्रस्तुतमस्तु तावदप्रस्तुतमन्यदन्य-दपि तस्माच्छ्रीब्रजेशचरणसमाधानमेव साम्प्रतं साम्प्रतमिति ।

तदेवं मन्तूं विधाय श्रीब्रजेशितुरनसां समूहं सन्नि-धाय ताभ्यां तस्य परिसरः समाजग्मे । समागम्य च प्रणम्य सम्यगासनमास्थितयोस्तयो राम एव तस्मिन् सदसि यद्वृत्तं तत्प्रवृत्तं चक्रे ॥

तत्र स्वयं कृष्णस्तु पितृव्यादीनपि सविनयं पश्यन् किञ्चिद्विहसन्निव तस्य शेषमाह स्म ।

---

(१) खण्डितं ।

हन्त ! कादाचित्कीमाकाशवाणीं प्रमाणीकृत्य मयि निजदेवकीपुत्रतामपि ते सूचयन्ति तदन्तर्गतं स्वमतं कारणं तु नावतारयन्तीति ॥

अथैतावत् कथितवति मधुकण्ठे स्निग्धकण्ठश्चिन्तयति स्म ।—

वस्तुतः खल्वयमनुगताचिन्त्यशक्तितया श्रीदेवक्यां चतुर्भुजरूपेण श्रीयशोदायान्तु द्विभुजरूपेण स्फुरति स्म ॥

"फलेन फलकारणमनुमीयत" इति न्यायेन । यदा तु कंसभयाच्चतुर्भुजरूपाच्छादनाय देवकीच्छा जायत तदा श्रीयशोदायां स्फुरितं द्विभुजरूपमेव चतुर्भुजरूपमन्तर्भूतं विधाय तत्राविर्बभूवेति पूर्व्वचम्पूमनु श्रीभागवतानुगतयुक्तिभिरुक्तिभिः स्थापितं ।

तत्तु न पूर्व्वमुभयत्रापि ज्ञातमासीदिति ॥

अथ स्पष्टं सस्मितमाचष्ट ।——

कथं ते स्वयमपि कारणमवतारयेयुः ॥

अवतारिते तु तस्मिन् वसुदेवेनापहृतापत्यस्य गोपत्यधिपस्य न्यायः सत्यः स्यादिति ॥

भवतु व्रजपतिना तत्र किं प्रतिपन्नं ॥

मधुकण्ठ उवाच ।—

तच्छ्रुत्वा तु व्रजनृपतिर्वहिरविहतं विहस्य तदन्यथा अध्यवस्यति स्म ॥

"अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुधे"ति कंसं प्रत्याकाशवाणी ।—

"किं मया हतया मन्द ! जातः खलु तवान्तकृत् ।
यत्र क्व वा पूर्व्वशत्रुर्मा हिंसीः कृपणान् वृथे"ति ॥

देवीवाण्या व्यभिचारिता ॥

अव्यलीकतापर्य्यवसितभाषिणानकदुन्दुभिना च मां प्रति निर्द्वन्द्वमित्थमेवोक्तं ॥

"दिष्ट्या भ्रातः ! प्रवयस इदानीमप्रजस्य ते ।
प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत" ॥ इति ॥

तस्मान्नूनं "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज" इति मां प्रति व्यञ्जिततत्त्ववर्गस्य गर्गस्य खल्विदं प्रपञ्जनमेवान्तः कारणमुदञ्चति ॥

भवतु पित्रोः पुनरिदं सुखसम्विदमेव तनुते ।
यन्निजपुत्रं प्रति धन्याः पुत्रभावमाचरन्तीति ॥

विशेषतश्चानकदुन्दुभिना मम तज्जन्या[१] च भवज्जनन्या न द्वैतमस्तीति तैस्तद्भद्रमेवोच्यते ॥

---

(१) तस्य जन्या बन्ध्वा ।

किन्तु ।—

यात्र स्यादसुराद्भीतिः सा तत्र विरहज्वरात् ।
भारद्वयं भवत्येवेत्याकुलं सुत ! मन्मनः ॥

भवतु तथाप्येषामेव साहाय्यं कार्य्यं । यतः सर्व्वज्ञानां मतमवधार्य्य कार्य्यमेतद्विचार्य्य खलु मया कंसवधाय तवागमनं न विस्रंसितं । श्रूयते हि पूर्व्वं मुनिहिताय दशरथेनाभिनवतनयस्य राक्षसक्षपाय प्रस्थापनं । यः खल्वन्यदा तद्वनगमनक्षण एव क्षीणप्राणतामवापेति ॥

क्षणं रोदनं विष्टभ्य तमेतं वाहुभ्यामवष्टभ्य च तदेतन्मुखमीक्षामास ॥

ततः स चैव तमेनं सचमानः सगद्गदं जगाद ।—

तात ! दुष्टा नष्टा एव भविष्यन्तीति न तत्र सन्दिह्यतां ॥

तथैव हि दैवफलं मम तातचरणेषु वर्गेश एव गर्गः प्रतिज्ञातवानस्ति ॥

कदाचिन्मयि चैकान्ते वनान्ते देवर्षिवर्य्य इति(१) ॥

तथा मम च वासस्तातमहाशयानामुपासनमय एव सम्पत्स्यते ।

(१) प्रतिज्ञातवान् ।

तच्च गोपानामुपसमाजमेव । न तु यादवानामेवा-
दवीयः(१) ॥

ते खल्वस्माकं ज्ञातय एते २तु सुहृद इति ज्ञातिभिः सुहृदां खल्वेतादृश एव भेदः । सुहृत्सु तद्धिताय कदाचिद्वासः सदा तु ज्ञातिषु तदालोकसुखाय भवतीति ॥

एवमुक्तवति रामानुजे रामनामापि स्वं तत्सदृशमेव परामृशन्नाह स्म ।——

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशमावामिति किं वक्तव्यं ।

यतः पित्रोरात्मनोऽप्यभ्यधिका प्रीतिरात्मजेषु भवतीति ॥

अथ कृष्णश्च तदेव स्थापयन् प्राह स्म ।——

आस्तां तावन्मम तनूजस्य वार्त्ता । अस्य च श्रीमन्मदग्रजस्य भवानेव धर्म्मतः पिता ।

यतः ।——

"स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ।
शिशून् वन्धुभिरुत्सृष्टानकल्यैः पोषरक्षणे" ॥

---

(१) यथास्थात । दूरस्य दवादेशः ।　(२) यदवः ।

तस्माच्छ्रीमदार्य्यस्य चास्य भवच्चरणपरिचर्य्या परं वर्य्या ।

किन्तु सुहृदामेषां सुखमभिमुखं विधाय श्रीचरणमागमिष्यामः ॥

व्रजराज उवाच ।—

वत्स ! तावद्वयमप्यत्र वत्स्यामः ॥

श्रीकृष्ण उवाच ।—

तात ! तथा विधेयं यथा भवद्व्यतिरेकादेकाकितया माता मा तापं यासीत् ॥

व्रजराज उवाच ।—

तामपि भवतः समीपमेवापयिष्यामः ॥

श्रीकृष्ण उवाच ।—

ततः सर्व्वमपि गोकुलमुत्सन्नतामापन्नं स्यात् ॥

व्रजराज उवाच ।—

तर्हि सर्व्वमपि व्रजं निकटं घटयिष्यामः ॥

श्रीकृष्ण उवाच ।—

सम्प्रत्यस्माकं वहुलाः प्रत्यहं सङ्ख्याधिक्यप्रत्ययतः सुष्ठु वहुला जाताः । तासामुपनगरवनं किमुपजीवनं स्यात् । गावश्चास्माकं कुलदेव्य इति ता एव सेव्यतामर्हन्ति । यदि वा मदर्थं सर्व्वं भवता

मां विना तु व्यर्थमिति समर्थनीयं । तर्हि च मत्प्राणा एव ता इति ता एव प्राणनीयाः ॥

किञ्च; यद्वोऽपि नाहृतं व्याहरन्ति । स्फुटमुपलब्धकंससम्बन्धजरासन्धानिर्व्बन्धादक्षौहिणीलक्षितदुर्ज्जनलक्षाणि मथुरामवरोत्स्यन्ति । तर्हि गर्हितमेव भवेत् । तत्रास्तामस्मत्सामीप्यमस्मदसामीप्यतश्च भवदवस्थानं यद्यस्मत्सम्बन्धं विना लब्धसन्धं भवेत्तर्ह्येव कृच्छ्रं नर्च्छेत् । गूढपुरुषद्वारेण ज्ञाते ह्यस्मत्सम्बन्धे जरासन्धादयस्त एते कंसवन्नभयानुबन्धा इति छलबलमेकमेकं न प्रस्थापयिष्यन्ति । किन्त्वक्षौहिणीभिर्द्रवन्तः सर्व्वं व्रजमप्युपद्रावयिष्यन्ति ॥

तस्मादस्माभिर्युष्माभिश्च गोपयितव्य एव गन्धश्च व्यतिसम्बन्धस्य ॥

एते च मया यादवा दुर्गान्तरे दवयितव्याः । भवन्तस्त्वसङ्ख्या न तथा कर्त्तुं शक्याः ॥

सङ्ख्यामतिचरन्तीनां वनेचरन्तीनां गवामावरणं तु सुतरामेव दुष्करं । तस्मात्तेषां दुर्गवदस्मदौदासीन्यमेव भवतां रक्षायां प्रावीण्यमर्हति ॥

किन्तु तावदेव तद्विधेयं यावत्सर्व्वविपक्षपक्षा-
पक्षयं विधाय स्वयमेव श्रीमद्व्रजमाव्रजामः ।
आव्रजिते(१) च तस्मिन्(२) न पुनरन्यत्र व्रजन-
मपि स्यात् ॥

यतो निरुपधिस्नेहव्यग्रभवदग्रिमस्वजनवर्गदर्शन-
सुखमात्रफलपात्रतया निरुपाधिरसौ पुरुषार्थः कथं
वाधितः स्यात् ॥

तदेवं व्यस्य यन्निवेदितं तदेवेदं समस्य निवेद-
यामि ॥

"यात यूयं व्रजं तात ! वयं च स्नेहदुःखितान् ।
ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं" ॥

इति ॥

तदेतत्पर्य्यन्तं मधुकण्ठः प्रोच्य भ्रातरमवलोक्य
प्राह स्म ।—

अत्र "तातेति" निजान्तः स्थापितत्पुत्रताभावनाया
योग्यमेव सम्बोधनं ॥

ज्ञाती" निति तत्रापि "स्नेहदुःखिता" निति स्नेहस्य
निरवधिकत्वात् प्रतिक्षणं दिदृक्षुषु तन्मुख्येषु

---

(१) कर्म्मणि । (२) व्रजे ।

तेष्वेवावस्थानं प्रतिक्षणमेव स्वचीक्षणादानं च विवक्षितं ॥

"वय"मित्य"स्मदोर्द्वयोश्चे"ति पाणिनीयस्मरणादस्तु तावन्मम वार्त्ता किन्त्वावां द्वावप्येष्याव इति व्यञ्जितं ॥

"द्रष्टु"मिति तेषामिवात्मनोऽपि तद्दर्शनमात्र-पुरुषार्थता समर्थिता ॥

"अथापि भूमन्! महिमा गुणस्य ते विबोद्धुमर्हती,,त्यत्र "बोधविषयीभवितु,,मितिवद्दर्शनविषयी-भवितुमित्यर्थान्तरेऽपि तद्वदेव सिद्धान्तितं ॥

"सुहृदा"मिति यदूनामज्ञातित्वमुपकार्य्यत्वमात्रं च ध्वनिपात्रं कृतं ॥

तत्र च सुखं विधायेति क्त्वाप्रयोगेण सावधिक-निर्देशात्तद्भयादिनाशनानन्तरं पुनस्तदनपेक्षत्वमपि लक्षितमिति ॥

तत्र स्निग्धकण्ठः सोत्कण्ठं पप्रच्छ ।—

अथ तत्र किं व्यवसितं श्रीव्रजेशचरणानां ॥

मधुकण्ठः प्राह स्म ।—

व्रजराजश्च तदीयवाचो युक्तिगर्भनमनभिरुचित-

मपि वाढमुचितमिति मत्वा मनसि स्वललाटं हत्वा वाष्पस्पृष्टमस्पष्टमाचष्ट ॥

भवन्माता तु वामा कथमियद्बुध्यतां ? ॥

श्रीकृष्ण उवाच ।—

तां प्रति च यथेष्टप्रणामपूर्व्वकं निजेष्टद्वारा मयेदं सन्देष्टव्यमिति प्रोच्य स्वहस्तलिपिभिस्तत्पत्रं विरोच्य श्रीदामहस्तविन्यस्तं कृतवान् ॥

श्रीदामा च श्रीव्रजराज-शुश्रूषायां कृतानुसन्ध-स्तन्मुखवन्धमतीव तद्दीनम्मन्यतानुवन्धमनुसन्धाय तं विहाय निर्व्वचमेव सगद्गदं गदति स्म ॥

यथा सम्प्रति वयं दुष्टजनात् कष्टमाशङ्क्य स्पष्ट-मेव नायास्यामः । किन्तु श्रीमत्पितृचरणपरि-चरणप्रभावानममाषडक्षीणमक्षीणमागमनं प्रत्यह-मपि विद्यत एव ॥

तथाहि ।—

आद्येऽह्नि क्षीरभक्तं घनदधिवलिता
रोटिका तस्य पश्चा-
त्तत्पश्चाद्दुग्धपूपं तदनु वहुविधान्नाद्यमन्येषु चान्यत् ।

मातर्मह्यं निकाय्ये महति रसयते
पर्य्यवेषि त्वया य-
न्न स्वप्नस्तन्न वा तत् स्फुरणमयमिति
स्मर्य्यतां किन्तु सत्यं ॥

किञ्च ।—

यावन्नाश्नासि मातस्त्वमिति निशमये
हन्त ! नाश्नानि ताव-
द्यद्भ्यामीव तर्ह्यप्यनुभवदसु मे
स्वे[(१)]ऽसवः शोषमीयुः ॥
गोष्ठं गच्छानि पश्यान्यपि निजजननीं
तद्विधामेवमेव
द्युद्यत्तेजः प्रकाशाद्रिपुगणमचिरा-
दुत्सहिष्ये विजेतुं ॥ इति ॥

अथ तदेतन्निशम्य सम्यगस्राविलं सन्देशहरश्च व्याजहार ॥

सत्यं श्रीव्रजेश्वरीचरणाश्च स्वप्नवदिदं साम्प्रत-भवद्भोजनादिकं सरोदनं वदन्ति स्म ॥

भवद्दुःखमाशङ्क्य स्वाभोजनमपि गोपयन्ति स्मेति ॥

---

(१) बहुवचनं ।

अथ तदेतदवधार्य्य साश्चर्य्यतया स्थितेषु तेषु व्रजमहीक्षिदार्द्रवीक्षितमाचचक्षे ।—

भवतः प्रभवश्यानां वयस्यानामेषां वर्त्तने का वार्त्ता ॥

श्रीकृष्ण उवाच ।—

श्रीमन्मातृवदेव ते चामी ममेप्सितसखिजना वीप्सया मामुपलप्स्यन्ते ।

किन्तु मातुर्वत्सलतास्वभावतया कदाचिदन्यथा प्रथा भासिष्यते न पुनरमीषां प्रणयभाजामिति ॥

व्रजेश्वर उवाच ।—

प्रथमतस्तावदेत इव गावः कथमेतावतीं प्रक्रियां श्रावणीं कुर्व्वन्तु ॥

श्रीकृष्ण उवाच ।—

यद्यपि तास्वपि मम तथास्फूर्त्तिर्जूर्त्ति[1]मपनयेत्तथापि प्रकारान्तरमपि वहिर्वृत्तिसमाधानाय विधास्यामि ॥

यथा ।—

तासां गन्धानुसन्धानमेव प्रधानं रवगणश्रवणं च । रूपनिरूपणन्तु तत्प्रधानकमेव ॥

---

(१) जीर्णता ।

तस्मात् स्तोककृष्णोऽयं तदभ्यस्तमदस्तोकसौरभ्य-परिरभ्यमाणवस्त्रसम्बस्त्रणया कृतमन्मुरलीखुरली-कतया च तथा सुबलश्चायं वल्लवसनावलम्बतया तदीयशृङ्गसङ्गितया च तासां मध्यमध्यासितं कुरुतां ॥

ततश्च ममाखिलगुणनिभय एते सर्व्वेऽप्यनयोः प्रतिनिधयः स्युर्य्यत्र वन्याश्च ते धन्याः सर्व्वाभि-वाद्या मृगनगाद्या मत्स्फूर्त्तिपूर्त्तिमागच्छेयुरिति सर्व्वमेव समञ्जसं भवितेति ॥

अथ निजपरिचारकान् शूद्राभीरकुमारकान् हत-विचारकान्निशाम्य वैवश्यादैश्याभीरराजि शाम्य-द्वचनशक्तिभाजि स्वयमेव सोऽयमस्त्रतोयधरः प्राह स्म ।—

मम सखीयमानानामेषामखिलानां तेषामिव यद्यपि गतिस्तथापि तातानुगतिस्तु विशेषतः स्तुति-मासीदतीति ॥

अथ मधुमङ्गलमपि तदिदं स्नेहसङ्गतमाह ।—

हन्त! भवन्तश्च तत्र यान्तु। यद्भगवतीसेवां मन्मङ्ग-लाय मत्प्रतिनिधितया कुर्व्वाणाः पुनस्तदपूर्व्व-(१) जननात्पूर्व्ववत्तदखर्व्वपर्व्वणो सम्पत्स्यन्त इति ॥

(१) पुण्य ।

तदेवं विस्रम्भ्य तत्तदङ्गसौरभ्यपरिरभ्यमाणा-वसनादिना तौ स्तोककृष्ण-सुवलौ विशेषतस्त-त्तद्गुणवासितौ विधायान्यानपि यथान्यायं निजा-लङ्करणादिनालङ्कृत्य सेवादिकारिणश्च यथावदादृत्य कृत्यविशेषान् श्रीमत्पितृचरणेषु गोचरतां निनाय। नीत्वा च तदनुज्ञां गृहीत्वा स्वयं तत्रैव स्थित्वा मन्त्रसदनाद्बहिः स्थितान् माथुरविप्रजनानन्तर्नीत्वा तद्द्वारा सर्व्वानेव यदून् विज्ञापयामास। त एते व्रजाय व्रजिष्यन्तीति ॥

ते च श्रीवसुदेवनरदेवप्रमुखास्तत्रैव सुखादागताः। आगम्य च रम्यपरिच्छदादिना तानभ्यर्च्च्य चानु-व्रज्य च चर्च्च्य[(१)]मानतद्भद्रतया पुरमयामासुः ॥ स तु यशस्वी स्वयमस्वीकृतराज्यतया किमपि तत्रत्यं तान् प्रत्यनपवर्ज्य किन्तु प्रागवलिवलितवलि-कंसहृतघृतकुप्यभाजनानि यानि तान्येव विसर्ज्य केशवः केवलतायां मिथः क्षुभितताभीतस्तैरेव सह श्रीव्रजमहनीयाननुज्ञाप्य मनसि कयाप्यवस्थया व्याप्यमानः पुरमाजगाम रामस्तु तान् दूरमनु-वव्राज ॥

(१) चर्च्चा विचारः।

व्रजेश्वरस्तु प्रलीनमनस्तायामपि जीवन्मुक्तवदेव संस्कारवशादिदं जगाद ।—

वत्स ! निजानुजवत्सलसकेवलतया मनोवलं ह्रास्यति । तस्मादनुजं तमेवानुपाहीति ॥

अथ स्वसम्बन्धादधिकदुःखानुवन्धादाशङ्कमानः सङ्कर्षणः सधैर्य्यं सर्व्वाननुज्ञाप्य शीघ्रगत्या स्वभ्रातरं प्राप्य क्वचिदेकान्तमनुयाप्य निजनिजवाहुभ्यां परस्परं ग्रीवां परिधाप्य तेन सह रुरोद ॥

तदलमतिविस्तरेण ॥ यतः ।—

कंसस्य ध्वंसनान्ते व्रजवसतिगणे
गच्छति स्वीयगेहं
तं कृष्णं तं च रामं तमपि पशुपति-
क्ष्मापतिं तांश्च गोपान् ।
श्रीदामाद्यांश्च तांस्तानपि च तदनुगान्
नव्यविच्छेदभीते-
रन्तः(१) स्मृत्वा मदन्त(२)र्विरसवशतया
सर्व्वमर्व्वाग्जहाति ॥

तदेवमुट्टङ्कयन्मधुकण्ठः श्रीव्रजाधिपादीनामाधिमवधाय पुनरभिदधे ।—

(१) भयस्य मध्ये । (२) कर्त्तृ ।

यः स्वां कृष्णः पुरा तृष्णां वर्द्धयामास धृष्णजं[१]।
स साक्षाद्भवतामङ्कं स्वङ्केलिं वहति प्रभो ! ॥

अथ श्रीकृष्णश्च तच्चरणारविन्दं शिरसा विन्दन् सनिर्व्वेदं निवेदितवान् ।—

अहह ! बहुलमन्तुं[२] जन्तुरेष[३] प्रलापी
रचितमचित[४] तात ! क्षन्तुमर्हस्त्वमेव ।
कथमपि निजमङ्गं व्याधिना दुःखदं स्या-
त्तदपि न हि तदङ्गी त्यक्तुमिच्छेत्कदापि ॥

ततश्च ।—

आलिङ्ग्यत व्रजेशित्रा पित्रा सपुलकं सुतः ।
सर्व्वैश्चानन्दगर्व्वेण रोमपर्व्वेह सन्दधे ॥

तदेवं प्रातःकथां मधुकण्ठः समाप्य श्रीमाधवपदसीम्नि राधिकासदसि कथयामास ॥

ये खलु तस्य व्रजा व्रजनाय व्यञ्जिता विघ्नास्ते सर्व्वे प्रागुक्तलज्जाविघ्ना एव मन्तव्याः ॥

तदेव पुरस्ताद्व्यञ्जयन् मथुरायाश्चलन्तं सुबलं बलानुजः स्ववल्लभारोचकवाचि कवलितं चकार ॥

---

(१) प्रगल्भां । (२) अपराधं ।
(३) मल्लक्षणः । (४) लुङि आत्मनेपदं ।

यथा ।—

सत्यं सन्त्यज्य युष्मान् नियतमदनुग-
प्राणाना निष्प्रमाणा[१]

धर्म्यं मे नास्ति किञ्चित्तदपि सवयसः
श्रूयतां मन्निवेद्यं ।

युष्माकं यातिसेतु[२]र्मयि रतिरतुला
सा तु मां ह्रूपयन्ती

तत्तुल्या[३]सक्तिरिक्तं ह्रुततनुमकरो-
न्नास्मि दूरः कदापि ॥

पुर्य्यामस्यां यदस्मि प्रकटमपि हि तं
हन्त ! कुर्य्यां कथं तत्

किन्तुच्छायासदृत्तः स्फुटमिह विहरे
तत्र[४] तु स्वेन नित्यं ।

आवेशो यत्र यस्य स्फुरति सनियतं
तत्र भाति स्वयं यत्[५]

स्फूर्त्तिं स्वां सोऽयमस्मीत्यनुभजति यथा
तेन[६] नान्येन[७] तद्वत्[८] ॥

---

(१) बहीः । (२) अमर्य्यादा । (३) भवद्रतितुल्य ।
(४) ब्रजे । (५) यस्मात् । (६) आवेशेन ।
(७) अनावेशेन । (८, स्फूर्त्तिं न भजति ।

सोमाभे[1] ! दर्शरात्रावपि निजरुचिभिः
　　　　पूर्णिमाभ्रान्तितस्त्वं
मद्विश्लेषज्वरार्त्तिप्रथिनवमदशा-
　　　　दुर्वशाङ्गी यदासीः ।
तर्हि त्वामङ्गकान्तिस्फुरदसितमणि-
　　　　श्रीचयव्याप्तसर्व्वः
सोऽहं शिश्लेष तत्तद्विनिमितदशया
　　　　यत्र चित्रं जगन्थ ॥
सोमाभे ! मानमैच्छः प्रतिपदि ललिते !
　　　　मामयासीर्व्वनान्ते
पाल्या[2]सीर्व्वासंसज्जा परिचरसि[3] पुरा
　　　　राधया मां विशाखे ! ।
एतद्दिङ्मात्रमुक्तं भवदवगतये
　　　　ज्ञेयमन्यत् कथं वा
स्वप्नं तत्तद्विदित्वा ग्लपयथ निजकं
　　　　मानसं मामपीह ॥
पद्मे ! भद्रे ! स शैब्ये ! स त्रितयमपि भव-
　　　　द्रूपमुद्भ्रान्तचित्तं
मद्विश्लेषात्तमालं परि[4] विलुठितव-
　　　　द्यत्र तत्राहमासं ।

---

(१) चन्द्रावलि ! ।　　(२) हे पालि ! ।
(३) पुरायोगे भूते लट् ।　　(४) तमालस्य निकटे ।

आलिङ्गन्युष्मदङ्गान्युदनमय[१]महो !
यावदभ्यस्य[२] तावत्
क्रुद्धा वृद्धाः कुतश्चिद्गत ! यदुपगता-
स्तन्न मे याति दुःखं ॥
अन्येद्युः श्रीलराधे ! मम पुरगमन-
स्फूर्त्तिसञ्जातमूर्च्छें[३]
त्वामालिङ्ग्यानुचुम्बन् गिरिवनमनयं
तत्कथं व्यस्मरस्त्वं ।
तत्रागम्याथ सर्व्वाः कलकलविरुतं
यर्हि चक्रुस्तदानीं
तत्रावां हा ! यथास्त्रं पृथक[४]दपगतौ
न स्मरस्येव तच्च ॥
स्वप्ने यद्राधिके ! त्वं मम शयनमिहा-
प्याश्रिता राजपुर्य्यां
स्वप्नस्तन्नास्ति नूनं परिमलितमभू-
द्यत्त्वया तस्य[५] वासः ।
आस्तां तत्स्पष्टमद्याप्यनुमदवयवं
पद्मिनीरत्नगन्धं

---

(१) उन्नमितवानस्मि । (२) पौनःपुन्येन ।
(३) मूर्च्छा । (४) पृथक् एव पृथकत् । स्वार्थे तद्धितः ।
(५) शयनस्य ।

बिन्दन्नन्धोऽपि लोकः स्मितशवलमुखः
　　　　　　　　　　शीर्षमीषद्धुनीते ॥
आस्तां प्रागद्य सद्यस्तनशशिकलया-⁽१⁾
　　　　　　　　　　लङ्कृतश्रीरसौ⁽२⁾ य-
द्वृत्तं तद्युष्मकाभिः सशपथमभितः
　　　　　　　　　　पृच्छ्यतां श्यामलैव ।
यद्यप्येवं तथापि स्फुटगतिमचिरा-
　　　　　　　　　　दागतिं चेन्मदीया-
मीहध्वे सर्व्वविघ्नप्रशमनरचना
　　　　　　　　　　स्याद्यदा तर्हि कुर्य्यां ॥

तदेवमेतावत्प्रथामेव कथां समाप्य पुनर्मधुकण्ठः प्रोवाच ।—

राधे ! सोऽयं सत्यवादी त्वामलङ्कृत्य शोभते ।
त्वद्गन्धवन्धनः पुष्पन्धयः⁽३⁾ स्वर्णाब्जिनीमिव ॥
ऊषानिरुद्धवद्राधे ! ययोः⁽४⁾ स्वाप्नश्च सङ्गमः
साक्षादासीत्तयो⁽५⁾र्व्वा किं विश्लेषः स्यातुमर्हति ॥

इति विसृमरसान्द्रानन्दशस्तं समस्तं
सपदि कथकवर्य्यौ तावनुज्ञाप्य यातौ ।

---

(१) नखक्षतेन ।　　(२) श्यामला ।　　(३) अलिः ।
(४) राधामाधवयोः ।　　(५) युवयोः ।

हरिरपि निजकान्तासङ्गसर्व्वाङ्गशोभः
सुभगशयनलक्ष्मीमञ्जसालञ्चकार ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
व्रजपतिविसर्ज्जनकष्टं नाम
षष्ठं पूरणम् ॥

सप्तमं पूरणम्

अथ पुनः प्रातः श्रीकृष्णाकृतप्रभायां श्रीव्रजराजसभायां स्निग्धकण्ठ उवाच ।—

या खलु पूर्व्वं व्रजयुवराजेन व्रजराजं प्रति रचितयन्त्रणा मन्त्रणा श्राविता सा निजव्रज्यायाः पूर्व्वमेव पूर्व्वसन्देशप्रवेशकद्वारा निजाग्रजादीन् प्रति व्रजराजेन विशिष्टतया सन्दिष्टा ॥

स्वेषां तेषामपि व्यतिमिलने दुःसहतत्प्रस्तावसहनाय। लब्धप्रवेशेऽपि तस्मिन्सन्देशे तदग्रजादयस्तदाशापाशानुवद्धतया कदाचिदन्यथा स्यादिति मनसि कथयित्वा प्रथिमलसदुच्चपदसदसि सर्व्व एव समुच्चयमयामासुः ॥

किं वहुना? धृततदनुसन्धा नीरन्ध्रसमुदयवन्धाः पुरन्ध्रीप्रभृतीस्त्यक्तलज्जाहृतीर्वधूरादाय व्रजाधीश्वरी च किञ्चिदन्तरिततया तदत्रानञ्च ॥

ततश्च दूरादेव व्रजनरदेवप्रभृतीनां हृसदाखिल-

कृतीनामागमनमनुल्लासमालोच्य सर्व्वे एव शोच्यमानजीवना बभूवुः ॥

अथ सर्व्वसहगतसङ्गततया तत्रायाते व्रजनाथे यथायथं निखिलेषु च तेषु मिलितेषु स धीरधीः स्वपरेषामन्तराधिमन्तरितं विधातुं स्वाङ्गजातस्य मङ्गलं वचसि सङ्गमय्य विजयवृत्तान्तमेव वर्त्तयामास ॥

तदनन्तरमेव च तां तन्मन्त्रणामिति स्थिते कृष्णसुखैकसुखधियः सर्व्वेऽपि ते सुधियः प्रोचुः ।—

भवतु; स्वदुःखमपि सोढव्यं तदीहितं तु वोढव्यमिति ॥

अथ तत्र श्रीकृष्णस्य मातुरसहनमसहमानः स व्रजनरेशानस्तत्र विचित्रेषु कृष्णैकमित्रेषु तेषु तत्तत्प्रस्तोतृषु सतृष्णश्रोतृषु च सत्सु तां प्रति तां तत्पत्रिकां च केनचिद्वाचितामाचचार ॥

यथा ।—

"आद्येऽह्नि क्षीरभक्त"मित्यादिकं विस्मायनं सान्त्वनमिव च जातं । वाचितायां हि तस्या तदण्डमेकं गण्डयुगलं विस्तृतलोचनगलदुष्णशीतधाराभ्यामास्तृतमाचेरुः । किमुत सा माता ॥

ततश्च श्रीमानुपनन्दस्तानमन्दमुवाच ।—

यन्त्रणायामपि नास्माभिः स्वतन्त्रतया तन्मन्त्रणा-दन्यदाचरितव्यं । स हि बाल्यकल्प एव सत्य-सङ्कल्पः सर्व्वं पाल्यं चकार ॥

यत एव चास्माभिः शक्रयज्ञश्च सावज्ञः कृतः ॥

किं पुनरधुना ? तस्मादुत्थाय तत्कथनमभ्यर्थयितुं यथायथं सर्व्वैराचर्य्यतां ॥

यथा यथार्हवर्णादाकर्णयन्स सुखं प्राप्नोतीति ॥

तदेवं युक्तं तदुक्तमाकर्ण्य सर्व्वैरप्यवर्ण्यत ॥

व्रजस्य सम्यक्प्रीतिरियं तस्यागमनसामग्री भवति। तस्मात्तत्प्रीतिमद्भिस्तत्प्रीतिरेव सेवनीया । श्रूयते हि गोमूत्रयावकादिना स्वोदरम्भरीणां भरतादी-नामज्ञातवनाय चिरं गतस्यापि रघुनाथस्य तथैवा-गमनप्रतीक्षा ॥

अथ कथं वा त्रिलोकीविजयिदनुजव्रजविजयि-तयार्ज्जितं राज्यमपि व्रजमुद्दिश्य व्यक्तं त्यक्तवत-स्तस्य तु सा नास्माभिरादरणीया ।

कथं वा त्यक्तराज्यस्यापि तस्य स्वयमेव वशीभूत-सर्व्वाधिराज्यस्य गोपत्वधर्म्मलक्षणाय गवां रक्ष-णाय स्निग्धैरप्यस्माभिराकारणीयता रमणीयतां

वहतु । किन्तु झटिति गूढपत्रिकया तद्दुःखं विघट-यितव्यमिति ॥

अथ व्रजराजश्च व्याजहार ।—

भद्रं तन्मातरमापृच्छ्य यच्छत प्रत्युत्तरमिति ॥

तदेवं स्थिते तदाप्रच्छनपूर्व्वकं व्रजस्य व्रजराज्ञ्याश्च पत्रं यथा ।—

आज्ञायाते तथासीद्व्रजजलधिविधो !
सैव सर्व्वव्रजेन
त्वन्मात्रापि प्रकर्षादरचि न च चिरं
तत्र कोऽपि व्यधत्त
किन्तु प्राणाधिकोटिप्रतिममुखरुचे
नेत्रवृन्देन भूय-
स्त्वत्कान्तीनां दिदृक्षा चपलितगतिना
मन्यते जातु नैव ॥

सत्यं तत्तद्दिवसमनुते भोजनं तत्तदासी-
दित्थं चित्ते स्फुरति मम हा ! तत्र चामोन्न तृप्तिः ।
यस्मान्मोहादहह ! मयका पुत्र ! तत्पूरणाय
प्राप्तो नासीदवसर इति स्वान्तमन्तर्दुनोति ॥

इति ॥

अथ पूर्व्वं दुःखादेव साक्षात्किमप्यनिवेदितवता व्रजक्षितिभृता सम्प्रत्यानकदुन्दुभिं प्रति तदिदं पत्रं दत्तं ॥

सप्तमपुत्रार्पणमनु, नासीन्मयि भिन्नदृष्टिता यत्ते ।
तदयं चाष्टमपुत्रः, स्यात्तव तदिमौ समं पाल्यौ ॥

तदेवं विधाय वुद्धिसमृद्धा वृद्धाः श्रीव्रजराजादीन् नित्यकृत्यादिभिर्योजयित्वा भोजयित्वा च तदुपदेशसदेशरूपमेव सर्व्वे व्यवहरन्ति स्म ॥

तत्र तु यद्यप्यन्तर्व्वलिताघयस्तथापि तदेकस्फूर्त्तितया लब्धब्रह्मसमाधय इव संस्कारमात्रेण तत्तद्व्यवहारपात्रेहा व्यलोकयन्तेति कृतवर्णपदलोपितत्तद्विशेषवर्णनया ॥

साम्प्रतं तु पुनराकर्ण्यतां ।—

राजितयुष्मच्चक्षू,राजीवः सैष राजते व्रजप ! ।
कंसध्वान्तध्वंस,स्तद्वंशप्राच्यभूधरोत्तंसः ॥ इति ॥

अथ पशुपतिराज्ञी तं समानाय्य पुत्रं नमितशिरसमङ्के धारयन्ती चिराय निजनयनकुचाक्षिक्षीरधाराभिरेनं सपुलकमभिषिञ्चत्यञ्चितानन्दमासीत् ॥

तदेवं प्रातः कथायां कृतप्रथायां श्रीराधिका-माधव-सदसि स्निग्धकण्ठः कथयामास ।—

अथ वलानुजसन्देशं वलयन्नवलासु तासु त्वरित-तदागमनरहिततासंहिततद्विरहज्वालया सुतरा-मवलासु सुवलः समयं न सम्वलते स्म ॥

तत्र श्रीराधिकाया विरहज्वाला यथा ।—

वृत्तान्न पृच्छति वर्त्म पश्यति हरिं तत्रात्मतां मन्यते
तत्सर्व्वं मनुते मृषा वितनुते चीत्कारमुत्कम्पते ।
लालां मुञ्चति चेतनां विसृजति स्फाराट्टहासा नट-
त्येवं चेद्वृषभानुजाजनि तदा कुत्रास्ति सन्देश्यता ॥

अथ ।—

दृष्ट्वा कञ्चित्काकमायान्तमैन्द्रा-
दाशाभागात्पृच्छती तत्क्रमेण ।
राधालीनां मध्यमासादयन्ती
लब्धा[1]प्रान्तं कृष्णमित्रस्य[2] तस्य ॥

वीक्ष्यामूः सुवलं वलानुजसखं मूर्च्छामवापुश्चिरं
जाग्रत्यश्च चिराय नैव विविदुः पृच्छाम तं किंन्विति ।

(१) लब्धवती । (२) सुवलस्य ।

वृत्तं स्वस्तिमुखं च नादिषत ता

वाष्पाक्षतान्धीकृता-

स्तेन स्वेन तु वाचितं किमपि तं

श्रोत्रातिथिं चक्रिरे ॥

सत्यं सन्त्यज्य युष्मानित्यादिकं ॥

ततश्च स खलु श्रीकृष्णसखः सखीनामवधान-मात्मनि चित्वा प्रतिपत्रं याचित्वा तच्च प्रस्तत-दुक्तिभिरभ्यस्तं स्वाक्षरविन्यस्ततया भृत्वा पुन-र्निजपात्रिकान्तरन्तरितं कृत्वा सख्ये प्रस्थापया-मास ॥

तत्तु प्रतिपत्रं[१] यथा ।—

यत्सन्दिशसि वलानुज !

सम्प्रत्यपि मिलनमस्ति नस्त इति ।

तत्सर्व्वं तव मथुरा-

स्थितिविश्रुतिरस्मदान्वितं गिलति[२] ॥

इह निजमागमनं वा

यदसकृदस्तीति सन्दिशसि ।

सत्यं तात्प्रिय ! तदपि

भ्रमयति चित्तं मुहुस्त्वदन्तर्द्धिः ॥

---

(१) प्रत्युत्तरं । (१) अस्माभिः सह गिलतीत्यर्थः ।

एष्यसि सत्यं त्वमिह
व्रजजनतायाःसुखं दातुं ।
अपि यः क्षणामयकालः
स तु नः प्रति कल्पतेऽत्र कल्पाय[१]॥इति॥

अत्र श्रीराधासखीनां विशेषतयायं वाक्शेषः ।—

वैद्यास्तत्र वलन्ते, धन्वन्तरिवन्मधोः पुर्य्यां ।
उन्मादापस्मारज, मृतिहृतिकृतिकं
महौषधं पृष्टं ॥ इति ॥

तदेवं तासां तत्कथनं दुःखप्रथनमिति मत्वा समापयन् स्निग्धकण्ठः सोत्कराठमुवाच ।—

हरि हरि हरि विप्रलम्भलम्भं
कथित[२]मिदं प्रथितं स्वजूर्त्तयेऽपि[३] ।
मिलनमिह किल प्रशस्यतां न-
स्तव हरिणा हरिणाक्षि[४]! सौख्यकारि ॥

तदेवं रात्रिकथासत्रं प्रथयित्वा सर्व्वमपि सुखेन प्रथयित्वा कथकौ वासमासन्नौ ॥

ततश्च ।—

तदुदित[५]नववर्ष[६]राधिकामाधवाख्या-
वभिनववरवीरुद्रूरुहाग्र्यावुपेत्य ।

(१) श्लेषे प्रलयाय । (२) भावे निष्ठा ।
(३) स्वतापायापि । (४) राधे ! । (५) वचन ।
(६) वृष्टि ।

वलयिभुजलताभ्यां वाढमन्योन्यसक्तौ
प्रमदवनविलासं बिभ्रतौ दीव्यतः स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
व्रजेशव्रजप्रवेशः सप्तमं
पूरणम् ॥

अष्टमं पूरणम्

अथ प्रातः कथायां श्रीव्रजयुवराजविराजमान-व्रजराजसदसि लब्धप्रथायां मधुकण्ठः कथयामास(१) ॥

ततश्च तत्र स्वस्तिमुखे लब्धाभिमुखे रामरामानुजावत्रत्यवृत्तान्तमञ्चित्वा किञ्चिदत्रासमासामासतुः॥

तत्र जन्मारभ्य नासीदभ्यस्ततेति श्रीकृष्ण-रामयोर्देवकयां मातरीव याचनादिचरितमनालोक्य श्रीवसुदेवस्तया सह मन्त्रयामास ॥

रोहिण्यामेवानयोः पुत्रतया प्रणयो भवितेति ॥

अथानकदुन्दुभेः सनन्दनन्दनावुद्दिश्य दूतः सम्वलितवर्णाद्दूततया व्रजं सम्भूतवान् ॥

तत्र चास्तां नाम प्रशस्तिप्रचितं तत्तद्वचनं विवचितं पुनरिदमेव लक्षितं ॥

---

(१) कथ वर्णने ।

भवतां गमनसमये मयेदं नाधिनाधिगमितमासीत् । राममातुरागमनमत्र कामनीयमिति ॥

तदेतन्निशम्य तु श्रीरोहिणी व्याकुलतारोहिणी बभूव ॥

यथा ।—

आज्ञा पत्युर्दृढत्वाप्यथ नवसुतयो-
　　　　जातु हातुं न शक्या
सेयं गोविन्दमाता वत ! कथमिव वा
　　　　हेयतामाशु यातु ।
तस्मादेकैकनेत्राद्यवयवमपि चेद्भागमेकं तनोर्मे
पुर्य्यां जीवे न कुर्य्यादपरमिह विधि-
　　　　स्तर्हहं निस्तरेऽयं ॥

तदेवं तस्या वैमनस्यं व्यवस्यन्ती श्रीहरिमाता व्याहरति स्म ॥

तुभ्यं मह्यं च मन्ये विधिरदितवपुः
　　　　प्राणमप्येकमेव
प्रत्येकं पुत्रयुग्मं यदिह न भिदया
　　　　किञ्चिदालोकयावः ।

———

तस्माद्दुष्पुण्यता मे यदि न सविधतां
हा ! तयोः कर्त्तुमीष्टे
शिष्टे[१] ! रामाम्ब ! तर्हि स्वयमभिगमना-
देव मां जीवयाशु ॥

ततश्च सर्व्वाभिरनर्व्वाचीनाभिः कृष्णामातुर्म्मन्त्रणा-मेव युक्तिपरतन्त्रं क्रियते स्म ॥

कृत्वा च मुहूर्त्तज्ञेभ्यः शुभमुहूर्त्तं धृत्वा प्रतिस्वं समग्रीकृत[२]नानासामग्रीभिर्विशङ्कटशकटान् भृत्वा विस्रूरित[३]पूरितं भूरिदूरं तया सह सृत्वा सवाष्प-कण्ठं कण्ठं गृहीत्वा कथञ्चिदेव परिदेवनया तां हित्वा निववृते ॥

यत्र कृष्णाप्रसूर्निजप्रसूततत्प्रसूनयोः कृते कृते-प्सितस्तया वीप्सितान् भोगानुपभोगांश्च तस्यां समर्पितवती ॥

गद्गदयुक्तमुक्तवती च ॥

प्रतिलब्धभावकयोः[४]शावकयोर्वृत्तं निजेष्टसन्देश-[५]मुखमुखेन सन्देष्टव्यं । देवकीं प्रति मम च तदिदं निवेदयितव्यं ॥

---

(१) सम्बोधनं । (२) सम्पूर्णीकृत ।
(३) अनुतापो विसूरितामिति क्षीरः ।
(४) अकच् । (५) दूत ।

यथा ।—

आवकयोरभिदा[1] या, लोके सम्भाविता जाता ।
सम्प्रति सा प्रकटाभू, द्देवकीपुत्रेण तत्र यद्भेदः ॥

अथ[2] व्रजमात्रमनुस्मरत्स्फुरदतनुव्यसनमिदं हृदयं क्षुभ्यति ॥

ततः कृतं तन्निवृत्ति[3]वृत्तविस्तरेणेति विरम्य मधुकण्ठः समापनमिव प्राह स्म ।—

तदिदं कथनीयं स्यान्नैव वृत्तं व्रजेश्वर ! ।
यद्येष भवदुत्सङ्गसङ्गी दृश्येत नाधुना ॥

तदेवमानन्दितेषु व्रजवन्दितेषु स्निग्धकण्ठः पप्रच्छ ॥

अथ तत्र किं वृत्तं तत्कथ्यतां ? ॥

मधुकण्ठ उवाच ।—

रोहिण्याव्रजतः कृतागमनया गोविन्दरामौ यदा
वन्दित्वामिलतां तदास्फुरदसावुच्चैर्यशोदेत्यपि ।
स्फूर्त्तिः सा[4] च परं तयोर्मनसि न
　　　　　　स्वस्यापि तस्या[5] वभौ
प्रेम्णोरीतिरियं न वुद्धिविषयः
　　　　　　कस्यापि पश्याद्भुतं ॥

---

(१) अभेदः ।　　(२) कथकोक्तिरियं ।

(३) रोहिणीं प्रस्थाप्य या व्रजजननिवृत्तिः ।

(४) यशोदेति स्फूर्त्तिः ।　　(५) रोहिण्याः ।

रोहिणीचरणयोर्निपत्य च
स्वप्रसूस्फुरणवान् यदा हरिः ।
हा ! रुरोद स भृशं तदा च सा
रोदिति स्म कुररीव तन्मनाः(१) ॥
विश्लेषवासरपुरःसरजं चरित्रं
कृष्णो सवाष्पमनुशृण्वति तज्जनन्याः(२) ।
पप्रच्छ तामनु(३)वलस्तदुवाच सा च
स्वस्मिंस्तदेकमयतामनुभावयन्ती ॥

दिनान्तरे तु वलितपत्नीषु(४) सर्व्वासु सपत्नीषु तासां श्रीकृष्णस्य व्रजसम्वन्धमनभीप्सितमभीक्ष्य सा जगाद ।—

विश्वस्मिन् यः स्नेहनामा पदार्थः
श्रीमान्सोऽयं राजते गोष्ठ एव ।
तस्मिन्नुच्चैर्गोपराड्यामथासौ
पुत्रो वश्चेत्तत्प्रसङ्गे क्व दोषः ॥

तदेवमतृष्णां निशम्य तूष्णीकां सेवमानयो-र्वसुदेवदेवकयोरपरा हास्यपराः प्रोचुः ।—
गोपानां दधिदुग्धादिलुब्धमनसस्तव नायुक्तमिद-मुक्तं ।

(१) व्रजेश्वर्य्या मनाः । (२) यशोदायाः ।
(३) लक्षीकृत्य । (४) वलितो मिलितः पतिर्याभिः ।

तदेवं निशम्य सापि तेषां स्वमतमधिगम्य व्रजनृपतिपत्न्यां सानुतापं मनःसङ्क्रम्य मौनमेवाललम्बे ॥

अथानकदुन्दुभिप्रभृतिभिरनयोर्व्रतवन्धेऽपिकृतानुवन्धे व्रजवन्धूनामा नयनं सापि न प्रस्तुतवती ॥

रामकृष्णौ च तत्र सतृष्णावपि तेषां मनसि कर्म्मणि चान्यादृशतां सन्दृश्य व्रजदेशजानां तत्र क्लेशमपि परामृश्य प्रजामात्रनिमन्त्रणायामपि न तानामन्त्रयितुं मन्त्रितवन्तौ ॥

तदलमस्माकं तद्व्रतवन्धवर्णननिर्वन्धेन । किन्तु ततः पूर्व्वं सुदाममालाकारद्वारतः श्रीव्रजेन्द्रं प्रति श्रीव्रजेन्द्रनन्दनस्य पत्रमिदं श्रोत्रामृतपात्रतयावधीयतां ॥

तात ! श्वःप्रातरेते यदुनृपकुलजा यज्ञसूत्रेण पुत्रीकुर्य्युर्मां स्वार्थहेतोरहमपि तु वहि-

स्तांद्विदध्यां हृदान्यत् ।

ज्ञातीन्व वो द्रष्टुमेष्याम्यहमिति च यया

प्रागवोचं भवत्सु

स्वामेतां हन्त ! जिह्वां कथमितरदशां-

स्त्वत्तनूजः स कुर्य्यां ॥

मा क्रुद्धं मम यज्ञसूत्रकुतुकालाभेन निर्विण्णता-
मस्मिन्नस्मि तु युष्मदीयसुहृदामर्थाय वद्धप्रभः।
तस्मान्मत्तनुरूपमत्सवयसां गायत्रदीक्षामहः
सन्तत्य व्रजराज! तेन मम तत्पूर्णं स्वयं तन्यतां॥

इति॥

तदेतच्छ्रीमदुपनन्दनन्दप्रभृतयश्च तदानीमनुसन्दधते स्म॥

पूर्वमन्त्रणापरतन्त्रतया सञ्चितं तदिदमस्मासु तेन स्वयमुदासीनत्वं प्रपञ्चितं॥
तत्तद्विहितं पुनरस्मद्वैश्यजात्युचितमेवान्तश्चिन्तितं॥
तस्माद्वयमपि तत्प्रतिनिधीनामेषामन्तस्तदेकतया बहिस्त्वितरविवेकतया व्रतबन्धं सन्दधामेति॥

स्निग्धकण्ठ उवाच।—

तदनन्तरमन्तरं सन्तन्यतां॥

मधुकण्ठ उवाच।—

तत्र चात्र च जाते च द्विजातेरितव्रतजाते वेदवेदाङ्गाध्ययनायानयोरिच्छा जाता। जातायां तस्यामेतावजन(१)प्रचारमनुचरन्तौ तदिदं विचारितवन्तौ॥

---

(१) रहः।

अध्ययनं नाम गुरुकुलमध्यगमनपूर्व्वकमेव पूर्व्वसूरिभिर्विहितं ॥

तत्र यद्यपि गुरुयोग्याः पुरुमहिमानः कृष्णद्वैपायनादिनामानः सर्व्वतः प्रचरन्ति ।

तथापि त आवां स्वाभाविकज्ञानादिप्रभावावितिमत्वा सङ्कोचमेव रोचयिष्यन्ति ॥

ते हि परमवैष्णवा वैष्णवं तत्त्वमनुभविष्यन्त्येव। अध्येतव्यं चावाभ्यामवश्यमेव वश्यं । मर्य्यादालङ्घने खलु न लोकमङ्गलं मन्यामहे ॥

तस्याद्यः शब्दे ब्रह्मणि निष्णातः शैवश्च भवति स एव पुरु गुरूकर्त्तव्यः ॥

तथाविधाश्च पूर्व्वं काश्यपवंश्यतया शिवसेवका मध्ये मध्ये प्रभा सङ्क्रान्तः ।

सम्प्रति शिवान्तिकताशान्तमायामवन्तिकायां सान्दीपनिमहानुभावाः सन्तीति तत्रैव गन्तव्यं । किन्तु यथा नान्ये जानन्ति तथा । अन्यथावयोरतिदूरगतिकथायां लब्धप्रथायां यादवकुले शात्रवभव उपद्रवः स्यात् ॥

तथा श्रीमत्पितृप्रभृतिभृतिभुक्पर्य्यन्ताव्रजजनाश्च

देहभूर्ति न मंस्यन्ते । किमुत सम्प्रति प्रतिजन-
सन्तापसन्तानजननी साऽस्मज्जननी ॥

तदेवं ताभ्यां विचार्य्य यथोचितं यदुषु च सञ्चार्य्य
परान् प्रतार्य्य तदेव रचितं ।

तत्र चैकान्तनिशान्तविश्रान्ततया व्रतधारिणौ
तौ विराजेते इति च प्रतारणाकारणं विचारितं ।

अथ दूरं गुप्तश्च गमनं नान्यजनसङ्गमनमर्हतीति
तत्र दुःखदशारोहिणीषु वसुदेवदेवकीरोहिणीषु
श्रीकृष्णः प्राह स्म ।—

सङ्गश्चेन्मम रामोऽयं सङ्गिनां कोटिगणना ।
अहं चेदस्य सङ्गी स्यां सङ्गिनां न्यर्बुदं मतं ॥
तावावां भवदाशीर्भिः प्रभावमतुलङ्गतौ ।
गम्येव हि परीभावं येनासौ भुवने स कः ॥

तदेतन्निशम्य प्रथमौ तौ(१) प्रथमानतत्प्रभावभाव-
नया किञ्चिदाश्वासितयुक्तावास्तां श्रीव्रजेश्वरी-सखी
तु सा खिन्नैवासीदिति स्थितं गुरुकुलं प्रस्थितयो-
रनयोर्वृत्तं वृत्तं करवाम ॥

ब्राह्मणान् कतिचिदात्मसमर्म्मगां
स्तीर्थकारिजनवेषधारिणः ।

(१) देवकीवसुदेवौ ।

वर्त्मनि स्वमनुभैत्तदायका-
नाददे हरिरमीभि[1]रर्थितः॥
ब्रह्मचर्य्यमसमाप्तमित्यतो
नैव यानमुररीचकार यत्।
भ्रातृयुग्ममिदमिच्छमात्मनो
वीर्य्यमेव बहुयान[2]माददे॥

पश्यन्यश्यन् ग्राममङ्गान् विचित्रान्
कृष्णो रामेणोज्जयन्यै प्रतस्थे।
यस्मिन् यस्मिन् गोष्ठमायाति दृष्टिं
तस्मिंस्तम्भाद्दासमासज्य शश्वत्॥

ब्रह्मचार्य्युचितवेषधारिणा-
वित्यमू परिचितौ न केन च।
यद्यपि स्फुटमथापि तेजसा
लोचनानि विशतः स्म पश्यतां॥

तत्र च।—

राममजानन् ज्योतिः,
परमिह पान्थास्तदावन्त्याः[3]।
तिमिरं ज्योतिः किमत्र,त्यजिते दृष्टे तु सन्दिदिहुः॥

---

(२) वसुदेवादिभिः।

(१) यानतुल्यं। बहुत्व तद्धितः। (२) तद्धितोयमः।

यत्र यत्र पशुपेश्वरपत्नी
स्नेहशर्म्म[१] तदियाय घनाभं ।
तत्र तत्र नगरं विपिनं च
स्वान्तरार्द्र[२]मयतां समवाप ॥

कस्याः पुण्यवती शिखाग्रिममणोरङ्के विवृद्धिङ्गतः
कस्याः कान्तरुचिः स एव भविता
कान्तः कलाकोविदः[३] ।
एवं तत्र च तत्र चासकृदसौ नानाङ्गना तर्किता
धिन्वन् कर्णयुगं दधेऽथ पिदधे तत्तत्स्पृहाभीतितः ॥

अथ स्वविशेषसङ्गोपनाय साङ्गिभ्यो विच्छिद्य विद्यमानयोः सर्व्वविद्यानन्दिसान्दीपनिसभानिकटमटितयोरनयोरिदं तद्दीयसभ्यास्तर्कितवन्तः ॥

एकं प्रावृषिजं परं शरदिजं मेघं तदा मन्महे
यद्येतौ तिमिरापहौ न हरितां[४]स्यातां कुमारप्रभौ
सूर्य्याचन्द्रमसाविमाविति मनागुत्प्रेक्षितुं शक्नुमः
किन्त्वेकोऽसितकान्तिरेष त[५]दपा-
कृत्यात्र विभ्राजिते ॥

(१) श्रीकृष्णलक्ष्मणां ।
(२) आर्द्रपदं चर्म्मपरमपि । आर्द्रं सार्द्रमित्यमरकोषात् ।
(३) कस्याः सोऽयमुरोजयोर्निजकलामुल्लासयन् देविता इति वा पाठः ।
(४) दिशाम् । (५) उत्प्रेक्षणम् ।

ततश्च ।—

क्षौमं वस्त्रयुगं पवित्रक[1]मयं यज्ञोपवीतं तथा
मौर्व्वीं[2]मखलिकावलिं खादिरजं दण्डं रुरोश्चर्म्म च ।
धृत्वा क्षात्रियताविभावकतया सद्ब्रह्मचर्य्यान्विता-
वाचार्य्यस्य सभां स्वभावसुभगौ शुभ्रासितौ जग्मतुः ॥

सान्दीपनेः सदसि विप्रसहस्रदीप्ते
तस्मिंस्तदा विविशतुर्दनुजारिरामौ ।
ज्योतिर्गणाश्चि दिविषद्गुरुकान्तिकान्ते
यद्वद्विषज्य[3] सुरवर्त्मनि सूर्य्यचन्द्रौ ॥

ब्रह्मवर्च्चसमदान्नृपचिह्नौ
वीक्ष्य तावपि न ते यदुदस्थुः ।
तच्च युक्तमिव यन्महदग्रे
नोन्नतिः खलु भवेदितरेषां ॥

एषां तनुर्यद्यपि नानयोर्नता
ब्राह्मण्यगर्व्वं श्रयतामभूदिह ।
तथापि वाढं हृदयं द्रवात्मना
वाष्पीभवन्न्यञ्चि[4]दतयोर्द्युतिः ॥

ततश्च सन्दीपितभक्ति पाणिसन्दितसमिद्भिः

(१) शणसूत्रं पवित्रकम । (२) मूर्वातृणजातम ।
(३) मिलित्वा । (४) नीचं कृतवती ।

कृतपुरःस्थलसक्तौ सान्दीपनिं निजविद्यार्थिता-व्यञ्जनया वाचा रञ्जयन्तौ स्ववर्णगोत्रवर्णन-पूर्व्वं सितासिताविति नामव्याहरणेन चात्यपूर्व्वं ववन्दाते ॥

तद्व्यञ्जनं च ।—

श्रीमन्महाकुलजविप्रवतंसरत्न !
विद्यानिधे ! विहितवैदिकमर्म्मधर्म्म ! ।
अज्ञानदुःखविनिवर्त्तक ! दीनबन्धो !
त्रायस्व नौ स्वचरणं ! शरणं प्रपन्नौ ॥इति॥

स्वगोपनकृतेऽदातां नोपायनमनुत्तमं ।
किन्तु वन्यफलं चित्रं पवित्रं दूरसम्भवं ॥
गुरोर्विशेषसम्प्रश्नादाहतुस्तौ सनिह्नवं ।
जातौ वसुतया ख्यातादावां यादववंशजात् ॥

चातुर्य्यपि तयोरेषा तटस्थघटनां गता ।
यन्मोहनतया सर्व्वधुरीणत्वमुरीकृतं ॥
गुरुश्चाभिवदन् प्राह समयो न सुदुर्ल्लभः ।
ततः समयमन्वीक्ष्य स्थीयतां वत ! सुव्रतौ ! ॥

किन्तु प्रथमं तावद्भिक्षाशिक्षां सुशिक्षितैरमीभिः सम्प्रियतामानक्षातिपूर्व्वां कुर्व्वाथामिति ॥

तदेवमनुज्ञातौ यातौ च विधाय तत्रस्थान् प्रति तु गुरुर्जगाद ।—

स्निह्यति स्म मम चित्तमेतयो-
र्दर्शनात्तदनुमीयते स्फुटं ।
स्निग्धमध्यवसती[१] स्वजन्मना
स्नेहमात्रवहिरन्तरावम् ॥
युगलं तदिदं सितासितं
यदपि स्नेहमयं विरोचते ।
तदपि स्फुटमेतदूहते
मम बुद्धिर्ननु मूलमन्तिमं ॥
सामुद्रकेऽपि लिखितान्नरचिह्नसारा-
नेतावतीत्य महितावसितः सितश्च ।
तत्रापि चित्रमसिते स्फुरति प्रभा या
बुद्धिं विमोहयति सा वत ! मादृशाञ्च ॥इति॥

अथ दीदिवि[२]भिक्षागतेषु जीविकारूपावमू एवास्तां ॥

यत्र च ।—

एताभ्यां समवेताभ्यां नालभ्यं किञ्चिदस्ति यत् ।
तस्मादन्ये तु तद्भैक्षे जाताः सर्व्वेऽपि वाहकाः ॥

(१) स्नेहिषु स्थितावित्यर्थः । (२) भक्त ।

किन्तु ।—

विपरीतमभूदेतदनयोर्भिक्षमाणयोः ।
भिक्षितव्यजनास्तेऽपि यातास्तद्दृष्टिभिक्षुता ॥

तत्र तु ।—

मातृदृष्टिमकरोन्न केवलं युग्ममेतदिह दातृयौवते ।
किन्तु तच्च सुतदृष्टिमातनो-
त्तत्र दिव्यतरुणोऽपि साम्प्रतं ॥

किञ्च ।—

तत्र तत्र सर्व्वत्र भिक्षामकुरुतां यत्र सहचारिणां सब्रह्मचारिणां परिचयः प्रचरेदन्यत्र पुनरपचाराय स्यादिति सदाचारं यदा चरितवन्तौ त(१)न्निजसङ्गा-गतचराणां द्विजवराणां तदपरिचिततां व्यज्य परि-त्यज्यमानानां सङ्गोपनाय च सङ्गमयामासतुः ॥

तदेवमुपधया(२)परम्परावधारितया लब्धनिज-सम्मानाभ्यां दिनं दिनमाभ्यामुपचितं याचितं निजपुरतः समाचितमपि प्रसज्य स तु चतुरगुरुः श्रीकृष्णगुरुः पुरुकुतुकतया विभज्य तयोरेतयोरधि-कमनुरज्यते स्म ॥

---

(१) आचरणं । (२) धर्म्मादिना परीक्षया ।

अनुरज्य च सुकुमारौ ताविमौ कुमारौ न कर्म्म कारयति स्म ॥

तथापि भक्तिसमवेतौ तावेतौ तद्दृष्टिविप्रकृष्टतयातिनिकृष्टमपि कर्म्माकुरुतामेव ॥

अथ कदाचिद्गुरुपत्नी गुरुं पप्रच्छ ।—

भगवन् ! भवदन्तेवासिनामन्तः कतमः सद्भक्ततम इति ॥

स उवाच ।—

तावेतौ सितासितौ क्षत्रियसुतौ ॥

सा तु सस्मितमाह स्म ।—

अहन्तु काञ्चिदप्यनयोर्भवद्वरिवस्यां न पश्यामि ॥

स उवाच ।—

मया स्निग्धतया निषिध्यमानतामनुरुध्य न तौ प्रकटं किञ्चिद्‌घटयतः । किन्त्वप्रकटं घटयत एवेति लक्ष्यते ॥

तदेवं स्थिते कदाचिदकालवृष्टिदृष्टिमवष्टभ्य सा काष्ठघटनायामपराह्णदिष्टे कांश्चित्तदितरांश्छात्रानादिष्टवती ।—पुत्रकाः ! काष्ठं कुत्र लभ्यतामिति ॥

तेषु च समस्तेषु किञ्चन त्रस्तेषु तावेतौ तु तत्परम्परया निशमयामासतुः । निशम्य च पृथगेव

परमकाष्ठभक्तितया परमकाष्ठकृते विदूरकाष्ठां चलितयोस्तयोरेतयोरवलोकनेन ते चान्ये चपलमेव चलितवन्तः ॥

कृतप्रवेशे तु महागहनप्रदेशे लुप्तदृष्टिसृष्टिर्वृष्टिरायाता ॥

आयातायां तु तस्यां नान्ये किञ्चिदप्याश्रितुं चाशक्नुवन् । सितश्यामावमू तु चारूणि चारूणि दारूणि विचित्य कृतकृत्यतया तस्थतुः ॥

किन्तु रात्रिरागतेति न गृहयात्रिकतामवापतुरिति किं वहुना ! गोष्ठलोककर्णकष्टप्रदेनौष्ठस्पन्दनेनेति ।

एवं प्रोच्य शोच्यमानतदवसरं व्रजवासिप्रकरमधिगम्य क्षणं विरम्य कथकः प्रथयामास ॥

प्रातस्तु भ्रातः! सन्दीपितमन्युः सान्दीपनिः पत्नीं निन्दित्वा प्रातःक्रियामपि हित्वा धावित्वा तत्राजगाम ॥

यत्र सञ्चितदारू गुरुभक्तिकारू सङ्क्लेशेऽपि वेशे परमचारू सङ्गिनस्तान् सूचितनक्तमुदन्तौ परिहसन्तौ लसन्तौ च विद्येते ॥

तत्र सज्जति तु लताद्यावरणेन कृतस्तरणे[१] गुरुचरणे लज्जां लज्जतः स्म ॥

निजं नर्म्मरचनं वचनं गुरुभिस्तदाकर्णितमिति । कार्य्यं सद्यो न पर्य्याप्तमिति च ॥

ततश्चेमौ दत्तसुखचयाव्ववाङ्मुखतया नमस्कुर्व्वन्तौ परिष्वज्य रज्यमानतयानयोः सर्व्वविद्यास्फूर्त्ति- र्भवतादिति मनसि विविच्य समतिरिच्यमान- वाष्पामृतवितानधारयाभिषिच्य सकलकलापूर्णः स द्विजराजस्तूर्णं समावर्त्तन[२]मिव वर्त्तयामास ॥

तथापि तु मम प्राणाः पीड्यन्ते ॥

यतः ।—

विधि[३]र्यः सर्व्वत्राप्यशुभशुभकारीति विदितः
स येषां यन्मैत्री[४]मभिलषितपात्रीं वितनुते ।
शुको मुक्तोऽप्युच्चैः कवयति[५]ययो[६]र्यत्र[७] पितृता
तदीयप्राणोऽसावहह ! गुरवे दारु चितवान् ॥

तदास्तां प्रकृतं पुनरनुसरामः ॥

अथाचार्य्यः समिधः परेषां शिरसि सन्धार्य्य

---

(१) कृतावरणे । (२) कर्म्मविशेषं ।
(३) ब्रह्मा । (४) कृष्णसम्बन्धिनीं ।
(५) कबृ वर्णने । (६) पित्रोः ।
(७) रामकृष्णयोः ।

ताविमौ गृहमनुसार्य्य भार्य्यया सह पुरस्कार्य्यतां प्रापयामास । प्राप्य च सर्व्वमध्यापयामास ॥

तत्र तु, मित्रयु(१)स्वभावचित्रचरित्रस्य तस्य तदिदं सर्व्वमनः पवित्रं करोति ॥

यथा ।—

तस्मिन् सतीर्थशतकेषु समेषु कृष्णः
श्रीदाम-शर्म्मणि यदेष सुरज्यति स्म ।
गोष्ठस्थतन्निजसखाह्वय एव हेतु-
स्त्वस्मिन् यथा किल सुदामनि चार्जुने च ॥

अत्र चित्रतामत्रमन्यदपि मन्यतां । सत्यं तत्र स चान्ये च केचन ताभ्यामेताभ्यां सहाध्ययनायाध्यवसायं कृतवन्तः । किन्त्वध्यवसायमात्रेण किं भवतु ॥

तथा हि ।—

सत्यं वहवश्छात्राः
कृतगुरुयात्रा मुरारि-रामाभ्यां ।
किन्त्वधिगतिसध्वंसाः(२)
हंसाः किं स्युः सुपर्णसध्र्यञ्चः ॥

---

(१) मित्रयुर्मित्रवत्सलः इति त्रिकाण्डशेषः ।
(२) खाण्डसखाना इत्यर्थः ।

अनूचानान्[1]समावृत्ता[2]नपि सब्रह्मचारिणौ[3] ।
विजिग्याते रामकृष्णावपि प्राथमकल्पिकौ[4] ॥
सकृन्निगदनादेतौ साङ्गान् वेदानधीयतुः[5] ।
तुष्टुवाते सुष्टु सर्व्वैरसकृन्निगदेन तु ॥
अहोरात्रैः षष्ट्या चतुरधिकया तत्परिमिताः
कलाश्चित्तस्यान्तर्निदधतुरमू[6]श्चित्रवदमू[7] ।
यतश्चित्तं विश्वस्य च वलितचित्रं समभव-
न्न यद्वोढुं शक्तः समजनि तदा तद्गुरुरपि ॥
सान्दीपनेरधीतं, हरि-रामाभ्यामिति ख्यातं ।
सान्दीपनिस्तु ताभ्यां,श्रममपहृतवान् वहुत्र विद्यासु ॥

तदेवं तत्रापि सर्व्वविशिष्टतया प्रतिष्ठितयोरपि तयोरेतयोरन्तर्वृत्तिविशेषं वर्णयिष्यामः ॥

गुरोर्व्वासे तस्मिन्निशि निशि हरिः स्वाग्रजमनु
व्रजस्थानां वार्त्तां कथयति सवाष्पं शयनके ।

---

(१) अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
(२) लब्धानुज्ञः समावृत्तः ।
(३) एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ।
(४) अध्ययने प्रवृत्तौ ।
(५) ज्ञनगतौ अधिजग्मतुः ।
(६) कलाः ।　　(७) वलकृष्णौ ।

तथैव स्वप्ने यत् प्रतिपदमसौ जल्पतितरा-
मदः स्मारं स्मारं ज्वलति मम हा ! हृज्जलरुहं ॥

यथा ।—

भ्रातर्माथुरलोकवृत्तकथनं यत्तान्मनस्यानये
विस्मर्त्तुं व्रजवृत्तमत्र वलते तत्प्रत्युत स्मारकं ।
माता[1]मातर[2]मादधाति पितरं चित्तेऽपि ता वन्धुता
वन्धून मे करवाणि किं वत ! मया
कालः कथं क्षिप्यतां ॥

इदानीं माता मां स्मरति शयनाद्भ्रंशितवपुः
पिता तद्वत्किन्तु प्रसजति मिथस्तन्न मिथुनं ।
ज्वलत्युच्चैर्वह्नौ निजवपुषि को वा सखिजनं
परिष्वक्तुं हा ! धिक् प्रतनमिह तस्यापि लषति ॥
मातापस्तु पितापस्तु सखायः सन्तु दूरतः ।
गोष्ठं वनं च तत्सर्व्वं दन्दग्धि हृदयं मम ॥इति॥

तदेवं स्थिते तत्र सङ्कर्षणस्तु सवाष्पवर्षं सान्त्वयति ॥

भ्रातर्म्मम सर्व्वं विहायार्व्वागेव तत्र प्रकटमटितुमिच्छा । भवानेव तु सङ्कोचं रोचयमानस्तत्र स्थगितायते ॥

---

(१) देवकी ।　　(२) यशोदां ।

तदेवमप्यापाततः सान्त्वनाय किमपि तेषु स्वयं स्मर्य्यमाणामपि विस्मर्य्यमाणां करोषि ॥

यत् खलु तेषु मात्रादिषु मुहुरतिमात्रं यात्रां विनापि प्रत्यक्षपात्रायसे ॥

श्रीकृष्ण उवाच ।—

आं आं सत्यं सत्यं; तथापि तेषां तत्तन्मुहुः स्वप्नायमानतामाप्नुवन्मम च तद्रूपतया भाति किं कुर्य्यामिति ॥

तदेवं भ्रातृद्वयं सवाष्पं व्यतिषज्य निद्रातीत्यलमतिबिस्तरेण ॥

यतः ।—

प्रत्यक्षकल्प(१)मासीद्यत्प्रत्यक्षं तदिहेक्ष्यताम् ।
कृष्णः सोऽयं भवान् सोऽयं सभायां हि व्रजाधिप ! ॥

तदेवं तान् सन्तोष्य त्रियामाकथया श्रीकान्तलाभेन सुखाधिकाराधिकादिकाश्च पोष्यन्ते स्म ॥

यथा मधुकण्ठः प्राह ।—

अथ व्रजनागरीणामनुरागसागरः स(२) एष जागरानन्तरमिदं पराममर्श ।

---

(१) तुल्यं ।　　(२) श्रीकृष्णः ।

स्वप्नः सोऽयं समन्तात् किमथ वत ! मया
रासतुल्योऽभिदृष्टः
स्वप्नो नायं मदङ्गं परिमलवलितं
येन गोपाङ्गनानां ।
हा ! धिग्मे ब्रह्मचर्य्यं विगलितमथवा
बुद्धिपूर्व्वं तदेत-
न्न स्यादस्मान्न दोषः स्वविरहदहना-
त्प्रत्युतामूस्तरन्ति ॥

वस्तुतश्च मत्प्राणसपर्य्यायाभि[1]स्ताभिः परिचर्य्यया ब्रह्मचर्य्यं न पर्य्यय[2]मर्ज्जयतीति तापनीदर्शिना महर्षिणापि निरूपितमस्तीति ॥

तदेतावन्मात्रपात्रं रात्रिकथाप्रापणं समापयन् मधुकण्ठः प्राह ।—

सोऽयं राधे ! भवत्प्राण इति सत्यं भवन्मतं ।
तस्माद्गतागतं कुर्व्वन्नैष दोषेण दृश्यतां ॥

तदेवं तामपि कारितकृष्णप्रत्यक्षतासुखलक्षतया भासयित्वा कथकयुग्मं तद्यथायथं सर्व्वेण सह स्वावसथं जगाम ॥

---

(१) समानपर्य्यायाभिः । (२) पर्य्ययस्तु विपर्य्ययं ।

तया सह माधवस्तु महसा विलासनिलयं विराजयामास ॥

इति श्रीमदुत्तरगोपालचम्पूमन्वध्ययनस्पष्टप्रतिष्ठमष्टमं
पूरणम् ॥

———

नवमं पूरणम्

अथ श्रीकृष्णप्रकाशलब्धवरिमणि व्रजराजपदसीमनि कथा ॥

यथा स्निग्धकण्ठः प्राह ।—

तदेवं कलाकलापवलिताङ्गेषु वेदवेदाङ्गेषु साङ्गेषु तयोरेतयोः समावर्त्तनं गुरुर्वर्त्तयामास ॥

यत्र तत्पुरवासिनः सर्व्वेऽपि तत्पर्व्वेहमानाः समुदित्य प्रशस्तवस्त्रालङ्कारान्समुच्चित्य तैर्दित्यपत्यरिपुरामा(१)वद्योतयन्त ॥

अथानयोरक्षीणां दक्षिणां दातुं भाववतोर्महाप्रभाववतोः कृतकार्य्यः स वेदाचार्य्यस्तन्निर्धार्य्य पत्नीमन्त्रणया सपत्नीभूय जलधिलीनचरं निजकुमारवरं परं याचितवान् ॥

तच्च निशम्य स एष रम्यस्वभावः सम्यगेव शर्म्म सङ्गम्य सकलकलानिधिस्तव कुलकलानिधि-

---

(१) कृष्णरामौ ।

निवेदितवान् । महतः किल शीलमीदृशं कृतपूर्व्व्यप्युपकृत्य लज्जते ॥

अपि भृत्यजनादलम्भृतान्निजसेवामयमीषदिच्छति ॥

वात्सल्यतः परं देव-कीर्त्तिं नौ दातुमिच्छसि ।
परन्तु भवता दत्ता विद्या सर्व्वं करिष्यति ॥

ततश्च ।—

गुरुयुगमभिवाद्य तन्महत्त्वं
जननिचयेऽधिगमय्य विद्यया तौ ।
दिविजमिव शताङ्गमङ्ग(१) साङ्गं
विदधतुरादधतुः स्वमत्र चाशु ॥

अथ तथा गुरोरादेशतः प्रभासदेशसदेशसमुद्रं सरणमनुद्रवन्तौ रामकृष्णाख्यावन्तौ सारथिरथिनौ सन्तौ लवत एव गतवन्तौ । गत्वा च तस्य प्रथमप्रथमानदर्शनतः सकुतुकं परामर्शमीयतुस्तरां ॥

अहो ! घनरसानां विस्ताराकारः सोऽयमकूपारः पश्यतां चक्षूंषि विस्तारयति । अस्मदवलोकनतः शर्म्मवानिव च कर्म्मवानवलोकयते ॥

पतस्तरङ्गसङ्घरिङ्गणया समालिङ्गनायाभिगच्छन्निव॥

---

(१) पुनः ।

पिण्डीभूतडिण्डीरमण्डलीमण्डिततया स्मयमान इव ॥

कृतमकराकारनासिकावारप्रसारणतया शश्वदाजिघ्रन्निव ॥

समुच्छलत्कच्छपाक्षिलक्षलक्षितया लक्षयन्निव ॥

पर्ज्जन्यकोटिगर्जितचर्य्यतासम्यगर्ज्जितनादतया वादयन्निव ॥

तत्तदुच्चावचभावप्रचयप्रचितावयवतया नृत्यन्निव ॥

जितसर्व्वसपत्नप्रत्न[1] नृपप्रयत्नदुर्लभरत्नव्याजनिजावर्त्ताञ्जलितया वलिमुपहरन्निव च निरूप्यते ॥ इति ॥

तदेवमुत्प्रेक्ष्य प्रेक्षमाणयोरनयोरमूदृशतया साक्षादेव देवशरीरः सन् नीरधिरसौ प्रेक्ष्यते स्म ॥

प्रेक्ष्यमाणश्चायं प्रणमन् सज्जिताञ्जलितया सगद्गदं जगाद ॥

वरुणः खलु करुणतया मामिदमुपदिदेश ॥

भवति[2] भवाल्लवणाब्धि,र्भवन्ति चेक्षुद्रवाब्धिमुख्यास्ते ।

---

(१) पुरातन । (२) अस्ति ।

पारावारविहीनः, कृष्णः पुनरेक एव करुणाब्धिः॥ इति ॥ तल्लक्षणस्तु भवानेव लक्ष्यते ॥

यस्यायमग्रजश्च सावयवयशःप्रचय इव विराजते । तस्मादाज्ञां कुरुध्वं किङ्करस्य किङ्करोऽयं किङ्कुरुतादिति ॥

श्रीकृष्ण उवाच ।—

अस्माकं गुरुपुत्रस्य कुत्र गात्रलवमात्रं वर्त्तते तदुद्दिश्यतां ॥

समुद्र उवाच ।—

भवच्चरणनखरशिखरावलेरञ्चलं शिरसा निर्म्मञ्छयामि ॥

स तूदरकलेवरपञ्चजनोदरमञ्चन्नासीत् । यदि कदाचिदद्य च विद्यते ॥

श्रीकृष्ण उवाच ।—

यद्यनुज्ञाप्यते भवता तदा तं तस्मान्निर्यापयामः ॥

समुद्र उवाच ।—

इतस्ततनं मम कथनं सहमहासाहसं धृष्टतापरामृष्टं स्यात् । किन्तु यथेच्छा महेच्छानां ॥

अथ श्रीकृष्णः स्वाग्रजं व्याजहार ।—

आर्य्यचरणाः! स्वयं रथमनुस्थितिं प्रथयन्त्विति ॥

तदेवं प्रोच्य किञ्चिदप्यननुशोच्य वार्द्धिना सार्द्धं वार्द्धिमवगाह्य तस्य कम्बुभूपतेर्वसतेरवाह्यदेशं विवेश ॥

स तु पञ्चजनः प्राचीनगीर्णपञ्चजन(१)वालकमिव तमालोकत ॥

कृष्णाश्चान्वाचयतस्तस्याङ्गसञ्चयनाय सतृष्णा आसीत् ॥

तदेवं सति वकासुरवृत्तमेव तत्र वृत्तमिति किं वहुना ॥

किन्त्वयमेव विशेषः । तस्योदरचरचरं(२)तं कुमार-वरमदरं(३)विचिन्वन् दर च न तदङ्गमवाप तं तु निजदरं(४)चकारेति ॥

अवन्तीखण्डे त्वेवमाह ।—

ततः पञ्चजनं हत्वा ग्राहरूपं महासुरं ।
तन्मध्यस्थं स जग्राह शङ्खं ग्रस्तं हि यत्पुरा ॥ इति ॥

अथ निजाग्रजसंदेशं प्रविशन्नुवाच ।—

आर्य्य ! तत्कलेवरकलापि कलिता । तस्माद्यत्र तज्जीवस्तत्र गन्तव्यं ॥

---

(१) मनुष्य ।　(२) तद्धितं ।
(३) निर्भयं ।　(४) शङ्खं ।

राम उवाच ।—

यथादिशन्ति भवन्त इति ॥

ततश्च समुद्रदर्शितेन पथा रुद्रकोटिर्यथा तथा वीर्थं प्रकीर्य्य यममपि संयन्तुं संयमनीमगमतां ।

किन्तु दूरतः क्रूरकेङ्कारपूरमाकर्णितवन्तौ । अदूरतस्तु तत्कारणमपि निर्व्वाणं निर्व्वर्णितवन्तौ ।

शङ्खप्रध्वानानन्तरं ह्यवन्तीखण्डे तदिदं वर्ण्यते ।

तेन शब्देन वित्रस्ताः कृतान्तालयवासिनः ।
नरकान्तर्गता मर्त्याः पापाचारपरायणाः ॥

सुखमापुः प्रशान्ताश्च वह्नयः कृष्णदर्शनात् ।
शस्त्राणि कुण्ठतां प्रापुर्यन्त्राणि विविधानि च ॥

विदीर्णानि तदा व्यास ! वासुदेवस्य दर्शनात् ।
असिपत्रवनं नाम शान्तपत्रमजायत ॥

रौरवं नामनरकमरौरवमभूत्तदा ।
अभैरवं भैरवाख्यं कुम्भीपाकमपाचकं ॥

शृङ्गाटकमशृङ्गाटं लोहसूच्यप्यसूचितां ।
जगाम जगतामीशे प्राप्ते तत्र जनार्द्दने ॥

दुस्तरा सुतरा जाता तदा वैतरणी नृणां ।
नरकान्ते तदा याते तत्र विश्वेश्वरे विभौ ॥

पापक्षयात्ततः सर्व्वे विमुक्ता नारका नराः ।
पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोपहं ॥
विमानायुतसाहस्रैरारूढास्ते समन्ततः ।
समीक्ष्य पुण्डरीकाक्षं मुक्तास्ते सर्व्वपातकात् ॥
ततः शून्यं मुने ! जातं सर्व्वं निरयमण्डलं ।
दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिणः ॥इति॥

तदेवं कथयंस्तस्य स्वयं भगवत्त्वं शुद्धपितृत्वादिभावेषु श्रीव्रजेश्वरादिमहानुभावेषु वासुदेवस्य दर्शनादित्यादिवचनेषु नामान्तराणि विन्यस्य गोपयन् कथकः प्रथयामास ॥

तदेवमेव श्रीगर्गेण दर्शितं ।—

"तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणै"रिति ॥

प्रस्तुतमनुसरामः ।—

अथ यदेतज्जातं धर्म्मराजस्तु तच्छुम्र्मतया मतवान् । परमकरुणामयस्य व्रजधरणीशतनयस्य पुरतः स्वदारुणतावारणतः ॥

अथाजस्रस्रवदस्रकुलं विपुलपुलकसङ्कुलं कम्पस्तम्भगद्गदवशम्वदगदनं स्वेदसम्भेदसदनं कृतागमनं मुहुर्विहितनमनं शमनं विलोक्य श्लोक्यचरितः सोऽयमन्तश्चिन्तयामास ॥

अहो ! महाभागवतोऽयमीक्ष्यते
दुरात्मतामुष्य कथं निशम्यते ।
युक्ताथवा रीतिरियं मदग्रतः
पापाग्रतः सा च गुणा हि सङ्गजाः ॥

अथवा ।—

शरणान्मदमून् वहिर्मुखान्
विषयार्थं दुरितान्यपीप्सतः ।
मम सम्मुखितान् विभावयन्
कृपया भीषयते मुहुर्यमः ॥

तदेवं विचार्य्य कृतावलोचने कमललोचने यमः समभाषत ।—

कारुण्यं त्वयि किल पारशून्यमास्ते
क्रूरात्मन्यपि मयि ते कथं नु दृष्टिः ।
किम्वासावपि करुणाविलास एव
भ्रष्टानां यदसकृदुद्धृतिं स(१) वष्टि ॥

भवति नरकशान्तिर्यस्य नाम्नापि तस्या-
गमनमिह न तु स्यान्नारकोत्तारणाय ।
किमपि किल निदेश्यं तत्तव स्यादितीत्थं
विमृशदतिसुखान्तर्मज्जति स्वं मदीयं ॥

(१) कृपाविलासः ।

अथ श्रीकृष्णः प्राह ।—

मोचनं न खलु भोगमन्तरा-
रब्धकर्म्म-निचयादिति स्थितिः ।
कामये तदपि शासनाद्गुरो-
स्तत्तनूजतनुमोचनं ततः[१] ॥

आचार्य्याणां पुत्रः, स तु मम भवता पुरानीतः ।
आनीयतां मदाज्ञा, दरतस्तव नात्र कर्म्मलङ्घः स्यात् ॥

यम उवाच ।—

प्रभुवर ! यत्र तस्य तत्पुत्रता तद्गात्रं नष्टमेव । गात्रान्तरशीवास्माभिर्जीवानां यात्रा क्रियते ॥ सम्प्रति च स्वर्गं गच्छतां नारकवर्गाणां मध्याद-वशिष्टस्य क्लिष्टस्य तस्य भृशमनच्छंदिष्टं[२] वितर्क्य रक्षितस्य यदाज्ञापयन्ति प्राज्ञानां शिरोमणयस्तदेव कर्त्तव्यं ॥

श्रीकृष्ण उवाच ।—

अव्याजमेव व्याजहार धर्म्मराजः । मयाप्येतद्विचार्य्य पञ्चजनदेहं विदार्य्य तत्कलेवरलेशलब्धये ऽभिनिवेशः कृतः ॥

---

(१) आरब्धात् । (२) मलिनभाग्यं ।

तमेव लेशं पेशलशरीरं विधाय जीवयिष्यामीति ॥

अथ तदलाभादेव परेतनरदेवस्य तत्र भवनमागमं । भवतु भवता तावद्ययावदेव स समानीयतां ।

यम उवाच ।—

साम्प्रतिकेन प्रतीकेन तस्य पित्रोः प्रतीतिः प्रीतिश्च न स्यादिति यदि भवदादेशः सम्पद्यते तर्हि प्राचीनवदर्हितवपुषा तमानयानि । प्रागवपुर्न पुनरस्माकं विषयतामाप्नोतीति ॥

श्रीकृष्ण उवाच ।—

भद्रं भद्रं, पञ्चतां गतानि तद्वपुरश्चितानि पञ्चभूतानि तत्रैव सञ्चितानि भविष्यन्ति ॥

यम उवाच ।—

यथादिशन्ति श्रीमदीशचरणा इति ॥

अथ तदेतन्निवेद्य सुखं सम्वेद्य च निजान्तर्वेद्यामनुगम्य पुनरागम्य च प्राचीनरम्यतनुमनुगतं तं दर्शयामास ॥

दृष्टमात्रं तमानन्देन निजतनावमातृभ्यां मातृभ्यां भ्रातृभ्यामालिङ्ग्य, पुनः पुनरभीक्ष्णमाणमुखं

वीक्ष्य स खलु धर्म्मराजः सभयमर्म्मतया स्तब्ध इवासीत् ॥

त्वरातश्चानुज्ञामनुयाचमानं नरकशमननामानं प्रत्याह स्म ।—

न त्वं गुरोः सुतकृते भगवन्निहागाः
स्वेच्छैव ते रचयितुं निखिलानपीष्टं ।
तस्मात्परं मयि दयारचितेति मन्ये
तच्चेन्ममापि नुद नारकसङ्गमीश ! ॥

इति काकुभिराहृत्य त्रयमप्यलङ्कृत्य बलिमुपहृत्य दूरमनुसृत्य तदनुज्ञामधिकृत्य प्रमाणानुररीकृत्य कृतकृत्यम्मन्यः स्वभृत्यजनैः सह नृत्यन्निव परेतनृपतिर्गृहं गतवान् ॥

स तु गुरुकुमारस्तामिममनयो रूपसारं स्नेहवारं मधुरवचःप्राचारं तत्कृपाधीननिजप्राचीनतत्तदवस्थासंस्कारसञ्चारं चावकलय्य प्रमदमहसि पर्य्यवस्यन्नमू एव तथा शश्वत्पश्यति स्म ।

यथा गृहपथान्तःप्रथमानं रथद्रवमपि नावगच्छति स्म ॥

तदेवं यदा सोऽयं व्रजेन्द्रकुलचन्द्रमा भ्रातृभ्यां सह गुरुगृहमभ्यागतवान् । तदा गुरुदम्पती इति मात्रं किं वचनस्य पात्रमितव्यं ।

सर्व्वे एव तत्पुरवासिनः सवैयग्र्यं तद्वर्त्माग्रमात्रासिन[1] हलहलध्वनिना वितर्कप्रकाशिनः स्वमध्यवलिततद्बालकपालकवलगोपालावलोकनेन परमानन्दभासिनः कोलाहलं कलयामासुः ।

बलगोपालौ तु रथादवप्लुत्य गुरुबालकं पुरस्कृत्य परममादृत्य तेन समं लब्धसुखसम्पत्योराचार्य्यदम्पत्योः पदाग्रे निपत्य क्षणं विललम्बाते ॥

गुरू तु पुरु रुदन्तौ त्रयमपि निजनिजभुजाभ्यां रुन्धन्तौ नहीदं विविदतुः ।

तदन्यदपि धन्यमधन्यं वा किञ्चिदस्तीति ॥

तदेवं परमावेशमये क्षणकतिपये गते सर्व्वेषां मतेन परममङ्गलशतेन तान् गृहमेव ग्राहयामासतुः । ग्राहयित्वा च भोजनादिना सुखं योजयामासतुः ॥

श्रीकृष्णरामौ च तत्र तत्र लाभाद्वलितयत्नानि रत्नानि रथादानीय चानुनीय च तयोरङ्गीकारायोपयोजयामासतुः ॥

तदेवं सति लब्धतादृगादराभ्रेषयोः[2] महागतचरा ये माथुरविप्रवरास्तद्द्वारा च कलितविशेषयो-

---

(१) आस उपवेशने । (१) अभ्रेषो न्यायः ।

श्चरितकंसद्वेषयोरनयोर्दर्शनाय दिवसत्रयं तत्र-कीयलोकाः सङ्घट्टं घटयामासुः ॥

यथा ।—

नराणां तत्रौघे जलधितुलया सम्प्लवमिते
न पूर्व्वं नापूर्व्वं कलयितुमभूद्गुर्व्वनुजनः ।
परं तुल्लोला[1]भं भुजवलयमेषां झषनिभं
तथा नेत्रस्तोमं प्रतिविधु[2]लसन्तं समसजत् ॥

यत्रावन्त्यश्च नृपतिः सन्देहं सन्त्यज्य व्यज्यमानपितृष्वसृपतितास्नेहं द्वावपि स्वगेहं नीत्वार्य्यचरितः सभार्य्यः सबहुमानं मानयामास ॥

अथ माथुरपुरमनुगमनमनुज्ञापयितुं याचमानयोरनयोराचार्य्यः सगद्गदं जगाद ॥

आत्मा स्निह्यति मे स्वतो युवकयोर्वुद्धिः सुतप्रापणां
तत्रोपाधिविधिं विधाय तमपत्रपं करोत्युच्चकैः ।
तस्माद् यादवकौ युवामनुजनुः[3]
शिष्यौ च पुत्रौ च तौ
भूयास्तं किमु वा गुरू च पितरौ
चैवं समभ्यर्थये ॥

---

(१) कल्लोल । (२) कृष्णाभिमुख्यन ।
(३) प्रतिजन्म ।

तावूचतुः ।—

भवताधियया चद्धौ कृतावावां यदि प्रभो ! ।
तदा भवत एवेच्छा कारणं दुर्निवारणं ॥

तदेवं बाष्पार्द्रवदनतया स्वकृताभिवादनतत्कृताभिवदनाभ्यां लब्धचिरताविलविलम्बौ यदा कथञ्चिन्निजप्रस्थानपथावलम्बौ तदापि ताभ्यां सहितनृपतिसर्व्वलोकसाहिताभ्यामनुव्रजनचर्य्यया मध्ये मध्ये कृतस्तम्भौ कथञ्चन कृतराजानुव्रजनविष्कम्भौ दूरानुव्राजिपुरुजनराजिराजिगुरुगुरुपत्नी गुरुपुत्रछात्रादिभिः सह सहसा वियोक्तुमप्राप्तारम्भौ कृच्छ्रादेव तावन्तर्ग्रामादनन्त(१ र्भागमागतौ ।

अथ जनराजिं निवर्त्तयन्तौ मधुरमेवं व्याहरतां ॥

देहस्य नौ माथुरधामजन्मभू-
र्गुणावलेः सेयमवन्तिकापुरी ।
तन्माथुरस्थानिव वः समन्ततः
सन्द्रष्टुमावन्त्यजनान्मनः स्थितं ॥ इति ॥

यत्र च सर्व्व एवेदं सगद्गदं जगदुः ।—

भिक्षूणां मनसि यदस्ति लोभ्यवस्तु
स्वनादस्तदनुमतं यदीश्वरेण ।

---

(१) बहिः ।

वैदुष्यं कियदनुवर्ण्यमीशितुस्त-
द्भिक्षाकेष्वपि सुकृतं कति प्रगेयं ॥

तदेवं तेषां प्रतिपाद्यं सार्द्रमास्वाद्य गुरुदम्पती पुनः स्नेहात्कृतानुगती चरणपरामर्शादिभिः सद्म-वर्त्मने निष्पाद्य दूरमनुगच्छतः स्वगुरुपुत्रछात्रा-दीनपि प्रेममात्रगम्यरम्यसम्वादसङ्गिमुहुःपरिष्वङ्गि-तया निवर्त्तनाय सम्पाद्य राजप्रस्थापितानुव्राजि-सेनाराजिमपसाद्य रथं पन्थानमुपसाद्य तमेव सहागतवरपुरोहितैः सहासाद्य तद्वेगेण वायुमनु-हरन्तौ दिव्यादिव्यजनानां मनोहरन्तौ मधुपुरी-मभि नातिदूरीवभूवतुः ॥

तथा भूत्वा च रथमास्थाप्य तान् पुरोहितान् प्रस्थाप्य पित्रादीनामाज्ञामाज्ञातुं मुहूर्त्तं विश-श्रमतुः ।

ततश्च यादवास्तेभ्यो विशेषं साश्चर्य्यतया विज्ञाय श्रीमदानकदुन्दुभिं मध्ये विधाय वैदिकलौकिक-मङ्गलकोलाहलैरिमौ पुरमापयामासुः ॥

लोकाश्च विविधास्तदालोकाय तत्र च तत्र तत्र विद्यायां विदुरास्तयोस्तत्तद्विद्याचतुरताचातुरक्ष्याय(१) समागम्य रम्यं सुखमन्वहमवापुरिति ॥

(१) साक्षात्काराय ।

तदेवं स्निग्धकण्ठः कथयित्वा समापनमाह स्म ।—

यत्र यत्र तव वंशचन्द्रमाः
सोऽयमेति वत ! गोपनायक ! ।
तत्र तत्र कुमुदं विकासयन्
द्यां निजद्युतिभिरश्नुते(१)मुहुः ॥

अथ श्रीगोपनायकः सगद्गदं जगाद ।—

क च यदि पुरुयुद्धा राज्यमाप्नोति पुत्र-
स्तदपि यदि च मत्वा तुच्छमायाति गेहं ।
सुखमुदयति पित्रोस्तत्र सत्यं तथापि
भवगामिह यदा यर्त्तर्हि तादृग्मनः स्यात् ॥

इति श्रीकृष्णं नवागमनमिव तृष्णाग्भवन्नालिङ्गन-सङ्गिनं विधाय तच्छिरसि चिवुकं निधाय रोच-मानलोचनतया वाष्पं मुमोच ।

तं मुञ्चति तस्मिन् सर्व्वोऽपि तादृगेव दृगेकतानता-माततान ।

तत्र च व्रजबन्दिनस्तदिदं पठन्तः सर्व्वं नटयन्त इव वभूवुः ॥

---

(१) व्याप्नोति ।

यथा ।—

सहभ्रातृवर्य्यं गुरोर्ग्राममगामी ।
धृतब्रह्मचर्य्यं निजाधीतिकामी ॥
तदावन्तिकायां जवाल्लब्धसङ्गः ।
गुरोरन्तिकायां(१)सभायां सदङ्गः ॥
समस्तेषु सत्त्वेषु चासीदतीव ।
प्रियः सर्व्वतरत्वेषु(२) यद्वत्तु जीवः ॥
समस्मा(३)द्विविक्तं गुरोर्भक्तिकारी ।
सवर्गातिरिक्तं समित्पत्रहारी ॥
गुरोरित्थमाप्तप्रसादातिरेकः ।
स्वधीयन् समाप्तव्रतान्ताभिषेकः ॥
गुरोर्दक्षिणाशां द्रुतं भर्त्तुमीप्सुः ।
गतो दक्षिणाशां सुतं तस्य लिप्सुः ॥
दरग्रस्तमेतं विचिन्वन् दरान्तः ।
चिरान्नाशमेतं विजानन्नशान्तः ॥
प्रगृह्याथ तस्माद्दरं पाञ्चजन्यं ।
अवादीदकस्मात्तदैत्याग्रजन्यं ॥

---

(१) निकटवर्त्तिन्यां। (२) महदादिषु।
(३) सर्व्वस्मात्।

स्थले धर्म्मराजः(१) प्रतस्थेऽतितूर्णं ।
ततः शर्म्मभाजः सुखं प्राप पूर्णं ॥
यदा तारकाणां पति(२ स्तत्र यातः(३) ।
तदा नारकाणामभूत्तापघातः ॥
अगृह्णाद्गुरोः शावमन्ता(४)त्प्रमुक्तं ।
यथावद्वयो-भाव-देहादि-युक्तं ॥
गुरुं तस्य भार्य्यामपि प्राप्य तस्मात् ।
अधिन्विष्ट कार्य्यात्परानप्यकस्मात् ॥
तमेतं समायातमीक्षस्व गोष्ठं ।
तदानन्दसम्पातदोहस्मितोष्ठं ॥इति॥

ततश्च तत्तच्छ्रवणाल्लब्धनष्टवित्त इव सुखवलित-चित्तः सर्व्व एव स्वस्वसदनमाससाद ॥

अथ श्रीराधाकृष्णसदसि स एव कथकः पृथगिदं कथयामास ॥

देवि ! श्रीमति ! राधिके ! यदमुना सन्दिष्टमासीत्पुरा
वृत्तादूर्द्ध्वमभीष्टमुद्भवमनु प्रेम्णा प्रियेण त्वयि ।
कथ्यं तत्तु विचारयन्मम मनः सम्भ्राम्यति क्षुभ्यति
क्रुध्यत्यस्यति(५)दीव्यति स्फुटसुखं व्यस्यत्यलं माद्यति॥

---

(१) षष्ठी । (२) कृष्णः । पक्षे चन्द्रः । (३) प्राप्तः ।
(४) यमात् । (५) असु क्षेपणे ।

तस्मात्प्रणिधाय परं तत्प्रचारणीयं ।

किन्तु ।—

तद्वृत्तान्तस्य सिद्धान्तं कुर्व्वन्निव तवान्तिके ।
सोऽयं नितान्तं कान्तस्ते न सङ्गस्यान्तमिच्छति ॥

इति स्वमनः परितोष्य तेन स्वसङ्गेन च सङ्गिनः परिपोष्य कथकयुग्मं स्ववासमाससाद ॥

श्रीराधाकृष्णौ च पुरातनविरहाकर्णनाल्लब्धतृष्णौ लीलानिलयं शीलयामासतुः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु गुरुतनयसमानयनं नाम नवमं पूरणम् ॥

दशमं पूरणम्

अथ परेद्यवि साक्षाच्छ्रीकृष्णश्रोतृकतया जातव्रजेश्वरसुखप्रथायां प्रातःकथायां मधुकण्ठ उवाच ।—

अथ पुरुवासराण्यतिक्रम्य गुरुपुरादागजितस्य तस्मिन्नजितस्य सर्वसम्पन्महिम्नापि महितस्य सेयं मनःकथा जाता ॥

हन्त ! निह्नुततया दूरतमकृतगमनस्य मम चिरं समाचारस्तत्र तातचरणादिभिर्नासादितः । सम्प्रति तु दूरगमनमपि निशमयिष्यते । या च तेषु मध्ये मध्ये मदीया स्फूर्त्तिः सा पुनर्विरहशान्तये पूर्त्तिं नासादयति ॥

ततश्च तेषां मद्विलोकनमेव शोकं दवयिता ॥

तदेव कथं सम्भवेदिति श्रीमदग्रसम्भवेन सह रहश्चिन्तयानीति ॥

अथ तेन तथा कृतसम्भाषणः सङ्कर्षणः प्राह स्म ।—

भवान् खल्वत्रकीयपित्रादीनामाज्ञामवज्ञातुं वित्रासं भजति । तेषां च प्राकाम्यं(१) नात्राम्यं स्पृशति ॥

तस्मात् पुरुकुलजन्मानं जननीं पृच्छावः । सा खलु तत्रकीयामत्रकीयामपि वार्त्तामनुवर्त्तते ॥

तदेवं सम्मन्त्र्य क्वचिदेकान्तगततया तामामन्त्र्य वाष्पपरामृष्टं पृष्टवन्तौ ॥

मातः ! कच्चित् कश्चिद्व्रजादात्रजन्नासीत् ॥

सोवाच ।—

मध्ये मध्ये कोऽपि कोऽपि व्रजादात्राजीदेव । किन्तु भवद्दर्शनं विना दुःखतः शुष्कतामेव गच्छन् गच्छति स्म ॥

एतावूचतुः ।—

आवयोरन्यत्र गतं तैरवगतं वा ॥

सोवाच ।—

स्फुटं तावन्नावगतं । किन्तु सुहृदामन्तरं(२) निमेष-समनन्तरदर्शनान्तरायतायामपि विकल्पकोटीः कूटीकरोति । किन्तरां चिरतरं त(३)दन्तराये ॥

---

(१) अनुज्ञां । (२) हृदयं ।
(३) दर्शन ।

एतावूचतुः ।—

परममत्या भवत्या खलु किमिदं तर्क्यते । आवयोरह्नाय[१] निहुत्य व्रजमनुव्रजनाव्रजनं पित्रोर्न वर्ज्जनविषयः स्यादिति ॥

सोवाच ।—

मयाप्यागृह्य तयोर्मनो गृह्यमानमासीत् । न तु सरसतापरामृष्टं दृष्टं । तत्र च तत्पार्श्ववर्त्तिनः सुतरां प्रतीपवर्त्तिन एव ॥

अथ तदेतत्प्रसूय भूयः श्रीव्रजराज्ञीमुखानां दूयमानानि मुखानि ध्यानादनुभूय त्रयमपि भूयसा नयनपयसा व्याप्तमासीत् ॥

पश्चात्तु निश्चिकाय । कश्चनमर्म्मगकर्म्मठजनः सन्देष्टुं झटिति घटनीय इति ॥

तदेवं मिलित्वा विचार्य्य देवार्य्यमित्रेण तु रहसि मनसीदं विचार्य्यते स्म ॥

स एव सन्देशहरस्तत्र देशरूपः[२]स्यात् ।

यः खलु विलक्षणविचक्षणः सर्व्वेषामत्रकीय-तत्रकीयाणां सम्मततया लक्ष्येत । स्वल्पमात्रञ्च मम सङ्कोचपात्रं न स्यात् ॥

---

(१) शीघ्रं ।　　(२) देशरूपं समञ्जसं ।

तत्तद्विधता च तत्रैव सविधतां विधत्ते । यन्मनसि तत्तन्मम माधुर्य्यमैश्वर्य्यमपि सम्यक् पर्य्यवस्यति ।

केवलमाधुर्य्यज्ञानं चेत्तद्दुःखदुःखितया न स तत्र धुर्य्यतां लभेत । ऐश्वर्य्यमात्रपर्य्यवसानं ज्ञानं चेत्तेषु केवलमन्माधुरीधुरीणेषु कुरीतितामेव मन्येत ।

उभयाज्ञानं चेदतितुच्छतामेव सङ्गच्छेत् । कुत्र च न मम प्रेमवशतायां चावगतायां दोषदृष्टिमपि परामृष्टिमानयेत ॥

अथ तादृगत्र कतमः शन्तमः स्यादिति विचिन्तयन्नयमकस्मादिव सस्मार ॥

आं आं दुर्ल्लभं लिप्सोर्विस्मृतनिजकण्ठस्थितचिन्तामणेरिव मम कुण्ठता जाता ।

यतस्तथाविधः सोऽयमुद्धव एव मदुद्भवमासादयिता ॥

तथा हि ।—

मदर्शनायाखिलबाल्यकूर्द्दनं
बाल्येऽपि दम्भं कलयाम्बभूव यः ।
मत्प्रेमगोपाय समीरजां रुजं
कैशोरके चास्ति ममायमुद्धवः ॥

मत्प्रेमभ्रमभागपि प्रथयितुं मत्सेवनानां विधीन्
श्रीमद्भागवतादिनीत्यवधिसच्छास्त्राणि वाचस्पतेः ।
अध्यैष्ट स्फुटमेष यः स तु परं सर्व्वत्र मत्पात्रता(१)
पात्रं स्यादिति मन्मनः प्रतिपदं
तं सङ्गिनं वाञ्छति ॥

अहो ! यदवधि श्रुतस्तदवधि स्फुटं दृष्टव-
न्मम स्फुरति साम्प्रतं किमुत दृष्टिमेवागतः ।
य एष च यदुव्रजात् किमपरं निजादप्रजात्
पृथग् निखिलकर्म्माणि प्रतिलवं मया पृच्छ्यते ॥

ममात्मा वहिराभाति सोऽयमुद्धवसंज्ञितः ।
यथा मम मनो भाति तथा तस्य न चान्यथा ॥

तस्मादसङ्कोचसङ्कोचरोचमानरतिके मदेकगतिके सर्व्वविधप्रणयिजनव्रजे व्रजे सन्देशहरतया स एष एव प्रेषणीयः ॥

तदेवं सति च विचारे निरन्तरप्रचारेण निरन्तर-(२) सम्बन्धबन्धुसञ्चारणालब्धे रहसि कथमपि लब्धे माधवस्तमेनमुद्धव(३)मिव मु(४)द्गरकरमुद्धवं लब्धवान् ॥

---

(१) मन्त्रिता । (२) निकट । (३) उत्सवं । (४) आनन्द ।

लब्ध्वा च तस्मादप्येकान्तं कान्तं निशान्तमानीय पानीयवद्द्रवदन्तरात्मा सदेशमुपवेशयामास ॥

उपवेशयंश्च लब्धावेशः केशवस्तत्पाणिं निज-पाणिनाङ्कमानिनाय ॥

ततश्च ।—

कम्पं कम्पेण सिक्तश्च सिक्तेनान्योन्यमश्रुभिः ।
करं करेण सङ्कुञ्चंस्तस्य श्रीहरिरब्रवीत् ॥

"न तथा मे प्रियतम आत्मयोनिर्न शङ्करः ।
न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान्" ॥

त्वमेव यदुषु व्यक्तं व्रजे रज्यसि यत्ततः ।
आत्मनोऽप्यधिकं त्यक्तव्रजास्त्वां मनुवे हितं ॥

यर्हि यर्हि च मया व्रजवार्त्ता
वर्ण्यते कठिनचित्ततया सा ।
तर्हि तर्हि स भवान् द्रुतचेता
हा ! द्रवत्तनुरिव प्रतिभाति ॥

तस्मात्त्वामेकान्ते निर्व्वर्ण्य हृदन्तःशूलमिव दुःखनमूलं दुःखं वर्ण्यते ॥

जानासि त्वं मम हृदयमिदं वह्नतां याति भक्त्या
काराद्वैरादपि जगति यतः साक्षिणी पूतनास्ति ॥

सा यद्द्वेषादजनि च जननीरीतिरस्या जनन्याः
प्रेमव्याप्तं व्रजमनुभवित्ता हृत्कथं मे न सक्तं ॥
आस्तां सा सा सततमसुवल्लालना मय्यमुष्याः
शिक्षारूपं यदरचि तया(१) वन्धनं तन्मदन्तः ।
स्मारं स्मारं दलति वलवद् येन तस्मिन्न किञ्चि-
द्धर्त्तुं शक्यं भवति नितरामल्पकं वा महद्वा ॥
चापल्यं मा प्रयासीन्मम शिशुरसकौ

वाल्यतः स्वैरभावा-

देवं वद्धस्तयाहं सकृदपि यदयं

तेन वद्धोऽस्मि नित्यं ।

आस्तामेतच्च तस्मादपि पितृचरणा

मोचयामासुरेतं

सास्त्रं मां यच्च तेनाप्यहमहह ! सदा

वन्धमेव प्रयामि ॥

यौ मय्येवोपसन्ने दृशमनुभजतो

वृत्तिमेवं श्रुता(२)वे

तत्तद्भावं समन्तादहह ! किमपरं

भुक्तवत्येव तृप्तिं ।

---

(१) जनन्या ।　　(२) भावे निष्ठा ।

तौ मत्प्राणौ विना मां कथमिव पितरौ
प्राणितस्तन्न जाने
किम्वा दत्ता कदर्थन्यभवदपि तयोः
सा मया शश्वदाशा ॥
आसातां पितरौ च तौ सखिजनाः
सम्बन्धिनः सेवका
गावः किञ्च मृगादिजीवनिवहाः
सर्व्वे मदेकाश्रयाः।
एतत्केन न मन्यतां स भगवान्
ब्रह्मापि मामूचिवान्
"यद्धामार्थसुहृत्प्रियात्मतनय-
प्राणाशयास्त्वत्कृते" ॥
मन्ये गोकुलसम्भवं पितृमुखं प्रेमावलम्वं जनं
विम्वं तत्प्रतिविम्वमेव पुरजं यत्रानुभूतिः प्रमा।
पूर्व्वस्मि(१)न्ननुभूततामनुगते-
नान्त्यः(२)क्व च स्मर्य्यते
पश्चाद्भाविनि(३) यातवत्यनुभवं
पूर्व्वः(४) सरीस्मर्य्यते ॥

(१) गोकुलसम्भवे। (२) पुरजः।
(३) पुरजं। (४) गोकुलसम्भवः।

तस्मिन्नेवंविधेऽपि प्रकृतवशतया
साम्प्रतं गन्तुमीशः
स्यां नेति त्वं ममायं प्रतिनिधिपदवीं
गच्छ तत्रापि गच्छ।
गत्वा चेच्छं मया यद्दत! रहसि मतं
शिक्ष्यते तद्विचार्य्य
प्रत्येकं सौख्यदाता भव मयि स पुनः
सौख्यमेत्य प्रयच्छ॥
सर्व्वे यद्यपि सन्ततं व्रजजना मां लिप्सवस्ते तथा-
प्यत्र[1] क्वापि विशेषितास्ति यदमी
भावेन भिन्नान्तराः।
केचिन्मय्यलमुद्यदुत्कलिकिकाः सामक्ष्यमप्यन्यथा
मन्यन्ते प्रणयाश्रया मम परे
स्फूर्त्तिश्च मां मन्वते॥
तस्माद्विस्त्रम्भभाक्षु स्फुरणमपि सम-
त्वात्मतां मन्यमाने-
ष्वन्तःसख्येषु मास्मस्फुटमथ भवता-
दायि सन्देश एषः।

---

(१) लिप्सायां।

अत्युत्कराठावगुराठात्मसु मम पितरौ
तावृजू स्वेन बोध्या-
वाविद्ध[१]प्रमभाजः पुनरिह कतिचि-
न्मद्गिरा सान्त्वनीयाः ॥
ये वा तत्र परेऽपि सन्ति शतशस्तेषां सदृग्भावगा-
स्ते तैरेव निरूढतोषवलनैः प्राप्स्यन्ति शान्तिस्थितिं ।
दाता गेहपतीन् परं द्विजवरानानीय पुष्णाति तां-
स्तद्वर्त्तव्यजना भजन्ति नितरां तेनैव पुष्टाङ्गतां ॥
ते सन्देशहरा मया पुरुतराः प्रस्थापिताः किन्त्वमी
सन्देशं परमुद्गिरन्ति न धिया किञ्चिद्वदन्ति स्वयं ।
किं वाच्यं त्वयि वाचिकं त्वमयसे वाचस्पतेः शिष्यतां
तत्रास्माभिरुदीक्ष्य च प्रतिनिधीकृत्य प्रतिष्ठाप्यसे ॥

तदेवमक्षीणामपडक्षीणां निशम्य रम्यस्वभावता-
समृद्धमुद्धवः श्रीमानुद्धवस्तादृगात्मयोग्यतालाभेन
लब्धोद्धवः सगद्गदं जगाद ॥

तत [२] वादित्रकयन्त्रं, यद्यपि न हि रागवर्णि[३]दृश्येत ।
तदपि पुमुत्तमसङ्गा,त्तत्तद्गुणभाग्महाजनं धिनुते ॥

---

(१) वक्र । प्रेयस्याभिप्रायेण ।
(२) ततं वीणादिकं वाद्यं ।
(३) रागवत् वर्णवत् । वर्णमक्षरं ।

अथ तेन सञ्जितमञ्जलिमेव कञ्जनेत्रः परामृश्य दृश्यकृपाविलासस्तमनुदत्तहर्षः सङ्कर्षणसमीपमापय्य तत्प्रस्थापनं निशमय्य तेन सममेव तं श्रीरोहिणी चरणपरिसरं सम्वलय्य लब्धतत्तत्प्रसादं स्वयमपि विशेषतस्त्वलङ्कारवस्त्राभ्यां कृतकान्तिप्रसादं व्रजाय व्राजयामास ॥

सर्व्वे मिलित्वा चेदं वेदयामासुः। यद्वृन्दावनतीर्थवृन्दार्थमेव स्वगमनमत्रावगमनीयमिति ॥

अथ श्रीकृष्णः प्राह।—

आवयोर्गुरूपसत्त्यर्थं दूरातिदूरं गमनं यदि किम्वदन्ती[१]व्रजेऽपि वदन्तीव स्यात्तदावयोः किञ्चिदपि न दूरमस्तीति स्वसिद्धान्तं मनसिकृत्य तदपलापवता भवता स्वयं तातप्रभृतयः सान्त्वयितव्या इति ॥

ततश्च प्रतततृष्णतया श्रीकृष्णं पश्यन् स्तम्भवश्य सर्व्वेन्द्रियवृत्तिरपि निर्जगाम ॥

पुरमनुशौरेः शोभा,व्रजमनुमाधुर्य्यधामतत्प्रेम्णः।
उद्धवमुभयमकर्ष,त्किन्तु प्रसभं तदुत्तरं जितवत् ॥

---

(१) जनश्रुतिः।

श्रुता जनमुखात्पुरारतिरतीव पूर्णा हरौ
व्रजस्थितजनस्य सा हरिमुखात्स्फुटं सम्प्रति ।
ततः सरभसं रसप्रसरनिर्भराकर्षणा-
दलं तमवलोकितुं पुलकवानभूदुद्धवः ॥

निन्ये रथस्तं गोष्ठाय किम्वा सुष्ठु मनोरथः ।
एवं विवादे जितवान् प्रेरकः(१)स परं(२)परः(३) ॥

अव्राजीदुद्धवः कृष्णाद्व्रजमेवं जनश्रुतिः ।
प्रतिवृक्षं(४)तु तं(५)तस्य(६)तत्र साक्षात् कृतं व्यधात् ॥

इदं भुक्तं(७)फलादीनामासितं(८)तद्वदीशितुः ।
इत्थं वृन्दावनं पश्यन्नुद्धवः सूद्धवः स्थितः ॥

दृष्टिस्पृष्टिसुगन्धिताभिरनिशं सिक्ता हरेरङ्घ्रिपाः
पूर्व्वं ये किल ते तदापि तदद‍ः संस्कारसारान्विताः ।
तद्वत्पुष्पफलान्विताः किमपरं तत्स्फूर्त्तिभाजो द्विजा-
स्तत्केलीनधुनातनानिव बलाद्वयज्ञापयन्नुद्धवं ॥

व्रजोपशल्यमागतं तमुद्धतं हरिः स्फुरन् ।
गवादिकस्य मु(९)द्भवं तदोचितं व्यजिज्ञपत् ॥

---

(१) मनोरथविशेषणं । (२) केवलं । (३) मनोरथः ।
(४) कर्त्तृपदं । (५) कृष्णं । (६) उद्धवस्य ।
(७) अधिकरणे क्तः । भुज्यते यत्र तत् ।
(८) आस्यते यत्र । (९) आनन्द ।

तथैव वर्णितं श्रीवादरायणिना । "वासितार्थेऽभि-युद्ध्यद्भि"रित्यादिना ॥

तथा हि ।—

अथ प्रविशन्नुद्धवः पूर्व्वं तमपूर्व्वं व्रजमन्तः शश्वदयमानः(१) सम्प्रति तु प्रकटमेव सुखस्य दयमानं(२) ददर्श ॥

यं खलु समुद्रमिव महाघोषता(३)लब्धप्रचारं । चन्द्र-मिव लब्धगवादभ्रशुभ्रता(४)विस्तारं । अम्बरमिव दीधिति(५)वलनाभीरवितत(६)शोभाकारं । कर्म्म-काण्डमिव कृष्णतत्परतासारवद्धव्यकातिथिगोविप्र-पूजासंग्राहकागारं(७) । रामायणमिव शुभवल्लव-कुशलसितगान(८)मयकरुणादिरसकृतमानसहारं ।

---

(१) मनसि तं अपूर्वं जानन् ।

(२) ददानं । कर्मणि अधीगर्थेति षष्ठी ।

(३) महाघोषता व्रजता श्लेषे शब्दता ।

(४) चन्द्रपक्षे गौररश्मि ।   (५) किरण ।

(६) अम्बरपक्षे रवितत ।   (७) पक्षे गृशब्दे । आगारः शब्दः ।

(८) शुभवन्तो ये वल्लवास्तेषां कुशलग्रथितं यद्गानं । पक्षे शुभ-वद्भासितं यद्गानं ।

श्रीभागवतमिव कृतगोपिकागीतप्रचारं । मुरारिमिव मुरलीयमानतासुश्रवस्वरसारं[१] । कृष्णाजन्ममहवाडव्य[२]मिव च वाढगोप्रदोहशब्द[३]लब्धसुखसम्भारं विचारयामास ॥

गोरेणुभिश्छन्नरथः स उद्धवो
व्रजं विवेशान्यजनैरलक्षितः ।
प्रत्यग्महीध्रं[४] च रविस्तदाविश-
दृष्टान्ततां[५] कर्त्तुमिवेच्छुरात्मनः ॥

अथ रथं राजपथकृतनिर्द्धारव्रजेश्वरद्वारपर्य्यन्तं समीर्य्य तस्मादवतीर्य्य सारथिरूपैकसेवकेन समं तदन्तःपुराग्रिमवेदिकामध्यमध्यासामास ॥

ततश्च तं गतिप्रतिगती कुर्वाणाः कतिचिदीक्षित्वा सन्दिहानतामविन्दन्त ॥

---

(१) मुरल्या या ईयमानता तत्र सुश्रवः स्वरसारो यत्र । पक्षे मुरस्य लीयमानता नाशः तया सुश्रवो यः स्वरसो वीराख्यः तं इयर्त्ति प्राप्नोतीति तथा । सुरस्य लीयमानतया श्रोतुं योग्यं स्वरसं इयर्त्ति । पक्षे ईयमानता लभ्यमानता ।

(२) विप्रवृन्दं ।

(३) पक्षे गोप्रदस्य य ऊहशब्दः वितर्कवचनं कस्मै का देयेति । पक्षे ऊह ।

(४) अस्ताचलं । (५) उद्धवप्रवेशे

यथा ।—

कृष्णोऽयं यदि न स्फुरेदिह कथं तद्दृष्टियोग्यं सुखं
किम्वासौ वलते तटस्थपदवीं रूपं तु तद्दृश्यते ।
रूपं केवलमत्र नांशुकलसद्वेषश्च स भ्राजते
तस्माच्छ्रीव्रजराजदम्पतिपदाम्भोजेषु विज्ञाप्यतां ॥

तदेवमधिगत्य सोऽयमुद्धव एवेत्यवगत्य स्वयं वहिरागत्य श्रीमान् व्रजाधिपतिस्तं सङ्गतवान् ॥

सङ्गत्य च निजचरणखरदण्डस्य पुरतो दण्डवत् प्रणमन्तमुत्थाप्य सालिङ्गमस्त्रेण संस्नाप्य तत्कृत-मञ्जलिं गृहीत्वा श्रीकृष्णमातुरुपान्तं नीत्वा चाय-यामास। सोऽयमुद्धव इति परिचाययामास च ॥

स च तस्याश्चरणकाष्ठामनु साष्टाङ्गं प्रणम्य रम्य-विनयः सज्जिताञ्जलि तस्थौ ॥

अथ तौ स्वयं च परिजनद्वारा च यथायथं तमा-राधयामासतुः ॥

अतिथिरयं नारायणस्यायनमिति लब्धकृष्ण-स्नेहवीथिरयं तदीयदेहप्रतिनिधिरिति चोभयथा-प्यधोक्षजतारोपात्तत्र हि न भिदां विदाम्बभूवतुः ॥

लब्धविश्रमं तु तं क्रमशः समुच्छलदुत्कलिका-जातः कंसशमनस्य तातः प्रश्नविषयीचकार ॥

तन्माता तु केवलं शृण्वती वाष्पेण निजसदन-
मावृण्वती वभूव ॥

प्रश्नश्च ।—

क्वचिदङ्ग ! महाभागेति प्रभृतिशुकमुखामृतप्रसृति-
मय एवास्वादनीयः । वयं तु सविशेषं परिवेषयामः ॥

यथा ।—

पृच्छायां निजतनयस्य स स्वदुःखा-
द्भीतः सन्न तु तमपृच्छदत्र पूर्व्वं ।
किन्त्वन्यान्निजसुहृदस्तदावृतिस्था-
नप्राक्षीद्व्रजनृपतिस्तमेव पृच्छन् ॥

अथ तस्मिन् सुप्रीतः, श्रीव्रजनृपतिः सुतस्य
साहाय्यात् ।
प्रश्नादाशिषयत्प्राक्, स महाभागेति सम्बोध्य ॥

प्रश्नस्तु यथा ।—

भ्रातृजवुद्ध्या वाल्ये, मत्पित्रा यः समं मयालालि ।
स मम भ्राता न परं, किन्तु सखापि स्फुटं शौरिः ॥

स सखा किं मम सम्प्रति,
युक्तः पुत्रेण तेन तेनापि ।
पुर्य्यां राजति कुशली, येनैवात्मनि सुखं मन्ये ॥

अथ सुहृदामपि तस्य,

क्षेमं पृच्छामि सुष्ठु सौख्याय।

तैर्वृतिमवृतिश्चान्यै,

र्यस्मादधुनापि शत्रुपक्षोऽस्ति ॥

अहह ! अतमातिवालौ,

चक्राते ताविति स्म चाभृशम।

तत्पर्य्यन्तं यातौ,

क्वचित् परिषदि पुरःपुरः(१) स्फुरतः ॥

मम हृदि यश्चिरमासी-

दद्दश्याम: प्रविश्य यस्या(२)थ।

अजनि(३)तथैव च पितरं

सम्प्रति तं मां स किं स्मरति ? ॥

आष्टममासप्रसवं, तं प्रति कष्टं विशङ्कमानायाः।

मातुः(४)स्मरति तवाग्रे

जातु स वृष्णिप्रवीर ! किं कृष्णः ? ॥

मातरपितरसगोत्रा,स्तत् सम्बद्धाश्च ये केचित्।

तेषां प्रतिजनसौहृद,मपि किं तस्यान्तरे स्फुरति? ॥

---

(१) नगरस्थ।

(२) मम। (३) कर्त्तरि रूपं। (४) कर्म्मणि षष्ठी।

अतिबाल्यादनुमिलनं, हा तु येषां सकातरो भवति ।
तेषां वहति सखीनां, किं बत ! चित्ते निजं
विना भावं ॥

गोरक्षायां नियता, रचिता ये स्वयमिहात्मनः स्थाने ।
कृष्णस्तान्निजभोजन, काले दूरं पुरेव किं
स्मरति ? ॥

यस्यात्मादिकमखिलं, स्वकृते स्वस्यापि यत्कृते भाति ।
तस्य व्रजस्य किञ्चि, च्चेतसि कच्चिद्दलान्नयति ॥

जानीमः प्रत्येकं, गा मनुते स स्वतोऽप्यधिकाः ।
निजकरकवलैः पुषिता, स्ताः किं चित्ते समाहरति ? ॥

यस्मिन् वृन्दाविपिने, लोचनपदवीमुपायाते ।
भोजनमपि विस्मरति,
स्मरति किमेतत् कदापि कुत्रापि ॥

अहह ! गिरिं यं छत्रं,
कृतवान् यान्[१] वाङ्घ्रिमुद्राक्तान् ।
तानधुना स्वविरिक्तान्, व्यर्थीभूतान् स किं वेत्ति ? ॥

अहह ! तदपि दूरे वर्त्ततां यन्निजाना-
मपरिहरणमासीत् किन्तु भूयादिदञ्च ।

---

(१) गिरीन् ।

सकृदपि कृपया तान् वीक्षितुं चेदुपेया-
न्मधुरनयनमास्यं हन्त ! पश्येम तस्य ॥

प्रखरपवनचक्राद्दानवक्षेः क्षयार्थ-
प्रकटितखरवर्षाद्रक्षिताः स्मः स्वयं चेत् ।
निजविरहजदावज्वालया दह्यमाना-
न्न कथमवति सम्प्रत्यस्मकान् पुत्रवर्य्यः ॥

हसितगदितलीलापाङ्गवीक्षाविलासाः
सुखदपदतया सन् ये तु कृष्णस्य पूर्व्वं ।
दलितसकलमर्म्मं क्रीडया तेऽधुनास्मान्
शिथिलिततनुधर्म्मान्स्थावरान् वा[१]चरन्ति ॥

यदि गृहजनदुःखं वीक्ष्य गेहं त्यजाम-
स्तदपि महति सादे[२]पातमासादयामः ।
यदिह वनमहीभृन्निम्नगा प्रान्तदेशाः
स्फुरितहरिपदाङ्कास्तं हरिं स्मारयन्ति ॥

अयमहह ! सुते स्वे रागवानेवमस्मि-
न्मयि विषयिधिया त्वं मा स्म कार्षीः कुदृष्टिं ।
हरिवलयुगलं तन्नान्यसाधारणं स्या-
दपि तु सुरमुनीनां ध्येयमित्याह गर्गः ॥

---

(१) इव ।　　(२) दुःखे ।

तत्प्रभावश्च युष्माकमस्माकं चानुभवपदमेव ॥

तथा हि ।—

कंसं हस्त्ययुतप्रभं करिवरं तं मल्लवृन्दञ्च त-
ल्लीलालेशत एव यौ निरहतां युष्माकमेवाग्रतः ।
तन्माहेशधनुश्च यत्र नलवद्भग्नं तयोर्यत्परं
तत्तदानवघातमद्रिधरणं चाद्यं कृतं किं ब्रुवे ॥

तदेवमुक्त्वा च ।—

वीर्य्यं यद्यपि तस्य तादृशमथाप्यन्तस्तु मे मार्द्दवं
गृह्णत् केवलमार्द्रभावमयते कुर्य्यां किमेवं वदन् ।
कण्ठे नेत्रयुगे च रोदनजलं बिभ्रद्व्रजाधीश्वरः
किं वक्तुं वत ! शक्यतां हरिहरिश्वासावरोधं दधे ॥

उद्धवमभितद्वाणीत,सुतचरितार्द्रा यशोदापि ।
स्वेदस्तनदृक् क्षीरैः,स्यादियमत्रापगेति मेने सः ॥

तदेवं बुद्ध्वानुद्धवश्चिन्तयामास ।—

अहो ! मम महाभाग्यं । यदीदृशभृशकृष्णस्नेहा-
वृतौ ताविमौ साक्षात्कृतौ । किन्तु तदिदं परामृश्यते
तयोरनयोस्तं विना कालविघट्टनं खलु दुर्घटमेव ।
तस्य मत्प्रभोरागमनमनयोश्च तत्र गमनमतीव
दुःसङ्गमं । तस्माद्यद्यप्यस्य नैसर्गिकेहस्य स्नेहस्य
हानिस्तानिश्च न सम्भवत्येव तथापि यदि स्थगितता

कर्त्तुं शक्यते तदा केवलमाभ्यां तर्त्तुं शक्यमशक्यमन्यदा। सा (१)च तदीयपरमतत्त्वताज्ञानात्तत्प्रेममाहात्म्यकृतात्मीयमहत्त्वज्ञानाद्वा घटेत।

तत्तज्ज्ञापनं चाधुना परं लब्धावसरं जातमस्ति॥

यतः।—

स्वयमेव मां बोधयतानेन तत्प्रभावः सम्भावनविषयः सम्प्रति कृत इति॥

अथ स्पष्टं चाचष्ट।—

कृष्णो नारायणाख्यः स्वयमिह भगवान्
प्रेम तस्मिन् विशुद्धं
सर्व्वेष्वर्थेषु वर्य्यं तदनु च परमं
भाति वात्सल्यमेव।
तस्मिन् पूर्त्तिं युवां यत्त्रिजगति च गतौ
तेन(२)तस्यै(३)व मूर्त्ती-
या(४)वञ्चन्तः(५)परेऽपि प्रचुरतररतिं
केचिदाप्स्यन्ति सन्तः॥

प्रधानं पुरुषो ब्रह्म यदेतद्रूपमुच्यते।
अंशांशं तद्विजानीयात् कृष्णरामाह्वयप्रभोः॥

इत्यादि॥

(१) स्थगितता। (२) हेतुना। (३) वात्सल्यस्य। (४) युवां कर्म्मभूतौ। (५) पूजयन्तः।

अथानयोः केवलतन्माधुर्य्यप्रवणतया तत्तदश्रवणमवधार्य्य पुनस्तद्दुःखशमनाय तदागमनमेवावगमयति स्म ॥

तथापि तत्तात्पर्य्येण माधुर्य्येण सममैश्वर्य्यमप्यस्य तदनयोर्मनः प्रवेक्ष्यतीत्यवेक्ष्य तच्च समुच्चिनोति स्म ॥

यथा ।—

सर्व्वेषां सात्त्वतानां[१]पतिरपि भगवान्
शुद्धवात्सल्यभावात्[२]
पुत्रत्वं प्रापयद्वां तदपि लघु[३]युवामाव्रजेदेव देव ! ।
आज्ञ्यापि स्वयं तद्भवदभिरुचितं
नित्यमुच्चैर्विधाता[४]
लोके वेदे च सिद्धिं वलयति भवतो-
स्तत्र यल्लालनाख्यं[५] ॥

हत्वा कंसं रङ्गमध्ये प्रतीपं
सर्व्वेषां नः सात्त्वतानां स कृष्णः ।
आगम्याराद्वो यदूचे तदर्थं
पृष्टोऽस्माभिः सत्यमुच्चैः करोति ॥

---

(१) भक्तानां । (२) प्रेम्णः । (३) शीघ्रं ।
(४) विधास्यति । (५) लालयो नित्यं भावीत्यर्थः ।

अथ तदापि तयोः खेदसम्वेदनतः स पुनरुग्र-वैयग्र्यमुवाच ।—

अहह ! महितभागौ खिद्यतं मा समीपं
सततमधिवसन्तं द्रक्ष्यथः कृष्णमाशु ।
उपभव[१]दयमस्तीत्येतदास्तां समस्मि-[२]
न्नपि तदुपमितेः[३] किं[४] कृष्णवर्त्मत्वमग्नौ ॥

अधुना प्रकटं रूपं, घटयति न हरिर्व्रजे यत्तु ।
तत्कारणमुद्दिष्टं,स्वयमसुरादेर्विमोहनप्रथनं ॥

तदेवं तु तस्य सर्व्वत्र साधारण्यं गण्यं मन्यमानस्तयोस्तापातिशयः स्यादिति धृतमन्युः[५] पुनरन्यथा सान्त्वयन्नुवाच ।—

न ह्यस्य प्रियमप्रियं च किमपि स्वं[६] नास्व[७]मप्यच्युत-
स्याम्वा नैव पितापि नैव घटते कुत्रापि सर्व्वेशितुः ।
यद्यप्येवमथापि भक्तजनता प्रेमार्त्ततानुत्तये[८]
तत्तद्भावमयत्यसावथ कथं वां तादृशावुज्झतु ॥

---

(१) भवतां समीपे । (२) सर्व्वस्मिन् ।
(३) तस्य कृष्णस्य सादृश्यस्य हेतोः ।
(४) वितर्के । किमित्युत्प्रेक्षायां वा ।
(५) अङ्गीकृतदैन्यः । शोकः । (६) आत्मीयं ।
(७) अनात्मीयं । (८ खण्डनाय ।

अथ भक्तजनादन्यत्र तु तस्य तत्तत्कुर्व्वत्कल्पस्य नाल्पकोऽप्यावेशस्तज्जनादन्ये च तत्र सभ्रमा एवेति वदन् पूर्व्वार्थमेव पुष्णन्नुवाच ।—

नुदतीश्वरसान्निध्यं(१) गुणान्न स्वयमीश्वरः ।
तत्र(२) तद्विमुखा जीवा मायया दधति भ्रमं ॥

यस्मादेवं तस्मात् ॥

सुतोऽयं युवयोरेव तादृग्भाववशात्प्रभुः ।
तदभावात्तु नान्येषां साधारणयाद्धि सर्व्वकं ॥

इत्युद्धव-श्रीव्रजराजयोर्मुहुः
स्वस्वानुरूपं वदतोर्निशा गता ।
बुद्धिस्तु तस्मिल्लघुरुद्धवस्य सा
व्रजेशितुः प्रेमजवेन चिक्षिपे ॥

तदेवं सति ।—

सदा हरिस्फूर्त्तिसुखेन दीव्य-
द्वेषास्तदा काश्चन गोपनार्य्यः ।
शीघ्रं समुत्थाय निरूप्य दीपान्
वास्तुं समभ्यर्च्य दधीन्यमन्थन् ॥

कमलनयनगानं तत्र तासां समन्ता-
न्मथननिनदमिश्रं द्यामपि व्याप शश्वत् ।

---

(१) कर्त्तृ । (२) ईश्वरसान्निध्यगुणप्रेरणे ।

श्रवसि यदथ कुर्व्वन्नुद्धवस्तत्र मेने
निखिलशिवमिदं चेद्भाति कृष्णः क्व दूरे ॥

अथ ब्राह्ममुहूर्त्तमागतमभीक्ष्य मूर्त्तभक्तिरूपः सर्व्वभक्तभूपः प्रातर्भगवदुपासनावासनापरित्यक्त-निजासनस्तावनुज्ञाप्य तीर्थमाप्यं[1]गच्छन्निवेदयामास ॥

अहमहह ! भवन्तौ सान्त्वितौ कर्त्तुमैच्छं
मदनुभजति वां तु स्नेहचर्य्याविदूरं ।
अपि सकलमभीष्टं सैव चाह्नाय कुर्य्या-
न्मम परमतिधार्ष्ट्यं कष्टमुच्चैः करोति ॥

मा कुरुतं पुरु चिन्तां
व्रजकुलकुलपालकौ युवकां ।
यः खलु भवतोः पोतः
स भवति जगतां भवाम्बुधेः पोतः ॥

इति निवेद्य तीर्थं गते तूद्धवे राजपथस्थितं तद्रथमवलोकयंल्लोकः कस्यायमिति सन्दिदेह ॥

तत्र तु ।—

उद्धवस्य रथं दृष्ट्वाक्रूरं रामाः शशङ्किरे ।
चूर्णेन दग्धजिह्वानां भवेत्तद्भ्रमदं दधि ॥

---

(१) जलसम्बन्धि ।

अथ मधुकण्ठः समापनपद्येनानन्दयन्नुवाच ।—

तदिदमिदमपूर्व्वं वर्णितं पूर्व्ववृत्तं
व्रजनृपतनयस्ते सोऽयमङ्के विभाति ।
अहह ! तव मुखेन्दौ म्लानतां वीक्ष्य गण्ड-
द्वयमिह निजमस्रैः सिञ्चतेऽसौ चिराय ॥

तदेवं सर्व्वं सन्तोष्य सर्व्वेण सन्तोष्यमाणौ स्ववासमासन्नाविति सर्व्वोऽपि यथायथं स्वस्वपथमासन्नवान् ॥

"न तथा मे प्रियतम" इत्याद्युक्तिभिरीडितः ।
स्वयं श्रीहरिणा सोऽयमुद्धवो व्रजदूतकः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु श्रीमदुद्धव-
मुद्धवसन्देशसम्पदसमं दशमं
पूरणम् ॥

एकादशं पूरणम्

अथ पूर्व्ववदसितसुन्दरराधयोः सदसि कथा यथा।—

अत्र कथाबाहुल्यमवधाय विभागाय समुत्कण्ठः स्निग्धकण्ठ एवोवाच।—

अथ श्रीमानुद्धवस्तदेव तीर्थं जगाम।

यत् खलु निजप्रभुणा तासां सर्व्वासामपि सम्प्रति समुच्चितीभवन्तीनामिष्टदेवताराधनादि-लक्ष्यतया कालं क्षिपन्तीनां स्थानतया निर्द्दिष्टं।

किन्तु ताभ्यः सुबहु व्यवधाय तत्र प्रातःस्नानाह्नि-कमह्नाय निर्म्मितवान्। निर्म्माय च भक्त्या सावधानं किञ्चिदव्यवधानमानञ्च। अश्रुता च तेन॥

क्षीणाङ्गाः स्रस्तकेशामलशवलपटाः
प्रज्वलत्सान्निकृष्टाः
दृष्टास्ता जातवेदस्ततय इव वृता-
धूमभस्मादिभिर्य्याः।

किञ्च व्यग्राप्तियुग्मादलदधरदलश्वासवर्गा मुखान्तः,
शोषा योषा मृगाणामिव दवदवना-
त्रस्तनेत्रा विमृष्टाः ॥

तदा च ।—

श्यामं[१] वर्त्तुलदीर्घपीवरभुजं चन्द्राभवक्त्रस्फुरत्,
कञ्जाक्षं नवयौवनं किमपरं सौन्दर्य्यपर्य्याचितं ।
मीनक्षोणिपकर्णिकं कनकजिद्वस्त्रं तदास्तामपि,
श्रीकृष्णाभ्रमदं विलोक्य तममूश्चित्रं चिरादाययुः ॥
तास्तु यद्यप्युद्भव,मीक्षाञ्चक्रुः कृष्णोपमं गोप्यः ।
तदपि न तद्भ्रममगमन्,भावस्तासां हि सच्चक्षुः ॥
दधति कदापि च साम्या,द्प्राणिष्वेव कृष्णदृष्टिं ताः ।
न पुनः प्राणिषु कुर्य्यु,र्भावस्तासां हि धर्म्मपालः
स्यात् ॥

ततश्च ।—

विस्मित्य सर्व्वाश्च सविनयक्रमं तमर्व्वाग्भवन्तं कमलाधिपतिसम्वासवासितवहिरन्तरं कमलमात्र-प्राणतापात्रमधुलिङ्गातय इव कमलाकरजगत्प्राणं परिवव्रुः ॥

---

(१) तं वीक्ष्येति ।

परिवृत्य च तं कृष्णाद्दृत्य भृत्यतया मनसिकृत्य प्रश्रयेणाद्दृत्य सूनृतासनादिभिः सत्कृत्य चण-कतिपयं तूष्णीकामनुसृत्य कृत्रिमस्मितान्ति-जतापमाहृत्य चाचचक्षिरे ॥

जानीमस्त्वां किल यदुपतेः पार्षदं सौरभादे-
र्विद्मस्तं[१]चेत्यथ कथयितुं का वयं हन्त! दीनाः ।
येनाज्ञप्तस्त्वमपि निखिलं वैभवं तत्र हित्वा
गोष्ठं प्राप्तः स्फुरसि सुगमः सोऽयमत्रास्मकाभिः ॥

भर्त्रा तेन स्वयमहमिह प्रेषितश्चेदवश्यं
तर्हि व्यक्तं भवथ नितरां यूयमेवानुरुद्धाः[२] ।
मैवं वादीरहह ! पितरौ मृश्यते ह्यत्र वीजं
गौणो मुख्येऽप्यनुगतिमिते मुख्य एव प्रतीतिः ॥

वन्धुस्नेहं मुनिततिरपि त्यक्तुमीष्टेन सुष्ठु
त्यक्तव्यौ स्तः किमिव पितरावप्यहो ! तेन सौम्य ! ।
कुम्भः पृथ्वीं न हि परिहरेद्दण्डचक्रादिकन्तु
स्वार्थे यावद्व्रजति तदिदं पृच्छ्यतां न्यायविच्च ॥

एतौ हा ! धिग्यदि च पितरौ तस्य नापेक्षणीयौ
किम्वा गोष्ठे निवसति तदा तस्य यद्दृष्टियोग्यं ।

---

(१) श्रीकृष्णं ।　　(२) अपेक्षिताः ।

पुर्य्यां तस्यां सुरनरशतां गाश्वमातङ्गलक्ष्मी-
रस्मिन् सर्व्वत्र च वरधनं हन्त ! गोपाश[१]मात्रं ॥
यः सम्बन्धः स्फुरति भुवने भोग्यभोगिप्रकारः
स स्यान्नैव स्फुटमविचलः पुष्पभृङ्गादिदृष्टः[२]।
स्याद्वा गच्छन्प्रतिनियततां जीवकाजीऽयभावात्
स्त्रीणां पुम्भिः सुखलवकृते यः पुनश्चञ्चलः सः ॥
स्त्रीपुंसानां भवतु मिलनं सन्ततं क्वापि यस्मिन्
दाम्पत्यं स्यादविचलतया धर्म्मशर्म्मप्रधानं ।
जारान्यस्त्रीमिथुनसमये त्यागमन्योन्यमन्ते
वेश्या निःस्वं विसृजति वयस्त्यक्तवेश्यां वहुस्वः॥इति॥

तदेवं प्रथमत एव यासां गोविन्दमात्रं विन्द-मानानि मानसवाग्देहवृत्तिवृन्दानि तदेकसन्दानि[३] तानि न हि वहिर्भद्राभद्रं विन्दति स्म ॥

हन्त ! हन्त ! ताः पुनस्तस्य विरहेण दूयमान-तया व्यग्रीभूय तादृशमसभ्यमप्यभ्यभाषन्त ॥

यत्र साधारणतया व्रजं सम्भूते कृष्णस्य दूते तस्मिन्नुद्धवेऽप्युद्धवेदनतया त्यक्तलोकमर्यादतां गताः ॥

(१) निन्दायां पाशः।
(२) सप्तमीतत्पुरुषः। (३) तस्मिन्नेकं केवलं वद्धानि।

भवतु नाम च तत् किं वहुना ? स्वेन सह तेन संहितं रहस्यमपि मञ्जुगानसञ्जनया व्यञ्जयन्ति स्मेति मम हृदयं दूयते ॥

ततः कृतं सुदुस्तरेण तदुन्मादविस्तरेणेति ।

तदेवं मौनेन मूर्द्धानमानम्य पुनराह ॥

अहो ! मम वृश्चिकभिया पलायमानस्याशीविष-मुखे प्रवेशः सदेशमागतः । यतस्तदतिविस्तरं त्यक्तवतोऽपि गत्यन्तरमन्तरा श्रीराधिकाया दिव्यो-न्मादवद्धमनर्द्धं तदिदं विलपितं लपितुमापतितं ।

तदेवं मर्म्मणि व्रणं विद्रूय भूयः सुखं सम्भूय सम्भाषते स्म ।—

हन्त ! जागरणमागम्य च कथं स्वाप्नं दुःखं दुःखनं कुर्व्वन्नस्मि । यतस्तेन स्वकान्तेन समं साक्षात्स्फुरदुपवेशा सेयं ममेशा विद्यत एवात्र-लम्बनं । तस्मात्किञ्चित्प्रथयानि । तत्र स्फूर्त्यादि-समुज्जृम्भागम्भीरसम्भावनमयीयं भावना चास्यां या जातु जातु सम्भवति स्म ॥

सा यथा ।—

आयाति च मम निकटं

याति च निह्नुत्य माथुरं नगरं ।

तस्मात्काञ्चन रामा

रमयति रमणः स तत्रापि ॥ इति ॥

तदा तु सा भावना तदीयदूतदर्शनेनातीव सम्भूततां गता ॥

तस्मान्मान एव वलान्मान(१)मतिक्रामति स्म ॥ यत्र च सति तद्दूतविलोकनसम्भूतसंस्कारवश्यायां तस्यां भ्रमरोऽपि दूतान्तरभ्रमं दधाति स्म ॥

तथा हि तस्या वितर्कः ।—

मधुराहरितः(२)संयन्

गुञ्जन् मूर्द्धानमाधुनुते ।

तदयं तदीयदूतः

स्फूटमलिरेति श्रिता कूतः ॥ इति ॥

तस्मादेनं प्रथमत एवाभिव्यक्तं विरचयामीति विचारयन्ती स्पष्टमेवेयमाचष्ट ॥

अरे ! रे ! कथमस्माकं पुरतः सङ्क्रमानः पुरत एव धार्ष्ट्यमनुतिष्ठसि विदूरामटवीमटेति ॥

---

(१) परिमाणं । (२) दिशः ।

तदेवं क्रूरदृष्ट्या तं दृष्ट्वा सोत्प्रासमाह स्म ।—

तत् खलु रे! खल! तव नायुक्तं । यस्मात्मद्यं पिबसीति स्फुटं मधुपतया निगद्यसे ॥

पुनः सहासमाह स्म ।—

अहह! तत्पानं च तव भजमानं(१) ।

यतः, पतिः खलु तवाधुना मधूनां पतिः ॥

पुनः सवितर्कं कर्कशमुवाच ।—

युवयोः स्वस्वाम्यमिदं नासाम्यं वहति ॥

यतः ।—

मधुपतिरसकौ मधुप,स्त्वमसीत्युच्चैः प्रसिद्धमेवेदं ।
आजीव्याजीवकता,सम्बन्धस्तेन वां सिद्धः ॥

पुनरपि दोषान्तरासङ्गं सभ्रूभङ्गमुवाच ।—

अहो! सख्यः! समक्षं शृणुत? । मद्यपः खलु विक्षिप्ततया सरलचित्त एवावलोक्यते ।

अयं पुनर्मूर्द्धधूननाव्यक्तध्वनिभ्यां कितव इव च लक्ष्यते । तदेतदतीवाश्चर्य्यमिति ॥

अथवा नाश्चर्य्यमिति तं सम्बोधयन्नाह ।—

अरे! कितवस्य तस्य वन्धो! कथमिह स्वच्छ इव स्वच्छन्दमागच्छन्नसि? दूरमपसर ॥

---

(१) युक्तं । युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ।

न च कितवस्य बन्धुरेवास्मि न तु स्वयं कितवता मम स्यादिति छलः समवलम्बनीयः ॥

यतः ।—

यः कितवानां बन्धु-
र्द्विगुणं कितवत्वमस्य मृश्येत ।
छलयन्नपि तां स्तैर्य्यैः,
स्वं साचिव्यं विधापयति ॥

तदेवं समन्दहासं विचारयन्ती निजचरणं सरसिजधिया संपित्सन्तं[(१)] तं प्रति विचिकित्सन्ती वक्ति स्म ।—

अरे ! तादृश ! ममाङ्घ्रिमेकमपि मा स्पृश ॥

अथ पुनरुट्टङ्कयन्ती तं घट्टयन्तीवाह स्म ।—

किमाच्छ रे ! किमाच्छ ? ।

अथ किमेवं ब्रूषे ? स्वामिनि ! स्वामिपरिसरादागतस्य मम तव चरणपरामर्शः खलु सुपरामर्श एवेति ॥

भवतु नाम रे ! वाम ! तदपि भजमानं[(२)] । यदि प्रागभिहितभवद्दोषः शोषयति न मन्मनः ।

(१) पतितुमिच्छन्तं । (२) युक्तं ।

आस्तामपि स न प्रतीतिविषयः। सम्प्रत्यन्यदपि दुर्लक्षणं विलक्षणतया त्वयि लक्ष्यते। तत्सङ्गमाय सपत्नीभूतानां मदीयसपत्नीनामसङ्कुचत्कुचकुङ्कुमरक्तीकृतविलुलिततद्वनमालारञ्जितकूर्चेतेति ॥

यतः।—

एकः खलु चपलानां(१)

जुष्टं कुङ्कुममुरस्यहो ! वहति।

तस्मादन्यः श्मश्रुभि,रेष प्रेक्ष्येत दग्धकूर्चाभः ॥

अहो ! ग्राम्यधर्म्महेतोः सम्बन्धः खलु ग्राम्यधर्म्म एव स्यादिति हसित्वा पुनराह स्म।—

तस्मादरे ! सगर्व्व ! सर्व्वथा मां मा स्पृश। यदि वा स्पृशसि तदा सर्व्वथा तैः कूर्चैस्तु मा स्प्राक्षीरिति ॥

पुनारोषताम्रताकम्रचिवुकं चालयन्ती चाललाप। किं ब्रवीषि रे ! ईश्वरि ! परमप्रेमवत्या भवत्या मानप्रसादनार्थमीश्वरेण प्रेषितोऽस्मि।

वर्त्मनि तु वुभुक्षासुक्षामतया दुष्परिहरं पुष्पं पिवतः कूर्चे मम परागकृतरागः सम्भागमागत इति ॥

---

(१) सपत्नीनां।

सत्यं सत्यं। यतः।—

मिथ्यावचनैकं यत्, तथ्यानां शतसमानमानाभं।
तस्मात्किल कितवानां,
कर्त्तुं कः स्यादतथ्यतां वचसि॥

भवतु कितवकिङ्करेण समं किङ्करेण वदनेन वा विवदनेन नास्माकं पुनस्तस्य प्रसादनेन[१] वचनेन तस्य चासादनेन त्वया प्रयोजनमस्ति॥

स तु मधूनां पतिर्मधुवधूनामेव मानान्तप्रसाद-मासादयतु। उभयेषां मध्वाश्रयताविख्यातेः॥

तत्रैव च त्वं दूततां सम्भूतवान् भव। तवापि तत्पदसम्पत्तेः॥

यतः।—

समशीलानां मिलनं, भवति परस्परसुखाय सर्व्वेषां।
मद्यपशौण्डककितवा, श्वेक्ष्यन्ते यत्तथा सुखदाः॥

तदेवं विहस्य पुनः समत्सरं भर्त्सयन्ती बभाषे। तस्य तत्प्रसादनं पुनः प्रमादमयतया यदुसदसा-मुपहासास्पदमेव स्यात्।

यस्य दूतभूतस्त्वं निर्लज्जतां सज्जंस्तादृशं भृशदुर-

(१) कर्त्तरि युट्।

पक्षवचिह्नमह्नाय गृह्णन् भ्रमरहित एव सर्व्वत्र भ्रमन्नसीति ॥

यतः ।—

यद्यपि सगन्धनकुलः[1]स्वं गोपयितुं जनाद्वष्टि ।
तदपि भजत्यनवरतं, गन्धादग्रे सराद्वयक्तिं ॥

अथ[2]पुनः सरोषं दोषमुद्भावितवती। अरे! द्विरेफ! त्वमेवं वदसि। कथं सम्भावनमात्रेणादोषपात्रे तत्र मयि च मृषादोषं जोषयसि। भोः! कष्टं विस्रष्टन्तु किमपि न पश्याम इति[3] ॥

तत्र श्रूयतां। स व्याजराजः[4] खल्वसावस्मांस्तथा सानुरागमिव पुरा समागतवान् यथा तदानीमजानीम कदापि न हास्यतीति। स्फुटमहह ! सहसा तत्याज। तत इतः परमवद्यं किं विद्यते ?।

तत्र च शङ्के कालकलेवरतया[5] कलङ्केन शङ्केह

---

(१) मुसकबिला इतिभाषा ।

(२ सकृदधरसुधा स्वां इत्यास्यार्थं विशदयितुं परिपाटीमाह अथेत्यादि। प्रथमे शाठ्यं द्वितीये चापलं निर्दयता च पद्याया अविचक्षणतोक्तिभंग्या स्वविचक्षणतोक्तिर्विवृता ।

(३) वदेः कर्म्म ।　　(४) कितवराजः ।

(५) श्लेषे यमदंहतया ।

न विद्यते यस्य स भवान् समानस्वभावं तमुपलभमानस्तथा सुमनसामनादरदर्शनया दर्शन-[१]मिदमध्यापितवान् ।

किन्तु शिष्ये विद्या गरीयसी दरीदृश्यते । भवान् हि स्वार्थमर्थयमानस्तदीयसारं निपीय क्वचिदन्यत्र याति ।

तस्य तु स्वार्थमात्रं नात्र प्रतिपद्यते । किन्तु परदुःखदानमेव सुखमिति लक्ष्यते ।

यस्मादनुविधानस्माद्विधजनान्मुधासुधाभ्रमकरं निजमधरं सकृदेव सेवयित्वा स खलु कालपुन्नाग-[२]स्तत्याजेति ॥

तस्मात् ।—

एके मधुकरतुल्या भिन्दन्त्यपरं निजार्थाय ।
केचिन्मधुपतिसदृशास्तमृतेऽप्यन्यं विदुन्वन्ति ॥

तदिदं तावत् परममाश्चर्य्यमहो ! तस्मादपि वर्य्यमपरं गोचर्य्यते[३] । सा सर्व्वपद्माधिदेव्यपि पद्मा कं गुणमनुगुणं विधाय तत्पादपद्मं परिचरति ॥

---

(१) शास्त्रं । (२) कालाहिः । श्लेषे श्यामपुरुषवरः ।
(३) विषयीक्रियते ।

यतः श्रूयतेऽनुभूयते च ।

यत्र यत्र स पद्यते तत्र तत्र पद्मापि प्रतिपद्यत इति ।

तदेतद्विभाव्य पुनः सम्भाव्य किञ्चिद्वदति स्म ।

सा खलु सरला खलानां खलतां न जानाति ।
यस्पादुत्तमश्लोकनामतामात्रतस्तत्कामताङ्गता ॥

धिक् धिक् अपि निरपेक्षं
रूक्षं पद्मिन्यर्कं जडा भजतां ।
पद्मालया स चेताः
कथमिव भजते तथाविधं कृष्णां ॥

तदेवमनया तदनया[१]न्मुहुरनूद्य वहुरुद्यते स्मेति कृतमुन्मादकृतविलापवर्णानया ॥

अथ[२] पुनरेषा स्वभावत एव मञ्जुगुञ्जन्तं तमन्यथा व्यञ्जयामास ॥

भो! सख्यः! कष्टं तथापि धाष्टर्यमनुतिष्ठत्यसौ । पश्यत पश्यत तमविस्रब्धचरितं पुनर्गातुमारब्धः । गानेनाप्येतामार्द्रयामीति ।

---

(१) अनीतीन् ।

(२) किमिह वहु इत्यस्यार्थं विशदयति अथेत्यादि । पूर्वार्द्धेऽसूया सा चेयं मानव्यञ्जिनी । उत्तरार्द्धे तूपहसात्मकः कटाक्षः ।

तस्मात् क्षिप्रमेतमाक्षिपामीति ससम्भ्रमं स्पष्ट-माचष्ट ॥

चतुष्पात्तावन्मूढभावतया लक्ष्यत एव । त्वन्तु षट्पदः कथं तदधिकपदतां[१] न प्राप्नुयाः ।

अन्यथा पुनरिह लब्धदुःखव्रजे व्रजे कथं गायसि ?।

तदिदं न[२] श्रुतं ।

यः परपरिषद्धृदयं, जानन् व्यवहारमातनुते ।
देवः स खलु निदिष्टः, पशुरेवान्यो द्विपाच्च निर्दिष्टः ॥

अत्र च यदि गायसि तदा वहु कथं गायसि ? ॥

यतः ।—

गानादिकमतिकुर्व्वन्
श्रोतुर्य्यः खलु न वेत्ति सारस्यं ।
कुक्कुरतुलया वुक्कन् सोऽयं परितो निरस्येत ॥

तथापि यदि गायसि तदा यदूनामधिपं कथं गायसि ?। कः केन सम्बन्धं सन्धत्ते ? ।

यतः सुखमुपलभ्येत ॥ तथा हि ।—

गायति स जडोऽप्युच्चैः
प्रेरकहृदयानुवर्त्तनो यः स्यात् ।

(१ श्लेषे व्यवसायतां । (२) काकुः ।

रागाविविक्तरचनं,(१) दृष्टं यद्वत्पिनाक(२)यन्त्राद्यं ॥

पुनः सक्रोधमाह स्म ।—

अरे ! यद्येवं ब्रवीषि । तस्य सम्बन्धः प्रागत्र च लब्धनिर्बन्धः सम्बभूवेति ।

तथापि त्वं मूर्ख एव । यतो जीर्णसम्बन्धं तमत्र गायसि ॥

तथा हि ।—

कविभिः प्रस्तोतव्यः, स्तव्यानां विद्यमानसम्बन्धः ।
वन्दिजना न हि राज्ञां, प्राग्भव(३)पुत्रादिकं स्तुवते ॥

यदि च त्वयि धनपिशाची(४) लग्ना तदा तद्ग्रह-गृहीततया गृहिणां तेषा(५)मग्रतो गायतु भवान् तेऽपि कदाचिदुपद्रवविद्रवार्थं किञ्चिदपि दद्युः ।

कथमहह ! भोस्तस्मात्पापदिना(६) देव व्यक्त-तया त्यक्तगृहाणां निःस्पृहाणामस्माकं पुरतो गायसि ।

अरे ! किं ब्रवीषि ? । सोऽहमपि निःस्पृहोऽस्मीति ।
तर्हि तथा तथा विगीतमपि तमेव कथं गीत-

---

(१) तृतीयासमासः ।　(२) वाद्यभेदः ।　(३) जन्म ।
(४) तृष्णाधनपिशाची स्यादिति त्रिकाण्डशेषः ।
(५) व्रजस्थानां ।　(६) वियोगदिनादित्यर्थः ।

विषयीकरोषि ? । पुराणं[१] चेद्गायसि पुराणमेव गाय, किं ब्रुवे, षडङ्घ्रितया सार्द्धपशुरेव त्वमसीति ।

ततः कथं वा त्वयि तृष्णा न स्यात् । ततश्चार्थी-
निर्गुणश्चेति द्विगुणमेव धिक् तां ॥

यतः ।—

अपि निजलाभालाभ, स्थानं ज्ञातुं न चेच्चतुरः ।
कं गुणमथ जानीयाद्, येनार्थयितुं जनं वष्टि ॥

तस्माच्छ्रूयतां रे ! वर्व्वर ! सदुपदेशः श्रूयतां ।
मनसिजलीलायां विजयते यस्तव सखा[२] तस्य
सखीष्विव तद्विजयप्रसङ्गः सङ्गीयतां ॥

न तु यदुष्वपि तेषु लज्जेह प्रसज्जेत् । तासु तु
तेन सङ्कुचितकुचरुक्षुमनोरथः प्रथनमाप्स्यतीति ॥

अत्र च ।—

शृणु वात्स्यायनतत्त्वं, लज्जां परिहृत्य वक्ष्यामि ।
यावान् प्रियकृतधर्ष, स्तावान् हर्षः पृथुस्तनस्त्रीणां ॥
यावान्न भवति सुरते, साक्षाद्भूतेऽपि सौख्यसन्दोहः ।
तावांस्तच्छ्रवणे स्या-
दयमपि वात्स्यायनस्य सिद्धान्तः ॥

---

(१) ग्रन्थं ।　　(२) कृष्णः ।

इति हसित्वा पुनराह स्म ।—

अत्र मूर्द्धानं धुनानः किमूहसे ? । विना याचनं ताभिः किञ्चन कथं दीयतामिति ॥

शृणु त्वामुपदिशामि ।—

यो वष्टि स्फुटमिष्टं, यस्मात्तस्येष्टमेव स ब्रूयात् ।
याच्ञा रचयति दातुः, सङ्कोचं त(१)त्तु शश्वदुत्साहं ॥

(२)अथ चणं प्रणिधाय तमवज्ञाय स्वसखीराह स्म ।—

अहो ! जीवितालयः ! परिकल्यतामयं कुसुमकृमिः कथमिव भवतीनां गम्यधर्म्ममर्म्म जानीयात् ॥

सोऽयमेवं(३) वदति ।—

देवि ! रुषद्वचनं मा ब्रवीः। कथमथ ताः(४) पतिजुषः परपुरुषं भजन्तु नाम तस्मात्तूष्णीकामेव पुष्णीतादिति ॥

अत्र च पुनरेतं प्रत्येवं रुषमुच्यतां सत्यमेव ताः पतिदेवताः ।

---

(१) इष्टकथनम् ।

(२) दिवि भुवि चेत्यस्यार्थं विशदयति अथेति । पूर्वार्द्धं कुहकता सासूयाक्षेपश्च ।

(३) वक्ष्यमाणं ।　　(४) विजयसखसख्यः ।

किन्तु दिवि भुवि रसातलमपि का खलु स्त्रीजाति-स्तद्दशा न भवेदपि तु सुतवस्करा[१]पि न तं त्यक्तुं सम्भवेत् ।

अत्र च तदिदमपि वादितया मा वादीः । तर्हि परमसद्गुण एवासौ कथं पुनर्निन्द्यत इति ॥

यतः ।—

स खलु सर्व्ववशीभाववैभवेच्छुर्गुणान्तराभावा-न्मायामात्रमत्रकारणतयातिमात्रमवलम्बते ॥

तथा हि ।—

वैडालव्रतिकाख्यः,[२] कर्षति लोकं तथा न सल्लोकः ।
आद्यस्तदेकनिष्ठा, तत्राहृत्यं द्वितीयस्य ॥

ततश्च ।—

हास्यभ्रूयुगलास्य प्रभृतिमयमायामात्रेण तदीय-गात्रे सद्गुणमारूप्यं निरूप्यते मनसि तु केवलं मायावलं । किन्त्वस्माभिरिदं दयामयतया भण्यते । न मत्सरतया । यथा त्वयापि तथा ताः शिक्षणीया इति ॥

---

(१) सतस्तु सुतवस्करेति त्रिकाण्डशेषः ।
(२) वैडालव्रतिकः सर्व्वाभिसन्धी दम्भतापसः इति त्रिकाण्डशेषः ।

यतः ।—

यस्मिन् कण्टकविद्ध,स्तस्मादन्यं निवारयत्यपरः(१)।
यः खलु तदुदासीनः,
स हि न हि कथ्येत कण्टकादितरः ॥

तदेवं सखीद्वारा तदखिलं मधुपमुपदिश्य पुनस्तमालपन्तमाशङ्कमाना स्वयमेव सचापलमाललाप ॥

अरे! शिलीमुख ! कथमस्मासु छिद्रमर्पयसि ? । यस्मादेवं गुञ्जसि । कथमेवं विविक्तमतीनामपि भवतीनामद्यापि तत्रातिरिक्तामक्तिरीक्ष्यत इति ॥

तत्रेदमुच्यते ।—

लक्ष्मीरपि तस्य यत्र यत्र चरणारजस्तत्र तत्र निरपत्रपं सजतीति किम्वदन्ती ।
ततः का वयमन्यथा प्रथनाय भवामः ॥

पुनः सविमर्शमाह ।—

अरे ! शुद्धबुद्धे ! त्वं न बुद्ध्यसे । यल्लक्ष्मीमप्येवमेव प्रथममसौ वशयति ॥

यथा ।—

सर्व्वं वशयितुमिच्छति, यः सोऽयं चेद्भवेच्चतुरः ।
मुख्यं वशयति पूर्व्वं, तत्प्रामाण्याद्व्रजन्ति तं सर्व्वे ॥

(१) निवारत्यमुकः इत्यपि पाठान्तरं दृश्यते ।

तस्मात् कथं गोपयामः । यद्यपि न कश्चिल्लाभः स्यात्तथापि मनश्चिल्लात [1] स्य तस्य(२)मायया वयमपि तत्र लुब्धा जाताः स्मः ॥

तया मोहिततया च परमोत्तमबुद्धितामेव तत्र भजामः । न तु मायाबुद्धिमिति ॥

यत्तु शङ्कसे ।—

तर्हि बुद्धे तत्त्वेऽप्यधुना कथं तस्मिन् श्रद्धां धत्से इति ॥

तत्र श्रूयतां ।—

यद्यप्येवं तथापि स्वस्वकामापूर्त्या कृपणानां पारदस्तस्योत्तमश्लोक इत्याख्यासार एवास्मान्निस्तारयिष्यतीदमपि श्रद्धां सम्बद्धां विधातुं सा माया बुद्धिपद्धतिमानयति ॥

तथा हि ।—

देवे(३)ऽप्यश्रद्धेये, तच्छब्देनैव वीक्ष्यते सिद्धिः ।
जैमिनिमुनिशिष्याणां,(४)यज्ञे यद्वत् फलं वलते ॥

इति ॥

---

(१) प्रसह्य चौरश्चिल्लात इति त्रिकाण्डशेषः ।

(२) कृष्णस्य ।

(३) देवशब्देन शब्दात्मकेनेन्द्रादिशब्देनेत्यर्थः ।

(४) मीमांसकानां ।

(१)अथ परमगरिमपरिमलकमनकमलधिया स्वचरणमनुचरन्तं षट्चरणं क्षमापयन्तमिव मत्वा तमाक्षिपन्ती क्षिपन्ती च जजल्प ॥

अरे ! दुष्टषट्पद ! चाटुं घटयन् कथं मच्चरणं शिरसा संस्पृष्टवानसि ? शीघ्रमेव विसृष्टं कुरु । तव गुरोरपि तस्य तुर्य्यकक्षामितं मायामयविनय-चातुर्य्यं विद्मः कः पुनस्त्वं तपस्वी (२) ॥

यतः ।—

कपटं कुरुतां कपटं, तत्र न यत्राभवत्प्रकटः ।
सकृदपि कपटे प्रकटे,
सर्व्वं नटवन्मृषास्य तर्कयेत ॥

तथा हि ।—

सर्व्वत्याजनपूर्व्वं, स्वकलागत्यास्मकानुरीकृत्य ।
सहसात्यजदिह सर्व्वा,
यः पुनरसकौ(३) किमस्ति सन्ध्येयः ॥

(४)अथ विरम्य पुनरिदं सम्यग्गाढप्रणयमय-विवर्त्तमविदुषामरम्यमाह ॥

---

(१) विसृज शिरसि इत्यस्यार्थं विशदयति अथेत्यादि ।
पूर्वार्द्धे सोल्लुण्ठत्वं । उत्तरार्द्धे आक्षेपोऽकृतज्ञता च ।
(२) वराकः ।　　(३) पुनरमुकः इति पाठान्तरं ।
(४) मृगयुरिव इत्यस्यार्थं विशदयति अथेत्यादि ।

अहो ! यस्य मननं न क्रियते तस्य तावन्मर्म्म न म्रियते । पश्य पश्य श्यामजातिमात्रस्य दुरात्मता ॥

तत्रास्तां तावत्पुष्पकीटपरपुष्टादीनां भवतां वल्लीवलिभुगादिषु कृतघ्नता ॥

यः खलु दाशरथिः सर्व्वधर्म्मसारपारङ्गत इति परामृश्यते । तस्य च निरपराधशाखामृगदेव-[१] भूभृति कृतापराधसाक्षाद्विश्रवःप्रभवयोषिति च तथा तथाकृतिः श्रूयते ॥

अरे ! रे ! किमुक्तं ? स[२] खलु स्त्रीसम्बन्धहेतोर्भ्रातृविद्वेषं कृतवान् । सा च स्वैरिणीति तयोस्तत्तन्नायुक्तमिति ॥

धिक् त्वां । सोऽपि स्त्रीजित एवेति चामीकर[३]-मृगमारणे लब्धप्रचारमेव । तस्माद्वयमसिता[४] वाचा कथं सिता[५] भवेमेति मा गर्व्वं कृथाः । एषा च व्याहृतिरत्र सोदाहृतिर्दृष्टा ॥

---

(१) मृगेन्द्र । (२) वाली । (३) सुवर्ण ।
(४) अवद्धाः । श्यामवर्णाः । (५) शुक्लाः बद्धाः ।

आवरितुं निजदोषं, यः खलु वाचालतां याति ।
वाचालतैव तस्मिन्नपरान् दोषान् व्यनक्ति
सर्व्वत्र ॥ इति ॥

यतः स खलु मृगहन्ता परनिन्दाविमुखयापि मया सन्तापादेव निन्द्यते ॥

तत्र तु स्वसम्बन्धं विनापि यत्प्रतिवादितथावादी-स्तत् खलु स्वीयमर्गितं प्रति स्त्रीजितता पर्य्यवसिता स्यादिति तत्र शङ्कार्थं पर्य्यवसीयते ॥

तच्च प्रकटमेवेति कपटं मा कार्षीः ॥

ततश्च माथुरपुरस्त्रीजिततया स्त्रीणामस्माकं हत्यापि तस्मिन् प्रत्यासीदेदिति ॥

यत्र तत्र द्राढिकैव खलु वाढं साक्षिणी ।

तदलं तद्विवादेन । प्रस्तुतमनुसन्धीयतां । दाश-रथिस्तावत् क्षत्रियजन्मा ततस्तस्य क्रूरतादि न दूरतामर्हति पश्य पश्य साक्षात् कश्यपजन्माग्र-जन्मा(१)जन्मावधि ब्रह्मचारी नैकचारी च यः खल्वपरः श्यामः स च बलिं प्रति किं कलित-वान् ।

यस्य च बलिध्वंसिनः सम्यग्दृष्टान्ततया कष्टं बलिभुग्जातिरेव स्पष्टायते ।

(१) विप्रः ।

यत्र वलिं लभते तत्र नवं नवमुपद्रवमातनोतीति । तस्माद्भवन्तः सर्व्वेऽपि साम्यवन्त एव भवद्भिर्वाचामिश्रणामपि कृच्छ्रपदं स्यात् ।
अरे ! किमव्यक्तमुक्तं । तर्हि कथं तेषां चरितं मुनिभिरपि सुनिरूपितं क्रियत इति ।

तत्र च तेषां दोष एव पोषं लभते । तादृशतायामप्यकृशतन्मोहनशक्तिर्मुनीनपि तदासक्तीकुर्व्वती भीषयत एव सर्व्वानिति ॥

अतः ।—

हिंस्रादपि न हि तादृग्, भीतिर्भवतीह लोकानां ।
यादृग्दर्शनमात्रा,द्धर्म्मध्वजिनः प्रजायेत ॥

तथा हि ।—

हिंस्रः खलु किं कुर्य्या,द्यस्माद्भीतया पलायते लोकः ।
हिंस्रात्मापि चरित्रं, शुभमिव कलयन् भृशं शङ्क्यः ॥

(१)अथ क्षणं विश्रम्य चाभिगम्य चाह ।—

अये ! तत्कथां प्रस्तुवतां तावदस्तु मायावशता तत्कथापि तन्मायामयमहसा सहसा दाम्पत्यसम्पत्त्यधिकृतधर्म्माणां मर्म्माणि निर्म्मूलयति ॥

---

(१) यदनुचरित इत्यस्यार्थं विशदयति अथेत्यादि । भ्रमरे दूतत्वमिव तत्र दृश्यमानेषु विहङ्गेषु भिक्षुत्वमारोप्य गदितं ।

निर्मूल्य च प्रातिकूल्यमत्यजन्ती कुट[1] कदम्ब-सम्वलितं कुटुम्बनिकुरम्बं गृहभाजस्त्याजयन्ती तच्च तांश्च दीनतां भाजयन्ती पुनरुत्तरांस्तु विहङ्ग-मानिव भिक्षुचर्य्यां सङ्गमयति ।

अत्र चेदं[2] वाग्युद्धमुद्बुद्धं मा कार्षीः तर्हि तत् कथ-नममी कथमर्हिततमाः शृण्वन्तीति ।

तत्र निरसूयतया श्रूयतां ।—

तत् खलु निष्कलुषवत्पुरतः श्रवणसंज्ञायां[3] रसज्ञायामात्मनः पीयूषतां रूषयति । पश्चात्तु शर्करापूर्णधुस्तूरचूर्णपानकवद्बुद्धिं घूर्णयति ।

ततश्च ।—

शङ्के विहगानामी, किन्त्वेते स्युर्नरा गृहगाः ।
तद्गीतेन विमुग्धा, दुग्धात्मीयाश्च भिक्षवो जाताः ॥

[4]अथ श्रुतिमभिनीय पुनः प्राह स्म ।—

अरे ! तदित्थमात्थ ।—

अयि ! कृष्णतृष्णापात्रि ! यथा सम्भावयसि तथा सत्यं न सम्भवत्यसौ । किन्त्वन्तर्बहिरपि महित एवेति ।

---

(१) गृह ।　　(२) वक्ष्यमाणं ।
(३) कर्णरूपायां ।　　(४ वयमृतामिव इत्यस्यार्थं विशदयति ।

तत्र श्रूयतां ।—

नास्माकं सम्भावनमात्रं तत्र प्रमापात्रं किन्तु प्रत्यक्षं(१) प्रत्यक्ष(२)मपि । यतः पूर्व्वमस्माभिरपूर्व्वतया तद्व्याहृतं भवद्वदेव समाहृत(३)मासीत् । पश्चात्तु मृगं मृगयमाणस्य मृगयोर्गीततत्त्वनदेव ज्ञातं । तत्र महादुःखे समुन्मुखे किं सलज्जतासज्जनेन ॥

श्रूयतां ।—

यतस्तेन(४) लब्धाकर्षास्तस्य वन्यवेशेण धृतहर्षा जाततन्मिलनतर्षाः केवलं करकण्टकनामान्तरखरनखरशरस्पर्शमात्रमुपलभ्य लब्धवेदना वभूविम ॥

तथा हि ।—

शपथं करोमि मधुकर !
न मनसि तस्याङ्गसङ्गमः स्फुरति ।
नखरस्पर्शविषं पुन-
रन्तर्ज्वालाभिरनुमितं क्रियते ॥

तस्मादस्य दम्भारम्भितया मौनमवलम्बमानस्य

(१) प्रमाणं । (२ साक्षात् ।
(३) संगृहीतं । (४) गीतेन ।

तन्मन्त्रिणः प्रतिनिधित्वदर्शनादुपमन्त्रितया दृश्यमान ! तथा तत्पर्य्यायतया भण्डविद्यापण्डित ! तन्यतां कृपा तदन्यवार्त्ता भण्यतां ॥

यतः ।—

नव्या नेयं विद्या, तच्छिक्षातस्त्वयात्र या योज्या ।
तस्मिन् सन्ति पराया-
स्ताभ्यो न भयं कदा स[१] चागन्ता ॥

[२]अथ तदेवं कथयित्वा पुनः स्निग्धकण्ठः प्राह स्म ।—

एवं दिव्योन्मादप्रमादादस्मिन्महाविरहेऽपि सा तदङ्गसङ्गस्फूर्त्तिवलमानमानभङ्गीसङ्गिनी जाता ।

ततश्च भ्रमरस्वभावसद्भावभ्रमणारचनया तत्र वृत्तान्तरेणान्तरिते जाते सेयं कलहान्तरितापि जज्ञे ।

यथा चाह स्म ।—

अघटि मया वत ! कठिनं, रटितं कुटिलं हरेर्दूते ।
वक्रोक्तिं न हि यदयं, वेत्तुं शक्तस्ततश्चलितः ॥
दयितेनान्यालाभा,द्धोपनकामादपि भ्रमरः ।
प्रहितः क्षिप्तो मयका-
निजहृदि कञ्जे निचिक्षिपे चाग्रे ॥

(१) प्रियः ।
(२) प्रियसख ! पुनरागा इत्यस्यार्थं विशदयति अथेत्यादि ।

इति सारोदत् ।—

तस्या रोदनमवकलय्य च सख्यौ रुरुदुः ।

सा तु रुदती तस्य वर्त्मनि नेत्रे नुदती च तं वा तद्विधमन्यं वाकस्मादायान्तमवलोक्य सम्भ्रम-सम्पन्नकम्पसम्पद्दलमानविकृतवर्णां वर्णयामास ॥

तत्र च प्रियसख! पुनरागा इति वक्तव्ये पिपिपिपि प्रीयसख पुपुपुपुप्पूनरागा इति प्राह स्म ।—

अत्र यद्यपि त्वमियायिथ तथापि यस्मात् पुन-रागास्तस्मादस्माकं प्रियसख एव त्वं ॥

अस्यायमभिप्रायः ।—

यः सह खेलति स सखा
यः समदुःखः प्रियः स पुनः ।
अपि दुःखे सहवासी
यः प्रियसखतां स तु व्रजति ॥

तत्र चानुरागयन्तस्तया निजभाग्यविशेषं तर्कयन्ती प्रेयसा प्रेषितः किमिति मनसि प्रोच्य पुनर्वचसि वक्तव्ये प्रे इति वदन्त्येव मुमूर्च्छ ॥

ततस्तद्भूतधैर्यविभवे तस्मिन्नुद्भवे सखीवलयेषु च लब्धबुद्धिविलयेषु सा तस्यामिद्धमूर्च्छायां

मूर्च्छायामेव स्वप्न इव हन्त ! हन्त ! केनास्य-(१) तदेतद्वर्णाविगणनं कुर्य्यामिति विचिन्त्य किञ्चित्प्रललाप ॥

यथा वरय किमनुरुन्ध इति ॥

अत्रावरुन्स इति व्यक्तव्ये तिङ्व्यत्ययः प्रज्ञाव्यत्यय-मेव व्यञ्जयति ॥

अस्यायमभिप्रायः

यत् प्रियसखताभाग्य-स्तस्य धनं तस्य नान्यस्य ।
प्रियतमदूताय तु त-न्नालं किन्त्वस्य वाञ्छितं पृच्छ्यं ॥

अत्र तत्रावेशत एवेदमाशशङ्के । सोऽयमेवमाशङ्कत । इयं खलु मुग्धा भवति न तु विदग्धा ॥

यस्मान्निरवधि निरुपधिसुहृदं मामुपाधिव्याधित-हृदं मन्यत इति ॥

तस्मादिदं ब्रवीमीति ब्रवीति स्म ॥

माननीयोऽसि मेऽङ्गेति ॥

अत्रायमभिप्रायः ।—

यद्यपि मित्रं निरुपधि
कश्चन कस्यापि सन्ततं भवति ।
तदपि सदा परितर्प्यः
स हि न हि भिन्नः स्वतः परिस्फुरति ॥

---

(१) भृङ्गस्य ।

अथ यदि तथा मन्यसे तदा मह्यमेतदेव देहीति प्रोच्य किमप्युननुशोच्य तर्ह्येवात्मानं रथमारोहयितुं प्रयतमानतयासा[१]वस्याः स्फुरति स्म ॥

तत्र तु सेयं काकुव्याकुलं प्रलपति स्म ।—

"नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वे"मिति ।

अस्यायमभिप्रायः ।—

मधुकर ! स भवान् जात्या, सर्वेषां च प्रमोदमाहर्त्ता ।
मत्प्रियसखतामञ्च,नयसि कथं मां सपत्नीषु ॥
त्वं न हि यन्मम दुःखं, कृष्णाश्चात्र[२]ततः सपत्नीषु ।
अविभ[३]र्मामपि,विरहव्याधिं नेतुं सयत्नतामभितः॥

तत्र चेदं पुनरुट्टङ्कयति स्म ।—

किमयं ब्रूते । साम्प्रतमेव स गायत्रव्रतमुत्तीर्णवानस्ति । कथं मिथुनीभावमापद्येतेति ।

तत्रेदं व्रजाणीति ब्रवीति स्म ।—

"सततमुरसि सौम्य ! श्रीवधूः साकमास्त" इति ।

अत्र चायमभिप्रायः ।—

तस्योरसि या रेखा सा खलु लक्ष्मीरिति प्रथितं
तं मिलती किल तरुणी सा नवतरुणीरहो भवति ॥

---

(१) दूरः ।
(२) विदा लङि प्रथममध्यमपुरुषयोर्द्वयोरपि रूपमिदं ।
(३ इदमपि तथा ।

तस्मात् ।—

इत्वरी[1]गामियं रीतिरेति स्वैरमितस्ततः ।
नयन्मां नगरं तासां दशां मामिव[2] मानय ॥

[3]अथ पुनः कथमपि तद्वासनया कृतवहिर्वृत्ति-प्रकाशनया चक्षुषी समुन्मील्य निभालयन्ती चिरं गतमपि तमेव द्विरेफं साक्षादिव वीक्ष्यते स्म ।

वीक्ष्य च पुनर्विरहमेव सन्ततं निरीक्षते स्म ।

तत्र च पृच्छ्यमिदं पूर्व्वं नापृच्छ्यमिति स विप्रतीसारं[4] पृच्छति स्म ।—

"अयि ! वत ! मधुपुर्य्यामार्य्यपुत्रोऽधुनास्त" इति ।

अस्य चायमभिप्रायः ।—

तत्त्वं ब्रवीमि न रहस्त्वयि किञ्चनास्ते
भृङ्गाधिप ! स्वहितकारिणि वन्धुवन्धौ ।
धर्म्मे विवेचनमिते स तु नः पतिः स्या-
दौत्पत्तिकी हि रतिरत्र मिथः प्रमाणं ॥
कष्टं वत ! प्रियतमः स पुरि प्रयातः
स्तद्धश्च वृत्तमपि नात्र चिरादुपैति ।

---

(१) कुलटेत्वरी । (२) लक्ष्मीमिव ।
(३) अयि वत ! मधुपुर्य्यामित्यस्यार्थं विशदयति अथेत्यादि ।
(४) सानुतापं ।

तत्रानवस्थितिमथास्य वितर्क्य चिन्तं
सन्दिह्य दाह्यदशया वत ! भस्मति स्म ॥

तत्र तन्मुखात्तस्य सुखावस्थितिसम्मतिं मतिमानीय पुनर्विशेषं पृच्छति स्म ।—

"स्मरति स पितृगेहान् सौम्य ! वन्धूंश्च गोपानि"ति ॥

अत्र चायमभिप्रायः ।—

वृत्तं चेद्व्रजमाव्रजत्यनुदिनं सोऽपि स्मरत्यन्वहं
तं तातं जननीञ्च तामहह ! तान्यात्मीयवृन्दान्यपि ।
तर्हि स्यादुभयत्र सन्ततमिथः स्फूर्त्तिः समत्तप्रभा
येन[1]स्याम वयञ्च हन्त ! मृतकाः
शुद्धामृते[2] नोक्षिताः ॥

तत्र च तस्य सम्मतामिव विविच्य पुनः सङ्कोचं व्यतिरिच्य पृच्छति स्म ।—

"क्वचिदपि स कथां नः किङ्करीणां गृणीत" इति ॥

अस्य चायमभिप्रायः ।—

क्वचिदपि रहसि स्वां मूर्त्तिमस्मन्निषेवा
विरचितचरवेषां वीक्ष्य चैतद्ब्रवीति ।

---

(१) श्रीकृष्णस्य तातादेश्च मिथः स्फुरणेन ।
(२) येनेति विशेष्यं ।

अपि वत ! परिचर्य्या कारिका हन्त ! नामूः
स्मरसि यदसि दूरे नात्मना(१) सार्द्धमेषि ॥

तदेतद्विलपितं वलयित्वा "भुजमगुरुसुगन्धं मूर्द्धन्यधास्यत् कदा नु" इति वदन्मनाः शुण्डा(२)वच्छुजशुण्डामपि मदस्थानतयानुभवन्ती या वभूव सेयं सम्प्रति तद्विरहदहनं वहन्ती भुजेतिमात्रं वचसि रचयन्ती मूर्च्छति स्म ॥

अत्र धास्यतीति वाच्येऽधास्यदिति तस्या भ्रमविकार एव ।

मूर्च्छा तु यथा ।—

वैस्वर्य्यात् कृशिमान्वयादवयवस्थित्यन्यभावाश्रया-
द्वैवर्ण्यादपि या न सेति मुहुरप्यूहां वभूवे यदा ।
तर्ह्येषा वत ! लालयावृतिवशाच्चेष्टाविघट्टादुत
श्वासाद्यानुपलम्भनान्निजतनावस्तीति नातर्कि च ॥

तद्वचनस्य चायमभिप्रायः ।—

गुरुमगुरुमतीत्य स्वीयपाणिं सुगन्धि
निजपरिचरणायां स्वीकृतिं लिप्समानः ।

---

(१) मनसा । (२) शुण्डापानमदस्थानं ।

अहह ! शिरसि नः किं कह्यपि स्पर्शयिष्य-
त्यनुदिनमपि येन स्फीतचित्ता भवामः ॥इति॥

तदेवं वर्णयित्वा स्निग्धकण्ठः स्वं दुःखं राधाकृष्णयोः शृण्वतोः कृष्णं प्रति वर्णयामास ।—

सुरूपा वैरूप्यं मृदुलहृदयाक्रूरतरतां
सुलज्जा वैयात्यं[(१)] स्मितमधुरिता[(२)] म्लानमुखतां ।
तदागादेषा यत्तव विरहतः कृष्ण ! सुभगा
तदेतन्मच्चित्तं विमृशदभितस्तापमयते ॥

असौ क्व विरहव्यथा वलित[(३)]शून्यता सर्व्वतः
क्व वा कलि[(४)]रितः कलेर्व्यवहिति[(५)]श्च सार्द्धं त्वया ।
इतीह वृषभानुजा हृदयदुर्दशामामृश-
न्मनो मम मनोहराखिल[(६)]मुकुन्द ! विभ्राम्यति ॥

अथ कृष्णेन परमतृष्णेनाश्लिष्टतया म्लिष्टाधिकायां[(७)] राधिकायां तस्यां सभायामपि महासुखाधिकायां जातायां मुहूर्त्तमेकं त[(८)]त्प्रतिपदेव तस्मिन्नितिहासाध्ययने प्रतिपद्बभूव ।

---

(१) धार्ष्ट्यं धृष्टे धृष्णग्वियातश्च । (२) मधुरीकृता ।
(३) वृत्त । (४) कलहः ।
(५) कलहान्तरिता । (६) वहुव्रीहिः ।
(७) मनः पीडायां । (८) पूर्व्ववृत्तज्ञानं ।

यतस्तस्य च सम्मदान्तर्लीयमानं स्वान्तमपि चिराय स्वान्ताय कल्पते स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु दूतभ्रम-
करभ्रमरसम्भ्रममेकादशं
पूरणम् ॥

द्वादशं पूरणम् ।

एतदनन्तरं मधुकण्ठ उवाच ।—

अथ मुहूर्त्तं मूर्त्तभावमितायामस्यां तथा सर्व्वस्यामपि कृततद्वरिवस्यायां हा ! सखि ! राधिके ! हा ! कृष्णप्रेमाधिके ! हा ! सदास्मदानन्दसाधिके ! त्वामिमां शन्तमदृशं हन्त! हन्त! कीदृशं पश्याम इति विलापवश्यायां स श्यामसुन्दरस्य सेवकवरः(१) स्वयमपि परिदेवनपरः कथमपि निजदेवविरचितस्फूर्त्तिवदेव तन्मूर्त्तिप्रतिकारकरः केवलेन त(२)त्कलेवरसुरभितरसुरभिद्रव्येण निजसङ्गानीततया नव्येन चैतन्यमाचितवान् ॥

तदाचित्य च तां तदानल्पसङ्कल्पात् कृष्णसङ्गतकल्पामध्यवस्य मध्यमध्यास्य सर्व्वाः परितः सम्वास्यन् चिरादाश्वास्य च प्रथमं ताः पूर्व्ववत्

---

(१) उद्धवः । (२) कृष्ण ।

कृष्णस्य तासाञ्च महिम्ना दुर्द्धरतज्जातीयभावतः शिथिलयितुं साम्नाललाप ॥

अहो ! यूयं पूर्णा निखिलमहिता याभिरभित-स्तथान्यस्तं चित्तं भगवति समस्तार्थ(१)भजने ।
विदूरे युष्माकं न स भवति मां किन्तु विरह-च्छलः प्रेमादूरं निजमहिमपूरं ज्ञपयति ॥

तदेवं स्तुत्वा स खेदमिव निवेदयामास ॥

सन्देशहर्त्तुः प्रथमं निशम्य
दुःखं सुखं वा तनुते विवेकी ।
तस्मादनाकर्ण्य पुरा स्वयं यः
सम्भाव्य तत्त(२)न्मनुते स वालः ॥

तथा हि ।—

यदा हि मामत्र प्रस्थापयितुमभ्युत्थानमाचरितं तेन भवत्प्रियतमेन । तदा मय्येतन्निभृतमुक्तं ॥

मम तादृगुद्धव ! श्रीमदुद्धव ! श्रूयतां ॥

"गच्छोद्धव ! व्रजं सौम्य ! पित्रोर्नः प्रीतिमावह ॥
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥

(१) पुरुषार्थ ।　　(२) सुखदुःखं ।

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥
ये त्यक्तलोकधर्म्माश्च मदर्थे तान् विभर्म्यहं ।
मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥
स्मरन्त्योऽङ्ग ! विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ।
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ॥
प्रत्यागमनसन्देशैर्वल्लव्यो मे मदात्मिकाः" ॥इति॥

तदेवं "गच्छोद्धव ! व्रजं सौम्ये"त्युभयत्र साधारणतया मां विनुद्य पितरावपि श्लोकचतुर्थांशमात्रेण प्रस्तुत्य भवतीनामनुरागं चतुर्भिः श्लोकैः कथयित्वा पुनराविस्तरां[१] विस्तरश्च कृतः ।

तदेतावदुद्धवस्ताभिर्बुद्धमवधाय तत्र च तेन स्वप्रभुवरेण स्वस्मिन् पितरौ प्रतिजानासि त्वमित्यादिपूर्व्वोक्तपद्यरीत्या[२] य ईषद्विस्तरः कृतस्तमनूद्य पश्चान्नितान्ततान्ताः कान्ताः प्रति प्रथिततया य[३]स्तमप्यनूदितवान् ॥

(१) प्रकटतरं । (२) अनूद्येत्यन्वयः ।
(३) विस्तारः ।

यथा ।—

व्रजे नार्य्यः काश्चिद्दुराधिगमभावा·वत ! मया-
ऽयतस्ता[(१)] नैव स्यु[(२] विरहमपनेतुं तव गिरा[(३)]।
मदीयं सन्देशं विनिदिशसि चेत्तश्च विविधं
तथा वारम्वारं कथमपि भवेयुः किल तदा ॥
मदर्थं सन्त्यज्याप्यनिशमशनाद्यं वरदृश-
श्चिरं जीवन्तीति स्फुरति न मृषा विश्रुतिरसौ ।
मयि प्राणास्तासां सदमृततनौ मय्यपि मनः
सदा सन्त्य[(४)]स्ती[(५)]ति प्रवलमिह यत्कारणमिदं ॥
सदा मामेवामूर्दयितमतुलप्रेमवसतिं
तथात्मानं मत्वा किल निखिलमस्यन्ति समयं ।
वहिर्दृष्ट्या ये वा वत ! पतितया भान्ति पशुपाः
सलोका वा धर्म्मास्तृणवदजहुस्तानपि पुरा ॥
सलोकं धर्म्मं प्राग्यदपि विजहुर्मद्रतिवशा-
दमू रे ! तद्ध्यन्यां तदपि दधते तत्र कुदशां ।
पुरा चित्ते तत्तत्स्वजनकृतिपूर्व्वं रहसि मां
श्रिताः सम्प्रत्येतद्युगल[(६)]मथ साक्षाद्विदधति ॥

---

(१) कर्त्र्यः ।　(२) सत्तां न प्राप्नुयुः ।
(३) हेतुना ।　(४) प्राणाः ।
(५) मनः ।　(६) पतीन् सलोकान् धर्म्मान् ।

अहो ! ये येऽन्ये च प्रथमभजनाय प्रतिनिजं
स्वधर्म्मं तल्लोकानपि परिहरन्ति श्रवणात: ।
अमी त्यक्तुं शक्याः स्खलितभजनत्वेऽपि न मया
कथं तास्त्यज्यन्तां वत ! नवनवप्रेमतनवः ॥
यदप्यन्तःस्फूर्त्तिर्भवति मम तासु प्रतिपदं
तदीयप्राणानां धृतिभृतिविधानक्षमतमा ।
तथाप्युद्योतन्ते क्वचन मम चेन्माथुरकथा-
स्तदा मद्दूरत्वस्मरणमनु मुह्यन्ति वत ! ताः ॥
क्षणः कल्पस्तासां भवति विरहेहा मम यतः
स्फुटं रासारम्भे कतिचिदगमंस्तामपि दशां ।
तथाप्येतासां यन्न वहिरसवो यान्ति तदिदं
मदीयप्रत्यावृत्त्युपधिशतयुग्वाचि कवलं ॥
प्रतिश्रुत्य प्राग्यन्निजपितृतया वल्लवपती
दिशामि त्वां गन्तुं स्वमपि मनुवे वल्लवमितः ।
अतो मे वल्लव्यो म इति निजताव्यञ्जि वचनं
तथा ज्ञेयं तासां यदिह न मया कापि च भिदा ॥

तदेवमाकर्ण्य मया निवेदितं । तर्हि कथं मध्ये मध्ये सर्व्वतः प्रकाशरम्यतया स्वयं न गम्यत इति ।

तदेतदाकर्ण्य तेन च वैवर्ण्यपूर्व्वकं मयि मर्म्म समुद्घाटितं ।

यद्यपि शातूर्वविद्रवः समाधातुं शक्यते तथापि तत्र चात्र च कश्चन सङ्कोचस्तत्र गन्तुं रचितारम्भमपि मां स्तम्भयति ॥

तथा हि ।—

ताः खलु केवलं मन्मनस्का अपि तु ब्राह्मणस्य निजब्राह्मण्यां ममेयं ब्राह्मणीति वचनवन्मम वल्लवपतिपुत्रस्य "वल्लव्यो मे मदात्मिका" इति वचनव्यञ्जितसाम्प्रतानुभवान्मम नित्यप्रेयस्य एव तथापि नूनं कयापि मायया परदारतया तत्र व्यवहारः सर्व्वमाससार ।

यः खलु पुरा व्रजप्रेमावेशवशतया लोकवल्लीलामनुशीलयता मयापि दुरपसार एवासीत् ।

ततश्च जागरूकतदनुरागवद्धतया तासां मयि तासु च ममासक्तिरतिरिक्ता जाता ।

यस्यां लोकवल्लीलावेशवशतया तत्तदर्थं दृष्टमदृष्टमप्यर्थं पूर्व्वमपूर्व्वतया कुर्व्वन्नहमपि यत्कृतवांस्तत्कथं प्रणयवत्सु भवत्सु गुप्तं कुर्य्यां ।

यत् खलु सार्व्वज्ञादमन्देन स्कन्देन च पुरा स्वपुराणे तुलसीस्तुतिमनु प्रस्तुतिमानिन्ये ॥

तथा हि ।—

"गवां हिताय तुलसी गोपीनां रतिहेतवे ।
वृन्दावने त्वं वपिता सेविता विष्णुना स्वयं ।
गोकुलस्य च वृद्ध्यर्थं कंसस्य निधनाय च" ॥इति॥

यस्याश्च मदासक्तेः प्रभावेण तासां तेषु पतिष्वन्येषु रहःसङ्गः शशशृङ्गतामवाप। पुत्रायमाणेषु भ्रातृपुत्रादिषु चासङ्गः शिथिलाङ्गतां गतवान् ॥

अथ पुनराशक्तिः सा क्रमादमर्य्यादतया केन केनचित् पर्य्यालोचिता । यत एव सज्जलज्जतया तस्मात्कुलान्तरबलान्मया व्यवहितं ॥

ततश्च पुनर्मम तत्र प्रकटगमने सति तासामङ्गीकारे पूर्ववदेव लज्जा प्रसज्जेदनङ्गीकारे च तासां प्राणत्राणं न स्यात् । तथापि तत्र गत्वा तस्य(१) सावधानं समाधानं कथमपि प्रार्थनीयमित्युत्कण्ठया धैर्य्यं कुण्ठयन्नत्रत्यपित्रोरुपकण्ठे गद्गदकण्ठतया तत्रत्यमित्रादीनां दुःखं वर्णयंस्तत्र मध्ये मध्ये गमनाय न्यवेदिषं ॥

तौ तु नाज्ञां दत्त इति तदवज्ञाय गमने तदपि

(१) प्रागुक्तस्य ।

न मङ्गलसङ्गि स्यादिति विभाव्य निरुत्साहतां गच्छामि ॥

किं वहुना? मध्ये मध्ये तेषां पित्रादीनामत्रानयनाय च तयोरनुज्ञा जिघृक्षिता। सा पुनर्निजयज्ञसूत्रयज्ञमनु च तदनाह्वानान्न सम्भाविता। तस्माद्यावदहं समयगत्या मत्या समादधामि तावल्लब्धदुरवस्थाविशेषतयात्मनिर्विशेषं त्वामेव तत्र प्रस्थापयितुमुद्यतोऽस्मि ॥

तत्र यद्यपि भवता सर्व्वसमाधानमनुसन्धातव्यं तथाप्ययं मम सन्देशलेखचयस्तासां पुरः प्रवेशनीयः ॥

वारं वारं स्वयमेव वाचनीयश्च। यतस्ताः स्वाश्रुभिरन्धायमानाः स्वयं नानुसन्धातुं शक्ष्यन्तीति ॥

तत्र प्रथमलेखो यथा।—

"भवतीनां वियोगो मे न हि सर्व्वात्मना क्वचित्" इति ॥

अथ तदेतावदाकर्ण्य ताभिर्म्मनसि विचारितं ॥

नन्विदं स्वस्य ब्रह्मताज्ञानमिवोद्दिष्टं। सर्व्वात्मना

मे मयेति सामानाधिकरण्यात् । तदलमनभीष्ट-श्रवणेन ॥

अथ सावज्ञं पुनः पृष्टं ।—

किमप्यन्यदस्तीति । स तु द्रुतवाञ्छिततदन्तरन्तरर्थज्ञापनया तदाज्ञापनया पुनर्लिखितमिव तदेव वाचितवान् ॥

तस्मिन्नेव वाचिते ताभिः पुनः स्वगतं परामृष्टं । नन्वनेन पुनरुक्तेन पूर्व्वपूर्व्वमुपदिष्टं स्फूर्त्तिलक्षणमिवादिष्टं । सर्व्वेण प्रकाशेन वियोगो नास्ति । किन्तु मथुरास्थेन प्रकटेन वियोगः । भवतीषु स्फुरता तत्रस्थेन संयोग इति ॥

तदलं पिष्टपेषणसर्गकरचक्र(१)वर्गस्य घर्घरशब्द-श्रवणेनेति ॥

अथ ताभिः पुनः पृष्टस्तदेवाचष्ट ।—

ताभिश्च तत्र सचमत्कारं विचारितं ॥

पुनःपुनर्लिखितं खल्विदमपरापरसन्दर्भगर्भं भवेत् ॥

तृतीयश्चायं सन्दर्भः स्फूर्त्तिरूपतां निषिध्य साक्षाद्रूपतां विधत्त इति ॥

---

(१) पेषणार्थपाषाणयन्त्रचक्र ।

ततश्च तन्निर्भयाय विचारमेवाचरिष्यामः ॥

यतः ।—

अलङ्कारमलङ्कृत्वा[1] यत्र शोभा भवेन्न हि ।
यो न बुध्येत तत्रा[2]पि खलूक्त्वा खलु वाचिकं[3] ॥

इति ॥

अथ पुनः पृष्टः किञ्चिदन्यद्वाचयामास ।—

यथा ।—

"यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ।
तथाहञ्च मनः-प्राण-बुद्धीन्द्रिय-गुणाश्रयः" ॥इति॥

तत्र प्रथमत एवं ताभिरन्तर्विचारितं । नूनमस्मत् क्लिष्टताखण्डनाय स्वस्य सर्व्वोपादानतया सर्व्वाश्रयतया च ब्रह्मज्ञानमेवोपदिष्टमस्ति । तच्चास्मासु न पर्य्याप्तं ॥

यतः ।—

यद्ब्रह्मशर्म्म हृदये सनकादयः स्वे
सर्व्वोर्द्ध्वमप्यनुभवन्ति सदेति सिद्धं ।
तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कवायुरपि तद्विजितीकरोति ॥

---

(१) अलङ्कारो न कार्य्य इत्यर्थः ।
(२) अत्रे । अतो विचारयाम सन्देशार्थं ।
(३) वाचिकं न वक्तव्यमित्यर्थः ।

अथवा महाकरुणाया परमोदारसारतां गतः कथ-ममृतमोदकाच्छेदपूर्व्वकं गुडधानालड्डुकदान-वत्तत्कुर्य्यात् ॥

तस्मात्पुनश्च पृच्छाम इति पृष्टे तस्मिन्नेव तेन च वाचिते तदिदं ताभिः स्व-हृदि विचारितं ।

आं ! आं ! ब्रह्मतापदेशात आत्मन एव साक्षा-देवात्र स्थितिरुपदिश्यते । मम स्फूर्त्तिः खलु मूर्त्तिरेव निर्णीयतां । यतो यथा भूतानि स्वस्व-कार्य्याणामाश्रयरूपाणि तेषामन्तः पर्य्यालोच्यन्ते तथाहञ्च भवतीनां मन आद्याश्रयरूपः सोऽय-मसितसुन्दराणां भूपस्तत्र पर्य्यालोच्यतरामिति ॥

अथ तृतीयं वारमपि तदेवाकर्ण्यातीव निर्णीत-मिति स्थिते पुनः पृष्टस्तदिदं निर्वाचयामास ॥

यथा ।—

"आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ।
आत्म-मायानुभावेन भूतेन्द्रियगुणात्मना" ॥इति॥

तत्र प्रथमतस्ताभिरिदं चेतसि विचारितं ।—

तदिदं स्वस्य खल्वीश्वरताज्ञानामिव व्यञ्जितं लगति ॥

यत्र स्वस्यैवेश्वरत्वमवगमितं । तदिदं चास्मच्चेतो-रुच्चणाय निक्षिप्तमिति गम्यते । भवतु किं तेन ? ।

यतः ।—

केषाञ्चन ब्रह्म-सुखानुभूतिः
केषाञ्चन स्यात्परदैवतं सः ।
महन्मते[१] तत्र विचार्य्यमाणे
धन्यास्तु ते ये विरहन्ति तेन ॥इति॥

द्वितीयवारतस्त्वेवं विविक्तं ।—

नेदमीश्वरताज्ञानं । किन्त्वीश्वरवदात्मनः शक्ति-र्व्यञ्जिता ॥

तथा हि ।—

आत्ममाया खल्वत्र तदिच्छाशक्तिवाचिका । यस्मा"दात्ममाया तदिच्छा स्या"दा"त्मेच्छानुगता वात्मे"त्यादिकं पण्डिताः पठन्ति ॥

भूतं चात्र नित्यसिद्धं वस्तु प्रस्तुतं करोति"लोक-नाथं महद्भूत"मितिवत् ।

ततश्च नित्यसिद्धेन्द्रियगुणविग्रहेणात्मना कारणेन तादृगात्मन्येवाधिकरणे यदृच्छया परमाश्चर्य-

(१) इत्थं सतां ब्रह्मसुखेत्युक्तेः ।

कारिनिजेच्छाशक्तिप्रभावेण करणेनात्मानं सृजे सृजामीत्यादि योज्यं।

तत्र सृजामीति निजभक्तान् प्रति प्रकाशयन् नव-मिव मन्ये इत्यर्थः। हन्मीति ततः स्वयमन्तर्धाप-यन् हन्त! हन्मीवेत्यर्थः॥

अनुपालय इति तेषु पुनराविर्भावयन् पालित-मेव करोमीत्यर्थः। तदेतच्च तत्र स्थितावप्यत्रात्म-स्थितिज्ञापनाय व्यज्यते॥

अथ तृतीयवारतस्तु तदेव निश्चितं। तदेवं स्थिते पुनः पद्यान्तरं त्रिर्वाचयामास॥

यथा।—

"आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तो गुणान्वयः।
सुषुप्तिस्वप्नजाग्रद्भिर्मनो-वृत्तिभिरीयते"॥ इति॥

तत्र च प्रथमतस्तासां मनसा विचारश्चायं तदिदं स्वस्माद्वहिर्म्मुखता सहितत्वाय पुनरस्मासु शुद्ध-जीवताज्ञानमेवादिष्टं तदपि कृष्णमेनं वयं विद्मः स्वात्मानमखिलात्मनामिति(१) जीवानां कोटि-स्तन्निर्मञ्छनाय प्रयुञ्जानानामस्माकं नोचितमिति॥

---

(१) कृष्णमेनमवेहि त्वमिति स्मारितं।

द्वितीये त्विदं चिन्तितं ।—

न हि न हि; यं खलु श्यामात्मानमात्मानमत्र प्रकाशयति तमेव स्वयं स्तौति ॥

यस्मात् सर्व्वविद्याप्रचुरत्वं दोषरहितत्वं सर्व्वातिरिक्तत्वं परमगुणशालित्वं सर्व्वदेवास्मासु समन्वितत्वञ्च बोध्यते ॥

अथ तृतीयेऽपि तदेव निर्णीय स्थितासु पुनर्लेखान्तरं वारत्रयं वाचितवान् ॥

"येनेन्द्रियार्थान् ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥
एतदन्तः समाम्नायो योगः साङ्ख्यं मनीषिणां ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः"॥इति॥

अत्र च प्रथमं ताभिरन्तरे विचारयामासे ॥

ननु योगाङ्गमिवेदमुपदिश्यते । तच्चात्र मनोनिरोधलक्षणं ॥

तथा हि ।—

उत्थितः पुमान् यथा मिथ्याभूतमेव स्वप्नं ध्यायति एवं बाधितानपीन्द्रियार्थान् येन मनसा ध्यायेत् ध्यायंश्च येनेन्द्रियाणि प्रत्यपद्यत प्राप

तन्मनः विनिद्रः अनलसः सन् निरुन्ध्यादिति । तत्किं स्वस्मान्मनोनिरोद्धुमुपदिष्टमिति ॥

त्वयां विभाव्य द्वितीये विचारितं ॥

न हि न हि । यतः ।—

"पुरापि ते ते वहवोऽपि योगिन-
स्तदर्पितेहा निजकर्म्मलब्धया ।
विबुध्य भक्त्यैव कथोपनीतया
प्रपेदिरे कृष्णगतिं परात्परां" ॥ इति ॥

तस्यैव हेयत्वं दृश्यते ॥

ततो विरहभावादेव मनोनिरोद्धुमिति मननविषयीक्रियते ॥

तदेवं तृतीये च निश्चित्य स्थितासु तासु तत्सम्वादितया पुनरन्यच्च वारत्रयं वाचितवान् ॥

"यत्त्वहं भवतीनां वै दूरे वर्त्ते प्रियो दृशां ।
मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥
यथा दूरचरे प्रेष्ठे मन आविश्य वर्त्तते ।
स्त्रीणाञ्च न तथा चेतःसन्निकृष्टेऽक्षिगोचरे" ॥ इति ॥

अत्र च प्रथमतस्तावदिदं हृद्येव विचारितं ॥

यत्पुनरहं भवतीनां दृशां प्रियोऽपि दुरे वर्त्ते तत् खलु मदनुध्यानकाम्यया दर्शनासम्भावनान्मम

निरन्तरध्यानस्यैवेच्छया यो मनसः सन्निकर्ष आवेशस्तदर्थमेव ॥

यतो "यथा दूरचर" इत्यादि ।—

अत्र स्त्रीणाञ्चेति पुंसश्च प्रेष्ठास्वित्यर्थलाभान्ममापि भवतीषु तादृशत्वमिति व्यञ्जितं । तस्मादस्माकं स्वस्मिन्मनस आवेश एव तस्याभीप्सितः । नतु स्वस्मान्निरोधः । तथापि हन्त ! हन्त ! किमिदमुपदिश्यते ॥

"क्षणं युग-शतमिव यासां येन विनाभवत्" तासामस्माकं तस्मिन् किं मनो नासीदिति ॥

पुनर्द्वितीये त्विदं मननविषयीकृतं ॥

आं आं मनसः सन्निकर्षार्थमिति मनसो हेतोर्यः सन्निकर्षश्चक्षुर्गोचरता तदर्थमित्येव तात्पर्य्यार्थः ॥

यतस्तस्यायमभिप्रायः । मम खलु द्विधा साक्षात्कारः स्यात् । एकश्चक्षुःप्रधानतया मनःप्रवेशः परामृश्यते । यथा जागरणे ॥

परस्तु मनःप्रधानतया चक्षुर्गोचरता विमृश्यते । यथा स्वप्ने ॥

तत्र तु तत्र स्थितस्य मम पूर्व्वः पूर्व्वमेवासीत् । सम्प्रति तु दूरस्थितस्य परः । मनःप्रधानतया

स एष च स्वप्न इव भाति । वस्तुतस्तु न स्वप्नः । ममापि तत्र साक्षात्कृतिस्फूर्त्तेः ॥

साम्प्रतं त्वेष एव साम्प्रतः स्फुरति । यस्माद्गुरुवर्गाल्लज्जां सञ्जित्वा प्रकटं दूरमटितवतो ममायमेव युष्माकं सङ्गः सुष्ठु सङ्गोपनविषयः स्यात् । तस्मान्मया विचार्य्य कृते भवतीभिरत्रैव सन्तोष्टव्यमिति ॥

ततश्च विरहभावादेव मनोनिरोधः पूर्व्वलेखेन सुबोधः ॥

अथ तृतीये च तद्दिने निश्चित्य स्थितासु तासु पुनरन्यत्पद्यद्वयं तथा वाचितवान् ॥

"मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथ ॥
या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः ।
अलब्धरासाः कल्याण्यो ! मापुर्मद्वीर्य्य-चिन्तया" ॥

इति ॥

अत्र च ताभिरप्रकाशं विचारितं ।—

अस्माभिर्यत् पूर्व्वं पर्य्यायतः पर्य्यवसायितं तदत्र प्रथमत एव केवलं स्वाभिमतमुपलब्धं ॥

तथा हि ।—

कृष्ण इत्युपक्रान्तं विशेषणमुपलक्षणतया परपरत्रापि संक्रान्तं कार्य्यं ॥

ततश्चायमर्थः ।—

यद् यस्मात् पूर्व्वहेतोः कृष्णे कृष्णनामाकारविशेषतया प्रसिद्धेन पुनरितरनामाकारतया विप्रतिसिद्धे मयि विमुक्तविरहाशेषभावनं मनःस्वयमावेश्य विनिवेश्य मां कृष्णनामाकारं नित्यं नित्यताशालियुष्मदनुसारिविहारमनुस्मरन्त्यः स्मरणादपरिहरन्त्यस्तं कृष्णनामाकारं मामचिरान्निजनिकटविराजमानतया प्राप्स्यथ ॥

अथ तदिदमुदाहरणद्वारा स्फूर्त्तिधारामानयति या मयेति ॥

याः काश्चन "शुश्रूषन्त्यः पतीन् काश्चि"दित्यत्र पतिशुश्रूषणेन युष्मदन्यतया विपश्चिद्भिर्निश्चिताः पतिभिर्निरुद्धतया व्रज एव स्थिताः इति वने ऽस्मिन् सम्प्रत्यपि निगूढं तत्र स्थितस्य मम कृष्णनामाकारस्य प्रत्यक्षविषये वृन्दावनरूपतया लब्धातिशये पूर्व्वं क्रीडता मया कृष्णनामाकारेण सह

प्रकाशं रासमलब्धा मम कृष्णनामाकारस्य वलवत्तरलीलाचिन्तया मां कृष्णनामाकारमप्रकाशमपि धृतविहारपारावारमापुरिति ॥

अत्रास्मदः पदानां मयीत्यादिनिगदानां कृष्णपदविशेषणतास्पदानां प्रतिपद्यं[१]त्रिस्त्रिरावृत्या प्रतिपद्यमानानां परिवृढीभवनं[२]तमेवार्थं दृढीकरोतीति गम्यते ॥

"हे कल्याण्य!" इत्यनेन साधकचरताभासां[३]तासामिव न शाश्वतप्रेयसीरूपतया श्वःश्रेयसवतीनां भवतीनां मायापत्यादिपरिहारपुरःसरमदेकपतितामप्रकाशे शरीरपरीहारविडम्बनं सम्भवतीति च ताभिस्तदुपदेशप्रभावादवगत्य निर्णीतं ॥

तदेतावत्कथयित्वा कथकश्चिन्तयामास ॥

देहादीनां विगानेऽप्यधिगतिगमिते तेषु रागप्रकर्षस्त[४]त्प्रावृण्वत् जगत्यां समुदयति मुहुर्यद्वदुच्चैर्जनस्य ।

---

(१) श्लोकं । (२) समर्थाभावः ।
(३) षष्ठी ।
(४) तद्वैभवं प्रावृण्वत् समुदयतीति योज्यं ।

तद्वद्गोष्ठे वकारैरपि समधिगते वैभवे तत्र[१] तस्मा-
न्नाभद्रं[२]नापि भद्रं[३] गणयति सहजः
सो[४]ऽयमन्तर्विरोधि ॥

अथ स्पष्टमाचष्ट ।—

तदेवं निर्णीय नित्यमन्तः कृष्णसंयोगमुन्नीय-तमुद्धवं प्रति सम्प्रीय च सुप्रलाप[५]मुपक्रममाणा मुहूर्त्तद्वयं मूर्त्तपरमानन्दरूपास्तेन सूपास्यतमा वभूवुः ॥

हन्त ! हन्त ! तदनन्तरं तु क्रमशः पुनर्वहिर्दृष्टिं संक्रममाणा विलापमेव पर्य्यवसाययामासुः ॥

तथा हि ।—

सुखं वा दुःखं वा समनु गणयामो न हि वयं
सदा तद्[६]ध्रुकंसस्य तु मरणमौऽमा-[७]
जनि च तत् ।
अथो[८]पृच्छामस्त्वां निजयदुगणैरावृततया
विपत्तानाघ्रातः स निवसति किं माथुरपुरे ॥

---

(१)तत्र श्रीकृष्णे यो रागः सोऽपि तद्वैभवं प्रावृण्वन् समुदयति तस्मादिति वाक्यान्तरं ।

(२) देहविगानं ।　　(३) वकारवैभवं ।

(४) रागप्रकर्षः ।　　(५) सुवचनं ।

(६) कृष्ण ।　　(७) वाञ्छितवत्यः ।

(८) एतदनन्तरं ।

स्वसाम्यात्तृट्कष्टं परगमपि विज्ञस्तत इदं
विपृच्छामस्त[१]त्किं त्तपयति हरिः पौरसुदृशां ।
य[२]दस्माकं स प्रागकृत हसितास्निग्धनयना-
म्बुजप्रान्तेनाघ्राप्यहह ! नववय[३]द्विलसति ॥
भवेन्नारी-जाते रुचिरुचितकान्ते सुमधुरा
हरौ चेदेषा स्यादमृतमपि निन्द्यं वितनुते ।
तदेवं ब्रूमस्त्वां शृणु रुचिविशेषज्ञहृदयः
कथं तासु स्नेहं स किल न विधत्तां प्रतिपदं ॥
लभन्तां नागर्य्यः सुखमघरिपोरेष च ततः
प्रमोदस्तस्मिन्नः समजनि हि योग्या मिथुनता ।
परन्त्वेकः प्रश्नश्चपलयति चित्तं कथय नः
स किं ग्रामीणानां विरचयति वृत्तं क्वचन च ॥
अमू रात्रीः किं स स्मरति कुमुदेन्द्वादिरुचिभिः
शुभा वृन्दारण्ये दयितचरनारीभिरभितः ।
सुगीतात्मश्लोकं क्वणितविलसन्नूपुरगणां
महारासं कुर्व्वन्नरमत मुहुर्यासु कुतुकी ॥
किमेष्यत्यस्मांस्तद्विरहशुचिधर्म्मांशुविदु ताः
पुनः सेक्तुं शौरिः सदमृतवपुः स्वं प्रकटयन् ।

(१) तृट्कष्टं ।　(२) तृट्कष्टं ।　(३) कष्टं ।

अहो ! तद्दूरे तत्तुलितकृतकाङ्क्षैरपि कदा
स नः सिञ्चेन्मेघैरिव मृदुलवन्याः सुरपतिः ॥
इह स्वाम्यं ग्राम्यं नृपपदमलं तत्र पशुपा[1]
जना अस्मिंस्तस्मिन्नरपति-सुताः प्राणसुहृदः ।
इतो गोपीपाशाः[2] स्मरपरवशाः सम्प्रति ततः
क्षितिच्चित्कन्याः स्वं वरितुमनसश्चैतु स कथं ॥
अये ! मुग्धे ! यस्योरसि वसति सा वारिधि-सुता
भवेयुस्तस्मिन् का वननगरदिव्या वरदृशः ।
ब्रवीषि[3] त्वं सत्यं तदभिलसिते सङ्कुचत भो !
यदाशा स्वैरिण्याप्यलमवमता पिङ्गलिकया ॥
चिरादाशां त्यक्तुं यदपि वयमैच्छाम तदपि
स्वयं सा वेवेष्टि प्रतिपदमुदग्रास्थिततया ।
हरिर्वारीशत्वं व्रजति वत ! पाशत्वमपि सा
यदस्मिं[4]स्तत् कस्मादिति किमपि जानीम हि
नहि ॥
सुरूपं तारुण्यं विलसितमपि प्रेक्ष्य न परं[5]
तदाशां कुर्म्मः किं त्वपरमपि हेतुं निशमय ।

---

(१) प्रजारूपाः ।　　(२) निन्दायां तद्धितः ।
(३) तां प्रति अन्यस्या उत्तरं ।
(४) प्रसङ्गे ।　　(५) केवलं ।

रहो नर्म्माद्यं यत्कलयति स यद्वा सशपथं
महाप्रेमव्यक्तिं[१] हृदि वसति तत्तन्मुहुरपि ॥
रमा यस्यानिच्छोरपि न हि जहाति प्रतिपदं
तनूमित्थं लोकादितिह[२]भुवनेषु प्रसरति ।
स एवायं यासु स्वयमहह ! सम्वि[३]द्विधिशतं
तनोति स्वैरं ता वयमिह जहीमः कथममुं ॥
अहो ! तन्माधुर्य्यं यदभिलषिता[४]च्छ्रीरपि न तं
मनाक्त्यक्तुं शक्ता यदपि त[५]दनिच्छावलयिता[६] ।
अये ! तस्यानिच्छा परमसवला[७]पि प्रयतना-
न्न तां[८] दूरीकुर्य्यात्तदुभयमिदं दुर्गमतमं ॥
रमायां यानिच्छा मुनिभिरुदिता सात्त्वतपते-
र्भवेद्दम्भादेषा नियतमिति बुद्धं बुधवरैः ।
अथेयं[९] चेत्तथ्या सपदि न कथं वा व्रजमृगी-
दृगाली[१०]वत् क्षिप्ता भवति सखि ! सा[११]
तल्लव[१२]मनु ॥

---

(१) कलयति । (२) कर्त्तृपदं । ऐतिह्यमितिहाव्ययं ।
(३) प्रतिज्ञा । (४) हेतोः ।
(५) श्रीकृष्णा । (६) अनिच्छावेष्टिता ।
(७) वलिष्ठा । (८) श्रियं ।
(९) अनिच्छा । (१०) पङ्क्ति ।
(११) श्रीः । (१२) अनिच्छालवं ।

सरिच्छैलारण्यस्थलसुरभि[1] वेणुध्वनिचयाः
समं रामेणा प्राग्व्रजपतिसुतेनानुचरिताः[2] ।
दिदृक्षामस्माकं विदधति वलात्तस्य सहसा
विशेषाच्छ्रीमत्तत्पदविततिरस्मान्दलयति ॥
उदारश्रीलीलागतिहसितवीक्षानिगदितै-
र्हृता धीरस्माकं दनुजरिपुणा या चिरतरं ।
अभूत्तस्यास्तत्र स्थितिरपुनरावृत्तिवलिता
कया युक्त्या तस्य प्रथय भविता विस्मृतिलवः ।
अये! नाथ! श्रीमन्! जलनिधिसुतानाथ! दयित!
व्रजाधीश! स्वानुव्रतपशुपवंशक्लमहर! ।
वयं नार्त्ता जाताः स्वमनु पर[3]मेतद्व्रजकुलं
स्वगोविन्दख्यातिं त्वमवितुमवक्लेशजलधेः ॥

तदेवं पुनरपि ताः स्वभावजभावनामनुवर्त्तमाना निरीक्ष्य प्रभोरेव शिक्षया तानेव वाचितलेखान् स[4] वाचयामास। वाचितेषु च तेषु महामन्त्रेष्विव प्रभावतः स्वतन्त्रेषु ताः पुनः सान्त्वनमासादितवत्यः ॥

सान्त्विताश्च ताः कृष्णमात्मानञ्च यथा तदुपदेश-

---

(१) धेनु । (२) सेविताः ।
(३) केवलं । (४) उद्धवः ।

मनुभूय दूयमानतारहितास्तमुद्धवं सभाजया-
मासुः ॥

तदेवं तासामभ्यासयोगाय रोगापहर्त्तृवत्तदभ्यास-[१]
मनुदिनं प्रातः प्रातरनुगच्छन् व्रजमनु मासकति-
पयमुवास । नित्यनित्यमुदयन्महाभक्तिवितानः
स्तुवन्नमून्ननाम च ॥ यथा ।—

एता धर्म्मगलोकसेतुवलितास्तत्यागपूर्व्वा हरिं
सर्व्वात्मानमुपेत्य काण्डयुगल[२]श्रुत्यर्थपारं गताः ।
सर्व्वांशेन ततश्च मद्विधनुतिस्तोमास्पदानीत्यत-
स्तत्रासुव्यभिचारदोषवलका ये हन्त ! ते नारकाः ॥

सत्यं वृष्णिपतेः प्रकाशसमये सर्व्वेऽत्र साम्यं गता-
स्ते मुक्तीच्छुविमुक्तभक्तनिचया-
स्त[३]द्भक्तितृष्णान्वितेः ।
किन्त्वेताः परमस्मदद्भुतकरं प्रेमश्रिता गोपिका
वार्त्ता यस्य विना वृथा भवति त-
द्ब्रह्मात्मना जन्म च ॥

वृन्दारण्यविहारहारिचरिताः क्वेमा हरेः सत्प्रिया-
स्तत्रान्ये व्यभिचारचारिमनसः स्त्रीपुंसलोकाः क्व च ।

---

(१) तन्निकटं । (२) कर्म्मज्ञान ।
(३) तस्माद्धेतोः ।

आसामीदृशभाव एव हि भिदा
हेतुस्तदेवं स्थिते
पुष्णात्यन्नजनानपि स्वभजना-
देताः कथं स त्यजेत् ॥
आसां श्रीरपि सा विभर्त्ति न तुलां
यद्वाञ्छयासीत्तप-
श्चारिण्येव चिराय नाप किल यं
सोऽयं व्रजेन्द्रात्मजः ।
याः स्वेनाग्रहपूर्व्वकं भुजयुगे-
नावेष्टिता नोज्झितुं
वाञ्छामाश्वदभीक्ष्णमत्र सति काः
स्वर्ग्यादिवर्ग्याः स्त्रियः ॥
तस्माच्छ्रीमुखसर्व्वयौवतजयादेता महाश्रीतया
श्रीवृन्दावननाथ-नित्यदयिता भान्तीति लब्धे सति ।
एतद्यत् पुनरौपपत्यचरितं तन्मायया सम्भवे-
दासां प्रेमनिरर्गलत्वकलना कौतूहलं यत्फलं ॥
या धर्म्मान्वितलोकवृन्दचरिताः
कृष्णं भजन्ते स्त्रिय-
स्तासां वर्त्म विभाति तत्र सुगमं
कीर्त्तिश्च लब्धस्पृहा ।

तत्तत्सर्व्वमपि स्वजातिमहिता
　　यास्तत्यजुस्तत्कृते
तासामङ्घ्रिरजःसु हन्त ! भवता-
　　दासां सदा मज्जनिः ॥
चेतस्येव हि यत्पदाब्जयुगलं योगेश्वरैरब्जज-
श्रेयस्कै[१]रमया च पूजितमनाद्येवानु तत्तत् स्पृहं ।
यास्तत्पर्य्यटनश्रमापनयनं
　　कर्त्तुं स्तनैर्लालितं
कुर्व्वत्यः सुकुमारमेतदिति भी-
　　गीर्णा मनाक् पस्पृशुः ॥
आसामस्तु कथा हरेर्मुदि मुदा[२]
　　शान्तिस्पृशां याः परा-
स्तत्सम्वन्धभृतस्तदङ्घ्रिरजसां
　　वृन्दानि वन्दामहे ।
यासां कृष्ण- कथानुगानमपि त
　　द्विश्वस्य गानं भव-
ल्लोकांस्त्रीनपि तान् सहाधिपतिकान्
　　पूतान् विधत्ते सदा ॥ युग्मकम् ॥

---

(१) ब्रह्ममुख्यैः । (२) आनन्देन ।

अथ मधुकण्ठः समापयन्नुवाच ॥

सोऽयं नित्यमभिष्टुवन्नपि तदा
सामान्यतस्ता वच-
स्यानिन्ये हृदि राधिकामधिकता-
मित्येव मन्यामहे ।
यासां तं भ्रमरं भ्रमस्पृशमहा-
भावश्रिया चित्रगी-
र्दूतीकृत्य तदद्भुतस्मृतिचिते[१]
वाक्स्तम्भमत्रा[२]स्यति ॥
श्रीरासां न तुलां बिभर्त्ति नितरा-
मित्युल्लपन्नुद्धवो
यासामङ्घ्रिरजो ननाम हरिणा
यः स्वेन तुल्यो मतः ।
तासां तत्प्रियता सुधाकरतनु-
र्या[३] तां चकोरायित-
श्रीकृष्णेन युतां समस्तमहितां
वन्दामहे राधिकां ॥

---

(१) उद्धवविशेषणं ।　　(२) उद्धवे ।
(३) तासां या तत्प्रियता कृष्णविषयकस्नेहः सैव सुधा तदा-
करतनुर्या श्रीराधा ।

अथ निवेदयामास च ।—

प्रेमोन्मादजकृच्छ्रमेतदुदितं
ते[1] यत् प्रिये[2] शृण्वति
क्षान्तिं तत्र कुरुष्व देवि ! करुणा-
कल्लोलिनि ! श्रीतमे ! ।
प्रायः कक्खट[3]धृष्टधीः कविजनः
स्याद्येन नान्यस्य स
ह्रीदुःखाद्यमवैति किन्तु कवते[4]
व्यञ्जन्निजां चातुरीं ॥
दृष्टं हन्त ! मदीय[5]वर्णनमनु
त्वं राधिके ! त्वत्प्रियः ।
सोऽयश्च प्रतिवाचमुन्मददशां
तामेव चित्तेऽपिपः[6] ॥
किन्तु प्रेक्ष्य परस्परं मुहुरमू
दिव्यौषधीसेवन-
प्राशस्त्यादिव सान्त्विताविथ युवां
धैर्यं धिया पप्रथुः[7] ।

(१) तव । (२) श्रीकृष्णे ।
(३) कक्खटं कठिनमित्यमरः । (४) कवृ वर्णने ।
(५) मत्कृत । (६) पिपर्त्तेर्लङि । प्रथममध्यमपुरुषयोः ।
(७) तस्यैव लिटि ।

तदेवं पर्य्यवसाने तौ च तदीयसुहृदश्च सन्तोष्य तत्प्रसादपोष्यमाणस्वात्मतया कथकौ निजावास-मासादयतः स्म ॥

श्रीराधा-माधवौ च यथायोग्यं सर्व्वाननुज्ञाप्य मोहनमन्दिरं प्रविश्य सुखसन्दोहमाविविशतुः ॥

अथ प्रातःकथायां श्रीव्रजयुवराजविराज-मानव्रजराज—सदसि लब्धप्रथायां स्निग्धकण्ठ उवाच ।—

तदेवं मासकतिपयमुद्धवे व्रजमावसति ॥
कृष्णस्योद्धवकेन माथुरकथा गीताथ या वल्लवैः
सार्द्धं तेन समं च तैर्व्रजकथा या तत्र तत्रापि च ।
साक्षात्कारमिवाश्रयन्मुहुरसौ[१] तत्तद्विहारक्रमा-
त्तान् मासान्परितः सुखाय चक्लृपे
तस्यापि तेषामपि ॥

या या स्फूर्त्तिरभूत्तदा व्रजजने कृष्णस्य तामुद्धवः
साक्षात्कारतया न्यबोधयदसौ तल्लक्षणं दर्शयन् ।
तेषां यर्हि तु तत्र निश्चितिरिवासीत्तर्हि स प्रस्थितौ
कुर्व्वंश्चिचममून् मिलद्विनयमन्वज्ञापयद्भागशः ॥

---

(१) कथा।

अथ यः कश्चिन्निशीथकथनीयः कथांशः श्रीराधा-सदसि कथकेन कथितः सोऽप्यत्र दिनकथायामेव ग्रन्थक्रमाय ग्रथनीयः ॥

यथाह स्निग्धकण्ठः ।—

तत्र च तत्तदनुज्ञापनक्रमं कृष्णप्रेमक्रमत एव सम्मतवान् ॥

यथाह श्रीशुकः ।—

"अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च ।
गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथं" ॥इति॥

सानुज्ञापनरीतिरुद्धवकृता तत्तद्विनीतिस्तृता
सानुज्ञा च हरिप्रियादिरचिता तत्तद्विकारावृता ।
हा ! हा ! नः स्मृतिमागतालवमपि
प्राणान् विचूर्णीयिता[१]
स्तूष्णींभूय करोति तत्र कविता
तस्मान्न पूर्णीकृता ॥

तथापि श्रीराधायाः सविनयनिदेशं तु किञ्चिदुद्देशं नयामि ।

यथा मां सहसावादीस्तथा त्वं मा तमुद्धव !
अहं वज्रमयी शश्वन्नवनीतमयः स तु ॥

(१) आचारार्थकयजन्तं ।

किन्तु स्नेहत्यागशिक्षां तं वद प्रान्तकक्षया ।
क्रमेण हि वहिः कार्य्या जीर्णवस्त्राङ्कता[1] वुध !

॥ इति ॥

तदेवं प्रोच्य किमप्यनुशोच्य मुद्रितपत्रिकामेतत्सन्देशवागमत्रिकामुद्धवहस्तविन्यस्तां विहस्त[2]हस्तापि चकार ॥

व्रजशशधरता व्रजगा-
स्त्याज्या न कलङ्कशङ्कया भवता ।
न शशी कलङ्कतनुम-
प्युज्झति शशकं स्वमाश्रितं जातु ॥इति॥

तदनेनालमतिविस्तरेण मतिदुस्तरेण ॥

अथ दिवस-कथा,-रथारोहात्पूर्व्वं तु स्वस्वपाणिभिरेव नानोपायनमानीय श्रीमन्नन्दादयस्तु निवेदयितुं विचारयामासुः ॥

अयं खल्वस्मान् वन्धुभावमयतद्विरहक्लमविरमणाय तमीश्वरतया समुपदिश्यो तत्रोदासीनान् कुर्व्वन् वहुधा वोधितवान् ॥

---

(१) क्रमं विनातिनिष्पीडनेन जीर्णवस्त्रं खण्डितं स्यादिति भावः ।

(२) व्याकुल ।

अथ तदङ्गीकृत्यापि निजाभिमतमुत्तरयिष्याम-
इति ॥

तदेवं विमृश्य दृश्यमानवाष्पं वदन्ति स्म ।—

अथ कृष्णः स्वयमीश,स्तदपि च नस्तत्र
वृत्तयः सर्व्वाः ।
भूयासुर्न तु तस्मि,न्नौदासीन्यं भजन्तु कुत्रापि ॥
कर्म्मभिरुच्चैर्भ्रमता,मीश्वरवाञ्छावशादिहामुत्र ।
ईशे कृष्णाकारे, रतिरथ नः सर्व्वदा भवतु ॥
अन्येषामुपदेष्टृषु, गुरुतारोप्यत कर्म्मणा तेन ।
उद्धव ! तव गुरु[१]मनु सा[२]
सिद्धा त्वयि किमस्ति विज्ञाप्यं ॥

इति वस्त्रेण मुखमास्तीर्य्य क्षणं रुरुदुः ।—

रुदित्वा च मनसि धीरतामीरयमाणास्तं दूरा-दनुव्रज्य परिष्वज्य च परस्परमासज्यमाना लघु लघु निववृतिरे ॥

अथ मधुरायां श्रीकृष्णस्तद्वार्त्तायां धृततृष्णा-तया वासरपक्षमासान् क्रमगणनया गणयन् दिनं दिनं व्रजविलोकनया मनोरथपालिकामत्युन्नत-

---

(१) वृहस्पतिं ।　　(२) गुरुता ।

चन्द्रशालिकां विन्दमानस्तद्वर्त्मनि दृष्टिमस्यन्न-कस्मात्तमागतं पश्यन्नुच्चैरौत्सुक्यवश्यतामवाप ॥

ततश्च तं दूरमनुवृत्य सर्व्वमेव गोकुलं साक्षादय-मिति मनसिकृत्य मुहुरालिङ्गनादिभिरादृत्य निभृतस्थानमानिनाय ॥

आनीय च प्रथमतस्तस्य मुखप्रसादं दृष्ट्वा तदनन्तरमेव कुशलमात्रं पृष्ट्वा वर्त्मश्रमं मृष्ट्वा च पप्रच्छ ॥

यथा ।—

गुरूंस्तातं मित्राण्यनुगतजनान् गोसमुदयां-
स्तदापृच्छत् कृष्णः सदयमपृथक् तं पृथगपि ।
प्रसूप्रश्नेनासीत्पटुरिह यतः कण्ठविवरं
मुहुः कुण्ठं कुर्व्वन्नुदयति दृगम्भः-समुदयः ॥

इति ॥

ततश्च सम्भ्रमादुद्धवस्तत्तत्कुशलकलापसम्वल्ल-नया तस्याधीरतां संस्तभ्य प्रथमदिनवृत्तमारभ्य सर्व्वमेव यद्यद्वृत्तमहोभिर्वहुभिरेव व्याहरिष्यते ॥

तदेव प्रथमं संक्षेपेण निचिक्षेप । अन्ते पुन-रिदमुक्तवान् ॥

अर्द्धं भवत्प्रभावेण मया तत्र समाहितं ।
भवत्प्रयाणपर्य्यन्तमर्द्धं पर्य्यवसीयते ॥

किन्तु ।—

अस्माकं किल निर्णयः समभवत्पूर्व्वं यदेषा भवद्भक्तिः स्याद्व्यवहारवर्त्मरहिता[१]यावत्परं तावती ।
दृष्टं गोष्ठनिवासिनामपि तु सा पुत्रादिभावात्त्वयि प्रेमोत्कर्षविचित्रि[२]ताखिलभवद्भक्ता परिभ्राजते ॥

तदेवं कथकः प्रथयित्वा रात्रौ कथनीयमिति तदनन्तरं तद्वाग्वारं मनसि कृतवान् ॥

यथा ।—

त्वयि सुततादद्यभिमान-
स्तेषां तस्मिन्समस्तजेतास्ति ।
तदपि न चित्रं तासा-
मुपपतिभानं तमप्यजैषीद्धि ॥

यत्र च ।—

यन्मद्दर्शनमात्रतः प्रलपितं त्वत्प्रेयसीनां किमप्येकस्या यदितस्तवासु[३]मयका यद्वाचिकं चार्पितं ।

(१) व्यवहारवर्त्मरहितैव भक्तिः श्रेष्ठेतिभावः ।
(२) विस्मितीकृत ।
(३) प्रियासु ।

तस्मिन् प्रत्ययमत्ययं(१) च परितस्तासां
यदुद्घूर्णितं(२)
तन्मां हन्त ! वदन्तमुग्रमनसं
रुन्धे तव व्यग्रता ॥ इति ॥

स्पष्टं चाचष्ट ।—

तदेवं वहुविधसम्वादमाचर्य्य स भक्तवर्य्यस्तेषां प्रेमायनान्युपायनानि दर्शयामास ॥

तत्र तु ।—

मात्रा भोज्यादि पित्रा भरणमथ सुहृ-
द्भिस्तु सद्भस्तु वन्यं
काभिश्चित्तार(३)हारादिकमपरजनै-
रप्यनन्तं विसृष्टं ।
तत्तच्चिह्नेन कृष्णः परिचितमकरोत्
किन्तु वाष्पाम्वुपाता-
द्भीतस्तत्तद्विदूरार्पितनयनतया
वस्तु तत्तद्ददर्श ॥

अत्र काभिश्चिदित्यत्र कान्ताभिरिति रात्रौ पठितव्यमिति मनसि विभाव्य कथकः कथयामास ।

---

(१) परितो योगे द्वितीया । (२) भावे क्तः ।
(३) तरो मुक्तादिशुद्धौ स्यात्तरलो शुद्धमौक्तिक इति विश्वः ।

यानि चानकदुन्दुभ्यादिभ्यो यानि च भूभृते ।
ब्रजेशप्रहितान्यासंस्तानि तत्रार्पयत्प्रभुः ॥

रोहिणीसङ्कर्षणाभ्यां तस्य तेन मेलनन्तु पूर्व्ववदुन्नेयं ॥

यत्र सहितब्रजमहीपतितन्महिलाप्रहितमहितद्रव्याणि सव्यामोहं विलोक्य प्रवणचित्ततया तावमूद्रवदन्तरावास्ता[१]मास्तां[२]तावत्तद्विशेषवार्त्तेति ॥

अथ स्निग्धकण्ठः कथां समापयन्नाह स्म ।—

जाग्रद्व्यग्रतया सदा ब्रजकृते यः प्रापयन्नुद्धवं
युष्मान् स्वस्थनिभांश्चकार भवतां
सङ्गाय चान्यां कृतिं ।
सोऽयं सम्प्रति गोष्ठदेव ! भवतः क्रोडे विराजत्तनुः
सर्व्वं मातृमुखं जनं प्रमदयन्नस्मान्मुदा सिञ्चति ॥

तदेवं सर्व्वानानन्द्य वन्द्यार्च्चितौ तौ वासमासन्तौ । रात्रावपि श्रीराधामाधवसदसि पूर्व्वसूचनामयं सर्व्वमन्यदन्यदपि कथयामासतुः ॥

समापनन्तु यथा ।—

उद्धवमनु तव नाम,
स्थाने[३] प्रास्तौन्न शङ्कया दयितः ।

(१) अभूतां । (२) तिष्ठतु । (३) युक्तं ।

तद्वृत्तावधुना त-

हृदि मुग्धा किं दधाति तां[१] त्वमिह ॥

तदनन्तरमनन्तरसरभसभरवशतया शतयागमणि-सुवर्णवर्णयोरनयो[२]रनयोरिव विलसितं विलसित[३]मेव जातमिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनूद्धवस्फुरदुद्धवं
नाम द्वादशं पूरणम् ॥

पूर्णोऽयमप्युद्धवपूर्णव्रजनामा प्रथमो विलासः ॥

---

(१) शङ्कां । (२) उपमानान्तराभावात् । (३) विराजितं ।

त्रयोदशं पूरणम् ।

श्रीराधा-कृष्णाभ्यां नमः ॥

श्रीकृष्ण ! कृष्णचैतन्य ! ससनातनरूपक !
गोपाल ! रघुनाथाप्त ! व्रजवल्लभ ! पाहि मां ॥

तदेवमुद्धवेन व्रजमनोरथं पूरयित्वा(१) श्रीबलदेवेन तं पूरयितुमारभामहे ॥

तत्र शास्त्रप्रमाणेन कथयिष्यमाणेन पुनर्जीवनाभेन(२) दन्तवक्रवधानन्तरश्रीकृष्णलाभेन पूर्णमनोरथव्रजे व्रजे सन्मानससमुन्मादिश्रीकृष्णजन्मादिकथनमयी सेयं चम्पूद्वयी मधुकण्ठस्निग्धकण्ठाभ्यां कथितेति पूर्व्वपूर्व्वं सूचित(३)मेव सूचितं ॥

तत्रैव चावशिष्टं कथान्तरमिदं विशिष्टं प्रस्तूयते ।

(१) कंसवधमाचष्टे कंसं घातयतीतिवदत्र णिच् तत्पूरणमाख्यायेत्यर्थः ।
(२) तुल्येन । (३) उचितं ।

अथान्येद्युः प्रातःकथायां लब्धकृष्णा-कृष्णापित्रा-द्युपकण्ठः सन् मधुकण्ठश्चिन्तयामास ॥

सैरिन्ध्री-गृहगमनमनन्तरमनन्तलीलस्य तस्य कथनाय लब्धं । तच्च व्रजादाव्रजितेनोद्धवेन त(१)-त्सान्त्वनकथनया स्वस्थितचित्तस्य तस्य पूतनादि-ष्वपि नित्यनूतनायमानकृपया वित्तस्य(२) नानुचितं ॥

तदेत(३)च्च तस्य व्रजगमनसम्पत्सम्पादनाय सदा समुत्सुकबुद्धीनामुद्धवादीनामपि सान्त्वनाय प्रतिपन्नं ॥

तथा हि ।—

श्रीवादरायणिना कामनिर्व्वन्धितया सैरिन्ध्र्याः प्रीतिर्नीरन्ध्रतया न श्लाघिता । श्रीव्रजदेवीनामति मात्रतापात्रप्रीतिस्तुतिस्तु तदादिभिरुपर्य्युपर्य्युच्चैरेव द्राघिता(४) ।

ततस्तस्या अपि सोऽयमङ्गीकारः खलु सर्व्व-सङ्गीतमहाभावानां तासां त(५)द्भावं सुतरां व्यङ्गीकरोति(६) । तदपि तत्कथनमत्र सदसि तत्र च न प्रथनीयं ।

(१) व्रज ।　　(२) ख्यातस्य ।

(३) सैरिन्ध्रीगृहगमनं ।　　(४) दीर्घीकृता ।

(५) अङ्गीकार ।　　(६) विगताङ्गीकरोति दूरीकरोति ।

उभयत्र लज्जासज्जनादिति। तदेतन्मनसि विभाव्य स्पष्टमाचष्ट ।—

तदेवमुद्धवः श्रीमद्व्रजवर्त्तिनः पिपर्त्ति स्म ।—

अथ तत्र मथुराङ्गते निरन्तरकृष्णवृत्तान्तश्रवणे चाभिमते परमाहत्या परिवृत्त्या द्वन्द्वीभूतौ सूतमागधवन्दिभूतौ दूतौ युक्तौ युक्तौ विज्ञाय श्रीव्रजराजेन नियुक्तौ। यदुद्धवद्वारा श्रीमतः कृष्णस्य मिलनं रहः कर्त्तव्यं तत[1] एवाकलय्य वृत्तश्चानेतव्यं स[2] ह्यन्तः सर्व्वज्ञ इत्यस्माभिर्विज्ञातमस्ति सर्व्वसर्व्वज्ञसङ्गसङ्गतिश्च तस्मिन् सम्प्रत्यस्तीति।

तत्र प्रथमदूताभ्यां तावद्गत्वागत्य च तत्रत्यं सर्व्वमनु मङ्गलस्थापनमक्रूरस्य च पाण्डवेषु प्रस्थापनं प्रस्तुतं। सोऽयं स्वस्तिमुखश्च व्रजक्षितिपतेरभिमुखमानीतः॥

यथा।—

स्वल्लालयत्वातिलौल्याच्छिशुवयसि मया
यस्य गोवर्द्धनाद्रेः

(१) उद्धवात्। (२) उद्धवः।

पूजा विख्यापितासीदथ स च कृपया
तत्र[१] साहाय्यमाप ।
एष[२] श्रीमान्सदा नः सुखकुलवलनः[३]
सर्व्वकेषाञ्च तस्मा-
त्तात ! त्वनैव पूज्यः प्रति सम[४]मपि मे
यावदप्यागतिः स्यात् ॥ इति ॥

यदा तु द्वितीयदूतौ तत्र गतौ तदागतमात्रयोस्तयोः सङ्कलितानेकराजकटकप्रवन्धेन जरासन्धेन मथुराधाटीभि[५]र्विघटिताटीकृते[६]ऽतिझटित्यागमनं न वभूव ॥

ततश्च लब्धतद्भयव्रजे व्रजे दूरं गत्वा स्थिते चिन्तया दुस्थिते च चिरादेव तावागतौ ॥

आगतौ च तौ भयेनापृच्छत्सु विचिकित्सया[७] स्वमुख[८]मात्रं पश्यत्सु व्रजसुहृत्सु कुशलं कुशलं कुशलमिति वारत्रयमूचतुः ॥

ततश्च तौ पुरस्कृत्य परिवृत्य[९]सभृत्यवान्धवः श्रीव्रजपृथिवीधवः पप्रच्छ ।—

(१) इन्द्रकृतमहोत्पाते ।
(२) गिरिः । (३) वर्द्धनः । (४) वर्षं ।
(५) कालादाक्रमणं धाटीति चौरः । (६) अट गतौ ।
(७) सन्देहेन । (८) दूत । (९) वेष्टयित्वा ।

कथयतं प्रथमं समासतः पश्चात्तु व्यासतः शृणा-वाम ॥

दूतावूचतुः ।—

भवत्पुत्राभ्यां निहतसर्व्वसैन्यः संहतदैन्यः प्राप्त-वन्धः स जरासन्धः सुष्ठु घृणया त्यक्तस्त्रपाभि-रव्यक्तः स्वगृहमेव वव्राज ॥

ततश्च व्रजवासिनां "हरिं वद हरिं वदे"ति वहल-कोलाहल-जाते जाते व्रजराजः सपुलकास्र-माललाप । अनवशेषतः कथ्यतां विशेषः ॥

दूतावूचतुः ।—

अस्तिप्राप्तिनाम्नी जरासुत-सुता द्वयी किल कंसस्य भार्य्यावर्य्यासीत् ॥

सा सम्प्रति पतिपातप्रतप्तावप्ता[१]रमवाप्ता ॥

व्रजराज उवाच ।—

कथं कथं त गते ? यत्र विश्वस्ते[२]अपि न विश्वस्ते जाते ॥

---

(१) तातो जनयिता वप्ता इति त्रिकाण्डशेषः । वप्ता पितरि वापकइति विश्वः ।

(२ विश्वस्ताविधवे समे । विश्वासयुक्ते विश्वस्ताश्विषु स्त्रीष्विश्वसिन्यामिति रुद्रः ।

दूतौ विहस्य वर्णयामासतुः ॥

एकैकम्लानवस्त्रात्स्खलितकचकुचा

म्लानवक्त्रातिजीर्ण-

प्रावारास्तीर्णयाना निर्ऋतिरिव निरै-

त्पत्तनान्ता[1]न्मधूनां ।

हासं हासं सकाशं[2]प्रतिगतपथिकैः

पृष्टदृष्टातिधृष्टैः

कंसस्याकीर्त्तितुल्या पितृसदनमगा-

त्प्राप्तिरस्तिश्च तर्हि ॥

व्रजराज उवाच ।—

भवतु नाम जालिके[3]ते कालिके इव कुपिते पितरं गत्वा किं विलपतः स्म ?

दूतावूचतुः ।—

स्वं छत्रभङ्ग[4]मेव प्रसङ्गसङ्गतं चक्रतुः ।

तत्र श्रीरामकञ्जलोचनयोरसमञ्जसता व्यञ्जनया ॥

व्रजराज उवाच ।—कथमिव ?

---

(१) नगरात् निर्गताभूत् । (२) निकटं ।

(३) जालिका विधवे समे इति त्रिकाण्डशेषः ।

(४) वैधव्ये राजनाशे च छत्रभङ्ग इतिस्मृतः इति त्रिकाण्डशेषः ।

दूतावूचतुः ।—तदित्थं हिते निजगदतुः ॥

कौतुकं निर्मात्रा भवज्ज्ञामात्रा तावानीतौ । तौ तु रङ्गकारमारणामसङ्गरधनुर्भङ्गं राजद्वारसन्नीडक्रीडत्कुवलयापीडपीडनमपि प्रथमं प्रथयामासतुः ॥

तथापि मल्लप्रतिमल्लतया स्वमल्लपाल्या(१) तयोर्मल्लीलाकुतूहलं पश्यन् स भोजराजश्चिराद्विराजते स्म ।

तौ तु तत्राविहितं त(२)द्वधं विहितवन्तौ ॥

तदाप्यास्तामसावधानं राजानमपि हतवन्तौ । अहो ! वत । दग्धवक्त्रेण किं व्यक्तीकरवाम । तदनन्तरमपि केशाकर्षणपूर्व्वं यत्तस्य कर्षणं ॥

इति ॥

व्रजराज उवाच ।—ततस्ततः ?

तावूचतुः ॥

तत्पिता पुनरक्षमया क्षमां यादवसङ्गात्क्षमां विधातुं यमवदुद्यमं विधाय स्वजयरक्षोहिनीभिरक्षौहिणीभिस्त्रयोविंशतिसङ्ख्यालक्षिताभिः परितो रक्षिताभिर्मधुरिमधुरां मधुरामावृतवान् ॥

---

(१) श्रेण्या । (२) मल्ल ।

किं बहुना ?

यत्र भीष्मपाण्डवान् विना हिमवद्विन्ध्यसन्ध्यन्तर्विराजमानान्यन्यदेश्यानि च राजकानि[१] राजन्यकानि[२] च निजलोहाभिहार[३]कर्म्मण्याजहार ।

व्रजराजः सभयमुवाच ।—ततस्ततः ?

तावूचतुः ।—

ततश्च सर्व्वे यादवाः सभयतया दवाकुला इव तं भवत्कुलतपस्याफलावश्याय दीधितिमेव व्यग्रतयाग्रीयमाचरितवन्तः ॥

व्रजराज उवाच ।—

हा ! धिग्दुष्टु तैरनुष्ठितं ॥

तावूचतुः ।—श्रूयतामनुवृत्तं वृत्तं ।

ततश्च तावतीमपि परसेनां तृणाय मन्यमानः स भवद्वंशधरश्चेतसि शशंस ।

---

(१) राजसमूहान् ।

(२) क्षत्रियसमूहान् । राजकं । राजन्यकञ्च नृपतिक्षत्रियाणां गणे क्रमादित्यमरः ।

(३) लोहाभिहारस्तु विधिः परो नीराजनान्नृपे । दशम्यां दंशितैः कार्य्य इति क्षीरस्वामी ।

हन्त[१] ! मया यदभ्यर्थितं तदेव दैवसमर्थितं बभूव । यतस्त एते सर्व्वे एवाशिष्टा मया शिष्टाः[२] कर्त्तुमिष्टा सन्ति ।

कुत्र कुत्र वा त एते क्रव्यादा विचेतव्याः ।

ततः समुदितीभूतानमूंस्तामसस्तोमान् स[३] मुदितीभूय[४] हरि[५]रहं संहरिष्यामि । किन्तु जरासन्धं विना ॥

यतः ।—

मुहुरपि कुचरांश्चेता,[६]नासौ घात्यो जरासन्धः ।
काकानन्यान् हन्तुं, रवणः[७]काको हि पाल्येत ॥

तदेतन्मतं रामेण च सम्मतमातत्य गत्यन्तरमभीप्सन्नकस्मादरि-[८]दर-चाप-गदा-पद्म-सद्मनीडं विक्रीडद्धय-चतुष्टयजुष्टं गुरुगरुत्मद्ध्वजशोभापुष्टं सारथिप्रार्थितव्योमपथं रथमवतरन्तमद्राक्षीत् ॥

रामश्च हलमुसलवलिततालध्वजकलिततया तद्विलक्षणलक्षणमन्यं त[९]मवलोकितवान् ॥

---

(१) हर्षे । (२) दण्डिताः ।
(३) स अहमिति सम्बन्धः । (४) आनन्दीभूय ।
(५) तमः साहचर्य्येण हरिः सूर्य्यः ।
(६) शीले तृन् । चयनकर्त्ता ।
(७) गीतालि । (८) चक्र । (९) रथं ।

सर्व्वे साश्चर्य्यमूचुः ।—ततस्ततः ?

व्रजराजस्त्विदमुवाच ।—

तस्य बाल्यादेवेदमाकल्पते । यन्नारायगाः साहाय्यकमाचरतीति । भद्रं कथयतमग्रिमं वृत्तं ॥

तावूचतुः ।—

अथ युद्धमुद्धमिति विबुध्य युध्यमानतामनुरुध्य(१)कवचेनाङ्गमारुध्य(२)कतिपयसवयोभिः सह द्वावपि दुर्गादभ्यमित्रीयतया(३) चित्रीयमाणौ(४) निष्क्रान्तौ । उदयभूभृदन्तात्पुष्पवन्ताविव । शङ्खं धमन्तौ च तौ वर्षावर्षान्ततडित्वन्ताविव ददृशाते ॥ तच्छब्दस्तु सुहृदांस्तनितमिव दुर्हृदां स्फूर्जथुरिव स्फुरति स्म पुनरन्यदप्याश्चर्य्यं श्रवसोराचर्य्यतां ॥

तावतिकोमलबाला-
वरयस्ते स्फुटकरालभाः सत्यं ।
भीतभयानकभाव-
क्रमलब्धिस्त्वत्र विनिमयं प्राप ॥

---

(१) कामयित्वा । (२) वेष्टयित्वा ।

(३) अमित्रं प्रति अलं गामितया । यो गच्छेत्त्वलं विद्विषतः प्रति । सोऽभ्यमित्रोऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यमरः ।

(४) आश्चर्य्यं कुर्व्वन्तौ ।

वीक्ष्याजितमथ स जरासन्धः समधाद्भयं यत्तु ।
तदनादरतासञ्जनमनयद्व्याजान्निजाय गर्वाय ॥
तं परिहृत्य तु रामं, योद्धुं यदसावुरीचक्रे ।
वैष्णवमिह तत्यक्त्वा, रौद्रं ज्वरमिव समाददे
कुमतिः ॥

अथ दर[१]मयतदनादरवचनरचनतः कृष्णस्तु भासमानहासमाह स्म ।—

"न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषं ।
न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः" ॥इति॥

अत्र युक्तमिदमुक्तं भवति । शूराः खलु न विकत्थन्ते । विकत्थनरूपवचनबलं हि देहबलं पश्चाद्वृत्तं विधाय प्रवृत्तमभूदिति तस्मि[२]न्न्यूनतां स्वयमेव नूनं व्यञ्जयतीति स्थिते तस्य[३]दूरतया प्रवृत्तिः समरजुषः पुरुषस्य शूरतां न व्यनक्ति किन्तु मुमूर्षतामेव ॥

ततो महाराजस्यापि तवातुरस्येव तादृशत्वं युक्तमेव ॥

किन्तु सम्प्रति वयं तवाव्यवस्थितविचारतया मुमूर्षोर्वचनं न गृह्णीम इति ॥

(१) भय । (२) देहबले । (३) देहबलस्य ।

ब्रजराज उवाच ।—ततस्ततः ?

तावूचतुः ।—

ततो यादृशं भवत्कुलनन्दनेन निन्दितस्तादृशं स एव स्वमनुव्यक्तीचकार ॥

यतो रामेण समं स्वयमेव समरे समयं[१] कृतवान्। कृतवांस्तु त्रयोविंशत्यक्षौहिणीप्रयोजनया[२] तयोर्द्वयोरप्यावरणमिति ॥

ब्रजराजः सभयमुवाच ।—ततस्ततः ?

तावूचतुः ।—

तत्तु सर्व्वमहिमगभस्तौ[३]हिमकुज्झटिका[४]स्तोमवत्तयोर्महिमन्यस्तशक्तितामवाप । न पुनरभ्यस्ततां ॥

यस्मादसौ हरिः[५]शस्त्रान्धकारवन्धाय छिदुरतां[६]यच्छन्नरिकरीन्द्रवृन्दाय च भिदुरता[७]मयच्छत् । परन्तु धूल्यादिपुञ्जपिञ्जलता[८]विलतया विदु-

(१) प्रतिज्ञां ।　　(२) प्रेरणाया ।

(३) सूर्य्ये ।　　(४) कुहरेति भाषा ।

(५) सूर्य्यः सिंहश्च ।　　(६) स्वयं छिद्यमानतां ।

(७) स्वयं भिद्यमानतां ।

(८) समुत्पिञ्जपिञ्जलौ भृशमाकुले इत्यमरः ।

रता[१]विधुराविदूरधामपुरनामनयनादय एव चिरं पक्षिराजतृणराजचिह्नविराजमानमह्वाय रथयुगल-मनवकलयन्तः समं मुहुः सम्मुमुहुः ।

पुनश्च ।—

हरिः परानीकपयोमुचां मुहुः
पश्यन् शरासारमुपस्वसैनिकं[२] ।
रङ्गा[३]न्तरा[४]च्छाङ्गधनुर्विकर्षण-
टङ्कारझञ्झापवनैरुदक्षिपत् ॥
सम्वर्म्मिताङ्गत्वमभूद्यथा द्वयो-
श्चम्वोस्तथाप्यस्ति पृथग्विभिन्नता ।
द्विट्सूच्छिदाना[५]मनिवार्य्यताभवत्
कार्ष्णेषु दूरादिषुभि[६]र्निवार्य्यता ॥
विमर्द्दयन् कण्टकाना[७]मग्रकण्टक[८]संहतिं ।
स्वस्य तत्कण्ठगां कुर्व्वन्नासीत् कण्टकवान्[९] हरिः ॥

---

(१) भ्रातृतारहित । (२) स्वसैन्यस्य समीपे ।
(३) युद्धभूमिः । (४) रङ्गान्तरे स्थित्वा ।
(५) छेदानां । (६) वाणैः । (७) क्षुद्रारीणां ।
(८) वाणः स्यादग्रकण्टक इति त्रिकाण्डशेषः ।
(९) सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षेऽपि कण्टक इत्यमरः । पुलकवान् ।

तूणादुत्कलयन् दधद्धनुरनुप्रास्यन्[1]मुहुर्मार्गणान्
कोटिन्यर्व्बुदपद्मधा[2]भवदसा[3]वेवं तदातर्क्यत ।
एतद्युद्धमवाप्यतेऽपि रिपवो निर्भिन्ननानाङ्गतां
यातास्तन्मिति[4]मापुरित्थ[5]मपि तत्-[6]
स्पर्द्धेव तत्रैक्ष्यत ॥

हरिर्मेघश्चापं त्रिदशपतिचापं शरतति-
र्महाविद्युद्यस्मिन् भवति न हि तत्राद्भुतमिदं ।
द्विषां रक्तस्रावाः सरिदुपचया मानवहय-
द्विपाद्यामत्स्यानां विविधतनुरूपा यदभवन् ॥

दृष्ट्वा रामकरे हलं मुसलकं चारा[7]तिसैन्यं पुरा
ग्राम्यः सोऽयमिति प्रहासवलितं व्यादात्तु यद्वन्मुखं ।
आयत्या[8]मपि तद्वदाकृतितया तस्थौ परं द्रागयतः
स्वस्मिन्नर्दन[9]माससाद[10]वल्लव-
त्ताभ्यामकस्मान्मुहुः ॥

---

(१) धनुषि क्षिपन् ।   (२) प्रकारे धा ।
(३) कृष्णः ।
(४) तत् तस्य कृष्णस्य परिमाणं ।
(५) अनेन प्रकारेण ।   (६) कृष्णस्य ।
(७) शत्रु ।   (८) उत्तरकाले ।
(९) पीडनं ।   (१०) सैन्यं कर्त्तृ ।

त्रयोविंशत्यक्षौहिणि[१] परि[२] परं पङ्कजदृशा
[३]यु[४]दारब्धेत्येव द्रुतमथ जितेत्येव च वचः ।
समन्तादाघातं तर्ह्यपरमिह किञ्चिन्न हि यतः
क्रियाशक्तिस्तस्य[५]स्फुरति त[६]दतिक्रम्य पुरतः ॥
कृष्णबाणमृता ये वा ये वा स्वमुसलाहताः ।
हलेनाकृष्य रामस्तानसृग्नद्यामवाहयत् ॥

अथ तस्माज्ज्ञातबहुनृशंसवीरध्वंसनाद्वीराशंसना-[७]द्वाहितेषु तेषु महारथमपि विरथमुपद्रवकारिणमप्यपद्रवाय[८]कृतानुसन्धं जरासन्धमनुद्रवन् प्राणमात्रमवशिष्टकटकं गृहीत्वा शीघ्रमंहमानं[९]सिंह इव ग्रामसिंहं जग्राह ॥

गृहीत्वा च तमाघात[१०]मेवानिनाय । आनीय च तं वलहानाय वरुणपाशेन तावद्बबन्ध ॥

तदनन्तरमपमानाय मानुषपाशेन च वध्यमानं बालवृद्धावध्यखिललोकेषु दत्तावलोकेषु कृष्णः

(१) त्रिगुत्वान्नपुंसकत्वं । (२) लक्षीकृत्य ।
(३) कृष्णेन । (४) युद्धं ।
(५) कृष्णस्य । (६) वच्चः ।
(७) सा वीराशंसनं युद्धभूमिर्याति भयप्रदा ।
(८) पलायनाय । (९) अहि गतौ ।
(१०) वधस्थानं ।

पुनस्तत्संवध्यमानामान[१] दुर्मानमानवनाश-नाशया विपाशयामास । विपाशितोऽपि पाशित इव शङ्कुचितग्रीवादिरपसरंस्तपसः कृते कृतेहः परिम्लानदेहः क्वचिन्निर्जनपथे निर्यन् निर्हेति[२] विरथः स वार्हद्रथः केनचित्तत्कटकखट[३]हारिणा परिचितमूर्त्तिः सप्रणामं कृतस्नेहपूर्त्तिश्च जिह्वेति स्म ॥

ततः परं त[४]त्परम्परया सर्व्वैरपि सकृपैस्तदीय-नृपैर्यत्र कुत्रापगमात्कृतसमागमस्तपः प्रतिगमना-दपगमयामासे ॥

ऊचे च ।—

अल्पकैर्यदुभिरल्पमहोभि-[५]
र्निर्ज्जिता वयमहो ! यदनल्पाः ।
दिष्टदिष्ट[६]मथ विद्धि वलिष्ठं
मन्महे यदनुजन्म[७]महिष्ठं ॥
त्वं नृपस्तरुणमूर्त्तिरितीत्थं
वन्यमस्ति न तपस्तव योग्यं ।

(१) अपरिमित । वहुव्रीहिः ।　(२) निरस्त्रः ।
(३) तृण ।　(४) तृणहारि ।　(५) तेजोभिः ।
(६) कर्म्मविहितं ।　(७) जन्मनि जन्मनि ।

किन्तु तन्निखिलपालनरूपं

दुःखजं वनतपस्त्वभितो धिक् ॥

व्रजराज उवाच ।—

आस्तां तत् । कृष्णरामयोर्निजा वार्त्ता तु कीर्त्यतां ॥

तावूचतुः ।—

कण्टक[१]घनगहनं तत्

कटकयुताभ्यां प्रविष्टमेताभ्यां ।

न हि पुनरीषल्लवमपि

कुत्राप्यासीत् क्षतं नाम ॥

तदेवं जये तु लब्धप्रचये केचिल्लज्जाधर्षात् केचिद्धर्षादपि समवेताः सर्व एव यदवः कृतमहोत्सवतया सस्पृहं गृहमेव तावानिन्युः ॥

ततश्च हृष्टतद्विभवौ हृष्टतया लब्धबलवदुद्धवौ द्वारीकृतोद्धवौ सरामं रामानुजमनुज्ञाप्य तदेतत्कथनाय तदाज्ञाप्यमानौ व्रजमाव्रजन्ता[२]वेतावाख्येह इति ॥

तदेतद्दूतवाचमन्वाचर्य[३]मधुकण्ठः प्राह स्म ।—

मुहुरेवमेव कृतनिर्बन्धेन जरासन्धेन सह युद्धं जातं दूतद्वारा च बुद्धमिति ॥

---

(१) क्षुद्रशत्रु । (२) आगतौ । (३) अनुकरणं कृत्वा ।

काश्चित् काश्चित्तद्विशेषस्तु प्रस्तुतः करिष्यते ॥

तदेवमुक्त्वा मधुकण्ठे सगद्गदतयाकुण्ठे श्रीव्रजेश्वरे च स्वोपकण्ठे कृष्णामुपलभ्य धृततत्कण्ठे व्रजबन्दिनस्तदिदं पठितवन्तः ॥

दुहितृहेला[1]दथ जामातुः
शमनं श्रुत्वा द्रुतमायातुः[2] ।
मगधान्पातुः[3] कटकं प्रेक्ष्य
हरिराहेदं बलमुत्प्रेक्ष्य ॥
भविकं जातं स जराजातः
स्वयमुद्यम्य[4] स्फुटमायातः ।
अथ शस्त्राद्यं द्योराभियातं[5]
शकुनं मेने हरिरितशातं ॥
सहसा[6] भ्राता सहसा[7] रुद्धं
व्यकरोच्छत्रुं कलयन् युद्धं ।
तुहिनस्तोमं[8] स यथा सूरः[9]
कटकं तद्वद्धतवान् शूरः ॥

(१) छलात् । (२) सृजन्तं ।
(३) तृन् । पा रक्षणे । (४) उद्यमं कृत्वा ।
(५) स्वर्गादागतं । (६) अतर्कितं ।
(७) बलेन । (८) हिमसमूहं ।
(९) सूर्यः ।

द्विषतां गात्रादभवन्नद्यः
विशिखैर्दलितात्परितः सद्यः ।
किमतः कथ्यं विभवद्वन्धं
तमित[1]श्चक्रे स जरासन्धं ॥
पुनरित्थं षोडशधा जित्वा
तमथान्यांश्च द्विषतश्छित्वा ।
अधुना सोऽयं स सुधावृष्टिं
रचयन् भाति व्रजभृद्दृष्टिं ॥ इति ॥

अथ राधामाधव-सदसि कथा । यथा मधुकण्ठः प्राह ।—

मुहुरपि समरं हरेर्द्विषद्भि-
र्व्रजवनितास्तु निशम्य तस्य कान्ताः ।
सकलमपि विसस्मरुः स्वदुःखं
हरि हरि दुर्व्वहवुक्क[2]कम्पमापुः ॥

सम्प्रति जित्वा शत्रून्
साधूनां लघु[3] निवृत्य निश्चिन्तः ।
सोऽयं क्रीडति राधे !
तव नवनवसङ्गरङ्गसंसङ्गि ॥

(१) इह । (२) हृदयान्तःस्थितं मांसपिण्डं ।
(३) शीघ्रं ।

तदेवं पूर्व्वपूर्व्ववदपूर्व्वं सुखं कुर्व्वन्तौ सर्व्ववन्तौ[१] सूतकुमारसन्तौ वासमासन्नवन्तौ ॥

श्रीराधा-माधवौ च परस्पर[२]मपरस्परमाचरितचरिताराधनतया कामधाम प्रविश्य निकामं निजकामं जग्मतुरिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
जरासन्धवन्धनं त्रयोदशं
पूरणम् ॥

---

(१) सर्व्वयुक्तौ ।　　(२) क्रियासातत्ये ।

चतुर्दशं पूरणम् ।

अन्येद्युश्च श्रीमद्व्रजयुवराजदर्शनामृतवर्षहर्ष-व्रज[1]भासिषु व्रजवासिषु स्निग्धकण्ठ उवाच ।—

अथ साग्रजावरजव्रजः श्रीव्रजराजः परमपर्व्व-[2]पूर्व्वकं दानमाचर्य्य कंसशत्रोर्यावत्सर्व्वशत्रुक्षय-मत्ययस्वस्त्ययनसत्रमारब्धवान् ॥

यत्र तेषां तन्मङ्गलाभिसन्धानं[3] केवलं बलव-दासीत् । तद्दर्शनानुसन्धानन्तु तदनुगतमेव । यतः सर्व्वदुर्गमदुर्गावासः शूरवर्गान्तर्व्वासश्च तयो-[4]रेभिरभिमत आसीत् ।

इति स्थिते पूर्व्ववद्दूतगमनागमनान्तरालेषु वार्त्ता समुत्सुकतया यापितकालेषु गोपालेषु स चमूनां विचेता[5] विचेता[6] जरासन्धस्तद्विध एव मुहुः कृतानुबन्धः श्रुतः ॥

---

(१) समूह । (२) महोत्सव । (३) आरम्भः ।
(४) रामकृष्णयोः । (५) चयनकर्त्ता ।
(६ विगतचित्तः ।

श्रीरामकृष्णौ पुनस्तत्र वितृष्णौ स्वपालित-
वृष्णिपालिभिरेव तथा तथा तं पराजिष्णुं चक्रतु-
र्न तु स्वयमिति चावकालितं ॥

यद्वाऽप्यय यज्जिग्यु,र्मागधमजितस्य तेजसा तद्धि ।
तत्त्वानां किल वर्गाः, ससृजुर्विश्वं यथा तथा विद्धि ॥

अथ सर्व्वतः प्रसृतं पद्यमिदं च शुश्रुवे ॥

नैवाश्चर्य्यं हरेस्तद्दृढकटकघटाघातनं भाति किन्तु
स्पष्टं तत्संग्रहात्म(१)व्यसनमिह मुहु-
र्मागधक्षोणिपातुः ॥

अग्निः खल्विन्धनानां नियुतशतमपि
प्लुष्ट(२)मेवाशु कुर्य्या-
त्तावत्तद्विचेता पुनरिह सुचमत्कारकारित्वमेति ॥

इति ॥

किञ्च ॥

आगात्प्राक् स यदा तत्र द्वित्रवारं जरासुतः ।
तदा सम्भ्रममाधत्त लोकानां हासमन्यदा ॥
सोऽयं दुहितुरुपगन्ता पुनः समागत इति ॥

अत्र वैहासिकहृदयसम्पाद्यं प्रश्नोत्तरमयमिदं पद्यं
च सर्वत्र प्रत्यपद्यत ॥

---

(१) चमूसंग्रहणरूप । (२) दग्धं ।

आनीय प्रस्मरणं,[१] मुहुरपमानं स्वशत्रुणा रचितं। उद्यममुच्चैस्तनुते, मूढः कोऽसौ जरासन्धः ॥इति॥

तदेवं स्वतनयविजयं व्रजपतिना श्रुत्वा श्रुत्वा स्ववस्त्ययमनु स्वस्त्ययनसत्रमेव वर्द्धितं । समनन्तरं च तावदनन्तमपि हविरादिहविर्द्रव्यं[२] हुतभुजि हुतं ॥

अतीतसङ्ख्यावन्धनं तु सर्व्वं धनं शन्तुक्रमा[३]देव देवभूदेवसात्कृतं ॥

तदेवं तन्मध्ये मथुरापुरायाध्वानं[४] गच्छत्सु प्रच्छन्न-दूतसत्सु[५] कदाचिद्दूतविशेषावागत्य शेषाख्यानं विख्यापयामासतुः । यत्र सुखसम्भेद[६]मिमं निवेदयन्तावुत्फुल्लमुखकमलतामवापतुः ॥

राजन् ! साम्प्रतमिदं विराजमानं वृत्तमासीत् । यद्विदर्भनगर्य्यां भवदर्भकस्य गमनं मङ्गलसङ्गमनं[७] वृत्तमासीत् ॥

व्रजराज उवाच ।—

हन्त ! तावतिदूरे कथं गन्तव्यता जाता ?

---

(१) विस्मरणं । (२) हवनीयद्रव्यं ।
(३) भव्ययुक्तो यः क्रमः । (४) अध्वनि ।
(५) दूतेषु सत्सु । (६) सङ्गमं । (७) मङ्गलप्रापकम् ।

दूतावूचतुः ।—

जरासन्धादीनां तत्र गमनानुसन्धानेन ॥

व्रजराज उवाच ।—

ते च किं विधातुं तत्र सन्निधानमवापुः ?

येन तस्मिन्नपि स्फुटमस्वस्थितमनाः सहसा रंहसा वत्सः प्रस्थितवान् ॥

दूतावूचतुः ।—

विदर्भपालस्य तस्य बालां शिशुपालाय दापयितुं सर्व्वेऽपि मिलित्वा गर्व्वेण कंसहन्तुस्तत्र खर्व्वेहतां विधापयितुश्च ॥

व्रजराजः सभयमुवाच ।—

उत्तरवृत्तमुत्तरविषयीक्रियतां ॥

दूतावूचतुः ।—

मान्य ! मान्यथा मन्यस्व । तव तनूजनुषः कुतूहलमेव खल्विदं । तथापि तस्य तत्र गतस्य विदर्भवृद्धमहाराजतासमृद्धानिःस्पृहभक्तिप्रथक्रथकैशिकगृहसङ्गतस्य तेज एव दुहृदुद्वेजनं जातं ॥

यथा ।—

ज्ञात्वा तं क्रथकैशिकालयगतं श्रीमन्तमन्तं निजं मन्वानाः सह भीष्मकेण यमवद्भीष्मं नृपा मेनिरे ।

चण्डज्योतिरुपेत्य नित्यमुदयक्ष्माभृत्परस्तात्तटं
तेजःसङ्घटनां विनापि घटते रात्रिञ्चर-त्रस्तये ॥

अथ सर्व्वनायकस्य तस्य साहायकं गरुडश्च परमातिशायकता[1] रूढतया व्यूढवान्[2] ॥

यथा ।—

क्षाराब्धिक्षितिभृत् क्षितिक्षिति[3]कर-
क्षोभक्रियातिक्षम-
द्विट्पक्षक्षयदक्षपक्षपवन-
व्याक्षिप्तवृक्षादिकः[4] ।
दुष्टक्ष्मापतिलक्षलक्ष्य[5]दनुज-
क्षिप्राक्षिविक्षोभण-
ज्योतिः क्षिप्तिरधक्षि[6]दीक्षण-पथं
पक्षिक्षितीक्षि[7]द्गतः ॥

अन्यत्र चण्डता तस्य चण्डतां प्रत्यपद्यत ।
हरेस्तु निकटे सौम्य ! सौम्यता नाप सौम्यतां[8] ॥

---

(१) अतिशयिता । (२) रचितवान् । (३) क्षय ।
(४) क्षाराब्ध्यादिक्षयकरक्षोभक्रियायामतिक्षमो द्विट्पक्षक्षय-दक्षश्च यः पक्षपवनस्तेन व्याक्षिप्ता वृक्षादयो येन ।
(५) व्याज । (६) श्रीकृष्ण ।
(७) पक्षिराजः । (८) शैथिल्यं ।

व्रजराजः सहर्षमुवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तदेवं वैरिखर्व्वेषु[१] सर्व्वेषु सर्व्वथा खर्व्वगर्व्वेषु क्रथकैशिकावागत्य गत्यन्तरं कंसान्तकाय शशंसतुः । सर्व्वविज्ञाधिराज ! तदिदमावयोर्विज्ञापनमङ्गीकृत्य साङ्गीकृत्य[२]मस्मदङ्गीकरणं ॥

श्रीकृष्ण उवाच ।—काममाज्ञाप्यतां ॥

तावूचतुः ।—

कमपि मनोरथलाभं
　　लुभ्यत्[३] क्षुभ्यद्विभाति नौ हृदयं ।
तस्मादभिलष्यंस्तं
　　भगवन्नङ्गीकुरुष्व नौ कृपया ॥

तच्चैवं निवेदयावः ।—

तेषां सर्व्वेषामेव कृतभवद्द्वेषाणां राजवेषाणामसुराणां भीष्मजास्वयम्वरतृष्णातुराणां सभाप्रभात एव भवितेति सम्यङ् निशम्यते ॥

तत्र तव च गन्तुं शन्तु[४]मनस्ता निशाम्यते ।

---

(१) सङ्ख्या । (२) साङ्गीकर्त्तव्यं ।
(३) कण्ड्वादित्वात् । (४) मङ्गलयुक्त ।

तत्र च हन्त ! राजतामनङ्गीकृतवतस्तव राजासनानङ्गीकृतिरपि सम्भाव्यते ॥

ते चासन्तस्तत्र प्रहसन्त एव वर्त्तन्ते । स कथमत्रासमत्रागत्य नीचासनसचमानतयापत्रपामपयापयिष्यतीति ।

सम्प्रति चात्र भवतः प्रतिलब्धस्य तत्र गत्यगती द्वे अप्यगती । यदस्माभिर्द्वयमपि न दृश्यतया परामृश्यते ॥

तस्मादिदन्तु निवेदयावः । यदावयोः प्राज्यमिदं राज्यमुरीकृत्य कृत्यमिदमुररीकृत्य च भृत्यजनानस्मानूररीकुर्व्वन्तु तत्र भवन्त इति ॥

व्रजराज उवाच ।——ततस्ततः ?

दूतावूचतुः ।——

यद्यपि जगदुन्नतपद,मपदं मनुते व्रजेन्द्र ! पुत्रस्ते ।
तदपि च भक्ताग्रहतः
साग्रहवत्तन्मनागुरीकुरुते ॥

व्रजराज उवाच ।——मर्य्यादा का पर्य्यापिता ॥

दूतावूचतुः ।——

ततः स तु तूष्णीकतां पुष्णाति स्मेति तदभ्य-

नुज्ञामनुमाय ताभ्यामुन्मनी[१]भवद्भ्यामभ्यात्ता-ञ्जलितया पुनरिदमभ्यधत्तां ॥

तदेतदद्य सद्य एवास्मद्राजासनं राजन्निजचरण-राजीवाभ्यां राजयन्तः सन्तु भवन्त इति ॥

अथ सङ्कोचवशादपि तदस्मै रोचमानमवलोच-मानयोरनयोर्यदा तदासननिवेदनारम्भः सम्भव-न्नासीत्तदाकाश-सकाशाद्वाणीयमिन्द्रदूतादुद्भूता साव-काशा बभूव ॥

भो ! भो ! मा राजयुग्म ! स्वककुलततिभि-
भुक्तमुक्तं महीक्षि-
त्पीठं कृष्णाय दाः[२]किन्त्वपरमथ वयं
दिव्यनव्यं ददाम ।
इन्द्राद्याः के यदेष स्वजनि[३]शिवरमा-
णामपि प्रागभीज्यः
किन्तु क्ष्मापाधिपत्ये वत ! समयवशा-
देनमभ्यर्च्चयामः ॥

अथ सुखविराजमानौ लब्धनिखिलराजमानौ[४] राजानौ तदेतद्वृत्तं प्रामाणिकवृन्दं वृत्तहरं विधाय जरासन्धादि-सदसि सन्धापयामासुः ॥

---

(१) उत्क । (२) मा दाः न देहि । (३) स्वयम्भू ।
(४) मानः पूजा ।

एतच्च शृण्वत्सु विचारं विवृण्वत्सु च तेषु द्विपत्सु तत्रैव त्रैविष्टपप्रधानमिन्द्रस्तदिदमन्तर्धानादभिधापयामास ॥

यथा चित्राङ्गद[1]स्तद्वाक्यतयेदं वदति स्म ।—

इन्द्रोऽहं वः प्रवक्ष्ये शृणुत बत ! नृपाः !
सोऽयमस्माभिरिज्यः
श्रीकृष्णस्तत्र गोवर्द्धनमभिसिषिचे
नाम गोविन्दनाम्ना ।
एतं राजेन्द्रतायामिह निधिकलसैः
सिच्यमानं न यः स्यात्
द्रष्टा नात्रानुमन्ताप्यथ स तु भविता
चक्रिणानेन वध्यः ॥ इति ॥

अथ सर्वेऽपि व्रजस्थाः सोल्लासं पप्रच्छुः ।—ततस्ततः?

दूतावूचतुः ।—

ततश्च तेषु केचित् पुनरतीवभीता विनीता इव तत्रागताः श्रीकृष्णेन तु सादरमनुमतास्तदनुगता इवासन् ॥

ये च जरासन्धादयो गर्व्वदुर्गन्धाः कतिचिन्ना-

---

(१) इन्द्रदूतः ।

गतास्ते विजमानमनसः स्वागमने व्याजं व्यञ्जन्त-
स्तानेव निजप्रतिनिधितया ज्ञापयामासुः ॥

लब्धेऽप्यानृततु(१)स्तस्मिन् मागधे तं हतः(२)स्म न ।
रामकृष्णौ तथाप्यत्र(३)नानृताद्विरराम सः ॥

तत्प्रतिनिधयस्तु तत्र चित्रतामवापुः ॥

यतः ।—

अष्टाभिः स्पष्टमूर्द्धान्निधिमणिकलसै-
रात्मना सिच्यमानं
चूर्णैरामोदपूर्णैरपि कुसुमशतैर्दैवतैरर्च्यमानं ।
वस्त्रालङ्कारसिंहासनधवलमहश्चामरच्छत्रमुख्यै-
र्दिव्यैर्दीव्यद्भिरर्थैर्वलितरुचिममुं शत्रवस्तेऽप्यपश्यन् ॥

तदा जय नमः शब्दमभ्रस्थास्त्रिदशा व्यधुः ।
प्रतिशब्दमिव त्रस्ताः शत्रवोऽप्यत्र तं दधुः ॥

किं वहुना ?

तथा ते तत्प्रतापतप्ता यथा जरासन्धं सङ्गत्य गत्यन्तरमपश्यन्तस्तां भीष्मजाशामपि परित्यज्य यथास्वमाशां गताः ॥

---

(१) घृणां चक्रतुः । ऋत घृणायां । कण्ड्वादिः । आर्द्धधातुके तु वा कण्ड्वादिता ।

(२) हिंस्तः । (३) अनयोः ।

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततो यथायथममुकान् समादध-
द्भवत्कुलप्रभवविधुर्यथागतं ।
समाव्रजन्मधुपुरमोदमावह-
त्परं तदा व्रजदिशमार्द्रमैक्षत ॥

सर्व्वे सास्रं पप्रच्छुः ।—

भवतोः प्रस्थापनं कुर्व्वता तेन किं स्थापन-
माचरितं ॥

दूतावूचतुः ।—

दृश्यते किमपि सम्विधानकं
मद्विमोचनविधायि सम्प्रति ।
किन्तु हन्त ! विधिना क्रियेत चे-
त्तद्ब्रुवे किमु युवान्तु गच्छतं ॥इति॥

तदेवं दूत-वाक्यं समाप्य स्निग्धकण्ठः स्वयमाह स्म ।—

अथ तद्वद्भवत्प्रभवपरवशेऽष्टादशे जरासन्धवन्धे लब्धप्रवन्धे व्रजतः सन्देशहरयोर्मथुरायां प्रवेशकरयोश्च द्वयोर्द्वयोः प्रान्ते कयोश्चिद्गतयोरकस्मात् पश्चिमतः कटकघटितः कश्चिदुत्पातः सम्पपात ॥

ततश्च तद्रात्रावेव स्व-स्थानं हित्वा गा गृहीत्वा सर्व्व एव व्रजः सङ्गत्य प्रत्यग्दिशि घनवनसमुद्दण्डपर्व्वतमण्डलान्तःप्रविष्टः। स तु समुत्पत्य[१] वदागत्य मधुपुरीमेव परितः परीतवान् ॥

ततश्च कृष्णस्य व्रजं प्रति व्रजस्य च कृष्णं प्रति वृत्तश्रवणातृष्णा वृत्ता। परस्परमपि न सन्देशस्य प्रवेशः सम्भवतीति ॥

अथ प्रवेशसङ्कोचनादसङ्ख्येषु गोगणेषु सन्देशसंशोचनाद्गोसङ्ख्यगणेषु[२] च लब्धभोजनवियोजनेषु दिनान्तरे लब्धान्तरे शिखरिशिखरशाखिवरशाखामारूढवद्भिः परमोत्कण्ठामूढवद्भिर्गोपसद्भिः शीघ्रतया समुद्भूतौ तावेव दूतौ काभ्याञ्चिदन्याभ्यां सह ददृशाते ॥

पश्यन्तश्च ते कञ्चन किञ्चिदपृष्ट्वा गोपपत्यग्रतः किमागत्य वदिष्यत इति बुद्ध्यापि दूरदर्शितास्पर्शिनस्ते दूरदर्शिनः प्रथमानभिया प्रथमं तौ प्रत्यलं दुद्रुवुः ॥

---

(१) समुत्पत्यैव । 　(२) गोपालगणेषु ।

अथ हृष्टवदनाभ्यां पृष्टवदनाभ्या[१]मपि ताभ्यां तत्सहिताभ्यामन्याभ्यामपि सह सहर्षधर्षतया श्रीव्रजराज-समाजमेवाजग्मुः ॥

ततश्च दूरादेव दूताविमावपृष्टावेव हृष्टाननतया कुशलमिति पूर्व्ववन्निशस्तान्निशमयामासतुः ॥

अथाग्रजावरजादिविराजमानः श्रीव्रजराजः सभाजयन्दूतावभाषत ।—

कथ्यतां तावत्तथ्यं सङ्क्षेपत एवेति ।

दूतावूचतुः ।—

ससैन्यः कालयवनः ससैन्य इव निहत एवेति न तत्र काप्यार्त्तता । किन्तु भवद्वार्त्ता-श्रवणं विना परमार्त्ताभ्यां कृष्ण-रामाभ्यां सन्देशहरावेतौ प्रस्थापितौ ॥

यतः ।—

अस्माष्टां वत पितरौ, सुतयो[२]र्यकयोर्भवन्तौ यौ ।
अस्मरिषातां तद्व,ताभ्यां तौ च व्रजाधीश !

अथ सर्व्वे सहर्षतर्षमूचुः ।—

अथ कथ्यतामाविस्तरां विस्तरतः ।

---

(१) वचनाभ्यां । (२) कर्मणि षष्ठी ।

दूतावूचतुः ।—

यस्यां सन्ध्यायां स[१]न्ध्यायमानकुशलयशस्तत्र-भवत्कुलचन्द्रमसः सन्निधिं निधिमिव गतवन्तावावां तस्यां न काञ्चिदपि तत्र चिन्तामपश्याव । प्रत्युत सममुद्भवेन तेन भवत्प्रभवेण रोहिणी-सम्भवेन च प्रत्यण्वपि शश्वदत्रकीयां वार्त्तां वार्त्ता-[२]मिव पृच्छ्यावहे स्म ॥

प्रातरेव तु सामुद्रपूरवद्दूरतः शूरसमूहाः शूरसेन-पुरीं परित एवावृण्वाना दृश्यन्ते स्म ॥

दृष्टाश्च ते मुहुरवष्टभ्नन्तो[३] जरासन्धसन्निकृष्टा इति पुरतः परामृष्टाः ॥

पश्चात्तु लकार[४]प्रकारं वर्णावारं[५] म्लेच्छन्तस्ते म्लेच्छा एव विनिश्चिताः । अनुमिताश्च जरासन्ध-प्रत्यभिसन्धाना[६]नुसन्धानाभ्यां कालयवनप्रधाना एते समेता इति ॥

व्रजराज उवाच ।—

कालयवन एवेति चेत्तर्हि गर्हितमेव भयमासीत् ।

---

(१) सम्यक् ।	(२) जीविकां ।

(३) निकटमागच्छन्तः ।

(४) म्लेच्छा हि लकारं प्रायो बहु भाषन्ते ।

(५) वर्णसमूहं ।	(६) प्रत्यभिज्ञा ।

यतः षण्ढो[१]ऽयमिति गर्गजश्यालरचितोद्दण्डोप-हासभासमानयदुसंसदनर्गलहासलब्धक्रोधसंसर्ग-गर्गजतद्भयसर्गसङ्कल्पसमाराधितभर्गवरतः सोऽयं गर्गजादेव यवनराजभार्य्यासम्भवः पुनर्यवनभूपाल-पालितस्तत एव यादवभयदप्रभवः कालयवन इति ॥

ततः कथ्यतां तथ्यमनन्तरं वृत्तं ॥

दूतावूचतुः ।—

अथ तं कालयवनमवमृश्य रामस्य करं संस्पृश्य रहस्याभाष्य घनश्यामः सम्मन्त्रयामास ॥

अयं तावद्यादव-कुलानां योद्धुमसह्यः सन्नह्य द्वारि वर्त्तते ॥

यदि वा सह्यस्तर्ह्यपि समागतप्रायः स जरा-संहितकायस्तेनास्मद्युद्धं समुद्बुद्धं बुद्ध्वा पुरीं प्रविश्य सर्व्वं परिकरं प्रहरिष्यति । तस्मात् प्रकारान्तरं चिन्त्यं। तच्च परिकराणां भूरिदूरदुर्गमदुर्गाश्रयणमेव योग्यं। तच्च सद्य एव लक्षितमेव चानवद्यं भवति। स्फुटमनेनास्माकं दूरगमनेन व्रजस्य च हितं विहितं स्यात् ॥

(१) षण्ढःस्यात् पुंसि गोपताविति मेदिनी ।

यतो यत्र वयमर्द्दनं कुर्म्मस्तत्रैव शत्रुसम्मर्द्दः स्यात् ॥

तदेवं लब्धतृष्णेन कृष्णेन परस्यां रात्राववचिरा-दाचरितया निजविमानेन यात्रया लब्धमब्धि-पात्रान्तः कयाचिद्विद्यया सान्तःपुरं पुरं सद्य एव निर्म्माय तत्र सर्व्वानेव माथुरपुरजनानन्तरिक्ष-वर्त्मना वर्त्तयामास। यत्र सर्व्व एव माथुरा मथुरायां शयाना एव प्रातरन्यत्र लब्धजागराः संशयाना वभूवुः। केऽयं परितः समुद्रमुद्रिता दिव्या पुरी दीव्यति कथं वा वयमत्रागता इति ॥

यत्र च श्रीकृष्णस्तस्यां रात्रावेव कुत्राप्यगत इवात्रा(१)गत्य स्थितः। आवां पुनर्मथुरायामेव प्रत्यूषे त(२)त्प्रत्यूहमानावत्यूनसङ्ख्यजनलब्धसख्यतया राम-रामानुजयोरवस्थानं निशामयामासिव ॥

ततो व्रजस्थाः सर्व्व एवोचुः ।—

व्रजनृपतेस्तपःप्रभावोऽयमिति पूर्व्वमेव जानीमः, येन सा सा विद्या च तेन लब्धा। तदनन्तरमुद-न्तस्तु समन्ततः कथ्यतां ?

---

(१) मधुपुर्य्यां ।　　(२) गतागतं ।

दूतावूचतुः ।—

ततश्च रामावरजः स्वाग्रजं व्याजहार ।—

भवानत्र स्वीयान् पालयन् कालं चालयतु । अहं तु यवनं युक्त्या प्राणमुक्त्या सम्बलयानि ॥

तदेतदुक्त्वा दुर्गस्य सूक्ष्मद्वारं मुक्त्वा द्वैताद्वयमिति श्रुतिमुत्प्रेक्षमाण इवाद्वैततायामत्रस्तः सन् निर्जगाम ॥

निर्गच्छन्तं च तं निरस्त्रं प्रशस्तालङ्कृतिसङ्कृतिशोभापरीतपीतवस्त्रं सविद्युद्विद्युत्वन्तमिव तं श्यामतारामधामानं चालनलाघवतः किम्वा प्रतिच्छविवैभवतश्चतुर्भुजमिव कालयवनीयाः सर्व्वं एवाकलयाम्बभूवुः ॥

आकलयन्तश्च ते तस्य सौन्दर्य्यवर्य्यपर्य्याकुलचित्ततया तं प्रष्टुमपि नाशकन् किमुत स्प्रष्टुं ॥ ततश्च तान् वञ्चयन् यत्र कालयवनस्तत्रैवाश्चंस्तेन लोकयामासे ॥

स पुनस्तं श्याममनोहरं श्रीदेवर्षिकथितप्रथितलक्षणतया विज्ञाय मत्सरतस्तद्विलक्षणसुखमव्यवज्ञाय निरस्त्रेण तेन निरस्त्र एव युयुत्सां चकार ॥

कृतायाश्च तेन युयुत्सायां कृष्णास्तु तत्र वितृष्णास्तं विष्कम्भमाणां कुत्सयाश्चकार । म्लेच्छानां स्पर्शं नेच्छाम इति ॥

ततश्च तं स्प्रष्टुमिच्छुर्म्लेच्छराजस्तदाभिमुख्येन द्रुतमृच्छति स्म ॥

स तु द्रुतं द्रुतवान् व्याहृतवांश्च, त्वया मम स्पर्शास्पर्शाविव जयाजयपरामर्शाय कल्पेयातामिति ॥

ततश्च ।—

पदे पदे स्पृश्यमिव द्रवन्तं
द्रवं[१]दधानं सरसं हसन्तं ।
अनुद्रवन् कृष्णमुपद्रवन् स
प्लुतं दधद्विप्लुतशक्तिरासीत् ॥

तिस्रः कोटय एता, यवनानां तत्र सान्द्रतामापुः ।
तद्राट् चानुद्रुतवां,स्तदपि वकारिर्न केनचित्स्पृष्टः ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च दक्षिणाहि[२] मथुराया लक्षितं पश्चिमेन

---

(१) नर्म्म। द्रवकेलिपरीहासाः क्रीडा लीला च नर्म्म चेत्यमरः ।

(२) दूरदक्षिणास्यां ।

धवलनगरं[१]गिरिमनुषज्य तेन तर्ज्यमानोऽप्य-दरो[२]तद्दरीमवरीकृत्य[३] कृत्यमनुवरीयान् केशवः स विवेश ॥

तन्निरोधाय तदैवेच्छन् म्लेच्छराजश्च त्वमधुना कुत्र वर्त्तिष्यते[४]ति भर्त्सयन्ननुविवेश ॥

अनुविशंश्च स पुनरदीर्घदर्शी तत्र निद्राविष्टं कमपि द्राघिष्ठं पुरुषं रुषा तमेव मन्वानस्तदित्थ-मवादीत् ।—

स्थालीविलीय[५]वद्विलीयमानतां गच्छन्नन्तः-स्वच्छ इव स्वपिषीति ॥

तदिदं वदन्नेव मदात् पदा वाढं तताड[६] । ताड-यंश्च तद्दृष्टिविषवृष्टितः सद्य एव भस्मसाद्भवति स्म ॥

कृष्णस्तु तत्कौतुकसतृष्णस्तत्रैव लीनः पश्यति स्म ॥

अथ सर्व्वे सोच्छ्वासमपृच्छन् ।—ततस्ततः ?

---

(१) धवलनगरस्य अदूरपाश्चिमस्यां । (२) निर्भीः ।
(३) समीपे गत्वा । (४) वा ऋच्छिता ।
(५) स्थालीविलप्रवेशमर्हतीति स्थालीविलीयः ।
(६) भौवादिकः ।

दूतावूचतुः ।—

ततश्च भवतां जीवनरूपः स च लघु लघु सच-मानस्तामेव तस्य दृष्टिममृतवृष्टिमिव परामृष्ट-वान् ॥

उपनन्द उवाच ।—

तदिदमहो ! अन्धकवर्त्तकीयं जातं ।

यस्मान्मुचुकुन्दनामा भगवद्भक्तिधामा तत्र निद्रायते ॥

तञ्च जागरयंस्तद्दृष्ट्याप्लुष्टीभविष्यतीति किम्व-दन्ती यासीदेषा[१] तदैव दैवघटिता जातेति ॥

किन्तु सेयं च येन ज्ञात्वा किल प्रत्यक्षीकृत्य स्वम्प्रत्यन्वक्षीकृता[२]तस्य कथ्यतामन्यापि दामो-दरस्य रहस्यचातुरी सुरीतिता ॥

दूतावूचतुः ।—

आस्तां तावदस्य चातुरी । एका माधुरी सर्व्व-मसीमवशीकरोति । तत्र माधुरीवर्णना तु भवत्सु न युक्ता । पुनरुक्ता हि सा भवेदिति॥

(१) 'तदैव दैवघटिताजातेति । किन्तु सेयं च' इत्याभिकयं कस्मिंश्चित् पुस्तके नास्ति ।

(२) अनुगतीकृता ।

तथा हि ।—

तदसितघन[१]लक्ष्म्यां चातकास्ते भवन्त-
स्तदवयवविचित्रश्री-चये दिव्यनेत्राः ।
तदतिगुणसुधानां स्वादने देववर्य्या
व्रजकुलपतयः किं तस्य वः श्रावणीयं ॥

तत्र तस्य परमवृद्धस्य[२]च तत्र समृद्धसार्द्रता-मयं वचनं कर्णे विरचयत ॥

स्फुटिततरखराग्रग्रावखण्डातितीक्ष्णे
पटुतरकटुजाग्रत्कण्टक-व्राततीव्रे ।
स्थपुट[३]गिरितटान्तः स्निग्धनीलाङ्ग ! पद्भ्यां
नवकमलमृदुभ्यां ! हा कथं भ्राम्यसि त्वं ॥

अथ तदेतद्दूतवर्ण्यमानमाकर्ण्य लब्धकरुणा-सज्जना[३]व्रजसज्जनाः क्षणकतिपयं रोरुदामासुः । रुदित्वा च सगद्गदमूचुः ।—ततस्ततः ?

दूतावूचतुः ।—

अथ समुद्बुद्धभावः स महानुभावस्तस्य विशेषं प्रष्टुं निजविशेषं सुष्ठु कथयामास ॥

---

(१) नीलमेघ । पक्षे श्यामशरीर ।
(२) मुचुकुन्दस्य । (३) नतोन्नत ।
(४) मिलन ।

कथिते च तस्मिन् कृतस्मितः कृष्णः स्वविशेषमपि यथायथं तस्य कर्णयोः श्लेषयामास ॥

तदेवं मिथः स्निग्धताविद्धयोर्द्वयोः स तु मुचुकुन्दः सर्व्वत्र विरज्य मुकुन्द एवासज्य तत्सङ्ग एव स्वमङ्गलमिति तमेव ययाचे। मुकुन्दस्तु तत्र तदिष्टं सहसा नाकल्पिष्ट किन्तु कालविलम्बमालम्बिष्ट। यत्र च कारणं विचारयतामस्माकं तद्विजानन्ति तद्विद इत्येव मनस्यावर्त्तते। दुर्लभः खलु भवत्कुलचन्द्रमःसङ्ग इति च ॥

यतः।—

शान्ततां यद्यपि प्राप्तः स तेनैकान्तितामपि।
अदर्शैव तं तस्य स्पर्शमात्रं न चासदत् ॥

व्रजराज उवाच।—ततस्तत?

दूतावूचतुः।—

ततः स तु तदधिगम्य मुहुः प्रणम्य पुनस्तदुपासनायामेव वासनां विधाय तपसे समुपसेदिवान्।

यत्र कृष्ण-सङ्गाय कृष्णसङ्गाय(१) एव सततमासीत् ॥

(१) कृष्णं सङ्गायतीति।

तदेवं यावच्छ्रीकृष्णेन कालयवनः स जिग्ये तावत्तदग्रजेन मथुरा दिग्ये[१] ॥

अथ मथुरा-नाथस्तु रथादिसामग्रीं स्मरणमात्रादग्रीयां कुर्वन्नागत्य तु पाञ्चजन्यं दध्मौ "कालः काल-वशं यात, इति ॥

ध्माते च तत्र श्रीवलभद्रश्च "किं कुर्म्मस्तद्विधेहि न" इति स्व-सङ्ग-नादशङ्करतया निष्क्रान्तः । निष्क्रान्ते च तस्मिन्नसौ पुनः शङ्खं दध्मौ ।
"हत[२] तुच्छानिमान् म्लेच्छान् हलेन मुसलेन च"
॥ इति ॥

ततः श्रीरोहिणीनन्दनः स्वमुसलाघातानन्दमारब्धवान् ॥

श्रीमान्नन्दनन्दनश्च नन्दकाघातसुखव्रात[३]मिति स्थितेन तु वयं ज्ञातवन्तस्तदा कदा पुनरश्वादिमिश्रास्तिस्रोऽपि म्लेच्छानां कोटयः कृत्ता वृत्ता इति ॥

तत्र तु हन्यमानानां तेषामगण्यमानानां यन् म्लेच्छितं तत्केवलमुच्चारणात एव यदुवीरान् स्माययामास ॥

---

(१) पालयामास । (२) यूयम् ।
(३) आरब्धवान् ।

न पुनरर्थतः । स हि दुर्बोध एवेति ।

ततश्च ।——

छिन्नैर्भिन्नैस्तुरुष्काणां मूर्द्धभिर्द्राढिकावृतैः ।
तस्तरे धरणिस्ताल(१)लक्षैरिव समाक्षिकैः ॥

व्रजराज उवाच ।——ततस्ततः ?

दूतावूचतुः ।——

ततश्च तेषां यत्र कुत्र पतितानि शरीराणि क्षेप्तुं धनानि च संक्षेप्तुं यदा ताभ्यां युक्ता जना नियुक्तास्तदा तु मन्त्रि-वरमुद्धवं निजागमनानुज्ञापन-प्रार्थनं श्रावयित्वा तस्मादिमां कथां श्रुत्वा श्रीकृष्ण-प्रस्थापिताभ्यां निज-सङ्गेऽवस्थापिताभ्यामाभ्यां दूताभ्यां सह भवत्पद-सदनमासादयाव । किन्तु ज्ञातभवद्भाविकवृत्ताविमौ शीघ्रमेवानुज्ञातव्यौ । यथाभ्यां राम-रामानुजौ सान्त्वयितव्यौ स्यातां ॥

तदेतच्छ्रुत्वासि योजयित्वा तौ भोजयित्वा वस्त्रालङ्कारादिना रोचयित्वा निज-दूताभ्यामन्याभ्यां सह सन्यायं व्रज-पतिना प्रस्थापिताविति ॥

अथ सम्प्रति सम्प्रतिपन्नशुश्रूषावेशेन व्रजेशेन सन्देशेन यौ दूतौ योजितौ यौ च यदुव्रजेशेन तौ

(१) फल ।

च तौ च मधुरजनपुण्यं मधुपुरं शून्यमेवावलोक्य भृशमनुशोच्य व्रजमेवाव्राजितवन्तौ पथि तु श्रुतवन्तौ । जरासुतः श्रीकृष्णरामावनुद्रुतः सन् द्वारका-दिशं विशति स्मेति ॥

ततश्च श्रीकृष्ण-दूतौ तद्वार्त्तासतृष्णतया द्वारकापथमेव जग्मतुः ॥

व्रजपति-दूतौ तु विशेषं श्रावयितुं श्रोतुं च व्रजमेवाजग्मतुर्व्रजमागत्य तदेव कथयामासतुश्च । कथिते तु तस्मिन् व्रजराजादयः समस्ता व्यग्रताग्रस्ता वभूवुः ॥

तदलं तस्य वर्णनेनाकर्णनेन च ।

अथ द्वारकादिशमेव प्रस्थापितयोस्तयोरन्ययोरन्ययोरपि दूरगततया झटित्यनागतयोर्दुर्गतिमये दिनकतिपये च लब्धव्यत्यये शतयोजनव्राजिनौ वाजिनौ समारुह्य प्रसन्नताजुषौ कौचित्पुरुषौ समागतौ । समागम्य च श्रीव्रजराजचरणराजीवं पुरतः प्रणम्य रम्यमिदं निवेदयामासतुः ॥

परममङ्गलसङ्कलनगणमवलवद्बलवलानुजौ कृतशात्रवरुजौ तत्र भवत्सु चरणप्रणिपाताचरणपुरःसरं निज्ञापयतः स्म ॥

अथ तदेतन्मात्रं कर्णपात्रं विधाय सपुलकगात्रं सर्वेऽपि प्रोचुः ।—ततस्ततः ?

दूतावूचतुः ।—

तद्विज्ञापनं त्विदं विज्ञायतां। वयमत्र निःश्रेयसमिश्रतया शत्रुदुर्गमं द्वारकाख्यं दुर्गं सङ्गताः। यत्र दृष्टमदृष्टञ्च भयं न दृष्टं भविता ॥

तथापि तत्र भवतां भविकमेवास्माकं भविकाय भवितेति तन्निःसन्दिग्धं सन्दिश्य वयमानन्दनीया इति ॥

विशेषतस्त्विदमनुजः सगद्गदं निवेदयामास ॥

सम्वन्धेन ममात्मजस्य वहुश-

स्तान् पूतनाद्याचिता-

नुत्पातान् वत ! यूयमापुरसतः

श्रीगोकुले तत्र च ।

पुर्य्यां तत्र च मागधादियवनप्रान्ताहृतानित्यतः

कालं क्षेप्तुमिहागमं द्रुतमितः प्राप्तं तु जानीथ मां

॥ इति ॥

तदेवं सम्यङ्निशम्य स गोपाधिपतिरुवाच ।—

दिष्ट्या तादृशं दुर्गमधिष्ठानमनुष्ठितं। यद्गोकुलमिव माथुरं पुरमपि भयाकुलं भाति । भवतु

पश्चाद्विशेषं प्रक्ष्यामः सम्प्रति तु भोजनाय ताविमौ योजयथ ॥

अथ भोजनानन्तरं सर्व्वैः सहोपविश्य कृष्ण-वृत्तान्तश्रवणायाविश्य तौ स महेच्छः पप्रच्छ,—कथ्यतां कथं कथं द्वारका-पथं तावाश्रिताविति ॥

दूतावूचतुः ।—

आवां खल्विमौ श्रीमदुद्धवदासतामध्यास्वहे ॥

आश्रितयदुपत्यादेशात्तदुपदेशादेव च सन्देशं वः सन्देशं प्रवेशयितास्वहे । यदा म्लेच्छानां धनानि न स्वेच्छाविषयीकृतानि किन्तु राजद्रव्याणीति रक्षि-तानि तदा पूर्व्ववदन्धताकल्पसन्धस्य जरासन्धस्या-गमनं लक्ष्यं विधाय तानि त्यक्ष्यद्भ्यां सम्प्रति तु द्वाभ्यामपि ताभ्यां पलायनकुतूहलमारब्धं ॥

आरभ्यमाणे च तस्मिन्नमौ सदेशमेवाविवेश । आविष्टे च तस्मिन्ननिष्टे श्रीकृष्णस्त्विदमावभाषे ।—

अस्माभिर्व्वहुधासि हन्त ! विधृत-
स्त्यक्तश्च तस्मात्पुन-
स्तत्कर्त्तुं त्रपया न शक्तमिति चे-
द्धन्तुं विदूरे स्थितिः ।

तस्मान् मागधविद्रवोऽद्य रचितः

किं त्वत्र चास्ति स्फुटं

शक्तिस्ते यदि नौ जितौ कुरु न वा

सम्प्रत्यपि त्वं जितः ॥

तदेवमुक्त्वा द्रवकेलिपरीहासानामेकार्थतामित्थमपि प्रथयति स्म ॥

यत्र स्वकटकं पृष्ठत एव मुक्त्वा तद्रक्षणाय परकटकमध्यमन्वात्मानं युक्त्वा तत्पृष्ठ-वर्त्मना विद्रुतं सराममाधवं समागधराडनुदुद्राव ॥

न केवलं स एव किन्तु रथकड्यादि[1]त्रयोविंशत्यक्षोहिणि[2]च ॥

द्रुतमन्वगसातां[3]वा, मागधराजेन वागधःस्थेन[4] ।

समगंसातां[5]नतरां, कंसारातिप्रलम्बारी ॥

तथा हि ।—

यदा मागधसेनान्तस्तौ विदुद्रुवतुः स्फुटं ।

विद्युत्प्रायौ तदा दृष्टौ न स्पृष्टौ तत्र केनचित् ॥

पदे पदे स्पृशत्प्रायः प्रदुद्राव स मागधः ।

कल्पकोटिभिरप्राप्य तया दुद्रुवतुस्तु तौ ॥

---

(१) रथसमूहः । रथ्या रथकड्या रथव्रजेत्यमरः ।

(२) समाहारे द्विगुः ।　　(३) अनुगतौ ।

(४) निम्नेन ।　　(५) सङ्गतौ ।

अक्षौहिण्यः परिश्रान्ता न तु शश्राम मागधः ।
पर्य्यश्राम्यन्मागधोऽसौ न परिश्राम्यतः स्म तौ ॥
हसन्तौ द्रुतवन्तौ तौ गर्जन् दुद्राव मागधः ।
हर्षस्तयोर्वलं चक्रे क्रुज्ज्वाला तस्य खिन्नतां ॥
पलायमानावपि तावुल्लसन्मुखपङ्कजौ ।
जिघृक्षन्तमपि ग्लानं वीक्ष्य तं जहसुः सुराः ॥
मध्ये मध्ये केलिगत्या व्यतिजित्य द्रुतावमू ।
स तु तस्मिन्नशक्तः सन्नासीद्धिक्कृतजीवनः ॥
तौ तु पञ्चशतक्रोशीमतीत्यारोहतं गिरिम् ।
दशैकयोजनोत्तुङ्गं दुरारोहस्त्वनेन यः ॥
द्विष्पीतदववर्हिं(१) तं वह्निनापचिकीर्षवः ।
दूरादेधांसि ते चित्वा दहन्नद्रिं प्रवर्षणं ॥
प्रतीयेत न वा वार्त्ताहर्त्ता(२) सत्यन्तु भाषते ।
उत्प्लुत्य तस्माददेस्तावुपद्वारकमारतुः ॥
विहङ्गमादिसत्त्वानामुत्प्लवः सम्भवत्यपि ।
परैरलक्षितत्वं तु लक्षितं केवलं तयोः ॥
न दूरात्पतितत्वेऽपि कोऽप्यभूद्विक्लवस्तयोः ।
हसन्तावेव तौ यस्माद्द्वारका-द्वारि वीक्षितौ ॥

---

(१) द्विःपीतो दवाग्निर्येन । (२) दूतः । वार्त्ताया हर्त्ता ।

वद्धकेशांशुकौ तर्हि स्वेदोद्यद्वदनांशुकौ ।
अव्यग्रौ सममेवास्तामभ्यग्रौ निखिलस्य तौ ॥

व्रजराज उवाच ।—

जरासन्धादयः पापिनस्तदापि निवृत्ताः ।

दूतावूचतुः ।—

जरासन्धादयो दृष्टया तर्ह्यन्धा नाभवन्परं ।
किन्तु वुद्ध्यापि यत्तस्मिन्मेनिरे विपरीततां ॥

हरिमनु विपरीतभावनायां
सुखमगमन् यदमी जरा-सुताद्याः ।
चरकृतनहिकारतस्त[1]दासी-
दसुखमघा[2]दुदितं यदित्थमेव ॥

तदाचान्धायमाना जरासन्धादयस्तु ।—

गत्यागतिभ्यां ते तत्र तृषार्त्ता मरुवर्त्मनि ।
अल्पे कृच्छ्राद्गताः सद्म स्वस्यानल्पे मृताशितुः ॥

किं वहुना ? म्लेच्छ-धनानि च तानि पुनर्नानुसन्दधुर्यानि खलु क्रमाद्वारकायामेव पर्य्युपशोभारचनाय पर्य्यवसितानीति पर्य्याकलयन्ति ॥

तदेतच्छ्रुत्वा सर्व्वेषु सास्रं हसित्वा श्वसित्वा च विरमत्सु ॥

---

(१) छुखं । (२) पापात् ।

व्रजराज उवाच ।—

हा ! तयोश्चरणपल्लवाः कथं तत्र कर्कशपथे गतिं व्यधुः ॥

दूतावूचतुः ।—

स्पर्शमात्रमिव तौ भुवस्तदा बिभ्रतौ नभसि चक्रतुः प्लुतं ॥

अथ तदेतन्निवेद्य दूतौ व्रज-सदसः समासादित-प्रसादतया प्रभूतौ द्वारकां प्रतस्थाते । प्रस्थान-समये च श्रीमन्नन्दगोपतिनाम्ना समस्तानाञ्च तदनुगतसाम्ना पत्रिका दत्ता ॥

यथा ।—

सहामहे त्वद्विरहस्य पीडां
मा तत्र चिन्तां कुरु गोकुलेन्दो ! ।
अभूम यद्दुर्ज्जनदुर्गमायां
पुर्य्यां त्वदावाससुखाद्दलिष्ठाः ॥ इति ॥

अथ स्निग्धकण्ठः समापनमाह स्म ।—

यद्यपि समरे कुतुकी, तदपि त्वरितं हरिर्जघानारीन् ।
भवदङ्के स्थितिरेषा, द्रुततरमस्यान्यथा न स्यात् ॥

क्व प्रवर्षण-गतिः क्व वा हरे-
र्द्वारका-निवसतिश्चिरन्तनी ।

क्वायमस्मदुदयः[१] स दृश्यतां
श्रीव्रजक्षितिभृदङ्कगस्थितिः ॥

तदेवं श्रीव्रजेन्द्रादीन् सन्तोष्य तत्प्रसादपोष्यतया स्व-सुखप्रथकौ तौ कथकौ कथां रचितवन्तौ ॥

अथ व्रज-वन्दिनश्च तत्र तं साक्षाद्वन्दितवन्तः ।—

भीष्मक-पुरभागचलित ! ।
राज-निवह-राज्यवलित ! ॥
सर्व्वविबुधवृन्द-महित ! ।
तत्र च निज-गर्व्वरहित ! ॥
माथुरपुर-तोषवलन ! ।
ख्यातिकलितशत्रु-दलन ! ॥
कालयवनलब्धवृतिक ! ।
कालयवनकालकृतिक ! ॥
स्वापगमनलीलगमन ! ।
केलि-महसि दुष्टशमन ! ॥
अन्वयदरिदुर्गमगम ! ।
नर्म्म-घटनपण्डिततम ! ॥
सङ्गतमुचुकुन्द-सदन ! ।
क्लृप्तसभयकल्पवदन ! ॥

---

(१) रूपकं ।

विष्टगहनपर्व्वतदर(१) ! ।
दृष्टशायिततन्नरवर ! ॥
तत्र यवनराडनुगत ! ।
गोपनकरधामनिरत ! ॥
तद्धृतमुचुकुन्दकरुण ! ।
तामसगणादीव्यदरुण ! ॥
शङ्कितमुचुकुन्द-नयन ! ।
निर्म्मितयवनेशलयन ! ॥
तर्पितमुचुकुन्द-हृदय ! ।
भक्त-लपितदानसदय ! ॥
सृष्टयवन-कोटिनिधन ! ।
तत्र च युधि संहतधन ! ॥
अङ्ग-मगध-राडनुगत ! ।
त्यक्तघृणिततद्धनशत ! ॥
पूर्व्ववदपयानकमन ! ।
मागधनृपजैत्रगमन ! ॥
वर्षणगिरि-मूर्द्धवलन ! ।
उत्प्लुतिजितदावकलन ! ॥

(२, बिल ।

सिन्धुगयदुपत्तनहित　! ।

सर्व्वभुवनलोकमहित　! ॥

साम्प्रतमितगोष्ठनिलय ! ।

गोष्ठ-नृपति-पुत्रक ! जय ॥ इति ॥

तदेवं कथावेशवशात् कराठनिबद्धं चिन्तामणिमिव तं विस्मृत्य चिन्तातुरानमून्प्रतिवन्दिनः स्निग्धकराठवदेव तमायत्यां समत्तमनुभाव्य स्वाभाव्यतः श्रीमद्व्रजहिताः श्रीमद्व्रजराजेन विहिताः(१) सर्व्वैः सह यथायथं जग्मुः ॥

अथ रात्रि-कथायां श्रीराधा-माधव-सदस्यारब्ध-प्रथायां स्निग्धकराठः कथयामास ।—

यदवधि स उद्धवः समस्तान् व्रजस्थान् यथायथमाश्वास्य विश्वास्य च यदु-धाम जगाम । तदवधि जातु जातु स्वापे जागरे चैकाकितासमवापे(२) कृष्णस्य सात्तात्कारकल्पस्तान् पुष्णाति स्म ॥

वहुसंहिततायां वहिरनुसंहितिस्तु मथुरास्थितिमनुसंहितां करोति स्मेति यद्यपि साधारणोऽयं व्यवहारस्तथाप्यऽस्ति विशेषः श्रीकृष्ण-प्रेयसीनां ॥

---

(१) आज्ञाप्ताः ।　　(२) प्राप्तौ ।

यदा यादृशी वृत्तिर्जायते तदा तादृशी चिरं गाढ़-मारूढतामूढवती भवति स्मेति ॥

तदा च यदा कमलाक्षः साक्षात्काराय कल्पते तदा बाहुवल्लीवलयितं कलयन्ती निरोत्स्यामीति ॥

प्रतिस्वं कृतचरं मन्त्रमपि तदङ्ग-सङ्ग-सम्मदपर-तन्त्रतया विस्मृतिविद्धं रचयन्तीनामकस्मात्तदन्त-र्धाने तु न वाञ्छितविञ्छोली[१] सिद्ध्यति ॥

किन्तु माथुरपुर-सन्देश एशवोत्र: स्यात् । ततश्च मुहुरपि व्रजराज्ञी-चरणपरिसरानुशरणमेव शरणं भवतीत्युभयी गतिर्भवतु प्रिय-प्रत्यागमनमासीत् ॥

उद्धवस्तु गुप्तश्वासितमुखमुखतः पूर्व्वपूर्व्ववदेव यदु-देवसन्दिष्टमुक्तं कुर्व्वन्नास्ति स्म ॥

श्रीकृष्ण-स्फुरणास्फुरणयोस्तु ।—

दधत्यः स्फीतं ताः क्वचन वपुराभां च महतीं
क्वचिच्च क्षीणां तत् क्षययुजममूश्च प्रति मुहुः ।
प्रिय-स्नेहप्राप्तिस्फुरणतदयोगव्यतिकृतिं
गता या दीपाल्यस्तादुपमितिमुच्चैर्बवलिरे ॥
राधा-प्रेम्णः सुखं दुःखं चान्वकुर्व्वंस्तदालयः ।
यथा ऋतु-प्रथा भानोः सौम्यतामुग्रतामपि ॥

---

(१) परम्परा ।

यदा च श्रीकृष्णेनातितृष्णेन तौ स्वहितौ दूतौ प्रहितौ तदा प्रागिमथः सङ्केतितवेषेण लिपिविशेषेण शस्तं स्वस्तिमुखं विधाय सोऽयं सुवलहस्ते वलनीय इति तदुक्तिकृतनियुक्तिभ्यां ताभ्यां तथा कृतं । यथा सुवलश्च तासु तमवकलयामास ॥

यथा ।—

यद्विदूरमगमं तदिदं वः
स्याददूरगतिभागिति वित्त[1] ।
आगतिप्रतिरुधोर्मम मित्रा-
मित्रयोः पुरमिदं प्रतिरोधि[2] ॥

तादृशलिपिकल्पलेखश्च ताभिरप्युद्धवहस्ते देयः । सोऽयमिति सुवलद्वारा निधीयते स्म ॥

स यथा ।—

अकण्टकमकर्करं चलसि यर्हि वृन्दावनं
तदापि चरण-व्यथां तव वितर्क्य यः खिद्यते ।
कथं द्विषदनुद्रवाद्विषमवर्त्मशैलाक्रमा-
च्छ्रुतादहह ! जीवनं वहतु स व्रजस्त्रीजनः॥इति॥

---

(१) जानीत ।　(२) परिभावि ।

अथ स्निग्धकण्ठः समापनमाह स्म ।—

आस्तां भवल्लेखनिशामनोत्थं
तदातनं दुःखममुष्य दूरे ।
आलिङ्ग्य सोऽयं भवतीमिहास्ते
तथापि शक्नोति न रोद्धुमस्त्रं ॥

यदिदमुदितमासीच्छून्यमेतन्न दृश्यं
तदपि विरहितास्या दृश्यवद्भाति पश्य ।
यदि च हरिसमत्त्वं सम्प्रतीदृश्यवस्था
कथमिव न तदा स्याद् यर्हि हा! तद्वियोगः ॥

तदेवंविधया[1]विधया तस्यास्तत्रावधानं विधाय परमानन्दं सन्धाय वासाय वलितयोः सूतसुतयोः सर्व्वे यथायथं स्वपथमनु वव्रृतिरे ।

श्रीराधा-माधवावपि वलितस्नेहं ललितगेहं कलित-लीलतया शीलयतः स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु यवनजरा-
भवनिर्ज्जयजवं नाम चतुर्द्दशं
पूरणम् ॥

---

(१) प्रकारेण ।

पञ्चदशं पूरणम् ।

अथ प्रातःकथान्तरं ।—

यत्र श्रीकृष्णाकृतमहसि व्रजराज-सदसि मधुकण्ठ उवाच ।—

गतयोश्च तयोः श्रीकृष्णाप्रेषितयोस्तद्वद्व्रजेशप्रहितयोरन्ययोरन्ययोरपि व्रज-सान्त्वनाय कुतः कुतश्चित्तत्पुरतश्च यत्किञ्चिद्वार्त्तामादाय शीघ्रमेव पृथक् पृथगागतयोः श्रीव्रजराजादयो मन्त्रयामासुः ॥

सम्प्रति दूरं गच्छति स्म वत्सः । तर्ह्यव्याहतं कथं वृत्तमनुवर्त्तितास्महे ॥

उपनन्द उवाच ।—

दूतानां प्रभूतयुग्मता कार्य्या यथा नित्यानित्यमेकं युग्ममाजग्मिवद्भवति ॥

व्रजराज उवाच ।—

प्राग्मिश्राणां[1] तिग्मजवानां युग्मानां शतं विधीयतामिति ॥

---

(१) प्राचीनैः सद्धितानां ।

अथ तत्राहोरात्रेण गव्यूतीनां षष्टिं सुष्ठु क्रामता-मन्यतरौ लब्धतदाज्ञावितरौ पञ्चभिर्वासरैर्द्वारका-मासादितवन्तौ । आसाद्य च तत्र सर्व्वमत्रत्यं वृत्तमुद्धवमन्तरे विधाय श्रीकृष्णाय समर्प्पितवन्तौ । श्रीव्रजभूपतिना प्रभूतानां दूतानां विनियोगं च श्रावितवन्तौ ॥

अथ स्वयं श्रीकृष्णः प्राह स्म ।—

नेत्थमपि वृत्ताव्याहृतिः प्रतिपत्तव्या भवति । किन्तु शत-योजनव्राजिनां वाजिनां शत-द्वयमेभ्यः समर्प्यतां । यथागमनागमनमनारतं भवतीति ॥

अथ तौ तत्रत्यं वृत्तं संगृह्य वाजिनावारुह्य व्रज-समाजमाव्रज्य प्रथमं तेषु तत्-कुशलं संसज्य वार्त्तां वर्त्तयामासतुः ॥

यद्यपि मथुरा-निकटे तथापि तत्र मुहुरटितवतो-रावयोर्नेदृशं सुभृशं सुखमुपजातं । निरन्तरोत्पात-सम्पातदर्शनात् ॥

द्वारकायां तु सुखसारश्चक्षुर्विस्तारमनुससार ॥

यस्मादुत्पातमात्राद्दूरीभवन्ती सा पुरी यादृगुरी-कृतसुखसुरीतिरवलुलोके लोके तु तादृशताभृश-दुर्लभेति ॥

तथा हि ।—

यत्राब्धिः सुष्ठु धत्ते परिगतपरिखा-
रूपतां यत्र पर्य्यङ्क
प्राचीरं वीरनेत्रातिगशिखरवतां
यत्र वीत्सा[1] पृथक्ता[2] ।
द्वार्वत्यां तत्र बाढं भयमपि सभयं
नावगाढं समन्ता-
द्भावीति स्वान्तमुच्चैर्वहति सुख-शतं
सन्ततं गोष्ठदेव ! ॥

स्वर्णानां मौक्तिकानामसितमणिहरि-
द्रत्नवैदूर्य्यकाणां
हीराणां विद्रुमाणां रविशशिदृशदां
पद्मरागादिकानां ।
कैवल्यान्मिश्रभावान्मधुररुचिधुरा-
सद्मनां सद्मवृन्दैः
सा दिव्या पूरपूर्व्वं प्रमदमदिशत
श्रोत्रादिक् चित्तदूरं ॥

यस्यां देवद्रुमास्ते परमसुरसभा
सा निधीनां स वर्गः ।

(१) व्याप्तुमिच्छा । (२) असामर्थ्यं ।

स्वर्ग्यावस्थामतीत्याप्यतिरुचिमदधु-
र्व्विस्मिता यत्र देवाः ॥

अस्माभिः पूर्व्वमासन् मुहुरपि यदवः
सुष्ठु दृष्टाः परन्तु ।

प्रेक्षान्ते साम्प्रतं चेद्दधति परिचयं हन्त !
नापूर्व्वलक्ष्म्या ॥

सुवर्म्मानन्दने न प्राग्यथार्हफलतां गते ।
इतीव ते यथा नाम सफले कृतवान् हरिः ॥

किं वहुना ? यत्र भागधेयं(१) ददत्यश्च प्रजाः प्रजात-श्रीकृष्णवैभव-दर्शनाभागधेयलाभमेव मन्यन्ते ॥

तदेवं कृतकृतायामपि द्वार्वत्यामकृतकृत्यान्तः-पुरता प्रतीयते ॥

यतः ।—

पताकायुकूचूडापटलवडभीस्तम्भवरणा-
ङ्गनाद्यङ्गा यस्यां वहिरवहिरंशा मणिरुचः ।
महान्तःपूर्य्येषा यदपि वलिता नीलनिधिना २)
तथाप्युच्चैरस्या(३)प्युचितवृतिलक्ष्मी ४)मृगयते ॥

---

(१) करं । (२) श्रीकृष्णेन । (३) कृष्णस्य ।
(४) आवरणशोभाः । पत्न्यभिप्रायेणेदं ।

अथ तां पुर शोभामावयोः स वैलक्ष्यमीक्षमाणयोर्भवत्कुलचन्द्रमा विहस्य प्राह स्म ।—

किं पश्यथस्तत्र भवतामितोऽपि विलक्षणवैभवमस्ति। यद्वरुण-लोकादागम्य रम्यतया निशामितं। यच्च साधुप्रमाथानामुक्ताथनानन्तरं निशामयिष्यत इति ॥

व्रजराज उवाच ।—

कथं किल विलम्बं भवन्तावबलम्बाते ॥

तावूचतुः ।——तत्र महामहः सम्वृत्त इति ॥

व्रजराज उवाच ।—

कथ्यतां कीदृशः ? तावूचतुः ।—

आश्चर्य्यमिदमिति प्रतीतिमाचर्य्य श्रूयतां ॥

तदेवं श्रीहरेर्दर्शनामृतभृतचित्ततया तत्र लब्धभावयोरावयोरुपवनपालकः कश्चिदागत्य साश्चर्य्यतया तमुवाच ।—

देव ! तालप्रमाणः कश्चिन्मानवः कयापि तादृशा सुदृशा सममागत्य कत्यपि दण्डानत्यपूर्व्वतया विचारं खण्डयंस्तेजसा वनं मण्डयंश्च वर्त्तते ॥

वदति च ।—

सात्त्वतपतिमिलनाय किल सङ्गतवानस्मीति ॥

लोकास्तु प्रथमं भीताः पश्चात्तु मद्विधर्माविध-
तया भीतिमतीतास्तदवलोकाय निःसीमाः सीमान-
मतिक्रम्य निष्कुटं[1] पुटभेदन[2]मिव चक्रुरिति ॥

अथ श्रीकृष्णो च तद्दर्शनसतृष्णो स्वयमेव नर-
यानतया चलत्यावामपि तदनुगत्या तत्र गत-
वन्तौ ॥

तयोरग्रे सर्व्वांल्लोकांस्तन्नवतोकानीव च विलोकित-
वन्तौ । विलोक्य च विचारितवन्तौ । कतिभिरहो-
भिरहो ! तावेतावेतावत्प्रमाणतां याताविति ॥

सर्व्वेऽपि व्रजस्थाः प्रोचुः ।—ततस्ततः ?

दूतावूचतुः ।—

स पुनः श्रीकृष्णं पश्यन्नेव सुखवश्यतया दण्ड-
वत्पतन्ननेन बाहुभ्यामुन्नमय्य शिरसा प्रणम्य चाभि-
मुखं ससुखमुपवेशितः ॥

सा काचित्तु सलज्जा स्वावरणपर्य्याप्तणाय दृष्टं
तत्पृष्ठदेशमनुनिवेशं लब्धवती ॥

व्रजस्थाः प्रोचुः ।—ततस्ततः ? दूतावूचतुः ।—

ततश्च द्वारकापतिना तद्विशेषमनुयुक्तः स तु
तदिदं मेघगर्जितमिवाज्र्जुन्नुक्तवान् ॥

---

(१) गृहं आरामं । (२) पुरं ।

यर्हि वर्हिणाश्च वृहदुल्लासादर्हितमेव शकुनमुल्लपन्ति स्म ॥

तद्वचनं यथा ।—

अहं किल रे ! वत ! सपर्य्यायककुद्मिनामा प्राक्तनराजग्रामानाकर्णयता भवता कर्णगोचरतामानीत एवास्मि ॥

स खल्वहमनया नवतनयया साकं नाकं व्यतीत्य व्रह्मणः स्थानं प्रति प्रस्थानं कृतवान् । कारणं तु प्राचीना वयं नार्व्वाचीना इव भङ्गिभिः सप्रसङ्गीकरवाम ॥

किन्तु प्राञ्जल(१)मेवेदं वेदमिव कर्णसज्जनं नीयतां तस्याः खल्वस्या विलक्षणं लक्षणमालक्ष्य सलक्षणं नरमनालक्ष्य वरतायोग्यमेव प्रष्टुं स्रष्टुः समीपमेतया तं विलोकयितुमभ्युपेतया सममगममिति ॥

स्रष्टा तु तदा नाद्य द्रष्टासीत् । पश्चात्तु तत्कौतुकाविष्टचरं स्मितमाचरन्मामादिष्टवान् ॥

अत्र खल्वल्पतया यः कल्पते कालः स तु तत्र कल्पकल्पस्तस्माद्भवद्दृष्टः सर्व्वश्च कालस्पृष्टतामवाप ॥

(१) सरलं ।

न च कश्चित्तदामुष्याः परमायुष्यायाः विचित्र-लक्षणपवित्रतनोः सुतनोः पतिभाग्यां गतिमवाप ॥

सम्प्रति तु प्रतीमः । श्रीकृष्णाग्रजन्मा रामवर्म्मा खल्वस्याः शर्म्मार्थं भवेदिति ॥

ततो मया पृष्टं सम्प्रति साम्प्रतिकजनानुरूपमेव तत्र तद्रूपं भवेत् । सेयं च द्राघिष्ठा कथं तस्य द्वितीयतायां विशिष्टा भवतु ॥

स तु प्राह स्म ।—

त्रिवक्रा-वक्रताहारिज्येष्ठः स च तथाविधः ।
एतां श्रेष्ठतमां कर्त्ता भर्त्तास्याः सर्व्वदा हि यः ॥इति॥

ये तु विरिञ्चि-मुखाद्भवतो विशेषाः श्रुतास्ते खलु शेषादपि दूरा इति न तान् वर्णयितुं शूराः स्म । तस्मादितः परं यथायथं प्रथयन्तु तत्र भवन्त इति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च भवद्वंशचन्द्रमा मन्दहासतया तूष्णीका-मासद्य सद्यश्चिन्तितवान् ॥

यदु-वंश-मस्तकाभरणानां श्रीमदग्रजचरणानां क्षत्रिय-कन्या परमुद्वाहाय भवति ॥

न च मद्वद्विचारा(१)न्तरमन्तरायतया वर्त्तते । समुपनतपरित्यागदोषतस्तं स्वाग्रजमप्यङ्गीकार-पोषमानेतास्मः । तस्माद्दूरीकृत्य पुरीं परिनिवृत्य मन्त्रं वलयिष्याम इति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च तथा विधाय तत्रैव दैवतवत्तस्यातिथ्यं सम्विधाय श्रीमदानकदुन्दुभ्यादिभिः समं मन्त्र-यित्वा श्रीराममपि तेन परतन्त्रयित्वा तदनुज्ञापनया हलप्रस्थापनया निशि शयनाश्लिष्टां तां योग्यता-विशिष्टाङ्गताप्रापणाया नन्दयित्वा श्रीहरिस्तयो-र्विवाहमेव निर्वाहयामासेति ॥

किं बहुना ?

अथ सर्व्वेषु साश्चर्य्यतया खर्व्वेहतां चिरं गतेषु पुनर्दूतावूचतुः ।—

पूर्व्वं व्रजेन्द्रनन्दनानुसारिणा सीरिणापि विवाह-विमुखता गतासीत् । किन्तु तादृगुपेक्षादोषभिया लोकापेक्षाधिया च सा स्वीकृता ॥

---

(१) व्रजगमनरूप ।

व्रजराज उवाच ।—

दिष्ट्या तस्य तज्जातं । न जाने कनिष्ठस्य का निष्ठा भवेत् ॥

सर्व्वेऽप्यूचुः ।—

सर्व्वगुणावरिष्ठस्य कनिष्ठस्य तथा कुतश्च न सङ्कोच एव तत्र प्ररोचकतां रचयिता ॥

व्रजराजः सोच्छ्वासं पप्रच्छ ।—

प्रस्थापनसमये किमपि वत्सेन सन्दिष्टं ॥

तावूचतुः ।—

अथ किं ? तथा हि पत्रिकेयं ।—

मां वन्धुं वन्धु-वृन्दैर्वनमिह रचितं
वृन्दकारण्यनाम्ना
कालिन्दीसंज्ञयापि व्यरचि सरिदिह
स्थापिता धेनवश्च ।
तेनाथ प्रत्युतास्मद्धृदयमनुदयं तत्र तत्र स्वसिद्ध
वस्तुन्युच्चैर्भवद्भिर्मधुरमधुरिते सन्ततं हन्त ! याति ॥
या हंसी या सुनन्दा सुरभिजयिगुणा
याश्च गङ्गाप्रधाना
याश्चान्यास्तत्र मान्या मम हृदयगता
धेनवः प्राणतुल्याः ।

ताः शश्वत्पालनीया मम पितृचरणै-

र्मय्यतिस्नेहवद्भिः

सोऽयं यावत् कृतघ्नः स्वयमथ वसतिं

याति हन्त ! व्रजस्य ॥

अथ तदेतदाश्रुत्य क्षणकतिपयमश्रूणि वहन्तः श्रीमद्व्रजसन्तस्तूष्णीमासन् ॥

ऊचिरे च ।—

स्वेषां तद्विरहे दुःखं यन्न तद्गणयामहे ।

अस्मद्दुःखे दुःखितया तस्य पीड्यामहे वयं ॥ इति ॥

श्रीव्रजराजेन तु प्रतिपत्रिकेयं दातुमीहिता ॥

यत्सम्बन्धवशाद्भवान् यदुकुलं

कृच्छ्रेण रक्षंश्चिरात्

काल-क्षेपमितस्ततः प्रथयति

स्वं वाञ्छितं प्रत्यजन् ।

सोऽयं तु त्वदभीष्टधेनुवलयं नेत्रानभीष्टं मृशन्

श्रीमंस्तत्र न सज्जति स्वयमितः स त्वत्पिता लज्जते ॥

अथ मधुकण्ठः कथान्तरं विस्तीर्णमायास्यतीति तेन सङ्कीर्णताभिया तूर्णमेव समापनमाह स्म ॥

सा हंसी सा सुनन्दा कलय कुलपते !

ताश्च गङ्गाप्रधानाः

स्वेनानेनाप्यमाना दधति सुख-शतं
साम्प्रतं नेत्रभाजां।
आस्तां तत्पश्य गोपेश्वर! तव तनयः
सोऽयमङ्कं त्वदीयं
पुष्णान् कृष्णः समन्ताद्व्रज-सदनजनं
सुष्ठु पुष्टं करोति॥

इति तानानन्द्य तन्नन्द्यमानः स मधुकण्ठस्तस्यां तस्यां श्रीराधा-माधव-पुरतः कथयामास॥

तदानीमनेन रमणेन भवतीः प्रति च पत्रिका वितीर्णासीत्॥

यथा।—

वासन्तिकाः सन्ति मयाभिषिञ्चता
पुञ्जीकृताः कुञ्ज-कृते सहस्रशः।
प्रियाभिरस्ताङ्कितया सधर्म्मभि-
र्मनोरथः सम्प्रति पूर्य्यतां मम॥इति॥

भवतीभिश्च प्रतिपत्रिका दत्ता॥

यथा।—

कुञ्जीकर्त्तुं यास्त्वया पुञ्जिताङ्ग
माधव्यस्ताः सेक्तुकामा वयं स्मः।

हा ! धिक् किन्तु प्राप्य शीताम्बुसिक्ता-
रप्युष्णैर्नः शुष्कतां यान्ति वाष्पैः ॥

अथ मधुकराठः समापनमाह स्म ।—

कुञ्ज-पालनवचांसि सन्दिशन्
व्यान[१]गागमनमात्मनो हरिः ।
व्यज्य चास्य रचयन्नुदाहृतिं
राधिके ! विहरति त्वया सह ॥इति॥

तदेवं तयोः सुखमाधाय तथानुज्ञामादाय कथकयोः सर्व्वकेण सह निष्क्रान्तयोः सनोरनयोस्तु कान्तयोर्लब्धलीलानिशान्तयोः सुखं मुखतः कति वर्णनीयं ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
श्रीवलभद्रविवाहभद्रप्रपञ्चः
पञ्चदशं पूरणम् ॥

---

(१) व्यानक् व्यक्तवान् ।

षोडशं पूरणम् ।

तदेवं रात्रिकथायां कृतप्रथायां श्रीकृष्णामुख-सितांशुस्मितासिते श्रीव्रजराजभासिते सदसि कथान्तरं स्निग्धकण्ठः कथयामास ॥

तदेवं दूतेषु गतागततया सम्भूतेषु कौचिद्दूतावागतौ । आगत्य च पूर्व्ववत्कुशलमात्रेदयन्तौ निवेदयामासतुः ॥

तस्यां नाम्ना वनमालिन्यां धाम्ना च सर्व्वशुभशालिन्यां[१] पुर्य्यां किमप्यपूर्व्वं वृत्तं सम्प्रति वृत्तमस्ति ॥

व्रजराज उवाच ।—सौम्यौ ! सम्यक् कथ्यतां ?

तावूचतुः ।—

तत्र सर्व्वसुखमये दिनकतिपये गते क्वचिदेकान्ते कान्ते रत्ननिशान्ते[२] काञ्च न काञ्चनपर्य्यङ्कीमनु

---

(१) द्वारकावनमालिनी । द्वारवत्यब्धिनगरीति त्रिकाण्डशेषः ।
(२) गृहे ।

कदाचिदुदासीनवदासीनं भवदुद्भवं दुर्जनविप्र-लब्ध इव कश्चिद्विप्रः ससम्भ्रमं लब्धवान् ॥

लब्धवन्तं च तं विप्रताविस्रब्धहृदयः सम्यग्धृत-नयः स तु भवत्तनयः प्रणामेन संयुज्य पाद्या-दिभिः सम्पूज्य मधुरं सम्भोज्य शय्यायां संयोज्य चरणौ परिचरणाय धारयन् वार्त्तान्तरमन्तरावतार-यन्नागमन-कारणं पप्रच्छ ॥

स तु सलज्जतां सज्जन् क्षणं तूष्णीकां पुष्णाति स्म ॥

पश्चात्तु जगाद ।—

विदर्भदेशनरेशः कुण्डिनकृतनिवेशः खलु भीष्मकनामा विस्तृतकीर्त्तिधामा भवताज्ञायत एव। अमुष्यचामुष्य कुलिका(१)कलितस्य तद्वनुज-प्रकृतीनां रुक्मिप्रभृतीनामनुजा रुक्मिणीनाम-तनुजा चावगम्यते। सा च ज्ञाततत्तातहृद्भिः सुहृद्भिर्भवते दातुं विभाविता। रुक्मिणा तु तान् विप्रलब्धान् विधाय शिशुपालाय दातुमारब्धास्ति। धन्या सा तु कन्या तव! श्रुतिं(२) श्रुति(३)मिव

---

(१) प्रसिद्धकुलता। (२) श्रवणं। (३) वेदं।

प्रमाणीकृत्य सानुभववर्त्मनि त्वामेव वरीयस्तया(१) वशीकृत्य(२) च वरीतुमिच्छति। वरीतुमिच्छतीति किं वाच्यमपि तु मनसावारीदेव। तदनु चान्येन पाणिपीडनं पीडनमव्यवहितं पर्य्यालोच्य लज्जामप्यमज्जन्ती मां तव स्थानं प्रस्थापितवती॥

उक्तवती च।—

लज्जा कार्य्या नात्र यत्रास्ति धर्म्मः
का सा(३) या स्यादेनसे(४) मृत्यवे वा।
उद्यद्रागास्तं(५) पुनर्लोकधर्म्म-
त्यागा(६) छन्याः सर्व्वकान्तं भजन्ते॥इति॥

अथ कृष्णः स्वगतं विचारयति स्म।—

सत्यं सत्यं; सा खलु गत्यन्तरमनासक्ता मय्येवानुरक्तास्तीति कृतसर्व्वसुखाद्देवर्षि-मुखादप्यवकलितं॥

किन्त्वास्तां तावदनुरागवार्त्ता सदाम्नाय(७)वती सा न कदाचिन्मदेकशातिमत्यमयमाम्नायं(८) त्यजेत्। परं तु कायमेव विसृजेत्॥

---

(१) श्रेष्ठतया। (२) अश्ववर्णीकृत्य।
(३) लज्जा। (४) पापाय।
(५) श्रीकृष्णं। (६) गोप्यभिप्रायेण।
(७) सत्कुल। (८) वेदं।

तदेतच्च मदिङ्गितमपेक्ष्य गुरुषु न ज्ञापयतीति लक्ष्यते। मदिङ्गितं वेद चेदसावात्मनि मदङ्गीकृतिमनीषितं सङ्गीकृतमेव मन्येत तदन्यथा तु स्वमङ्गमपि नाङ्गीकृतमिति ॥

मम तु स एष निसर्गः सदा निरर्गलः स्फुरति ।—

यदनुरागमात्रपात्रता यत्र न तत्र त्यागमागमयितुं शक्नोमीति ॥

तथापि गोकुलप्रेमलक्ष्मी[1]विलक्षणीकृतहृदयतया न तु तस्यानुद्यमं कुर्वन्नास्मि । सम्प्रति तु तस्यास्तावती तापवती प्रयत्नवरिवस्या । तत्किं कर्त्तव्यं निश्चिनोमीति नश्चित्तं न विपश्चिद्भवति[2] । तस्मान्नव्यं तु प्रष्टव्यमिति ॥

अथ पप्रच्छ ।—

किमपि विशिष्टं तया स्वाभीष्टं निर्दिष्टं ॥

विप्र उवाच ।—

न हि न हि, किन्तु पत्रमेवेदं सापत्रपं मा ग्राहितमस्ति ॥

श्रीकृष्ण उवाच ।—वाच्यतां ?

---

(१) पक्षे गोपीरूपा ।　　(२) विचारसमर्थं न भवति ।

ब्राह्मणः सगद्गदं उवाच ।—

ते ते गुणा भुवनसुन्दर ! कर्णरन्ध्र-
द्वारा मदीय-हृदयं विविशुर्निकामं ।
तेऽप्यासतामहह ! यच्च दृगेकगम्यं
तद्रूपमप्यथ तया[१] विशति स्म तत्र[२] ॥

आविश्य तत्र[३] भवदेकगतित्वमात्म-
सम्बन्धि[४] मन्मनसि तानि[५] निदिह्य[६] तस्थुः ।
येनेद[७] मप्यहह ! ह्रीपरिवर्ज्जनेन
त्वामेव शश्वदनुगच्छति कञ्जनेत्र ! ॥

ये ये गुणा निखिलतापहरास्तथा य-
द्रूपं समस्तफलरूपममी च तच्च ।
मह्यं्छितं न ददतां[८] न तु तेन[९] गाता-
मन्यादृशप्रार्थितमीश ! तदेतदीहे ॥

कन्या भवेत्कुलवती गुणशालिनी या
सा चेत् सुधीरवसरे न भजेत का त्वां ? ।

---

(१) द्वारो विशेषणं । (२) हृदये ।
(३) मन्मनसि । (४) मदेकगतित्वाविशेषणं ।
(५) गुणरूपाणि । (६) उपाचित्य ।
(७) मन्मनः ।
(८) ददातेर्ददतेश्च बहुत्वैकत्वयोः । गाङोऽपि बहुत्वैकत्वयोः ।
(९) प्रदानेन ।

यस्त्वं गुणादिभिरनन्यसमः समस्त-
त्रैलोक्य-लोक-हृदयान्तरहृद्विभासि ॥
तस्मान्मया ह्रियमपोह्य निगद्यते द्रा-
गद्यैव दैवत! मया स भवान् वृतोऽस्ति ।
त्वय्यर्पितं वपुरिदं स्पृशतान्न चैद्यः
सिंही-वपुः किमु नृसिंह ! शृगाल-योग्यं ॥
पूर्त्तादिभिः स भगवान् यदि शैशवादा-
वाराधितस्तव मया चरणार्च्चनाय ।
तत्तर्हि स्यैत्स्यति न वा यदि तत्र पातः
पातस्तनोर्भवतु तां स्पृशतान्न चान्यः ॥
श्वो भाविनि त्वमजितोद्वहने विदर्भान्
गुप्तः समेत्य पृतना-पतिभिः परीतः ।
देव्यर्च्चनानय[1]कृते कृतनिष्क्रमां मां
निर्मथ्य चेदिपमुखान् सहसा हरस्व ॥
यस्याङ्घ्रिपङ्कजरजांस्यपि सर्व्वदुःखं
सर्व्वं हरन्ति स च चेन्न भवेत्प्रसन्नः ।
तर्हि व्रातायुतयुजां जनुषां सहस्रै-
र्जह्यां पुनः पुनरसून् वर[2]मेतदस्तु ॥इति॥

---

(१) नीति ।　　(२) वरमीषत्प्रियेऽव्ययं ।

अत्र व्रजस्थाः केचित्प्रोचुः ।—

अहो ! बालिकाया अपि शुभाभिनिवेशपरिपालिका बुद्धिः कलिता[१] । यदेतावदन्तं स्वान्तमिति ॥

काश्चित्प्रोचुः ।—

कथं सा बालिका ? किन्तु चालिका । यत्तावति भये तं प्रायुङ्क्तेति ॥

अन्ये प्रोचुः ।—

क्षत्रियजातितया तस्या मनसि भयं नायाति । किन्तु तस्या धर्म्मनिष्ठा खलु सर्व्वं प्रतिष्ठापयिष्यतीति । पुनः पुरतः कथ्यतां ॥

दूतावूचतुः ।—

तदेवमवधार्य्य हरिणा पुनरिदं मनसि विचार्य्यते स्म ॥

सम्प्रति किं कार्य्यं ? यतस्तत्प्राणात्यजनमवश्यनिवार्य्यं । गोकुल-गति-प्रतिबन्धावहं तद्विवहनं तु कथं जातनिर्व्वहनं विधेयमिति ॥

---

(१) दृष्टा ।

अथ पुनरपि विचार्य्यते स्म ।—

आपाततः सा समाहार्य्या पश्चात्तु विचार्य्याचरिष्यामीति ॥

तदेवं विविच्य प्रोच्यते स्म ।—

भो ! भट्टार[1]चरणाः ! समवधीयतां । यदवधि तां देवर्षि-मुखात्तथा-मदुन्मुखामश्रौषं तदवधि निरवधि मयापि मनस्तच्चिन्तायां श्रौषट्कृतं[2]॥

यतः ।—

भजनीयानां भक्ता, गुणमनुयान्तीति
सर्व्वतः ख्यातिः ।
भक्तगुणाननुयातु, मम तु हरेः स्फाटिका-
द्रिवद्वृत्तिः ॥

तस्मात्तस्याः समुद्धारः सर्व्वथा कार्य्यः पश्चात्तु कार्य्यगत्या यथावद्विचार्य्यमिति ॥

तदेवं विविच्य निजमुत्कण्ठितमतिरिच्य द्विजेन सह रथमारुह्य तद्विवाहावसरं समुह्य स स्वयमेकरात्रमात्रेण विदर्भगर्भगं कुण्डिनपुटभेदनं प्राप ॥

गमनसमये तु केषाञ्चिदत्र सम्मतिः स्यात्-

---

(१) भट्टारो भगवान् पूज्य इति त्रिकाण्डशेषः ।

(२) हुतं ।

केषाञ्चिन्न चेति भिया ह्रिया च सङ्कर्षणमपि न सङ्कलयति स्म । किन्तु तदवस्थेहः[(१)]प्रदोष एव प्रतस्थे ॥

अथ कुण्डिनमासाद्य पुण्डरीकाक्षः पुत्रमतमाश्रित्य विदर्भक्षित्यधिपेनारब्धमुद्धतमुद्धर्ष[(२)]ददर्श॥

क्रमात्कलितजामातृतागतिं चेदिपागतिं चावगतवान् ॥

तदनन्तरं तस्मिन्[(३)] वरसमागमावसरसमुचिततयाचितभरं भीष्मकादरं तदवधारणाकृते मागधादिसमाहारं चावलोकितवान् ॥

अथ व्रजराजः ससम्भ्रमं पप्रच्छ ।—

तर्हि वत्सः कथं तत्समीपत एकाकितया तस्थौ॥

दूतावूचतुः ।—

अरिकोटीरवगणय,व्रजनृप !

तेजः सुतस्य जानीथ ।

यद्यपि वारण[(४)] चक्रे, हरिरेकाकी विभेति किं तदपि ॥

---

(१) यथास्थितः ।

(२) उत्सवं क्षण उद्धर्षो मह उद्धव उत्सव इत्यमरः ।

(३) चैद्यागमने । (४) हस्ति ।

व्रजराज उवाच ।—

पश्चादपि कश्चित्तमनु न गतः ?

दूतावूचतुः ।—

अन्यो नानुगच्छतु नाम । श्रीमान्रामः कथं नानुगच्छेत् ? । स खलु व्रजक्षीरनीरधिजन्मा स्निग्धतां कथं त्यजतु । य(१)त्सम्बन्धात्पत्तन(२ जाताश्च केचन स्निग्धतां याताः ॥

तथा हि ।—

एकः कन्याहरणविधिकृते कुण्डिनं प्राप्तवन्तं
श्रुत्वा रामः स्वमनुजमथ तं तत्र शत्रूद्यमं च ।
स्नेहाम्भोधिव्रजजनु(३)रुचितस्निग्धभावेन दिग्धः
शङ्कातङ्की कटकघटनया सज्जितस्तज्जगाम ॥

अथ सर्व्वेऽपि यादवग्रामरामयोस्तारतम्यं मनसिकृत्य प्रोचुः ।—

जन्मना सह यः प्रेमा स्यादेष निरुपाधिकः ।
आगन्तुकस्तु सोपाधिः कथं तत्तुलनां व्रजेत् ॥

व्रजराज उवाच ।—ततस्ततः ?

---

(१) राम ।　　(२) पुर । मथुरा ।
(३) व्रजे जनुर्जन्म यस्य ।

दूतावूचतुः ।—

गते च तत्राग्रजे लज्जिते चावरजे श्रीमानग्रजस्तु रोषमनु ताम्रतनुरोषधीश[(१)]वदुदितस्तेन[(२)] स्तेन-[(३)]म्मन्येन समं किञ्चिदपि नोक्तवान् । सर्व्वैः सह तं परिवार्य्य तु स्थितवान् ॥

ब्रजराज सहर्षमुवाच ।—

स तु ब्राह्मणः कुत्र गतवान् । तस्या वा स्वधर्म्मनाशत्रासं मर्म्मणि स्पृशन्त्यास्तमेव गतिं परामृशन्त्या मतिः कां गतिं गतवती ॥

दूतावूचतुः ।—

सन्ध्यात एव सा सन्ध्यातविप्रागमना विप्रः स च वन्ध्यानुनीतिरजनीति विभाव्य निजभाग्यशुभं सम्भाव्य सर्व्वां रजनीं जजागार । आत्मचापलमेव च फलनिकार[(४)]कारणतया विचारादनुससार । पुनश्च "श्वोभाविनि त्वमजितेत्या"दिना तं प्रति प्रथितः स च खल्ववसरः सम्प्रति च नाससार कालयापश्च मया दुराय इति परामम‍र्श ॥

---

(१) चन्द्र । (२) कृष्णेन । (३) चोर । (४) बञ्चन ।

तथापि पन्थानं पश्यन्ती तत्राक्षमतया मनः संयमयन्ती मूर्द्धानं नमयन्ती परस्परं कृतसक्थी दन्तपङ्क्ती[१] निष्पील्य धैर्य्यं कलयन्ती सलिलधाराविलविलोचने निमील्य क्षणकतिपयं गमयामास। तथागमयमानायामपि तदसहमानायामनुकुलेन शुभमूलेन विधिना वामनयनभुजोर्वङ्घ्रि स्पन्दयामासे। स्पन्दिते च तस्मिन्नसावुन्मीलितमना नेत्रयुगलमुन्मीलयामास। उन्मीलिते च नेत्रयुगले तमेव विप्रं क्षिप्रं पुरोभुवि प्रत्यक्षीचकार। प्रत्यक्षीकृते च तस्मिन् सन्दिग्धमनास्तन्मुखं सुखस्निग्धमीक्षमाणा हृच्चक्षुःकञ्जान्तःक[२]मासद्य सद्य एव जलवदासीत् ॥

किञ्च ।——

क्ष्मादेवान्मुररिपुसङ्गवासिताङ्गा-
दामोदं सपदि विदर्भजा भजन्ती ।
सानन्तं सरभस[३]मन्तरापहर्षं
यल्लोम्नां कुलमपि चातुलं जहर्ष ॥

---

(१) द्विवचनं ।　　(२) सुखं जलञ्च ।
(३) यथास्यात् ।

तथापि प्रच्छन्नतया तं पप्रच्छ ।—

पृष्टश्चासौ हरेरङ्गीकारं तत्सङ्गितया पथागम्य रम्यं रथावतारं चात्मनः स्पष्टमाचष्ट ॥

आख्याते च सर्व्वस्तु तमपि वस्तुप्रस्तुत-तद्दानोपयोगि न स्यादिति तमेव गुरूकर्त्तुं पुरु नमन्ती स्वमूर्द्धानमिव समर्पितवती ॥

ततश्च ।—

सप्तमराशिगराहोरिव शिशुपालस्य दूरगस्यापि ।
दधती स्फुरणां(१) भैष्मी, विधुतनुरिव तेन(२) मुक्तासीत् ॥

व्रजराज उवाच ।—

रामकृष्णौ तत्र निजागमने कं व्याजमाजहृतुः । तयोरपि राजा कथं व्यवजहार ? ॥

दूतावूचतुः ।—

तद्विवहनबहलकुतूहलमेव ताभ्यां छलतया विलम्बितं । ततस्तयोरपि तत्रानुमोदाकर्णनाद्यामोदादतिथिं प्रति कथितां पूजाप्रथितिं स च प्रथितवान् ॥

---

(१) स्फूर्त्तिं । (२) शिशुपालेन ।

व्रजराज उवाच ।—

अतिथिमात्रबुद्धिता चेदुदासीनता परमस्यावसीयते तर्हि मन्ये तत्पुरवासिनः सर्व्व एव सरामे तस्मिन्नुदासीना एवासन् ॥

दूतावूचतुः ।—

नहि नहि; स एव केवलस्तत्र दुष्पुत्रकुमन्त्रणामूलयन्त्रणाया नानुकूल आसीत् । लोकस्तु तत्र शोकमेव समवाप ।

यतस्तु यतस्ततः सर्व्व एव समुदित्य(१) नित्यसमुदित्य(२)-निशसुखसञ्जनं तन्मुखनीलकञ्जमनु माधुरीधारा दृगञ्जलिभिः पिबन्निदं जगाद ।—

एतस्य भार्य्या भवितुं रुक्मिण्यर्हति सर्व्वदा ।
असौ चास्याः पतिस्तत्राप्येवकारः पदे पदे ॥

किञ्च ।—

यद्भूतं यच्च भव्यं भवदपि यदलं
पुण्यमस्माकमस्मा-
न्नैवोऽस्मः सौख्यमात्मन्यपि तु परमिदं
प्रार्थनाशर्म्म कुर्म्मः ।

(१) मिलित्वा । (२) सम्यगुदये ।

हे धातः ! प्राणभाजां सकलफलपते !

सोऽयमम्भोजनेत्रः

श्रीरुक्मिण्याः कराब्जं कलयतु बलवा-

न्न्यायतोऽन्यायतो वा ॥

व्रजराजः सव्रजः सानन्दमुवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च प्रातर्विधेयं विधाय नन्दितमना द्वारका-गमनानुज्ञापनार्थमिव वन्दितगुरुजना त(१)दुप-देशात्तु सा कन्या हिमवत्कन्यार्च्चनाय कृताभि-निवेशा धृतवेशा सहचरीभिर्भ्रातृगृहचरीभिः पितृ-भार्य्याभिः स्वकुलाचार्य्याभिः किङ्करी-निकरैः कञ्चुकिप्रकरैर्धृतखड्गचर्म्मादिसम्पत्तिसन्दोहैः प्रश-स्तशस्त्राहततया कृतहयारोहैः सर्व्वगदृष्टिप्रशस्ति-हस्तिगतमहामात्रैः शताङ्गकृतयात्रैर्विचित्रसम्भृत-वादित्रैर्वर्त्तितनर्त्तनचारित्रैः पूतवर्णनविभागसूत-मागध-वन्दिभिः शश्वदुत्प्रेक्षासन्दितकुतुकेक्षा-नन्दिभिः परपराक्रमाद्बहिर्व्वाहैः परिवारिता हृदि तु स्वकान्तधारणायां केनाप्यवारिता सावरोधा-

(१) गुरुजन ।

दवरोधा[1]न्निष्क्रम्य निगमं[2] निगम[3]मपि सङ्क्रम्य धर्म्म्यं तद्देवी-हर्म्म्यं जगाम ॥

श्रीकृष्णः पुनरभ्यवस्कन्दन[4]तृष्णास्तत्र मन्दं मन्दं वहिर्वहिर्विहरति स्म ॥

अथ सापि तां यथाचार्च्चितमार्च्चित्वा तत्प्रसादं वपुषि मनसि च चित्वा तस्या गृहं हित्वा रत्न-मुद्राशोभाकरेण करेण सखी-करं गृहीत्वा वहि-र्निर्जगाम । निर्गच्छन्तीं च तामथ कुन्दकोरक-दन्तीं देवमाया द्विधाकायां निचाययामास । कृष्ण-वहिर्मुखान् प्रतिमायामयी तदन्तर्मुखान् प्रति तु तज्जायामयीति ॥

यत्र पूर्व्वे तच्छत्तया मूढा वभूवुरुत्तरे तु तद्भक्तया मूढायां वभूवुरिति स्थिते श्रीकृष्णे च सर्व्वस्मा-दुन्नतं रथमधिष्ठिते तयोर्वरकन्ययोरवरजनतादृष्टि-शून्ययोरन्योन्यमीक्षणमपि विलक्षणं जातं ॥

जाते पुनरीक्षणे ।—

रथारोहे कार्य्यं मिषचितविलम्वां स्वमनु च
स्फुरन्नेत्रप्रान्तां नृपदुहितरं सद्रवरथः[5] ।

---

(१) अवरोधेन सह वर्त्तमानात् अन्तःपुरात् ।

(२) वेदं ।　　(३) पुरं ।

(४) छलाकर्षण ।　　(५) द्रवसहितं रथं यस्य ।

तथाकार्षीत् कृष्णोऽप्यमनुत यथा दूरजनता
ध्वजद्रष्ट्री कृष्ट्वा नयति गरुडस्तां द्रुतमिति ॥

तां ग्रहीतुमागच्छति गृहीत्वा गच्छति च तस्मिन् ।—

ते मुग्धबुद्धिकचरा[१]मगधाधिपाद्याः
सङ्ख्यातिगा हरिरथ-ध्वनिचेतिताश्च ।
तन्नोहितुं समशकन् ननु सोऽयमस्मिन्
कर्ह्यागतः क्व नु कदा गतवानितीत्थं ॥

जातविधाने पुनरनुसन्धाने ।—

क्रूरक्रेङ्कारदुन्दुन्दुमिति परिणादद्दुन्दुभिध्वानवृंह-
द्धेषायुग्वृंहितातिप्रकटरथघडत्कारकोटिप्रकारः ।
सेनासारः स मृग्यन्नृपदुहितृहृतेर्वर्त्मतच्छृ[२]च्छताङ्ग-
च्छिन्नद्विट्कूटलब्धच्छदन[३]मनुसरंश्चाभिदोद्रूयते
स्म ॥

यद्यपि तेऽप्यभियुयुजुः
प्राधनिकान् श्रीहरेस्तथापि तु न ।
वर्ण्या यत उन्नादा-
दभिसिंहं फेरवोऽपि गच्छन्ति ॥

---

(१) भूतपूर्व्वे । (२) तच्छृतः कृष्णस्य ।
(३) आच्छादनं ।

यद्यपि नवसम्वलना, कुलजनिता ह्रीतचित्ता सा[1] ।
तदपि प्रतिवलभीता, प्रियमुखमालिङ्ग-
दिङ्गि[2] नेत्रेण ॥

यद्यपि मम महिमज्ञा
तदपि च भीतावला-स्वभावेन ।
इति हरिरुपचितकरुणां
वचसा सह साप्यसान्त्वयद्दयितां ॥

अभ्ययुररयो वृष्णीन्
मुमुचुर्व्वाणांश्च तेषु तत्सत्यं ।
किन्तु प्रवलसमीरे-
ष्वम्भोमुग्व्राततुल्यतां याताः ॥

यदवो ददृशुः स्पष्टं, तेषां पृष्ट्यानुपासङ्गान्[3] ।
चित्रं ते पुनरेषां, स्थितिमपि नाज्ञासिषुः स्वाङ्गे ॥

कौक्षेयकसमुदाय, स्तेषामासीत्परार्द्धमूल्यार्हः ।
किन्तु यथा कृपणाना, मर्थः कोषादनिष्क्रान्तः ॥

अपि वहु पतितं युद्धे, नाशोचंस्ते चतुर्व्विधं कटकं ।
निजवपुरुर्व्वरितं य, त्तस्मादेवातुलं दधुः शर्म्म ॥

---

(१) रुक्मिणी ।　　(२) चलत् ।
(३) तूणान् । तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ।

द्विषतामतिभयभाजां, यदुराजानुद्रवाहूत्वतां ।
देहस्तोमविघट्टः, स्फुटमासीद्वियोगतेः कृते घट्टः ॥
केचिद्दृष्टकवन्धा, दूरं विद्रुत्य सम्भ्रान्ताः ।
मस्तकमस्तं किमिति, न्यस्तं हस्तं व्यधुस्तत्र ॥
हारितदारमिवामु, श्चैर्यं संसान्त्व्य ते चेलुः ।
उत्साहं विसृजन्तः, सम्प्रति कर्म्मन्दिनां[१] वादैः ॥

वारान् सप्तदशाहं
जिग्ये हरिणाथ तं सकृज्जितवान् ।
पश्यत तदपि समं[२]मा-
मिति मागधवाग्र कं प्रहासयति ॥

सप्तदशाहं समरान्
जिग्येऽष्टादशममुं पराजिग्ये ।
इति मागधवाग्भ्रान्ता
सम्प्रति तस्मिन् पराजये स्वस्य ॥

तदेवं स्थितेऽपि तेषां दुरवस्थिते रुक्मवांस्तु तैः सहापद्रुतवानपि स्फूर्ज्जदूर्ज्जस्वलवज्रनिपातप्रज्वलिततालसङ्कवद्दृश्यमानानाममङ्गलानां तेषामेव पुरतः प्रतिश्रुतवान् ॥

---

(१) भिक्षुः परिव्राट् कर्म्मन्दी । (२) सुखे दुःखे च ।

रुक्मिणीहर्त्तारं रुक्मिणीमविजित्य(१) न नित्य-गृहमेष्यामीति ॥

तेषां वचसि पुनरस्माक(२)मकस्मादेकं सुखं जातं। हलायुधपित्रा स्वपुत्रतया ख्यापितमपि तं तव पुत्रं ते गोपतया वदन्तस्तन्न प्रतियन्ति। कृष्णस्य च तेन सन्तोषपोष एवादृश्यत इति ॥

व्रजराज उवाच।—ततस्ततः?

दूतावूचतुः।—

रुक्मिणस्तावदसमीक्ष्यकारितास्तां। तेषामपि क्लीवतातीव दृश्यतां।

तथापि यदनुगतपलायनता परमासीन्नतु वलाय-नता(३)। यतो हरिणहृदया(४) एव ते वभूवुर्न तु हरिहृदया इति ॥

व्रजराज उवाच।—ततस्ततः?

दूतावूचतुः।—

रुक्मी तु निर्विद्य निर्विद्यजनानिव तान् हित्वा निजमक्षौहिणीमात्रं गृहीत्वा कृतयात्रस्तस्याप्य-ननुवर्त्तमानतां वीक्ष्य सहायीकृतकेवलनिजगात्रः

---

(१) द्विकर्म्मकोऽयं जिधातुः। (२) दूतवाक्यमिदम्।

(१) वलाश्रयता।

(२) भीताः। हरिणहृदयो भेक्रो भीरुश्चेति त्रिकाण्डशेषः।

पुनर्गात्रमप्यनुवर्त्तितुमशक्तं समीक्ष्य प्रलापमात्रं तदनुषक्तं प्रतीक्ष्य तिष्ठ तिष्ठेति निजपृष्ठमांसाद-(१) तया दूरादह्वास्त ॥

कृष्णास्तु पूर्व्वं स्वरथनिर्घोषगिलितं तद्रथनिर्घोष-मशृण्वन्नेव प्रच्छन्नामीत् ॥

श्रुत्वा तु घृतस्तम्भारम्भमात्रे तस्मिन्गुणापात्रे रुक्मीमुखाद्दोषारोपान् कार्म्मुकात्तु रोपान्(२) ससर्ज । कृष्णास्तु स्मितेन तावद्दोषारोपानपसार्य्य योग-मायामयकवचमयत्वचा तु रोपानपसारयामास ॥

अथ रुक्मिणीपतेः शराः पुङ्खमनु रुक्मिणः(३) सन्तस्तस्य रुक्मिणः स्पर्द्धया किल तेजसा वर्द्ध-माना युगपदेव कोदण्डं ध्वजदण्डमपि खण्डित-वन्तः । तद्वदेव सहसा सहसारथिमस्यावयवचयं हयचतुष्टयमपि स्पष्टं युगपदेव दष्टं सृष्टवन्तः । रुक्म्येव तु तत्तत्क्रमवलनया दृष्टवान् ॥

यच्च कष्टादन्यद्धनुःपरामृष्टवान् बाणानपि विसृष्ट-वांस्तत्र तत्र च कथा तथासीदिति सीदन् पुनश्च तद्वदेव विषीदन्नात्मना समराय सङ्घट्टितानां परिघ-

(१) क्रूराभिध्यायी पुरुषः पृष्ठमांसाद उच्यते इति त्रिकाण्डशेषः ।

(२) बाणान् । (३) स्वर्णयुक्ताः

पट्टिशशूलवर्म्मचर्म्मासितोमराणामपि गतिं प्रति तथा दुर्गतिमासीदन् विदीर्णशताङ्गः शीर्णशताङ्गा-दवतीर्णवान् ॥

तदेवं ।—

जवादरथिनं कृत्वा तं तदा रथिनः[(१)]स्वयं ।
हित्वा रथिकतां शार्ङ्गी द्रुतं दुद्राव रुद्रवत् ॥

अथ ये रुक्मी भर्म्मनिर्म्मितचित्रविचित्रखड्ग-चर्म्मणी गृहीतवांस्ते अपि तदा गमनस्तम्भविप्र-लम्भनार्थं चक्रपाणिना तिलश एव कृत्ते चक्राते न पुनरखिलशः । कृत्तखड्गचर्म्मा चासौ हतशर्म्मा-निजखड्गसम्भिन्न एव च चिकीर्षामासे । न पुन-स्तस्माद्भिन्नः ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च योषिदाकृतिजां प्रकृतिमनुकृतवती सा रुक्मिणी लज्जामप्यसज्जन्ती दैन्यचर्य्यया साहाय्य-माचर्य्य निज-सौन्दर्य्यं रक्षितवती । किन्तु तस्य धृष्णजः प्राणघातनादपि वलवद्यातनाकरं कौतुका-न्तरं कृष्णेन लब्धान्तरमक्रियत ॥

---

(१) रथिनो रथी ।

सर्व्वे प्रोचुः ।—कथ्यतां तत्किं ?

दूतावूचतुः ।—

यत्खलु हतदर्प्पं सर्पमिव तमपसर्पणासमर्थं कर्पटी[१]भूततत्पटीभिरेव वटीभिरिव कपटिनं पटीयानसौ तथा वधार्थमिव बन्धनेन घटितवान् । यथा वली चासौ न तद्विरलीकर्त्तुं शशाक ॥

ततश्च रुक्मिणीप्रार्थनया लब्धकृपाभासः स खलु जितचन्द्रहासश्चन्द्रहासनिक्षेपत्तैगिम[२]शिक्षया तस्य मूर्द्धन्यद्राहिकाटव्यामधिमध्यमध्यं यूकानामध्वन इव नव्यान् सव्यापसव्यानुसृतविच्छेदान् कृतवान् ॥

तदेवं वर्ण्यमानमाकर्ण्य व्रजसभासत्सु हसत्सु पुनर्दूतावूचतुः ।—

श्रूयतां तस्मिन्नासिकायां छिन्नायां दुकूलकृतार्जनमार्जनमिव बलभद्रानुकूलता । यावद्रुक्मिणा सह जितरुक्मिणीकस्य युद्धमुद्बुद्धं तावद्बलभद्रादयस्ते जन्याश्चाजन्यं[३] जन्यं[४] च जनयन्तीस्तत्कटकघटा विद्रावयन्तः स्थितवन्तः ।

(१) छिन्नवस्त्र । (२) शैघ्र्य । (३) उत्पातं । (४) युद्ध ।

यदा चासौ वद्धस्तदा वलभद्रश्च तत्र सम्वद्धः । सम्वध्य च तत्र तं वध्यमिव वध्वं दृष्ट्वा करुणामिव स्पृष्ट्वा वन्धनं कृत्वा कृष्णं किल मुहुरुपालब्धवान् । तद्विक्लवधूतां वधूमपि शिक्षया सन्धुक्षितां विधातुमारब्धवान् ॥

"असाध्विदं त्वया कृष्ण ! कृतमस्मज्जुगुप्सितं ।
वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ॥
मैवास्मान् साध्व्यसूयेथा भ्रातुर्वैरूप्यचिन्तया ।
सुखदुःखप्रदो नान्यो यतः स्वकृतभुक् पुमान् ? ॥
वन्धुर्वधार्हदोषोऽपि न वन्धोर्वधमर्हति ।
त्याज्यः स्वनैव दोषेण हतः किं हन्यते पुनः ॥
क्षत्रियाणामयं धर्म्मः प्रजापतिविनिर्म्मितः ।
भ्रातापि भ्रातरं हन्याद्येन घोरतरस्ततः" ॥

इत्यादिना ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तत्र रुक्मिणी सरला वलानुशिक्षितमेवानुसरति स्म । रुक्मी तु वन्धनादपि तद्वचनानुसन्धानात् प्रत्युत दुःखानुवन्धावृतमना वभूव ॥

व्रजराज उवाच ।—पश्चादसौ क्व गतः ?

दूतावूचतुः ।—

पश्चात्तु रामेण निकामं मुक्तः सन्नसन्नसौ हतावशेषं स्वसैन्यमेव विषण्णतयासन्नवान् ॥

सर्व्वे प्रोचुः ।—

स खलु खलतारूप्यः[१] कथं सवैरूप्य एव तत्र गतः ॥

दूतावूचतुः ।—

रामस्तु द्विपाद्यं[२] दण्डमेव प्रतिपाद्यं कुर्व्वन्नपि तस्य कीर्त्तिं रक्षन्निव दिवाकीर्त्तिना[३] मुण्डमुखमखण्डं मुण्डयित्वा वस्त्रादिभिर्मण्डयित्वा तं तीर्थपथेनागतमिव रथेन प्रस्थापयामास । स तु स्वभावतः कृष्णशत्रुर्धृष्णक्तया दुराशया मध्यत एवालयं विधाय तमध्यासामासेति कथापि खलु पापानामलमश्रेयसे भवेदित्यलं तत्प्रसङ्गेन ॥

व्रजराजः पप्रच्छ ।—

कृष्णः समङ्गलमालयमाययौ ॥

---

(१) षष्ठ्या रूप्यच् । खलताया भूतपूर्व्वसम्बन्धी । पूर्व्वं खलतां कृतवानित्यर्थः ।

(२) द्विपाद्यो द्विगुणो दण्ड इत्यमरः ।

(३) नापितेन ।

दूतावूचतुः ।—

तदागमनान्तरमेव पूर्व्वपूर्व्ववत्तत्तदुद्धवद्वारा श्रवसि समवाप्य तं तमावाभ्यामनुज्ञाप्य च द्रुतमत्राप्यते स्म ॥

व्रजराजः पप्रच्छ ।—विवाहनिर्व्वाहः किं सम्पन्नः ?

दूतावूचतुः ।—

नहि नहि ? किन्तु शैथिल्यमेव दृश्यते । तत्-कारणान्तु पूर्व्वमेव कृतावधारणं ॥

तथा हि ।—

उद्धवमुखमुखजातं, तादृशसन्देशजातमातत्य ।
कथमथ विवहेदघजि, त्तस्मिन्न वहेत चेद्विधिं भवतां ॥

अथ तदेतद्विचारयत्सु व्रजसत्सु द्वारकादेशतः कौचिदानकदुन्दुभि-किङ्करौ परौ सन्देशहरौ श्रीव्रज-राज-चरणराजीवं सङ्गम्य प्रणम्य तत्कुशलप्रश्न-मनुगम्य निवेदयामासतुः ॥

देव ! श्रीमदस्मद्देव-निवेदनपत्रमिदमादीयता-मिति ॥

व्रजराजः सादरं तदादाय वाचयति स्म ।

यथा ।—

स्वस्ति सदा मदानन्दसन्धुक्षणासक्षणावन्धुवरं श्रीमन्नन्दनामशुभकन्दममन्दमालिङ्गन्नानकदुन्दुभिरयमहं सप्रणयं निवेदयामि ॥

पुत्रे तावकता तु मामकतया भेदं न विन्देत् क्वचि-
त्तत्त्वं वेत्सि च वेद्मि च स्वयमहं
कोऽप्यन्यथा मन्यतां ।
तस्माद्यद्वदिमं [1]करग्रहकृते याचामहे ते वयं
तद्वद्यूयमपि स्वहस्तलिपिभिर्याचध्वमद्धा मुहुः ॥

॥ इति ॥

तदेतद्वाचयित्वा व्रजराज उवाच ।—

भद्रमनयोर्भोजनं योजयत । पश्चात्तु सदेशरूपं सन्देशं दास्यामः ॥

अथ पुनः सर्व्वे सङ्गम्य रम्यमिदं विचारयामासुः ।—

यद्यपि सत्यसङ्कल्पस्य तस्य व्रजागमनसङ्कल्पः कदाचिद्व्यभिचाराय न कल्पः स्यात् तथापि यावद्विपक्षपक्षक्षपणां विलम्बमेवावलम्बेत । तच्च न प्रतिपद्यते [2]कदा समुत्पद्यते ॥

---

(१) श्रीकृष्णां । (२ ज्ञायते ।

तत्र सति रामस्यापि गृहारामतायां जातायां कुमारस्य तु तस्य तावत्कुमारता स्थितिर्न सुकुमारा भवति ॥

स्वयं च तेन[1]यदेत[2]न्मिष्टमस्मान् प्रत्युपदिष्टं ।—

"यात यूयं व्रजं तात ! वयं च स्नेहदुःखितान् ।
ज्ञातीन्न वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं" ॥

इति ॥

तच्चेदमपि वेदयति ।—

यावता सुहृदां सुखं, भवति तावदपि विधेयमिति । तदन्तःपाति चेदं, स्वस्य यदुत्तव्रजताख्यापनादि ॥

तदन्यथा तु तेष्वेकतापत्त्यभावात्तत्तद्गत्यन्तरं न सिद्ध्यति । तस्माद्वसुदेवादिव द्वयमपि तदर्थं प्रार्थयामह इति ॥

अथ व्रजेशश्च सन्देशमिमं लिखितवान् ।—

स्वस्ति समस्तसुखनिर्मञ्छनीयमुखसुषमाभर-श्रीमद्वत्सवरमालिङ्गन् सोऽयमिङ्गितं याचते ।—

वत्स ! त्वं वेत्सि चित्तं मम तु यदभिदां
शूरपुत्रेण मन्ये
तस्माल्लिप्सां तदीयां रचयसि खलु यां
तां मदीयामवेहि ।

---

(१) श्रीकृष्णेन ।　　(२) वक्ष्यमाणं ।

एतं(१)चेदन्यथा स्याद्दूत ! कथमभित-

स्त्वन्मुखाम्भोजलक्ष्मी-

शून्यं दारिद्र्यमेत(२)च्चिरमिह विषहे हा !

सहे नैव नैव ॥ इति ॥

तदेतं सन्देशमादाय सन्देशहरयोस्तत्र गतयोः कतिचिद्दिनान्यतिक्रम्य यथापूर्व्वं व्रजदूतद्वयमावव्राज । आव्रज्य च पूर्व्ववत् कुशलं श्रावयित्वा तत्र वृत्तं वृत्तं श्रावयामास ॥

तत्र व्रजराजः पप्रच्छ ।—

कथयतं ततः परं किं जातं ॥

दूतावूचतुः ।—

यदा भवल्लेखविशेषपत्रिका

विलोकिता गोपपते ! सुतेन ते ।

तदा निजास्रेण लिपिर्विलोपिता

तदर्थलक्ष्मीरधिरोपिता हृदि ॥

व्रजराजः सास्रमुवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च तदुरीकृतमुरीकृतं(३)च पाणिपीडनं यथा ।—

---

(१) कर्म्म । (२) विरहरूपं ।
(३) विस्तारितं । उरी उररी अङ्गीकारे विस्तारे च

यस्मिन् धामनि गेहगेहविसरद्वाद्यं द्युषद्वादनं
सिन्धूल्लोलविमर्द्दनर्द्दनमपि प्राभून्मिथः स्पर्द्धनं ।
तस्मिंस्तद्यदु-कुन्ति-केकय-कुरु-क्रान्ते विदर्भान्विते
भैष्म्याः पाणिनिपीडनं भृशमगा-
दुद्धर्ष[1]मुद्धर्षजं[2] ॥

व्रजराजः पप्रच्छ ।—

विदर्भा अपि कृतसन्दर्भा[3] जाताः ॥

दूतावूचतुः ।—

जाताः; किन्तु भीष्मपुत्रात् विना ॥

व्रजराज उवाच ।—

स खलु भीष्मः कथमागन्तुं लज्जां न सज्जाति स्म ?

दूतावूचतुः ।—

सज्जाति स्म; यस्मादानकदुन्दुभ्यादीनां यत्नस्य कन्यारत्नस्य च व्यर्थीभावभये मज्जति स्म ॥

व्रजराज उवाच ।—

ततः किल वर-कन्या-पक्षयोः सपक्षयोरखिलयोर्मिलनमेव जातं ॥

---

(१) उच्चैर्हर्षं ।　　(२) उत्सवजं ।
(३) सन्धयः ।

दूतावूचतुः ।—

वाढं; येन वाढमेव तन्महो तिरयूढं। किन्तु भवन्तं विना नास्मन्मनः शन्तमं समवाप। तदलं तद्दर्शनया ॥

तदेवमाकर्ण्य वैवर्ण्यं पूर्व्ववत्कथासभायामपि भजति ब्रजराजे स्निग्धकण्ठःसमापनमाह स्म ।—

प्रसूतातप्रायस्वजनजनतापद्म(१)मुत त-
न्महासम्पत्सद्यप्रकरशतलक्ष्यं हरिरसौ ।
भजन्नाभूदीदृक्सुखदसुषमासम्भृतमुखः
स्फुटं यादृक्श्रीमंस्तव दृगमृतं प्राप्य लसति ॥

तदेवमाकर्ण्य तस्य लोचनयोरोचनं वर्णं निर्वर्ण्य सद्य एव त्यक्तवैवर्ण्यस्तं परिष्वक्तवान् ब्रजराजः सर्व्वमेव रोमपर्व्वणा विराजयन्नत्रासीदिति ॥

अथ ब्रजवन्दिनस्तत्र श्रीकृष्णदर्शनानन्दिन-स्तदिदं ववन्दिरे ॥

ब्रज-मधुरमाधुरीहसितपरकामनं ।
मनसि नृपवैभवं दधतमतिवामनं ॥
परिणयनवाञ्छता(२) रहितमनसाचितं ।
अगमदथ कश्चन द्विजानिरसुराहितं ॥

---

(१) संख्या। (२) पचाद्यच्।

निजनृपतिदेहजा-वचनमुपसन्दिशन् ।
स तदुदितचातुरीममृतमिव निर्विशन्(१) ॥
तमनु निजमाययौ नगरमितसम्मदः ।
अवददपि तां हरेरभिगमनसम्पदः(२) ॥
अथ ससुखभीष्मजा मुहुरनमदत्रसा(३) ।
द्विजममुकमिच्छती निजभविकमत्र सा ॥
इह महसि शैलजा-परिचरणादम्भिका ।
भवितुमथ भीष्मजा हरिचरणालम्भिका ॥
सरथहरिणाहृता रुचदमलरोचिषा ।
रिपुनिचयमाचिनोन्मलिनमुखशोचिषा(४) ॥
मगधमुखशात्रवे रणविमुखभावके(५) ।
युधमधित(६) रुक्मवानसुरपरिभावके(७) ॥
व्यधित खलु रुक्मिणं कृतवपनमुण्डकं ।
न परमजितस्तथाकृत विकृततुण्डकं ॥
मुरजिदथ निर्जयन् सनृपचयभीष्मजं ।
अगमदथ तन्निजं नगरमितभीष्मजं(८) ॥

---

(१) भुञ्जानः ।   (२) कर्म्मभूताः ।
(३) पचाद्यच् । न त्रस्यतीति ।
(४) रिपवो मलिनमुखीकृताः ।
(५) सति । रणे विमुखो भावो यस्य ।   (६) धृतवान् ।
(७) कृष्णे ।   (८) प्राप्तरुक्मिणीकं ।

इतिविविधशात्रवप्रजयपयशसाञ्छितः[१] ।

अधिवसति सव्रजं पुनरखिलवाञ्छितः॥इति॥

अथ रजनी-कथापि प्रसजति स्म यथा श्रीराधिका-दिसुखमपि प्रथामवाप ॥

यथा स्निग्धकण्ठ उवाच ।—

यदा यदा दूतागमनमासीत्तदा कृष्ण-प्रेयसीना-मपि प्रायशस्तत्र समागमः समभवन्न तु सर्व्वदा॥

यतः काश्चित्तासामुत्तरसाधिकास्तत्रासामासुः । ताः खलु तासां सुखावसर[२]मवसर[३]मवधाय परं ताः[४] समानयन्ति स्मेति ॥

अतो रुक्मिणी-विवाहप्रस्तावन्तु ताः सूक्ष्ममेव जनश्रुतिभिः श्रुतिविषयं चक्रुः ॥

किञ्च ।—

यथा श्रीमान् वसुदेवः श्रीव्रजराजं प्रति पत्रिकां प्रहितवांस्तथा श्रीमानुद्धवश्च ताः प्रति ॥

यथा ।—

हरिणा निश्चितमेत,न्न हि यादवके[५]मया

विबोढे[६]ति ।

---

(१) आछि आयामे । आयसः । (२) अवकाशं ।
(३) समयं । (४) प्रेयसीः । (५) यादववृन्दे ।
(६) आये लुट् ।

प्राणांस्त्यजति तु भैष्मी
　　　　जाने नतरां किमापतिता ॥

तदेवं ताः समनुधाय स्वीयधाढ्रीताः प्रति पत्रिकां ददुः ॥

यथा ।—

वयमसदृदृष्टसृष्टं, वरमहह ! सहामहे कष्टं ।
न तु हरियशसि कलङ्क,श्चन्द्रमसीव क्वचिद्भवतु ॥

अथ श्रीव्रजेशितुर्वर्णादूते तस्य कर्णयोः सम्भूते सेयं लिपिरुद्धृतेन रहसि दर्शिता यदा तदा तु मुदा विनापि सा स्वीकृतेति कृतं तद्वर्णनया ॥

साम्प्रतं तु प्रतिपद्यतां ।—

राधे ! य एवापरिहार्य्यकार्य्यत-
स्तत्याज वस्तत्र्व्रजधर्म्मधीरपि ।
स एष सर्व्वं हृदि खर्व्वमाचरं-
स्त्वामङ्कमानीय तमङ्क(१)मुज्झति ॥इति॥

तदेवं श्रीराधादीनपि विगतबाधान् विधाय सर्व्व-सुखप्रथकौ कथकौ वासमासादितौ ॥

मिथस्तदा तौ प्रणिधानमागतौ
राधा-विधू साधु विधूतविक्रमौ ।

---

(१) कलङ्कं ।

अन्योन्यमालिङ्गनसङ्गरङ्गिणा-
वातेनतुः सुश्रियमत्र कौमुदीं ॥

इति श्रीमदुत्तरगोपालचम्पूमनु रुक्मिणी-
पाणिपीडनक्रीडनं षोडशं
पूरणम् ॥

सप्तदशं पूरणम् ।

अथ परेद्युः प्रातःकथायां श्रीकृष्ण-मुखसुषमास-मास्वादसादरवीक्षितश्रीव्रजमहीक्षितः सभायां मधुकण्ठ उवाच ।—

तदेवं सन्देशं हरत्सु गतागतमनुसरत्सु कौचिद्दूतौ सम्भूतौ । आगम्य च श्रीव्रजेश्वरचरणौ स्पृष्टवन्तौ तेन पृष्टोदन्तौ तत्राष्टाना(१)मपि प्रकृतीनां कुशलकथनपूर्व्वकं श्रीकृष्णरामादीनां श्रीवसुदेवोद्धवादीनामपि यथायथं वाचिकं वचनरचितं विधाय तूष्णीकतामासेदतुः ॥

व्रजराज उवाच ।—कथमिव नान्यत्प्रथयतं ॥

दूतावूचतुः ।—व्यथां कथं प्रथयावः ॥

सर्व्वे प्रोचुः ।—

दूतानां सर्व्वमेव वक्तव्यमिति । कथं तत्र विरक्तता प्रजज्जेत् ॥

---

(१) स्वाम्यमात्यसुहृदित्यादीनां । स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गवलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।

दूतावूचतुः ।—

रुक्मिण्यादिव्यास्तोकमेकं जातं सशरीरमेव च न प्राप्तं । यथा सा खल्वशिश्वी[१] शश्वदेव विश्वेषां दुःखमशिश्वियदिति[२] ॥

सर्व्वे म्लानमुखतया प्रोचुः ।—

हन्त ! हन्त ! श्रान्तममनसः कंसान्तकस्य च नेन स्वान्तं क्लान्तमिव लक्ष्यते ॥

दूतावूचतुः ।—

नहि नहि । प्रत्युत रुक्मिण्यादिषु स एव चिन्ताशान्तिं कुर्व्वन्नास्ते ॥

सर्व्वे ससान्त्वमूचुः ।—

तर्हि मङ्गलमपि सङ्गतं भविष्यतीति ॥

तदेवं दिनकतिपयेषु लब्धदूतगतागतप्रत्ययेषु पुनरन्यौ कौचिदागम्य सम्यक् तदिदमूचतुः ॥

सम्प्रति किञ्चिदपूर्व्वं दृष्टपूर्व्वमकरवाव ॥

व्रजराज उवाच ।— कीदृशं ?

दूतावूचतुः ।—

एकदा परमसुष्ठुधर्म्मायां सुधर्म्मायां श्रीगोविन्दः

(१) अशिश्वी शिशुना विना ।
(२) वर्द्धयामास । टु ओ श्वि गतिवृद्ध्योः ।

समकक्षैः स्वपक्षैः सममक्षैः क्रीडति स्म ।
क्रीडति तु तस्मिन् सर्व्वे सगर्व्वेहानागराः कोला-
हलवहवहलभयकुतूहलवलिताः सीमातिगामि-
सागरायमाणाः ससम्भ्रममिदं निवेदयामासुः ॥

सर्व्वभाग्यसाक्षात्फलतया साक्षाद्भवन्तं भवन्तं
वीक्षितुं त्वष्टायम।याति ॥

किन्तु सर्व्वेषामस्माकं चक्षूंषि तक्षन्निव लक्ष्यते ।
तस्मादादिश यथा सोम इव कोमलतां भजेत ॥

अथ श्रीकृष्णः किञ्चिद्विहस्य प्रोवाच ।—

नेदृशीं चण्डतामाचरेदस्मासु चण्डरश्मिः ।
किन्तु मादृशास्पर्द्धमानतया तं प्रसादयमानस्तत्-
प्रसादलब्धमणिमात्रमानस्तत्सत्रानुष्ठाता सत्राजि-
देव । यतः प्रसिद्धमिदं ॥

अन्यस्माल्लब्धोष्मा प्रायः क्षुद्रः सुदुःसहो भवति ।
रविरपि न तपति तादृक्, यादृक्तप्तवालुकानिकरः
॥ इति ॥

किन्तु कालातिक्रान्तिवशात्तद्वत्तस्य च शान्ति-
र्भविष्यति ॥

अथ तेषु विहस्य तं द्रष्टुं गतेषु निजनिजगृहं
सङ्गतेषु च साहम्मतेस्तस्य चरितमन्यदपि समा-

कर्ण्यतां । यत् खलु श्रीमानुद्धवः सर्व्वस्मिन् विस्मितं सस्मितमपि शृण्वति समुद्रावयामास ॥

अहो ! पश्यत पश्यत ! तादृशमणिनिदान-(१) दिनमणिहृदयमणिं(२) निखिलतमः(३)शमनव्योम-मणिं(४) त्रिलोकी-चूड़ामणिं निजकुल-चिन्तामणिं कौस्तुभमणिपतिमवमन्य तन्मात्रलाभात् पूर्णं-म्मन्यतया स्पर्द्धाविषयीकृतं तमनिवेद्य गृहमेवा-सद्य सद्यः सत्राजिन्महामहमारभ्य निजसभ्य-द्विजद्वारा तं मणिं वेश्मनि निवेशयामास ॥

प्रतिदिनमष्टभारानष्टापदानामसौ सृष्टान् करोति सर्व्वारिष्टानि च नष्टानि विदधातीति ॥

किमपरं ब्रूमः ? श्रीमद्व्रजवासिनामवमेनापि(५) नायमस्माक(६)मादिमः(७) समतां याति । ये खलु साधारण्येनैव हिरण्यगर्भेण श्लाघिताः ॥

"यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" इति ॥

धिग्धिगस्तां त(८)दपि । यस्मै वहिः सर्व्वैरपि

---

(१) दिनमणिविशेषणं । (२) श्रीकृष्णविशेषणं ।
(३) अज्ञान । (४) सूर्य्ये रूपकमिदम् ।
(५) न्यूनेनापि । (६) यदूनां । (७) सत्राजित् ।
(८) सत्राजित्कर्म्म ।

देवैः शेवधिपारिजातादयः प्रस्थापितास्तं[१] तत्-[२] परीक्षार्थं महीक्षित्[३] कृते भिक्षमाणामिव व्यवहरन्तं स[४] प्रत्याचचक्षे ॥

नहि कौलेयकाना[५]मास्वाद्ये कुल्ये[६] कुल्य[७]-जनानामादित्सास्ति । ते तु तानपि जातु जात-कुतुकतया पुरः स्फुरतः प्रतिघुरन्ति[८] । भवतु स्वयं शास्तिमवाप्स्यति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तदनन्तरमावामागतावेव । तदुत्तरवृत्तं पुनरन्याभ्यां वृत्तं भविष्यतीति स्थिते पुनरपरौ सन्देशहरौ सङ्गतौ । सङ्गत्य च तन्मङ्गलवृत्तं सङ्गमय्य तत्प्रसङ्ग-शेषमेव कथयतः स्म ॥

श्रीकृष्णां तृष्णाजमिव पश्यन् सत्राजित्सत्राजनये[९] प्रसेनाय तं मणिं दत्तवान् । यत्खलु

---

(१) श्रीकृष्णं ।　　(२) सत्राजित् ।
(३) उग्रसेन ।　　(४) सत्राजित् ।
(५) शुनां ।　　(६) अस्थनि ।
(७) कुलीन ।　　(८) घुरभीमार्त्तशब्दयोः ।
(९) सहजाताय ।

तदववाद[१] वञ्चनाय प्रयुक्तं तदपवादप्रपञ्चनाय जातं ॥

तथा हि ।——

स तु प्रसेनः कदाचित् केवलस्तन्मणिगलः समारूढतुरगवरः पापर्द्धि[२]कृते काननचरः प्रनष्ट इति तत्र स्पष्टं जना वदन्तः सन्ति ॥

तत्राप्यन्यत्कष्टमापतितं ।

स खलु सत्राजित्तत्सत्रा[३] वासिनश्च जना मणि-तृष्णाया कृष्णस्तं निघातितवानिति कौलीन[४]-मुद्राव्य सर्व्वं लज्जया कौ लीनमिव कुर्व्वतः सन्ति ॥

तदेतदाकर्ण्य सर्व्वेऽपि व्रजस्था वर्णयामासुः ।——

वयमिह तद्यशःप्रिया इति तस्य तत्तत्क्रियाकर्ण-नसुखश्रिया तद्विरहमपि सहमानाः स्मः ॥

यदर्थं तस्य तत्तत्क्रिया तत्र पुनरियं तत्तत्खलता-मयविशृङ्खलता जाता । तस्मादस्माकं जीवन-मिदमतीव दुःखदं जातं ॥

---

(१) निर्द्देश । अववादस्तु निर्द्देशं निदेशः शासनं च सः ।
(२) पापर्द्धिर्मृगयेति त्रिकाण्डशेषः ।
(३) सह । (४) लोकापवादं ।

भवतु; तदनन्तरमुदन्तः कथ्यतां ?

दूतावूचतुः ।—

तदनन्तरमावामागतावेव । इति सर्व्वेषु तदद्दरह-र्वेदनाविलताविरचितमनश्वर्वेषु चिरं सन्देशागति-विरतिरासीत् । तद्गतिः पुनरप्रतिहता वभूव । चिरा-देव तु सह वहवस्ते जाङ्घिका[१]स्तरस्वितया सङ्घशः समागताः । किन्तु लब्धनिदाघचराः स्थावरा इवावगताः । कुशलं कुशलमिति वदन्तश्च सगद्गद-तयाधिगताः ॥

ततश्च तेषां सन्तर्प्पणमप्यकृत्वा करेण तत्प्रधा-नस्य करं धृत्वा व्रजराजः सामान्यतया पप्रच्छ ॥

स तूवाच ।—

सिंहस्याभिपदं प्रसेनमधियन्
　　　　दीर्णं तथा तं[२] महा-
भल्लूकस्य[३] तदीय[४]वर्त्मगमना-
　　　　त्तद्गर्त्त-मध्यं विशन् ।

(१) चलनवृत्तय इति तीरः ।
(२) सिंहं ।　　(३) अत्राप्यधिपदमित्यन्वेति
(४) भल्लूकसम्वन्धि ।

अष्टाविंशदिनान्तमत्र समरं
कृष्णः प्रचित्यामुना(१)
रत्नं तच्च सुतां च तस्य(२) जगृहे
गेहे च सत्राजितः ॥

अथ धीरतां धारयित्वा भोजनादिकं कारयित्वा पुनस्तं व्रजसमाज एव व्रजराजः पप्रच्छ ।—
कथय विस्तरतया ? ॥ दूत उवाच ।—

यदा रहःकथनगतिभिरहरहः सत्राजिदादिजनस्तत्र मदादपवादमदात्तदा सुधीगणानां निधीयमानधीः स तु भवदीयसुतस्तदवगत्य चानवगतवानिव नातिस्वानुगतानि तदीयसम्मतानि सतां शतानि समाहृत्य कृत्यमिदं विविक्तवान् ॥

पश्यताकस्मादस्माकं महाहानिर्जाता यद्यादवगणावरीयांसं कश्चन पाटच्चर(३)श्चरीकर्त्ति स्म(४) । तस्मा(५)दागच्छत तस्य नष्टस्य पदमन्विष्टं करवामेति ॥

तदेवं विविच्य तांस्तत्प्रामाणिकानग्रिमतयातिरिच्य निजानवरिच्य तदश्वपदान्यनुपद्यमानस्तत्र

(१) भल्लूकेन । (२) भल्लूकस्य । (३) चौर ।
(४) कृती छेदने । (५) हेतौ ॥

यानादिना चिह्नगतनिह्नवमाशङ्कमानश्वरणसरसि-जाभ्यामेव सञ्चरन् गतवान् यत्र हयसहितः स निहतः । तत्र सिंहमात्रपदपात्रं तत्पदमवलोक्य तदनु यान्नतया सिंहगात्रमपि गोत्रमनु महा-भल्लूकलूनं विलोकयामास । यत्र सा हि धरित्री तद्धयमात्रपदचित्रीभवित्री कृष्ण-कीर्त्तिं पवित्री-चकार ॥

व्रजराज उवाच ।—

सन्दिग्धिदिग्धीकृतसपत्नस्य रत्नस्य का वार्त्ता ॥

स उवाच ।—

रत्नं तु सयत्नतयापि न लब्धं ॥

व्रजराज उवाच ।—हन्त ! कथमिव ?

स उवाच ।—

हर्य्यक्ष(१) महर्क्षा(२)वेव तद्ग्रहीतारौ जातौ ॥

व्रजराज उवाच ।—

तयोर्मणिना किमणीयश्च फलं जायेत ॥

स उवाच ।—

हर्य्यक्षस्य तावत्(३) द्विलक्षणातायामाखोरिव कौतुकमेव । महर्क्षः पुनरसौ साक्षाज्ज्ञाम्ववानेव ॥

---

(१) सिंह ।　　(२) महाभल्लूक ।　　(३) मणि ।

गजराज उवाच ।—

तर्हि महत्सु पर्य्यवसितं कार्य्यमिदं न पर्य्ययं(१) गच्छेत् । अथवा न जाने जातिक्रूरता तत्रासूरता(२) स्यादिति । तदनन्तरमुदन्तस्तु कथ्यतां ॥

दूत उवाच ।—

ततश्च तस्मिन्नच्छ(३)भल्लपदान्यप्यनुगच्छन् गुहामेव तस्य प्रवेशदेशमूहाञ्चक्रे ॥

व्रजराजादयः सावेगमूचुः ।—ततस्ततः ?

स उवाच ।—

ततस्तस्य प्रत्येकं स्वस्य तु सुनरां तत्प्रवेशाय खर्व्वान्तरान् सर्व्वांस्तदर्व्वागेव गतिभङ्गिनः कृत्वा केवलमङ्गलसाङ्गित्यालब्धसुखजातः स भवदङ्गजातस्तां प्रविवेश ॥

तदेतावच्छ्रवणात: सर्व्वे(४)"ततस्तत" इति वक्तव्ये वाक्स्तम्भमालम्बन्त ॥

स तूवाच ।—

प्रविश्य च तदन्धङ्करणामन्धकारं करेणोव(५)करेण

---

(१) पर्य्ययः स्यादुपात्ययः ।
(२) दयालुः सुरतः समौ । (३) भल्लूके ऋक्षाच्छभल्लूकाः ।
(४) व्रजवासिनः । (५) रश्मिना ।

भित्वा पुरः पुरः(१) सर्व्वमाश्चर्यं हित्वा गतवानेव पुरः(२) पुरतस्तेन मणिना धात्रीमनु विहरन्तं सुकुमारं नाम तत्कुमारं विलोकितवान् । विलोक्य च स श्लोक्यचरितस्तं बालमनतिचरन्मणिमपि हरन्नवसरमनुचरंस्तद्विहरणवीक्षणकुतुकीव तस्थौ ॥

धात्री तु तत्राकस्मान्नरं तत्र चापूर्व्वताधरं वीक्ष्य कम्पितगात्री बभूव विभावयाम्बभूव च ॥

अहो ! यद्यप्येष स्फुरति नवजीमूतरुचिरः
सुधांशूद्यदङ्कः कमलकमलालोचनपटः(३) ।
मणौ बालेऽप्यस्मिन् कुतुकिनमथाप्येतमधिपद्भिण लोलं हृन्मे न वहति वहिर्धीरपदवीं ॥

तदेतद्विभाव्य चानुक्रोशवती(४) चुक्रोश क्रुष्टवत्यां च तस्यामतिरुष्टतया दष्टनेत्रः(५)स जाम्बवांस्तल्लावण्यामृतास्वादमनालम्बमानः केवलं वलं वलमानस्तेन सह युयुधे ॥

---

(१) अग्रेऽग्रे ।　　(२) पुर्य्याः ।

(३) पद्माक्षः । लक्ष्मीवत्पीतपटः यथासंख्यं कमलं कमलेव लोचनपटौ यस्य ।

(४) कृपा दयानुकम्पा स्यादनुक्रोशोऽपीत्यमरः ।

(५) हृताक्षः ।

व्रजस्थाः सर्व्वे ससम्भ्रममूचुः ।—ततस्ततः ?

दूतस्तु ततश्चाष्टाविंशतिमहोरात्रानविश्रामसंग्रामः समजनीति वदन् दुःखधूतः सम्भूतवाक्स्तम्भमासीत् ॥

तदेतन्मात्रस्य श्रवणपात्रश्रवणतया मूर्च्छामृच्छतोर्व्रजराजयोश्च सर्व्वेऽपि ससम्भ्रममूचुः ।—

अस्तु तावत् प्रस्तुता तद्वार्त्ता, तस्य वार्त्ततां[१] तु श्रावय ॥

स उवाच ॥ ततश्च ।—

कृष्णं तन्मुष्टिनिष्पातपिष्टाङ्गः कष्टमासजन् ।
आचष्ट नष्टदर्पश्रीस्तुष्टूषन् स्पष्टमृक्षराट् ॥

तच्च नास्मभ्यं रोचत इति शोचनीयस्य तस्य नानुवदनीयं । स तु कृपणवत्सलः कृपया तस्य स्तुतिविसरमप्यसहमानः सर्व्वशङ्करेण तं पस्पर्श । तेन स्पृष्टश्चायं कष्टं परिहरंस्तन्माधुर्य्यमपि दृष्टवान् ॥

दृष्टे च तत्र श्रीरघुवर्य्यसौन्दर्य्येऽपि तदन्तःपातितया परामृष्टे क्षणकतिपयमष्टापि स्पष्टानव सात्त्विकान् भावानुवाह ॥

(१) निरामयतां, वार्त्तो निरामयः कल्प उल्लाघो निर्गतो गदात् ।

पुनश्च भवन्नन्दनेन स्वस्थितमनाः समना[१]स्तद्दाज्ञाविज्ञानाय साञ्जलि तस्थौ स तु स्वागमनकारणं सङ्क्षेपतः सर्व्वमाचचक्षे ॥

ततश्च स पुनरच्छमतिरच्छभल्लतल्लजः सलज्जं परामृश्य गृहं प्रविश्य सकन्यारत्नं तदेव रत्नमानीय तस्य पुरस्तादर्पितवान् । तर्पितवांश्च तं स्नपनप्रसापना[२]दिना ॥

सा तु ।—

यद्रूपं जन्मतो ध्यातं तद्रूपवरलाभतः ।
मूर्च्छन्ती जाम्बवत्कन्या पितुराकुलयन्मनः ॥

तच्च ध्यानमीदृशं ।—

तातः प्राचीनभल्लः स्फुटमथ जननी
　　तादृगन्ये तदाभा
वासः क्ष्माभृद्गुहान्तः कथमपरपदं[३]
　　दृष्टिवर्त्म प्रयातु ।
नीलेन्द्राणां कुलेन्द्रः स्मितकमलवल-
　　स्तोत्रगीस्त्रोत्र[४] नेत्रः[५]

---

(१) समना हृष्टमानसः ।　　(२) भोजन ।
(३) अपरं वस्तु ।
(४) तोत्रं वेणुकमित्यमरः ।
(५) विकसितकमलस्य यद्बलं सामर्थ्यं तस्य या स्तुतिर्गीस्तस्याः तोत्रमालानमिव छेदकनेत्रं यस्य ।

स्वर्णांशुश्राविदिव्यांशुकरुचिरसक-

न्मां विकर्षत्यसौ कः ॥इति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूत उावच ।—

ततश्च तत्करस्पर्शामृतं स्मृतवतस्तस्य जाम्ववतः प्रार्थनया श्रीकृष्णस्पर्शलेशाचेतितायां मुहूर्त्ता-न्मूर्त्तभावादुत्थितायां तस्यां सङ्गीतमङ्गलं विधाय स धन्यम्मन्यः सनिजकन्यं भवन्नन्दनं स्कन्ध-मनु निर्वन्धधृतचतुर्दोलधामनि निधाय गर्त्त-द्वार-पर्य्यन्तं स्वयमाससार । गर्त्तद्वारस्था द्वारकीयाः पुनस्त्रयोदशादह्नःपुरस्तादेव निर्विद्य खिद्यमाना गृहाय प्रस्थानमाचेरुर्न तु गुहायां सञ्चेरुः ॥

तदेतावदाकर्ण्य दूतमुखं निर्वर्ण्य सवैवर्ण्यं सर्व्वे-ऽपि प्रोचुः ।—हन्त ! किमर्थं ?

दूत उवाच ।—

निजप्राणत्राणार्थं द्वारकागाराणां केषाञ्चिदुत्रास-नार्थमपीति ॥

तदेवं दूतवचनमनूद्य मधुकराठः स्वयं वदति-स्म ।—

यत्र खलु वक्ष्यमाणश्रीकृष्णागमनान्ते दिनकतिपयप्रान्ते तत्प्रस्तावमुपलभ्य सभ्यजनाननु तदिदं सोत्प्रासं श्रीमदुद्धवेनानुशय्यते[१]स्म ॥

कालियकलहव्याकुलगोकुलवासिनामिव कथमास्माकीनानां कश्चिदप्यविपश्चिद्भवेदिति ॥

तदेतच्छ्रुत्वा व्रजेश्वरी प्रोवाच ।—

व्रजराजचरणान् प्रति कथय कथं न्यायेन जित्वा नात्मनस्तनन्धयं करे गृहीत्वा समानयन्ति । कथं तं क्षीरकण्ठमनुपकण्ठ[२]वर्त्तिनामुदासीनवासनानामन्तर्वासिनं कुर्व्वन्तीति ॥

हन्त ! हन्त ! किमहं ब्रुवे जठरमिदं यन्नाद्यापि विदीर्य्यति । तन्नेदं जठरं किन्तु जरठमेवेति ॥

तदेवं श्रुत्वा सर्व्वेषु साश्रुतया स्वरतः खर्व्वेषु सगद्गदं व्रजराजः प्राह स्म ।—ततस्ततः ? ॥

दूत उवाच ।—

ततश्च भूरिदूरतया विसूरित[३]पूरिततया च चिरादेव द्वारकामागतेभ्यस्तेभ्यस्तदवकलय्य लब्धघर्षसङ्कर्षणादिपूद्धवसम्बद्धतया तत्र प्रस्थानाय मिथः

(१) अनुतप्यते ।   (२) दूर ।
(३) अनुतापो विसूरितं ।

सम्बादिषु केषुचिच्च सर्व्वमङ्गलाय सर्व्वमङ्गला-राधनकृत्सु सत्राजितं प्रति चातीतजीवन[१] कार-माक्रोशत्सु सद्य एव जाम्ववत्प्रस्थापितानवद्य-वाद्यादिमङ्गलसङ्गतं शार्ङ्गी पाञ्चजन्य-ध्वनिं प्रपञ्च-यामास ॥

श्रुतमात्रे च तत्र जातानन्दकोलाहलहलहलाय-मानतया हलिप्रभृतयः सुबहललोकास्तमभिगम्य रम्यविधानेन तद्भासा खद्योतायमानमाणिकण्ठं नवरामाशोभितोपकण्ठं हर्म्यमानिन्युरिति ॥

तदेतदाकर्ण्य दूतगणं धृतसुवर्णमयमणिभूषणं विधाय ते पुनरुक्ततयातीवार्त्ता वार्त्तान्तरानयनाय तदीयं द्वयं द्वयं सन्दधुः ॥

आगतयोः पुनरपरयोः सन्देशहरयोः पूर्व्ववद्व्रज-राजः पप्रच्छ ।—

तौ च कथयामासतुः । आगतमात्रः स खलु मङ्गलयात्रः सत्राजितं राजसभायां भूयसादरेणा-हूय तन्मुख्याय सर्व्वस्मै सर्व्वमाख्याय तस्मै मणिं स्मयमानतया समर्पितवान् ॥

---

(१) अतीतजीवनो भवत्वित्येव मित्यर्थः ।

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

प्राक् पराङ्मुखतां कृष्णादथावाङ्मुखतां मणिः ।
ददौ सत्राजिते किन्तु विमुखत्वं यथा तथा ॥

ततश्चायं परामम्मर्श ।—

नूनं मयि निगूढतया रोषप्रथनस्य कथं केशिमथनस्य सन्तोषः स्यात् । कथं तदीयानां शापश्च नापतेत् ॥

आं! आं! जाम्ववानिव चातुरीमवलम्बेय । यः खल्विदं रत्नमस्मादप्यधिकेन कन्यारत्नेन द्विगुणीकृत्य प्रददानः सपत्नतायां कृतचरयत्नायामप्यमुमतोषयत् ॥

तदेवं सत्राजिद्विचार्य्य स्वकार्य्यमात्रसाधकः सत्यभामां नाम स्वकन्यां मणिना सह सन्यायं दातुमारब्धवान् ॥

जाम्ववति समुद्बुद्धा प्राचीना भक्तिरधिकासीदिति तु नोपलब्धवान् । दीयमानयोस्तयोर्द्वयोः श्रीकृष्णस्तु स्वमात्रजीवनतया धन्यां कन्यामेवाङ्गीकृतवान् न तु मणिमिति तस्या(१) भक्तिमेव

(१) कन्यायाः ।

तस्या[१] भक्तिमेव च व्यक्तीकृतवान् । तत्राभक्तिस्तस्य वर्णिता ॥

भक्तिस्तु तस्याः स्वयमेव निरर्गला सती तत्र[२] संसर्गं चकार । पित्रादीनां द्विषामित्रादयस्तु तत्र चिन्तायमानतया निमित्तमात्रमेव ॥

यतः ।—

जन्माद्येन निजेन सार्द्धमभवज्जन्मादि यस्या रतेः
कृष्णानन्यगतेरमूं[३] पितृजनाद्भामावृणोल्लज्जया ।
पूर्णत्वेन[४] तु पूर्णताजनि यदामुष्यास्तदा सा कथं
वामूमावृणुयात् कथं स च जन-
स्ता[५]माचरेदावृतां ॥

बाल्यादेव यदेतदद्भुतमभूदस्यां हरिं सर्व्वदा
पश्यन्त्यां वडभीगवाक्ष-निचयादत्रावधानं कुरु ।
दृग्भ्यामञ्जनमञ्जुलं जलकुलं यन्निर्य्ययावञ्जसा-
विन्दत्तेन कलिन्दपर्व्वततुलां तस्मिन्नलिन्दस्थलं ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तत आवामागतावेवेतिपरौ प्रतीक्ष्येतामिति ॥

---

(१) सत्राजितः । (२) कृष्णे । (३) रतिं । (४) निजेनेति शेषं । (५) भामां ।

अथ कथकस्य कथायामन्तरमुपलभ्य व्रजसभ्य-वन्दिगणाः श्रीकृष्णं पणते स्म ॥

यत्र वर्णयिष्यमाणं च दूतवचनं सूचयामास ॥

यथा ।—

अघारिरथ सभ्यैः सभान्तरुपवेशी ।
प्रजाभिरभियातः समेत्य शुभवेशी ॥
अवादि पुनरेतद्रविश्च तव पादौ ।
विलोकयितुमागादिहोद्यदुपसादौ(१) ॥
हसंस्तु हरिरूचे न चायमहिमांशुः ।
परं तु बत सत्राजिदेष मणिजांशुः ॥
तदेतदवकर्ण्य प्रजास्तु गतवत्यः ।
स कृष्णमभिनागाद्यथाशु कृतहत्यः ॥
हरिस्तदतिगर्व्वप्रकाशकृतिकामः ।
नृपाय मणिमस्मिन्नयाचदनुरामः ॥
अदत्त(२)मणिमेष प्रसेनमनु यर्हि ।
प्रहासमनु चक्रे मुरारिरपि तर्हि ॥
यदा तु समणिं तं जघान वनसिंहः ।
गभीरमनसासीत्तदा च यदुसिंहः ॥

---

(१) सामीप्ये । (२) दत्तवान् ।

तदीयजनसङ्घस्तदाथ मुरशत्रुं ।
अपावददवेत्य प्रतिस्वमपि शत्रुं ॥
हरिस्तु पुरुसद्भिर्विमृग्य परिनष्टं ।
ददर्श हययुक्तं तमेव हरिदष्टं ॥
मृगेन्द्र-पदचिह्नैः प्रपद्य गिरि-देशं ।
ददर्श सह सर्व्वैर्हतं च स मृगेशं ॥
अथात्र पदमृक्षप्रभोश्च स लुलोके ।
मणिं तु न हि तत्र प्रतीतवति लोके ॥
तदीयपदमृच्छन् जगाम गिरि-रोकं ।
विवेश तदमत्वा[१]खिलस्य निजशोकं ॥
प्रविश्य स महर्क्ष-प्रकृष्टपुरगामी ।
अपश्यदथ रत्नं तदीयहृतिकामी ॥
यदेव किल धात्रीमुपेत्य सुकुमारः ।
विहारपदमागात्तदृक्षकुलसारः ॥
सरत्नमजिहीर्षन्मुरारिरिति धात्री ।
अकूजदतिभीता सकम्पतरगात्री ॥
सभल्लकुल-मुख्यस्तदाथ हतवुद्धिः ।
बभूव सह तेन प्रकृष्य कृतयुद्धिः ॥

---

(१) अनादृत्य ।

सहाष्टदशयुग्मं स तेन दिवसानां ।
व्यधत्त युधमुच्चैरनुद्यदवसानां ॥
विहृत्य मुरवैरी स तेन चिरकालं ।
चकार करुणाक्तं स्वकीयमिव बालं ॥
स चाथ हृदि शुद्धस्तमेत्य गतिसारं ।
निवेद्य निजमागः प्रसन्नमकृतारं ॥
स्यमन्तमपि कन्यां ददे तु वरभक्त्या ।
स जाम्बवदभिख्यः परं[१] च परशक्त्या ॥
सकन्यमणिरागान्मुरारिरथ गेहं ।
समर्प्य मणिमीशे ननन्द वलितेहं ॥
त्रपार्त्तमतिसत्राजिदत्र निज-कन्यां ।
मणिं च मुरशत्रावदित्सदातिधन्यां ॥
मुरारिरथ कन्यामियेष न तु रत्नं ।
सभक्तिरिह सा यत् परं[२] तु कृतयत्नं ॥
द्रवन्तमथ सत्राजितस्तु कृतघातं ।
स्यमन्तहरमक्रूरकादिमतयातं ॥
उपेत्य शतचापं जघान वनमाली ।
स्यमन्तमणिमक्रूरकाच्च मतिशाली ॥

---

(१) वस्तु ।　　(२) मणि ।

समेत्य यदु-वृन्दं प्रतोष्य वहुकर्म्मा ।
स एष तव गोष्ठक्षितीश! कृतशर्म्मा ॥
व्रजस्थनयनालिं विभर्त्ति जिततन्द्रः ।
सदापि परिपूर्णस्त्वदीयकुलचन्द्रः ॥इति॥

अथ मधुकण्ठ उवाच ।—

अथापरौ वार्त्ताहरौ सङ्गत्य पूर्व्ववद्व्रजराजं प्रत्यभाषेतां ॥

तत्र सर्व्वं सुखमेव, किन्त्वेकं दुःखं दुःखनमूलं जातमस्ति। न जानीवहे किमायत्यां प्रत्यासीदेत् ॥

व्रजराज उवाच ।—हन्त! किं तत्?

दूतावूचतुः ।—

तत्कन्याद्वयं नाद्यापि परिणयमापन्नमिति विषण्णं सन्निरन्नमेवास्ते ॥

व्रजराज उवाच ।—अपरिणये किं कारणं?

दूतावूचतुः ।—

भवदाज्ञानवधारणमेव लक्ष्यते। श्रीवसुदेवादयश्च वारं वारं तद्भवन्तमवधारयितुं सङ्कुचन्तः सन्तीति च तर्क्यते ॥

अथ व्रजराजः सर्व्वान् व्याजहार ।—

साम्प्रतमन्याश्च कन्या धन्यास्तस्मै दास्यन्त्ये-

वास्मत्तः सङ्कोचश्च रोचिष्यत एवेति युगपत्तद्-
पत्रपाहर्त्रे परं पत्रं दातव्यं ॥

सर्व्वैऽप्यूचुः ।—

वाढं, किन्तूद्धवाय प्रदातव्यं ॥

व्रजराज उवाच ।—

सम्यक् तस्मादित्थं लिख्यतां ।

इच्छा यासीत् पुरस्तान्मम तु वहुविधा
सा विधात्रावकीर्णा
सम्प्रत्येतद्विधत्स्व त्वमतनुमदनु-
ज्ञावशादुद्धवाख्य ! ।
तासां त्वद्भक्तिपात्रीकृतचरितयुजां
येन साद्गुण्यलेशं
धत्रीभिर्वत्सवत्सः प्रतिगृहमभितः
सेव्यते स स्नुषाभिः ॥इति॥

अथ तत्पत्रिकायां तत्र गतायामुद्धवद्वारा च श्रीमाधवेनागतायां पुनर्दूतद्वारा प्रतिपत्रिकायां व्रजेन्द्रेण चास्वादितत[१]दनुमतायां पुनरपरौ सन्देशहरौ व्रजेशपुरःसरान् परिलब्धावसरौ वभूवतुः ॥

---

(१) कृष्णा ।

तदनुयुक्तौ च ताविदमुक्तवन्तौ । परममङ्गल-सङ्गताः कालियभुजङ्गभङ्गदमहाशया निजाग्रजेन सह नागसाह्वयं नगरमागतवन्तः ॥

व्रजराज उवाच ।—कथमिव ?

दूतावूचतुः ।—

अहिभयं निशम्य ॥ यतः ।—

धृतराष्ट्र[१]कूट[२]कालकूटसृष्टनवकुटं[३] प्रविष्टवन्तः पाण्डवा मात्रा सत्रा[४] शश्वत्प्रश्वय-[५]दूष्मणाकस्मिकशुष्मणा[६] भस्मसात्कृता इति निशम्यते स्म ॥

व्रजराज उवाच ।—

कष्टमनभीष्टं जातं । सम्प्रति तु हस्तिनापुर एव पुनरपरौ सन्देशहरौ गच्छतां ॥

इति तथागतयोस्तयोः पुनरागतयोश्च मुखात्पुनरुत्पातान्तरमाकर्णितं । यद्द्वारकान्तःपुर एव सुप्तः सत्राजित् केनचित्तु सौप्तिकेन[७] गुप्तं हतः स मणिश्चापहृत इति ॥

---

(१) श्लेषे नागविशेष । (२) कौटिल्य । (३) गृहं ।
(४) सह । (५) एधमान । (६) वह्निना ।
(७) रात्रौ सुप्तहन्त्रा ।

व्रजराज उवाच ।—हन्त ! किं तदिदं तथ्यं ?

दूतावूचतुः ।—अथ किं ?

यत्र स्वयं तत्र वधूरवधूतसामा सत्यभामा नादृत-धामा तैलद्रोण्यां मृतं प्रास्य सवाष्पास्यतया सप्रयासं या समागता स्वयमेव तया सर्व्वं कथितं ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततो भ्रातरौ किल कातरौ भुत्वा क्षणमपि न तत्र स्थितवन्तौ । किन्तु तया सह द्वारकामेव प्रस्थितवन्तौ ॥

व्रजराज उवाच ।—

हन्त ! वत्सस्य स्वकसङ्गभङ्गः खल्वयं मङ्गलाय कल्पतां । सम्प्रति तु द्वारकासम्भूतानां दूतानां मुखाद्विशेषं ज्ञास्यामः ॥

अथ तेषु कौचिदागतौ पृष्टस्वागतौ विज्ञापयामासतुः ।—

श्रीकृष्ण-रामयोर्द्वारकाधामगमनं जातं ॥

व्रजराज उवाच ।—गतयोस्तयोः किं जातं ?

दूतावूचतुः ।—

गतौ च सत्राजिद्धन्तारं सर्व्वेण सत्रा तर्कित-

वन्तौ। तर्कयित्वा च निश्चितवन्तौ ॥

ब्रजराज उवाच।—कथमिव ?

दूतावूचतुः।—

तत्पापमेव खलु तत्खयापकं ॥

ब्रजराज उवाच।—कथयतं ?

दूतावूचतुः।—

गूढपुरुषः कोऽपि कृष्णाय निगूढमिदं वर्णितवान्।—

द्वारकाया भवद्रहिततया छिद्रं निर्वर्ण्य पाण्डवेषु धृतराष्ट्रकौटिल्यमाकर्ण्य तदेव गुरूकृत्य(१) स्वकृत्यकृते त्यक्तधर्म्माक्रूरः कृतवर्म्मणा साकं निःशलाकं(२) शतधन्वानमुवाच।—

"मणिः कस्मान्न गृह्यत" इति ॥

शतधन्वोवाच।—कस्य ?

अक्रूर उवाच।—

यः खलु खलः कृष्णाद्विभ्यदस्माभिः स्वसाहाय्याय कन्यारत्नमस्मभ्यं पृथक्पृथगषडक्षीणमक्षीणं सम्प्रतिश्रुत्य श्रुत्यन्तमुखतारहितः पुनः कृष्णाय दत्तवान् ॥

---

(१) गुरुं कृत्वा। (२) रहः।

शतधन्वोवाच ।—

परद्रव्यग्रहणे भव्यं नश्येत् ॥

द्वावप्यूचतुः ।—

मूर्ख! तद्ध्यजितमेव, यत्खलु तद्दत्तकन्यारत्नपरी-वर्त्तनेनैवाश्मरत्नं हर्त्तव्यमिति । ततः कोऽयं दोषः ॥

शतधन्वोवाच ।—

सत्राजिदसौ स्वकण्ठ एवावगुण्ठितीकृत्य तन्निद्राती-ति कथं गृह्णीयां ॥

उभौ विहस्योचतुः ।—

मूढ ! निद्रातीति स्वयमेव वदसि चेद्वयं तत्र कतरच्छिद्रान्तरं ब्रूमः ॥

शतधन्वोवाच ।—

तस्य ग्रहणमनु यदि जागरणमासीदेत् तर्हि गर्हितं स्यात् ॥

अक्रूर उवाच ।—

मातृमुख[१] ! स कथं भ्रातरं[२]नान्वियादिति ॥

तदेतदाकर्ण्य सर्व्वे व्रजस्था विहस्य प्रोचुः ।—

अस्य कोऽभिप्रायः ? ॥ उपनन्द उवाच ।—

सोऽपि तद्वदज्ञातव्यतया संज्ञपयितव्य[३]इति ॥

---

(१) मूर्ख । (२) प्रसेनं । (३) हन्तव्यः ।

पुनरपि सर्व्वे ते प्रोचुः ।—

अक्रूरः खलु धर्म्मात्मेति तु भूरिदूरगप्रसिद्धिः सिद्धिं लब्धवती ॥

व्रजराज उवाच ।—

तथापि वैष्णवस्य दैवविद्रववशाज्जातं छिद्रं न द्रव[1]विषयीकार्य्यं । प्रस्तुतं तु प्रस्तूयतां ॥

दूतावूचतुः ।—

श्रीमानुद्धवस्तु तत्र कारणं कार्य्यमपि पर्य्यालोचितवान् ॥

श्रीमद्व्रजवासिनां तत्र शाप आपतदिति तावदेव न फलमपि तु श्रीकृष्णविच्छेदस्तथा बहिर्जनसम्भेदस्तथा कर्म्मखेदः सम्भविता ॥

व्रजराज उवाच ।—

आस्तां तदपि, पश्चाद्गूढपुरुषः स खलु किं निगमितवांस्तत्कथ्यतां ?

दूतावूचतुः ।—

ततश्च शतधन्वा तदन्याचरितवानेव । किन्तु मणिं ताभ्यां याच्यमानमपि न दत्तवानिति ॥

---

(१) परिहासः ।

सत्राजितमुद्दिश्य तु श्रीमानुद्धवस्तदिदमुद्धुष्टं चकार ।—

धनार्थं सत्राजिन्मणिमधित गेहे मणिरपि
व्यनश्यन्नाशार्थं निखिलविपदां चेच्छृणुत भोः ! ।
वने भ्राता नष्टः स्वयमथ गृहे तत्स्फुटमिदं
विजानीध्वं कृष्णाद्विमुखमखिलं नश्यतितरां ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च तत्त्वमधिजगन्वान् शार्ङ्गधन्वा शतधन्वानं हन्तुमारब्धवान् । न तु सहसा जघान । यद्यय-मेकाकितां प्रतिपद्य विद्रवति तच्छिद्रमुपसद्य च द्रुह्येत तर्ह्येव न द्वारकायामुपद्रवः समुद्भवतीति ॥

राजघतया स्फुरदघः शतधन्वा तु भयं मन्वानः कृतवर्म्माक्रूरयोः क्रूरयोरपि कृष्णाल्लब्धभयपूरयोः शरणाभावाद्दूरयोराश्रयमनासद्य सद्य एव शत-योजनव्राजिनं वाजिनमारुह्य द्रुतवान् । द्रुतवन्तं च तं राम-कृष्णौ रथेनानुद्रुतवन्तौ ॥

ततश्च कंसप्रमाथी तं मिथिलोद्यानं प्रपद्य विपद्य-मानं हयं विहाय पलायमानमाततायिनं पद्भ्यां जवलीलयाधिवलय्य चंक्रमणातुलितचक्रवातेन

चक्रपातेन तच्छिर उच्चकर्त्त। उत्कृत्य च कृतविचयं तस्य सिचयद्वयमनु मणिमनुपलभ्य भ्रातरमुपलभ्य "वृथा हतः शतधनुर्न तु मणिर्लभ्यते स्मे"ति वचनेन विस्रम्भ्य च स कमललोचनः सङ्कुचन् कुचद्विलोचनेन कृतानुशोचनेन चानेन प्रोचे।—

सोऽयमचित् क्वचित् पुरुषे पुरमन्वेव स्वविश्वस्ते न्यस्तवान्मणिमिति तत्रैव भवान् व्रजतु, सत्वरमहं पुनर्मत्प्रेमाशिथिलान्यगतिं मिथिलापतिं द्रष्टुमिच्छामीति ॥

तदेतत्कथान्तरे स्वदूतौ प्रति सर्व्वे पप्रच्छुः।—

साम्प्रतं रामस्यापि प्रतीतिवितथं कथनमुपलभ्यते। यत्तथा निरुध्य तमेकाकिनं विमुच्य गत इति ॥

तदेतत्पुनरसम्भाव्यं सम्भाव्य भण्यतां ॥

दूतावूचतुः।—

अस्ति खल्वत्र स्वस्तिभावार्थमविश्वास्तिनिवारणं कारणं। यतस्तस्यात्रायमभिप्रायः। शतधन्वनो विश्वस्तौ खलु कारिततत्कर्म्माणाविति तद्वदभिशस्तौ नावक्रूरकृतवर्म्माणावेव ॥

तत्र च धर्म्मात्मतयादूरलब्धप्रसिद्धिरक्रूर एवेति समर्पितस्तेन तस्मिन्नेव न्यस्तः । स चायमक्रूरः स्निग्धतादिग्धतया तदानीमासन्नविरहानलज्वालादग्धप्रायतां व्रजत्सु व्रजसत्सु क्रूरतापन्नदृष्टिरेव दृष्ट इति मह्यं न ह्यतिरोचते। तथाप्यनेन धनादिनातीतसामान्यतया मान्यत एवेति न सम्फुटमुद्दङ्कनीयः[१] । पश्चात्तु विपश्चिद्भिर्निश्चेष्यत एव। अतश्च मम तत्र गमनमपि न रमणीयं । किन्तु सर्व्वसहिष्णोरस्य विष्णोरेव तत्रैकाकिनोऽप्यस्य रथजवं व्यस्यतः[२] कश्चिदात्मनि पश्चिमतां[३] विधातुं शक्ष्यति । शस्त्राण्यस्यतः सम्मुखमुखतां वावक्ष्यतीति[४] न प्रतीमः । ततो मित्रमिलनमिषान्मया प्रणयमयरोष एव पोषणीय इति ॥

व्रजराज उवाच ।—

सङ्गिमालिन्यात् स्फटिकमणिर्मलिनताघटित इव प्रेक्ष्यते । स पुनरन्तः शुभ्र एव । तस्मादास्तां तत्प्रस्तावः । वत्सः किं द्वारकामानर्च्छेति तु पृच्छ्यते ॥

(१) कृष्णं प्रति । (२) विस्तारयतः ।
(३) पश्चादनुगामित्वं । (४) वोढा ।

दूतावूचतुः ।—

तस्मिन्नागत एव तु ततः प्रतास्थिवहे ॥

व्रजराज उवाच ।—

शतधन्वा खल्वधर्म्माद्वीरहा[१] जातस्ततस्तस्या-न्त्येष्टि[२]रपि नष्टिमवाप ।

जाताशर्म्मणोरक्रूरकृतवर्म्मणोः का वार्त्ता ? ॥

दूतौ विहस्योचतुः ।—

तौ तु तिग्मवेगतया तस्मादपजग्मतुरिति ॥

तदेवं सन्देशहरसमुदयेषु मुहुरानीतकेशवाग्रजा-व्रजनादिसन्देशचयेषु कदाचित्कौचिदागत्य तत्रत्य-वृत्तं किञ्चिदपूर्व्वं पूर्व्ववन्निवेदयामासतुः ॥

श्रीव्रजमहेन्द्र ! सम्प्रति वल-गोविन्दाविन्द्रप्रस्थ-मागतौ स्तः ॥

व्रजराज उवाच ।—किमर्थं ?

दूतावूचतुः ।—

सकुन्तीमातृकभ्रातृपञ्चकस्य मिलनार्थं ॥

व्रजराज उवाच ।—

हन्त ! किं ते सकुन्तीकाः कुन्ती-सन्तानास्त-नूनपातः[३] शिष्टतनूकाः सन्ति ॥

---

(१) नष्टाग्निः । अप्राप्ताग्निरित्यर्थः ।

(२) दाहादिसंस्कारः । (३) अग्नि ।

दूतावूचतुः ।—अथ किं ?

व्रजराजः सहर्षमाह ।—कथमिव ?

दूतावूचतुः ।—

विदुरसूचितविदूरगामिबिलवर्त्मानुवर्त्तनेन ॥

व्रजराज उवाच ।—

तर्हि दिष्ट्या वत्सस्य दग्धप्रायाश्छाया भूमिरुहास्ते भूमिपर्य्युप्ततागुप्ताङ्गतया पुनः साङ्कुरा जाताः ॥

दूतावूचतुः ।—

तावदेव देव ! किं वक्तव्यं । यतस्ते द्रुपदकन्यामपि पाणौगृह्य गृह्यमाणनिजगृहा दत्तसमस्तस्पृहा गृह एव विराजन्ते ॥

सर्व्वे प्रोचुः ।—

पाणौगृह्येति सामान्यतः कथं कथ्यते ॥

दूतावूचतुः ।—

तत्तु तथैव कथैव तु द्रुतं न प्रतीयते ॥

व्रजराज उवाच ।—

भवेदत्र कश्चिद्विपश्चिन्मतगर्भः सन्दर्भः । भवतु तयोः सदेश एव प्रवेशः सम्पन्न इति तदर्थं गुप्तं भोज्यभोग्यमर्थजातं पेटिकापर्य्युप्तं विधाय सन्देश-

हरेषु निधाय प्रहीयतां। इति प्रोच्य स्वकशोऽपतां वर्णयति स्म।—

दूरस्थेऽपि सुते पितुर्गतिरथो मातुश्च दृष्टा द्वये[१]
तस्मिंस्तस्य[२] च किन्तु हन्त! तदभू-
दस्माकमेवान्यथा।
सोढुं तच्च समर्थयाम वत चेद्दुर्गे स्थले तत् स्थिति-
स्तत्कान्त्या मुहुरीक्षणं चरगणा
बिभ्रत्यमी नस्तु धिक्॥

सर्व्वेऽपि वाष्परोमपर्व्वेह प्रोचुः।—

एषां नेत्राणि वार्त्तां मुहुरुपहरतामस्मदीयानि नेत्रा-
ण्येव स्युश्चेत्तदा तन्मुखसरसिरुहा-
स्वादकर्तॄण्यमूनि।
आगम्यागम्य सम्यग्गतिधरसरघा
केलिवल्गूनि दूर-
स्थित्यास्मान्नीरसाङ्गान् मधुपद[३]सदृशान्
पूरयेयुः सदापि॥

इति दूतौ तत्तदुपायनसम्भृतौ विधाय सास्र-नेत्रवत्सु व्रजसत्सु कृष्णप्रहितौ स्वहितौ कौचिदागम्य प्रणम्य पुनस्तत्प्रतिनिधितयावनम्य रम्य-

(१) मातरि पितरि च। (२) सुतस्य। (३) स्थान।

मिमं स्वस्तिमुखकृतप्रवेशं कृष्ण-सन्देशं दृशि निवेशयामासतुः ॥

यथा ।—

यावद्वैरिनिवारणं स्फुटमहं नागन्तुमर्हस्ततः
साक्षान्नागतमाचरामि रचयाम्यन्यत्तु[१]यन्नित्यशः ।
यूयं चेद्वहिरीक्षणाद्वहिरदः सत्यं मनुध्वे तदा
तेन प्रीतिमयानि तन्न यदि वा युष्मद्दुच्चैः क्लमं ॥

अथ रामसन्देशमपि तथावेशं निवेदयामासतुः ।—

पिता मे गोपेश ! त्वमसि जननी कृष्ण-जननी
नचान्यं नैवान्यं मनसि मनुवेऽहं कथमपि ।
विलम्वं कृष्णस्यागमनमनुगन्तुं परमहं
दधे किं वागच्छान्यचिरमपि तस्मिंश्चिरयति ॥

तदेवं मनसि न्यस्य विश्वस्य निश्वस्य च व्रजेशः पप्रच्छ ।—

कुरुषु कः खलु राम-कृष्णयोः स्निग्धतादिग्धः संलक्ष्यते ॥

दूतावूचतुः ।—

कुन्त्युपपञ्चमाः[२]पञ्चापि कुन्तीपुत्राः ॥

---

(१) गुप्तागमनं ।

(२) कुन्ती उपपञ्चमी येषां समासान्तप्रत्ययाभावोऽयं ।

तत्र च ।—

कुन्ती सा कुरुते ब्रजेशसुदृशः प्रेमस्तुतिं सर्व्वदा
गोष्ठेशस्य युधिष्ठिरो हलभृतो
भीमोऽर्ज्जुनस्यार्जुनः ।
स्तोकाग्राहृयकृष्णाकस्य नकुलस्तस्यानुजश्चेत्यमून्
पश्यन्ती मुनिसंहतिर्ब्रज-कथां
निर्म्मात्यमीषां पुरः ॥

यत्र विदुरश्च तत्तद्विदुरतां गतस्तासु तासु कथासु पुरःसरतामेवानुसरन्नास्ति ॥

ब्रजराज उवाच ।—

हन्त ! कथाशेषतामेव वयं गताः । भवतु साम्प्रतं वत्सस्य किं विधित्सितं तथ्यं कथ्यतां ॥

तावूचतुः ।—

तदेवं दिनकतिपये लब्धव्यत्यये श्रीरामादीन् द्वारकां प्रस्थाप्य सम्प्रति सकृष्णः[१] स खलु कृष्णः काननक्रीडासतृष्णः कृष्णा-तीरपथेन रथेन सञ्चरमाणतामानञ्च । प्रथमं तावद्भक्षणार्थं भिक्षमाणाय सर्व्वसुपर्व्वमुखलक्षणाय हुतभक्षणाय

(१) साऽर्ज्जुनः ।

यत्तरत्तःस्पर्शनभक्ष[1]हर्यक्षपुण्डरीकादिभिरुच्चण्डं खाण्डववनं खण्ड[2]मण्डकायमानं चकार ॥

दिनान्तरे तु भास्करकन्यामाजहार । यत्रावामपि तदीयसेवासङ्गिनौ सङ्गिनौ वभूविव ॥

तथा हि ।—

तदा च धनञ्जयं सञ्जयमानः कञ्जनेत्रः कञ्चन वनभागं जगाम । तत्र च छत्रशोभामत्रपत्रतरुदुष्परिहरपुष्पफलसत्रता[3] भृतपतत्रभृत्प्रभृतिनि सुखकृतिनि नीरादसमीपे घनवनद्वीपे प्रविशन् कलिताश्रमे क्वचिदाश्रमे मुहूर्त्तं निविविशे । दिशे दिशे च दृशं निदिदिशे ॥

तत्र च शुकशारिकादिकानामपि काकलीर्निजानुरागभागबलावलीनामिव विलापावलीर्विस्मयस्मयपत्रपाकृपाशवलं कलयामास ॥

यथा ।—

हा ! गोष्ठाधिपगोत्रजासितमणे !

हा ! गोष्ठचिन्तामणे !

---

(१) वायुभक्ष । (२) पक्वान्नविशेष ।
(३) सदादानं सत्रं ।

हा ! वृन्दावनचन्द्र ! हा ! व्रजरमा-
गोप्यातिगोप्य ! प्रिय ! ।
हा ! तत्तीरविलासलास्यकलना-
त्रैलोक्यसौख्यप्रद !
क्लान्तं कान्त ! कुमारिकाजनमिमं
हा ! त्वं कदा वीक्ष्यसे ? ॥ इति ॥

अत्र यद्यपि हा ! मत्तीरेति तैरवकलितं तथापि विकललपिततया तत्तीरतया कलितं ॥

अथ सर्व्वे पप्रच्छुः ।—तदा किं वृत्तं वृत्तं ?

दूतावूचतुः ।—

तदा तदाज्ञया परितः परियन् परिजनः कश्चन श्यामां पतिविशेषकामां काञ्चिद्दिव्यलावण्यां कन्यां तपस्यन्तीं वरिवस्यन्तीं नमस्यन्तीमपि दूरात् पश्यति स्म ।—

दृष्ट्वा च विस्मयं स्पृष्ट्वा तेन निवेद्यमानः सतृष्णः श्रीकृष्णस्तदव्यवहितदशाय प्रवेशाय स्वहित-मर्ज्जुनमसितमपि निजस्मितमहसा सितं विहित-वान्प्रहितवांश्च ॥

अर्ज्जुनश्च तां मन्दं मन्दं विन्दन्नवनतकन्धरता-मृच्छन् पप्रच्छ ।—

का त्वमसि किमर्थं वासमर्थं तपस्तप्यस इति ॥

सा च निर्जनवनमनु स्वानभिरुचितताचित-पुरुषान्तरावलोचनया चकिता लज्जामप्यसज्जन्ती सहसा निजतत्त्वं निजगाद ॥

अयि भ्रातः! पूष्णस्तनुजनिरहं नाम यमुना
तपस्यन्ती पित्रा रचितभवने प्राणिमि जले ।
स वृन्दारण्यान्तर्विलसितजगत्कामदगतिः
पतिः स्यादित्येतं समयमनुयामि प्रतिपदं ॥

सर्व्वे दूतौ पप्रच्छुः ।—

स्थानान्तरमन्तरा कथं सा तत्र परं स्वमनोरथं पश्यन्ती तपस्यन्ती बभूव ॥

दूतावूचतुः ।—

तत्र हि कुन्ती सन्ततिसम्बन्धेन निर्ब्बन्धेन तस्य तद्वनविहारमवश्यमध्यवस्यन्ती बभूव ॥

व्रजराजः स्ववृन्दावनं शोचन् निश्वस्य प्रोवाच ।—

ततः किं जातं? ॥ दूतावूचतुः ।—

तदेवं तस्याः भाववश्यायाः सगद्गदनिगदं जिष्णुः साद्रनयनतया रभसादनुगत्य वितत्य दनुजजिष्णु-मनुजगाद ॥

स च मम ममतातिशयसम्मता रुचिसमता-यता[1] वृन्दावनवृत्तवाहिनी[2] त्यादियं वाहिनीति नीतिसतृष्णास्तदीयसमीपमन्तरन्तरीयमाप ॥

सा च सहसा तद्भासा चक्षुषी चमत्कारयन्ती विचित्रभाववशान्मुहुरपसारयन्ती मुहुरुपसारयन्ती च तूर्णमेव घूर्णनमवाप ।

यत्र च द्वयमेव परस्परमसिततायां विततायां सिततां[3] वितताव । अस्त्रवत्तायाः सत्तायां स्रवत्-प्रस्वेदतां विवेद । स्तम्भवत्तायामनायत्तायामस्त-म्भव[4]द्विचारतामनुचचार ॥

तत्र च सति सव्यसाची साचिव्यं विधाय चिराय चित्रताया विराम[5]मात्ममित्रमानिनाय ॥

ततश्चानुरागमात्रजागरूकतृष्णः स च कृष्णस्तां तदवस्थां रथमारोप्य चिरेण स्वस्थायमानां गोप्य-तया फाल्गुना[6]नीतान्तः पुरपुरन्ध्रिजनावरोप्य-तया कुन्तीसमीपमापयामास ॥

कुन्ती च फाल्गुनात्तन्मर्म निशम्य निशाम्य च

(१) श्यामत्वात् । (२) नदी ।
(३) वक्रतां । (४) अस्तं प्राप्नुवत् ।
(५) द्वितीयं कर्म्म । (६) अर्ज्जुन ।

निर्निमेषादितया तदेव निर्णीय निर्निमेषायमाणा विस्मयादरस्नेहकिर्म्मीरितनानावर्णतया तां मुहु-र्निर्वर्णयन्ती वरवर्णिनी मध्यमध्यासयामासेति ॥

मधुकण्ठ उवाच ।—

अथ तौ दूतौ वस्त्रालङ्कारप्रभृतौ विरचय्य प्रस्थापितवान् व्रजराजः पुनरपराभ्यां निजसन्देश-हराभ्यां श्रावयाञ्चक्रे ॥

यथा ।—

पार्थानां नगरं विधाय दिविषच्चक्षणा पुराखण्डला-रण्यं खाण्डवमर्ज्जुनप्रियसखः

स्वाहा विधायार्च्चितात् ।

उग्राग्नेरभिरक्षितेन च मयेनान्वर्प्य तेभ्यः सभां

नीत्वा द्वारवतीमुवाह रविजां गोपेन्द्र ! पुत्रस्तव ॥

तत्रेदं च तद्वनस्वामिनं प्रत्युपहसितमिव जातं ॥

कोकिलादि[१]मयं पूर्व्वमासीत् खाण्डवकाननं ।

अधुनापि तथेत्थं मा शक्रवक्रं मनः कृथा ॥इति॥

अथ व्रजराजः ससमाजः स्मितविराजमानं वदति स्म ।—

तया परमधन्यया त्रयीतनुकन्यया पुनरन्य-

(१) श्लेषे निर्वाणाङ्गार ।

दीया कुलीनराजन्यकुलजन्यम्मन्यता लीनतामा-
निन्य एव । किन्तु पितरं विना तद्वितरं न
मन्यामह इति तद्विशेषश्च वर्ण्यतां ॥

दूतावूचतुः ।—

सूर्य्यस्तन्निशमय्य भूर्य्यपि सुखं
सज्जन् सुपर्व्वावलिं
सर्व्वां पर्व्वणि सम्वलय्य समगाद्दर्व्वादिवद्वार्व्वतीं ।
द्वार्वत्यप्यनुसञ्चचार्व्वनुगतश्रीभिस्तमप्यात्मसा(१)
त्कुर्व्वत्युद्यदपूर्व्वपू(२)र्व्वरतया साकर्षदुर्व्वीमपि ॥
ज्योतिर्व्विद्भिरिव वेदविहितं विद्वान् स एवात्र यत्
कन्यायाः जनकश्च स क्क नु ततश्चित्रं भजेद्वर्ण्यतां ।
यस्मिन् पाणिसमर्पणं स दुहितुश्चक्रे तमेतं तदा
पश्यंश्चित्रदशामसावपि ययावास्तामिदं दूरतः ॥

मधुकराठ उवाच ।—

अथ पूर्व्ववत्पुनः पुनरागम्य वार्त्तावर्त्तिनः पञ्च-
मादींस्तदुद्वाहान् प्रपञ्चयामासुः ॥

तत्र पञ्चमः ॥

राजाधिदेव्यास्तनयां पितृष्वसुः
स मित्रविन्दामहरद्धृतस्तया ।

---

(१) आत्मनि लीनं । (२) पुरी ।

विन्दानुविन्दाख्यतदग्रजद्वये
द्विषन्नृपाणां च चये निरुन्धति ॥

यत्र वन्दिभिरिदं वन्दितं ।—

साजैषीन्मित्रविन्दाहरिवरणविधौ भ्रातृयुग्मं निरुन्ध-
द्यद्भ्रातृव्यवृन्दं हरिरिह हितयोर्वीरभावः सहत्त्वः।
कस्याप्यात्मार्पणे वा प्रतिभटदलने
कस्यचिद्वा भवेद्यः
सत्त्वोद्रेकस्तमेतं निगदति भरतः
शश्वदुत्साहमेव ॥

व्रजराजः सलज्जं व्याजहार ।—

यादवक्षत्रियाणामयं किल कुलाचारः। यत्खल्वति-निकटसम्बन्धिनामपि सम्बन्धितान्तरं घटते। वत्सस्य चास्माकं गोत्रान्तरताचिन्तनया तत्र प्रवृत्तिर्जाता ॥

दूतावूचतुः ।—

तस्यां कन्यायामपि नान्यथा न्यायता न्याय्या। या खलु तं वीक्ष्य सहचरीभिरन्यथा शिक्ष्य-माणापि गाढमेव तदेकगतित्वमवगाढासीत् ॥

यत्र च ।—

कुलजे मातुलजन्मा सोऽपं तत्र तोपदप्रख्यः ।

इति सुखमदिशन्महिलाः
सा शशिसुमुखी तु रविमुखी कलिता ॥

सर्वे पप्रच्छुः ।—

तदवलोकनमनन्तीपुरावरोधवध्यायास्तस्याः कुत्र पर्य्यवस्यति स्म ॥

दूतावूचतुः ।—

तदिदमुद्धवेनानुद्धतमावयोर्वर्णितं यत्पूर्व्वं नाम रामकृष्णावध्ययनसतृष्णावपहृत्य तत्र गतवन्तावास्तां किन्तु भवच्छङ्काशङ्कासक्ततया न व्यक्तं कारयामासतुः ॥

यत्र गुरुपुरुसेवाप्रचयाप्रणायानुभावाच्चतुर्द्दशापि विद्याश्चतुःषष्टिमपि कलास्तावद्भिरेव दिनै(१)र्गच्छद्भिरधिजगाते ॥

यत्र च ताभ्यामारब्धानि लब्धपञ्चत्वसत्वतत्तनयानयनमयपञ्चजनशमनशमन(२)विजयकर्म्माणि यदपि रचितशर्म्माणि तदपि परजनकायपरमदुष्करतया सदयानां मर्म्माणि भिन्दन्ति । यदनन्तरं तु राजमहादेव्या राजाधिदेव्या ज्ञाततत्त्वयोः स्नेहादनयोर्गेहानयनपूर्व्वमपूर्व्वमातिथ्यं चक्रे ॥

---

(१) अपवर्गे तृतीया । (२) यम ।

व्रजराजः सास्रमुवाच ।—

सदग्रगण्यश्रीमत्पितृचरणपर्जन्यपुण्यानुचरण-धन्यतावशादेव साङ्गमङ्गलं सङ्गस्यत इति ॥

अत्र विशेषः कथ्यतां ?

दूतावूचतुः ।—

स एष पुनरीदृगीदृगिति ॥

मधुकण्ठ उवाच ।—

तदेवं सर्व्वतत्पर्व्वश्रवणात्सर्व्व एव व्रजवासी चित्रमिवासीदित्यलं कथितकथनेन ॥

अथ षष्ठः ॥ तत्र व्रजराजं प्रति दूतौ व्याजह्रतुः ।—

नग्नजिन्नाम्नः कोशलधाम्नः कन्या सन्यायमभि-रुचितवनदाम्ना[१] समानीता ॥

व्रजराज उवाच ।—कथं कथमिति कथ्यतां ?

दूतावूचतुः ।—

सा खलु तस्य दुहिता सत्या नाम कृष्णतृष्णया सर्व्वत्यागपरासीत् ॥

यत्र च ।—

उदयति नवमेघे लोलदृग्विद्युदालिः
स्वरविवलनगर्जा विस्फुरद्बाष्पवृष्टिः ।

---

(१) श्रीकृष्णेन ।

अभवदिति परं[१] न प्राप तस्य स्वभावं
निखिलमपि यदार्द्रं निर्म्ममे तत्र सत्या ॥

पितापि तस्यास्तत्पश्यन् सुखवश्यमना बभूव। किन्तु भ्रातृव्य[२]सदृशभ्रातृव्यवृहद्बल[३]प्रबलवृहद्बल[४]शबलमित्राणां भावविचित्राणामनुरोधान्न निजबोधार्हकार्य्याय पर्य्याप्नोति स्म ॥

ततश्च बहु विचार्य्य तदिदं पर्य्यालोचयति स्म ॥

यत्र क्षत्रियमात्राणां न शक्तिपरिपक्किमता न चाभ्यासव्यासतः कृत्रिमता सज्जति किन्तु सर्व्वशक्तिसमतिरिक्तस्य श्रीगोविन्दतया पुरमघनपुरःसरसुरसुरभिसमभिषिक्तस्य सज्जेत्। स एव समयः[५] समयितव्यः। स च रभसपालितानां केनाप्यचालितानां दनुजताप्रबन्धावहानां (वीरगन्धावहानां) वीरगन्धासहानां क्रोधतप्तानां सप्तानां सर्व्वदुर्द्धर्षशक्तानृषभाणां मम वृषभाणां युगपद्बन्धनमय एव युक्ततां सन्धत्त इति ॥

---

(१) केवल ।
(२) शत्रु। भ्रातृव्य सदृशादीनि त्रीणि वृहद्बलविशेषणानि।
(३) सैन्यं। (४) वहद्बलो नाम नग्नाजतो भ्रातृपुत्रः।
(५) प्रतिज्ञा। (इत्याधिक्यं कस्मिंश्चित्पुस्तकेऽस्ति।)

तदेवं पर्य्यालोच्य प्रथमतस्तावद्बृहद्बलादिसम्मत्या तत्प्रत्यासन्नानां मुहुराहूतानां प्रभूतानां पृथिवी-पुरुहूतानां क्षत्रिययूथानामप्यङ्गभङ्गकौतुकमव-लोक्य स खलु साधूनामशोच्यः सभावतया श्रीकृष्णमाजुहाव ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततः स तु पृथुकुतुकतया महापृतनावृतः सर्व्व-सुखारामः सङ्गलसदर्ज्जुनरामः समाजगाम ॥

समागम्य च तस्य सौहार्द्दं हार्द्दभावमप्यभिगम्य जगददम्यं वृषसप्तकं यम्यं कर्त्तुमपि पराकर्त्तु-(१) मिव रहसि केन केनचित्प्रामाणिकेन द्वारीकृतेन निवेदयामास ॥

नरेन्द्र ! तदिदं तवेन्द्रपर्य्यन्तं पर्य्यवसितमस्ति । यत्खलु स्वार्थनिबन्धनवृषबन्धनकन्याशुल्कसनि-र्व्वन्धः स राजधुरन्धर इति ॥

क्षत्रबन्धोरपि नायं सत्यसन्धो धर्म्मः । या खलु शौल्किकता । तस्मात् स्नेहवशादरं(२) देवाद्दर-

(१) निराकर्त्तुं ।   (२) ईषत् प्रियेण ।

मिव भवतस्तां याचामहे । न तु शुल्कं लिप्सामहे ॥ राजा च सलज्जं तद्द्वारा तदिदं निवेदयामास ।—

युक्तमेव तदिदं भवदुक्तं । किन्तु मया नायं शुल्काचारः प्रचारितः । परं शुल्ककल्कतया(१) भवत्येव(२) वरतापर्य्यवसानाय तथा चर्य्यते स्मेति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

अथ श्रीगोविन्दः स्मित्वा तदभीष्टमेवानुतिष्ठति स्म ॥

यथा ।—

दुर्गे वज्रकवाटे व्यतिविघटनया
　　　　पर्य्यटन्तः समन्ता-
त्तीव्रास्तीव्राग्रशृङ्गाः श्वसितविलसित-
　　　　स्फूर्ज्जदूर्ज्जस्विगर्ज्जाः ।
सप्तारिष्टातिद्विष्टा(३) दनुजतनुवृषाः
　　　　कंसहन्त्राथ बद्धा
यद्वाहाकारमद्धा विदधदुत जग-
　　　　द्बद्धनेत्रं बभूव ॥

---

(१) छद्मेन ।　(२) स्वच्छन्देन ।　(३) तुल्याः ।

उक्ष्णां निबन्धनकृते दनुजारिधाम[1]
दामाभवत्पर[2]मभूदुपलक्षणाय ।
यत्[3] स्तम्भयत् स्फुटममूनपरांश्च शत्रू-
न्मध्याह्नसूर्य्यवददीप्यत तत्र तत्र ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तदा राजा राज्ञ्यः सकलनरनार्य्यश्च मुदिताः
स्फुरद्वाद्यप्रोद्यन्महसि हरये तामिह ददुः ।
अथासौ तस्यानुव्रजनविधये यान् नियुयुजे
सदासीकान् दासान् वलसमुदयांस्तानपि ददे ॥
वृषभैर्य्ये पुरा भग्नास्ते तु लग्ना हरेः पथि ।
विद्राविताः परं वीभत्सुना[4] वाणैर्न दारिताः ॥

व्रजराज उवाच ।—

वत्सः किं मङ्गलसङ्गितया द्वारका-द्वारं सङ्गच्छति स्म ॥

दूतावूचतुः ।—अथ किं ?

य[5]न्मात्रादत्रागमनायावाभ्यां यात्रा कृता ॥

---

(१) तेजः ।　　(२) अन्यद्दाम ।
(३) धामरूपं दाम ।　　(४) अर्ज्जुनेन ।
(५) द्वारकासङ्गमन ।

अथ सप्तमः ॥

यदनु दूतावपरौ झटिति सम्भूतौ वदतः स्म ।—

श्रीवसुदेवस्वसृतया कीर्त्तितायाः श्रुतकीर्त्तेर्मूर्त्ति-जा[१]श्चामृतमूर्त्तिपूर्त्तिनिभकीर्त्तितया नग्नजिता तुलिता जाताः ॥

सर्व्वे प्रोचुः ।—कथमिव ?

दूतावूचतुः ।—

तेऽपि सर्व्वगुणभद्रां भद्रां नाम भगिनीं तया कृततृष्णाय कृष्णाय प्रददुरिति ॥

तथा हि ।—

भ्रातॄणां या हरौ भक्तिर्नूनं सैव स्वसाजनि ।
तत्तादात्म्यादसौ तेषां तत्र हि व्यक्तिमागता ॥

अथ दूताविव सूतावमू चेतसीदं विविचतुः ।—

वाल्यतस्तद्भक्तिभावाभ्यां तत्र तत्र साविर्विक्ति-श्रुतापि नास्यां गुरुसभायां भासनीया ॥

यथा ।—

श्यामाङ्गीप्रतिमां विधाय मधुरां
पीतांशुकामालिभि-

---

(१) पुत्राः ।

दीव्यन्ती विविधक्षितीशविभवे-

नाभ्यर्च्चयन्ती स्फुटं ।

चित्ते यद्यदियं दधार कुलजा

तत्तच्च चित्तादपि

त्रस्ता सा मुहुरावृतं विदधती

प्रापानवस्थां मुहुः ॥ इति ॥

अथाष्टमः ॥

तत्र लब्धावसरयोरपरयोरपि सन्देशहरयोः कथितं प्रथितं क्रियते ॥

यथा तावूचतुः ।—

अस्ति मद्राधिपतिः पश्चिमायां दिशि कश्चिदच्छे सिन्धुनदकच्छे वृहत्सेननामा । तस्य कन्या च शुभलक्षणतया लक्ष्मणानामतां जगाम ॥

सम्प्रति तु विलक्षणतया शुभक्षणा जाता ॥

यतः ।—

यद्यपि कुलजा हरि-रति,मन्तःस्थां सा ननु

व्यनक्ति स्म ।

तदपि स्वाप्निकजल्पा,स्तां व्यानञ्जुर्जने

जनन्यादौ ॥

यथा ।—

भास्वद्देव ! नमस्करोमि कृपया गृह्णीष्व हा ! मत्करा-
दर्घ्यं शश्वदनर्घ्यरत्नवलितं पूज्यां च पूजामिमां ।
किं वाच्यं बहुधा मयात्र भवते पुत्रीतया[१] समर्पित-
स्तस्मात्तामिव मामपि प्रथय भा-
स्तेनेप्सितेनान्वितां ॥

हन्त ! व्योमनि नीरदभ्रमकरद्योतः किशोराकृति-
र्मां पश्यन् स्मितमातनोति तदहं
विधेय[२] लीनालिषु ।
इत्थं किं वत ! लक्ष्मणा तव सुता
निद्रायमाणा मुहु-
र्भ्रस्तं जल्पति मद्र ! भूप ! तदहं मातापि
जानामि न ॥ इति ॥

ततश्च ।—

यस्तस्या देहजनकः स एव स्नेहजनकः सन्मद्र-
पतिर्भद्रमुपायमिममुपेयाय । सर्व्वधानुष्कदुष्कर-
कर्म्मणः फाल्गुनस्यापि यः फल्गुतामाधत्त ॥

तत्र तस्य विज्ञापिका तत्प्रतिज्ञा यथा ।—

(१) सुतात्वेन ।　　(२) विदसत्तायां ।

विस्तीर्णप्राङ्गणान्तर्जलभृतपरिखादुर्गमाघःप्रदेश-
स्तम्भोपर्य्यावृतिस्थं वृतिरहिततलं
भ्राम्यदुच्चैर्झषाङ्कं ।
यो दृष्ट्वा नीरमध्यप्रतिफलनवशादेकवारं शरेण
च्छिन्द्यान्मच्चापकर्षान्मम परमसुता
लक्ष्मणास्मै प्रदेया ॥

तदेवमेव निर्णीय च वितीर्णीकृततादृशपत्रिकः
क्षत्रियानयमाजुहाव ॥

किन्तु ।—

मद्रेशेनाश्रितास्ते निजनिजविजयं
व्यञ्जयन्तः क्षितीशाः
पूर्व्वात् पूर्व्वान्निजेषु[१] स्फुटविजयविधिं
प्रापुरासु क्रियासु ।
आदानं ज्यानिधाने स्खलनमधिकृत-
ज्यत्वमामृष्टवेध्य-
प्रान्तत्वं चेति जाता[२]धनुरनु वत या
या च निर्वाहितार्था ॥

---

(१) निजवर्गेषु ।
(२) क्रिया ।

तथा हि ।—

वन्दे तं मद्रेन्द्रं, यः कृष्णस्य द्विषच्चक्रं ।
कन्यालम्भनदम्भा,न्न्यक् चक्रे तत् क्रमेण तेनैव ॥
यस्मिन्मागध-चेदिप,दुर्य्योधन-भीम-कर्णाद्याः ।
मौर्वीरोपणमात्रं, चक्रुस्तत्रापरे वराकाः के ॥

यत्र तु ।—

येन झषाङ्गमदृष्टं,स्पृष्टं बाणेन पश्यतां जगतां ।
अपि जिष्णुं तं जिष्णुं,[1]तच्छिद[2]मजितं
नृपो वरं मेने ॥
परमर्जुननामा प्रा,ग्वपुषि च पुनरर्ज्जुनत्वमायातः।
कृष्णेनैव स्वजया,दिह हि स्मितरोचिषा निचितः ॥

मीनं वृहत्सेनकृतं वकीरिपु-
श्चिच्छेद यत्तन्मिषमेव केवलं[3] ।
किन्तु द्विषां मानमिति प्रतीयता-
माकार[4]भेदान्न च तत्र भिन्नता ॥

छेदनं च तदेवं वर्णयन्ति ।—

धृत्वा धनुर्गुणयुतं विदधद्विवृंह-
टङ्कारघोषमभिकृष्य कपोलमूले ।

---

(१) अर्जुनमपि जितवन्तं । (२) झषाङ्कच्छिदं ।
(३) निर्णीते केवलमिति ।
(४) श्लेषे आकारो वर्णः ।

वाणीं जहद्वृतिविभेदनपूर्व्वमारा-
दन्तर्भषस्य च खलस्य च निर्व्विभेद ॥
भिन्दन् दीव्यदभेद्यदिव्यकवचद्वित्रस्थितिप्रावृतिं
छिन्दन् वज्रविनिर्म्मितं प्रतिलवं भ्राम्यन्तमन्तर्भषं ।
तत्तद्धर्षणघर्षजातहुतभुग्विस्फारगर्जश्रिया
तर्ज्जन् सर्व्वगशत्रुखर्व्व(१)मसुरच्छेत्तुर्विजिग्ये शरः ॥
यदाभिजित् ख्यातिरभून्मुहूर्त्तक-
स्तदा वकारेः समयोऽप्यजायत ।
यदा स(२)जज्ञे स भषं तदाच्छिनद्
यदाच्छिदद्(३)द्योःकुसुमं तदापतत् ॥
ततः पपातासकृदेव तद्यदा
तदा हरिं मद्रपतेः सुतावृणोत् ।
वव्रे यदा सा भुवि दिव्यपि स्फुटं
वाद्यानि वन्द्यानि तदा च जज्ञिरे ॥
व्रजराज उवाच ।—ततस्ततः ?
दूतावूचतुः ।—
ततश्च माधवस्तान् मागधादीन् प्रकोप्य तां वदननयनकरचरणरुचिभिः कञ्जवनीमिव रथमारोप्य शरपञ्जरेण सङ्गोप्य च द्वारकामटन्नग्रतो

(१) संख्या ।　　(२) समयः ।　　(३) लुङि ।

घटमानांस्तान्राजहंसान् घनागम इव घनवाण-प्रक्षेपवर्षधाराभि[१]र्विद्रावयामास । कांश्चन प्राणै-र्वियोजयामास च ॥

अथागतः स्वपुरमसावशोभय-
द्व्रजेशितस्तव तनुजः स्वया रुचा ।
यथा भजन्नवसरमात्मतेजसा
स्वमण्डलं वलयति विष्णुभास्करः[२] ॥

ततश्च बृहत्सेनया बृहत्सेनस्तत्र सङ्गम्य महोत्सववलितविवाहोत्सवमुच्छलयामासेति ॥

अथ मधुकण्ठः समापनमाह स्म ।—

आज्ञयैव भवता व्रजेश्वर !
प्राज्ञ एव खलु ताः करेऽग्रहीत् ।
साम्प्रतं तव मनोरथस्थितिं
तां प्रतत्य वलते त्वदन्तिकं ॥

तदेवमाकर्ण्य वलाद्व्रजेशिता
तमङ्कमाकृष्य मुदाङ्कपालयन्[३] ।
अस्राणि सुस्राव तदीयमस्तके
व्रजेश्वरी चात्र ययौ यदात्मतां ॥

(१) परम्पराभिः । (२) विष्णवाख्यो भास्करः ।
(३) आलिङ्गन् ।

अथ व्रजवन्दिनस्तं वन्दमानाः सर्व्वमानन्दयन्ति स्म ।—

इत्थमत्र भीष्मजादितिस्त्र एष स द्विजादिलोक-वर्गपर्व्वगाह[1]शर्म्मकेलिभागुवाह तां तपस्यदर्कजां च तत्र तर्षभाजमाश्वदङ्ग[2] मित्रविन्दया सविन्द-कानुविन्दयास[3]नाशनेन वव्र एव शृणिवदं च गोष्ठदेव ! कोशलेशजां च तत्र तां वभाज सुष्ठु यत्र मत्तभद्रसप्तकं च तन्निवध्य शं ववञ्च[4]किञ्च भद्रिकां च नाम सोदराः प्रदानधामयोग्यता-मवेत्य कृष्णमन्वदुः स्वभक्ततृष्णमष्टमे विवाह एव-मुन्नयस्व । गोपदेव ! लक्ष्मणाख्यमद्रराजकन्यकां च कृष्णभाजमुद्वितर्क्य तं तु पात्रमैच्छदेव तत्पितात्र किन्तु तत्र लक्ष्यमेष निर्ममेऽल्पमत्स्यवेषमेतमत्र दृष्ट्यतीतमुद्भिभेदयः प्रतीतकीर्त्तिरेनमानिनाय घोष[5]एष शर्म्मविधाय पश्य पश्य गोपराज ! राज-मानसत्समाज ! ॥ इति ॥

तदेवं व्रजेश्वरसभान्तःकथायां समाप्तप्रथायां श्रीराधिकामाधवसभान्तःप्रथितं कथितं यथा ॥

---

(१) पचाद्यच् । (२) पुनः ।
(३) प्रयास । (४) वञ्चु गतौ । (५) व्रजः ।

मधुकण्ठ उवाच ।—

य एते विवाहाः प्रस्तुतास्तान् खलु तदानीं दूतमुखादमूर्व्रजचमूरुनयनाः पूर्णतया नानुभूतवत्यः किन्तु परम्परया यत्किञ्चिदेवेति पूर्वमेव व्यञ्जितमस्ति ॥

सम्प्रति श्रीकृष्णस्य तात्पर्यं पर्यालोच्यते ॥

विवाहा यत्र कृताः कृष्णेनासीत्तत्कालयापनं ।
गोपजाः तत्रजाताश्च यदमूरेकधर्म्मिकाः ॥

कुरुक्षेत्रयात्रायां हि श्रीरुक्मिण्यादीनां श्रीकृष्णप्रवणता श्रवणाकर्णगणनायां "श्रुत्वा पृथा सुवलपुत्र्यथे"त्यादौ "वृत स्वगोप्य"इत्यनेन तासामासु स्वैकरूप्यमनुमोदनं च दर्शितं ॥

तथा हि ।—

चन्द्रावल्या भीष्मकन्या वृषरविसुतया
सत्यभामा विशाखानाम्न्या धोरत्नकन्या स्फुरति ललितया
जाम्ववद्वर्ष्मजाता ।
श्यामानाम्न्या लक्ष्मणाख्या शिवितनुजनुषा
मित्रविन्दाभिधाना
भद्रावल्याथ भद्राप्रकृतिदर[1]समा-
पद्मया सा च सत्या ॥

(१) ईषत् ।

न केवलमेकधर्म्मत्वमिति कृष्णस्यैव शर्म्म-कारणमासीत् किन्तु चरणाभ्यङ्गेन दृष्टीनामिव तत्तद्भोगेनैतासामपि कथमप्यैक्यांशवशाद्यत् किञ्चि-त्सन्तर्पणमेव जातं । कालक्षेप एव तेन जज्ञे न चातिविक्षेपः ॥

आस्तामैक्यांशभाजां नृपपदसुदृशां
　　　　कृष्णसङ्गस्य गोपी-
ष्वन्तःस्फूर्त्तिः परामप्यनुभव(१)दशमे
　　　　युग्मकाध्यायदृष्ट्या ।
वंशीवल्लीनदीनां यदि च स कुरुते
　　　　दूरगश्चुम्वनाद्यं
तर्ह्यप्येताः स्फुरत्तत्प्रमदजपुलक-
　　　　स्तम्भतां सम्भवन्ति(२) ॥

तत्रैव चोक्तं ।—

"एवं व्रजस्त्रियो राजन् ! कृष्ण-लीलानुगायतीः ।
रेमिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥इति॥

तदेवं वक्ष्यमाणशोडषसहस्रसङ्ख्येन परिणयने-नान्यासामपि गम्यमिति । गच्छतु तावद्गतं ॥

---

(१) अनुभूतं कुरु ।　　(२) प्राप्नुवन्ति ।

साम्प्रतं तु ।——

राधे ! त्वदालिङ्गनसङ्गिनो हरे-
र्दूरात्पुरस्था विरमन्तु ताः प्रियाः ।
श्रीमद्व्रजे सम्प्रति सङ्गताश्च या
नामूरपि त्वत्तुलनां हि बिभ्रति ॥ इति ॥

तदेवं प्रथयित्वा कथकौ सर्व्वैः सह वासमासन्नौ श्रीराधा-माधवौ च तदेतदतिरम्यं निशम्य सम्यक् सुखमधिगम्य तम्यन्तः[1] क्रम्य[2]लीलागृहमेव शीलयामासतुः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु समाप्तपर-
विवाहसप्तकं[3] नाम सप्तदशं
पूरणम् ॥

---

(१) रात्र्यन्तः । (२) क्रमणीय ।
(३) रुक्मिणीविवाहस्य पूर्व्वपूरणागतत्वात् ।

अष्टादशं पूरणम् ।

अथ श्रीकृष्णमुखसुषमाया न लब्धसुखमहसि श्रीव्रजेशप्रमुखसदसि स्निग्धकण्ठः कथयामास ॥

कदाचित् दूतान्तरयोः पूर्ववल्लब्धान्तरयोः श्रीव्रजेशप्रश्नः ।—

कथ्यतां तथ्यमिदानीन्तनं श्रीहरिचरितं ॥

दूतावूचतुः ।—

इदानीमतीतनृलोकः खलु तस्य देवर्षभ ! देवर्षि-प्रश्नोत्तरमयश्लोकयुगलात्मकः श्लोकः[१]सोऽयमुद-भूत् ॥

को नाम[२]नरकच्छेत्ता घटते सुरभूसुर[३] ! ।
यो नाम्ना[४]नरकच्छेत्ता सुरलोकभुवां सुर ! ॥
कुर्य्यादपारिजातं[५]कः स्वर्गं स्वर्गतपोधन ! ।
कुर्य्यादपारिजातं[६]यः स्वर्गं स्वर्गाधिनायक ! ॥इति॥

---

(१) यशः (२) प्राकाश्ये । (३) नारद ।
(४)नाममात्रेण । (५) अपगतशत्रुवृन्दं ।
(६) पारिजातरहितं ।

व्रजराज उवाच ।—विशेषः शेषश्चेत्कथ्यतां ॥

दूतावूचतुः ।—

एकदा सदा शुभधर्म्मायां सुधर्म्मायां त्रिलोकीपालनकर्म्मा नर्म्मादिना सर्व्वेषां शर्म्मानुरचयन् विरुरुचे । विरोचमाने च तस्मिन्नकस्मादभ्रमभिशुभ्राभ्रमिव किमपि विभ्राजते स्म ॥

न चात्र विभ्राजिता मात्रं किं तर्हि घनाघन-[1] गात्रतामपि जगाम । न केवलं तन्मात्रतामपि तु मन्दगर्जितामप्यर्जितां चकार ॥

तदेतन्निर्वर्ण्य सर्व्वैर्वर्ण्यते स्म ।—

नेदमभ्रमाभ्रति[2] यस्मादूर्द्धत एवास्यागमनमवगम्यते न तु तिरश्चीनादाकाशादिति ॥

तदेवं विचारणाया सत्सु सभासत्सु तस्माद्धनिरपि कर्णाध्वनि वर्णाङ्कता[3]मवाप ॥

यथा ।—

अस्मद्रक्षाकृते यः पुरुजनुरुररीकृत्य विभ्राजमानः
सर्व्वांस्तान् पूर्व्वदेवानलमुपशमयन्
क्रीडति स्वैरलीलः ।

(१) वर्षुकाब्द । (२) अभ्रगतौ ।
(३) वर्णात्मतां ।

सोऽयं सूक्ष्मावधानं विरचयति यदि
स्वैस्तदा लोकपालैः
सार्द्धं जिष्णुः सहार्ह यदु-सदसि विशन्
पश्यतात् पादपद्मं ॥

तदेतदाकर्ण्य सर्व्वैर्व्वर्ण्यते स्म ।—

ऐरावतोऽयं ननु शुभ्रमेघः
शर्म्माश्रुधारा न तु वृष्टिवारि ।
शब्दः स्तुतीनां न तु मन्द्रगर्जः
शक्रस्तदत्राञ्चति चक्रपाणिं ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च भवत्कुलरत्नाज्ञया परिषदं परिचरद्भिर्यत्ना-दाहूयमानः पुरुहूतस्तु भूयसादरेण सुरविसरेण सम्भुयमानः सुधर्म्मामागच्छन् दशशतनमनमेवा-गमनसाधनं चकार ॥

आगताश्च ते यथावदाहृत्य कृत्यजिज्ञासया तस्यां निवेशयामासिरे। कृतनिवेशाश्च ते त्रिदिवेशानम्र-ग्रीवतयातीव भक्त्यावेशाद्याशक्त्या तत्राकतिपयं तूष्णीकामेव पुष्णान्ति स्म ॥

तस्येतस्मिन्नवसरे मुनि-ततिर्मनसीदं मन्यते स्म ।—

सुधर्म्मायामस्यामयमपि बिडौजाः पतिरभू-
दहो सम्प्रत्येष स्वयमसुरवैरी विभवति ।
यथा मुक्तावल्यां तरलपदवीं काचशकलः
पुरा यातः सम्प्रत्यसितमणिसङ्घाद्विजयते ॥

अथ श्रीकृष्णमिन्द्रमहाशयः सविनयमाललाप ।—

त्रिलोकीपालका यूयं मर्त्तलोकं यदागताः ।
तन्मन्महे पालनार्थं शतमन्यो ! वयं नराः ॥

अथैवमाकर्ण्य सवैवर्ण्यं स[1]वर्णायति स्म ।—

सर्व्वेषां सर्व्वकर्त्तृत्वात्परमात्मा स केवलः ।
स्वाज्ञाविकर्त्तृताद्यर्थाः समर्थस्तत्परस्तु कः ॥

श्रीकृष्ण उवाच ।—काममाज्ञाप्यतां ॥

इन्द्र उवाच ।—

तस्मिल्लज्जा कार्या,
द्रुतमृच्छति सा यमन्तरा शान्तिं ।
नास्मिल्लज्जा कार्या,
द्रुतमृच्छति सा यमन्तरा कान्तिं[2] ॥

---

(१) इन्द्रः । (२)वृद्धिमित्यर्थः ।

तस्मादेवेदं निवेदयामि ॥

यः प्राग्ज्योतिषपत्तनेऽस्ति मलिनी-(१)

भूतत्वमागर्भजः

किम्वान्यन्नरकाख्ययैव निखिला

यस्मिन्गुणा व्यञ्जिताः।

सच्छत्रं वरुणस्य रत्नगिरिमप्यस्माकमाकृष्य य-

श्चक्रे चक्रगदाधरान्यदपि किं ब्रूमस्त्रपा तेऽपि हि ॥

श्रीकृष्ण उवाच।—

तेन यत्तादृशं भृशं कर्म्मनिर्म्मितं तज्जगदेवाधि-जगन्वद्वर्त्तते। त्रपा च तदैव स्याद् यदि नैव तत्प्रति-कर्त्तुं शक्नुमः। यदि च भवतामभ्युपगमः स्यात्तदा-काशेऽपि गन्धगुणतां कर्त्तुं घ्राणयामपि तद्गुणता-मपाकर्त्तुं पारयामः। तस्मान्मातुस्तदमृतस्राविं कुण्डलं तस्य मृतस्राविं रचयिष्यामः॥

इन्द्र उवाच।—

मातुर्यत् कुण्डलं तेन हृतं तेन हृतं श्रवः(२)।

यस्य श्रवणमात्रेण वयं च बधिरीकृताः॥

श्रीकृष्ण उवाच।—

नानेन तदपहारः कृतः किन्तु स्वप्राणापहार एवेति

---

(१) मलिनी पुष्पवत्यपीत्यमरः। (२) कर्णः।

स्वैरं वैरं जितमिति मत्वा त्रिपिष्टपाय प्रतिष्ठन्तां तत्र भवन्त इति ॥

अथ ते तत्पदपद्मपदपर्य्यन्तभूमिं स्पृष्ट्वा शिरः स्पृशन्तः प्रसादस्पृशन्तदृशं दृष्ट्वा भृशं सुखमामृशन्तश्चेदं निवेदयामासुः ॥

सोऽयमस्मज्जालापज्ञत्राता पन्नगाशनः स्वयमत्र भवद्गमनासनं भविता ॥

श्रीकृष्ण उवाच ।—

नारायणासनं नराणामस्माकं कथमासनाय कल्पतां ॥

ते सस्मितमूचुः ।—

अस्मदाशंसया नारायणतापि भवत्यधुना सुष्ठु प्रत्यक्षतामाप्स्यति ॥

श्रीकृष्ण उवाच ।—

किन्तु सङ्कोचाय रोचते ॥

पुनस्त ऊचुः ।—

अस्मदर्थं भवद्भिरनर्थनीयमपि समर्थनीयं ॥

श्रीकृष्ण उवाच ।—

यथाज्ञापयन्ति यज्ञाधिपतयः । तदेवं सर्व्वे पर्व्वेद्दलभमाना यथागतं प्रणामन्तस्तत्प्रसन्नतां स्मरन्तः प्रतस्थिरे ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च यत्पूर्व्वं सत्यभामां प्रति पारिजाततरुं दातुं जातु प्रतिज्ञातमासीत्तस्यायमवसर इति सतीनामप्यन्यासां प्रेमवतीनां तस्या एव तद्दानस्य लक्ष्याय सर्व्वशस्त्रनिवारणताभासिवरासि[1]सम्वृतया तया सह सहसा हरिर्विहङ्गम-राजवाहितेन विहायसा प्राग्ज्योतिषपुरं जगाम ॥

किन्तु भार्य्यायुतगमनं वैरिणां प्रतिस्वैरितानुसार्य्यात्मकेलिं गमयति स्म । तत्रान्यदप्याश्चर्य्यं पर्य्यवलोकितमासीत् ॥

व्रजराज उवाच ।—तदपि कथ्यतां ॥

दूतावूचतुः ।—

यदा तमारुह्य चक्रादिचतुष्टयं तुष्टतया समुह्य प्रस्थितवांस्तदा भुजद्वयप्रतिविम्ववदपरं तद्द्वयमप्यालोकितमिति ॥

व्रजराज उवाच ।—

पूर्व्वत एवेदं ज्ञायत इति नापूर्व्वं यन्नारायण-

---

(१) वरासिः स्थूलसाटकः ।

प्रसादस्तत्र तत्साम्यमासादयति । गर्गस्य च सोऽयं वाक्सर्गः ॥

"तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणै" रिति ॥

दूतावूचतुः ।—

सत्यं सत्यं सत्यभामापि त(१)दनुजं भुजयुगलं दृष्ट्वा स्पृष्ट्वा च सम्वस्मितमुखतया कृतरहा जहास॥

व्रजराज उवाच ।—

तदस्तु तस्मादन्यमप्यस्मान् सन्तोषं जोषयतं ॥

दूतावूचतुः ।—

ततश्च हिरणमयगरुत्मदुपरि गारुत्मतहिरण्य-प्रतिमूर्त्ती इव भवत्पुत्रस्नुषामूर्त्ती विलोक्य खेचरा विचारयन्ति स्म ॥

पक्षिसमे कनकाद्रौ, नभसा गच्छत्यमू कलय ।
दम्पतितुल्यौ विद्यु,ल्लेखाविद्युत्वतां सारौ ॥

सर्व्वे प्रोचुः ।—

हन्त ! सा वधूटी कृष्णसवर्णतया कर्णपुटी-विषयीक्रियते । कथमन्यथा वर्ण्यते ॥

---

(१) भुजयुगविशेषणं ।

दूतावूचतुः ।—

तदपि सदवगतं, किन्तु नावगन्तुं शक्यते तत्पाटी[1] परिपाटी ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

तदेवं देवैरपि दुर्गमान्तरं दुर्गापुरमेव स प्राप्नोति स्म ॥

यत्खलु ।—

शैलैः शस्त्रैः सरोभिः सहजहुतवहै-
वायुभिर्दुर्गरूपै-
स्तद्वत्पाशैश्च मौरैः[2] परिवृतमभितः
कामरूपं निवातैः[3] ।
तद्दूरान्नागशत्रू परि परिविहरन्
श्रीहरिः प्रेक्ष्य चित्रं
गच्छन् श्रीसत्यभामामपि स तु कुतुकी
चित्रगात्रां चकार ॥

अथ विविवेच च नन्वमी देवा दुर्गाणीमानि दुर्लङ्घ्यानि वीक्ष्य मां गरुडारूढतामङ्गीकारयाञ्चक्रुः ।

---

(१) माट्य । (२) मुराख्यलौहविशेषोन्नवैः ।
(३) निःसन्धिस्तु निवातः स्यात् ।

तदित्थमाक्रमणं तु छलादेव न तु बलात् बल-मेव तु शूराणां व्यवहर्त्तव्यमतस्तदेव मम कर्त्तव्य-मिति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः । ततश्च ।—

ऊर्द्धात्प्रवेष्टुं यदपीद[1]मीष्टे
पत्रीशपत्रः[2] कुतुकात्तथापि ।
दुर्गाणि दुर्गानगरस्य विश्वग्
विक्रम्य भेत्तुं स मनश्चकार ॥

व्रजराज उवाच ।—हन्त ! कथं कथं ?

दूतावूचतुः ।—

प्रथमं तावद्भूतानां संहारक्रममारब्धवान् । तत्र गदयाद्रीन् बाणांश्च शस्त्राणि विद्राव्य पृथिव्यंशं जलदुर्गे प्रवेशयामास ॥

ततश्च चक्रेण जलमग्नावग्निं वायौ वायुमाकाशे विलापयामास ॥

सर्व्वे व्रजस्थाः साश्चर्य्यमूचुः ।—ततस्ततः ?

---

(१) पुरं । (२) कृष्णः ।

दूतावूचतुः ।—

ततश्च ये पृथिव्यंशाः क्षुरप्रान्तताहिंस्रषट्सहस्र-पाशतया पृथक्स्थितांस्तानप्यसिनैव तूलवद्वितू-स्तयामास ॥

तदनन्तरं तदनन्तरमभि च ॥

न केवलान्यस्य दरध्वनिस्तदा
यन्त्राणि तस्मिन् वितथानि निर्ममे ।
मनस्विनां मंक्षु मनांसि चासकृ-
द्दरोऽप्यसौ यद्दर(१)हेतुतां गतः ॥

यत्प्राकारं निर्विभेदाघवैरी
कौमोदक्या तत्परं चाचचार ।
येनोत्सृष्टान्यश्मलोष्टानि तेषां
पृष्ठाद्यङ्गं भ्रष्टनष्टं वितेनुः ॥

किन्तु जलदुर्गातिक्रमणो युद्धमप्युद्बुद्धं ॥

यथा ।—

तस्मिन् जलावरणवारिधावनधीरितकालः कश्चित् करालः स मुरनामासुरः पुरः शयानतयासीत् ।

यदा तु प्राञ्चन् काञ्चनाम्बरः पाञ्चजन्यध्वन्यति-जवमुज्जगार तदा स च जजागार ॥

(१) भय ।

तत्र तु ।—

द्वयमिह मम मोहनं मुरारे-

र्दर निनदः शयनं तथा मुरस्य ।

प्रलयपविनिनादतुल्यवीर्य्यः

स खलु तदेककलाशयधाम त[१]च्च ॥

तत्र च यदा जलादुद्गम्य त्रिशूलमुद्यम्य स खलु पञ्चमुखः समुत्थितवांस्तदा सर्व्वं संहरन् हर इवादृश्यत ॥

यदा च क्रोधलक्ष्योद्बोधतेजसा सर्व्वं रोधविषयीचकार तदा च कल्पान्तकलनाय मिथः संघृष्टधृष्टभानुवृहद्भानुभानुरद्भाति स्म ॥

यदा च पञ्चापि मुखानि प्रपञ्चयामास तदा सर्व्वग्रसनाय सम्यग्रसनाप्रसारणाकुतूकालाग्निरुद्रवदुपद्रवाय बभूव ॥

यदा च तार्क्ष्यं दिधक्षुरिवाभ्यद्रवत्तदा तद्रूपरुद्रवक्त्रः मञ्जुदीर्घपृष्ठ[२]इवालक्ष्यत । यदा च परितः परीततया गरुत्क्षेपं कुर्व्वते गरुत्मते शूलमस्यन् पञ्चभिरास्यैर्निर्घोषं व्यस्यति स्म तदा भवन्तश्च स्फुटं

---

(१) शयनं ।

(२) सर्पः । दीर्व्वीकरो दीर्घपृष्ठो नन्दशूको बिलेशय इत्यमरः ।

तमनुभवन्तस्तस्थुः । यतो घोषस्थानां भवतां का वार्त्ता स खलु सर्व्वानेवाण्डकटाहस्थानार्त्तांश्चकार ॥

सर्व्वे व्रजसभासदः सप्रत्यभिज्ञं जिज्ञासामासुः ।—

ततस्ततः ? ॥ दूतावूचतुः ।—

ततः समि[१]च्छुर्म्मसम्पदात्मम्भरिः श्रीहरिस्तु युगपदपि तत्तदुपद्रवं विद्रावयंस्तत्र कौतुकं बभार । तीक्ष्णीकृतमुखाभ्यां शिलीमुखाभ्यां तस्य त्रिशूलं त्रिधा विधाय निर्म्मूलं चकार ॥

लब्धदेहव्यूहप्रपञ्चकेन शिलीमुखपञ्चकेन मुख-पञ्चकं तूणमिव पूरयामासेति ॥

सर्व्वे साश्चर्यमूचुः ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च निजमुत्कर्षं चिकीर्षुरपि वस्तुतः स खलु मुमूर्षुर्यां गदां ससर्ज तामूर्जस्वतीमपि निजगदया सहस्रधावसूस्तां कुर्व्वन्नेव तत्पूर्व्वाङ्गसङ्घमपि चक्रवीर्य्येण चेकीर्य्यमाणः सर्व्वत्राप्यपूर्व्वं[२]पूर-यति स्म ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

(१) युद्ध ।　　(२) चित्रं ।

दूतावूचतुः ।—

ततश्च दिग्गतं गजानिव तदग्रजांस्तद्धार्ष्टान्तिकतया कृतधार्ष्ट्यान् सप्तापि पीठसाहित्येनाष्टसङ्ख्यतया तस्मादप्यखर्व्वगर्व्वेस्पष्टान् लब्धकष्टान् विधाय कालदष्टांश्चकार ॥

तदेवं नरकः सूस्तनिजगर्व्वं तत्तत्सर्व्वं लोकमतीतं कर्म्म क्रमशश्चित्रवदवलोकयन्मर्म्मणि चुक्षोभ । गत्यन्तराभावतः स्वयमेव निर्गत्य द्रुतगत्यभिषेणाय(१)न्नत्रस्तमतिहस्तय(२)न्नप्युद्धतं युद्धमुद्धं चकार । यत्र च हरिः परितः सर्व्वानपसव्यान् शरव्यान् व्यतानीत् ॥

तथा हि ।—

भौमः सिन्धूत्थदन्तिप्रयुतयुततया
निर्गतः सैनिकानां
पद्मैः(३) सत्रा शतघ्नीसखविशिखशिखा-
नस्त्रपूगान् व्यमुञ्चत् ।
कृष्णास्तांस्तान् समन्त्रात्रिभिरिषुभिरनु
स्वं समन्ताद्विभिन्दन्

---

(१) सेनयाभिमुखं गच्छन् ।　　(२) हस्तिभिरतिक्रामन् ।
(३) सङ्ख्याभिः ।

योषांस्तान् दृष्टमात्रान् विघटितनिटिला-[1]
व्यङ्गसङ्गांश्चकार ॥
जिह्मगेष्वरिसैन्येषु निजाजिह्मग[2]शङ्कया ।
जिह्मगारिं हरिर्य्युञ्जन् प्रसक्तकृतिमक्तवान् ॥
क्षिप्तस्वपक्षे तार्क्ष्येऽथ शक्तिं चिक्षेप भूमिजः ।
स च तत्रापरां ये द्व संयोगसमवायगे ॥

ततश्च ।—

अभ्यर्थ्य शूलिशूलं द्रुतमिह विकिरा-
ण्येव मन्तर्विचारा-
त्सूक्ष्यं तं तद्विदूरात् क्षितितनयममुं
श्रीमुरारिर्वितर्क्य ॥
ध्वस्तं चक्रे पुरस्तान्निटिलमकुटिलं
तस्य चक्रेण तादृ-
ग्येनायं नाविदद्यत् क्व कथमथ कदा
केन किं कश्चकार ॥
भौमे तु निहते सर्व्वोऽप्याह स्म भुवि दिव्यपि ।
अहहेत्यद्भुताद्धर्षात् वेदादपि यथायथं ॥
ततश्च निजप्रेष्ठां तार्क्ष्यपृष्ठाग्रे संरक्ष्य स्वयं क्षोण्या-

(१) शिरः । (२) वाण ।

मवतीर्य्य वीर्य्यवत्तराणां विजयकुञ्जराणां[१] पुञ्जता-
कृते जनान् नियुञ्जानः कञ्जलोचनः स तु तणं
कुतुकमनुभूतवान् ॥

अथ स्वभारावतारात्तुष्यन्ती पुत्रशोकाच्छुष्यन्ती
च पुत्रहृततददितिकर्णालङ्कृतिप्रभृतिदिव्यवस्तु-
व्रजेन निजपुरः[२] पुष्पन्ती धरित्री वृष्यमाण-
नानावर्णविचित्रीकृतसृग्भिर्विश्वसृग्भिः स्तूयमानं
हरिं सम्भूय परिष्टूय च निवेदयामास ॥

नाम च ग्रहीतुमयुक्तस्य सानुग्रहीभवता भवता
देहबन्धान्मुक्तस्य तस्य तनयः सोऽयं बालतया
लब्धभयः सर्व्वस्याप्यनुकूलं भवत्पदपङ्कजमूलं
समया[३] मया सङ्गमयामासे ॥

तस्मादस्य शिरसि करसरसीरुहं यद्यर्पयति
सर्पदर्पदलनवाहनस्तदास्तां तावत् प्राचीनानां
कल्मषाणामपहननं प्रतीचीनानामपि स्यादिति ॥

श्रीकृष्णस्त्वभयमात्रं तस्यास्तात्पर्य्यमवधार्य्य
वाङ्मात्रेण तद्दानं वितीर्य्य सुरपुरजकीर्य्यमाण-
दिव्यकुसुमः सुकुमारचरितः त्तितिजत्तितिपाल-

---

(१) राजवाह्यो विजयकुञ्जर इति त्रिकाण्डशेषः ।
(२) कर्म्मभूतं ।　　(३) समीपे ।

वेश्म प्रविवेश । प्रविश्य च वृषण्यसु[१]जय-सम्भवं दिव्यविभवं पश्यन् क्क च न कल्पवल्लीना-मग्रतश्चन्द्रविम्बानीवापश्यत् ॥

किन्तु ताश्च तानि च धूलिभीष्मग्रीष्मवात्याभि-रिव म्लानतया पश्यतस्तस्य सुखमनश्यत् । यदा तु मन्दमन्दलावण्यामृतनिस्यन्दानिर्धूतरजस्त-मस्काकस्मिकवलाहकशकलतया तासां पुरतः स स्फुरति स्म । तदा तत्र तत्र लक्षणं विलक्षण-मासीत् ॥

तदेवं स्थिते पुनरुभयेषां क्षणात् प्रत्यभिज्ञा च जाता । ता इमास्ता एवेति । सोऽयं स एवेति ॥

ततश्च ।—

वाष्पं दूरमवर्ष,न्मुररिपुरमुका दधुस्तु कम्पादि ।
तादृशतापेऽप्यासां,पश्यत हिमताकरत्वमाद्यस्य ॥

सर्व्वे प्रोचुः ।—अहो ! वत ! ता इमाः काः ? ॥

दूतौ सासूमूचतुः ।—

हन्त ! ता इमा वाल्यत एव सन्ततकृष्णाभर्त्तृकता-सम्विदनन्या युगपदन्यायपरिणायाय नरक-

(१) धनमिन्द्रं वृषणवसु इति त्रिकाण्डशेषः।

संगृहीततया लब्धनरकम्मन्या रक्षितनिजव्रततया धन्याः सदुपदेव-देव-नरदेव-कन्याः। याः खलु हरिवंशाः केचिद्द्विप्रवंशास्तत्र प्रशंसन्तः सन्ति ॥

निवसन्त्यो यथा देव्यः सुखिन्यः[(१)]कामवर्ज्जिताः।
परिवव्रुर्महाबाहुमेकवेणीधराः स्त्रियः ॥
सर्व्वाः काषायवासिन्यः सर्व्वाश्च नियतेन्द्रियाः।
व्रतोपवासतत्त्वज्ञाः काङ्क्षन्त्यः कृष्णदर्शनं ॥इति॥

सर्व्वे प्रोचुः।—

तस्य विशृङ्खलस्य खलस्य समीपे कथमासां व्रतमपि प्रततं जातं? ॥

दूतावूचतुः।—

कालिकापुराणपारायणपरायणास्तत्रेदं श्रावयन्तः सन्ति। तासु कृष्णानुरागजागर[(२)] सारदस्य श्रीनारदस्यागमनमेव ताभिस्तेन शिक्षिताभिर्नारायणनाभिजन्मना[(३)] च विज्ञाततन्मरणमर्म्मणा तदुपयमनमर्य्यादा पर्य्यापिता। श्रीनारदस्तु तदा तत्रागतवान् ॥

यदा तन्मरणं लब्धानुशरणं[(४)]जातं। तदा चाह स्म।—

(१) निर्व्वाहसुखयुक्ताः।
(२) प्रकाश। (३) ब्रह्मणा। (४) आसन्नं।

तेन विवेदितात्मरागः स महाभागः । अद्य खलु पञ्चमी वर्त्तते । यदि नवम्यां तव वर्त्तनमनुवर्त्तेत तदा त्रयोदश्यामेताः पाणौकर्त्तव्या इति ॥

सर्व्वे क्षणं विहस्य प्रोचुः ।—

कञ्जलोचनस्यावलोचनतः पश्चात् किं जातं ? ॥

दूतावूचतुः ।—

ताभिर्मनसावरणमेव ॥ सर्व्वे प्रोचुः ।—

मनसावरणं न खलु करणता(१)मापद्यते । यदि तत्र श्रीमान् कृष्णस्तृष्णाढ्न स्यात् ॥

दूतावूचतुः ।—

श्रीकृष्णस्तु कारुण्यवशतया तासु सतृष्ण एवासीत् । यदर्थमेव सत्यभामामपि तां गरुडान्नावतारयामास ॥

सम्प्रति तु तासां दृगीहया समानं भावसमूहमूहमानः सर्व्वा एव ताः स्नानालङ्कृतिभ्यां सेविता देवता इव नरयानमारोहयमाणाः सर्व्वसम्पत्कोशैः कौशेर्ज्जितवाजिभि(२)र्वाजिभिस्तिरस्कृतदिग्मतङ्गजैर्गजैर्लब्धमनोरथै रथैः सह विवाह-

---

(१) करणतां साधकतमतां । (२) पक्षिभिः ।

सम्पदर्हैः पारिबर्हैरिव द्वारवतीं प्रति सर्वेषं प्रेषयामास ॥

प्रेष्य च तया निजरूपूढया सह गरुडारूढतया गूढाभिप्रायः समूढदेववर्गं स्वर्गं जगाम ॥

गत्वा च लब्धदेवकी-भावमिति[१]मदितिं नमस्कृत्य सत्यभामाकरेण कुण्डल-द्वयं तां प्रत्युपहृत्य कुण्डलमण्डनया तां परिष्कृत्य तस्याः शुभाशिषः सन्धृत्य महेन्द्रयोर्बहुपूजामादृत्य ततश्चचाल ॥

चलनसमये च हरिचन्दनादिमिश्रमिश्रकावणात्[२] पारिजातं निनाय ॥

सर्व्वे प्रोचुः ।—हन्त ! कथमिव ? ॥

दूतावूचतुः । तत्र ह्येवं प्रसिद्धिः ।—

याचित्वा पारिजातं तरुवरमृषिणा[३]
नाप्नुवन्नप्यघारिः
शक्रे यत्र क्षमावानभवदथ[४]मने-[५]
नार्थितः शत्रुनाशं ।

(१) परिमाणं ।
(२) नन्दनं मिश्रकावणमिति त्रिकाण्डशेषः ।
(३) द्वारा । (४) कृष्णः । (५) इन्द्रेण ।

कृत्वा तं[1] भार्य्यया तत्परिवननकृतौ[2]
　　　　हेतुना[3] सार्द्धमागा-
न्नद्देहं तं तथापि स्वयमयमददा-
　　　　न्नेति गच्छन्नगृह्णात् ॥
यः सर्व्वां यस्य लक्ष्मीमवितुमवतरन्
　　　　यस्य शत्रून् विमृद्न-
न्नध्यास्ते विप्रनीत्या तरुमवृणुत चा-
　　　　नेन तस्मान्निरस्तः ।
स स्वीयं क्षत्रधर्म्मं पुनरथ विदधद्
　　　　बोधितस्तेन देवैः
सार्द्धं सर्व्वान् विजित्य स्वयमहरत तं
　　　　पश्य कः कस्य धर्म्मः ॥ इति ॥

अत्रावाभ्यां तु तदिदं विचार्य्य निर्धार्य्यते । भवतां मातामहस्य[4] वैश्याभीरवंश्यतायामपि पितामहस्य वसुदेवपितामहता महतां सदसि विख्याता ॥

यथा च "यादवानां हितार्थाय धृतो गिरिवरो मया" इत्यादिषु यादवता; "वसुदेव उपश्रुत्य भ्रातरं

---

(१) नाशं ।　　(२) याचनकृतौ ।　　(३) हेतुभार्य्या ।
(४) वसुदेवस्यापेक्षया पितामह इत्यर्थः ।

नन्दमागत"मित्यादिषु तत्पितृव्यप्रभवता च पुराणविद्भिर्गीयते । तस्मादध्यात्मशास्त्रानुमत्या पुत्रेषु पित्रंशाधिक्यात् क्षत्रियवीज्यताया(१)मपि लब्धवीर्य्यतायां "मातृवद्वर्णसङ्कर" इति धर्म्मशास्त्रमतानुरोधादाभीरवैश्यताधर्म्मस्तत्र भवद्भिरात्मनि समुद्भावितः ॥

तदेवं सति सम्प्रति यादवानन्दनस्य भवन्नन्दनस्य स्फुटमलौकिकप्रभावाद्विश्वकृतवन्दनस्य यदपूर्व्ववदात्मनि क्षत्राविष्कृतिः कृतिविषयीभवति तत्तु पूर्व्वपक्षे न प्रक्षेपमाप्नोतीति ॥

तदिदं सर्व्वेऽपि सानुमोदं निशम्य सप्रमोदमूचुः ।

प्रस्तुतं प्रस्तूयतां ॥

दूतावूचतुः ।—

केचिदेवं च देवेन्द्रवञ्चनं प्रपञ्चयन्ति ॥

यदा सात्राजिती पारिजाततरवे सयत्नीभवन्ती सुत्राम-पत्नीसदनमाससाद । तदा वनदेव्यानीतं वाञ्छाभिनीतं सुजातपारिजातकुसुमं तस्याः पश्यन्त्याः सा शचीनाम्नी सुत्राम्नी निजशिरसा युक्तवती ॥

(१) वीज्यस्तु कुचसम्भवः ।

तदिदमुक्तवती च ।—

मनुजादुद्भववत्या भवत्या नाधिकृतिरत्रेति । किन्तु छन्दोमयशब्दगतेः खग-सन्दोहपतेरारोहणं मोह-विषयीचकारेति(१) ॥

तदेवं ।—

तेषां कृतघ्नतां वीक्ष्य कृततद्वाञ्छितो हरिः ।
पारिजातेन सहितं रत्नाद्रिं चानयद्गृहं ॥

सर्व्वेऽप्यूचुः ।—

आत्मानं पङ्कसङ्करशङ्कमाचरन्नसावमुना कं कं वारं वा क्षालयितव्यः । ततः स्वकथ्यं तु प्रथ्यमानतामानयतं ॥

दूतावूचतुः ।—

ततश्च तासां कन्यानां विवाहे विहितनिर्व्वाहे श्रीनारद-वचनमिदं ।—

"चित्रं वतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्वयष्टसाहस्रं स्त्रिय एक उदावहत् ॥ इति ॥

व्रजराज उवाच ।—

तदिदमपि गर्गवचनज्ञातनिसर्गं । किन्तु परं कथ्यतां ॥

---

(१) अज्ञातवती ।

दूतावूचतुः ।—

ततश्चावां सन्देशमादेशमादेशं(१) केशवेनात्र-प्रहितौ ॥

सर्व्वेऽप्यूचुः ।—कोऽयं सन्देशः ॥

दूतावूचतुः ।—

यद्वद्याकारं वर्द्धयन्नत्र वर्त्ते
तत्तृप्त्यर्थं शूरपुत्रस्य वित्त(२) ।
दत्त्वा स्वीयव्यूह(३)मस्मै विचित्रं
लब्धानुज्ञाभव्य(४)मस्या व्रजामि ॥

अङ्गस्य वह्निना तापस्तस्य तापेन शाम्यति ।
एवं व्यसनशान्त्यर्थं व्यसनं क्रियते मया ॥इति॥

अथ स्निग्धकण्ठः समापनमाह स्म ।—

व्रजनृपधरकर्णायुग्ममस्मिन्
वत सुतरूप्यविवासवृत्तवृन्दे(५) ।
नयनमधुकर-द्वयं सुतस्या-
ननसरसीरुहमाधुरीषु धेहि ॥ इति ॥

---

(१) आदिश्यादिश्य ।
(२) जानीत । (३) पुत्रादिरूपं ।
(४) यथास्यात् ।
(५) सुतस्य भूतपूर्वो यो विवासस्तस्य वृत्तवृन्दे ।

तदेतदवधाय तदुत्तमाङ्गमङ्के निधाय स्वाश्रुभि-रभिषिक्तं विधाय क्षणा-कतिपयं व्रजराजः स्तम्भं सम्भवति स्म ॥

अथ व्रजवन्दिनस्तत्र वन्दन्ते स्म ॥

शक्रश्रावितभौमातिक्रम ! ।
चक्रक्ष्मापतिमाथिप्रक्रम ! ॥
भामालम्बितताक्ष्यारोहण ! ।
नामाभासकपापद्रोहण ! ॥
कामाद्रूमिजदुर्गप्रेक्षक ! ।
रामाकौतुकदानापेक्षक ! ॥
वीरोत्कम्पकदुर्गामर्दक[१] ! ।
नीरोद्यन्मुरतत्सून्वर्दक ! ॥
सृष्टक्ष्मासुखभूतप्रत्यय ! ।
दृष्टक्ष्मासुतसर्वान्तः क्षय[२] ! ॥
क्ष्मैतेयं प्रति निर्जिष्णुक्रम ! ।
दैतेयं लघु तं घ्नन्निष्क्रम ! ॥
तत्पुत्राय च राष्ट्राद्यर्पक ! ।
यत्कुत्राप्यनुभक्तं तर्पक ! ॥

---

(१) दुर्गस्यामर्दक ।　　(२) निवास ।

कन्यानामपि तासां पारक ! ।
धन्यानां निजभाजां तारक ! ॥
देवक्ष्मापतिसङ्कुलपूजित ! ।
देवक्ष्मारुहहृतिवाञ्छाचित ! ॥
तं कर्षंस्तरुमिन्द्रप्रावृत ! ।
अङ्कस्थाङ्गनयुद्धे चाहृत ! ॥
जित्वा तं तरुमूर्ज्जद्विक्रम ! ।
हित्वा वासवमुद्यद्विभ्रम ! ॥
यत्नप्रापितसच्छत्रादिक ! ।
रत्नक्ष्माधरहृल्लीलाधिक ! ॥
भक्तप्रीतिदतत्तद्विड्जय ! ।
सक्तस्वव्रजमाप्तस्त्वं जय ! वीर ! ॥इति॥

अथ पूर्ववच्छ्रीराधामाधव-सदसि कथेयं ।—

यथा स्निग्धकण्ठ उवाच ।—

यदा नानासम्वदनसुखवशम्वदतत्तद्युद्धसमुद्बुद्ध-कामया सत्यभामया सह नरकवधं विधाय मणि-गिरि-पारिजाततरू गुरुत्मति निधाय सर्व्वशर्म्म-निधानरूपः स खलु दयालूनां भूपः स्वपुरं समा-गतवांस्तदा व्रजसाधारण्येन राधादिषु च दिव्या-लङ्काररत्नानि यत्नाद्विहापितानि ।

यत्र[1]सर्वत्र द्वित्रवर्णाक्रमवलनया समस्तकलनया तदिदं चित्रितमिव लिखितं विलक्ष्यते स्म ॥

व्याकारा निचिता मया बहुविधा
युष्मच्छविच्छायया
कालं क्षेप्तुमथाजनि प्रतिपदं निर्वेदखेदः परं ।
यावद्बन्धनमात्मना विरचितं तत्तद्विचित्रं बला-
च्छित्वा तत्र समेमि तावदसकृत्
प्राणान् प्रिया! रक्षत ॥

तदेतदपि वहिर्दृष्ट्यपेक्षया लिख्यते ॥ वस्तुतस्तु ।—

यद्यदत्र किल रच्यते वहि-
स्तत्तदङ्ग वहिरेव मन्यतां ।
अन्तरेऽहमपि यूयमप्यहो !
केलिमेव कलयामहे मिथः ॥ इति ॥

अथ समापनं च स्निग्धकण्ठः सोत्कण्ठमाह स्म ।—

इन्द्रजालमिव विद्धि राधिके !
तत्तदाधिवलनं पुनः पुनः ।
पश्य कृष्ण इह तृष्णगन्तर-
स्त्वन्मुखं सुखवशान्निरीक्षते ॥

---

(१) अलङ्कारेषु ।

तदेवं सर्व्वसुखप्रथकयोः कथकयोः सर्व्वेषां सह स्वस्य पथं गतयोः श्रीराधामाधवावपि माधवी-मण्डपमेव स्वकेलिसम्पदा मण्डयामासतुः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु नरकसंहरण-पारिजातहरणायुगपदष्टसहस्रयुगकन्या-पाणयादानमष्टादशं पूरणम् ॥

ऊनविंशं पूरणम् ।

अथ प्रभाते श्रीकृष्णा-प्रभाजातसुखलम्भायां व्रजराज-सभायां मधुकण्ठ उवाच ।—

वहूनां दिनानामनन्तरे दिनान्तरे चापरौ सन्देश-हरौ प्रथमगतौ वहुभिरनन्तरगतैः समं समागतौ । समागत्य च तत्प्रश्नपूर्व्वकं पूर्व्ववत् कथयामासतुः ॥

भवद्भिर्यत्तत्रकीयं कुशलं पृष्टं तत्सुमृष्टमेव ।

परं च किमपि पूर्व्वं यदपरामृष्टं तदेव दृष्टं ॥

श्रीव्रजराज उवाच ।— कथ्यतां ? ॥

दूतावूचतुः ।—

श्रीरुक्मिण्या जातकः खलु जात एव यः प्रनष्ट-तया सर्व्वं सकष्टं चचार ॥

स तु सम्प्रत्यात्मना प्रत्यागत्य दृष्टतया हृष्टमाचचार । न केवलमात्मना किन्तु कयाचिदन्यया च धन्यया नरदेव-कन्यायमानया ॥

सर्व्वेऽपि साश्चर्य्यमूचुः ।—

कथं कथमिति कथ्यतां ? ॥

दूतावूचतुः ।—

तदिदं श्रीनारदवदनाद्विदितं ॥ यथा ।—

मारमारादुपानीय पानीयनिधिमाक्षिपत् ।
शम्वरः शम्वरा[1]त्तं तु समार[2]न्निजमारकं ॥

तथा हि ।—

यदा परिणामतस्तादृशदनुजप्राणकर्षिसुजन-सुखवर्षिदेवर्षिनियोगादात्मघातकतया निश्चित्य विचिन्त्य च शम्वरनामा दानवः शाम्वरीसम्वलनयात्मसम्वरणमालम्वमानस्तं वरुणालय-शम्वर[3]मनुलम्वयामास तदा स वालः सहसा मिलितः केनचिदपूर्व्वशकलिना गिलितः ॥

स यदा गिलितस्तदा स च शकली केनचन जालिकेन कलितः । स यदा च कलितस्तदा शम्वरवलिकृते वलितः ॥

स यदा च वलितस्तदा तदीयमहानसाधिकारिण्या रतिनाम्न्या दलितः । स यदा च दलितस्तदा स वालकस्तत्र पर्य्याकलितः । पर्य्याकलितवती

(१) जलात् । (२) समगमत् । (३) सिन्धुजलं ।

च सा तं सम्बरस्य दुर्म्मर्य्यादतां विचिन्त्य गुप्तं-पालितवती ॥

एषा हि पूर्व्वं स्मर-भार्य्यासीत् स्मरे तु हरेण दग्धे पुनस्तत्प्राप्तये तमाराधयामास ॥

ततः शम्वरेण स्मरहरं प्रसाद्य निजगृहानीतापि प्राग्लब्धतद्वरवलादभीता मायामयकायया कयाचिदात्मभ्रान्तिकारिकया तं वञ्चयन्ती वभूव ॥

तस्मिन्नतिवाले वलात्पतिभावे मुहुर्लब्धभावे तु धिग्धिगित्यात्मानं गर्हितवती ॥

अथ कदाचिदेतां श्रीमान् देवर्षिः सर्व्वहर्षि तदिदमषट्कर्णि वर्णितवान् ॥

अयि रतिदेवि ! मन्मथतया लब्धप्रथितिस्तव यः पतिः स खलु दुर्गापतिना प्रापितान्यथा गतिः सम्प्रति सर्व्वमन्मथगतितता श्रेयसि निजांशियदुपतितेजसि लब्धसात्म्यापत्तिः सन्नयं वर्त्तत इति ॥

सा तु तदेतत्कर्णयोरासज्ज्य तस्मिन्नारोपितं भावान्तरं परित्यज्य पतिभावमेव प्रसज्य स्थितवती स तु सावकः प्रतिश्वः शश्वदेव शुक्लपक्षशशीव शुशाव(१) । प्रौढस्तु स कुमारपरिवृढस्तं तद्भावं दृढं

---

(१) ववृधे ।

वुद्ध्वा तस्यै गाढं चुक्रोध सा तु कथितरहस्यतया तं वश्यं चकार ॥

स्वीयामनवद्यां विद्या-ततिमपि तस्मिन्नाविश्चकार ॥

किं वहुना ? युद्धं समुद्बुद्धं विधाप्य तं दारकं तस्य दानवस्य दारकमेव चकार ॥

अनन्तरं च सुरवर्त्मवर्त्मना तन्मारतया तत्र तत्र सुरविसरलब्धप्रसारमारनामसारं कृष्ण-कुमारं द्वारकामनुसारयाञ्चकार ॥

यः खल्विन्द्रसञ्चारं सञ्चरंस्तत्रत्यैश्चन्द्रदर्शं दृश्यते स्म ॥

सान्द्रानन्दकन्दकन्दर्पतया परामृश्यते स्म च ॥

व्रजराज उवाच ।—

कथ्यतां तथ्यं कीदृगाकारः स कुमारः ? ॥

दूतावूचतुः ।—तदेव निवेदयन्तौ स्वः ॥

"आत्मा वै जायते पुत्र" इति या श्रुतिरादृता ।
रौक्मिणेये हरेः पुत्रे तदुदाहृतिरीक्ष्यते ॥

मनोजवस(१) इत्याख्या यत्ख्याता पितृसन्निभे ।
तस्यैदमेव वीजं किं स तद्वद्वसतीति यत् ॥

---

(१) मनोजवसः पितृसन्निभ इत्यमरः ।

सर्व्वे पप्रच्छुः ।—कीदृग्वयाः सयागतः[१] ॥

दूतावूचतुः ।—

याद्दग्वयाः श्रीदामादिसवया[२]स्ताद्दग्वया एव प्रतीयते । साम्प्रतिकसंख्यया तु षड्वर्ष एव ख्यायते । यतः सर्व्वेऽपि तं विलोकमाना लोकाः स्वयं श्रीकृष्ण एवायमिति ससम्भ्रमं वम्भ्रमति, किं वहुना ? तन्मातरोऽपि ॥

पुनः सर्व्वेऽपि पप्रच्छुः ।—

स च खल्वस्माकं जीवननामा श्यामधामा सम्प्रति कीद्दग्मानः स्फुरति ? ॥

दूतावूचतुः ।—

स यथा गोकुले ज्ञायते स्म सम्प्रत्यपि तथा प्रत्यभिज्ञायते ॥

तदेतदाकर्ण्य सर्व्वे दूतमुखं निर्व्वर्ण्य क्षण-कतिपयं फुल्लद्दग्वर्णामासन् ॥

ततश्च दूतावूचतुः ।—

अत्र किमाश्चर्य्यं ।—

"तत्र प्रवयसोऽप्यासन् युवानोऽतिवलौजसः ।

---

(१) सम्भागतः । यत्वं ।　(२) कृष्णाः ।

पिवन्तोऽप्यैर्मुकुन्दस्य मुखाम्बुज-सुधां मुहुः" इति कैमुत्यप्रत्ययात् ॥

यस्य चानुभूतचरस्य मनसि सञ्चरणाद्भवन्तश्च तथाभवन्तः समन्ताद्विराजन्त इति ॥

अथ व्रजराजस्तत्पत्नी च मनसि चिन्तयति स्म ।—

हन्त ! किं तस्य जगत्प्रशंस्यं मुखारविन्दं तमनुविन्दमानं तं दारकमपि वारमेकं पश्यामेति ॥

स्पष्टं च श्रीव्रजराज उवाच ।—

तदागमनानन्तरं किन्तरां जातं ? ।

दूतावूचतुः ।—

सर्व्वत एवाखर्व्वं पर्व्वजातं। यत्र दिनसप्तकं यावद्बालकालोककानां लोकानां यात्राच्छिद्रमात्राय न जाता। यत एवावयोर्विलम्बसम्वलनं वभूव। तदनन्तरमेवानुज्ञापनायामावामन्तरमवापाव ॥

व्रजराज उवाच ।—

वालकस्य नाम किं नाम कृतं ?

दूतावूचतुः ।—

प्रद्युम्न इति ॥

सर्व्वेऽप्यूचुः ।—

निरुक्तसंयुक्ततावगत्या युक्तमेव च तन्नाम । यतः प्रकृष्टधनलाभमेव तस्मात्ते मेनिरे ॥

दूतावूचतुः ।—

लोकास्तु कामं कामनामानि समस्तानि चामनन्तीति ॥

तदेवमुत्सुकतया सत्सु व्रजसत्सु पुनरन्यौ दूतौ तत्र सम्भूतौ । सम्भूय च तत्प्रणामादिपूर्व्वकं सुखसंयूयमानतया[1]वदतः स्म ॥

तत्रान्यदपि किमपि वर्य्यमाश्चर्य्यं जातं ॥

व्रजराज उवाच ।—कथयतं तत्किं तावत् ?

दूतावूचतुः ।—

यदर्थं श्रीमति कृष्णे सम्यगतृष्णोऽपि दुर्व्वादमाचर्य्य वहुभिः कदर्थनमाचर्य्यमाणमास्ते । तस्य खलु स्यमन्तकस्य केनचित्कृतं चौर्य्यमात्मचर्य्यया कमपि निजाचार्य्यं व्यञ्जयति स्म ॥

सर्व्वे प्रोचुः ।—

कस्तावदेवं महान् ?

---

(१) सम्मिश्रतया ।

दूतावूचतुः ।—

यस्तावद्भवतामाशीर्व्वादपात्रतया कृष्णामादाय गोकुलतः कृतयात्र आसीत् ॥

सर्व्वे सोत्प्रासं प्रोचुः ।—

कथं कथमिति कथ्यतां ?॥ दूतावूचतुः ।—

स यदा मणिमादाय शिवसम्प्रदायमनु स्वं विधाय कृष्णादात्मानं पिधाय काशीमृच्छन्नासीत् तदा तच्चिन्तक(१)कृतावज्ञान्न काम्ययज्ञानेव निज-समज्ञा(२)हेतूंश्चकार ॥

यत्र दानपत्याख्ययाप्यात्मानं प्रत्याययामास ॥

सर्व्वे प्रोचुः ।—

युक्तमस्मन्नीलनिधिहरणं न तस्य भरणाय जातं तस्मात्तु तन्निधिहरणं निस्तरणाय भातं। युक्ततरं तु तेन पुण्यं पुण्यमात्मनि नैपुण्य-मावहतीति ॥

तत्रापर आह ।—

पूर्व्वं खल्वसौ तत्र पार्श्वग आसीत्। अधुना तु पार्श्वक(३)इति वर्गप्रथमतां प्रथितवानतस्तस्य प्रथिमा परं प्रथते ॥

---

(१) भक्त। (२) कीर्त्ति। (३) शठः।

अथ सभासत्सु हसत्सु व्रजराज उवाच ।—

ततस्ततः ? ॥ दूतावूचतुः ।—

पूर्व्वमेवापूर्व्वविद्यानुसारी दनुजारी रम्यातिशौर्य्यगत्या मत्या तदीयचौर्य्यं गोचर्य्यमाणं चकार । किन्तु स खलु सकामभक्त इति तत्कामपूरणासक्तस्तत्रोदासीन एवासीत् ॥

सम्प्रति तु पूतनादीनामपि पूततांविधायी सोऽयं सुखदायी कयापि क्रियया द्वारकायामुत्पातमुत्पाद्य तं चाक्रूरप्रवसनहेतुकं दूतमुखेन प्रतिपाद्य तस्य चाक्रूरतां व्यञ्जयितुं किल तं सकृतवर्म्माणं यदुसदः समानाय्य वाग्भिः सुसम्भाज्य पुण्यमाणचातुर्य्यतया तन्मुखमेव तस्य तदपहारं व्याहारयामास ॥ त एते मणिप्रसङ्गसङ्गजमत्कलङ्कसङ्करदुःखतः क्लेशं गता मदग्रजचरणाश्च मय्यकस्मान्महासम्पन्मयतया प्रभवन्तं भवन्तं श्रुतवत्यपि मणिमन्वेष्टुं सन्दिष्टमकुर्व्वति कोपवन्तः सन्ति । स्वयमहं तु तादृशसत्कर्म्मणि भवत्येव मणिः शर्म्मणे चक्लृप इति विभावयन्नातियत्नमाचरन्नस्मीति वचः प्रचारयामास च ॥

अथाक्रूरस्तदानीमपि तद्गोपनानुचिततया सङ्कुचितचित्तस्तद्विदं चिन्तयामास ॥

सोऽयं सम्प्रति मयि शर्म्मवानालोच्यते । सङ्कर्षणस्य न शङ्करता पर्य्यालोच्यते । तथा मम मर्म्म तु नर्म्मणामीभिः सभासद्भिरुद्भूतवर्म्म निर्म्मितमस्ति सम्प्रति चामीषामन्तःपटपुटितमपि रत्नसम्पुटं प्रति दृक्पातयत्नं प्रतीमः ॥

तस्मान्मणिव्यञ्जनापरमञ्जसा समञ्जसा जञ्जनीतीति ॥

स्पष्टं चाचष्ट । सत्राजित् खलु भवदपराधीति कथमवाधीभवितुमर्हति । ततः शतधन्वानं वा कथमन्यथा मन्वाना भवामः । अक्रूरकृतवर्म्माणावावां तु भवन्मायपारब्धविरुद्धकर्म्माणावपि लब्धधर्म्माणावधुना जानिष्वहि ॥

यतः कृपावता भवता तामपसार्य्याराद्दाकार्य्यावहे स्म । तत्र सोऽयं कृतवर्म्मा मत्पश्चाद्वर्त्तीति न पृथग्व्यरिवर्त्ति । सोऽहमपि भवन्निर्देशमुद्देशमुद्देशं तं देशमनु निवेशं कृतवान् ॥

अधुना तु भवन्निदेशं भवदभिनिवेशं च विदन्निदं करकलितं करवाणीति ॥

सर्व्वे व्रजसभासद ऊचुः ।—

तदिदं वचनमपि दुरूहरचनं भाति ॥ ततस्ततः ?

दूतावूचतुः ।—

तदेवं लज्जामिव सम्पुटकृतसज्जां मणिं व्यञ्जितवति तस्मिन् श्रीकृष्णमभिविश्वस्तिप्रशस्ता जय जय शब्दमविश्वस्तिविगतशस्तास्तु निःशब्द-(१) माचेरुः ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च धृतमणियोग्यतागर्व्वेषु सर्व्वेषु सत्यभामा-जाम्ववत्यपत्येषु तु तत्प्रत्यासन्नतया धृतप्रत्याशा-सातत्येषु श्रीकृष्णस्तु परमशुभवतस्तत्र भवत एव मणेरस्य धारणं साधारणमिति प्रोच्य सर्व्वा-नालोच्य निष्कल्कः श्वफल्कसूनव एव तं सस्मित-मर्पयामास ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ॥ ततश्च ।—

गले वहन्मणिमथ गान्दिनी-सुत-

स्तदर्च्चिषा दधदपि शुभ्रकान्तितां ।

---

(१) शब्दाभावं ।

मनोमिलन्मलिनदशातमश्छदा-

घटावृतः स्फुरति न स स्म सम्प्रति ॥

तदेवं बहुषु रहोवार्त्ताहर्त्तृषु गतागतं कर्त्तृषु कदाचित्कौचिदागत्य कथयतः स्म । पूर्व्वं रुक्मिणी-दाक्षिण्याल्लब्धायां रुक्मि-कन्यायां रुक्मवत्यां रौक्मिणेयाज्जातकः[1] सञ्जातः । स च केवलं तमसाविष्ट किन्तु सर्व्वेषां विशिष्टं सुखमपि ॥

व्रजराजः समुत्सुकमुवाच ।—

नाम किं नाम धृतं ? ॥

दूतावूचतुः ।—अनिरुद्ध इति ॥

व्रजराजः स्वगतमुवाच ।—

नूनं वैदुष्यं पुष्यन्मतमिदं वसुदेवस्य पर्य्यवस्यति। येन कृष्णस्य वासुदेवतां रामस्य च सङ्कर्षणतां ख्यापयित्वा प्रद्युम्नानिरुद्धाविति तौ विख्यापितौ। तथा प्रभावा एव त एत इति ॥

स्पष्टमुवाच ।—रूपं कीदृशं ॥ ?

दूतावूचतुः ।—पितृवदेव ॥

व्रजराजः सहासमुवाच ।—

तत्तत्सर्व्वं घटमानमपि जातं ॥

---

(१) बालकः ।

पुनः स्वगतमुवाच ।—

हन्त ! मनः ! कथमुन्मनस्तामाप्नोषि । पुत्रस्य दर्शनमेव तावत् कुत्र किमुत पौत्रप्रपौत्राणामिति ।

अथ समयान्तरदूत्यमनुभूत्यन्तरमानयध्वं ॥

यथा दूतावूचतुः ।—

प्रद्युम्न-पुत्राय रुक्मिणी-भ्रात्रा पुत्र-पुत्री दत्तेति ॥

व्रजराज उवाच ।—

भद्रं जातं यद्रुक्मिणा कृष्णे भद्रं मनः कृतं ॥

दूतावूचतुः ।—

नेयमपि तस्य भद्रता, किन्तु रुक्मिण्या एव भद्रङ्करणी युक्तिः ॥

व्रजराज उवाच ।—

भवतु यथाकथञ्चिद्भद्रमेव मृग्यते ॥

दूतावूचतुः ।—

स्वपक्षस्य तु भद्रमेव जातं ॥

व्रजराज उवाच ।—

सम्प्रति रुक्मी च स्वपक्ष एव ॥

दूतावूचतुः ।—

स्वपक्षो भवतु वा मा वा तस्य तु भद्रमेव जातं, किन्त्वमुत्र ॥

व्रजराजः सविचिकित्समुवाच ।—

अमुत्रेत्य मङ्गलमिव कथं सङ्गमयथः ॥

दूतावूचतुः ।—

सङ्गतमेव तत्कथं भङ्गमापयितास्वः ॥

व्रजराज उवाच ।—

यद्येवमपरस्परं परस्परसम्बन्धः सिद्धस्तथा वलभद्रश्च तत्र भद्रतया प्रतीतस्तर्हि तस्यामुत्र गतिः कुत्र जाता ॥

दूतौ विहस्योचतुः ।—

वलभद्रवलज्वलन एव ॥

व्रजराज उवाच ।—कथमिव ?

दूतावूचतुः ।—

गोपितकोपस्यापि तस्य तेनैव प्रकोपिततया ॥

व्रजराज उवाच ।—कथ्यतां ॥

दूतावूचतुः ।—

रुक्मि-नप्त्री-पाणिपीडनं नाम रुक्मिप्राणानां कालिङ्गदत्तानां च पीडनाय जातं । यतस्तत्र लिप्सितकालिरुक्मिकालिङ्गादिभिः कलितदम्भे द्यूतारम्भे वहूपहासितदूषितभद्रः स श्रीवलभद्रः प्रमाणीकृतस्वर्वाणीकतालध्वलस्तथा वलयाम्वभूव ॥

अथ स्व-सभासत्सु हसत्सु व्रजराज उवाच ।—

अत्र वत्सः किं विधित्सितवान् ? ॥

दूतावूचतुः ।—

रुक्मि-हन्तृ रुक्मि-स्वसुश्च स्नेहं[१] न दुःखं[२] कुष्णीता[३]दिति तूष्णीकामेव पुष्णाति स्मेति ॥

तदेवं समयान्तराणि गमयाञ्चक्राणेषु गोपगीर्व्वाणेषु पुनरप्यन्यावन्यावागत्य रुक्मिण्यादीनामपत्यमन्यदन्यद्वर्णयं चक्रतुः ॥

पूर्व्वपूर्व्वं तु पूर्व्वं पूर्व्वमपि तन्निवेदयामासतुः । किन्तु कथान्तरावेशेनैवावाभ्यां न कथितं ॥

श्रीव्रजभूभर्तृप्रभृतयस्तु लब्धसुखसम्भृतयस्तत्तच्छ्रवणमारभ्य विहितयत्नानि तेभ्यस्तदा तदा रत्नानि दत्तवन्तः किन्तु तत्तद्बालं प्रति तत्तद्द्वारापि न प्रत्तवन्तः । स्वेन सम्बन्धं गोपयितुं कलितयुक्तिजालेन श्रीगोपालेन लब्ध सम्बन्धं निर्व्वन्धं स्मरन्त इति ॥

अथानिरुद्धस्यान्तःपुरादेवान्तर्द्धानमवधार्य्य निदानमनवधार्य्य श्रीगोपराजादिषु मिथो दुःखसम्बादिषु कौचिद्दूतौ चिराय सम्भूतौ दृष्टौ पृष्टौ च

(१) कर्म्म ।　　(२) कर्त्तृ ।　　(३) कुहनिष्कर्षे ।

तावानिरुद्धस्यापि निरुद्धतां प्रोच्य च शोच्यतां विना तत्रोचतुः ।—

बाणस्योषाख्यकन्या स्वपनमनु ययौ
रौक्मिणेयाङ्गजातं
नाजानाज्जाग्रती तं पुनरविददसौ
चित्रिता(१)दात्मसख्या ।
योगिन्या चानयाजीहरत वरममुं
द्वारकायाः ससञ्ज्ञा-
त्वेतज्ज्ञात्वा स दैत्यः प्रधनमनु चिरा-
देनमुच्चैर्बबन्ध ॥
श्रुत्वा देवर्षिवर्यात्तदसुरविजयी
तत्पुरं शोणिताख्यं
गत्वासौ द्वादशाक्षौहिणिबलवलित-
स्तं स रुद्रं विजित्य ।
छित्वा तद्बाहु-सङ्घं परिवलितचतुः-
शेषमूषानिरुद्धा-
वानीयाथ स्व-पुर्यां परिणयमनयो-
र्निर्ममे शर्मशालि ॥

(१) चित्रलिखितात् ।

सर्व्वे व्रज-सभासद ऊचुः ।—

चित्रं चित्रं रुद्रमपि कथमुपद्रुतवान् तत्कथयतं ॥

दूतावूचतुः ॥ तत्र चादौ ।—

विद्युत्वानद्य विद्युत्परिधिरुपसर-
　　त्यत्र विश्व-क्षयार्थं
किम्वा किम्वाभिचारज्वलनमधिवसन्
　　कज्जलस्तोम एषः ।
किम्वा कालाग्निरुद्रः प्रतिलवविसर-
　　ज्ज्वालमध्यस्थदेहः
पश्येत्याचष्ट कृष्णो द्विविजमणिरथे
　　लोकिते वाणलोकः ॥

यदाक्षौहिणीभिर्विक्षोभयन्नधोक्षजः सुदर्शनेन सुदर्शनेन नन्दकेन च नन्दकेन क्षतजपुरं क्षतज-पुरं चकार तदा वाणा इव वाणाः सर्व्वस्यापि भीमं भीमं(१) पुरस्कृत्य तद्गणैः पशुभिः स्वगणैश्च पशु-भिरिव सङ्कुतः कृतरभसं निर्ज्जगाम ॥

व्रजराज उवाच ।—

शङ्करस्य कथमत्राशङ्करता जाता ? ॥

---

(१) रुद्रं ।

दूतावूचतुः ।—

पुत्रायमाणस्य वाणस्यापत्तूणाय । स्मरसम्बन्ध-स्मरणातः पुनरात्मनः स्मरहरताग्रहणाय चेति प्रेक्षावतामुत्प्रेक्षामात्रं । तत्त्वं तु स्वयमेव वक्ष्यति ॥

सर्व्वे ससम्भ्रमं पप्रच्छुः ।—ततः किं जातं ? ॥

दूतावूचतुः ।—

ततश्च कृष्णामनु कृष्णलोहितः[1] संयुगं युगल-तया युयोज । स्मरमनु च स्मरहरपुत्र[2]वर इत्यादिनि स्थिते जगति तु दुःस्थिते ब्रह्मादयः सदयतया शान्तिब्रह्माधीयानाः समधिगतसम्भ्रम-तया सायासभ्रममभ्रमभितस्थुः ॥

अथ सर्व्वभूतप्रमथनभूतभूतप्रथमादितदुर्गणे दुर्गणे[3] रचितावरणतया सर्व्वेषां लोमहर्षणे जाते युधि जातेच्छः स महेच्छः शार्ङ्गसङ्गतशरैः कृतया धृतप्रत्यङ्गच्छिन्नताभिन्नतया तत्र सुष्ठु दुर्गणतामासादयामास ॥

ततश्च जटाघटासङ्घट्टनभवललाटवाटदृग्विभा-वसु[4] ज्वालवात्या-पांशुचक्रवालद्रवादुपद्रावणाय

(१) रुद्रः । (२) कार्त्तिकेय । (३) खल् ।
(४ अग्नि ।

श्यामतारामस्निग्धधामघामलसितवामस्मितामृत-
वर्षादन्तर्वहिरपि द्रावणाया च यथास्वं निदाघमेघा-
गमयोरिव तयोर्युद्धमुद्बुद्धं ॥

यत्र च हरः सर्व्वं संहरन्निव स्वयमस्त्राणि मुमोच ।—
सर्व्वं पालयन्निव तु तत्प्रत्यस्त्राणि हरिः ॥

यथा ।—

वायव्ये पार्व्वतं स व्यकिरदघरिपुर्भर्गमुक्तेऽस्त्रमस्त्रे
वाह्ने पार्जन्यमन्यत्र च वहुनि वहुब्राह्म उच्चैस्तदेव ।
सर्व्वध्वंसाय रौद्रे तदमितशभनं[१] स्वीयमित्येवमुच्चै-
स्तं शश्वल्लज्जयित्वामुचदचिरतदु-
ज्जृम्भणां जृम्भणाख्यं ॥

व्रजराजः साश्चर्य्यमुवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

निर्जिते तु तदा रुद्रे तद्भटानार्द्दयद्धरिः ।
हस्तियूथपतौ यद्वदर्द्दयेत्कलभादिकान् ॥
आमुक्ता[२] वारवाणेना[३] प्यमुक्ता वाणवृष्टिभिः ।
शिरस्त्रेण समेताश्च प्राप्नुवन्न शिरस्त्रतां[४] ॥

---

(१) अमितसंख्या । (२) अपिनद्धाः बद्धाः ।
(३) कवचेन । (४) शिरोरक्षकत्तां ।

सन्नद्धा[१]स्तत्र नद्धास्ते दंशिता दंशिताः शरैः ।
अभिकाङ्क्ष[२]युजस्त्वन्ये छिन्नाङ्गत्वमुपागताः ॥

अत्र कावचिका[३]न्यासन्नन्येभ्यः प्रागमृतिं प्रति ।
कृष्णादीनां यतः पूर्व्वत्रैव ग्रहिलता मता ॥

तेषां च कृष्णादीनां ॥

अपराद्धपृषत्का ये ये चासन् कृतहस्तकाः ।
ते सर्व्वे तुलनां याता यतः शत्रुषु सान्द्रता ॥

प्रद्युम्नमागतः पूर्व्वं शिखी[४] सशिखिवाहनः ।
मेघं मत्वेव तद्वाणं त्विरम्मदमपद्रुतः ॥

कुम्भाण्डः कूपकर्णश्च यथार्थाख्याविमौ मतौ ।
मुसलेन बलस्तत्तदङ्गं तत्रान्यथा व्यधात् ॥

इति द्रुते निखिलचमूपतिव्रजे
बलेः सुतः स सपदि सात्यकिं जहत् ।
हरिं द्रवन् भुजशतपञ्चके धनूं-
ष्यधात्तथा द्विगुणतयामितानिषून् ॥

चापं विना चेदिषवो द्रवन्त्यमी
तदा सहस्रं घटनाय शक्यते ।

---

(१) सकवचाः । (२) कटित्राणार्थकवचभेद ।
(३) कावचिकानां गणाः । (४) मयूरः ।

तन्नेति किम्वार्द्धसहस्रपाणिभि-
र्द्दध्रे[१] परैर्व्वाणक एष तान् द्विशः ॥

प्रत्येकं करमनु चेद्विशः पृषत्कान्
बाण ! त्वं दधिथ तथा भवन्तु चापाः ।
इत्येवं किल मुरजिच्छरैः प्रति स्वं
तावत्कान् व्यधित स तान् द्विधा विभिद्य ॥

यदा चापांश्छिन्नान् मुररिपुशरैः पश्यति पुरा ।
तदा सूतं साश्वं रथमपि तथा पश्यदभितः ॥

यदाद्राक्षीत्तद्दलितनुजनुस्तर्हि मुरजि-
द्दर-ध्वानाद्ध्वस्तः सपदि न ददर्श स्वमपि सः ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च यदा कोट्टवीत्वं[२] गता तद्गृहकोटरा-न्निर्गता कोटरानामदेवी स्वपुत्रायमाणं वाणं व्यवधाय पुरःसरतामवाप तदा हरिः स्वां दृष्टिं पिधाय परां हरितं पश्यति स्म ॥

अथ सर्व्वे व्रजस्थाः सहासमूचुः ।—

तदित्थमपि शिवस्य लज्जा परं सज्जायते स्म । भवतु तदुत्तरं किं जातं ? ॥

---

(१) चापमित्येव ।　(२) स्त्री नग्निका कोट्टवी स्यात् ।

दूतावूचतुः ।—

तदेतदन्तरमवाप्य बलिजन्माप्यन्तःपुरमन्वन्तरदधात् । तस्मिन्नन्तर्हितेऽपिहिते च सर्व्वस्मिन् भूतपतिहिते विहितसर्व्वज्वरः स्मरहरज्वरस्तु प्रादुरभूत् । प्रादुर्भूतं च तं त्रिशिरस्त्रिपाद्भूतं विलोक्य श्लोक्यचरितः प्रहसन् स हरिर्वैष्णवं ज्वरंससर्ज्ज(१) ससर्ज्ज(२) च तं प्रति । सृष्टश्चायं परमधृष्टं तं प्रति संससर्ज्ज ॥

यदा तु तेन संसृष्टकलेवरः स खलु माहेश्वरज्वरस्तदा भुवि दिवि च हासकोलाहलः सम्वलते स्म ॥

ज्वरोऽपि ज्वरितदशया चेष्टमानः कस्य नेष्टकुतुकाय स्यात् ॥

सर्व्वे सकौतुकमूचुः ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च स खलु ज्वरः सज्वरः सन् श्रीव्रजेश्वरकुलप्रवरमेव शरणमागतवान् । शरणागतिमात्रतस्तत्प्रसादमासद्य मुनिवद्गुणितामापद्य स्तुतवांश्च ॥

---

(१) जनयामास । (२) सृष्टवान् ।

स तु शुकोक्तिव्यक्तसुकोमलस्वभावः स्वभावकञ्जन इव तत्र भृशं प्रससाद । प्रसद्य च सद्यस्तं मुमोच ॥

स च प्रसादस्तस्य विधोरिव सर्व्वमाससाद ॥

यत इदं चोवाच ।—

"त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयं ।
यो नौ स्मरति सम्वादं तस्य त्वन्नो भवेद्भयं"॥ इति ॥

व्रजराज उवाच ।—

बाणस्ततः किमकरोद्धरो वा कथमासीत् ॥

दूतावूचतुः ।—

चिराल्लब्धजागरः स हरस्तत्तत्सर्व्वज्ञानधर इति शान्तिपर एवासीद्बाणस्तु गर्व्वमात्रपात्रं(१)विन्त्राणश्चक्रपाणिं प्रति रथेनाभिचारयज्ञदानव इव कृतप्रयाणस्तं बाणप्रधानशस्त्रविस्तृतिभिरास्तृतं कुर्व्वाणस्तच्चक्रेण निर्व्वाणबाहुहुतवहचक्रश्चक्रे । यदा च तस्य चत्वार एव बाहवः शिष्टास्तदा शिष्टानां वर्णनीः सर्व्वज्ञः स तु भर्गः स्फुटमीश्वरोऽप्यनीश्वरः सन्नुग्रोऽप्यनुग्रतया निजाशिवतां पुरस्कु-

(१) मन्त्रिणां ।

ऽर्व्वन्नेव च स्वयं सङ्क्रम्य कपर्द(१)मात्रं यन्निजधनं तद्विसर्ग(२)मपि तस्मिन् कुर्व्वन्निव प्रणम्य निरर्गल-भक्त्या तुष्टाव । तुष्टावस्य पुष्टायां तु विज्ञापयामास ॥

सोऽयं मद्वरगर्व्ववान् मम विभुं त्वामप्यमंस्तान्यथे-त्यात्मानं विजितं त्वयावगमयन्नेतं तथाबोधयं । तस्मादस्म्यपराधवीजमहमित्यस्मिन् मयि क्षम्यतां मूर्खोऽप्येष उपेक्ष्यतां यदियमप्यज्ञाद्भिदा धीमति ॥

नृत्यं मे कुर्व्वतः सोऽयं त्वय्याविष्टस्य तुष्टये ।
विधत्ते दोःसहस्रेण वाद्यानां शत-पञ्चकं ॥
मयायं न परं स्वीयभक्तबुद्ध्यानुगृह्यते ।
प्रह्लादान्वयदृष्ट्या च प्रह्लादो हि तव प्रियः ॥

श्रीकृष्ण उवाच ।—

आत्थ त्वं भगवन् ! यद्वत्तथा व्यवसितं मम ।
तदेवमावयोरैक्ये ज्ञापकज्ञाप्यता कुतः ॥
गर्व्वस्य खर्व्वतार्थं तु पूर्व्वं कुर्व्वे स्म दोश्छिदां ।
चत्वारोऽस्य भुजाः शिष्टाः शिष्टाः स्युः सेवया तव

॥ इति ॥

---

(१) श्लेषे वराटिका । (२) दानं ।

तदेवं शङ्करस्यापि भद्रङ्करः स तव नन्दनः
स्वेषामानन्दनतां विन्दति स्म ॥

अथोषया सममनिरुद्धमानयन्
निजं पुरं विवहनमावहन्तयोः ।
तदा तु नौ हरिरवधाय सान्त्वयन्
भवत्पदाम्बुज-युगमन्ववापतत् ॥

सान्त्वनं यथा ।—

पुत्राः पौत्राश्च मे स्युः स्फुटमिह मम नै-
वान्तरीणोऽभिमानः
किन्तु प्राग्येन गोष्ठान्निरगममधुना-
प्यस्मि तत्राभिमाने ।
तत्स्वानां भाववद्धः स कथमितरकं
शक्नुयां भावमेतं
ताद्दङ्मूर्त्यादिकं मे वहिरपि सुतरां
दृश्यतामत्रसाक्षि ॥
तातं प्रत्येवमुक्तं मम यदिदमहं
वन्धुतां नन्दयित्वा
ज्ञातीनां वः समीक्षां परमफलतया
तत्र नित्यं करिष्ये ।

त(१)त्सम्पत्त्यर्थमेव व्यवहृतिममुकां

तत्र विघ्नायमान-

स्वर्व्वासिद्विड्विघातप्रभृतिमथ जवात्

सुष्ठु कुर्व्वन्निहास्मि ॥ इति ॥

तदेवमनवद्य दूतवद्य(२)मनूद्य मधुकण्ठः समापन-माह स्म ।—

"आयास्यामी"ति यत्प्रोक्तं हरिणा तत्कपागतं ।
सभागतं तु गोपेश ! पश्य तं सुतमात्मनः ॥इति॥

अत्र व्रजवन्दिनोऽप्यनन्दन्त ।—

अनिरुद्धवन्धविषयानुसन्ध ! गतवाणधाम ! वित-तात्मधाम ! हरवद्धयुद्धयशसातिशुद्ध ! ततशस्त्र-जाल ! भटवृन्दकाल ! भवजृम्भकास्त्रजितलोक-शास्त्र ! मुहुरुग्रवाणजितजैत्रवाण ! युधि मध्य-यातृवलिपुत्र-मातृ-निभकोटराङ्गकलनातिसाङ्ग ! पारिजातलज्ज ! विमुखत्वसज्ज ! रचितज्वरान्तर-परज्वरान्त ! कृततत्प्रसाद ! पृथुकीर्त्तिवाद पुन-रागतस्य वलिदुःसुतस्य भुजवृन्दलावविलित-प्रभाव ! शिवसूक्ततुष्ट ! कृपयाभिजुष्ट ! भवपा-

(१) वार्ताव्याकरणा —(२) बन्धनं ।

सुतजानिरुद्ध ! परिमोक्षदक्षसुखितस्वपक्ष ! सत्वधूक-मेवमनिरुद्धदेवमुपनीय गेहमतिमानुषेह ! पुनरात्म-गोष्ठमितवेणुकोष्ठ ! परिपूर्य्य सर्व्वमकृथाः सपर्व्व ! जय गोपराजकुलजाधिराज ! । वीर ! इति ॥

अथ रजन्यामपि मधुकण्ठः पूर्व्ववच्छ्रीराधि-कादिकाराधनप्रथने कथने सुवलपत्रान्तःकान्तकृत-सान्त्वनामन्त्रं पत्रं यथा ।—

प्रारब्धं यत्पुरा कर्म्म वन्धुरक्षादिलक्षणं ।
तत्कृतं व्यसनं छिन्दन्नेष्याम्येवात्र वः शपे ॥इति॥

विशेषतः श्रीराधायामपि स्वस्तिमुखः सोयऽ-मस्ति स्म ।—

रामः क्लेशमरण्यजं सहितया निस्तीर्णवान् सीतया
शून्ये तत्र च रोदनं गतिमितस्तस्यां हृतायामपि ।
तामाप्तामसदुक्तिह्रीर्विजहदप्यर्च्चां श्रितस्तन्निभां
हा ! राधा वियुगप्यनिष्टसुखयुक्
कृष्णास्त्वहं दुःस्थितिः॥इति॥

अथ कथकेन समापनं ।—

पूर्व्वं यं शपथं कुर्व्वन् सान्त्वयामास वः प्रियः ।
तत्प्रतीय न वापूर्व्वं शङ्कध्वे कथमद्य च ॥

तदेवं कथां समाप्य गतयोस्तयोः सूत-सूतयोः श्रीराधा-कृष्णौ परस्परसतृष्णौ मदनकुञ्जसदनमेव रञ्जयामासतुः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु सवाणेश-
विजयनिर्देशमेकोनविंशं
पूरणम् ॥

विंशं पूरणम् ।

अथ प्रातः कथायां स्निग्धकण्ठः सम्यगुत्कण्ठतया श्रीमद्बलभद्रव्रजगमनप्रसङ्गमङ्गलं सङ्गमयितुं चेतसि चिन्तयामास ॥

श्रीमद्बलस्य व्रजं प्रति चलनाय निदानं खलु सादरं वादरायणिर्वदति स्म ।—

"बलभद्रः कुरुश्रेष्ठ ! भगवान् रथमास्थितः ।
सुहृद्दिदृक्षुरुत्कण्ठः प्रययौ नन्द-गोकुलं" ॥इति॥

तदेवमपि तत्र चात्र च यत्किञ्चन तेन विहितं तत्खलु निजानुजमन्त्रगत्या न तु स्वतन्त्रमत्या ।

यथा हरिवंशपारायणामनु वैशम्पायनः ।—

"कस्यचित्त्वथ कालस्य स्मृत्वा गोपेषु सौहृदं ।
जगामैको व्रजे रामः कृष्णस्यानुमते स्थितः" ॥
इति ॥

तदेवमेव कथयिष्यामीति ॥

अथ स्पष्टमेव श्रीव्रजराजयुवराजादीनुत्कण्ठयन्नुवाच ।—

यथा व्रज-कृष्णयोः परस्परसन्देशमयी सतृष्णता वर्णिता तथा व्रज-रामयोरपि तदा तदा निर्व्वर्ण्या।

तदा तदा च रामः कृष्णं प्रति सनिह्नवमह्नाय व्रजगमनाय सम्यगाग्रहन्नासीत्। कृष्णश्चाद्य श्वः प्रस्थास्यावहे इति तं स्वस्थयामास ॥

अथ कदाचिदुत्कण्ठात्राष्पकुण्ठकण्ठतया बलस्तं प्रति गुप्तमाललाप ॥

इच्छामनयोः पित्रो,

रच्छन् सकृदपि न यासि तद्गोष्ठं

दहसि तयोः पुनरन्त-

र्जाने न तवेदमीहितं किमपि ॥

किम्वा प्रस्मृतमेव तत्रत्यं सर्व्वमिति ॥

श्रीकृष्ण उवाच।—

हन्त! हन्त! निरन्तरमन्तरितं(१) कथमन्तरितं करवाणि ॥

किन्तु पित्रोरनयोरिच्छाभङ्गः खलु न मङ्गलाय स्यादिति तयोः पित्रोरिच्छा। अनयोस्तु मम तत्र गमने सर्व्वथा नेच्छा। तस्मादहमप्युभयथा-

---

(१) अन्तः प्राप्तं।

मिच्छा भङ्गभयान्न तत्र गच्छामि दुःखं चापच्छामी[1]ति समयं प्रतीच्छन्नस्मि ॥

तद्यदि भवाननयोः समञ्जसतामश्नाति तदा-ञ्जसा व्रजव्रजनमेव रञ्जयिष्यामीति ॥

अथ रामस्तौ पितरौ स्वस्य कृष्णस्य च व्रजा-गमनाय दत्ताज्ञावितरौ चिकीर्षन्ननुजं प्रति न तदनुज्ञां प्रापदिति परमापदं भावयित्वा स्वं प्रत्येव व्रजगमनानुज्ञां कथमपि यापयित्वा तौ प्रति सरोषं दोषमुद्भावयन् विज्ञापयामास ॥

पितरावावयोर्भेदः कोऽयं वा कृष्ण-रामयोः ।
अहं चात्मज एव स्यां श्रीमन्नन्द-यशोदयोः॥इति॥

अथ भ्रातरमपि विज्ञापयामास ।—

भवदनुरोधेनाहं पदयोः प्रतिरोधेनेव चिरं व्रज-गमनान्निरुद्ध एवासं । पितरौ च भवन्तं प्रति नानुज्ञापरौ दृश्येते । तस्मान्मामेव केवलं भवान् व्रजभवान् द्रष्टुमनुमनुतामिति ॥

श्रीकृष्णस्तु श्रीरोहिण्यनुज्ञापनयापि तद्विशिष्य तमाश्लिष्य द्विष्यमाणनिजचरित्रः पित्राद्यनुस्मृति-मुखविचित्रदुःखतया निवेदयामास ॥

---

(१) आददे ।

तत्र च प्रथमं साहचर्य्यमयचर्य्याशीलायां गोचारणलीलाया "महो अमी देववरामरार्चित" मित्येतत्प्रकरणगत "गोप्योऽन्तरेण भुजयोरपि यत्-स्पृहा श्री" रिति स्वनिर्म्मितनर्म्मवचन-रीतिं तथा लोकशास्त्रावलोकतः स्खलितक्रीडायां शङ्खचूडवधा-वधिकहोरिकाक्रीडायां ।—

"कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ।
विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां" ॥

इतिगाननर्म्मविलोकनशर्म्ममात्रतत्पर्व्वस्थिति-मप्युपलक्ष्य निरन्तराय कार्य्यान्तराय सार्द्ध ममुन सख्यमयहार्द्दं स्मारयामास ॥

तदनन्तरमेव विवक्षितं प्रकाशयामास ॥

यथा ।—

मयि विधेरधुना प्रतिकूलता
व्रजमथ व्रज तत्पुरतः स्वयं ।
अनयदग्रजता तव मां व्रजं
त्वरितमग्रगता(१)प्युपनेष्यति ॥
यदपि सान्त्वितवानहमुद्धव-
प्रमुखदूत-मुखात्तदपि स्वयं ।

---

(१) गामित्वं ।

मधुरमादिशतां स भवान् व्रजं
मदपि[२] तत्र सदापि हि रज्यति ॥
तदपि चेन्न भवेत्परिसान्त्वनं
मम समागमनं शपथैर्वद ।
विकलताथ तथापि यदीक्ष्यते
निजबलेन मम स्फुरणां कुरु ॥
यदि च सिद्धिमितं तदिदं तदा
मम निवेदनयापरमाचर ।
स्वयमुरीकुरु ताः स्वकृते तु या
निजकुमारदशावशता गताः ॥
अथ मयापि तदीयसमाह्वया-
दभिहिताः कुतुकात्तव शारिवाः[२] ।
उरसि गोप्य इति स्फुटहारिका-
महसि ताश्च भवद्दृशि शर्म्मदाः ॥
अपि नवं प्रणयं मुहुराश्रिता
निजमभीष्टमयुर्न तु कर्ह्यपि ।
सततमव्रजकेलिसुखाचिता
न हृदि जन्म यतः परमण्वपि ॥

---

(१) मत्तोऽपि ।　　(२) गोपी श्यामा शारिवा स्यात् ।

युग्मकं ॥

कथमहो व्रजवासिनि सज्जने
तव वियोगद्रुते परिपश्यति ।
इदमहं तनुयामिति मा वद
स्वयमसावपि तत्स्फुटमीहिता ॥

किन्तु तावत्तत्र ता[१]स्तत्र भवत्कृपणीयासु कासुचिदपि तासु[२] स्वयं स्थापनीया यावन्मया सह सन्ततव्रजवासाय गन्तव्यं स्यात् । सर्व्वमप्येतत्खलु खलानां वञ्चनाय गुप्ततया पर्य्युप्तं विधेयं ।

तच्च परालक्षितताकृते स्वयमेकरथितया पथि परमद्भुतगमनात्तत्र च गत्वा गोपतया सदेशरूपवन्यवेशनियमनात्परं सेत्स्यतीति ॥

तदेवं प्रोच्य स्वीयं गमनमनुशोच्य दूरानुव्रजनेन तमभिरोच्य स्वयं सास्रं केशवः स्वाश्रयं विवेश ॥

अथ वलदेवः पुनरतिरथगतितूर्णतया नीयमानः पथिकैः पूर्णमपरिचीयमानः श्रीमदुपव्रजसदनमाससाद ॥

आसद्य च सद्यस्तद्भावावेशसदेशरूपतया गोपनानुरूपतया च गोपरूपमेव सेवते स्म ॥

(३) स्वप्रेयसीः ।
(४) मत्प्रेयसीः स्वातिवाच्ये स्वज्ञायतास्वाति ।

यथोक्तं हरिवंशे ।—

"स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्व्वजः ।
वन्येन रमणीयेन वेशेनालङ्कृतः प्रभुः" ॥इति॥

अथ तथा तस्मिन्नागच्छति चाच्छ[१]सङ्गता ये व्रजगतास्तेषां तदङ्कपाल्या हर्षस्तदनुजस्य पश्चाद्भाविताशङ्कया तर्षस्तदलाभेन घर्षश्च जात इति तदुट्टङ्कयतः स्फुटति ममवुक्क[२]ति तदर्थतत्प्रश्नादि-विस्तारणाया कृतं ॥

अथ तदवबुध्य सुध्यग्रणीर्दूरत एव सूरततया व्रजराजादीनधिकृत्य केवलं निजागमनमधिगमयामास । तदधिगतवन्तश्च ते सन्तस्तन्मात्रेणापि सन्ततसुखमनसस्तं सन्ततिदारादिभिराराद भिव्रज्य प्रसज्य च हृदि सरसतासमुत्कर्षेण वहिर्वाष्पवर्षेण च जलधरवदेव हलधरदेवधरणीधरमार्द्रयामासुः ॥

स च स्नेहातिशयी तथा[३]कथाविषयी वभूव । यथा सर्व्वमद्यापि तत्कीर्त्तिनद्याः पद्यायमानं[४] वर्व्वर्त्ति ॥

---

(१) गतिसंज्ञोऽयं । अच्छेत्याभिमुख्ये, आभीक्ष्णये वा ।
(२) अग्रमांसं ।　(३) आर्द्रयामासेत्यर्थः ।
(४) वरमाथमानं ।

तदेवं क्षणाकतिपये लब्धव्यत्यये पुरोहितादिकृत-सान्त्वनामये तस्मिन् समये सुतानां समयं(१) समय(२)न्नुत्थाय सर्व्वाशीरुत्थाय(३) तेभ्यो निज-नाम्नाऽनुजनाम्नाचाम्नातं समनस्कारं(४) नमस्कारं चरीकरीति स्म ॥

ते चाभिवदन्तस्तस्य पथि प्रथितं श्रमं चरी-कीरति स्म ॥

तत्र पितरौ तु ।—

अनुजमनु सदास्मान् पाहि दाशार्ह ! विष्वग
जगदपि विभवेन प्रापयन् शर्म्म-जातं ।
इति सरुदितिवाचा बाष्पभाजा तमेतं
स्नपितमिव सुधानां धारया चक्रतुस्तौ ॥

व्यवाहरद्गुरुषु यथा वलस्तथा
वले मुदा लघुवयसः समाचरन् ।
समाश्च ये किल वयसा तदा च ते
मिथो ऽमुना व्यवहृतिसाम्यमाहरन् ॥

तत्र च ।—

यदा स्वनाम्ना नमनाद्यमाचर-
द्वलस्तदा ते विविदुस्तमेव तं ।

---

(१) आचारं । (२) सङ्गच्छन् ।
(३) सर्व्वाशिषामुत्थानाय । (४) चित्ताभोगो मनस्कारः ।

कृष्णाख्यया यर्हि तदाऽमुमप्यमू-
दृशं विदन्तः सुखसम्भ्रमं ययुः ॥

अथ गृहमानीय सुरभिपानीयमुखनीयमानं सुखं प्रणीय क्रमशः क्लमशमनाय स्नपनप्सापनादिकमापयामासुः। तत एकान्ते निशान्ते क्षणं विश्रम्य समुन्नते[१]तु तस्मिन्नन्तःपुर्यां गते श्रीव्रजेश्वर्यादयः पुनः सभायां सङ्गते व्रजेश्वरादयस्तत्तत्कुशलप्रश्नमुदस्त्रं विश्रावयामासुः ॥

तत्र व्रजेश्वरी यथा ।—

किं ते माता वलकुशलतां धारयन्ती समन्ता-
त्त्वां त्वत्प्राणानुजमपि सदा लालयन्ती विभाति ।
हन्त ! त्वं चेन्मम सविधतां यासि तस्याः पुनः स
स्वैरं तर्ह्यप्यनुभवसुखं वां[२] समक्षं लभेय ॥

इत्यादि ॥

अत्र तस्योत्तरं ।—

मातस्त्वं चेन्मम सविधता मेषि किं मे जनन्या
मातस्त्वञ्चेन्मम सविधतां नैषि किं मे जनन्या ।
त्वा[३]मानेतुं सततमनुजं कालयापं वितन्व-
न्नस्मि च्छिद्रं लवमपि भजन्नाययावेव तेन ॥

(१) उत्थिते ।　(२) युवयोः ।　(३) प्रति ।

अथ श्रीव्रजेश्वरो यथा ।—

अद्यापि वत्स ! रिपवः कति सन्ति घात्या
यद्घातनाद्यदुगणाः सुखमाव्रजन्ति ।
तेऽमी वयं च युगपन्मिलितौ व्रजे वां
प्राग्वन्निरीक्ष्य नितरां मृतिमुत्तरामः ॥

अथ तस्योत्तरं ।—

कंसादिभूमितनयावधि वीरवर्य्यान्
हन्ति स्म यस्तमनु के विभवन्ति शिष्टाः ।
कारूष-चेदिपति-पुण्ड्रक-काशिराज-
साल्वा जरासुतमुखाद्विविदान्तदुष्टाः ॥इत्यादि॥

तदेवं सुखदुःखप्रथाभिर्बह्वीभिः कथाभिरहोरात्रेऽतिवाहिते व्रजहितेप्सुरसावतिस्पृहया गृहं गृहं पृथगपि तत्तन्मिलनाय परेद्यवि बभ्राम ॥

तत्र तु ।—

गुरून् गुरुस्त्रीश्च लघून् सखींश्च
मीलन् पुरावत् कुशलाद्यपृच्छत् ।
बलस्तथा तं प्रति तेऽप्यपृच्छन्
सतां मतिः स्यान्निज(१)मेकरूपा ॥

(१) निजं नित्ये स्वके त्रिषु ।

वलस्तदाऽमून् कलयन् व्रजस्थान्
कृष्णार्थमन्तःक्षपितात्मभोगान् ।
वहिः परं तत्परितोषहेतो-
र्गवादिपालानवहद्घनाश्रु ॥

यथा च स्वयमाह महामुनिः ।—

"विश्रान्तं सुखमासीनं पप्रच्छुः पर्य्युपागताः ।
पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा ॥
कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः" ॥इति॥

तत्र तस्मिन् पृच्छति गुरूणामुत्तरं यथा ।—

यत् कंसो निहतस्ततश्च सुहृदस्ते यद्विमुक्तास्तथा
सर्व्वेऽमी कुशलं वधत्यथ युवां दुर्गं यदेतैः श्रितौ ।
तस्मिन् यच्च सुतादिवैभवयुता यूयं रमध्वे वयं
तन्मात्रेण शुभं गताः किमुत व-
स्तत्र स्मृतिं सङ्गताः ॥

लघूनां यथा ।—

अद्य श्वः समियाद्भवद्युगलमित्येवं कृताशा वयं
हन्ताद्यावधि कालयापकृतिनः प्राणान् वहामश्चिरं ।
एवं तेऽङ्घ्रि-युगं विधृत्य वृणुमः सङ्कर्षण ! त्वं ततः
कृष्णं चानय न स्वयं च नितरां
याहि क्वचित् कर्हिचित् ॥

अथ सखीनां ।—

(१)त्वं कृष्णाश्च वल ! क्व चापि मिलथः

प्रत्येकमस्मासु किं

त्वेकान्ते न ततः सुखं प्रथमवत् क्रीडासु सज्जामहे ।
प्राणान् गाश्च परं गतागतदशामासादयामः स्वयं
श्रीमंस्तत्कुरु येन पूर्व्ववदमी जीवन्ति दीव्यन्ति च॥

अत्र च श्रीहरिवंशाद्विशेषो ज्ञेयः ।—

"तमूचुः स्थविरा गोपाः प्रियं मधुरभाषिणां ।
रामं रमयतां श्रेष्ठं प्रवासात्पुनरागतः"॥इत्यादौ॥

"स्वागतं ते महाभागा"इत्यारभ्य ॥

"दिष्टया ते निहता मल्लाः कंसश्च विनिपातितः ।
उग्रसेनोऽभिषिक्तश्च माहात्म्येनानुजेन वै ॥

समुद्रे च श्रुतोऽस्माभिस्तिमिना सह विग्रहः ।
गोमन्ते च श्रुतोऽस्माभिः क्षत्रियैः सह विग्रहः" ॥

इत्यादिकं मध्ये प्रोच्य प्रोक्तं ।—

"प्रत्युवाच ततो रामः सर्व्वांस्तानभितः स्थितान् ।
यादवेष्वपि सर्व्वेषु भवन्तो मम वान्धवाः"॥इत्यादि॥

अथ कथकः स्वान्तश्चिन्तयामास ॥

---

(१) स्फूर्त्तेः सत्यत्वमभिप्रेत्य वदति ।

अत्र प्रवासात्पुनरागतमित्यनेन श्रीरामस्य गोपग्रामस्य च तथा भानं सूचयित्वा श्रीकृष्णं प्रति तु कैमुत्यमेवानीतं । "यादवेष्वपि सर्व्वेष्विव" त्यादौ सप्तमीनिर्द्देशेन पुरुषेषु क्षत्रियः शूर इत्यत्र क्षत्रियेऽपि पुरुषत्ववत्तेष्वपि यादवता मता ।

भेदे तु माथुराः शौघ्नेभ्य आढ्यतरा इतिवत् पञ्चम्येव निर्द्दिश्येत ॥

तदेवमुपनन्दादय इव परे च केचन यदुवंशजा गम्यन्त इति ॥

अथ स्पष्टं चाचष्ट ।—

तदेवं तद्दिनार्द्धे गुरुलघुषु तादृशलघु[१]सम्भाषणाया सखिषु तु हास्यहस्तग्रहणाशस्ततया समाप्य श्रीव्रजेश्वर-सदनं प्राप्य भोजनादिपूर्व्वकं सभामवाप्य स्वानुज-विजयकथाभिः सभासत्सु मुदं निधाप्य तान् वहिरवहिः श्रीव्रजेश्वरीमप्यनुज्ञाप्य शयनलीलां शीलयामास ॥

किन्तु ।—

यद्यपि गोपालानां, वासे रामः पुनर्व्विचिक्रीड ।
तदपि स नान्तर्मुमुदे, कृष्णश्चक्षुर्हि तस्य तेषां च ॥

(१) इष्ट ।

प्रातः सायं परमिह, धेनुसमीक्षां समाचरद्रामः ।
न पुनरमूषां चारणा,मनुजविना भावनिर्व्विण्णाः ॥

कथान्तरं तु प्रातः कथयिष्याम इति स्निग्धकण्ठः समापनमाह स्म ॥

नात्मानं यो वलं मेने सर्व्वप्राणमिमं विना ।
सोऽयं तमेनमासज्य धिनुते त्वां व्रजेश्वर ! ॥इति॥

अथ श्रीराधामाधव-सदसि कथा ॥

यथा स्निग्धकण्ठ उवाच ।—

यदा यादवेन्द्रः स्व-व्रजं व्रजन्तं स्वाग्रजं प्रति स्व-प्रेयसीर्व्विना सर्व्वेषामेव व्रजजन्मनामिष्टं सान्त्वनमुपदिष्टवांस्तदा स खल्विदं सास्रमश्रावयत्। हन्त ! सन्ततं याः सन्तप्ततया लुप्तप्राणा इव श्रूयन्ते ताः प्रति कथमव्यथवन्न किञ्चित्प्रथयसीति ॥

अथ कञ्जाक्षः समन्दाक्षमुद्धवमुखमीक्षते स्म ॥

स तु चतुरः प्रोवाच ।—

मयेदं निवेदयितव्यमिति ॥

अथ निजगृहे यान्तं रोहिण्यङ्गजातमनुगत्य स्वगोकुलगत्यवसरलब्धयदुपत्याभिहितप्रतिपत्त्यनु-सारादमूषां तन्निजप्रेयसीरूपतादिकं निरूपयामास।

तस्मान्निवृत्त्य च स्वप्रभुं निवेदयामास ।—

श्रीमान् सङ्कर्षणः खलु गत्वा तासामुन्माद-धर्षं द्रक्ष्यत्येवेति मया तत्र तत्त्वं सूचितमस्ति । यथा चायममूषां सान्त्वनाय सम्पत्स्यते तथा नान्य इति सन्देशहरतायां सदेशरूपः स एष एवेति ॥

अथ तच्छ्रीमुखगिरा स्वस्तिमुखं विलिख्य तस्मिन् समर्पितवता तेन मन्त्रिवरेण यथा समुप-दिष्टं तद्वदन्विष्टं विधाय तृतीयेऽह्नि स तत्प्रेयसीना-मेकीभावदेशमेव विवेश ॥

ततश्च ।—

बलमपि बत ! दृष्ट्वा मूर्ध्नि शाटीमकृष्ट्वा
हसितमयमिहाख्यन् यत्तु गोपालरामाः ।
अहह ! तमिममासां भावमुन्मादभाजां
मनसि विदधदुच्चैः प्राणघातं प्रयामि ॥

तत्र हासमेवमप्युत्प्रेक्षामहे ।—

सङ्कल्पं कृतवान् हरिर्व्रजमुपागन्तुं ततस्ता धृति-
प्रायां सोऽयमुपाव्रजेद्बलसखः
स्रा[१]गित्थमूहां गताः ।

(१) झटिति ।

प्रत्याजग्मुषि केवले वत ! वले तत्राहृतावप्यमू
र्दुःखेऽप्युद्धसितादसुव्यसनितां
स्त्वेषां तदासूसुचन् ॥ इति ॥

तथापि तासां तल्लालसा नालसा जातेति तेन समं सम्वादश्च सम्पन्नः ॥

तत्र लालसा निदानं यथा ।—

उद्धवः खलु विदूरसम्भव-
स्तस्य तत्त्वमपि नः स वेत्ति न ।
जन्मनाघजयिना सह स्थितिः
श्रीवलः पुनरवैति सर्व्वशः ॥इति॥

सम्वादे क्रमस्तु यथा ।—

यत्र[1]व्रजं परित्यज्य गोकुलकुलचन्द्रमसं रज्यमानमनसं सम्भाव्य सोत्प्रासस्मितं तावदाचक्षुः ॥

कच्चित् कृष्णः समन्तान्मुदमनुभवति
द्वारकायां स्वपुर्य्यां ॥ इति ॥

पुनः सहासमाचचक्षिरे ।—

चित्रं किं तत्र यस्मान्निखिलपुरजनी-
वल्लभः सैष[2] एकः ॥ इति ॥

---

(१) क्रमे । (२) सैष इति पादपूरणे ।

पुनः सपरामर्शमिव प्रोचुः ।—

पृच्छयं तावत्पुरस्तात्तदिदमहह ! नः
किन्तु वन्धूंस्तथा किं
तातं किं वा कदाचित् क्वचिदपि जननीं
किञ्चिदध्येति राम ! ॥ इति ॥

पुनः सनिर्व्वेदमूचुः ।—

वन्धूंस्तातं कदाचिद्यदि किल जननीं
स स्मरेद्वा न वेति
प्रत्याशायां विकल्पः स्फुरति ननु तदा
का वराकी स्मृतिर्नः ।
हा ! धिक् चित्तं पुरस्तात्तदपि च तदिदं
प्रष्टुमिच्छत्यवाधं
किं नः सेवानुचर्य्यातितिमहह ! महा-
वाहुरध्येतिपूर्व्वां ॥

इति तद्वाहुमाधुर्य्यस्मरणेन क्षणकतिपयं विमुह्य पुनरुह्यमानचेतनाः शनैरूचिरे ।—

प्रसूतातौ भ्रातॄनहह ! भगिनीर्यातृजमुखान्
गृहाध्यक्षान् हित्वा स्वमनुभजमाना न इह यः ॥
जहौ छिन्नप्रेमा तदपि हृदयं नस्तदनुगं
कथं तां तद्वाणीं प्रभुवरवराङ्गी न मनुतां ॥

तत्र काश्चिदाचक्षत ।—

अस्माकं चेदृशां स व्यरचयदमुकां
धिक् कथं तर्हि तस्य
श्रद्धन्ते वाचमुच्चैरनियतमनसस्तां पुरस्त्रीजनश्च ।

इतिवागसमाप्तावन्या भणन्ति स्म ।—

यश्चित्रां वेत्ति वाणीं कथयितुमतुलां
माधुरीं सन्दधान-
स्तस्मिन्नम्भोजनेत्रे स्मरवशगतया
का वशा वास्ति न स्त्री ॥इति॥

तदेवं सति ।—

या पश्चादाह सर्व्वाः स्वयमुपदिशती
हन्त ! साक्षेपमस्या(१)
वाणीं वाणायमानां हरिहरित(२)मिमां
प्रापयन्नास्मि मां धिक् ।
अस्माकं तत्कथाभिः किमिह सुकथनं
रुध्यतामन्तरा नः
कालश्चेत्तस्य यायात्कथमथ वत ! न-
स्तं विना यातु नेति ॥

---

(१) पश्चादुक्तवत्याः । (२) कृष्णादिशं ।

इति यदपि निजान्तर्दारुणीकृत्य तस्थु-
र्व्रजकुलमहिलास्ता हन्त ! वाढं तथापि ।
हसित-गमन-जल्प-प्रेक्षिताल्लिङ्गितानां
स्मरणमनु मुरारे रोरुदामासुराशु ॥

अथ सङ्कर्षणः परमकरुणाया लम्भितवेत्र इव बाष्पधाराभिररुणनेत्रः क्षणकतिपयं कर्त्तव्यमूढता-मूढवान् ॥

पुनश्च सवात्सल्यसम्बोधनमुद्रया तासां तत्त-न्निवेदनश्लाघया सानुतापतदागमनविलम्वकारण-नानोपद्रवसूचनया युष्माकमीदृशार्त्तिश्रवणेन स तु महान्तं मोहं प्राप्स्यतीति विभीषिकया च नानानुनयकोविदस्तदिदमुवाच ।—

युष्मासु वत्सलतयाहमिहास्मि वाल्यात्
कृष्णो यथा किल तथात्र करोमि सत्यं ।
हन्त ! स्नुषाहृदयमस्य(१)मम स्वहृद्भि-
रर्च्चिर्भिरुद्धततमैर्वत मास्म दाग्ध ॥

जानन्नेव निजानुजस्य हृदयं प्रत्याग्रजं श्रीव्रजं विद्वानेव च तत्प्रगाढमभितः सान्त्वेन युष्मान् ब्रुवे ।

(१) ममेत्यस्य विशेषणं ।

औदासीन्यमवेक्ष्यमस्य यदि वा तत्तन्न कर्त्तुं तदा ।
क्षन्ता स्यामथनालपेयमपि हृत्प्रीणीत तस्मिन्न मे ॥
भ्रातासौ मम वैरिणामपि गतिं
शुभ्रां ददाति स्वयं
सोऽयं हन्त ! परित्यजेदहह ! वः
प्रत्येमि नैतद्वचः ॥
या यूयं बत ! लोकधर्म्मपरतां तत्कामनादौज्झत
स्वैरं गेहमनूज्झ्य देहमपि हा !
द्रागुज्झितुं वाञ्छथ ॥
युष्माकं गुणतस्तथा परवशः कंसारिरास्ते यथा
मां ज्यायांसमपि प्रसत्तिविधये प्रास्थापयद्वः प्रति ।
सन्देशास्त इमे विभान्ति रचितास्तेन स्वयं यत्र वः
सौख्यं भावि तदस्तु तस्य भविता
सन्देष्टुरप्यागतिः ॥

अथात्र स्वस्तिमुखश्चायं सुखदो भविता ॥

यथा ।—

प्रस्थानावसरे यदेव बहुलं प्रस्थापितं वाचिकं
प्रत्यायातिमयं ततश्च्यववशात्प्राहैष मय्युद्धतं ।

हा ! धिक् तत्र च विघ्ननिघ्नदशयाशङ्की तु सङ्कर्षणं
सन्दिश्य प्रहिणोमि किन्तु मम धी-
युष्मद्धिया लज्जते ॥
आत्मानं यदि वा मृषा रचितवान्
धिक् किन्तरामुद्धवं
साधूनां परमं तथा विरचया-
म्यास्तां च तत्तद्धत ।
स्वज्यायांसमहो ! महामहिमयुग्
विख्यातिमेतं कथं
तादृक्षं रचयानि तेन दयिता मद्वाचिकं नान्यथा ॥
युष्मत्सन्निधिमावसामि यदहं तत्र प्रमाणं मिथः
स्फूर्त्तिः स्यादुभयत्र तर्ह्यपि न चेत्
पूर्त्तिर्द्वयानामपि ।
शैघ्र्यादुत्कमना निहत्य सुहृदां शत्रून् सतामप्यसौ
सप्ताष्टानवशिष्टतामिव गता-
नस्म्याव्रजन् गोव्रजं ॥इति ॥

एवमेवोक्तं श्रीविष्णुपुराणे ।—

"सन्देशैः साममधुरैः प्रेमगर्भैरगर्व्वितैः ।
रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः"
॥ इति ॥

श्रीभागवतेऽप्येतदेव संक्षिप्याह ।—

"सन्देशैर्हृदयङ्गमै"रिति ॥

तास्तु तदेवमाकर्ण्य तत्प्रभावेण मध्ये मध्ये लब्धमिव कृष्णां विर्वर्ण्य दिनान्तरे लज्जासज्जन्मानसा सज्जनीद्वारा तदिदं निवेदयामासुः ॥

तदा भवद्वचनं निजानुजानयनरचनं प्रतीमः ।

यदि भवन्निमित्तमद्यावधि रक्षितकौमारयोगाः सम्यगवधीरितभोगा रोगाक्तदेहा इव गेहान्तरेव वर्त्तमानाः काश्चिदस्मत्सङ्गिनीस्तन्वङ्गीरङ्गीकुरुथ । ताश्चास्माकं सन्निधावेव निधाय स्वानुजमानेतुं गच्छथेति ॥

अथ रामः साभ्युपगममाह स्म ।—

सम्प्रत्यकृत्यमपि तदिदं भवतीनां सान्त्वनं विदन्तः कथञ्चिदुपद्यपि करवाम । तथापि गुर्वनुज्ञामनुज्ञातुं कामयामहे ॥

तासु काश्चित्पुनश्च तथा निवेदयन्ति स्म ।—

गुरवश्च ते जातमस्माकमन्यत्र परिणायकलङ्कमपि शङ्कमानाः सम्प्रति नः कायवचोमनःसु कृष्णमात्रतृष्णानिर्बन्धमस्मदीहया सम्भाव्य

सीदन्मनसः सन्ति । तदर्थं तु सुतरामेव भवन्त-
मर्थयिष्यन्ते ॥

अथ तथानुमत्यमत्यतिशयवति तस्मिन् व्रजेश-
वासमासन्ने राधिकादिकास्तु काञ्चिदुत्तरसाधिका
विधाय तद्विधानाय श्रीव्रजपुरपुरन्ध्रीश्वरीमुरूकृत्य
गुरूनपि तदर्थमर्थयितुमनुवर्त्तयामासुः ॥

ते च कञ्चिद्द्वारीकृत्य तत्कृत्यं ययाचिरे ॥

अथ तत्र चाम्रेडितवशादसाविदं निवेदयामास ॥
यद्यपि सम्प्रति न साम्प्रतं तथापि यथाज्ञापरम-
मङ्गलाचरणानां श्रीचरणानां किन्तु भ्रातुरागमन-
पर्व्व यावन्न पर्व्वपूर्व्वकमङ्गीकुर्म्मः ॥

अथ तेऽपि परममानन्दं विन्दमानास्तदेवानुमु-
मुदिरे ॥

अथ रामश्च ताः सर्व्वा गान्धर्व्वविधिना सन्दधानः
श्रीमद्भाण्डीरवनखण्डमुत्तरेण वामे क्वचिदेकान्ता-
रामे स्वीचकार ॥

यत्र यमुनाख्या सा स्रवन्ती विदूरे स्रवन्ती सह-
स्रधा सिस्रावयिषता तेन जातधर्षा तस्य सन्नि-
कर्षाय कर्षमुवाह ॥

ततो व्रजतट-निकटं सङ्गतया तया व्रजजनश्च हर्षं वव्राज । कृष्यमाणा तु यमुना तं तुष्टावेति ॥

अथ स्निग्धकण्ठं प्रति कथायां सख्यः पप्रच्छुः ।—

यमुना खलु द्वारका-पतिं पतिमासाद्य द्वारकां गता । सेयं का ? ॥

स्निग्धकण्ठ उवाच ।—

संज्ञाया इव तस्याश्छाया पयोनिधिजाया तत्प्रतिनिधितया तत्प्रवाहमधितिष्ठति ॥

तथा चाकृष्टां यमुनां प्रति रामवचनं हरिवंशे ।—

"एष ते सुभ्रु ! सन्देशः कथितः सागराङ्गने !"

॥ इति ॥

अथ कथकः स्वमनस्येवं विविवेच ।—

तदिदं तावदस्तु । तदेवमेव । श्रीभागवतप्रस्तुतं वस्तुतत्त्वमजानन्नेकस्तु निर्व्विवेकगणः समनन्तरप्रस्तूयमानसमानशब्दमात्रतस्तयोर्भ्रात्रोर्गोष्ठगतकलत्राण्यभिन्नान्येव प्रलपिष्यति ॥

याः खलु श्रीकृष्णप्रेयस्यस्तादृगुन्मादवश्यतया भ्रश्यन्मतयोऽपि "क्वचिदास्त" इत्यनेन लब्धप्रामा-

ण्यात्रस्थेन श्रीभागवतस्थेन स्वीयवद्येन पद्येन श्रीकृष्णस्य सुखादेव तदीयहितवर्गसुखादेव च निजसुखं आवितवत्यः ॥

"याश्चापि वे"त्यर्द्धपद्येन स्वकर्त्तृकप्राक्तनतदीयसेवायास्तत्कर्त्तृकस्मरणमात्रेण कृतकृत्यतां विभावितवत्यः ॥

याश्च मातरमिति पद्येन सम्प्रति तदर्थं मात्रादिकमपि त्यक्ततया विख्यापितवत्यः ॥

तच्च स्वयं सर्व्वज्यायसे तस्मा एव तज्ज्यायसे निवेद्य स्वेषां तदेकनिष्ठतां प्रतिष्ठापितवत्यः ॥

याश्च "ता न" इति पद्यार्द्धेन स्वेषां तस्मिन् सौहृद्यमनुच्छिद्यमानं विज्ञापितवत्यः ॥

तत्र च कथं न्विति पद्यार्द्धेन स्वीयभावातिरेकस्य तदेकपरताकैमुत्याय स्त्र्यन्तरभावमपि प्रमापितवत्यः ॥

याश्च "कथं नु गृह्णन्ती"ति पद्यार्द्धान्तरेण तस्यानवस्थितमनस्तां कृतघातितावस्थामपि स्थापितां विधाय स्वेषां तदव्यभिचारिचरित्रतां निश्चितवत्यः ॥

तत्र च या गृह्णन्तीति पद्यार्द्धान्तरेण स्वेषां तदेकहृतचित्ततां सूचितवत्यः ॥

याश्च किं नस्तत्कथयेत्युक्तया महातद्विरहासहिष्णुतायुक्तया स्वमनः कठिनीकरणाय प्रवृत्तप्रायतया व्यवसितवत्यः ॥

ताः खल्विति प्रहसितमिति मुनीन्द्रवचनेन सर्व्वसुखरचनेन प्रत्युत तदीयस्नेहवारिधिमग्नतया जवाहूताङ्गतां गता इत्यवगतास्तस्मादन्यथा सम्भावनं यथा जातानां(१) मेव सम्भाव्यते ॥

तदेवं तासां तदेकपरताकुरुक्षेत्रयात्रायामपि सम्वदिष्यते। "गोप्यश्च कृष्णमुपलभ्य चिरादभीष्ट" मित्यारभ्य "आहुश्च ते नलिननाभ-पदारविन्द" मित्यन्तेन श्रीभगवदुद्धवसम्वादे च "रामेण सार्द्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ता" इत्यारभ्य "मत्कामा रमणं जार" मित्याद्यन्तेन ॥

किञ्च ।—

"सङ्कर्षणस्ताः कृष्णस्य सन्देशैर्हृदयङ्गमैः ।
सान्त्वयामास भगवान्नानानुनयकोविद" इत्यत्र

---

(१) मूर्खानां ।

तासां सान्त्वने कृष्णसन्देशानामेव साधकतमता मता ॥

यतस्तेषामेव हृदयङ्गमता सम्मता । "नानानुनयकोविद" इत्यस्य तदधिकारिविशेषणस्य तु गौणताभिमता । यत्र भगवानपि नानानुनयकोविदः सन्निति ततोऽपि भगवत्ताया गौणताधिगता ॥

तस्मादन्यथा कथामूर्खतामात्रमित्यभियुक्ता एवात्र प्रामाण्यपात्रं ॥

न च गोपीशब्दसाधारण्यादमूरन्यासु न गण्याः । "गोप्य आकर्ण्य मुदिता यशोदायाः सुतोद्भव"मिति "गोप्यः संस्पृष्टसलिला" इति तथात्र च परिष्वक्तश्चिरोत्कण्ठैर्गोपैर्गोपीभिरेव चे"त्यादिषु "नेमं विरिञ्चो न भव"इत्यादिषु च तन्मातृप्रभृतिष्वपि तच्छब्दः सर्व्वत्राप्यतिप्रसिद्धः । न चाव्यवहितपाठतया तावत् ता एवावगताः ॥

यतः ।—

"क्षेत्रज्ञ एता मनसो विभूती"रिति "क्षेत्रज्ञ आत्मा पुरुषः पुराण"इत्यादिषु लब्धानन्तर्य्यनिबन्धशालिषु पञ्चमस्कन्धप्रमुखवचनालिषु क्षेत्रज्ञादिशब्दानां क्रमतः पृथगात्मपरमात्मता व्याकृता ।

तथापि यदि द्वयोरपि भगवत्त्वान्न भेद इत्यस्मान्न दोष इतीदमन्ये मन्येरन् तर्हि द्वारकागततद्दारा अपि तद्दोषारोपास्पदानि जायेरन् ॥

सोऽयं श्रीबलदेवस्तु नतरामुज्ज्वलन्नतमां श्रीकृष्णवच्च तेषां सान्त्वनार्थमपि ब्रह्मत्वेनेश्वरत्वेन चाभेदवादः स्वस्य न तत्र समञ्जस इति मत्वा क्वचिदपि न स प्रत्याहृतः ॥

तदप्यस्तु, मासद्वयमजस्रमपराणामपि पर-दाराणां सहस्रसङ्ख्यया सह विहारः स खलु घस्रपतिजात-(१) स्रवन्ती कृषिपर्य्यन्तघृष्टिव्यवहारतः प्रसृतप्रचारः श्रीमन्नन्दाद्यानामानन्दनायागतस्य मन्दतां विन्दमानः कथमानन्दं दधीत ॥

तस्मात्कृतममर्य्यादा वारनार्य्याः स्रस्तरेण(२) विधादिकृततद्दुर्व्वादानुवादचर्य्या विस्तरेण ॥

अथ कथकः सभासुखप्रथकं समापनमाह ।—

आस्तां पूर्व्वकथा सेयमपूर्व्वा बत ! मृग्यतां ।
संयोगेऽपि वियोगाभप्रतीतिः पूतनारिपोः ॥

---

(१) यमुना । (२) आस्तरेण ।

तदेवमवधाने जाते जाते च सर्व्वसुखजाते सर्व्वस्मिन्नपि यथास्वमावासं याते श्रीकृष्णराधे च लब्धशाते मोहनमन्दिराय प्रयाते इति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु रामव्रजागम-
कामनापूरणं विंशं पूरणम् ॥

एकविंशं पूरणम् ।

अन्येद्युस्तु व्रजराज-सदसि व्रजयुवराजवदन-शशिमहसि मधुकण्ठ उवाच ।—

तदेवं मधुं माधवमपि व्रजवासमध्यवस्यतः पश्यतां शृण्वतां सुखं व्यस्यतस्तत्र व्रजेऽपि काम-पालतया सर्व्वपर्व्वारामस्य रामस्य द्वारकागमना-यानुज्ञापनायामनुज्ञायामपि प्रसङ्गसङ्गतायां पूर्व्व-पूर्व्ववद्दूतागतमाचरन्तु सन्देशं हरन्तु कौचिदा-जग्मतुरूचतुश्च ॥

तत्र पौण्ड्रकः खलु खलतामारभ्य द्रुतमसभ्यः काशीमण्डलाधिपेन सार्द्धं खण्डितताभवापेति ॥

अथ व्रजेश्वरादिषु लब्धसम्भ्रमादिषु राम उवाच ।—

कथ्यतां कथं कथमिति ॥

दूतावूचतुः ।—

भवत्यत्रागते कुमतेस्तस्य करूषाधिपतेः पुरुष-एकः सूत्तधर्म्मा सुधर्म्मासदसि सर्व्वयादवकृताप-

सदनश्रीकृष्णपदसीमनि निराकृति[१]रपि न निराकृतिं[२]लभेतेति विप्रतया दौवारिकानिवारितः समासदद्वदच्च ॥

अयमहमस्मि सर्व्ववेदाविदादिभिः कृतसेवेन प्रत्यगात्मना वासुदेवेन प्रस्थापित इति ॥

अथ सर्व्वे तमन्यादृशं परामृशन्तः सहासविस्मयमूचुः ।—

प्रतिकूलस्वभावतया तस्य प्रत्यगात्मता चेज्ज्ञातुं शक्यते परमात्मतया चेत् तर्हि कथं शक्यतां । तस्माद् विशद्यतां ॥

विप्रस्त्वन्तः सरोषमुवाच ।—

अहो ! तमपि न जानीथ यः सम्प्रति पौण्ड्रकतयावतीर्ण इति पण्डितैरुद्दण्डतया निर्णीतः ॥

रामः सारुणात्तहासमाह स्म ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च सभासद्विप्रा ऊचुः ।—

वाडव ! [३]ते वाढं साक्षादेव सुराचार्य्याः कथमन्यथा कथयेयुः ।

---

(१)अस्वाध्यायो निराकृतिः । स्वाध्यायरहितो द्विज इत्यर्थः ।

(२) निवारणं ।

(३) द्विज ! । श्लेषे अग्ने । द्विजात्यग्रजन्मभूदेववाडवाः ।

तत्र च ये दोषा[१]द्यन्ताभिनिर्म्मुक्ता[२]भ्युदितास्ते पुनः किमुत । यतः सर्व्वथा परिवेत्तार[३] एवेति ॥

श्रीकृष्णस्तु तं धृष्णजं विवदमानं विप्रं वचसा प्रणमन्नुवाच ।—

भवतु सन्दिष्टं विनिविष्टं क्रियतां ॥

विप्र उवाच ।—

सन्दिष्टमिति किमुच्यते श्रीभगवद्भिस्तैरिदमादिष्टं ।—

"वासुदेवोऽवतीर्णोऽहमेक एव न चापरः ।
भूतानामनुकम्पार्थं त्वन्तु मिथ्याभिधां त्यज ॥
यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत ! ।
त्यक्त्वैहि मां त्वं शरणं नोचेद्देहि ममाहवं" ॥इति॥

रामः सहस्तपेषं ग्रस्तमुवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च सर्व्व एवाखर्व्वमुग्रसेनाग्रगण्यस्ते तमुग्रम्पश्यतया पश्यन्तः साट्टहासभङ्गमङ्गं घट्टयामासुः ॥

श्रीकृष्णः पुनरिदमुवाच ।—

प्रागौत्पत्तिकीं वासुदेवतामापन्नः कथमहमपि तामभिधां दूरे ।विधातुं शक्नोमि ॥

अत्र तु केचिदिदं सोत्प्रासमूचुः ।—

क इदं विदन्तु । भवेदपि साम्प्रतं तस्या[1]पि तथात्व[2]मिति ॥

श्रीकृष्णस्तु तान् सप्रणयरोषं स्तम्भयन् सलज्ज-स्मितमासज्जतीं स्व-वाचं पूरयामास ॥

अये हासरसिकाः! परिहासस्त्यज्यतां। विप्रवर ! श्रूयतां । तस्य चिह्नानि तु तत्रानपह्नवतया वर्त्तन्त एव ॥

यदि च तदीयानि सहजानि कथञ्चिन्मया-पहृतानि तानि तु तस्य कृत्रिमाणि तदा पूर्व्वेषामपि कृत्रिमता प्रसज्येत ॥

भवत्वन्यथा वा तथापि तस्मिन् सत्यं प्रस्थापयानि तानि किन्तु स्वहस्तादेवार्पणेन । स तु साक्षाद्-भूय स्वयमेव तानीमानि सावधानतया गृह्णीया-दभिमुखगमनाय चागृह्णीयात् ॥

---

(१) पौण्ड्रकस्यापि ।　　(२) वसुदेवजातत्वं ।

यत्र भूमिलाभेन[१] क्षितिवर्द्धनभावेन चाश्वास-[२] वहमहानिद्रामप्यवाप्स्यतीति ॥

रामः सस्मितमुवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च दूतस्तद्वचनतेजसावगुण्ठिततया कुण्ठितः सन्निजोद्यममन्यथा मत्वा गत्वा च तत्तत् कथया पुण्ड्रकाधिपतिमपि म्लानतुण्डं चकार ॥

श्रीमान् कृष्णश्च कौतुकसतृष्णः काशीकरूषान्तरालं जगाम ॥

गते च तस्मिन् पुण्ड्रक-काशीमण्डलपती पञ्चभिरक्षौहिणीभिः कृतागती बभूवतुः ॥

राम उवाच ।—ततस्ततः ?

दूतावूचतुः ॥ ततश्च ।—

नटमिव निजतुल्यवेशलेशं
परिकलयन्नजितः स पुण्ड्रकं तं ।
हसितवशतयाऽवधानशून्यः
सममरिभिः समवारि शस्त्रवर्षैः ॥

अथ श्रीव्रजेश्वरे ततस्तत इति वक्तुं प्रवृत्तेऽप्यसमर्थे स्वयमेव दूतावूचतुः ।—

---

(१) भूमिलाभो निपातः स्यात् शवस्तु क्षितिवर्द्धन इति त्रिकाण्डशेषः । (२) श्लेषे अश्वास ।

अथार्द्धदेशमागतां सशस्त्रवृष्टिसंहतिं ।
निजायुधैः किरन्नरीनशेषकान् विकीर्णवान् ॥
खगा[१]इव गतावासन्नागतौ तु खगा[२]इव ।
खगाधिपतिपत्रस्य[३]खगा[४]श्चिक्रीडुरत्र ते ॥

ततश्च ।—

सैन्यस्थलं शात्रवमश्वकुञ्जर-
द्विपाद्वराणां प्रथमं गणैर्वृतं ।
अनन्तरं फेरव-गृध्र-वायस-
प्रेतादिकानां निकरैः पराचितं ॥

तदेवं तान्निहत्य व्रजपतिवंशपुण्ड्र[५]पुण्ड्रकराजाय सोल्लुण्ठतया शशंस ॥

अहं खलु त्रिलोक्या राज्ञस्तवाज्ञया शस्त्राणि समर्पयितुमागतवान् । तत्र मुधा व्यवधाकारिणस्तानिमांस्तिरोधापितवांस्तदधुना तानि सावधानतया गृहाणेति ॥

तदेवमुक्तवता पुनर्व्वाणान् प्रयुक्तवता तेन तैस्तस्य शताङ्गं सहस्राङ्गं चक्रे ॥

---

(१) सूर्य्या । शरार्कविहगाः खगाः ।　　(२) विहगाः ।
(३) तार्क्ष्यवाहनस्य ।　　(४) वाणाः ।
(५) तिलकं ।

यान्[१] प्रयुज्य च चक्रं विचकरे । येन[२] तस्य मस्तकमपि निरस्तमिति समस्तानां कौतुकं न्यस्तमासीत् । तर्हि लब्धविनाशीभवन् काशीपतिश्च कदात्मनः शिर उत्करितुं तेन पत्त्रिणो विकीर्णा इति न दृष्टिमपि वितीर्णां विधातुं सावसरतां ससार ॥

तत्सदनजनगणास्तु विकीर्णतया समागच्छदवतीर्णतां गच्छत्तच्छिरः प्रति नेत्रं विस्तीर्णवान् ॥

तद्यथा ।—

पुत्रैः पौत्रैः प्रपौत्रैर्दुहितृभिरनुजैः
स्त्रीभिरन्यैश्च यस्य
स्वर्गाद्वेतीदमङ्गं मम मम मम मे-[३]
त्युक्तमायाति यस्मिन् ।
काशीराजस्य तस्य प्रकटमसुरजि-
त्पत्त्रिविच्छिन्नमस्तं
सूस्तं निर्वर्ण्य तत्र पुनरखिलजना
मेनिरे वज्रमेव ॥

रामः सहासमुवाच ।—ततस्ततः ? ॥

---

(१) शरान् । (२) चक्रेण । (३) अङ्गारकि

दूतावूचतुः ।—

ततश्च श्रीमान् द्वारकाभर्त्ता द्वारकामेवाससार ॥

अथ दूतान्तरागमने दिनान्तरेऽपि तदेव प्रस्तुवन् ॥

राम उवाच ।—

साधिष्ठ(१)मेव साधितं यद्द्वावपि ताववधिषातां किन्तु; "अग्नेः शेषं व्याधिशेषं शत्रुशेषं न शेषयेत्"-इति नीत्या कथं तत्तदपत्यादयोऽपि प्राणैर्न त्याजिताः ॥

अथ दूतावूचतुः ।—

देव! तदेव श्रूयतां। घृणया तत्तद्वधार्थमतृष्णोऽपि श्रीकृष्णो काशीक्षितीश्वरस्य विश्वेश्वरस्य(२) च नश्वरधामता जाता ॥

तथा हि ।—

अथ सुदक्षिणाख्यः काशीराट्पुत्रश्च पितृवधमधः-कृतमुखतया वीक्ष्य पुनस्तया शिवमप्याराधयामास। प्रत्यक्षे तु तस्मिंस्त्र्यक्षे कञ्चाक्षं विपक्षं न ज्ञापयामास ॥

किन्तु कञ्चिद्विपक्षमात्रं। शिवस्तु तत्प्रस्तुतमवस्तु

---

(१) बाढतमं। (१) शिवस्य।

विज्ञाय तदवज्ञाय तस्मा इदं सर्व्वं तव भस्मायित-मिति सस्मितं व्यञ्जयन्नाह स्म ॥

ब्राह्मणपाशै[१]रपि सह परिचरितः स दक्षिणाग्निस्तव काङ्क्षितमाचरिष्यति । यद्यवज्ञ्चाय एव हन्यमानतया गण्यः स्यादिति ॥

अथ व्यञ्जना च तदीदृगासञ्जयामास ॥

ब्रह्मण्यदेवश्चेदसौ तदाग्निरेव ब्राह्मणपाशानपि तान्नाशाय सम्पादयिष्यतीति ॥

राम उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततः स तु मूढः स्फुटमूढहर्षस्तं ब्रह्मण्यदेवमप्यभिचरितुं दक्षिणाग्निं परिचरति स्म ॥

परिचरितश्चायं शुष्मा शुष्मा[२]तिशयवदूष्मा प्रकट-जटादिमुद्ररुद्रमूर्त्तितया शश्वदश्वयीत् ॥

तदनु च द्वारकादिशमनुद्रवन्नुपद्रवंश्च तत्तद्रुद्रगणै-रप्रपश्चाद्भावेन सव्यग्रमनुद्रूयते स्म ॥

यथा ।—

विद्युद्वत्केशकूर्च्चज्वलननिचयमुकूचक्षुरुद्दण्डदंष्ट्रा
भ्रुकुटयुद्यत्कठोराननकटुरसनालीढसृक्किद्वयान्तः ।

(१) निन्दायां ताच्छिलः । (२) बल ।

नम्नः शूलांशु[1] भग्नप्रतिदिशविषय-
स्तालतुल्याङ्घ्रिनालः
सर्व्वामुर्व्वीं धुनानः प्रमणपथपथः
सोऽयमग्निः ससार ॥

अद्राक्षीदक्षिभिर्यस्मिन्नक्षीणद्युतिलक्षिभिः ।
अभ्राक्षीत्तत्र वृक्षांश्च स कृत्यशुष्मपूरुषः॥इति॥

व्रजराजः सभयमुवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

तस्मात्कृत्याग्निदाहाद्भयनिचयधरं द्वारकालोकमारा-
द्वीक्ष्याक्षेष्वा[2]त्मपक्षग्रहणपरतया
तत्र[3] हेलाविधात्रा ।
कृष्णेनादेशमात्राद्दहनममुमरि[4] द्रावयल्लङ्घनाशी
भावां काशीं विधाय अदिमविभृदमु-
ष्याङ्घ्रिदेशं विवेश ॥

राम उवाच ।—किञ्चिद्विव्रियतां ॥

दूतावूचतुः ।—

चक्रस्याग्रे तदा कृत्यावह्निरेवं व्यदृश्यत ।
प्रलयार्कगणाद्भीतः परैति ज्योतिरिङ्गणः ॥

---

(१) हस्तस्थ ।　(२) पाशकेषु ।
(३) कृत्याग्नौ ।　(४) चक्रं ।

ये तु रुद्रगणास्तस्मिन्नासन् कृत्याग्निसैनिकाः ।
केचित्तेनैव विप्लुष्टाः कतिचिच्चक्रवह्निना ॥
स काश्यां दहनोऽप्याशु विशन् सर्त्विक् सुदक्षिणं[१] ।
दहन्नदाहि चक्रेण यत्र पूरपि सा स्वगं ॥
काशी चक्राग्निनाप्लोषीत्यन्यथा मन्यतां न हि ।
तस्याग्निकुक्कुटै[२]र्देशोऽप्यसौ प्लुष्टः स[३] निष्कुटः ॥

अथ सर्व्वे सहासं प्रोचुः ।—

कल्याणं जातं यदक्रूरस्य तत्र तावत् स्थितिर्न जातेति ॥

रामश्च सहासमाह स्म ।—ततस्ततः ? ॥

दूतावूचतुः ।—

गतौ चक्रस्य यस्यासीत्कल्पार्कत्वं तदप्पदः ।
आगतौ हरिपार्श्वाय शीतांशुसमतां गतं ॥

राम उवाच ।—

यस्तु दुर्व्वाक्यं ब्रवीति स्म ब्राह्मणब्रुवः[४] स क्व नु गतः ॥

---

(१) सर्त्विजं काशीराजसुतं ।
(२) स्फुलिङ्गोऽग्निकुक्कुट इति त्रिकाण्डशेषः ।
(३) उपवनसहितः । (४) निन्दायां ब्रुवः ।

दूतौ सहासमूचतुः ।—कृत्याग्निनृत्पालय एव ॥

सर्व्वे सहासमूचुः ।—

स्वपापाग्निना स्वयमेव प्लुष्टश्चेत् कस्य वा दुष्टता भवेत् । यत्र कृत्याग्नेरपि तस्य स्वस्य दुरासदस्थानप्रस्थापनया प्रस्थापकेषु क्रोध एव बोधविषयीभवतीति ॥

तदेवमाकर्ण्य श्रीकृष्णपार्ष्णिग्रहणार्थं(१) राममुखमुन्मुखं निर्व्वर्ण्य व्रजेश्वरः स्वयमेव वर्णयामास ॥

प्रागहं त्वा मुहुः पश्यन्मेने कृष्णस्य चेत्तणं ।
अधुना व्यग्रमनसं मनुवे तस्य पालकं ॥

रामः सास्रमुवाच ।—

यदि त्वां पितरं तं च भ्रातरं सममीक्षते ।
सोऽयं कायस्तदैकध्यं जायतामन्यदा द्विधा ॥

इति प्रतिज्ञाय चिचालिषति बलदेवे सर्व्व एवेह व्रजस्थास्तत्प्रस्थापनाय सङ्गम्य रम्यं तत्प्रेमनिरीक्षणमधिगम्य मुहूर्त्तद्वयमस्रमेवाजस्रमूहुः ॥

व्रजेश्वरी तु मुहुस्तमाश्लिष्य तस्य मातरं भ्रातर-

(१) साहाय्याय ।

मपि विशिष्य सन्दिदिक्षमाणापि किञ्चिदपि यद्वक्तुं न शशाक तदेव परमसन्देशत्वेशतामाविवेश ॥

किं वहुना ? ।

पितुर्यन्मातुर्यद्यदथ सुहृदां यद्व्रजसदां
चरित्रं विश्लेषज्वरवलितमुच्चैस्तदखिलं ।
हरौ सन्देशाय स्वयमजनि यस्मिन् स(१) तु परः
स्फुटं(२) व्यर्थीभूय ह्रियमनु तदालीयततरां ॥

रामस्य चलने दुःखं सुखं चाजनि गोदुहां ।
स्वयं विश्लिष्यतः कृष्णागतिं च प्रतिजानतः ॥

पश्चात्त्यक्तं गोकुलं गम्यमग्रे
कृष्णस्थानं दूरमित्येष रामः ।
मध्यं शून्यं सम्विदानः समन्ता-
देकेनाह्ना द्वारकायां विवेश ॥

इह हरिवंशकृतशंसनमित्थमनु मोदामहे ।—

अथागतं वलमुपदृश्य माधवः
श्रितोद्धवः श्रमजलसम्वृतं मिलन् ।
रहो नयन्नयनजलाकुलं पुरा-
खिले व्रजे भविकमपृच्छदेकदा ॥

(१) सन्देशः। (२) मन्ये।

किं वाच्यं जनकात्पृच्छ्रद्यमित्येवं जनानां जनं
गा वन्यस्थिरजङ्गमांश्च निखिलान् पप्रच्छ यद्भ्रातरं ।
तेनाश्वस्तमतिर्व्रजं प्रति गतिं तस्याप्यसौ निर्णयन्
यच्च प्रत्यवदत्प्रतिस्वमधिकं तत्तन्मुहुः पातु नः ॥

यथा च तत्पद्यानि ।—

"तथैवाध्वन्यवेषेण सोपश्लिष्टो जनार्द्दनं ।
प्रत्यग्रवनमालेन वक्षसाभिविराजता ॥
स दृष्ट्वा तूर्णमायान्तं रामं लाङ्गलधारिणं ।
सहसोत्थाय गोविन्दो ददावासनमुत्तमं ॥
उपविष्टं तदा रामं पप्रच्छ कुशलं व्रजे ।
बान्धवेषु च सर्व्वेषु गोषु चैव जनार्द्दनः ॥
प्रत्युवाच ततो रामो भ्रातरं साधुभाषिणं ।
सर्व्वेषां कुशलं कृष्ण ! येषां कुशलमिच्छसि" ॥इति॥

तदेवं श्रीमद्व्रजस्थाः सदापि स्वस्था एव स्थास्यन्तीति च सूचितं ॥

अथ तत्र श्रीकृष्णस्यावेशान्तरं व्यज्यते ॥

यथा ।—

अथासीद्रामनीतानि दुग्धानि मधुमर्द्दनः ।
फलान्यजक्षदाख्यच्च तत्तद्धेनुनगा(१)भिधां ॥

---

(१) वृक्ष ।

अथ मधुकण्ठः समापनमाह स्म ।—

व्रजेश ! तददः कथं व्यभिचरिष्णु काष्णीं वच-
स्तथावलमुखोदितं वत ! भवेदहो ! दृश्यतां ।
स एष वरवेषवान् वलयुतः सुतस्ते पुरः
पुरस्कृतनिजव्रजः स्फुरति शीतयन् द्रागुरः ॥

अथ व्रजवन्दिनश्च तत्र तं ववन्दिरे ।—

त्वं पुण्ड्रकक्लिष्टसन्दिष्टविस्मेर ! ।
वाचाटताध्वंसिवाक्पाटवस्मेर ! ॥
नाट्याभतद्वेषमुद्बद्धमुत्कण्ठ ! ।
शङ्खध्वनिग्रामविस्फोरिसत्कण्ठ ! ॥
सानन्दमागत्य सन्दृष्टतद्देश ! ।
तं द्रष्टुमत्यर्थमुद्यम्य सावेश ! ॥
अन्तर्द्धिमत्राथ तत्सैन्यमुद्भूय ।
त[1]न्मुख्यसाम्मुख्यकार्य्याय सम्भूय ! ॥
स्वं वेषमुत्प्रेक्ष्य तत्रालमुत्प्रास ! ।
प्रत्यर्पणायेव तद्धाम्नि[2] चक्रास[3] ! ॥
तस्याशुविध्वस्तमस्तस्य तत्राथ ।
मित्रच्छिदाकारिनाराचसन्नाथ ! ॥

---

(१) सैन्य। (२) तद्देहे।
(३) चक्रं अस्यतीति।

काशीनराधीशमूर्द्धानमुत्कृत्य ।
काश्यां निरस्यापि सम्पूर्णतत्कृत्य ! ॥
स्वावासमासद्य खेलाप्तसंसङ्ग ! ।
तत्पुत्रकृत्याग्निमाकर्ण्य सद्रङ्ग ! ॥
पार्श्वस्थमादिश्य चक्रं च सक्रीड ! ।
मित्रात्पराजित्य खेलासु सव्रीड ! ॥
काशीशपुत्राभिचारं परावर्त्य ।
चक्रेण काश्यादि दग्धं च निर्व्वर्त्य ॥
यां द्वारकामाशु पासि स्म तामेव ।
हित्वा व्रजे भासि वृन्दाटवीदेव ! ॥इति॥

अथ बहिःसभायां कथनं कथकः सम्प्रणय्यान्तः सभायामपि श्रीराधामाधवादीनां चित्तं किञ्चिदञ्चितं चकार ॥

व्रजतश्चलन्नपि बलदेवः स्वानुजदयिता न साक्षादाश्वासनमयिताः[1] कृता इति मनस्यवगम्य ता रजनीं सव्याजं विरम्य प्रातः सर्व्वमप्यनुव्रजन्तं व्रजं यत्नादतिक्रम्य ताश्च वन्यवर्त्मन्यनुशोचन्तीरनुगम्य सम्यगाश्वासनाय स्वप्रेयसीरपि तदाज्ञावशात्तदनुगततया व्रज एव वासाय नियम्य जातु

(१) प्रापिताः ।

जातु पितृनिशान्तगमनपर्यवसानं समाधानं सन्तन्वानया सान्त्वनयाऽङ्गीकृतया सुज्ञान्यां तदनुज्ञामधिगम्य चलितवान् ॥

चलनसमये तु शुकशारिकयोर्द्वयं ताभिः शिक्षयित्वा कृष्णायोपायनतया प्रहापितं निनाय ॥

क्रमेण तयोः शिक्षा यथा ।—

आयास्याम्यथ यावत्,तावत् प्राणान् प्रिया ! वहत ।
जीवन्ति हि सारङ्ग्यो, यावन्मेघागमो भवति ॥

सत्यं सारङ्गीणां
घनसमयापेक्षि(१) सन्त्यपि प्राणाः ।
घनसमयेऽपि समन्ता-
दघने कथमहह ! सन्तु ते(२) दीनाः ॥इति॥

तदेवं ।—

नीतं रामेण गोष्ठादुपहृतिवलयं
सुष्ठु कृष्णाय रूप्यं
तत्रागाद्गाढमक्ष्णां निकरमनु परि-
च्छेद(३)मेव क्रमेण ।
किन्त्वस्तः कीरशारीयुगलमुपदिश-
त्पाठितं तत्प्रियाभि-

---

(१) यथा स्यात् (२) प्राणाः । (३) समाप्तं ।

स्वर्षं कर्षं च तस्मिन् विदधदपि परि-

च्छेदमाप्तं न जातु ॥

अथ मधुकण्ठः समापनमाह स्म ।—

सेयं भवती राधे !, सोऽयं कृष्णः समं लसति ।

यत्राश्लेषं पश्यन्, जितविश्लेषं मदं यामि ॥

तदेवमानन्द्य तत्तद्वृन्दमनु मन्दिरं विन्दमानयो-रनयोः श्रीराधामाधवावानन्दसम्बाधालयमधि-शयाते स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु पौण्ड्रकाद्युद्दण्ड-संग्रामश्रवणजधामरामद्वारकाधामप्रति-गमनमेकविंशं पूरणम् ॥

पूर्णश्चायं रामपूर्णव्रजनामा

द्वितीयो विलासः ॥

द्वाविंशं पूरणम् ।

श्रीराधाकृष्णाभ्यां नमः ॥

श्रीकृष्ण ! कृष्णचैतन्य ! ससनातनरूपक ! ।
गोपाल ! रघुनाथाप्त ! व्रजवल्लभ ! पाहि मां ॥

तदेवमुद्धवः श्रीरेवतीधवश्च व्रजपरमानन्दं पपरतुः ॥

अथ श्रीरमणस्य दन्तवक्रशमनानन्तरव्रजागमन-रमणाय यस्मै पूर्व्वोत्तरचम्पूद्वयनिर्म्माणमारब्धं ॥

तदेव सप्रमाणं निरूपयितुमुत्तरचम्पूमनु कृष्ण-पूर्णव्रजनामा विलासः परिवेष्यते ॥

यत्र तस्य व्रजागमनानन्तरं पूर्व्वपूर्व्ववदेव सूत-सुतौ तां कथां प्रथयामासतुः ॥

तत्र श्रीव्रजयुवराजविराजमानव्रजराज-सदसि-स्निग्धकण्ठ उवाच ।—

तदेवं विलासद्वयं कथितं ॥

यत्र तूद्धवरामौ व्रजस्य कृष्णा-विरहव्याधिं प्रत्यौषधनिभसान्त्वनविधौ नासत्यौ जातौ किन्तु नासत्यौ ॥

तथापि ।—

यदा रामः कृष्णानयनमनु सम्विद्रचनया
व्रजं सान्त्वं सान्त्वं व्रजति[१] स पुरा यादवपुरं ।
तदा तृष्णा तस्याभ्यधिकमभवत्प्रावृषि यथा
समीपायां धैर्य्यं वहति न हि वापीह[२] निवहः ॥

किञ्च ।—

ते कृष्णाह्वयमालिहन् घनरसं साक्षात्कृतं सीरिणा
स्फूर्त्तिव्याजि[३] तथापि तत्र विदधु-
स्तृष्णां त्रिदोषार्त्तिवत् ।
तस्मा[४]दत्र[५] सुखं दधुर्यदनिशं तन्नानृतं यन्मुहु-
स्तत्प्राप्तिं प्रति लालसामपि ययुर्व्याहन्यते तच्च न ॥

तदेवं रामदत्तप्रत्याशायां व्याप्तप्रत्याशायां[६] दिनान्तरे पूर्व्वपुर्व्ववत् द्वारकापुरात् दूतावागम्य सम्यगिदं जगदतुः ।—

(१) वव्राज । पुरा योगे लट् ।   (२) चातक ।
(३) यथा स्यात् ।   (४) साक्षात्काराद्धेतोः ।
(५) कृष्णास्वादे ।   (६) व्याप्तं प्रत्याशां प्रति दिशं यथा

सम्प्रति झटिति बृजागमनं घटयितुकामः श्रीरामस्तद्विघ्ननिवारणाय स्वयमेव दुर्हुरूढ-(१) विजयारम्भं सम्भवन्नास्ते ॥

तदिदं श्रूयतां ।——यद्विविदघातनमिति ॥

बृजराज उवाच ।——

को वायं विद्विड् द्विविदतया मतः ॥

दूतावूचतुः ।——

यः खलु राघवेन्द्रकटकेऽपि वानरेन्द्रः प्रकटतया घटनां गतः ॥

बृजराज उवाच ।——

हन्त ! स कथमकूटः(२)स्फुटं दुर्हुरूढवद्घातितः ॥

दूतावूचतुः ।——

तस्य सम्प्रति नरकासुरसङ्गत्या वैमत्यातिशयः प्रत्यासन्न इति ॥

बृजराज उवाच ।——

तादृशस्य तादृशसङ्गतिमपि न भृशं परामृशामः ॥

दूतावूचतुः ।——

तस्य कारणमपि तत्रावधारणमवाप । यत्पुरा लक्ष्मणं प्रति तस्य विनयलक्ष्म लक्ष्यते स्म ॥

(१) दुष्ट । (२) साधुः ।

व्रजराज उवाच ।—

दुर्गमः खलु सतामनुगमः । भवतु साम्प्रतं हत-व्रतस्य तस्य दुर्णयं वर्णयतं ॥

दूतावूचतुः ।—

परलोकगतस्यापि साचिव्यं नरकस्य सः ।
कुर्व्वन् नरकसंहर्त्तुर्देशादिकमुपाद्रवत् ॥

यथा ।—

त्रिमैर्वह्न्यब्धिशैलैर्द्दिशि विदिशि पुर-
ग्रामघोषान् विनिघ्नन्
स्त्रीपुंसानद्रिगर्त्तान्तरमनुवलयन्
प्रस्तरैरास्तरंश्च ।
साध्वीधर्म्मं विधुन्वन्मुनिनिलयमपि
ध्वंसयन् कुत्सयंश्च
स्वैरं कृष्णस्य देशान् द्विविदकपिरसा-
वर्द्दयन्नुन्ममर्द्द ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ॥ ततश्च ।—

यत्रैव रैवतमनु रेवतीरमणस्य रममाणस्य सङ्गीतं कर्णसङ्गि चकार तत्रैवागत्य तरु-तत्यवधूननया

पत्र-पुष्प-फल-शाखाः शीयमान[1]स्तद्गीयमान-विडम्वकः स किल किलाकिलाशव्दमाततान । तेन हसन्तीश्च तस्य वसती[2]र्विलोकयन् निजजातिज-विलोलतया वहूपजहास ॥

किं वहुना ?

स मत्वा रामसम्वन्धं रामः सहनतां गतः ।
तथापि कोटिधा धृष्टं कृष्टप्राणं चकार तं ॥
यद्यपि कृष्टप्राणं, चकार रामस्तदा द्विविदं ।
सदयं[3] तदपि त[4]मूहे, स[5] विविधदोषाद-
मूमुचद्रूपदमुम्[6] ॥

तत्र युद्धं यथा ।—

ग्रावभिराहतिरिह वञ्चनगति-
रपहृतमधुता त्तणामिव मृदुता ।
वक्षास्फालनमथ सम्भालन-
मविनयवलना समुसलहलना[7] ॥

(१) शातयन् । शदेः शीयः ।
(२) लक्षणाश्च प्रियाः । (३) रामविशेषणं ।
(३) रामं । (४) रामः । (५) कपि ।
(७) हलिर्महद्धलं । हलं हलशालि । महद्धलकलनेत्यर्थः ।

शालहतिर्लसदङ्गसमि[1]द्रस-
मुसलच्छिभिः स्वासृग्लिभिः ।
कुतुकालोकः शालविमोक-
स्तस्य च्छेदः स[2] स[3] च सभेदः[4] ॥

प्रस्तरवृष्टिर्मुसलविसृष्टि-
स्फुटचूर्णीकृतिरधिदूरावृति[5] ।
मुष्टिभ्यां हतिरथ तद्वद्गति-[6]
रनुगतमृतिता[7] सम्भृतकृतिता ॥

तदिदमनुक्रमलब्धनिजक्रम-
कपिबलयुद्धं पृथगुद्बुद्धं ।
अकरोदचला[8]मसकृ[9]त्प्रचला-
मिति सङ्कलिता[10] त[11]त्कृतकलिता[12] ॥

तदेवं कथितवतोरनयोरपरावपि द्वारकापथिकौ तत्रागतिं प्रथितवन्तावाहतुश्च ॥

---

(१) युद्ध ।　(२) विमोकः ।　(३) छेदः ।
(४) पानपात्रसहितः ।　(५) यथा स्यात् ।
(६) मुष्टिभ्यां हतिरेतद्वद्गतिरिति पाठान्तरं ।
(७) मृत्युः ।　(८) भुवं ।
(९) पुनः पुनः ।　(१०) सङ्क्षेपेणोक्ता ।
(११) ताभ्यां ।　(१२) कलहता ।

द्विविहहन्तुरितोऽप्यन्यदाश्चर्य्यमवधार्य्यतां। यद्ध-स्तिनापुरं प्रस्थितवता तेन त[1] दुदस्तीकृत[2]कल्प-मस्ति ॥

सर्व्वे साश्चर्य्यमूचुः।—

किमिदं वृत्तं कथ्यतां ? ॥ दूतावूचतुः।—

जाम्ववती-सुतः साम्वः खलु स्वयम्वरं सम्वल-मानः सुयोधनसुतामेकक एवाचकर्ष ॥

यत्र शल-भूरि-भूरिश्रवः-सुयोधन-कर्णाः शोण-वर्णाः सन्तः किमपरं भीष्मश्च भीष्म इव संस्तम-व्यग्रीभवन्तं वीरप्रवेकमेकमनेकतालब्धातिरेकतया घनीभूता[3] यदुपक्षवन्धुं[4]ववन्धुः। वद्धं च तं नारद-मुखात्कर्णयोः सम्वद्धं[5]कृत्वाधीरतामधृत्वा यदुसमूहेषु घटितकटकव्यूहेषु वलभद्रः कुरूणां भद्रमिच्छन् शिक्षणाकृते तेषां धाम जगाम ॥

तदनुजन्मभावी तु भाविकौतुकं भावितं[6]कुर्व्वन्न किञ्चित्पूर्व्वं जगाद ॥

अथ स तु विप्रप्रायेण सम्प्रदायेन सार्द्धं कुरु-

---

(१) पुरं। (२) उत्पाटित।
(३) श्लेषः। (४) सूर्य्यं।
(५) गृहीतं। (६) प्रकाशितं।

पुरीतः क्रोशार्द्धस्थितक्रीडावनमनुस्थितवान् प्रस्थापितवांश्च तेभ्यः शुद्धं सन्देशमुद्धवद्वारेति स्थिते ते च साम्बमोचनार्थमेव सोऽयमागत इति मत्वा तत्प्रार्थनया स्वीयमहत्त्वाय ससम्भ्रममेव तमनुचक्रमुः । अनुक्रम्य च परमादरतत्परतां ज्ञापयितुमाज्ञाविस्तरः क्रियतामिति विज्ञापयामासुः ॥

स तु मनसीदं विदाञ्चकार ॥

मत्सम्बन्धेन वन्धेन कदाचिदेतेऽपि क्रमादद्धा कृष्णसम्बद्धा भवेयुरिति सम्भावनासमुपलम्भादहमेषु विषमेषु च पक्षपातं रक्षन्नस्मि ॥

एते तु पक्षतामात्रं लक्षयन्तस्तं मां परमादरतयानुसरन्ति । मदीयहृदयमणिं तं[१] पुनररिस्मरणि[२]मनुगणितं कुर्वन्ति ॥

तत्र चालं वहुना ? ॥

जहु[३]मपि तमस्मदीयं न जहुः किन्त्ववन्धुवद्वन्धुः । तस्मात् कृष्णेन कथ्यमानं तथ्यमेव तदेषां वैतथ्यमिति नामी साममयीं मुद्रामर्हन्ति किन्तु भेदमयीमेव । तत्र च क्षुद्रेष्वमीषु शूद्रेषु वेदमिव

---

(१) श्रीकृष्णं ।　　(२) पद्धतिं ।
(३) वालकं ।

कृष्णस्य नाम नाम्नातुं युक्तं परं तूग्रसेनस्य वर[1]-मिति ॥

अथ स्पष्टमाचष्ट ।—

दूतव्रतागतानामस्माकं न काचिदाज्ञा किन्तु राज्ञामुग्रसेनचरणानामेवेति ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च परस्परमीक्षमाणतया कृतान्तस्य पुरत इव तस्याग्रतः कृतान्तः क्रोधसर्गेषु कुरुवर्गेषु स पुनरनर्गलमुवाच ॥

सा[2] च श्रवसोराचर्य्यतां । अस्माकमजिह्मेन डिम्भेन तेन क्षत्रियाणामुचित एव धर्म्मः प्रचितः भवद्भिः पुनः क्रुद्धतां सम्भवद्भिरशास्त्रवृद्धं युद्ध-मुद्धुद्धं चक्रे यदेककृतेऽनेकता शिश्रिये ॥

स तु भवत्कन्याहारी वीरपारीन्द्रः[3] स्फुटमन्या-येनापि न वारी[4]गतः कर्त्तुं शक्येत ।

यद्यस्माकं शिक्षां न वीक्षेत । भवतु; भवद्भि-रद्याप्यनवद्या रीतिरापद्यतामिति ॥

---

(१) ईषदप्रिये । (२) राजाज्ञा ।
(३) ।सहः । (४) वारी तु गजबन्धनी ।

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ते तु तदाकर्ण्य वैवर्ण्यपूर्णवदनतया तूर्णमेव विविधमवर्णं[1]वर्णयन्ति स्म ॥

य[2]त्खलु भीष्ममुखाः केचन कृष्णातिक्रम-ग्रीष्मवशाद्विवर्णमुखा अपि स्वधर्म्मकर्म्मठता-स्पृष्टप्रायमर्म्मतया न निवारयन्ति स्म ॥

तत्रास्तां तावद्दूरे यदूननु तेषामूनताभिधानं। तस्मादप्यप्रत्यासन्ने[3]वर्त्ततां तमुग्रसेनं प्रत्यप्यु-ग्रताविधानं तस्मादपि विप्रकृष्टे[4]तिष्ठतु स्वमप्य-नाहृत्य परिवृत्त्यगृहान्तर्गमनानुसन्धानं । अहो ! कृष्णं प्रत्यपि धृष्णग्वचः कथं सोऽयमनन्तः सहतां । यत्र[5] स्वयं त[6]न्मुख्यमुद्दिश्य दूरतो दिशति स्म ॥

रे दुर्वोधन! दुर्योधन! हरिमभजसि[7]चेदनेधि[8] चिररात्राय त्वामिति ॥

---

(१) आक्षेपवचनं । (२) यस्मात् ।
(३) दूरे । (४) अतिदूरे । (५) वचसि ।
(६) दुर्य्योधन । (७) आक्षेपे तदयमाख्यातप्रयोगः ।
(८) माभव ।

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ॥ ततश्च ।—

सर्व्वोत्तमानां तैरुक्ता यदूनां विपरीतता ।
इतीव विपरीतत्वं तत्पुर्य्याः स व्यधित्सत ॥

व्रजराज उवाच ।—ततस्ततः ?

दूतावूचतुः ।—

ततश्च शाक्य(१)दुर्वादमिव तत्तद्दुर्वाक्यं सोतुमसमनूय तदनूद्यमलवं वलयन् विविधसदङ्गां पुरं च तां गङ्गां कर्षंस्तदिदमकार्षीत् ॥

यथा ।—

उत्कुर्व्वन्नट्टहासं कटुकटकघटाकृष्टकोटिप्रकृष्टं
कष्टं कर्त्तुं पुरं तत्प्रकटहलहलारावमस्यन् हलाग्रं ।
आकर्षंस्तत्र घर्षं विदधदपि जगद्धर्षमुच्चैर्वितन्वन्
श्रीमान् सङ्कर्षणः स स्फुटमरिगणमु-
द्वाष्पवर्षं चकार ॥

यर्हि न्यग्भावमग्रं गतमपरमभूदुन्नतं तर्हि तस्याः
पुर्य्यास्तैस्तैः समस्तैः कुरुनृपतनया-
दीन् पुरस्तात्स्वपाद्भिः ।

---

(१) पाषण्ड ।

आक्षिप्तास्ते सलज्जाः शरणमुपगताः
कन्यया साम्बमग्रे
कृत्वा नम्रा वलेन[1]स्फुरदुरुकरुणां
वीक्षिताः शिक्षिताश्च ॥

भोः ! कुरुवरा ! भूयस्तु यूयमेवं कुपूयं[2]मास्म कुरुतेति ॥

ततश्च लब्धसाध्वसरोधनः स दुर्योधनः साश्रित पूर्जनः[3] कृततत्पूजनः सुवहुयौतकमानीय पुरतः-प्रणीय तं जामाताटुहितृभ्यां सह प्रस्थानाय प्रार्थयामास ॥

साम्वस्तु प्रस्तुतलज्जतां सर्व्वैस्तैः समस्तैः सह प्रत्येकन्याययुद्धमेव स्ववहूहरणातपुरस्ता-दात्मनानुरुद्धं चकार न तु यत्नवशादपि कन्यारत्न-मिति स्थिते पुनरपि ते व्यग्रास्तिरीट[4]किरीट-स्पृष्टतत्पदपदव्यग्रा[5]स्तं सानुग्रहतां ग्राहया-मासुः ॥

व्रजराज उवाच ।—

कृष्णानुगतिस्पृही भीष्मः कथमसत्पक्षं गृहीत-

(१) रामेण । (२) कुत्सितं ।
(३) आश्रितपुरजनसहितः । (४) शिरोवेष्टन ।
(५) पदव्या अग्रं यैः ।

वान् । कथं वा साम्वपितृव्यः साम्वसम्वलितं तत्पुटभेदनं[1] भेदनं नेतुं तत्त्वणामकार्षीत् ॥

दूतावूचतुः ।—

भीष्मस्तावद्धाविमर्म्मज्ञात्रन्तरतया केवलं क्षात्रं धर्म्ममनुसृतवान् । रामश्च कुरुदायादान्[2] दायं[3] स्तत्पत्तनस्योत्पातमेवारब्धवान्न तु पातमिति ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च सहर्षं सङ्कर्षणः स्नुषापुत्रावादाय द्वारकायामाधाय यां सर्व्वां वार्त्तां वर्त्तयामास । तयां कृष्णः पुनः स्मितमेवानुवर्त्तयामास ॥

मया तेषामन्तरमनुभूयत एव भवता पुनः सरलेन भूयत इति व्यञ्जयितुमिति ॥

अथ स्निग्धकण्ठः समापनमाह स्म ।—

कथनमिदमनूक्तमाज्ञया ते
न च चरितं भवतीत्थमेव सद्यः ।

---

(१) पत्तनं । (२) कुरुरूपशत्रून्भवान् ।
(३) दैप शोधने ।

व्रजनृपकलपात्र पार्श्वतस्त्वं
स्वनयनयोः सुखमात्रकृष्णधामः ॥इति॥

तदेवं सन्तोष्य क्षणकतिपयं तूष्णीकामवलम्ब-
माने तस्मिन् व्रजवन्दिनः श्रीरामं ववन्दिरे ।—

द्विविदुरन्तचरित्र ! कोपिन् सज्जनमित्र ! ।
रैवत[1]लीलालक्ष्य ! प्राकृतधीभिरलक्ष्य ! ॥
निजरामागणजुष्ट ! तत्कपिधाष्ट्यद्रुष्ट ! ।
तेन समं कृतयुद्ध ! तद्युधि कौतुकरुद्ध ! ॥
चिरहतकपिकुलदुष्ट ! सुरमुनिगणनुतितुष्ट ! ।

कुरुभिः साम्वे वद्धे यदुनिवहे सन्नद्धे ।—

स्वयमथ सन्धिं कलयन् ! शान्तान् सङ्गे वलयन् ! ।
कुरु नगरं लघु गतवन् ! तद्दुर्वचनं श्रुतवन् ! ॥
तेषां पुरमुत्कलयन् ! वलितक्रोधं हलयन्[2] ।
गजसाह्वयमाकर्षन् ! परितश्चित्रं वर्षन् ! ॥
भीतकुरुश्रितपाद ! कृपया त्यक्तविवाद ! ।
वधु[3]सुतयौतकसङ्गि ! गृहमागावहुरङ्गि[4] ॥

---

(१) गिरि ।　(२) हलं गृह्णन् ।
(३) इकोऽचो ह्रस्वो गालवस्य ।　(४) यथा स्यात् ।

सम्प्रति सहसहजन्म ! गोकुलमै[१]र्निजजन्म ।
जय जय जय वलराम !
केवल[२] मनुजाराम[३] ! ॥इति॥

अथ श्रीराधा-माधवयोः सदस्यपि कथकः स तयोः सुखाय पर्य्यवस्यति स्म ॥

यथा चाह स्म ।—

यदवधि गोकुलदेशा,न्नतवान् सङ्कर्षणः कृष्णं ।
तदवधि सङ्कर्षणतां, तं[४] प्रति स गतः स्वघोषायः ॥

व्रजमनुकृष्णाकृष्टि,र्याऽन्येनासावसूक्ष्मदृग्दृष्टिः ।
सूक्ष्मदृशां मतिरेवं, राधे ! त्वयि मूलमन्त्र[५] सद्गुणता ॥

समापनं चाह स्म ।—

एतावतालमतिविस्तरवर्णनेन
प्रत्यक्षमेव तदिदं वृषभानुपुत्रि ! ।
सोऽयं प्रियस्तव मुखं सुखवाष्पकीर्णं
निर्व्वर्ण्य शश्वदिह पश्य भृशं विभाति ॥

---

(१) खड्ङि । आगतवानसि ।
(२) निर्णीते केवलामिति । (३) वहुब्रीहिः ।
(४) कृष्णं । (५) आकृष्टौ ।

तदेवं कथां समाप्य सर्व्वैर्णा सह गतयोः कथ-कयोः श्रीराधा-कृष्णावात्मतृष्णानुरूपमेव सदन-मासदतां ॥

इति श्रीमदुत्तरगोपालचम्पूमनु द्विविद-
हस्तिनापुरध्वस्तिर्नाम द्वाविंशं
पूरणम् ॥

त्रयोविंशं पूरणम् ।

अथ दिनान्तरे लब्धस्वनन्दनश्रीमन्नन्दराज-विराजमानसभान्तरे मधुकराठश्चेतसि चिन्तयामास ॥

अथ कुरुक्षेत्रयात्राकथनपात्राय सम्पद्यते स्म ॥ श्रीशुकदेवस्तु युगपत्तत्ल्लीलास्फुरणापुरस्कृत(१) प्रेममयप्रमादादेव तां दूरे प्रतिपद्यते स्म ॥

येन हि सा भीष्मद्रोणादुर्य्योधनागमनमयी घटिता । दुर्य्योधनवधकालपर्य्यन्ता श्रीरामस्य तीर्थ-पर्य्यटना तु तत्पूर्व्वं पठिता । तथा कंसवधान्नाति-विलम्बसम्वलनया कुरुक्षेत्रयात्रायामेवार्ज्जुनमात्रा सह वसुदेवसम्वदनमिदं सम्वदते ॥

"कंसप्रतापिताः सर्व्वे वयं याता दिशं दिशं ।
एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः!" ॥इति॥

---

(१) पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते ।

अथ व्यक्तमुक्तवान् ।—

तदेवं स्थिते पुनर्दूतावाजग्मतुरूचतुश्च ।—

तस्मिन्नरिष्टघाती सर्व्वेषां रिष्टतातिर्[1] विराजत सम्प्रति त्रिलोकीजनानामपि युगपत् कृतनेत्रसुखभातिर्भवितेति लक्ष्यते ॥

यस्माज्ज्योतिर्विद्भिर्द्योतितं महदहर्पतिग्रहणं निशम्य सम्यक् कृततन्माहिमवन्दनः श्रीमान् भवन्नन्दनः प्रचितविश्वानन्दनः सुपर्व्वनिर्म्मितसेवः स्वयमेव सर्व्वयदुदेवः प्रथितसुखपोषणां समन्ताद्घोषणां प्रदाय ससम्प्रदायः कुरुक्षेत्रमागन्तुं शन्तु[2]रस्तीति ॥

तदेतद्दूत-वचनान्ते निशान्ते[3] स्वपत्न्या सम्मन्त्र्य सभायां सभाजनतया च व्रजेशिता मन्त्रयामास ।

अस्माकं तदेकतृष्णाजामपि तत्सन्निधिनिधिं गन्तुमुद्यतानां विधिविरोधी वर्त्तते ॥

तस्य पुनरागमनं मनसापि दुर्गममिति भवद्भिरनुभवद्भिरेव स्थीयते ॥

सम्प्रति श्रूयते सूर्य्यग्रहणमनु पूर्य्यमाणकुतु-

(१) क्षेमङ्करो रिष्टतातिरिति त्रिकाण्डशेषः ।
(२) कल्याणवान् ।　　(३) गृहे ।

कतया कुरुक्षेत्रागमनाय कृताग्रहचयः स सम्भृतभवत्प्रणयस्तत्र विराजत इति ॥

तत्र च तीर्थयात्रायां जगन्मात्रागमनपात्रतां गतायां नास्माकं गमनं विस्मायकं भवतीति त-[१]दुक्तः स खल्वस्मासु तदीयसुहृद्बुद्ध्या दुष्टद्वेषदोषस्तु न पोषं लभत इति ॥

अथ सर्व्वे सहर्षाश्रुवर्षमूचुः ।—

सम्यगिदं रम्यमुक्तं किन्तु व्रजरक्षणाय के रक्षणीयास्ते लक्षणीयाः ॥

यतः ।—

येषां धाम धनात्मजात्मवलितं सर्व्वं परं यत्कृते
तेषां तद्विरहे चिरेऽपि झटिति प्राणावसम्भाविनां ।
गोपानां कुरुभूमियात्रिकगतिव्याजेन तल्लम्भन-
प्रत्यासत्तियुजां भवेत्कतमया युक्त्या ततो वारणं ॥

तदिदं चिराय विचारयत्सु व्रजसभासत्सु द्वारकाधिपतेः पत्रिकायाता ॥

यथा ।—

यावच्छत्रुक्षयं[२] न व्यतिमिलनकृते
ऽस्माभिरुद्युक्त[३]रिष्टा

(१) श्रीकृष्णा । (२) यथास्यात् । (३) उद्योगः ।

तस्मात् क्लिष्टा वयं तत्प्रतिविधिमधुना
तात ! लब्धाभिरेणा ।
अस्मिन् सूर्य्यग्रहे यन्निखिलजनतया
पूर्य्यमाणं कुरूणां
क्षेत्रं व्याजाय कुर्य्यामहमथ भवता-
मञ्जसासञ्जनाय ॥

किन्तु ।—

यद्यप्यहं गोकुललोकमाशु
प्रतिस्वमभ्यस्य रहो भजामि[१] ।
तथापि ये न प्रतियन्ति तेऽमी
मिलन्तु मां तत्र परे वसन्तु ॥

किञ्च ।—

गावो मम चित्कल्पाः
सन्धि-निचयास्तत्र च प्राणाः ।
तस्माद्दलयितनिष्ठं
तासु सदामी तु तिष्ठन्तु ॥ इति ॥

तदेतदाकर्ण्य सर्व्वे स्वस्वाभिमतं वर्णयन्ति स्म ॥

---

(१) स्फूर्त्यभिप्रायेण ।

तत्र साक्षात्कारनिभतदुपलम्भविस्रम्भपराणां परायणतया[१]सखायस्तु तदस्तुङ्कारताप्रथनाय यथाप्रस्तुतमेव वस्तु तत्र स्तुतवन्तः। अस्मत्प्राणकोटिनिर्मञ्छनीयवाञ्छितलेशस्य निदेश एवास्माभिरञ्चनीय इति ॥

अथ कथाशेषं परिवेषयन्नेव स्थगितकण्ठतया मधुकण्ठस्तूष्णीकामेव पुष्णाति स्म ॥

स्निग्धकण्ठ एव समापनमाह स्म।—

अकुण्ठामुत्कण्ठां कुरु-भुवि गतिं वः कलयतां
स्मरन्ती मद्बुद्धिर्विकलतरतां या वलयते।
इमं सा पश्यन्ती व्रजनृप! तवात्र व्रजभुवि
स्थितस्याङ्के कृष्णं प्रमदमधुना माद्यति चिरं ॥

तदेवं दिनकथा समाप्ता ॥

अथागामिन्यां यामिन्यां श्रीराधामाधव-सदसि च स्निग्धकण्ठकृतयथावत्कथा यथा।—

तत्र पतत्रिपतिपत्रः[२]प्रगुणाक्षरपात्रं पत्रमेकं प्रेयसीः प्रति प्रस्थापयामास ॥

---

(१) मैत्र्येन। (२) गरुडवाहन।

यथा ।—

यद्यप्यात्मैकवेद्या मम लसति मुहुः
सङ्गतिर्युष्मकाभिः
स्फूर्त्तिभ्रान्त्या प्रतीतिस्तदपि किल न व-
स्तत्र[१]हा ! धिग्ममापि ।
य[२] द्दिष्टद्वेष्टृतर्कग्रहणमिषतया-[३]
स्माकमन्योन्यसङ्गः
सम्भाव्यस्त[४]त्प्रियाल्यः ! कुरु भुवि सकृद-
प्यस्तु स[५]प्राणनाय[६] ॥

अथ यदा व्रजेश्वरीप्रभृतयश्च सर्व्वाश्चलितुमुद्यता-स्तदा वृन्दावनेश्वरीप्रधानाश्च तथावधारयन्ति[७] स्म ॥

तत्राथ ये तच्चर्च्चाभासादयः प्रतिबन्धं प्रागनुबबन्धुस्ते च कृष्णाय तृष्णाभाजां तासामसुनिरसनव्यसनमालोच्य सर्व्वेषामपि तदेकभावतां विलोक्य स्वेषामपि तदवेक्षणाया[८]मक्षमतामवलोक्य तस्मि[९]न्नुदासते स्म ॥

---

(१) सङ्गतौ ।　　(२) यस्मात् ।
(३) दिष्टो द्वेष्टृणां तर्को येन ग्रहणेन उपरागेण तन्मिषतया ।
(४) तस्मात् ।　　(५) सङ्गः ।　　(६) जीवनाय ।
(७) चलितुं विचारयन्ति । (८) अपेक्षणायां । (९) प्रतिबन्धे ।

स्वयं तु पृथक्प्रस्थानमिच्छवोऽपि श्रीकृष्णरहः-सन्देशसदेशरूप(१) तयान्तरङ्गतन्मित्रजनैर्व्रज-निर्ज्जनतादोषवर्ज्जनमिषाद्व्रजराजाज्ञामुपार्ज्जयद्भिस्ते कतिचिच्चान्ये स्व-सङ्गतिं प्रति सौहृद्यहृद्यताव्यञ्ज-नया सञ्जयामासिरे ॥

अथ स्वभावत एव तासु निगूढस्नेहातिशया-वरणा,विशेषतस्तु स्व-सुतम्प्रति सम्प्रति निरुपाधि-महाप्रीतिकृतविरहव्याधिं वितर्क्य विधूततदावरणाः श्रीव्रजेश्वरीचरणास्तु स्वसङ्गत्या गमनाय श्रीराधा-प्रधानाः प्रत्यासन्नाश्चक्रुः ॥

तदेवं स्थिते कुरुक्षेत्रयात्रानुक्रमस्तु प्रातः प्रस्तो-ष्यते ॥

अथ कथकः समापनमाह स्म ।—

यदर्थं प्राणानां सततमभितः शोषणमधु-
र्यदर्थं क्षीणाङ्ग्योऽप्यहह ! कुरु-भूमीमभिययुः ।
भवत्यस्तं कान्तं वृषरविसुते ! स्वालयमनु
प्रसज्य त्वं शश्वत्प्रमदमधुमत्तं विदधाति ॥

तदेवं कथितकथयोः कथकयोः सर्व्वैण सह

---

(१) मत्रेषन्यायकल्पात्तु देशरूपं समञ्जसं ।

प्राप्तनिजपथयोः श्रीराधा-माधवौ तु निर्व्वाधसुख-स्फुरणस्फुरदुद्भवौ मण्डपं मण्डयामासतुः ॥

अथ विगतसर्व्वशल्ये कल्ये पुनः श्रीव्रजराज-सदसि श्रीकृष्णकृतमहसि गद्गदकण्ठतया मधु-कण्ठ उवाच ।—

अथ हरिमवलोकितुं चिराय
स्फुरदुरसां व्रजवासिनां जनानां ।
नयनसलिलसिक्तरोममस्या-
ङ्कुरमहसा निखिलाक्षितोषदानां ॥
मुहुरपि रदशब्दकारिकम्प-
स्थपुटित(१)वर्णविभाग(२)संस्कृतीनाम् ।
विविधविध(३)विचिन्तनाभिघात-
स्फुरदुरुधाकृतिवर्णभाबितानां ॥
प्रतिपदरचितात्मतत्त्वसाक्षा-
त्कृतिजनवद्बहिरात्तचेष्टितानां ।
मनसि तु सततस्फुरत्तदेक-
प्रमदमृषामत(४)सर्व्ववैभवानां ॥

(१) आच्छादित ।
(२) अक्षराणां विभागः पृथक् पृथक् संस्कारः ।
(३) विधाविधौ प्रकारे च ।　　(४) मृषात्वेन मत ।

अशनशयनविस्मृतिप्रपत्या-
कृशवपुषामकृशस्वभावभाजां।
अलमपरिचितैर्जनैरपि स्वं[१]
परिहृतवद्भिरुरीकृतान्वितीनां॥

कथमपि कुरुभूमिमागतानां
सपदि निशम्य सदेशतां मुरारिः।
सुखशतभरभारपारवश्या-
न्न चलितुमाशु शशाक साकमङ्गैः॥

पञ्चभिः कुलकं॥

कृष्णस्य सौरभ्य-भरेण पुष्टिं
तथाविकृष्टिं गमिता व्रजेशाः[२]।
नेदिष्ठदेशे विविशुर्यदन्त-
र्विराजते राजगणैः स कृष्णः॥

तदा च हरि-हलिनौ कर्णाभ्यर्णतया तस्य वर्णितस्य कलना[३]द्भावान्तरवलिनौ भक्तिमज्यमानमनस्तया सद्रवमुपविश्य जिपन्तावपि सहसा न चेलतुः॥

---

(१) आत्मीयं। (२) श्रीनन्दप्रभृतयः
(३) नन्दादिप्रवेशस्य कैश्चिद्वर्णितस्य श्रवणात्।

किन्तु राज-व्रजं निज-निज-शिबिराय विहितव्याजं विससृजतुः । शाश्वता ममात्र तैः सत्रा[१]मा मैत्री ज्ञासिषुरिति तान् व्रजराजादीनुद्धवद्वारा सम्भव-न्निभृतसम्भवम[२] देशे स्तम्भयामासतुः ॥

जाते बहिर्जनवर्ज्जने तु स्वजनेन सह स्वयमुप-व्रजन्तौ दूरादेव व्रजराजपदराजीवसमर्य्याद-मर्य्याद[३]मखण्डदण्डवत्प्रणिपातमाततवन्तौ । यथायथमुपनन्दादीनपि प्रणतवन्तौ ॥

व्रजराजश्च कम्पसम्पत्सम्पतदश्रुपुलकाकुल-तया स्वान्तव्याकुलतया च युगपदेव युगलं तदा-लिङ्गश्चापलयुगलं सगद्गदमन्दं चक्रन्द ॥

राम-कृष्णौ च यद्यपि तदालिङ्गनाय सतृष्णौ तथापि सर्व्वैः सङ्गमनाय तस्य साङ्गता[४]मङ्गी-कुर्व्वन्तौ पुनश्च रणापातमेवाततवन्तौ ॥

अथ व्रजराजस्तयोर्नमस्कारश्रमप्रशमनाय यद्यपि निवारणकामस्तथापि भाव-वैवश्यवशस्तत्र स्वकरयोरवश्यतामध्यवस्यान्नितस्ततः पश्यति स्म ॥

पश्यंश्च तदिदं वदतः श्रीवसुदेवादीनपश्यत् ॥

---

(१) सह । (२) मिलन ।
(३) निकटे मर्य्यादा यत्र तं । (४) आलिङ्गनस्य समाप्ततां ।

(१)आयुष्मन्तौ ! त(२)एते सङ्कोचं रोचयन्ते ॥

ततः स्वयमवधाय विश्रमसुखमुपधाय कुशल-प्रश्नः प्रस्तूयतामिति ॥

ततश्च राम-कृष्णयोः साञ्जलिवन्धस्थितिसन्धयो-रालिङ्गनादिना व्रजेन्द्रमनुविन्दमानः स्वयमानक-दुन्दुभिस्तेन(३) तं(४)तं(५) सन्ततवाञ्छिततदीयसङ्गं मुनिसङ्घवर्य्यं प्रद्युम्नादिपर्य्यन्तं सर्व्वं जनं सङ्गम-यामास ॥

स एव च तं देवमिव निज-निवेशवेश्मानीय कृष्ण-रामादिकृतानुसारः सपरिवारमाराधयामास ॥

तदेवं स्थिते पट्टपटसम्वृतं सङ्गायातृकतिपय-धातृमुखमहिलावलितव्रजेश्वरी-शकटमन्तःपट-गृहं प्रविष्टमाकर्ण्य तादृष्टत(६)एव तत्र तौ प्रविष्ट-वन्तौ । प्रविश्य चात्मानौ पश्यन्तीमेनां पश्यतः स्म ॥

तत्र सा यथा ।—

यस्य प्राग्विरहोष्णरश्मिखरताशीर्णाङ्गपर्णावलिः पश्चादुत्कलिकामरुद्दलनया च्छिन्ना विदूरे पथि ।

---

(१) वसुदेवोक्तिः । (२) श्रीनन्दादयः ।
(३) व्रजेन्द्रेन । (४) रामं । (५) कृष्णं ।
(६) कातरः ।

तं पुत्राकृतिवारिवाहसमयं सम्भूय गोपेश्वरी
वल्लीवाशु पुनः स्वमूलविसृतेर्लाभादगादार्द्रतां ॥

तां शुष्कदेहामथ वीक्ष्य देवकी
सन्तर्पणायामभजद्विहस्ततां[1] ।
कृष्णोद्गमादेव तु पुष्टमूर्त्तिकां
दृष्ट्वान्वविन्दत् पुनरुक्तयत्नतां ॥

माता द्रागथ सह सीरिणा समीक्ष्य
स्वं पुत्रं कुरुभुवि तद्वियोगदूना ।
उत्थानं रचयति यावदेष ताव-
द्विद्रुत्य न्यपतदुपाङ्घ्रि[2]तेन[3]तस्याः ॥

सा कृत्वा भुवि जानुनी स्वतनयावुन्नम्य नम्रौ तयो-
र्मूर्द्धानावुरसोपगुह्य नयनासारं तथामुञ्चत ।
देवक्यादिभिरेव मौह्यत[4]यथा सेयं कृशाङ्गी कुतः
प्रादुर्भूतवती नदी जगदिव व्याप्तुं मुहुर्वर्द्धते ॥

कृष्णस्तत्पदपद्मयोरथ पतन् रामेण सार्द्धं रुदन्
वाढं रोदयति स्म सर्व्वजनतां वर्षन्निव स्वां दशां ।
एवं सत्यपि गोपराज-महिला तत्रातिशङ्काकुला
तद्दुःखान्तरतावितर्कवशगा सा शुष्कवाष्पाभवत् ॥

---

(१) व्याकुलतां ।　(२) अङ्घ्रिसमीपे ।
(३) सह ।　(४) ऊहेः ।

ततश्च शुष्यद्वदनां विलोक्य तां
विलोकयन्तावभितः सहोदरौ ।
मातॄर्मिलन्तावपरास्तया सहा-
गताश्च तावार्द्रयतामम् पुनः ॥

अथ कथमपि धैर्य्यं रोहिणीवर्य्यरामा-
स्तनुजनिजननीना[१]मर्ज्जयित्वा क्रमेण ।
अभिनवरुचिशुभ्रे राङ्कवे सन्निवेशं
सपदि विदधुरासामात्मनोपाविशंश्च ॥

या आसन् मातृमानिन्यः कंसारेर्द्देवकीमुखाः ।
यशोदाग्रे तु ताः सर्व्वास्तटस्थान्ति स्म साम्प्रतं ॥

देवकीप्रभृतिमातृताहरौ
गोष्ठमातृपुरतो वृथाजनि ।
वार्षिकी यदि भवेद्घनावली-
सेकपालिभिरलं कृषिव्रजे ॥

जिघ्रन्ती शिरसी[२] तयोः सुरभिणी-
वाष्पेण चासिञ्चती
मार्जन्ती वदने दृगम्बुवलिते
यत्नेन पश्यन्त्यपि ।

---

(१) पुत्राणां मातॄणां च । (२) कर्म्मभूते ।

कल्पं चाल्पमियं तु मंस्यत इति
ज्ञात्वा तदा रोहिणी
देवक्या सह निर्भरादरतया
वष्टि स्म(१) तामश्चितुं(२) ॥

रुक्मिण्यादिवधूभिरश्चितुममूं पर्य्यागताभिर्यदा
सार्द्धं देवकदेहजाप्रभृतयस्तद्विष्वगारिप्सत ।
तर्ह्येतौ वहिरागतौ हरि-बलौ गोपानशेषांस्तथा-
तिथ्येनार्च्चितुमत्र तत्र(३) वहुधा तौ वम्भ्रमाश्चक्रतुः ॥

स नासीद्गोष्ठजो लोकस्तदातिथ्यं न विद्यते ।
यं यदप्यजितस्तत्र नान्वगच्छद्वयधत्त न ॥

आस्तां तावद्व्रजपरिषदां सज्जनानां प्रसङ्ग-
स्तत्रत्यानां जरदनडुहामप्यसौ केन वर्ण्यः ।
लम्भं लम्भं कुरुभुवि तदा यानशेषान् समन्तात्
कृष्णः श्लिष्यन्नयनसलिलैः सिक्तमूर्त्तींश्चकार ॥

तदेवं स्थिते स्वस्थिते च सर्व्वव्रजजने पुनर्व्रजेश्वरीं परिष्वज्य रज्यमानमनस्तया श्रीरोहिणी-देवक्या-वूचतुः ॥

---

(१) स्पृहितवती । (२) पूजयितुं । (३) इतस्ततः ।

तत्र श्रीरोहिणी-वचनं यथा ।—

अपि व्रजेश्वर्य्यावयोरेकापि कानुज्झितप्रेम-सम्पत्त्योर्दम्पत्योर्वां मैत्रीमैन्द्रसम्पदनुगमे सम्प्रत्यपि नानुसन्दधीत । यस्याः[१] प्रत्युपकारकोटयोऽपि न समकोटयो भवन्तीति ॥

अथ सरलाया देवक्या वचनं यथा ।—

यतः स्वजन्मत एव चिरमपरिचितपितृकाविमौ धर्म्मान्मातरपितरतां[२] प्रपद्य पक्ष्मवलयाभ्यामक्षिगोलकाविव युवाभ्यां पालितौ नाद्यापि तादृशान्मनसश्चालितौ ॥

तत्र च परपुत्रतया निश्चितेऽपि रामे न वाम-[३]माचरितं । न हि सतां परस्वव्यवहारपरता सम्भवतीति ॥

अथ स्निग्धकण्ठ उवाच ।—

अत्र किं विचारितं ? व्रजेश्वर्य्या किं वा वाढमुत्तरितं ? ॥

मधुकण्ठ उवाच ।—न किमपि ॥

स्निग्धकण्ठ उवाच ।—कस्मादिव ? ॥

---

(१) पकस्याः । (२) भाषावृत्तौ भाष्यमतं ।
(३) वामौ वल्गुप्रतीपौ द्वौ ।

मधुकण्ठ उवाच ।—

सा खलु चिरतृष्णाया कृष्णामुपलभ्य सुखस्तभ्यमानसर्व्ववृत्तिस्तत्कथमन्यदनुसन्दधीत येन[१] विचारादिकं सन्दधीत ॥

स्निग्धकण्ठ उवाच ।—

पुनरप्येतादृशप्रसङ्गः सङ्गतिमवाप्नोति स्म वा ? ॥

मधुकण्ठ उवाच ।—

नहि नहि; यतो रोहिणी हि तत्प्रतिरोधिणी वभूव ॥

तत्तदप्यास्तां, यतः ।—

यस्य स्वानुभवः सदा न वलते
यस्मिन् स तत्र स्फुटं
शृण्वन्नन्यवचः प्रचारमपरं सन्दिह्य विक्षुभ्यति ।
श्रीगोपाधिपदम्पती कथममू
स्वत्रापि[२] कृष्णोऽपि तान्
भावानां वलयानधीत्य वलवद्भावान्तरं गच्छतां ॥

सम्प्रति तु पश्य पश्य ।—

हरिमनु पितृता[३] भिमानः,
शूरजदेवकतनूजयोर्यः प्राक् ।

(१) अनुसन्धानेन ।
(२) आत्मन्यपि । (३) मातापितृता ।

अमुमुत्क्रमयन् स[1]पुन,र्व्रजनरपत्योर्मुदं दुग्धे ॥

इति व्रजराज-सभायां कथयित्वा रहसि राधा-माधव-सदसि मधुकण्ठ उवाच ।—

तदेवं परस्परप्रेमसम्मर्द्द[2]शतेन तस्मिन्दिवसे गते श्रीव्रजेश्वरादिव्रजजने कृतनिजनिजवास-सज्जने निद्रया सर्व्वत्र निर्जने च जन्यमाने स खलु जनार्द्दनः स्वप्रेयसीजनानां लब्धसुखसदुद्धव-हलभृदुद्धवरचितमुचितमेकान्तावासमाससाद ॥

तत्र[3] तासां तत्रावस्थितिर्यथा ।—

तीव्रं निमीलुरभितः पुनरुन्मुमीलु-
रुच्चैर्मुमूर्च्छुरतिचेलुरथास्रमूहुः ।
याताः कुरोर्भुवि हरिं दृशि लब्धुमुत्का
हा ! मेनिरे व्रजरमाः क्षणमत्र कल्पं ॥

तस्य तु समासत्तिर्यथा ।—

उद्धवं विनिदधन्निजाग्रतो
मन्दमन्दमुदयन् घनागमः ।
गोपिकानिचितिचातकावली-
मन्वजीवयदसौ मुरान्तकः ॥

---

(१) अभिमानः। (२) मिलन। (३) प्रकरणे।

तत्र च ।—

कृशा मलिनिमस्तृताः प्रतनजीर्णवस्त्रावृता
विकीर्णकचकाचिता[1]कृतिमुखीः स पश्यन्नमूः ।
विघूर्णं दधदुद्भवं चणशतं धृतास्रस्तदा
कदाहमिह कः कथं किमिदमित्यजानान्न हि ॥

अथ दीर्घरात्रेण[2]तस्य गात्रे तासां नेत्रपात्रे सति किमिव विवरणीयं ॥

यतः ।—

चातुरक्ष्यमभवद्यदा हरे-
र्गोपिकाभिरभितस्तदा द्रुतं ।
चित्तमक्षियुगमप्यमूदृशां
हन्त ! हन्त ! जडवद्व्यजायत ॥

यस्यालोके निमिमपि निमेषाधिकारीति शेपु-
स्तावन्मात्रं विरहमनु या वीथयो[3]गोपिकानां ।
तास्तं वीक्ष्य प्रचुरविरह-ज्वालया लब्धतृष्णा
यामासेदुः प्रमदविकृतिं वक्तुमीशीत कस्तां ॥
उत्कण्ठाभिः सपदि शकटारोहणे प्राप मोहं
राधा यद्वत् कुरुभुवि तथावस्थमेषा विवेश ।

(१) शिक्यित ।

(२) चिरकालो दीर्घरात्र इति त्रिकाण्डशेषः ।

(३) पङ्क्तयः ।

किन्तु श्रीमान् जयति सुरभिः[(१)]श्रीहरेर्यः पराभि-र्गोपस्त्रीभिः सममरचयन्तामसुं वीक्ष्यमाणां ॥

स्तम्भः स्वेदः पुलकवलनागद्गदं कम्पसम्प-
द्वैवर्ण्यश्रीर्नयन-सलिलं सर्व्वबुद्धिप्रमोषः ।
एते भावा व्यतिमिलनजा राधिका-कृष्णयोर्ये
ते सर्व्वासामपि सवयसां व्यापकाः सम्बभूवुः ॥

अथ लब्धदुःखसम्पदुद्भवः कथमप्युद्धवश्चिरा-दुभयत्र च तत्र सान्त्वनया प्रणयाद्विनयादपि परस्परमभिमुखतया समुपवेशमानिनाय ॥

ततश्च तासु कृष्णस्य चरणमात्रं तृष्णया क्षोभाविलगात्रं पश्यन्तीषु वहिर्निर्गच्छदन्तर्व्वाष्प-तया कान्तिवलनाद्भ्रश्यन्तीषु च स तु करुणामयः कथञ्चिन्मार्ज्जितवाष्पतार्ज्जितसमयः[(२)] शनैः सनैः-पुण्यममूः प्रसादयामास ॥

यथा ।—

हरिरालिङ्गंश्चुम्ब,न्नश्रुविलुम्पन् शिवं पृच्छन् ।
व्रजसरसीरुहनेत्राः, कुरुभुवि विजने
ससान्त्वमस्तौषीत् ॥

---

(१) गन्धः । सुरभिर्घ्राणतर्पणः । धर्म्मपरः ।
(२) समयाः सपथाचारकालसिद्धान्तसम्विदः ।

तच्च[१]यथा ।—

कान्ता[२]कान्तप्रथमविरहादेव तान्ता नितान्त
देहस्यान्तं वत ! वितनुते तत्तु नात्यन्तचित्रं ।
नैरन्तर्य्यान्मदतिवियुतेः क्लान्तवन्तं पतन्तं
तं[३]रक्षन्तीर्मदनुगतये सन्ततं हन्त ! नौमि ॥इति॥

अथ कथं केवलमात्मदृष्ट्या कष्टं लभमानाः स्थ मां कथं न पश्यथेति वदन् पुनर्वदति स्म ॥

सर्व्वे वदन्तु मम रूपमिदं पुराव-
त्तत्तद्गुणैर्विलसतीति तु मन्ददृष्ट्या ।
दिष्ट्या विलोकयथ मां व्रजचारुनेत्रा
रासादिकेलिकलिता रुचिरत्र कुत्र[४] ॥

अथ युगपन्नेत्रयुगल-शतं किञ्चिदुन्नतं विधाय यथावदेव तथा तमवलोकमाना विस्मृतात्म-दुःखिताभिमानाः परमदूपमाना वभूवुः ॥

ततः स च भृशमेवान्यादृशतां सह्यमानस्तल्लघु-करणाय लघु हसित्वा किञ्चिदुवाच ।—

---

(१) स्तवनं । (२) काचित् । (३) देहं
(४)नास्तीत्यर्थः ।

यथा तदेवानूक्तं श्रीशुकेन ।—

"अपि स्मरथ नः सख्यः ! स्वानामर्थचिकीर्षया ।
गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ॥

अप्यवध्यायथास्मान् स्विदकृतज्ञाविशङ्कया[१] ।
नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ॥

वायुर्यथा घनानीक-तृण-तूल-रजांसि च ।
संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ॥

मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥

अहं हि सर्व्वभूतानामादिरन्तोऽन्तरं वहिः ।
भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरङ्गनाः ॥

एवं ह्येतानि भूतानि भूतेष्वात्मा[२]त्मना[३]ततः ।
उभयं मय्यथ परे पश्यताभातमक्षरे" ॥ इति ॥

तदेवं स्वस्मिन्ननीश्वरत्वाद्व्यवहारपरवशताकर-मीश्वरान्तरवशत्वमीश्वरत्वाद्भक्तमात्रं प्रति ब्रह्म-भावभावकत्वं तद्विधस्निग्धं प्रति तु तदतिक्रमिस्व-समर्पकत्वं पुनर्ब्रह्मत्वान्नित्यप्राप्तत्वं सुखैकरूपत्व-

---

(१) आविशङ्कया । (२) जीवः । (३) परमात्मना ।

मपि सचमानं(१)रचयतां स्ववचसामसम्बद्धतां(२) समग्रव्यग्रतया नाधिजगाम ॥

तत्र दुःसहविरहविधुरभावादविपश्चितामिव तासां(३)काश्चित्तु पप्रच्छुः ॥

हन्त ! सर्व्वकृच्छ्रविमुक्त ! किमुक्तमिदं । यत्खलु व्यतियुक्त(४)मिव न लक्ष्यते ॥

अथ तदधिगम्य नम्रमूर्द्धन्युद्धवे श्रीकृष्णस्तु तज्जया लज्जया तदेव सज्जयति स्म ॥

तथा हि ।—

अहो ! सख्यः ! कथमिव मामपि वीक्ष्य म्लान-मुख्यः स्थ ॥

अथ ब्रूथ;—

धिगस्मान् परित्यज्य त्वया दूरमव्रज्यतेति ॥

तत्र किं करवाम ? दुर्हृदां ततिभिर्य्या सुहृदां दुर्गतिर्जाता तस्यां सुहृदां गतितां याताः कथमिव वयमुपेक्षां प्रथयाम इति ॥

अथ विलम्बमानतामस्माकं विडम्बयथ चेत्तस्या-मपि तदेव(५) दुर्न्निवारं कारणं । यत एकस्मिन्न

---

(१) ईश्वरान्तरपरवशत्वमित्यादीनां विशेषणं ।

(२) अनर्थकतां ।　(३) मध्ये ।　(४) परस्परं योग्यं ।

(५) सुहृद्दुःखं ।

कंसे लब्धध्वंसेऽपि वहवस्तत्सम्बन्धिनस्तत्कर्म्मानुबन्धिनः सम्पन्नाः। तत्तद्ध्वंससाहाय्याय च मया नानाव्यवहाराणामेषां समाहाराः कृताः॥

तथापि भवद्वदनन्यवृत्तितारहिततया ममाकृतज्ञतापरं प्रतीयत इति चेदिदं सत्यं। परन्तु सहजप्रेम्णा मिथः सङ्गतानां योग-वियोगौ पुनरीश्वरकृतयोगावेव स्ववशतायां खलु वियोग एव न स्यात्, कुतस्तत्पूर्व्वको योगः॥

अथ यदि "नारायण-समो गुणै"रिति गर्गवचनानुसारेण नारायणमेव मां मन्यध्व तदापि भवतीभिर्योगः प्रेम्ण एव स्वाधीन इति तं भवतीनां परमः प्रेमोद्रेकप्रवेकः स एक एव झटिति घटयिष्यति॥

यतः।—"मयि भक्तिर्ही"ति॥

तदित्थमपि भवतीनां वहिर्दृष्टिमेवावष्टभ्य समाधीयते। अन्तर्दृष्ट्या तु भवतीभिः सह नित्यसंयुक्त एवेत्येत(१)दपि "मयि भक्तिर्ही"त्यादिस्वप्रतिज्ञामनुल्लङ्घ्य द्वयेनापरेण विव्रियते॥

यस्मादहमित्यहङ्काराख्यं तत्त्वं सर्व्वभूताना-

(१) नित्यसंयोगं।

माकाशादीनां यथाद्यन्तादिरूपं भौतिकानां च षड्जादिनामवेणुरन्ध्रादीनां यथाकाशादीन्याद्यन्तस्थादिरूपाणि एवं ह्येतानि भूतानि प्राणिनो जीवा भूतेषु स्वस्वदेहेषु तादृशानि ॥

एवमेव चात्मना परमात्मना आत्मा जीवस्ततो व्याप्तः । एवमिति परेणान्वयः । परत्र च पश्यतेत्यनेन तासामवधानविषयभाग एव पर्य्यवसीयत इति स्वीयपदमध्याहार्य्यं ॥

ततश्च यथापूर्व्वमुक्तमेवमेव । तदुभयविधं व्यापकव्याप्यरूपं[१] सर्व्वं स्वीयं मयि परे परत्र स्थितेऽपि अक्षरे परस्परस्फूर्त्तिप्रामाण्येन नित्ययुष्मत्सङ्गिनि आभातं मदाश्रयतया विराजमानं न तु प्राकृतानां तत्तद्भक्तीनं पश्यत सर्व्वदानुभूतं स्मरतेति ॥

तदेवमात्मानमधिकृत्य या शिक्षा तया तेन शिक्षिता गोपसीमन्तिन्यः पूर्व्वतद्विरहजानुस्मरणाविकलितजीवनाधाराः सम्प्रति पुनरन्तर्वहिस्तत्पर्यन्तं मयीति स्वयं निर्द्दिष्टं श्रीकृष्णलक्षणं नित्यसंयोगिनमेवाधिगतवत्यः । हन्त ! हन्त ! तदन्तरा तासां तदपि[२] सान्तरायं वभूव ॥

---

(१) अहङ्कारादि । (२) नित्यसंयोगे आभिगमनमपि ।

यत्र तदिदमपि ता ग्लपिता[१]"मयि भक्तिर्हि"-त्यादिना स्वप्रभावमयेन पुनस्तेन तर्पिता वाष्पस्नपिताश्चिरेणा ययाचिरे ।—

वृणीमहि पदाम्बुजं तव सरोजनाभ ! प्रभो !
मनस्यपि कथञ्चन स्फुरतु नः समन्तादिति ।
इदं हि वत ! योगिनां स्मृततया तमश्च्यावनं
वियोगिसुदृशां तया तमसि मज्जनं प्रच्युत ॥

एतदेव[२] भवताप्युद्धवं प्रति स्वयमुक्तं ।—

"मयि ताः प्रेयसां प्रेष्ठ दूरस्थे गोकुलस्त्रियः ।
स्मरन्त्योऽङ्ग ! विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥

इति ॥

यस्मा"न्मय्यावेश्य मनः कृष्णा"इत्यादिकया तव शिक्षयापि त[३]दस्माकं न सिध्यति गृहजनाधीनतया स्वच्छन्दमागमनं च न सम्भवति तस्मादस्य त्वत्पदाम्बुजयुगलस्य नित्यं व्रजमध्यासीनस्य दर्शनमेवास्मभ्यं सुखस्पर्शनमिति ध्वनितं ॥

तदेतदभिप्रायकं श्रीवादरायणि-वचनं ।—

"आहुश्च ते नलिननाभे"ति ॥

---

(१) गोप्यः । (२) स्मृततया तमोमज्जनं ।
(३) नित्यानुस्मरणं ।

अथ विवशतावशात्पुनर्मूर्च्छामृच्छन्ति स्म । यत्र मुहूर्त्तद्वयमेव पूर्त्तये बभूव ॥

तदनु श्रीकृष्णाश्च घृतकण्ठस्तदिदमाचष्ट ।—

अहो ! सर्व्वत्र सञ्चरितचरितशुद्धयस्तृष्णया विचारव्यभिचारचरिष्णुबुद्धयः किं सम्प्रत्येव युष्मान् प्रत्येवमुक्तं विस्मृतं ॥

ताः सगद्गदमूचुः ।—एवमिति किं ? ॥

स उवाच ।—"मयि भक्तिर्हि"त्यादि ॥

ता ऊचुः ।—

सत्यमुक्तं । किन्तु विरहशस्त्रिकया छिद्रिते हृदि न किञ्चिदाधेयतामधियाति । तस्माद्दृणामर्हीत्यादिना यदस्माभिर्व्यञ्जितं तदेवास्मभ्यं देहीति ॥

अथ स्निग्धकण्ठ उवाच ।—

ततस्तासां प्राणनाथः स तु किं व्यवसितवान् ? ॥

मधुकण्ठ उवाच ।—

यदाह श्रीबादरायणिः ।—

"तथानुगृह्य भगवान् गोपीनां स गुरुर्गतिः ।
युधिष्ठिरमथापृच्छत्सर्व्वांश्च सुहृदोऽव्ययं" ॥इति॥

तस्य रजनीविशेषस्य शेषमारभ्य तु रजनीवृत्तं दिग्दर्शनया परामृश्यते ॥

तदेवं ताद्दशप्रार्थनानुसारिसमनुगृह्य मुहुरागृह्य श्रीराधिकादिकाः प्रत्येकं रिङ्गदस्त्रमालिङ्गन् सङ्गिन-मुद्धवमाज्ञापयन्माधवः स्नानालङ्करणानि समा-माय्य ताः सम्मानयामास ॥

प्रच्छन्नमुवास च तां रजनीं तत्र। तासु लोकधर्म्म-विलङ्घिचरितासु निरोधनिर्व्वन्धकृतां सम्बन्ध-विशेषभूतामनागमनादगोचरतया स्वस्य च रहस्य-गमनात् परेषामतर्कितया त(१)दासीदिति ॥

तथापि ताः प्रथमरजन्यां तु विरहस्मरणानन्या-मेव वृत्तिमासेदुर्न तु सुखविलासधन्यां । क्रमादेव च तु दुःखातिक्रमादपरस्यामपरस्यां रात्रावेव चिररात्राय रतिपात्रायमाणा वभूवुः ॥

यथा ।—

प्रतिगोपि प्रतिरजनि
प्रतिमुहुरुद्यन्मनोरथप्रथनं ।
कुरुभुवि निशीथवीथिषु(२)
रहसि विहारं हरिर्विदधे ॥

---

(१)प्रच्छन्नवासादिकं । (२) श्रेणिषु ।

किन्तु ।—

यद्यपि वृन्दाविपिना,दन्यत्रासावमूभिरक्रीडत् ।
तदपि विना त[1]न्मेने,
ताभिस्तेन[2] च त[3]दप्यदः स्वप्नः ॥
यदपि व्रजकुलमहिला,
हरिरपि शश्वत्परस्परं भेजुः ।
तदपि न तृप्तिर्जज्ञे,
हृदि य[4]द्विरहौ गतागमिनौ ॥

तत्र च ।—

यद्यपि हरिणा गुप्ता
गुप्ताः स्वेनापि कौरवे क्षेत्रे ।
तदपि च कुलपति-महिला-
महिता[5] जाता गुणेन गोपाल्यः ॥

तत्र श्रीमन्महिषीणां श्रीराधामुद्दिश्य व्रजस्त्रियो यद्वाञ्छन्तीत्यत्र कृतशंसनं प्रशंसनं यथा ।—

इच्छामो न वयं तु विष्णुपदम-
प्यन्यस्य का वा कथा

---

(१) वृन्दावनं । (२) कृष्णेन सह ।
(३) क्रीडनं । (४) यतः ।
(५) महिलाभिः पूजिताः ।

किन्त्वेतस्य गदाग्रजस्य पदयोर्धर्त्तुं रजो मूर्द्धनि ।
राधाहृद्घुसृणां यतस्तृणामितं पश्चात्पुलिन्दीधृतं
गोपीभिः स्पृहितं ययोः(१) स सुरभि-
श्वेतो हरत्यद्य च ॥ इति ॥

इयमेव श्रीव्रजदेवीभिः सर्व्वोर्द्ध्वं श्लाघिता । "पूर्णाः पुलिन्द्य" इत्यादिना । "अनयाराधितो नून"मित्यादिना च ॥

मुनिभिस्तु नाम्नापि व्यक्तीकृता । "राधावृन्दावने वन"इत्यादिना ॥

स्निग्धकण्ठ उवाच ।—

'तथानुगृह्य भगवा"नित्यस्मिन् सर्व्वसुखरचने वादरायणि-वचने "युधिष्ठिरमथापृच्छ"दिति न सम्यगवगम्यते स्म ॥

ततो देशकालनिमित्तानां समावेशः प्रतत्य कथ्यतां ? ॥

मधुकण्ठ उवाच ।—

तासां वासः खलु श्रीरामावरजस्य स्नानादि-कर्म्मशर्म्मदं यदेकान्तहर्म्यं तदनुषङ्गं भजन्नुद्धव-धाम्नः संसक्ततया वहिरव्यक्त आसीत् ॥

---

(१) पदयोः ।

तत्र सति परमादृतानामपि युधिष्ठिरादीनां तस्यामेव रात्रौ कुरुक्षेत्रमागतानामपि तदावेश-वशेन श्रीकेशवेन मिलनायोगात्प्रातरागत्य सभा-सद्मन्युपविश्य स्थितानां प्रातरपि विलम्बत एव स्नानाद्याचर्य्य तेन मिलता कुशलप्रश्नो जात इति ॥

तदेवं सङ्क्षेपेणानुवर्ण्य श्रीराधिका-मुखविधुं निर्व्वर्ण्य मधुकण्ठः समापनं वर्णयति स्म ।—

कुरु-भुवि तव राधे ! वर्णयन् शर्म्म-जातं
व्यवहितमपि दिष्टेना(१)स्मि शर्म्मावृतात्मा ।
किमुत भृशमिदानीमामृशन् वां मिथः श्री-
परिमल-कुलभोगं चक्षुषोर्युग्मकेन ॥

तदेवमानन्दपर्य्यन्तमुदन्तं कुर्व्वन् पूर्व्वपूर्व्ववत् कथकः स्वानुजसहितः सर्व्वसंहितः स्वधाम जगाम ॥ श्रीराधा-माधवावपि विहारधाम कामयामासतु-रिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु पुरुसुख-
क्षेत्रकुरुक्षेत्रयात्रानाम त्रयोविंशं
पूरणम् ॥

---

(१) कालेन ।

चतुर्व्विंशं पूरणम् ।

अथ व्रजयुवराजविराजमानसदसि प्रातःकथायां स्निग्धकण्ठस्तदिदं प्रथयाञ्चकार ॥

लोकानां कुरुक्षेत्रयात्रासमृद्धिस्तु न वर्णन-पात्राय कल्पते ॥

ततश्च ।—

कुरुक्षेत्रान्तस्तैर्ग्रहग्रणभवयात्रामनुगतै-
र्गता[१] या याश्चेष्टा वहुनिजनिजेष्टाः कति च ताः ।
मया वर्ण्याः किन्तु स्मृतिविषयमेकां कुरुत या
हरेर्वक्त्रद्योतामृतरसिकता सर्व्ववितता ॥

तथापि सर्व्वतः समुपचितं यदस्मभ्यं रुचितं तदेव किञ्चिद्वर्ण्यते ।—

कुरुक्षेत्रे सूर्य्य[२]प्रशम[३]तमसि[४] व्यक्तमसि
व्रजाल्लब्धः कृष्णां व्रजनरपतिः स व्रजजनः ।

(१) प्राप्ताः । (२) क्षेत्रविशेषणं । (३) पचाद्यच् ।
(४) राहौ ।

वितर्त्तुं तं रत्नप्रचयमचकर्षन्निजपदाद्-[१]
यदालोका[२]दन्योऽप्यखिलनिजकर्म्म व्यतनुत ॥

धर्म्मं केचित्केचिदर्थं निकामं
कामं केचिन्मोक्षमप्यत्र केचित् ।
केचित्कृष्णे भक्तिमेते तु गोपा-
स्तस्मिन् भव्यं हव्यकव्येषु दध्युः ॥

अथ लब्धशर्म्मणि ग्रहणपर्व्वण्यपि पूर्णे दिवि भुवि च विराजमानाकृतीन् प्रजापतिप्रभृतीन् निजगुणस्थेम्ना पूरयन्नात्मना तु व्रजजनप्रेम्णा पूर्य्यमाणः स यदा हरिर्विराजते स्म तदा तदानन्दानुभवाय ब्रह्मनन्दनादयः सर्व्वे एव मुनयः समागताः ॥

समागत्य च ।—

न केवलं तस्य[३] तथा समुन्नतिं
निरीक्ष्य चित्रं मुनयस्तदा ययुः ।
विनम्रतां स्वेषु[४] च ये[५] परस्परं
विरुद्धभावे अपि जग्मतु रुचिं[६] ॥

---

(१) स्थानात् ।　　(२) द्योतात् ।
(३) कृष्णस्य ।　　(४) श्रीनन्दादिषु ।
(५) समुन्नतिविनम्रते ।　　(६) शोभां ।

ते तदिदमूचुश्च तत्र श्रीभागवतीयं पद्यं यथा ।—

"अद्य नो जन्म-साफल्यं विद्यायास्तपसो दृशः ।

त्वया सङ्गम्य सद्गत्या यदन्तःश्रेयसां परः" ॥इति॥

एतदनुसृतमन्यदीयमपि यथा ।—

यदपि वयं प्रतिकल्पं, नानारूपं तवाद्राक्ष्म ।

नवनवमिव तदपीदं, घटयति पुरुषार्थ-सारं नः ॥

किञ्च ।—

अपरो द्वापरान्तः[(१)] स्याद्वापरान्ताय[(२)] न क्वचित् ।

सोऽयं तु चक्लृपे तस्मै यत्र त्वं नेत्रगोचरः ॥इति॥

मनसि चेदं विचारितवन्तः ।—

यद्यपि यदवः सन्तत,सङ्गाः केचिच्च मर्म्मगा विष्णोः ।

विधिवाञ्छितपदरजस,स्त्वेते गोपा गिरां दूरे ॥

तदेवं विधिव[(३)] द्गोपानुगमित[(४)] दनुगमितामेव मनसिकृत्य गमनयाचनामनुसृत्य चलितवत्सु मुनिसत्सु श्रीमान् वसुदेवः स्ववसुसाफल्य-कामनया तानिदं निवेदयाञ्चकार ।—

कर्म्मणा कर्म्मनिर्हारो यथा स्यात्तथा यथा-वदुपदिशतेति ॥

---

(१) द्वापरयुगान्तः ।

(२) सन्देहनाशाय । द्वापरो युगसंशयौ ।

(३) विधातृवत् । (४) विधि ।

अत्र व्रज-भक्तितर्षी श्रीदेवर्षिस्तु चेतसि विविवेच ।—

नायं नन्दवच्छुद्धपितृभावमयस्नेहतया वृद्धः । येन नन्द एव "नन्दः किमकरोद्ब्रह्म" न्नित्यादिना सर्व्वतः स्तूयते सोऽयं तु न तथा प्रस्तूयते ॥

किन्तु भगवत्त्वज्ञानेन सहित इत्येवमहितः । तेनानेनास्य जन्मत एव हि "विदितोऽसि भवा"-न्नित्यादिना तत्त्वबोध एव संहितः । पितृभावस्तु तेन पिहितः ॥

तस्माद्विद्यमानेऽपि कृष्णे तमिममर्भकान्तरवदज्ञं मत्वा कर्म्मनिर्हारमात्रतृष्णेन न तु नन्दवत्तदभ्युदयमात्रतृष्णेनानेन यदस्मासु प्रश्नविधानं तन्न शोभानिधानं भवतीति ॥

स्पष्टं चाचष्ट ।—

"नातिचित्रमिदं विप्रा ! वसुदेवो वुभुत्सया ।
कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः" ॥
इत्यादि ॥

अथ मुनयस्तस्य सङ्कोचं विलोचमाना रोचनाय तदिदमूचुः ।—

"कर्म्मणा कर्म्मनिर्हार एष साधु निरूपितः।
यच्छ्रद्धया यजेद्विष्णुं सर्व्वयज्ञेश्वरं मखैः"

इत्यादि ॥

अथ ते च मुनयस्तेन वृता ऋत्विजः कृतास्तमयाजयन्।—

यस्मिन् बर्हिषि याजका विधिसुता
याज्यः स शूरात्मजः
सोऽयं शक्रजयी बलेन सहितः
पुत्रीभवन् पार्षदः(१)।
श्रीमन्नन्दमहाशयः स्वयमसौ
लब्धानुमोदः स्थित-
स्तस्मिन् वैदिकलौकिकाः सुविधयः
स्युः केन वर्ण्या भुवि ॥

किन्तु तस्मिन्नपूर्व्वान्तरभावना न पूर्व्वसूरिभिर्मता ॥

यतः।—

द्विपरार्द्धस्थिराः सर्व्वे दृष्टवन्तो विधेः सुताः।
य(२)दपूर्व्व(३)ममन्यन्त तदेवापूर्व्व(४)मिष्यते ॥

---

(१) सभासद्। (२) श्रीकृष्णादर्शनं।
(३) आश्चर्य्यं। (४) यज्ञाज्जातमदृष्टं।

ततश्च ।—

कृष्णस्यापि विशिष्य विस्मितिकरं
कृष्णाख्यरूपं तथा
वृष्णीनां वलयं तदेकशरणां
गोपांश्च तज्जीवनान् ।
दर्शं दर्शममी यदप्यपगमं नैच्छंस्तथापि स्वकां
जानन्तोऽनधिकारितां वत ! तदा
वाञ्छन्ननुज्ञां ततः ॥
कृष्णात्मियजनसहिताद्-
यद्यपि मुनयो व्रजन्त आसंस्ते ।
तदपि च तत्तच्छोभा-
स्फुरणात्तत्रैव वासमासन्नाः ॥इति॥

अथ स्नेहानुबन्धिनः सर्व्वान् सम्बन्धिनः स्वस्व-मन्दिराय विहाय यदर्थमेतत्तीर्थयात्रां मिषपात्राय कल्पितवानयं गोकुलकुल-पालकस्तान् गोकुल-पतिप्रभृतींस्तत्रैव कृतावस्थानः स्थापयामास ॥

दुग्धं विना तेषामवस्थानं मुग्धं न स्यादिति गाश्च काश्चन तत्र प्रस्थापयामास । यस्यामव-स्थितौ परपक्षवञ्चनार्थं तत्रस्थनानातीर्थक्रमणा-च्चिरता परस्परदूरशिविरता च तदुभयेन प्रचारिता ॥

यत्र श्रीमद्व्रजवासिनस्तन्मात्रार्थविवेचनतया तत्रागताः सुधासत्रायमाणं तमुपलभ्य नापरत्रान्तःकरणं चक्रुः ॥

यत्र व्रजराण्मिथुनं[१] पुनः पुनरपि विकसितसुतशाततरङ्गजातमपि सुतप्रसूतसुकुमारकुमारवारः स्फारघनरस[२]प्रसारसारमासादयामास ॥

सुधाकिरणकारणकिरणगण इवाकूपारं ।

तत्र च ।—

कुरुभुवि गता यशोदा,-
सुततनः यानन्वलालयद्बहुधा ।
किन्तु श्यामलवाले,
क्वचिदपि लेभे चमत्कृतिं प्राग्वत्[३] ॥

किन्तु तदेवं परस्परं पूरणमपि परालक्ष्यतापरतया परं तैर्विरचितं ॥

यत्र तु ।—

कुरुक्षेत्रे गोधुग्गृहगणमनोभिर्व्रजसमं
समं रामेणागान्मुहुरथ मुहुः केवलतया ।

---

(१) कर्म्म । (२) निबिडरसः पक्षे जलं ।
(३) श्लोकोऽयं कस्मिंश्चित् पुस्तके नास्ति ।

जनन्यां यत्तेने शिशुरिव हरिस्तत्र चरितं ।
सुखं वा दुःखं वा तदिति विमृशन्मुह्यति मनः ॥

अथ लब्धावसरः कदापि शूरतनयवरः सहानीतसर्व्वपरिकरः करस्पृष्टतत्करस्तं श्रीमद्व्रजराज्यधरमुवाच ।—

भ्रातरीशेन रचितं वैचित्र्यं चित्रमीक्ष्यते ।
आत्मारामाश्च योज्यन्ते स्नेहेन गृहिणश्च न ॥
पश्यापि धीरधीरस्मत् स्नेहेन त्वं नियन्त्रितः ।
अहं स्वार्थपरोऽपीदं विदंश्चानेन वर्ज्जितः ॥
तथापि त्वं तु नास्मत्तः क्वचिद्भ्रातर्विरज्यसे ।
तथापि सोऽहं युष्मासु रज्येय न मनागपि ॥
दारिद्र्यं पङ्गुतालक्ष्मीं राध्यं दृश्येत मादृशां ।
येन(१) पूर्व्वं यया(२) पश्चान्न त्वादृ(३)श्युन्मुखी गतिः ॥
एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः ।
रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥

अथ मधुकण्ठः पप्रच्छ ।—

अत्र व्रजराजः किं व्याजराजः किं व्याजहार ? ॥

स्निग्धकण्ठ उवाच ।— न किमपि ॥

मधुकण्ठ उवाच ।—हन्त ! कथमिव ? ॥

---

(१) दारिद्र्येण ।　(२) लक्ष्म्या ।　(३) त्वद्विधे ।

स्निग्धकण्ठ उवाच।—

जहार यस्य पुत्रं तत्[1]स्निग्धतां यः स्मरत्यथ।
स्निह्यतस्तत्र[2] पुत्रेच्छोस्तस्य मौनं हि शस्यते॥

मधुकण्ठ उवाच।—कथ्यतां तावदग्रिमं वृत्तं?॥

स्निग्धकण्ठ उवाच।—

अथ व्रजराजमहाशयः सख्युर्वसुदेवस्य प्रियकरतयानभिव्यञ्जितनिजाशयः श्रीगोविन्द-रामयोः प्रेम्णा तस्मिन्नश्वमेध इव शीघ्रं लब्धव्यत्यये मासत्रये शास्त्रविनिवारणादिकार्येषु च हरेरपरिहार्येषु स्वयमेव चिरगोव्रजात्यजनवर्जन[3]व्याजमासज्य स्वव्रजगमनार्थं न तु कृष्णानयनार्थं श्रीवसुदेवमर्थयामास॥

तच्च[4] नाह्वानुवर्त्तितया किन्तूद्धवमध्यवर्त्तितया।
साक्षादर्थनायां शालीनता लीनतामापद्यत इति॥

श्रीकृष्णं तु न तादृशतयापि गन्तुं ययाचे॥

तथा हि।—

यस्य प्राग्विरहात्क्षणां युगतया वेत्ति स्म यं वीक्षितुं
ज्ञात्वानन्यमुपायमव्रजदयं क्षेत्रं कुरूणां द्रुतं।

(१) तत् पुरुषः। (२) वसुदेवे।
(३) अत्याग। (४ गमनं।

तेन प्राणसुतेन हन्त ! चिरतः संसज्य गन्तुं गृहं तत्रानुज्ञपनाय जल्पतु कथं साक्षादसाक्षादपि ॥

शूरजः स्वसुतमेव यं विद-
न्नाश्रितः श्रयति दिव्यसम्पदं ।
तं ततः प्रियसुहृद्वरात्कथं
याचतां स[1]सुतमुत्कधीरपि ॥

अतस्तादृशतद्व्यवहारतः श्रीवसुदेव एव केवलं स्नेहमवलम्बमानः सवाष्पगद्गदनिगदः श्रीरामकृष्णौ तत्सम्वासाय सायततृष्णौ त[2]दर्थितं ज्ञापयामास ॥

श्रीकृष्णस्तु तदाकर्ण्य सवैवर्ण्यमुखं राममुखमीक्षामास ॥

श्रीरामश्च साञ्जलितावाम[3]मवामं[4]निवेदयामास ॥

तात ! वयं विचार्य तदिदं निवेदयिष्याम इति ॥

अथ त[5]दनुकूलतावितर्कमूलतया सम्भजदुद्-

---

(१) श्रीनन्दः । (२) नन्द । (३) यथास्यात् ।
(४) यथास्यात् । (५) वसुदेवं ।

वाभ्यां प्रलम्बजिदुद्धवाभ्यां सुखसम्पदारोहिण्या रोहिण्या च सार्द्धं विचार्य्य निर्धार्य्य च आरामावरजः स्वाग्रजमेव गृहं यातायं तातायं[१] निवेदयितुं योजयामास ॥

स च तत्र गतः सपरामर्शमाह ।—

पितरौ यदि दत्ताभयवितरौ भवेतं तदा तदिदमनन्वितभेदं[२] निवेदयाम ॥

तावूचतुः ।—कामं ॥

राम उवाच ।—

स्नेहं ह्यपश्वयथस्तात! मातर्व्रजमहेशयोः ।
तयोः कथमभीष्टं तन्नयथः स्वेष्टतां न वा ॥

श्रीवसुदेव उवाच ।—किं तत्तदीयमिष्टं ? ॥

श्रीराम उवाच ।—

तत्किं भवन्तोऽनुभवन्तो न भवन्ति ? ॥

श्रीवसुदेव उवाच ।—

अनुभवन्त एव स्मः किन्तु भवदनुजे तयोः पुत्रतया गाढ एवाभिमान इति वाढं शङ्कामहे ।

---

(१) वसुदेवाय । (२) भेदरहितं ।

कदाचिदयं सन्ततभाववशात्स्वभावशुद्धवुद्धस्तत्र निरुद्धः स्यादिति ॥

श्रीरामः सहासमुवाच ।—

अहमपि तावद्दर्भत एव भवद्भिरर्भकरक्षणार्थमक्षमतया स्वभवनाच्चालितस्तैरेव पालित इति तदीयतामेव सम्यगर्हामि ॥

किमुत स तु जातमात्रः स्वयमेव भवता तथा व्यवहृतः ॥

ततस्तेषामेवास्मिन्नस्य च तेषु स्वीयतयाङ्गीकृतिः सङ्गीभवितुमर्हति । न तु भवतां तत्र तस्य वा भवत्सु । तद्वैपरीत्येऽपि तेषां भवत्सुखेनैव सुखं प्रतीयते भवतां तु न तत्सुखेनेति ॥

किं वहुना ? धार्ष्ट्येन । न च स खलु ममानुजवरः कस्यचित्कष्टं द्रष्टुं शक्नोतीति कृतं कृतक-(१) चिन्तया ॥

श्रीवसुदेव उवाच ।—

भवतु; किमथ विधेयं तद्विधीयतां ॥

---

(१) कृत्रिम ।

श्रीराम उवाच ।—

इदानीमपि विधत्त[1] यन्मध्ये मध्ये कुरुपुरवल्लजसदनमपि तेनानेनासाद्यतामिति ॥

अथ श्रीवसुदेवः स्वान्तश्चिन्तयामास ।—

सत्यं वदत्यसौ । तथा पुत्रपौत्रादिगार्हस्थ्यप्राशस्त्यस्वस्त्ययनः सोऽयं कथमत्रत्यत्यागमापद्येतेति ॥

स्पष्टं चाचष्ट ।—

भ्रात्रा नन्देन मम देहमात्रान्तरता । तस्माद्यथेच्छमेव तत्र गच्छतु चात्रागच्छतु च सोऽयमुभयेषां प्राणमूलं । अथ तत आगतात्तदेतदग्रजादाकर्णयन् श्रीकृष्णः प्रणमन्नश्रुभिर्वचनाद्विरमंश्च न तु फुल्लवदनश्चिरमासीत् ॥

अथ कृष्णरामोद्धवरोहिणीभिः सह स्वयमेवानकदुन्दुभिः श्रीमन्नन्दस्य शकटमन्दिरमनुगम्य तमपि यथायथं सङ्गम्य रम्यमिदं जगाद ॥

भ्रातर्नन्द ! सुतस्तवाथ मम वे-

स्यास्मिन्नभेदः क्वचिद्-

यत् कृष्णस्तु जगाम नैतदवधि

त्वन्मन्दिरं तच्छृणु ।

---

(१) कुरुत ।

अस्माकं किल शात्रवक्षयकृते
सोऽयं त्वया रक्षितः
कृत्यं शेषमपेक्षते प्रतिलवं
तस्मिन्न् यियासन्नपि ॥

तदेवं लब्धसुखानामपि श्रीमन्नन्दप्रमुखाणां श्रीशुकमुखादुदितविरचनेन "कृष्णो कमलपत्राक्ष सन्न्यस्ताखिलराधस" इति वचनेन पुरा श्रीकृष्णवियोगदुःखादपरतृष्णाविमुखानां तन्मङ्गलाय सत्सु समर्पितत्रिवर्गणां चिराय वाञ्छितं व्रजाय तदागमनमञ्चितु[१]मसमर्थानां सम्प्रति च किञ्चिद-प्रतीतिकिञ्चित्प्रतीतिक्षुभिततत्तदर्थानां भावनेयं जाता हन्त! हन्त! सन्ततमस्माभिः प्रार्थित-व्रजागतिरयं तदस्माकं जानात्येव सम्प्रत्यत्तिमनोरथपथस्वजनधनसम्पदस्त्याजयितुं योग्यतां न यात्येवेति च व्रजनयनाय न साक्षाद्विज्ञापयितव्यः सोऽयं किमुतात्र क्षात्रनीत्या कर्तुमारब्धत्रिलोकीभव्यः ॥

तथापि शश्वदभ्युदयायास्मासु दयालुतया मुहुः कृतप्रतिज्ञतया चावश्यमागमिष्यति ॥

---

(१) प्राप्तुं ।

किन्त्वीदृशमीदृशमस्य समर्य्याद[1] स्थित-ममर्य्याद[2] मेतदीयसदुपचर्य्या[3] पर्य्यापनं दिव्यं दिव्यं द्रव्यं प्रति यथास्वमस्माकं मनोरथाः प्रथि-मान[4]मात्मानमानयन्तीति तदिदमिदमेव काम-नीयमिति ॥

अथ कंसमथनश्चेदं भावयामास ।—

पूर्व्वपूर्व्वमुदयदपूर्व्वयोगेन सान्त्वप्रयोगेण मया-मीषु कदर्थनापरं फलाय कल्पिता न तु सदर्थना । ततश्च नाधुनापि तादृगुक्तानां विषयीकर्त्तुममी युक्ताः ॥

किन्तु सर्व्वान्तःपातितया प्रीतिदानव्याजान्म-दुपभोग्यतायां योग्यानां वस्तूनां प्रस्थापनया निजं साम्प्रतं व्रजप्रस्थानं सूचितं कर्त्तुमुचितं ॥

यस्मादेव खल्वेषां मन्मात्रकामनाशेषाणां तथा तत्र स्थितानां मत्प्रीतिमात्रजीवनतापात्र तत्तद्वि-शेषाणां कामना पूरिता स्यादिति ॥

तदेवमेव मुनीन्द्रः प्राह ।—

"ततः कामैः पूर्य्यमाणाः सव्रजः सहवान्धवः । पराद्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥

---

(१) निकट । (२) मर्य्यादा । (३) सेवा । (४) पृथुत्वं ।

वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः ।
दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ" ॥इति॥

किन्तु ।—

चलनसमये या यावस्था व्रजेशपुरःसरव्रजपरि-
षदामासीदेषा कथं बत ! वर्ण्यतां ॥

मनसि च[१]गता यस्मादस्मादृशामपि सा सदा
वपुषि गिरि च स्फूर्त्तिं वर्ण्या[२]श्रियामथ लुम्पति ॥

ज्ञात्वा तेषां हृदयवपुषोः शक्तिहानिं प्रयाणे
शत्रुश्रेण्याः प्रतिहतिमपि प्रान्तरा[३]न्तर्वितर्क्य ।
भृत्यैः सूतैः[४]कटकपटलैरप्यमीषां समन्ता-
द्व्याजादनुगतिमितैर्याप्यं प्राप कृष्णः ॥

कथञ्चिदपि माथुराननुगताः कुरूणां स्थला-
द्व्रजेन्द्रमुखगोदुहः पुनरुपेतुमात्मालयं ।
विरक्तमनसस्तदा तपनजां समुत्तीर्य्य गो-
रवीतिविदितस्थले व्रजमवासयन् दूरतः ॥

गोकुलपतिरिति गोउरव, इति तद्वार इत्यपि च ।
संस्कृतजं प्राकृतजं, ग्राम्यजमाख्यानमञ्चति
स्थानं ॥

---

(१) अप्यर्थे । (२) कान्तिरस्तूरञ्च ।
(३) प्रान्तरं दूरशून्योऽध्वा । (४) सारथिभिः ।

गोकुलपतिरिति नाम्ना,ख्यातं गोकुलपतेः स्थानं ।
पुरुषोत्तम इति यद्व,त्पुरुषोत्तमधाम विख्यातं ॥

अथ कथकेन तदेतत्प्रोच्य तूर्णं परिशोच्य समा-
पयितुं तदिदं रुच्यमुच्यते स्म ।—

तदयन[1]मभिनौमि तच्च लग्नं
व्रजपतिवासशुभंयुमञ्जु रूपं ।
य[2]दुदितशुभवैभवान्मुरारि-
र्व्रजसुहृदां विरहं निजं लुलोप ॥

तदेवं व्रजराज-सभाकथायां पूर्णायां श्रीराधिका-
सदसि कथायां स्निग्धकण्ठस्तदिदमुवाच ।—

अमूस्तु श्रीमदानकदुन्दुभिसम्वि[3]न्मयं तत्तद्वर्ण्य-
मानमाकर्ण्य तानि भावितदुपसेवार्थताभावितानि
स्वस्मिन्नपि प्रीतिदानानि निर्व्वण्य वैवर्ण्यवशादिदं
व्यानञ्जुः ॥

विलम्वमानेनानेन किमस्माकममूनि विलम्व-
नानि[4]रच्यन्त इति ॥

कृष्णास्तु तदुद्धवद्वारा शृण्वन् सलज्जं सन्दिदेश ।
पूर्व्वमुपक्रमत एवेदं मया निवेदितं ॥

---

(१) पन्थानं । (२) यस्मिन्नयने लग्ने । (३) प्रतिज्ञा ।
(४) डलयोरैक्यं ।

"अपि स्मरथ नः सख्यः ! स्वानामर्थचिकीर्षया
गतांश्चिरायितान् शत्रुपक्षक्षपणचेतसः" ॥

इत्यनेन स्वल्पावशिष्टानामशिष्टानां विनष्टीकरण-
कारणमेव मम किञ्चिद्विलम्बसम्वलनमस्तीति ।
तस्मादुभयेषामस्माकं यावद्दिष्टदिष्टं[1] कियन्ति
दिनानि पूर्ववद्वियन्ति प्रतीक्ष्यतां ॥

अथ श्रीगोप्यस्तु तदेतन्नासत्यमिति मनसि
चिंतत्य समयान्तरे समक्षं[2] तं प्रति व्यक्तमुक्त-
वत्यः ।—

तव सत्यगिरः कृष्ण ! स्यात्किं सङ्गिरो-[3]
रन्यथा ।
किन्तु तां मादृशामाशां यदि कालः सहेत सः ॥

अथ श्रीकृष्णस्तु ताः प्रत्येकमालिङ्गन्निदमङ्गी-
चकार ॥

यो भवतीभिः कृष्णः, स्वीचक्रे[4]कालपर्य्यायः ।
तेनैव स्थ[5]व्याप्ता,तस्थानान्यः प्रभुस्तत्र ॥

---

(१) कालं । (२) मिलितं । (३) प्रतिज्ञा ।
(४) पूर्वपद्ये । (५) भवथ ।

तदेवं सति ।—

यस्याः प्रातरथाचलद्व्रजजनः
स्वान् माथुरान् सा तमी-
शीघ्रं पूर्त्तिमवाप यद्यपि कुरुक्षेत्रस्थगोपीगणे ।
मय्यद्यापि तमांसि हन्त ! तदपि[1]
स्फूर्त्तिं नयन्ती न सा
वाञ्छत्यात्मसमापनामुभयथा[2]
भीतिर्हि तत्कारणं ॥

अथ कथकः समापनमाह ।—

चित्रं कुरुक्षेत्रमिहा[3]परत्र[4]वा
प्रतिश्रुतं[5]वीजमुवाप यत्प्रभुः ।
तत्तत्र लब्धां कुरुतामुपागतं
वृन्दावनेऽविन्दत राधिके ! फलं ॥

यदर्थं यूयं तद्विनशनमगात व्रतपरा
यदर्थं स्वावासं विससृज वनान्तर्जगृह च ।
स एष श्रीराधे ! तव हृदयनाथः पुनरमू-
स्त्वदादीरालिङ्गन्निह वसति हीही सुखसुखं ॥

---

(१) तथापि । (२) समाप्तावसमाप्तौ च ।
(३) कुरुक्षेत्रे ! (४) मथुरादौ ।
(५) आयास्यामीति प्रतिज्ञारूपं ।

अथ तदेवं सुखयित्वा सखीनात्मसङ्गे गृहीत्वा कृतचलने कथकयुगले श्रीराधा-कृष्णमिथुनं तु निजमनोरथमेव प्रथयामास ॥

इति श्रीमदुत्तरगोपालचम्पूमनु पुनर्व्रज-
वासिव्रजव्रजनं नाम चतुर्विंशं
पूरणम् ॥

पञ्चविंशं पूरणम् ।

अथापरेद्यवि रविविद्योतमानायां द्यवि[१] व्रजयुवराजविराजमानव्रजराजसमाजमधिकृत्य मधुकण्ठ उवाच ।—

अथ द्वारकापतेः पुनर्द्वारकागारताऽनारता जाता। यत्र यथापूर्व्वं तत्तदपूर्व्ववृत्तज्ञानाय श्रीव्रजक्षितिपतिना वैवधिकाः[२] पुनरपि तदब्धिनग[३]दर्पचधि प्रस्थापिताः। ये खलु पूर्व्वस्मादपूर्व्वतया सुकुमाराणाममीषां कुमाराणामपि नमस्कारादिकमासादितं चक्रुः। तेषु कयोश्चिद्वैवधिकयोरागतयोः कथनं ॥

यथा ।—

व्रजराज ! तदिदपूर्व्वं श्रूयतां। श्रीराम-रामानुजौ यदा गायत्रं व्रतमनुगतवन्तौ तदाचरणाय स्वं

---

(१) नगरी। (२) वार्त्ताहराः। (३) द्वारका।

निह्नुतवन्तौ च तदाध्ययनार्थमवन्तीमध्यास्थितगुरु-
कुलं गतवन्तौ ॥

तत्र च यदा समावर्त्तन[1]मनुवर्त्तमानावभूतां तदा चाचार्य्याण्या याचितं मृतं तत्पुत्रं यमादाचितवन्तौ। तच्च पूर्व्वं देवकीदेवीश्रवसि पर्य्युप्तं विधाय तदिदं मनसि निधाय च चिराय गुप्तं चकार ॥

कंसकृतहत्यानि मम षडपत्यानि चायत्यां साग्रजः कदाचिदयं याचितव्य इति। सम्प्रति पुनस्त[2]दनुजं प्रति द्विधाभावविधामस्मद्व्रजविश्वधात्री[3]रक्षाविधात्रीसम्बन्धादनुसन्धाय तत्तदपत्यसम्पत्त्यर्थमपि सम्प्रतिपत्तिमवाप तत्फलाचयनाय तस्मिन्नुवाप च याचना-बीजं ॥

तदेतद्दूतवचनं श्रवसि रचयन्तः सर्व्वेऽप्यूचुः ।—

तदेतत्पूर्व्वस्मादप्यपूर्व्वं जातं। यत्तयोरपि सुततयावगतयोः सुतान्तरस्पृहाति ॥

दूतावूचतुः ।—

सुततावगतिरत्र तावदनयोर्विचार्य्या प्रभावावलोकात्-पारमैश्वर्य्यावगतिः परं पर्य्यालोच्यत इति ॥

(१) पठनसमाप्ति। (२) बल। (३) पालयित्री।

पुनः सर्व्वे प्रोचुः ।—

प्रभुता व्रजपति-सूनो,मैत्री सुखमेव वर्द्धयति ।
मरिचं खण्डजलड्डुनि, मधुररसं चारु पुष्णाति ॥

दूतावूचतुः ।—

लवणाकरन्यायेन भवतामिव कस्य वा सर्व्वमेवैकरसतामाप्नोतु ॥

व्रजराज उवाच ।—

यथातथा भवतु लब्धकृष्णलब्ध[१]तत्तृष्णायो-[२]र्म्महदेवान्तरं । तस्मादग्रिममनुक्रम्यतां ॥

दूतावूचतुः ।—अपूर्व्वान्तरं श्रूयतां ॥

ततश्च सुतलमवलम्बमानौ वल-वलानुजनामानौ वलिना वलित[३]कंसहृतवालावलिना[४]पूर्व्वपूर्व्वसङ्गृहीतपरमदिव्यसामग्रीभिः सम्यग्प्रीति पूजयामासाते । पूजितौ च तौ तान् षड्गर्भनाम्ना समाम्नातान् कंसलब्धकालान् वालानादाय दर्भस्थलीमाजग्मतुः ॥

यत्र वहुविधं वलिं लभमानौ तद्बलिसद्म[५]वलि-

---

(१) कृष्ण । (२) मम वसुदेवस्य च ।
(३) सङ्गृहीत । (४) वालकपङ्क्तिना ।
(५) पातालं ।

सम्प्रतया कलितवन्तौ । किन्तु तत्राप्येवमपूर्व्वं श्रूयतां ॥

यद्यपि तत्र च भगवान्, साक्षादास्ते वलेः सदने ।
तदपि सरामं कृष्णं, पश्यन् स तमपि विसस्मार ॥
विस्मृत्यात्मार्पणपद,भगवद्रूपं[1]वलिस्तत्र ।
आत्मानं सहनिखिलं, ताभ्यां[2]पुनरर्प्पयामास ॥

विस्मृत्येति किमेत,-

द्वारस्थितमपि ददर्श तं न वलिः ।
कृतमपि त[3]त्प्रणिधानं,[4]
दर्शनसंस्कारसादभूदनयोः[5] ॥

दुर्लभमननं केवल,मिह न वलेः कृष्णराम-वीक्षायां ।
गद्गदपुलकस्तम्भ,खेदाद्यावेशिताप्यासीत् ॥इति॥

अथ सर्व्वेऽपि पप्रच्छुः ।—

कुशस्थल्यागमनसमनन्तरवृत्तमुच्यतां ॥

दूतावूचतुः ।—

तत्राप्यपूर्व्वं जातं । यतस्तयोर्विद्यमानयोरपि देवक-सुतायास्तेषामवलोकनादस्तोकस्तन-क्षरणं जातं ॥

---

(१) वामनरूपं । (२) रामकृष्णाभ्यां । (३) वामन । (४) कर्त्तृ । (५) रामकृष्णयोर्दर्शने लयं प्रापेत्यर्थः ।

तथापि तु तस्य(१)तेषामपि फलकलनाय कृष्णः सतृष्ण इव तत् प्राक् पीतवान् । पश्चादेव निजावशेषपानपुण्यविशेषं परिवेशयन् स्वस्मिन्नेव पुत्रभावं विशेषयंस्तान् दिविषदां ध्येयं धाम गमयामास ॥

तदेतदप्युपलक्षणमेव । य(२)मितः पूर्व्वं देवभागपूर्व्वज(३)स्तत्त्वग्रामनिरूपणपूर्व्वकेण तदीश्वरताप्रतिपत्तिभिरपूर्व्वेण पूर्व्वपक्षेण स्वस्य तस्मिन् पुत्रभावं प्रक्षिप्तवांस्तमेव स खलु गोकुलस्नेहमयदेहः स्वयमुत्तरपक्षं कृतवान् ॥

यथा च सस्मितमाह स्म ।—

"वचो वः समवेतार्थं तातैतदुपमन्महे ।
यन्नः पुत्रान् समुद्दिश्य तत्त्व-ग्राम उदाहृतः" ॥

इति ॥

देवकी-वृत्तं पश्यद्भिस्तु मुनिभिस्तदिदं गीतं ।—
पुत्रान् कामयते स्म देवकसुता

सापान् मृतांस्तानसावानीय प्रददौ तदर्थविसृतं स्तन्यं च तस्याः पपौ ।

---

(१) स्तनक्षीरस्य । (२) पुत्रभावं ।
(३) वसुदेवः ।

एवं हन्त ! मनोरथान्तरमपि प्रापय्य तस्यां पुनः
स्वीयं शर्म्म परं ररक्ष विसृजेत्
किं तां यशोदामपि ॥इति॥

तदेवं दूत-वचनं लब्धवर्णा[1] कृतनिर्णयरचनं कर्णेषु सचमानास्ते सुख-प्रचयमवापुः ॥

अथ कथकः समापनमाह स्म ।—

यदागमनवार्त्तया व्रजपते ! सुखं यद्भवान्
मुहुः समुपलब्धवांस्तदधुना ह्वयं[2]त्वत्पुरः ।
नवीनघनसुन्दरं तडिदभीषुवस्त्राश्रितं
शिखण्डरुचिमण्डितं स्फुरदभेदमुद्भ्राजते ॥

अथ तद्दिन एव श्रीमन्नन्दतनन्दन-सदसि कथान्तरं । यथा मधुकण्ठ उवाच ।—

अथ श्रीदेवक्या मनोरथं पूरयित्वा श्रीयशोदायाः पूरयितुं मुरमथनस्तदिदं चिन्तितवान् ॥

हन्त ! कुरुक्षेत्रे व्रजराजादीन् प्रति पुरुव्यञ्जितं नाद्यापि सञ्जितं । यन्मगधपाल-शिशुपाल-शाल्व-दन्तवक्राह्वयशक्रारिचक्रमतिक्रामदेव वर्त्तत इति ॥

तदेतद्विचिन्त्य ब्राह्ममुहूर्त्तमारभ्य नित्यं यद्यद-

---

(१) लब्धवर्णा विचक्षणाः । (२) सुखं कृष्णश्च ।

भ्यस्तं स तदानीमपि तच्चकार । यदादिकं तु तदा दूत-मुखाद्व्रजराजः श्रुतमाचचार ॥

यथा ।—

उत्थानाचमनात्मचिन्तनसरः-

स्नानोदकस्थक्रिया

वासोयुक्[१]परिधानसान्ध्यविधियुग्[२]

गायत्रजप्याहुतीः ।

रव्यर्घामरतर्पणार्षिसुरपित्रात्मीयविप्रार्च्चना

वद्धा[३]ख्यान्वितसङ्ख्यधेनुवितरानप्यत्र चक्रे हरिः ॥

गोविप्रादिकवन्दनं शुभपद[४]स्पर्शं निजालङ्कृतिं

सर्पिर्द्दर्पणगोसुरद्विजसमालोकं जनानन्दनं ।

स्रक्ताम्बूलविलेपदानमनु तद्भोगं विधायाजितः

सूतानीतमथारुरोह सरथं तत्पाणिभृत्पाणिकः ॥

सात्यकयुद्धवसम्बद्धः सरथं तमशोभयत् ।

विष्वक्सेनसुपर्णाढ्यो विष्णुर्वा[५] रविमण्डलं ॥

अन्तःपुराणां हृद्रत्नान्यपनीय वहिर्भवन् ।

तैर्नेत्रेणापि निर्वद्धः स्मेरदृग् निरगात् प्रभुः ॥

---

(१) युग्म । (२) युक्त ।

(३) त्रयोदशसहस्राणि चतुरशीतिश्च ।

(४) मङ्गलवस्तु । (५) इवार्थः ।

ततश्च ।—

क्वचिज्जयजयप्रथा क्व च नमोनमःसन्ततिः
क्व च श्रुति-ततिः क्व च स्तुतिकथा हरिं पश्यतां ।
इदं तुमुलचर्य्यया न हि विविक्तमासीद्यद-
प्यथापि सुखमादधे स्वनकुलं विविक्तादपि ॥

अथ सुधर्म्म(१)सभां स्वपथेत्तकै-
र्यदुगणैर्विशति स्म जनार्द्दनः ।
हृतषडूर्म्मिरियं स्वत एव या
किमुत शर्म्म-ततिप्रभुणामुना ॥

श्यामैर्गौरैरपि रुचिगणैर्देहरत्नाम्बराणा-
माशा व्याप्ता यदि मुररिपोरस्तु वार्त्ता सभायाः ।
यत्रामी तद्रुचिचयचिताः पार्षदा यादवाद्याः
सारूप्यश्रीचितिमिव गता राजिवद्धा विरेजुः ॥

विप्रैर्मागध-सूत-वन्दि-भरतैर्वैहासिकैश्च प्रति-
स्वं विद्याचयचायकै(२)र्वलयिते राजादिभिर्भ्राजिते ।
तस्मिन् विस्मितिकारिहारिसदसि
　　　　　　　प्रत्येकमीत्तां नयन्
स प्रत्याय्यखिलेन पश्यति हरि-
　　　　　　　र्मामेव नान्यानिति ॥

---

(१) नान्तोऽयम् ।　　(२) दर्शकैः ।

तदेवं स्थिते मणिघटितलकुटधारी प्रतिहारी हारि तदिदं व्याजहार ।—

देव ! कश्चिदपरुषताजुषः[(१)] पुरुषः सुषमारहित-मुखतया द्वारि वर्त्तते ॥

श्रीकृष्ण उवाच ।—आनीयतामिति ॥

ततस्तेनानीतः स चातिविनीतः साश्चर्य्यतया लोचयामास ॥

यथा ।—

तापत्रयविनाशाय सोऽयं तोयधिसप्रभः ।
यदुद्यत्कीर्त्तिचन्द्रश्रीशीतलं पृथिवीतलं ॥

अथ प्रणातसर्व्वाङ्गतया साङ्गं नमस्कृत्य कृतकृत्य-म्मन्यः स धन्यः पुरतः समागच्छ स्वच्छन्दमिति पुरःसरतया दत्तयदृच्छां[(२)] तत्पृच्छामनुगच्छंस्त-दिदमञ्जलिवलितं निवेदयन् पर्य्यालोचयामास ॥

एते लोकास्त्रिभुवनजुषोऽप्यत्र कृष्णेऽनुरक्ता
दृश्यन्ते यत् पुलककुलयुग्नेत्रनीराः स्फुरन्ति ।
तस्माद्गोप्यं यदपि तदिदं मागधानद्धभूभृ-
त्सन्दिष्टं स्यात्तदपि सदसि प्रस्फुटं जल्पितव्यं ॥

---

(१) इगुपधात् कः । (२) स्वैरितां ।

अथ निवेदयामास च ।—

पूर्व्वं मधुरारोधनार्थमलब्धानां ततश्च कृतदिग्विजयनिर्ब्बन्धजरासन्धविहितबन्धानां लब्धमरणानुबन्धानां भवदेकशरणतानुसन्धानां राज्ञामयुते द्वे युते सती निवेदयतः ।—

अगणितगुणरूप ! कृष्ण ! कृष्ण !
स्वकशरणागतपालकस्वभाव ! ।
वयमिह भवतः पृथक् पुमर्था
इति भवमुक्तिकृते तवास्म भक्ताः ॥
वयमिह शरणागताः परे त्वयि
विमुखा इति गर्व्वितं दधानाः ।
तमपि च निजभावमाश्रयाख्यं
मलिनमकृष्महि हन्त ! कंसहन्तः ! ॥
वयमघमपरं परं वहाम-
स्त्वयि परमे यदधाम दोषहारि ।
स्वयमवति[1] भुवं हरौ कथं न-
स्तपति विकर्म्मगतिः[2] परेण[3] नाथ ! ॥
वयमिह न भवद्विशुद्धभक्ता
न च शरणागतिमागता भवत्सु ।

(१) सति ।　　(२) कर्त्री ।　　(३) शत्रुणा द्वारेण ।

परमिह नृपकर्म्मशर्म्म(१)लोभा-
दनिशमिता वत ! तत्तदात्मदम्भं ॥
वयमिह वत ! मायया विमूढा-
स्त्वमसि निजाश्रितपालकाङ्घ्रिपद्मः ।
इति मगधनृपाहृकर्म्मपाशा-
दपि परिमोचय नः स्वयं परेश ! ॥इति॥

तदेवं तेषां वाचिकवचनानन्तरं दूतः स्वयमुवाच ।—

दुष्टत्वारसमुद्र-कुम्भजमुनिः शिष्टान्धताकृत्तमः-
सूर्य्यः पापचरित्रता-कृतयुगं दीनार्त्ति-धन्वन्तरिः ।
सोऽयं चेत्पृथिवी-तले वत ! भवान्
कृष्णात्मना राजते
तृष्णा कस्य कथं कथा-विषयतां
सिद्धिं विना यास्यति ॥

तृष्णा तु तेषां केवलकृष्णाकारमाधुरीसारविषया ।
लज्जातिशयादेव हि नात्मना व्यक्तीकृता ॥

यस्मादेवं तस्मात् ।—

"तेषां मागधरुद्धानां भवद्वीक्षणकाङ्क्षिणां ।
त्वत्पादपद्मभक्तानां दीनानां शं विधीयतां" ॥

---

(१) कर्म्मरूप ।

यतस्त एवेदं मध्ये मध्ये परस्परं सास्र-कम्प-सम्पन्निवेदयन्ति ।—

यस्मात्पूतनिकापि दिव्यसुरभिस्तद्दुग्धदावानला-द्य[१]र्थः शुद्धसुधासहृक्नग[२]तति-

वंश्यादिनादा[३]र्द्रिता[४] ।

कुब्जाश्रीमृदुला तथा यदुजरद्वृन्दं वयः सुन्दरं जज्ञे तस्य सुगन्धितादिसुगुणाः

कर्षन्ति चित्तं मुहुः ॥

श्रीब्रजसदस ऊचुः ।—ततस्ततः ? ॥

दूतौ सानुतापाभासहासमूचतुः ।—

अथ तत्र प्रतिविधिमभिधित्सति माधवे सुर-मुनिवरः शरद्वारिधर इव शुभ्रस्तडिन्निभकेशान् बिभ्रन्महती[५]ध्वनिमन्दगर्ज्जमर्ज्जन् दृष्टितः सुख-मयवारिधारावृष्टिं कुर्व्वन्नेवागच्छन् सर्व्वं रसान्तर-मासादयामास ॥

यत्र स्वयं कृष्णश्च तदीयभक्तितृष्णः सन्नभ्यु-त्थाय तं वन्दते स्म ॥

---

(१) आदिना कालीयह्रदादि ।
(२) शैलवृक्षौ नगावगौ । (३) स्वन ।
(४) आर्द्रीकृता । (५) वीणाभेद ।

अथ सभाजयित्वा भ्राजयित्वा च तदिदमपि वन्दमानः[1] पृच्छति स्म ।—

पर्य्यङ्क् पर्य्यटतस्तवानुमिलनाद्विश्वं भवेद्भव्ययुक्
तत् पृच्छामि तु किं त[2]दद्य वलते
मत्स्नेहमोहात्मनः ॥
तच्चेदस्ति विशेषतः पुनरिदं[3] कुर्व्वेऽनुयोगास्पदं
ते कुन्ती-तनया मदेकगतयः किं वृत्तयः साम्प्रतं ॥

अथ देवर्षिरुवाच ।—

तव यशसाऽजनि शान्ति-
र्जगति विनापि श्रमेण वृष्णीश ! ।
तस्मात्किल मम गीता-
स्खलितवतीति प्रियां जना जहति ॥

सर्व्वं त्वद्वैभवं मन्ये यल्लोकस्याथ यन्मम ।
तस्मात्त्वद्वाचरः सर्व्वं तथाप्याज्ञां करोमि ते ॥

इन्द्रप्रस्थमहेन्द्रः स त्वामेव मखपुरुषं मत्वा राजसूयनाम्ना मखेन्द्रेण यष्टुमिच्छति ॥

श्रीकृष्णः सहासमुवाच ।—

मामन्तरीणप्रेम्णा परमसुखस्थेम्ना जयत एवासौ किं राजसूयेन ॥

---

(१) स्तुवन् । (२) पर्य्यटनं । (३) वक्ष्यमाणं ।

देवर्षिरुवाच ।—

तेनासौ पारमेष्ठ्य-श्रियं कामयते ॥

श्रीकृष्णः पुनः सहासमाह ।—

तर्हि सकामकर्म्मा किमसौ ब्रह्मणः सालोक्य-मभीप्सति ? ॥

देवर्षिरुवाच ।—न हि न हि किन्तु तव ॥

श्रीकृष्ण उवाच ।—

परमेष्ठित्वं मम कया वाचा प्रतिष्ठितं ? ॥

देवर्षिरुवाच ।—

"तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिन" इति पृथुकतण्डुलाख्याने पण्डितवचनप्रसिद्ध्या ॥

श्रीकृष्ण उवाच ।—तर्हि च सकाम एवासौ ? ॥

देवर्षिरुवाच ।—न हि न हि ? ॥

किन्तु समवलोकिततादृशभवद्विभवः स्वगृहमागमनेनानुगृहीतवति भवति लज्जते कृच्छ्रमपि सज्जते । न भवादृग्योग्यं भोग्यमस्तीति ॥

श्रीकृष्ण उवाच ।—

तेन विभवेन कथं राजसूयाद्भूयेत । राजसूयमपि महाराजसमाजयाजकतासाधनमिति दुःसाधमेव इदं ॥

देवर्षिरुवाच ।—

भवांस्तावदनुमोदतां तदा सर्व्वमेव प्रमोदपदतां प्रयास्यति ॥

यतः ।—

यत्रानुमोदस्तव कृष्ण ! तत्र
समागमः[१] स्यादिति विज्ञ-गीतिः ।
समागमो यत्र च तत्र सर्व्वे
सिद्धिप्रदाः स्युस्तव वीक्षणाय ॥

तदेवं देवर्षिवर्णितमाकर्णयति सर्व्वान्निर्व्वर्णयति च दामोदरे तदनुमोदरहितान् जरासन्धवध-निर्व्वन्धसहितान् स्वसम्वन्धसाहितान् स्वहितान् प्राश्निकान्[२] वीक्ष्य श्रीनारदं च द्वारकागतं निज-विभवसारं द्रष्टुं प्रतिष्ठमानं निरीक्ष्य सहसा स्वय-मासनादुत्थितः सुधीः स धीसचिवान् विना प्रायशः परेषां स्वस्य गृहगमनं प्रतीक्ष्य पुनरुद्धवं षट्प्रज्ञ-म[३]पि तत्पुरस्तादज्ञमिव स्थितं सुखनिर्म्माणे-ङ्गितभाङ्गि[४] वीक्ष्यमाणो तस्मिन् सो[५]ऽयमज्ञानिं

(१) तवेत्येव ।
(२) सभ्यास्तु प्राश्निका इति त्रिकाण्डशेषः ।
(३) धर्म्मार्थकाममोक्षेषु लोकशास्त्रार्थयोरपि । षट्सु प्रज्ञा भवेद्यस्य स षट्प्रज्ञ इति स्मृतः ।
(४) यथा स्यात् । (५) उद्धवः ।

ववन्ध । बद्धाञ्जलिमपि तमेनं कञ्जाक्षः सञ्जितादर-
तया सर्व्वसमञ्जसं जगाद ॥

सर्व्वेषां द्विद्विचक्षुर्विलसितवपुषां नस्त्वमेकं सुचक्षु-
स्तस्मात्त्वामेव नित्यं वयमिह निखिलाः
श्रद्दधाना भजामः ।
सम्प्रत्येतच्च वर्त्मद्वयमथ स भवान्
गम्यमस्मि[१]न्नगम्यं
स्यादीदृक्कारतम्यात्प्रथयतु सुमते !
मा तु सङ्कोचमत्र ॥

तदेवं ।—

निखिलविदपि कृष्णः स्वीयभक्तं महिम्ना
कलयितु[२]मुभयेच्छां[३] जातपृच्छाश्चकार ।

ततश्च ।—

तदखिलमहिमज्ञोऽप्युद्धवस्तान्निदेशं
शिरसि दधदिवासौ निर्म्ममे त[४]द्विनम्रं ॥
विचारयाञ्चकार चान्तस्तदिदं ।—
तत्तन्मतं तत्तदभीप्सितप्रदं
हरेर्मतं सर्व्वसुखाय कल्पते ।

---

(१) प्रस्तावे । (२) सङ्गमयितुं ।
(३) इच्छाद्वयं । (४) शिरः ।

ततो यथासर्व्वसुखं[१] सुखं भवे-
द्देवं विचारं रचयामि वच्मि च ॥

वक्ति स्म च व्यक्तमिदं ।—

भूम्यादिप्रकृति[२]स्रष्टा यस्य प्रकृति[३]रुच्यते ।
तस्य प्रकृति[४]सिद्ध्यर्थं प्रकृति[५]र्न प्रतीक्ष्यते ॥

सामादि[६]भिर्नृपः कैश्चित्सेव्यः कैश्चिद्भवानपि ।
परमर्थविदः पूर्व्वे परमार्थविदः परे ॥

त्वदाधीनश्चतुर्व्वर्गः किं त्रिवर्गस्य[७] नीतिभिः ।
वृद्धिक्षयस्थानरूपः स भूपानां परा गतिः ॥

अनन्ताः शक्तयस्ताश्चेत्तिस्रः[८] काः शक्तयस्त्वयि ।
तथापि कुतुकान्नाथ ! नाथसे[९] मन्त्रिणामपि ॥

---

(१) अव्ययीभावः ।

(२) भूमिरापोऽनलो वायुः खं मनो बुद्धिरेवच । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधेति श्रीगीतातः । (३) माया ।

(४) स्वाम्यमात्यसुहृत्कोषराष्ट्र दुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।

(५) मन्त्री । (६) नीति । पक्षे वेद ।

(७) क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां ।

(८) शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ।

(९) मन्त्रिणो वाञ्छसि ।

नित्यं यत्रास्ति षाड्गुण्यं(१) षाड्गुण्यं(२) तत्र किं परं ।
अथापीच्छल्लोक-रीतिं नीतिं गोविन्द ! विन्दसि ॥

नृपाणां तापनिर्व्वाणं निर्म्माणं तस्य च क्रतोः ।
द्वयमेतत्पुरा कार्य्यं कार्य्यं नाना विहाय च ॥

जरासन्धवधादेव देव ! स्याद्द्वयमेव नः ।
राज्ञां मुक्तिस्तथा युक्तिर्दिग्जयाद्(३)यज्ञनिर्म्मितौ ॥

यथा दोषाकरस्येन्दोश्छिन्दन् पक्षद्वयं(४) मुहुः ।
छिनत्त्यतिक्रमं(५) भास्वान्मागधस्य भवांस्तथा ॥

व्यक्तं स्वेन मुहुस्त्यक्तं नह्यमानं प्रसह्य तं ।
हन्त ! हन्तव्यतां नेतुं भवान् यायान्न योग्यतां ॥

स यज्ञो जितदिक्चक्र(६)दिक्चक्रजयिनां क्रिया(७) ।
यियक्षून् पाण्डवानेव देव ! तत्तत्र वर्त्तय ॥

तेषां भीमः सदेहास्ति हास्तिना(८)युतशक्तिकः ।
जिगीषे द्वैरथेनै(९)व नैव सैन्येन यश्च तं ॥

---

(१) ऐश्वर्य्यवीर्य्ययशःश्रीज्ञानवैराग्यरूपं ।

(२) सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः षाड्गुण्यं ।

(३) हेतोः । (४) स्वपक्षाभिन्नपक्षौ ।

(५) मलमासरूपं । (६) तथा चक्रं यस्य ।

(७) अजहल्लिङ्गं । (८) हास्तिनां इदं ।

(९) द्वन्द्वयुद्धेन ।

अक्षौहिणीशतयुजा तेन[१]युद्धे तु तद्युजां[२] ।
राजसूयं राजनाशान्नाशावद्धं च सिध्यति ॥
जरासन्धवधो धीमन् ! भीमसेनेन सिध्यति ।
किन्तु त्वत्प्रेरणातन्त्रो मन्त्रोऽयं मयका[३]यथा ॥
वलवान् भीमसेनः स्यान्मन्त्रवान्पुनरुद्धवः ।
इति प्रसिद्धतादम्भात्तत्तदारम्भता तव [४] ॥
त्वां विना कोटिकटकान्मन्त्रतन्त्रायुताद्यपि ।
स[५]नान्यतन्त्रः स्याद्यद्वदात्मा[६]यं तार[७]मन्तरा ॥
सदम्भमपि हन्तव्या[८] हन्तव्या[९] इति नीतिमत् ।
तस्मादन्योऽपि दम्भः स्यात्तदारम्भकृते[१०] कृते[११]॥
यस्माद्ब्रह्मण्यदेवधुग्धत्ते ब्रह्मण्यतामिषं ।
तस्मादस्माकमपि स ब्रह्मतामिषमर्हति ॥
रामात्मनोरेव युद्धं मत्वा स त्वा[१२]पि सेनया ।
अरुन्धद्द्वन्द्वयुद्धं तन्न बुद्धं तस्य दुर्म्मतेः ॥

---

(१) मागधेन ।
(२) अक्षौहिणीशतयुजां । अर्थात् पाण्डवानां ।
(३) मया । (४) न भीमोऽहं च तथेत्यर्थः ।
(५) जरासुतः । (६) जीवः । (७) अन्तर्यामिणं ।
(८) अहार्ये । (९) आवश्यकार्य्ये ॥
(१०) प्रत्ययं । (११) कर्म्मणि । (१२) त्वां ।

यद्यसौ सत्यतातत्याद्द्वन्द्वयुद्धं प्रपद्यते ।
सत्यतां विप्रतामत्या विप्रलब्धिं तदार्हति ॥
तस्मादमुं विप्रलब्धं कुरुताद्विप्रतामिषात् ।
भीमं भीमं विधायाग्रे जिष्णुस्त्वं जिष्णुना
सह ॥इति॥

किम्बहुना ? सर्व्वे एव योद्धारो वोद्धारो वा त्वाम[1]न्ववेति लीलामात्रं तत्तदिति ॥

श्रीव्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ते सर्व्वे सर्व्वतोभद्रमुद्धवस्य मतं तदा ।
आनर्च्चुर्वेदभणितं यथा धर्म्मादितत्पराः ॥
इति ॥

अथ व्रजस्थेषु भिन्नमर्म्मणा कृष्णाकरणीय-ताहृशदुष्करकर्म्मणा लब्धचिन्तावस्थेषु सान्त्व-नार्थमागन्तुकः कश्चिद्द्विपश्चिदुवाच ।—

सेयं स्वप्रभोर्भावं प्रभावमपि विज्ञातुस्तस्य मन्त्र-ज्ञतातद्विज्ञानां श्लाघामेव द्राघीयसीं करोति ॥

---

(१) त्वत्तो हीनाः ।

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

तदेतत्पर्य्यन्तं पर्य्यालोच्य भाविनमर्थं सव्यामोह-मनुशोच्य तावेतावाजग्मिव । अन्यौ तु शेषं विशेषवृत्तमादायागच्छन्तावेव स्तः ॥

तदेवं समाप्य मधुकण्ठ उवाच ।—

पूर्व्वं ऽयद्विरहेण गोप-नृपते ! पुत्रस्य यूयं गता
दूनत्वं स्मृतिसङ्गतेऽप्यनुपदं तत्रा(१)ऽनुतप्यामहे ।
तद्दूरेऽस्त्वधुना नवाम्बुदरुचिः पीतांशुकश्चन्द्रकी
वंशीपाणिरुदेति हन्त ! तदपि त्वं तेन(२) सन्तप्यसे॥

इति ॥

तदेवं व्रजदेवं प्रति सुखमाधाय श्रीराधा-माधव-सभायामपि तदिदं भासयामास ॥

भक्ता वः पूर्व्वमासन् वृषरविदुहित-
स्ते भविष्यन्ति चान्ये
सन्त्येके च स्फुटन्तु स्फुरति परमसा-
वुद्धवः सर्व्ववुद्धः ।

---

(१) दूनत्वे ।　　(२) विरहेण ।

योऽयं तत्रापि युष्मान् यदुवर-सदसि

स्मारयन् यादवेन्द्रं

गायन्तीत्यादिपद्यं किल भवदभिधा-

युक्तमुक्तं चकार ॥

तथा हि ।—

"गायन्ति ते विशदकर्म्म गृहेषु देव्यो

राज्ञां स्वशत्रुवधमात्मविमोक्षणञ्च ।

गोप्यश्च कुञ्जरपतेर्जनकात्मजायाः

पित्रोश्च लब्धशरणा मुनयो वयञ्च" ॥

अस्यार्थः ।—

सर्व्वे भक्तास्तावत्तव सर्व्वेषां दुष्टहननभक्तरक्षा-लक्षणं विशदकर्म्म गायन्ति ॥

तत्र प्रस्तुतमवधीयतामित्याह ।—

गृहेष्वेव स्थित्वापि त्वामुद्दिश्य दैन्यमाविश्य प्रार्थयमाना देव्यः स्वपतीनां नृपतीनां स्वशत्रु-जीवनमोक्षमात्ममोक्षं च गायन्ति ॥

तत्र दृष्टान्तमिव कुर्व्वंस्तत्र च सामान्यतामा-रोप्य गोप्यन्तराणि सङ्गोप्य विशिष्टमपि निजा-भीष्टं विज्ञापयति । गोप्यश्च स्वशत्रोः शङ्खचूडस्य वधं तद्धस्तादात्मविमोक्षणं च गतक्षणगतमपि

सम्प्रति भवदुद्भवभवद्विरहशत्रुवधाद्याशावधान-
बाधया गायन्ति ॥

अथ तद्द्वयरक्षामेव द्रढयति "कुञ्जरपतेरित्यादिना"।
तव जन्मान्तरजन्मापि तेषां तयोर्द्वयं वयं गायामः।
तासां तासां पुनर्लब्धफलप्रकाशायामेव तत्तदाशायां
गास्याम इत्यतः पूर्व्वासामिव परासामपि सा
तद्विधा विधातव्येति ॥

यथा च गजेन्द्रस्य लब्धशरणा जना जनकात्म-
जायाश्च मुनयः स्वशत्रुवधादिकं गायन्ति पित्रोः
श्रीदेवकीवसुदेवयोस्तं तञ्च वयं यद्वत्वो गाया-
मस्तथेति ॥

अथ मधुकण्ठः समापनमाह स्म ।—

तदेतत्प्राचीनं कथितमिह वृत्तं मुररिपो-
रभूद्दुःखं यस्मिन् विरहमयमाभीरसुदृशां ।
इदं[1] पश्याद्यश्वः प्रकटमिव भाति स्फुटमथा-
प्यमुं सम्भोगाख्यप्रमदमथ पुष्णा[2]द्विलसति ॥

तदेवं वृत्ते वृत्ते सर्व्वेण सह कथकद्वये च गृह-

(१) वृत्तं । (२ वृत्तं ।

वर्त्मानुवृत्ते श्रीराधा-गोविन्दावानन्दमन्दिरं विन्द-
मानावात्मलीलामेवानुविन्दतः स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु शुद्धसम्वि-
दुद्भवमन्त्रणातन्त्रं नाम पञ्चविंशं
पूरणम् ॥

षड्विंशं पूरणम् ।

अथ प्रातर्व्रजराजयुवराजविराजमानपरिषदि स्निग्धकण्ठः प्राह स्म ।—

अपरौ सन्देशहरौ समागम्य तदेतदवादिष्टां । श्रीव्रजराज ! श्रूयतामुद्धवमन्त्रणापरतन्त्रतया नियन्त्रितायामन्येषां स्वतन्त्रतायां तत्रानुमोदमानः श्रीदामोदरः सपरिकरस्वयात्राकृते मात्रा[1] निष्क्रमयितुमनुक्रमयामास ॥

यस्य प्रथमतः पुरूनपि गुरून् प्रति स्वमनुज्ञापयामास ॥

यत्र च नृपतिमुग्रसेनं कामपालकाम[2]सहायतया पुरमनु स्थापयन्नुग्रसेनतया स्थापयामास ॥

ब्रह्मसूनुमुनिं सुनिहितपूजासमुदायं विहाय सा गच्छन्तं विहाय गृहाय निवृत्य प्रस्थानकृत्यं चातस्थे ॥

---

(१) मात्रा परिच्छदः । (२) बलप्रद्युम्न ।

ततश्च ।—

परिच्छदपरिकरपरिषत्सु निर्गमकृत्सु तदीयसमृद्धिकलकलवृद्धिभ्यां वार्द्धिरपि निहतर्द्धितां मूकतां च प्रानश्च ॥

यत्र वैजयन्तिकाभिचर[1] पुरःसराः सर्व्व एव जङ्घाला दृष्टा न तु मन्थराः ॥

यत्र वन्दिजनसन्दिता भोगावलयः[2] पथि भोगावलय इव सर्व्वेषां मुदं ददिरे ॥

यत्र काण्डीरशाक्तीकयाष्टीकमुखशास्त्रिणः ।
नैस्त्रिंशकैस्तथा पारश्वधिकैरन्विता ययुः ॥

वादित्र-ध्वज-पत्ति-कुञ्जर-रथ-स्त्रीरत्न-यानाम्पनः-
क्षुद्रानः शिविकास्तथार्थभरभागुष्ट्रादयश्चक्रमुः ।
येभ्यो दूरगतानभिज्ञमविदुः पूरं महावारिधे-
र्येष्वन्तःपतितास्तथा न विविदु-
र्निर्यातिरुच्चैः कुतः ॥

ततश्च ।—

यस्मिन् पैतृष्वसेयाः कुरुकुलजवराः
प्रीतियाञ्चानिदानं

---

(१) ध्वजधारि । अनुप्लवः सहायश्चानुचरोऽभिचरः समाः ।
(२) विरुदावलिभेदाः ।

यस्मिन् देवर्षिवर्य्या दिवि भुवि विदिता
वाचिकानां निधानं ।
प्रस्थातुं सम्भ्रमेऽस्मिन् यदुकुलकलिते
कोऽहमित्थं विदूरे
वृत्तं तं राजदूतं निकटमुपनयं-
स्तुष्टुवे यस्तमीडे ॥

यथा हि ।—

"राज-दूतमुवाचेदं भगवान् प्रीणयन् गिरा ।
मा भैष्ट दूत ! भद्रं वो घातयिष्यामि मागधं" ॥

इति ॥

विविधजनपदं ततः समन्ता-
न्निजमहसा परिषिच्य कृष्णचन्द्रः ।
द्रुतमभजत तातभागिनेय-
क्षितिप-सवाय(१)कुरुक्षितीश-देशं ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततस्तमनुज्ञाप्य भवत्पदपद्मपद्ममावाभ्यामाप्यते स्म । अन्यत्तु दूतद्वयं तदीयसरण्यनुगतमागत-प्रायं वर्त्तत इति ॥

(१) युधिष्ठिरयज्ञाय ।

अथ तत्कथनानन्तरमेव तावपि प्रथमानतदनु-
बन्धावूचतुः ।—

इन्द्रप्रस्थमुपागा,द्विधुरथ विकिरन् यदा किरणां ।
तं(१) वारिधिवत्फुल्लं, तर्ह्युरवभ्राज तन्नगरं ॥
नगरं तमुपाभ्राजी-
दिति किं वाच्यं स तस्य राजापि ।
राजा तमुपाभ्राजी-
दिति किं वाच्यं जगच्च त(२)त्कुतुकं ॥
पाण्डुज-वृष्णिज-कटकं, निकटं निकटं मिथो
गच्छत् ।
सुबहलजलपूराभं, तद्द्वयमासीद्व्यतिस्फीतं ॥
पाण्डुषु धर्म्मसुताद्या,वृष्णिषु कृष्णः स्वयं तत्र ।
अभजन्निमेषलोपं, तत्तद्दूरं तदान्वेषुं ॥
प्रेमा जनयति सङ्गं, सहृदयजनयोर्मिथः परितः ।
हरि-पार्थ-व्यतिमिलनं, स्तम्भाश्रुभ्यामतस्तम्भत् ॥
प्रेमा हरिसञ्जनक,द्विप्रदशायामपि ध्रुवं पश्य ।
हर्षं स्तम्भकमतियत,
कर्षकमौत्सुक्य(३)मार्पिप(४)त्तेषु ॥

---

(१) कृष्णां । (२) कर्म्म ।
(३) कर्म्म । (४) प्रेमा कर्त्ता ।

उभयं प्रेमाणि सास्रं, तादृक् पश्यन् जनः स्निग्धः ।
उभयं प्रणयजयुक्तया,
वीक्षितुमुत्तया प्रभुं[1] मिथश्चक्रे ॥

द्रवतां समभजदजितः,
प्रणतावस्थामजातशत्रुस्तु ।
स[2] कथमिमं[3] प्रति न मिले,
दकलि[4] तथा यज्जलस्थलयोः ॥

प्रतिपाण्डव-मिलनं तद्, यद्यपि जातं हरेस्तदपि ।
जयतादर्ज्जुनसङ्गः, पुलकयति स्माखिलं यस्तु ॥

हरिणा पाण्डुषु मिलनं,
मनसि न नः स्यादिहातिचित्राय ।
तेषामनुषङ्गिष्वपि, तद्याद्विविधं तदा दृष्टं ॥

विनयाद्विप्रादिभ्यः, सूतादिभ्यस्तद्वानयात् कृष्णः ।
अचिनोदशीर्व्वादा, नाशीर्दातापयसौ समस्तेभ्यः ॥

प्रविशति नगरं हरौ स राजा
तदकृतमङ्गलि[5] तस्य मङ्गलाय ।
यदभवदुत तत्प्रवेशलक्ष्म्या
निजमनु माङ्गलिकं तथा जगच्च ॥

(१) द्रष्टुं समर्थं ।
(२) द्रवीभूतः कृष्णः । (३) नम्रं राजानं ।
(४) जनैः । (५) मङ्गलयुक्तं ।

यदेन्द्रप्रस्थाख्यं नगरमविशत् कंसविजयी
तदान्येषां वृत्तं निखिलमपि दूरे विजयतां ।
असूर्य्यम्पश्यास्ता यदि सपदि लोकादपि ह्रियं
न जग्मुः सङ्कोचं क्क किल कलमं[1] कः कलयतु ॥

यदावरोधं प्रविवेश केशवः
क्षितीश-पत्नीभिरितं तदा वयं ।
वहिश्च वृत्ताः शृणुमः स्म तद्वचः
प्रत्येकमल्पं च[2] बहूक्तमित्यतः ॥

पश्य पश्येति पश्य त्वमहमश्रुपराहता ।
वर्षवर्षेति[3] वर्षाणि[4] पुष्पलाजादिमङ्गलैः ॥इति॥

प्रेम्णा विमुग्धेषु सुतेषु शुरजा[5]
भ्रातुस्तनूजस्य चकार लालनं ।
तस्यास्तदाज्ञामुपलभ्य तद्वधू-[6]
र्वधू[7]रुपासेवत देवता इव ॥

तदेतदन्तर्वंशिकानां[8] शांसितं कर्णावतंसितं विधाय तद्द्वारा तदनुज्ञामादाय च शीघ्रमागच्छाव इति तयोर्दूतयोः कथा ॥

---

(१) अतिशयेन कं सङ्कोचं ।
(२) अल्पार्थे । (३) पुनःपुनः । (४) वृष्टिं करवाणि ।
(५) कुन्ती (६) द्रौपदी (७) रुक्मिण्याद्याः ।
(८) अन्तःपुरेष्वधिकृतः स्यादन्तर्वंशिको जनः ।

अथ दूतान्तरयोः ।—

तदेवं नित्यमेव श्रद्धावद्धाञ्चिततया नूतनागतिकृतीव सति दिनानि कतिचिद्वसति च तत्र विष्टरश्रवसि कदाचिदुपविष्टतया तेषां शिष्टसमुदयविशिष्टां सभां भासयन् भ्रातृभिर्वेष्टितः सुभगचेष्टितः स्थिरः स तु युधिष्ठिरस्तदिदं निवेदयामास ।—

पूर्व्वाभिप्रायवेष्टयमानपारमेष्ठ्यकामनां तु न वचसि रचयामास ॥

निवेदनं यथा ।—

सर्व्वताप-प्रालेय! श्रीमन्मातुलेय! किमपि चापलमवलम्बितुमाज्ञा-बलं बलयितुमिच्छामि ॥

श्रीकृष्ण उवाच ।—काममाज्ञाप्यतां ॥

युधिष्ठिर उवाच ।—

विभूतिस्तव देवाद्या मम कुर्व्वद्धमात्रजा ।
तथापि तां(१)यियच्चामि तत्सम्पादय मे प्रभो ! ॥

श्रीकृष्ण उवाच ।—

धर्म्मसुतस्य तव सर्व्वमिच्छामर्म्मशर्म्मणा सम्पत्स्यत एव ॥

---

(१) देवादिरूपां त्वद्विभूतिं ।

किन्तु कतमेन साधकतमेन तन्निरूप्यतां ॥

युधिष्ठिर उवाच ।—

प्रीणाति राजसूयेन त्रिलोकीति सतां मतं ।
यदस्य क्रतुराजत्वमपि वेदेन गीयते ॥

श्रीकृष्णः सस्मितमुवाच ।—

राजन् ! वेदविनाशकान् विना विश्वेऽपि मत्प्रीतिमन्तः परामृश्यन्ते । मत्तर्पणादेव देवतादयस्ते लब्धवितृप्त्या तृप्त्या स्पृश्यन्ते च ॥

तस्मान्नित्यं मत्तृप्तिं कुर्व्वतां भवतां तत्तृप्तिर्नापूर्व्वतामर्हति । तथापि यदि राजसूयेन च सा तत्र भवद्भिरिष्यते तदा तेनापि सम्भूयते ॥

तदपि सुसिद्धङ्करं[१] भविता नान्येनेव दुःसिद्धङ्करं[२]। किन्तु सुखान्तरमपि तत्र मां सुखाकुर्व्वीत[३] । यस्मादेव च त्रिलोकीमपि तव कीर्त्तिचन्द्रिका स्यक्ततन्द्रिका नन्दयिष्यति ॥

तदुपकरणं च भवदन्तःकरणानुरूपमेव स्तूपता-[४]माप्स्यति । यत्र प्रौढिमपि व्यूढीकरोमि ॥

---

(१) असिद्धं सुसिद्धं क्रियते यत्तादृशं ।
(२) असिद्धं दुःखेन सिद्धं क्रियते ।
(३) ममानुकूलं स्यात् ।　　(४) समूहतां ।

द्विषः त्वया नृपा जय्याः सर्व्वे कय्यास्तवाभवन्[१] ।
अलं भावय सम्भारानारम्भान् कुरु तत्कृतोः ॥

इति ॥

तदेवं राजानं निजतेजसा प्राज्यं विराज्य पुनरेते ते भ्रातरो लोकालोकाधिपातिमूर्त्तय इति वागर्थमयेन च तेन[२] तद्भ्रातॄन् समर्द्धयामास ॥

अथ राजापि हरेस्तेन तेजसा फुल्लमुखकमलस्तल्लक्षणेन सहजवर्गेण सह सहसा समुल्लसन् जगत्कमलालयामेवात्मनि वासयल्लक्ष्यते स्म ॥

तथा लक्ष्यमाणेन च तेन ते निज-सहजा दिग्विजयाय नियुज्यन्ते स्म ॥

नियुज्यमानाश्च ते तदानुकूल्याग्रहैः स्वयं शान्तविग्रहैस्तत्तद्दिगधिपग्रहैरपि प्राक् पूज्यन्ते स्म ॥

किमुत तत्तदधिपनरैः । तदेवं स्थिते द्रुतमावयोः प्रस्थिते न जातमिति ॥

अथान्यावागत्य कथावशेषमूचतुः ।—

दिग्जयाय गता ये तु युधिष्ठिरजघन्यजाः ।
आगम्य ज्यायसे तस्मै ते तं तत्कथयार्पयन् ॥

---

(१) प्राशंसायां भूतवच्च । (२) निजतेजसा ।

तत्रात्मशिक्षया दूरात् त्यक्ते कृष्णास्तु मागधे ।
तेनोद्धवस्य मन्त्रेण नृपस्योद्धवमाचरत् ॥

नृपतिरप्यसावुद्धववद्दुद्धतत्प्रभाव इति ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततः कथयितुं लज्जावहे शङ्कावहे च ॥

यतः ।—

भीमसेनोऽर्ज्जुनः कृष्णो ब्रह्मवेषधरास्त्रयः ।
जग्मुर्गिरि-व्रजं तात ! वृहद्रथ-सुतो यतः ॥

व्रजराजः सभयमुवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

तत आवामागतावेव । तदेवं लब्धप्रथया तत्कथया कतिपयेषु समयचयेषु विसरद्भयेषु पुनरन्यावागत्य कथयामासतुः ।—

श्रीमद्व्रजराज ! मा स्म यूयमुद्विजध्वं । जरासन्धः खलु ध्वंसमाययाविति ॥

सर्व्वे प्रोचुः ।—कथ्यतां तथ्यं कथ्यतां ॥

दूतावूचतुः ।—

यदा ययुर्ब्राह्मणानां वेषेणामी तदा जनैः ।
पर्वतव्रजदेशस्थैः शीलेनापि तथा मताः ॥

यथा ।—

धृत्वाग्र्यं यज्ञसूत्रं पृथुशुचिरुचिभागूर्द्ध्वपुराड्ं सुधौत-
श्वेताभं वस्त्रयुग्मं लघु लिपिवलितं
पुस्तमर्भं च दर्भं ।
गच्छन्तस्तत्र तत्र प्रसरदुपनिषन्मुख्यवेदाग्रजिह्वाः
कृष्णाच्छात्रद्विका[१]स्ते त्रितयनरवरा-
लोकपूजामवापुः ॥

व्रजसदसः सहासं पप्रच्छुः ।—

भीमस्य भक्ष्यन्तु वह्वेव लक्ष्यते । तत्कथं सम्पन्नं तावदन्नं ॥

दूतौ च हसन्तौ शशंसतुः ।—

तस्य देहमेव तदर्थं दातृषु तद्देहमानमिवासीत् । तद्विवरणकौतुकमास्तां । ते तु क्रमगत्या मगधान् गत्वा तु गिरिव्रजनागरजनलब्धपूजासत्त्वाः स्रक्-चन्दनादिभिस्त्वादत्यपूर्ववेशधरा विद्याधरा इव तत्र विहरन्ति स्म ॥

अथातिथ्यकाले धृतब्रह्मवेषाः
प्रभावेण विध्वस्तपौराद्यशेषाः ।

---

(१) कृष्णस्य छात्रौ द्वौ यत्र ।

नृपान्तःपुरान्तस्तद्दारादपूर्व्वा
नृपस्याग्रतस्तेऽभवन् कृष्णपूर्व्वाः ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च मगधाधिपस्तानवधाय ब्रह्मण्यतागर्व्ववानगर्व्वम्मन्यः प्रणनाम । ते चान्तर्द्विषा वहिराशिषा तं वर्द्धयन्त इव वर्द्धयामासुः ॥

यथा ।—

श्वेतपत्रगसंसक्तगदाभृद्भीम(१) तेजसा ।
सर्व्वेषु बन्धुवर्गेषु त्वं सुखायस्व(२)मागध ! ॥

सर्व्वे सहासमूचुः ।—ततस्ततः ? ॥

दूतावूचतुः ।—

तदेवमाकर्ण्य निर्व्वर्ण्य च मागधस्तेषां देहे सन्देहमनैषीत् । एषु क्षात्रगात्रमात्रतातदुचितगम्भीरवीरस्वरपात्रता च दृश्यते विप्रता तु विप्रलपिता मृश्यते ।

विप्रतिपत्तावस्यां न केवलं तत्तामवलम्वामहे ।

---

(१) हंसगो ब्रह्मा । विष्णुर्गदाभृत् । भीमो रुद्रः । पक्षे अर्ज्जुनकृष्णभीमसेनैः ।

(२) श्लेषे सुष्ठु आकाशायस्व शून्यो भव ॥

किन्तु कलितावलोकलोकता(१)मपीति । अथ विचारान्तरमप्यन्तश्चरमाचचार ॥

ब्राह्मणाश्चेत् क्षत्रिया वा मायिनः स्युरमी मया ।
अवश्याभ्युपगन्तव्या धर्म्मं शौर्य्यं च वाञ्छत ॥
इति ॥

अथ द्वित्सन्मित्सं(२)श्च स्पष्टमाचष्ट ।—

के भवन्तः कथं विप्रलिङ्गानुसारितायामपि वर्हिर्माल्यादिधारितेति ॥

तत्र तु ।—

रूपादिना विबुध्यापि यत्पृष्टं तत्कथा वृथा ।
इति व्यञ्जन् हरिः प्रोचे वयमभ्यागता इति ॥

किञ्च ।—

दूषणं नापि विन्देत वर्हिर्माल्यादिभूषणं ।
पुंसां लक्ष्मीनिवासानां तद्धि लक्ष्मीरितीष्यते ॥

स तु प्राह ।—

भवतु भोजनाभोजनादिसामग्री-समग्रमेभ्यो दीयतां ॥

---

(१) दृष्टचरतां । (२) प्रमातुमिच्छन् ।

श्रीकृष्ण उवाच ।—

वयमभ्यागताः किन्तु नान्नमात्राभिकाङ्क्षिणः ।
कस्त्वां तत्र च दूरस्थं तन्मात्रार्थमभिव्रजेत् ॥
हरिश्चन्द्रादयोऽप्यासंस्तादृशं सत्त्वमाश्रिताः ।
किं पुनस्त्वं जरासन्धस्त[1]न्निर्बन्धः स्वयं भवान् ॥
भवतः समितिं[2] द्रष्टुमेव तस्मादिहागताः ।
पित्रादिक्रमतः सा हि वित्रासा[3]परिकीर्त्यते ॥

तदेवमाकर्ण्य याचमानतायामपि सस्मितं भाषमाणस्य कृष्णस्य स्वप्राणपर्य्यन्तपर्य्येषणां पर्य्यालोच्य चाननुशोच्य वेषां विप्रेतरतामभिप्रेत्य च तामभ्युपेत्य ब्रह्मण्यदेवाद्विषदग्रगण्यः स खलु ब्रह्मण्यम्मन्यस्तदिदं जगाद ॥

"हे विप्रा ! व्रियतां कामो ददाम्यात्म-शिरोऽपि वः"
॥ इति ॥

श्रीकृष्णस्तु तद्वधतृष्णस्तद्वचनमेव निजशुभरचनशकुनमवधार्य्य निजकार्य्यमुवाच ।—

"एकेनैकेन युध्यस्व स्वयं त्वं यदि मन्यसे" ॥
इति ॥

---

(१) सत्त्व । (२) सभां युद्धञ्च ।
(३) विगतः । विशिष्टः इति वा ।

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च जरासन्धे सस्मितं सविस्मितं च कृतलोचनसन्धे स पुनरुवाच ।—

किं सवैलक्ष्यं लक्षयसि ? अस्मासु विप्रतां माभिप्रगाः। यस्मादन्नमात्रकाङ्क्षिण एत इत्यवलम्बमानः शिरसोऽपि दानमुद्दिशसि ? वयन्तु क्षत्रिया युद्धकाङ्क्षिण इति तदपि त्वत्तो गृह्णीमस्तच्च युद्धशिक्षया न तु भिक्षया कदाचिदपीति ॥

पुनश्च सचित्रं द्वित्रवारं वीक्षमाणे मागधमहीक्षिति श्रीकृष्ण उवाच ।—

किं सन्दिग्धमीक्षसे ? परिचितिनिर्दिग्धमीक्षस्व ॥ अयं खलु भीम(१)इवाहङ्कारधामा पराग्व्यत्यस्तप्रत्यक्पुरुषः(२)श्रीभीमः ॥

असौ चार्ज्जुन इव कृतवीर्य्यप्रसव(३)स्तत्सहोदरः श्रीमानर्ज्जुनः ॥

---

(१) रुद्रः । (२) प्रतिकूलपुरुषः । पक्षे जीवः ।
(३) कृतवीर्य्यस्तस्य पिता । पक्षे कृतो वीर्य्यस्य प्रसवो येन ।

अहन्तु हरिरिव सर्व्वदानवनाग[१] हारिकर्म्मान-योर्मातुलजन्मा स्वयं हरिरिति ॥

जरासन्धस्तु कृतहासप्रबन्धः स्वस्मिन्नभीतिं तेषु चानीतिं व्यञ्जयामास । कथयामास च । न त्वया मया कृतचयाद्भयान्मकरालयान्तर्वलिता-लयात्मना युद्धमुद्बुद्धमिष्यते ॥

न च निर्व्वलतया वलितधनुरवलम्वनेन फल्गु-गुणेन फाल्गुनेन । सर्व्वत्र लम्भितदरे तदीयसहो-दरे वृकोदरे तु दरेवा[२]दरेण मम मनः समरी-यति[३] ॥

श्रीकृष्णः सहर्षमुवाच ।—

योऽयमस्मदुरीकारस्तमुरीकृतवान् भवान् ।
दृष्ट्वापि भीम[४]तेजो यत्पुरस्तादन्धका[५]यते ॥

तदेवं स्थिते स तु शूरम्मन्यः स्व-मुखोद्यममृषोद्यं कर्त्तुमनन्यः सम्मदाद्गदाद्वयमानाय्य तत्र यथा तदिच्छमेकां भीम-हस्ते प्रणाय्य रङ्गमङ्गनमङ्गति स्म ॥

---

(१) सर्व्वदैत्यश्रेष्ठ ।
(२) ईषदिव । (३) समरमिच्छति ।
(४) श्लेषे रुद्र । (५) श्लेषे अन्धकोऽसुरः ।

ततश्च गदादण्डाभ्यां परस्परं खण्डयन्तौ तौ वीराखण्डलतया वज्राभ्यामिव दृष्टौ । चटचटायमानाभ्यामव्यवमानाभ्यां ताभ्यां प्रहरन्तौ पुरुषकुञ्जरतया दन्ताभ्यामिव ॥

तथा गदायुद्धोचितमण्डलैश्च भ्रमन्तौ रङ्गशोभितया ताण्डवैरिवेति तत्प्रकारे पराकूस्थिते मुष्टिप्रहारे च वैयर्थ्याय संस्थिते परस्परजयाय चिराय द्वयेऽप्यनवस्थिते दिवसविसरे च प्रस्थिते कृष्णादृशा भृशाप्तवल्लसीमापि भीमाभिधस्तद्विधमनाय तद्विधं नोपायमह्नाय ज्ञातवानिति कृष्णाघटितविटप(१) विपाटनसंज्ञालब्धावधारणः सपरबलप्रबलशैवलवारदुर्वारवारणस्तं तथा विचकार स्वजनानां सुजनानामपि सुखं चकार ॥

यथा ।—

पूर्व्वं पूर्व्वमिवात्र पातनवशादुर्वैतमूर्व्वीगतं
कुर्व्वन्नर्ज्जुनपूर्व्वजः स सहसा
धूर्व्वं(२)स्तदूर्व्वोस्तटं ।

(१) शाखा । विटपः पल्लवे शिङ्गे शाखायाञ्च वनस्पतेरिति विश्वः ।
(२) हिंसन् ।

कट्यन्तादथ पाट्यमाशु घटयन् पुष्पान्नटाचार्य्यतां
घाटाग्रं निटिलं तथा व्यघटयद्यवत्पटं वायकः ॥

विघटयंस्तदिदमुद्घाटयामास च ॥

नाहं कृष्णाग्रजः[(१)] कृष्णश्चास्मि कृष्णाग्रजः[(२)] परं ।
कथं क्षमायां[(३)] रक्षेय त्वां क्षमायां च मागध ! ॥

इति ॥

अथासुरा हा जरासन्धेति[(४)] तथा सुरा हा जरासन्धमिति वदन्तः सर्व्वे हाहाकारस्याधारतां धारयामासुः ॥

यत्र विजयाच्युतौ चात्मानौ विजयाच्युतौ मन्वानौ तं पूजयामासतुः ॥

ततश्च विपक्षजनातिक्रान्तिभ्रान्तिमिव सम्भृत्य तदन्तःपुरपथस्थितमश्वशस्त्रादिशस्तं कञ्चन मणिकाञ्चनरथं बलादात्मसात्कृत्य भीमार्ज्जुनाभ्यां

---

(१) रामः । (२) अर्ज्जुनः । (३) क्षान्तौ भुवि च ।
(४) हा विषादशुगर्त्तिष्वित्यत्र नानार्थवर्गे निन्दायां चेति धीरः । तत्र च विषादादिषु हा प्रिये जनकराजपुत्रीत्यादिकमुदाहृत्य निन्दायामेव द्वितीयामुदाजहार । हा श्रोत्रियानहृदयानिति ।

सममाविकरणीकृत्य च श्रीमाधवः सावधानतया- वतस्थे यत्र तु रथे गरुडश्च तदा ध्वजतयारूढः ॥

यः खल्वसौ रथः शक्रादुपरिचरवसुनालब्धः क्रमाज्जरासन्धपित्रा यस्माल्लब्धाद्बृहद्रथतया प्रथना लब्धेति ॥

ब्रजराज उवाच ।——ततस्ततः ? ॥

दूतावूचतुः ।——

ततश्च समवलोकितशोकानां तदीयलोकानां कृते तत्पुत्रं सहदेवं स श्रीयदुदेवः सहभीमार्ज्जुनः समभिषिषेच ॥

अथ जरासन्धकृतवन्धानां राज्ञां कृतानुसन्धः सत्यसन्धः स दयासिन्धुर्दीनवन्धुर्गिरिदरीसन्दित- तद्बन्धगृहमेव विन्दमानस्तान् निष्कालयामास ॥ निष्काल्य च निभाल्य चिरं सास्रगद्गदतया न किञ्चिद्वदति स्म ॥

यथा ।——

म्लानान् म्लानपटान् क्षुधातिविकटान्
शुष्काननान् यन्त्रितां-
स्तान् पश्यन् हरिरस्रमस्रवदसौ
पुत्रान् पितेवौरसान् ।

एषा तस्य शुभक्रिया न तु परं
　　तेषु(१) स्फुटं सार्द्रतां
दध्रे किं त्वपरेषु च प्रतियुगं
　　सर्व्वत्र च स्थायिषु ॥

तदेवं तेषां तत्कृच्छ्रमेव तस्य करुणामृच्छत् कृच्छ्र(२) कोटिमपि जिगाय ॥

ततश्च ।—

दृग्भ्यां रूपं त्वचांशुप्रथनमथ नसो-
　　र्युग्मकेनेष्टगन्धं
कर्णाभ्यां वाग्विलासं तमपि रसनया
　　लेह्यवन्मिष्टमिष्टं ।
कंसारातेः स्पृशन्तः क्लमथमपजहु-
　　स्ते जरासन्धबद्धाः
श्रद्धानद्धास्तथासन्नपि सपदि यथा
　　सस्मरुर्नात्मबन्धं ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

ततश्च करुणावरुणालयः स खलु कमलालय-

---

(१) राजसु । (२) कृच्छ्रं सान्तपनादिकं ।

स्तान् समलान् सपरिमलस्नपनादिना क्षालयितुं परिजनान् निजतरङ्गानिव प्रेरयामास ॥

ते[1]तु ।—

नयनसलिलधारास्नानभाजः प्रमोद-
च्छविविलसितवस्त्रारोमहर्षाङ्गभूषाः ।
मगधनृपति-बद्धाः पार्थिवा लब्धकृष्णा
गतपरिकृति[2]तृष्णास्तुष्टुवुः सुष्ठु कृष्णां ॥

तदा च तदाज्ञावशम्वदा लब्धसम्मदा ज्ञाताधिक-तदीयदयया राज्ञां समुदयाः स्नपनादिसमासादित-रोचनया भोजनयोजनया राजदुदयास्तदङ्गीकार-साङ्गीकृताभ्युदयास्तेन विहापितचतुरङ्गसेनादि-सङ्गतया गृहाय विहापयामासिरे ॥

यथापूर्ववैभवादपूर्वतया पश्यद्भिस्तेषां परिषदि निवसद्भिरन्यैरपि सद्भिश्चिरादेव परिचिक्यिरे ॥

श्रीगोविन्दाल्लब्धकृपाणां नृपाणां तेषां मुखादेव तदीयसुखास्वादमासादयद्भिस्तैस्तैर्मैत्रीमद्भिः समु-द्रवदद्भुतभाग्यतया मेनिरे च ॥

---

(१) राजानः । (२) परिकर ।

व्रजराज उवाच ।—

इतः परं परं तेषां कृतब्राह्मणवेषाणां कुरुषु पुरु प्रवेशभव्यं कव्यतां[(१)] ॥

दूतावूचतुः ।—

अथ ते पथि विसृष्टान् निजान् परिच्छदान् सहदेवेन[(२)] भक्त्युत्सृष्टानप्यन्यान् संसृष्टान् विधाय शक्रप्रस्थाय प्रस्थानमासेदुः ॥

आसद्य प्रिय-सदनं त एवमिन्द्र-
प्रस्थाख्यं प्रस्फुटमधमन् प्रतिस्वशङ्खान् ।
येषु[(३)] द्वौ[(४)] निजनिजमाश्रयं त[(५)] मेकं
बिभ्राणौ जगति निबभ्रतुः श्रवांसि[(६)] ॥

अथागतैर्मुररिपु-भीम-जिष्णुभिः
स्फुटं जरातनयनृपासुजिष्णुभिः ।
निजागतिश्रवणजशर्म्मपूरिता
नृपत्युपाव्रजनमवाप्य पूरिता[(७)] ॥

गाम्भीर्य्यं धर्म्मसूनोरघरिपुरचितां
शृण्वतस्तत्र मैत्रीं

(१) कव्य वर्णने। (२) मागधसुतेन।
(३) श्रीकृष्णादिषु। तच्छङ्खेषु वा।
(४) भीमार्ज्जुनौ। तच्छङ्खौ वा।
(५) कृष्णं तच्छङ्खं वा। (६) यशांसि वा।
(७) पुरीप्राप्ता।

तस्याः[१]श्लाघामथावृण्वति[२] वरवलवा-
नावृणोद्वाष्पपूरः ।
पूर्व्वं साधारणानां गुणगणगणनामाविशेदुत्तरस्त-
त्प्रेमप्रावल्यभाजामथ कथमनयोः
साम्य[३]मृच्छेदवाम्यं[४] ॥

व्रजराज उवाच ।—

केन पथा मगधान् पथन्ति स्म ते ? ॥

दूतावूचतुः ।—

अन्तर्व्वेदिमध्यमध्यासीनेन दूरसम्वध्येन ।
यस्मान्नित्यस्थितय एव भवतां स्थानायाप्रस्था-
तव्यं तेन ॥

सर्व्वेऽप्यूचुः ।—

हन्त ! हन्त ! सन्ततमेतदाकर्ण्य ते परं परन्तु
न निर्वर्ण्यते ॥

दूतावूचतुः ।—

श्रीमदुद्धवमतेनेदं गम्यते । अत्र नातिविलम्वः
स्यादिति ॥

---

(१) मैत्र्याः । (२) गाम्भीर्य्ये ।
(३) कर्त्तृ । (४) कर्म्म ।

तदेतावद्वृत्तान्तं वृत्तान्तमासद्य सद्य एव ततश्च-लितवन्तावत्रागच्छावेति दूत-कथानुकथनानन्तरं स्निग्धकण्ठ उवाच ।—

मा त्वरां कुरु गोपेश ! कृष्णागतिकथां प्रति ।
भ्राजते सोऽयमागम्य तत्कथाप्यागमिष्यति ॥इति॥

अथ श्रीराधामाधव-सदसि सोऽयं शंसति स्म ॥

भवतीषु च श्रीमत उद्धवस्य सन्दिष्टमुद्बुद्धमासीत् ॥

प्रतिश्रुत्कंसारेः कुरुषु किल यासीदधिभव-(१)
स्यसौ तस्या(२)प्यन्तर्वसति तदिदं निर्णयपदं ।
यदाहं मन्त्रान्तर्भवदभिधया किञ्चिदवदं
तदा तस्यान्तःस्थं किमपि नयनादाकलि मया॥इति॥

तदेवं लब्धभवभीतिभिर्जनताभिर्ज्ञानमिव श्रवसा तदेतदनुभवन्तीभिर्भवतीभिः कृष्ण-लाभासम्भावनादुःखमभिभवन्तीभिः स्थितं। सम्प्रति तु तस्य फलमिवेदं फलति स्म ॥

तथा हि ।—

आसीत्पुरा विरहतापरविर्मुरारे-
र्यस्त्वत्कमङ्गमतिशोषयतीति वित्तः ।

---

(१) अव्ययीभावात् भवतीषु ।　　　　(२) हरेः ।

सोऽयं तदीक्षणघनैरुल्लयाभ[१]मार्द्रीं-
कुर्व्वन् प्रफुल्लयति तद्वृषभानु-पुत्रि ! ॥

तदेवं सुखप्रथकयोः कथकयोः सङ्गतसङ्गपथयो-रनङ्गनिशान्तस्यान्तः श्रीराधिकाकान्तः कान्तया सह विश्रान्तवान् ॥

इति श्रीमदुत्तरगोपालचम्पूमनु जरासन्ध-
तत्कृतबन्धराजवृन्दमोचनं षड्विंशं
पूरणम् ॥

---

(१) वताभं ।

सप्तविंशं पूरणम् ।

अथ प्रातरन्तरकथा-व्रातं मधुकराठः सुष्ठु मधुवत्परिवेषयामास । दिनान्तरसम्भूतौ तु दूतौ व्रजराजेनानुयुक्तौ युक्तौ कथान्तरमनु रसान्तरं प्रथयामासतुः ॥

अथ मयनिर्म्मितसभायां सभायां भासमानाः समानाशयाः परस्परं परं परं परि परम्परागतपरिहासभासनमुखेन सुखेन वृष्णिपाण्डुवंशधरास्तथा द्विजवराश्चिराद्विराजन्ते स्म ॥

तत्र विनयेन नयेन चाधिष्ठितः श्रीयुधिष्ठिरः श्रीकृष्णं तुष्टात्मा तुष्टाव ॥

यत्र क्वचन निजाज्ञां,

प्रथयितुमीशाश्चिनोति सद्भक्तान् ।

त्वं पुनरधीश ! तेषां,

याज्ञामाज्ञां विदन्(१)मुदं यासि ॥

---

(१) आज्ञात्वेन जानन् ।

भक्तेष्वनुगतिहेतो-

स्तव न हि तेजो-विपत्तिः स्यात्।

भजतां द्रवतां नान्य,द्विधुतन्माणिवृत्तमप्येवं ॥

तस्माद्भवदनुगमना,देवास्मासु प्रकृष्टता दृष्टा।

कमलेष्विव रवियोगा,दाज्ञापय तद्यदस्ति कृत्यं नः॥

अथ श्रीकृष्णश्च तदेतदात्मकृतप्रतिज्ञाय यज्ञाय विज्ञाय स्वयमनुमोदनाद्विनुनोद ॥

यथा।—

मामिह भजनीयं वा, भक्तं वा त्वं विचारयसि।

वैदिकमथवा लौकिक,मखिलं तव कर्म्म मत्कर्म्म ॥

अथ राजा राजदञ्जलितया तदिदं व्यानञ्ज।—

एकैकस्यापि येषां गतिरतिविरला

दिव्यापि स्वेन(१) तेऽमी

लब्धास्त्वल्लाभलुब्धा मम सदसि विभो!

भूसुराः के नृपाद्याः।

तस्मादेवैष यज्ञस्तव रुचिविषय-

श्चेदमीषामपि स्या-

दस्माकं सूत्रयन्त्रप्रतिकृतिनिभता

युष्मदेवात्र सिद्धिः॥

---

(१) मया।

अथ श्रीकृष्ण उवाच ।—

मयि निरुपधि निरवधि च स्निग्धा एते तत्र भवन्तस्तथा भवन्तश्च तद्भावदिग्धा इति परस्परं निदिग्धा भवितुमर्हन्तीति । यथायुक्तं प्रयुक्तमातन्वन्तु ॥

अथ समाजान्वित एव राजा राजासनादुत्थाय बद्धाञ्जलितानद्धां वाचमव्याजं व्याजहार ।—

यथा सभास्माकमियं भवद्विधै-
रङ्गीकृताङ्गीकरणाद्बकीरिपोः ।
तथा वयं चाङ्ग त[१]दङ्गतां गता
भावत्कमङ्गीकरणं भजेमहि ॥

मुनयश्च पूर्व्वोपेन्द्रसहितां सुधर्म्मामपि विजयमानामपूर्व्वोपेन्द्रसहितां सुधर्म्मामिमां धर्म्मसुतविराजमानराजानां सभां सभावं युगपदुत्थितामालोच्य सङ्कोच्यमानमनस्तया समुत्थितवन्तः ॥

अथ व्रजराज उवाच ।—के ते ? ॥

दूतावूचतुः ।—

कति वा ते गणनया ततीकर्त्तव्याः ।

---

(१) सभा ।

यत्र वसिष्ठ-वामदेव-त्रिता-सित-कश्यप-भरद्वाज-गौतम-पराशर-मैत्रेया यत्र च साक्षान्नारायणः स्वयमेव बादरायणस्तत्परायणतामेव दधते स्म ॥

अथ सर्व्वेऽप्यूचुः ।—

नाश्चर्य्यमिदं तस्य धर्म्मचर्य्यस्य राजवर्य्यस्य, यः खलु तदपि नीलकमलकमला-कमनीयमुख-मयूखं जुषमाणः स्वकसुखसुषमाभिः सर्व्वमेव सुखयति ॥

इति निगदमाकर्ण्य ब्रजराजस्तु गद्गदगदवशम्वदतया क्षणमगदन् कथमपि जगाद ।—

ततः किं व्यवजहार व्याजहार वा धर्म्मजहु-[१] राजः ? ॥

दूतावूचतुः ।—

दण्डवदखण्डं प्रणिपत्य निज-मुकुटरत्नमण्डलेन तेषां चरणखरदण्डमण्डलं मण्डयामास ।

प्रार्थयामास च पार्थस्तान् ब्रह्मभूयं[२] गतान् राजसूयविधिसिद्धिसमर्पणं ॥

ते तु युगपज्जगदुः ।—

नित्यं यस्यायमर्थं द्रुहिण-शिवमुख-

प्रार्थनार्हः स्वमुच्चै-

(१) शिशु । (२) ब्रह्मणो भावः ।

जानन् कुर्व्वंश्च चित्रं सुखमुपलभते

तस्य किं तेऽनवाप्यं ।

तत्रापि प्रार्थनीयास्तव कथमिति ना-

पूर्व्वमस्य त्वपूर्व्वं

यत्कर्म्मोपज्ञ(1) मस्ति द्विजकुलविषया

सत्कृतिः सत्कृतीनां(2) ।

सान्दृष्टिकं(3) यथा दृष्टिविषयीक्रियते फलं ।

उदर्कं(4)श्च तथा तर्कगोचरीभवति स्फुटं ॥

तस्माद्भवन्तः स्वस्थीभवन्तः प्रतिस्वमासनमध्य-

मध्यासतां । पश्चाद्विचारमाचराम ॥

व्रजराज उवाच ।—

देवर्षिः कथमिवर्षिगणनायां न प्रस्तुतः ? ॥

दूतावूचतुः ।—

स खलु श्रीकृष्ण-लीलाकुतूहलमात्रशीलात्मतया

विलसति न तु कर्म्माङ्गतया वसतीति ॥

व्रजराजः सनिश्वासमुवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—

तदेवं समुपविष्टे सुखाविष्टे सर्व्वस्मिन्नेव शिष्टे

---

(1) यस्य कर्मणा प्रथमज्ञानं । उपज्ञां ज्ञानमाद्यं स्यादित्यमरः ॥

(2) सुकृतिनां । (3) सद्यःफलं । (4) उत्तरफलं ।

जने जनेश्वरानुमत्या सममत्यादरणीयान् दैवज्ञान् सर्व्वत्र सर्व्वज्ञा अपि ते मुनयस्तदनवज्ञाप्रज्ञाना यज्ञाय दिनं जिज्ञासामासुः ॥

ज्ञाते च जिज्ञासिते राज्ञा श्रीकृष्णानुज्ञां सुज्ञातवता विज्ञा द्विजास्ते वेदानां भेदाद्दृत्विग्विभेदाख्यया वेदयामासिरे । निवेदयामासिरे च दूतैः सवर्णदूतैरागमनाय सकृप-द्रोण-भीष्मादयस्तथैवाकृप[१]धृतराष्ट्रादयश्च, किं वहुना ? राष्ट्रगताः सर्व्व एव भूदेवप्रभृतयस्तत्कृतभृतयश्च ॥

यत्र तत्सभापर्व्वाततसर्व्वागमनपर्य्यायमर्य्यादया वृष्णिप्रवीरार्य्यमिश्र[२] रेवतीभार्य्यमिश्रमहाजनसङ्गमनमपि रङ्गदं जातं ॥

तदप्यास्तामास्था[३] पुनरत्र क्रियतां । विनापि समाहूतिं स्वनयनानां त्वत्प्रसूतिविभूतिशश्वदनुभूतिकृतिलोभाद्भवकमलभवादयस्त्रिलोकी-लोका एव तत्रागताः विलोकिताः ॥

किन्तु भवन्त एव स्वपुत्रमन्त्रणापरतन्त्रतया तत्र न गताः । भवत्पुत्रप्रधानेऽस्मिन् विताने

---

(१) निर्दय । (२) पूज्य । (३) प्रतीतिः ।

भवतामनागमनं चेत्तदुदासीनतामेव भवत्सु परे वितर्कयुरिति ॥

अथ यदा भूदेवा इव नरदेवाश्च तत्र तत्र युक्ता नियुक्तास्तदा सर्व्वपदावनेजनप्रयोजनाधिष्ठानन्तु कश्चिदपि नानुतिष्ठेदनुतिष्ठतु वा तथापि प्रायो गर्व्ववतः सर्व्वत एव तन्न सुष्ठुतामापद्येतेति निश्चितं ॥

तदा तद्विचार्य्य स्वयमेवार्य्याणामग्रणीर्भवत्कुल-ग्रामणीर्भक्तार्थमकार्य्यमपि कुर्व्वाणस्तदप्यङ्गी-कृतवान् ॥

अथ तदेतद्वर्ण्यमानमाकर्ण्य सर्व्वेऽपि व्रजस्थाः स्वस्थात्मना चिन्तितवन्तः । व्यक्तं न त्यक्तव्या एव तेन मद्विधा इति ॥

स्पष्टञ्च पृष्टवन्तः ।—ततस्ततः ? ॥

दूतावूचतुः ।—

अथ यदा तु विप्राः सुवर्णकलिलाङ्गलेपसुवर्ण-लाङ्गलेन देवयजनं कर्षन्तः सर्व्वेषां मुहुरपि हर्ष-मूहुस्तदा भूमिस्पृशस्तत्र स्मितस्पृशद्दृश एवासन् ॥

ते हि न तत्र शिक्षावन्तः किन्तु दीक्षादि-कर्म्मण्येवेति ॥

यदा तु राजानं दीक्षां ग्राजयामासुस्तदा सर्व्वे वीक्षामात्रञ्चक्रुर्न तु परीक्षां । यतस्तदुपक्रम-(१) मेव सर्व्वा विधिचर्य्या ॥

यज्ञारम्भे तु ।—

केचिद्धाटकमात्रपात्रघटनां वीक्ष्यागता विस्मितिं
केचिद्भूप-सुरर्षि-शक्र-विधिजान् केचिद्दिधीशावपि ।
केचित्तत्तदशेषकर्षवल्लवत्तीव्रप्रभावं हरेः
सर्व्वेऽप्यद्भुतरूपमस्य यदिदं(२) मुक्तेऽप्यलं सत्फलं ॥

तदेवं स्थिते सर्व्वेणापि सिद्धतया स्थिते तत्र यज्ञे हवनक्रिया सञ्जज्ञे ॥

किन्तु ।—

स्नेहं(३) तत्र हुताशसादकृषत श्रौतैर्विधानैर्द्विजाः
सर्व्वे तु व्रजराज ! तावकसुत-
श्रीसात्कृतं निर्म्ममुः ।
एवं यद्यपि पश्यति स्म जनता
तस्मिंस्तदप्याग्रिम-
स्या(४) प्यस्त्यन्तिम(५) एव पर्य्यवसिति-
स्तात्पर्य्यमत्रैव हि ॥

---

(१) तैरेव पूर्व्वमारब्धा । (२) हरिरूपं ।
(३) घृतं प्रेमाणञ्च । (४) घृतहोमस्य ।
(५) प्रेमसात्कृतौ ।

अथ सोमाभिषवे सदस्यानामर्ध्यायामभिनवे विचारे कृतप्रचारे कोऽयमेषामशेषाणामादिमः स्यादिति विविधसङ्गहेतोर्मतभङ्गभिया सर्व्वेषु स्व-स्वमतप्रभविष्णुषु च तूष्णीम्भविष्णुषु केषु-चित्तु कर्णे कर्णे वर्णाविर्णाव[१] वर्णयत्सु तत एव तदर्घ्यपात्रहस्ते राज्ञि च चिराय विहस्ते सर्व्व-मुपर्य्युपरि हरिमव पर्यवस्यन् सहदेवः सहदेव-मुनिषु सर्व्वसभासत्सु चाभ्यर्णतः समाकर्णयत्सु वर्णयामास ॥

एते यस्य तु दृष्टिलेशवशतः पद्मासनस्यात्मजाः
केशाः स्वयमागमन्ननु शिवोऽप्यब्जासनेनान्वितः ।
तं हित्वा परमां परामपचितिं
　　　　यां निर्म्मिमीते जनः
सेयं तत्र च तत्र चापचिति[२]तां
　　　　यात्येव किं स्वन्यथा ॥

आत्मायं जगतां विधेः पशुपते-
　　　　रप्यस्ति वृष्णीशिता
वाढं पश्यत चक्षुषेदमसकृन्मज्जल्पितानन्तरं ।

---

(१) अयार्घ्ययोरपचितिः ।
(२) वर्णैश्च वर्णैश्च युद्धं वृत्तमितीव ।

सर्व्वेऽमी लसितस्मितं सपुलकं

मां लोकयन्तः स्थिता-

स्तस्मादस्य समर्च्चनं तु भविता सर्व्वेषु सन्तोषणं ॥

अथासुराणामत्र दुराशयतां व्यवसाय पुनर्जगाद ।—

सर्व्वात्मनस्तु ये वा स्युरस्मादतिवहिर्मुखाः ।

न तेषां मतमाधेयमात्मद्विट्त्वं गता हि ते ॥

पुनः प्रतीचां[१]कालमुग्लतां निभालयन्नाललाप ।—

कनिष्ठोऽप्यात्मनो धाष्टर्यं सभायां वर्णयामि किं ।

वामाङ्घ्रिर्म्मम वामानां काम्यं कामयते शिरः ॥

अथ मेघनादानुलासिना[२]मिव सर्व्वेषां पर्व्वा-
गतानां सुपर्व्वादीनामुल्लासकोलाहलवहं सहदेव-
मेघस्य नदितप्रभं गदितमनुकारितदुष्टकृकलास-
चयः सन् मेघसमयसमनयः[३] सधर्म्मतनयः
समस्तमूलं पीतदुकूलं सन्तर्पयन्नानाम्नायशाखा-
भूतां तदनुगतिकृतामपि सन्तर्पणमर्पयामास ॥

तदा मदात्पाण्डुनृपः प्रतीति-

सारान्तमानर्च्च तथा च हार्द्दात् ।

---

(१) प्रतिकूलानां । (२) शिखिनां ।
(३) वर्षातुल्यनीतिः ।

पादाम्बु तत्तस्य यदा ददानः
स वाष्परोमाञ्चिततां ततान ॥

इत्थं सभाजितमभीक्ष्य मुकुन्दमेतं
सर्व्वे जयेति नम इत्यपि शश्वदूचुः ।
किञ्च द्रुतं सुमनसां कुसुमानि हस्ता-
त्कम्प्रान्निपेतुरिह मोचनतः पुरापि ॥

ये साधुकारमवदन् सुरलोमपाद्या
येऽस्मिन्नसाध्विति च दानवमद्यपाद्याः ।
तेषां तदेव च तदेव च युक्तमुक्तं
वक्तृस्वरूपगतरूपमुदेति वक्त्रे ॥

तदेवमुपलम्भ्यताया(१)मुपालभ्यतायामपि तत्रो-पलभ्यमानायां विशेषतस्तदुत्कर्षमसहमानः सह्य-मानः सभासमानायां सभायामेव चेदिपतिर्धर्म्मतः पतितः कर्म्मतस्तु वाहू विक्षिप्य समुत्थानादुत्प-तित इव धृष्णगात्मा शृण्वत एव कृष्णस्य तदिदं गदितवान् ॥

ब्रह्माद्यास्त्रिदशा वशिष्ठ-वलिताः
शिष्टा मदाद्या नृपा

(१) स्तुत्यतायां ।

यस्मिंस्तत्र समर्हणां प्रथमतः

सोऽयं भजेत्कृष्णकः ।

गोपः खल्वयमस्ति मातुलजनि-

र्नैवास्ति नः पाण्डवा-

स्तस्माद्धिग्धिगिमां सभामपि तथा

धिग्यज्ञमज्ञाश्रितं ॥

व्रजराज उवाच ।—ततस्ततः ? ॥

दूतावूचतुः ।—ततश्च ।—

श्रुत्वा तेन पृणां सुता मुररिपो-

र्निन्दां क्रुधावेशत-

स्ते स्वेषामपि शुश्रुवुर्न हि यदा

विस्मृत्य दीक्षां तदा ।

चक्षुर्भ्यामायतरक्तनेत्रमहसा सोसूच्यमाना इव

स्वास्त्राणां द्रुतभाविनीं गतिममूनुत्तस्थुरादित्सवः ॥

अथ हरिपरिभाषणा(१)श्रवणान्निर्गच्छत्सु शास्त्र-विद्त्सु स्वानुजमन्त्रणायन्त्रणानुसारिणि च सीरिणि दीक्षावत्तायामपि शस्त्रवतस्तान् गृहीत-खड्गचर्म्महस्तनमाच्छिशुपालवर्म्मणः(२) स्वयं हरिरेव निवारितवान् ॥

(१) यः सनिन्द उपालम्भस्तत्रं स्यात्परिभाषणमित्यमरः ।
(२) वर्म्मान्तं क्षत्रियनाम । (३) समासः ।

किन्तु ।—

रीढ़ां चैद्यकृतामसोढ शतधा यन्नास्तिगर्व्व[३]स्तथा
गोपाख्यां स्वदते स्मयद्विधिवृतं गोपाङ्घ्रिजुष्टं रजः ।
यर्ह्येषाघटि पाण्डवार्च्चगणना तेनाथ चण्डात्मना
मुण्डं तस्य विखण्डितं तव सुतश्चक्रेण चक्रे तदा ॥

ततश्च ।—

यत्तेजःसमगाद्विभुं सुमनसां[१]स्मेराननश्रीमयं
धारापातमयञ्च तर्हि युगपल्लोके मुदा पश्यति ।
तत्तत्र परं न साद्भुतमभूद्यत्[२]स्पर्द्धयेवापरं
चैद्यान्तर्हृदयादपि स्फुटममुं तत्सङ्गतः सङ्गतं ॥

अथ तत्पक्षपातवत्सु भयात्पक्षिवदुड्डामरमुड्डीन-वत्सु लोकास्तु कृततद्विलोकास्तारतम्यरभ्यमिद-मूचुः ।—

यः कंसादिहरः समर्हति स एवेन्द्रादिसम्पत्पदं
तर्ह्यप्येष ददे स्वदेशमपि यत्कंसस्य तातं प्रति ।
तस्मादस्य न गर्व्विता न नितरां
क्रोधश्च यत्तामसान्

---

(१) यस्य ।　　(२) देवानां पुष्पानाञ्च ।

जङ्कुन्ति स्फुटमेव तन्तु घटते

तेषां तमः शान्तये ॥

उग्रसेनमनु राजतार्पणां

तस्य चानुसृतिरस्तु दूरतः ।

पश्य पाण्डव-मखे पदाञ्चन-

स्याधिकारमधृत स्वयं हरिः ॥

तदेवं सत्रे शत्रावपि समाप्ते राजा राजदव-दानानि[१]दानानि विधायावभृथं[२] कर्म्माविभृतं[३] चकार ॥

न केवलं तदेव किन्तु सदेव भूदेवं जगदेव च । मनसीप्सितदुर्य्योधनं दुर्य्योधनं तु विना । स हि तस्य हितसहितं सर्व्वमहितं मन्यते ॥

यः खलु मयमायामयतन्निलयमहिम्ना मोहित-तया नो हितं किमपि कर्त्तुं समाहितमना बभूव ।

जलस्थलद्वारा द्वारादिविपरीतबुद्धिपरीततया न मनःशुद्धिमवापेति स्थिते श्रीमदुद्धवनाथानु-मत्या द्रुतगत्या प्रस्थितयोरावयोः किमनन्तरमन्तरं बभूवेति दूतान्तरयुगलं कलयिष्यति ॥

---

(१) अवदानं शुद्धवृत्तं ।　　(२) दीक्षान्तोऽवभृथं ।

(३) समन्तात् पूर्णं ।

ब्रजराज उवाच ।—

'किं यावदत्र सत्रं समाप्य च ससर्व्वसुखसत्र-वदनः स्थास्यतीत्यपि किमवकलितं ॥

दूतावूचतुः ।—अथ किं ? ॥

यदा हि सर्व्वान् परिकरान् द्वारकां प्रस्थाप्य स्वयमग्रजेन सह शक्रप्रस्थावासं श्रीनिवासः स्ववासतया भासयामास ॥

यदा चाकूलाशाप्रसारे गोकुलसारेऽस्मिन्नागन्तु-कामौ नौ प्रति नौरिव समुद्रे समुद्रेयं पत्रिका दत्ता तदा स्वयमेव तेन कथयामासे ॥

मासकतिपयमत्रास्माकं स्थितिरिति एवं दूत-कथनं प्रथयित्वा मधुकण्ठः सगद्गदकण्ठः प्राह स्म ।—

अथ तदेवं प्रोच्य पत्रिकां विमोच्य कम्पसम्प-द्विहस्ते ब्रजराज-हस्ते तावदातां ।

ब्रजराजस्तु व्यग्रतया समग्रावलोकनासमर्थः पुरोहित-हस्ते विन्यस्तवान् ॥

पुरोहितश्च लिपिनिहितं तदभिहितं प्रणिहितं विधाय श्रावयामास ॥

यथा ।—

नैन्द्रप्रस्थं द्वारकां नापि किन्तु
श्रीमन्नेतत्पत्रमेवावसामि ।
एतत्तस्मादञ्चले रक्षणीयं
मत्प्रत्याशात्यये लक्षणीयं ॥इति॥

अथ ते तदेतदाश्रुत्य श्रुत्यनुगृहीतपुमर्थमिव समर्थ्य तदवैयर्थ्यं मन्यमनास्तमपि कालं कालमिव चालयामासुरितीदं पुरावृत्तं पुरावृत्तमेव ॥

सम्प्रति तु नेत्राभ्यामेव सम्प्रतीतं क्रियतां ॥

दूरस्थिरप्रवसनात्मकमात्मवृत्तं
तातान्तिकेऽस्मदवकर्ण्य स एष कृष्णः ।
तातस्य पश्यति मुखं किमयं ममास्यं
पश्येन्निजाश्रु परिमृज्य कदाचनेति ॥

अथ ते तदेतदाकर्ण्य दर्श्यमानं तमेव निर्वर्ण्यं चक्रुरिति श्रीव्रजराजस्तं चरणयोः सङ्गतमालिङ्ग्य निजनयनकीलालाकुलपुलककुलं कलावलत इव सर्वमेव स्वजनं संक्रमयामासेति ॥

अथ व्रजवन्दिनश्च वन्दमाना नन्दन्ति स्म ।—

जरासुतानुबन्धन, क्षितीशवृन्दबन्धन-
श्रुतेरतीव सूरतः, सुरर्षिणापि दूरतः
समेत्य पार्थयाचितः, क्रतुक्रियाशयाचितः-
सदुन्नयार्थमुद्धव, प्रयुक्तमन्त्रसूद्धवः
त्वयाय मागधेशितुः पुरागतः परं पितुः
स्वसुः सुतस्य मन्दिरं, स्वयोग्यसं स दिन्दिरं
तदुद्धवोक्तमन्त्रणा, त्तदीयभक्तियन्त्रणात्
किरीटि-भीमसङ्गत, श्छलेन विप्रतां गतः
तदा जरासुतं सज, न्नियोद्धुमर्थितां भजन्
युधीह भीममुन्नय, न्मुखेन तस्य निर्णय-
न्ननेन तञ्च योधयन्, स्वमेनमत्र बोधयन्
निजेङ्गितादनेकश, स्ततान चास्य सद्यशः
स मागधेशघातनः, क्षितीशबन्धशातनः
समस्तयत्नसार्थकः, प्रनन्दितात्मपार्थकः
स्वक्लृप्तराजसूयक, स्तदाप्तपूज्यभूयकः
ततश्च चेदिपे रुषा, क्षिपत्यपि क्षमाजुषा-
मुपेत्य वर्त्मसु स्थिरः, स्वभक्तनिन्दनाचिर-
प्ररूढकोपपद्धतिः स्वचक्रसृष्टतद्धतिः
समाप्तपार्थयज्ञकः, प्रसिद्धिभाक्समज्ञकः(१) ।

(१) कीर्त्तिं ।

तदेवमप्यसौ पुनः स्वघोषवासिनस्तु नः
समर्द्धयन्समागतः सुखाकरोति रागतः ॥इति॥

अथ श्रीराधामाधव-सभारञ्जनी रजनीजनिरपि कथा[१]मिष्टमजनिष्ट ॥

यत्र च मधुकण्ठ उवाच ।—

तदा भवतीः प्रति च पत्रिका-पतत्रि-राजपत्रेण सापत्रपमेव रहसि प्रहिता ॥

यथा ।—

स्वशात्रवाणां निहतिर्निजागतौ
सीमा कृता यातु मया कुरोर्भुवि ।
सा मे तदर्थं[२]प्रतिभूरिवानिशं
पुरः स्फुरन्ती द्रुतमेव सेत्स्यति ॥इति॥

तदेवं प्रोच्य पुनः श्रीकृष्णां विलोच्य तां विलोचयन् मधुकण्ठस्तदिदं रोचयति स्म ।—

तस्मात्पुनश्चागमनं हरेर्व्रजे
त्वं प्राङ् सम्भावितमित्यमन्यथाः ।
युक्तं तदास्तां किमयुक्तमेव वा
कथं तदावेशवशासि सम्प्रति ॥

---

(१) कर्म्म । (२) निजगमनार्थं ।

अथ प्रणायसाराधिका सा च राधिका तदेतदव-धारणाच्चमत्कारं त[१]त्कारकारणं कृष्णाकारसाक्षा-त्कारमपि समधिगम्य रम्यचरितानयोः कथा-कारयोर्वहु सत्कारं चकार ॥

विवेश च वश[२]वशम्वदतया केशवेन सह लीला-वेश्मेति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु
राजसूयपूरणं सप्तविंशं
पूरणम् ॥

---

(१) चमदित्येव ।
(२) वशः कान्ताविति सङ्कीर्णवर्गात् ।

अष्टाविंशं पूरणम् ।

अथ प्रतिप्रातरिव तत्प्रातरपि स्निग्धकण्ठः कथया सर्व्वमुत्कण्ठयामास ॥

तदेवं प्रस्थापिता दूताः पुरुहूतप्रस्थात्तत्प्रस्थानं यावदेव प्रात्यहिककथां व्रजपतिं प्रत्याययामासुः ॥

तदनन्तरं तु शक्रप्रस्थात्कृतप्रस्थाने लब्धकुशस्थलीसमीपस्थाने यादवेशाने तत्प्रवेशमलभमानौ शलभसमानौ कौचिद्व्रज एव सङ्गच्छमानौ व्रजपतिं प्रति निवेदयामासतुः ॥

आवां तावद्वर्द्धमानभूमघूमवृतामिव द्वारकां द्वारकापतिना प्राग्द्रुतलब्धप्रवेशामनु विशन्तावपि न द्वारमलभावहि । परन्तु तस्याममन्दमाक्रन्द-(१)मेव श्रवसोरभजावहि । द्वारकाखण्डलस्तु मार्त्तण्डमण्डलवन्निजतेजसा तत्तेजः खण्डयन्नेव सरथ

---

(१) भारावे रुदिते त्रातर्य्याक्रन्दो दारुणे रणे ।

एव च पथन् प्रविवेशेति तु वहिर्जनगणान्निरधारयावहि ॥

अथ तदेवमाकर्ण्य वैवर्ण्यपूर्णा मर्म्मणि चूर्णा इव च तूर्णं तूर्णमेव ते व्रजेशमुखा दीनमुखा गतिशक्तिपरीतानन्यानभिनीतान्[(१)]प्रेषयामासुः ॥

सर्व्वेऽपि ते वहिर्वहिरेवावहितं विधाय[(२)] चलिता न हि मध्यमनुसन्धाय चलिताश्च तेऽमी न तु व्रजपर्य्यन्तं लब्धाः किन्तु दुःखस्तब्धाः पथि पथि बद्धा इव स्थिताः ॥

वस्तुतस्तु तत्र वृत्तमेवं वृत्तं ।—

खलाग्रणीः साल्वः खल्वग्रे श्रीकृष्णेण रुक्मिण्या हरणे वृष्णिभिश्च तस्य तत्पक्षमागधादिलक्षस्य च निर्हरणे सम्पन्ने पन्ने हि तेषु[(३)] हितेषु वरम्मन्यशिशुपालमन्युं शमयत्सु निशमयत्सु च जरासन्धादिषु सन्धा[(४)]माचचार ॥

यादवदवं प्रति दवप्रतिनिधिं शस्त्रमस्तं कुर्व्वन् वस्त्रं विना जातामिव वस्त्रपामपाकरिष्यामीति ॥

किन्तु सन्धां सन्धाय च क्षात्रसन्धाया[(५)]मन्धायमानस्तपस्या-निर्व्बन्धाय प्रस्थितवान् ॥

---

(१) योग्यान् ।　(२) अवधानं कृत्वा ।
(३) गतचेष्टेषु ।　(४) प्रतिज्ञां ।　(५) मर्य्यादायां ।

प्रस्थाय च पाशुपतप्रस्थान[1]मास्थाय पशुपति-तुष्टिं पुष्टीकर्त्तुमिच्छन्मुष्टिमितं यत्पांशुं नक्तं नक्तं भुक्तवांस्तत्पांशुमेव मुहुरुपयुक्तवान् ॥

भाविशोके लोकेहिते हि तादृगेव विहितावहिता-चाराणां वाचामाचारः । पशुपतिस्तु सात्वतपति-मवजानतस्तस्य पुनरपयानं जानन्नपि सात्वतपते-रेव वीर्य्यप्रचारणाय शरणागताननुसरणाकीर्त्ति-दोषमोषाय च जाताशुतोषायमाणस्तं मत्सरान्तरं[2] वत्सरानन्तरं वरं वितरितुमाससार ॥

स तु दुष्टादिमः सन्तुष्टादिव तस्मान्मयमायामय-मयोमयं सुरादीनामभेद्यमवेद्यञ्च यदूनां दूना-न्तर[3] तारचनाय गगनयान[4]यानं[5] याचित्वा लब्धवान् ॥

तथापि जितवाणपत्त्रस्पृगुमापतेर्मापतेस्तु भीत एवासीत् ॥

तावता कालेन शिशुपाले तु लब्धकाले तन्मैत्री-पालेन तेन द्वारकायां द्वारकापतिरहिततामवहितां विधायाभियुयुजे ॥

---

(१) शास्त्रं । (२) मध्यं ।
(३) मध्य । (४) गमन । (५) वाहनं ।

अभियुज्य चालातचक्रवत्तत्पुर्य्यां वक्रगत्या सर्व्वतः प्रत्यासन्नतया दिवि भूमावपि कृच्छ्रभूमानमृच्छया-मास ॥

यत्र च ।—

पेतुर्वक्रगचक्रवातजरजःस्पृक्शर्करासारयुग्-
वृक्षग्रावसबज्रसर्पनिवहा द्योचारिणस्तत्पुरात् ।
भूमावुद्भ्रमता तु तेन ससुरप्रासादलीलावन-
प्राकाराजिरगोपुरादिकमभूच्चूर्णीभवद्घूर्णितं ॥

ततश्च ।—

यर्ह्यन्तर्नगरान्तमागमददस्तर्ह्येव लोकद्रवा-
न्मारः कृष्णकुमारकः स्वयमगा-
　　　　　　　　　त्तस्याभिमुख्यस्थितिं ।
मा भैष्टेत्यभिजल्पता रथवता येनाथ सर्व्वो जनः
कृष्ण-भ्रान्तिकरेण सान्त्वितदशा-
　　　　　　　　　मासद्य सद्यः स्थितः ॥

व्रजराज उवाच ।—

तस्य बालकस्य किम्बालम्बनतामन्येनालम्बन्त ॥

स्निग्धकण्ठ उवाच ।—कथं नालम्बेरन् ? ॥

यतः ।—

योग्यत्वादनपेक्षो यः स सर्व्वापेक्ष्यतां व्रजेत् ।
विश्वेषामीश्वरो यद्वद्वेदेषु परिगीयते ॥

भद्रबलश्रीर्बलभद्रस्तु पूर्व्वं श्रीगोविन्देन सत्रा सत्राजिताभयातोऽपि राजगणामन्त्रणामत्रायमाण-पत्रागमनानन्तरं तत्रायाश्चक्र इति वर्णितमेव ॥

यदि च तत्राभविष्यत्तदा तेन हलिना जित-कलिना हलिना(१) कृष्टं सर्व्वत्र कुशलेन मुसलेन च धृष्टं तत्तदयःपुरं तूर्णमेव चूर्णमभविष्यत् । तदविद्यमानत्वादेव च प्रद्युम्न एवात्र प्रधने प्रधा-नतां दधार ॥

व्रजराज उवाच ।—

कस्कः स्वकयशस्करतां सहायतया जिघाय(२) ॥

स्निग्धकण्ठ उवाच ।—

गद-साम्ब-सात्यकि-चारुदेष्ण-सानुजाक्रूर-हार्दिक्य-भानुविन्द-शुक-सारणादिरखर्व्वः खर्व्वसंख्यः सर्व्व एव यदुगणः ॥

---

(१) महद्धलं । (२) प्राप ।

व्रजराज उवाच ।—ततस्ततः ? ॥

स्निग्धकण्ठ उवाच ।—

ततश्च ।—

माया-निर्म्मितशस्त्रजालमभिनत्तस्याथ सौभञ्च त-
त्तं साल्वञ्च यथा यथा मनसिजस्तद्वत्परे चापरान् ।
एवं यर्हि परत्र चित्तमभवत्तेषां तदा तु द्युमां-
स्तं तस्य द्विषतः सखा स्व-गदया
हन्ति स्म वक्षः प्रति ॥

ततश्च ।—

तस्मादजातव्यथमप्यकस्मा-
द्गदाहतेर्विस्मयमूढचित्तं ।
अपोढमात्मानमवेक्ष्य सूते-
र्नाभर्त्सयत्तं मुरशत्रु-पुत्रः ॥

ततश्च ।—

मन्मथः सपदि सूतयापित-
स्तंद्युमन्तमगमत्पुनश्च सः ।
तस्य साङ्कशताङ्गमच्छिनत्
कं शताङ्गमकरोद्विभिद्य च ॥

येऽन्ये वा पातिता देहाः साल्वीयानां तदा मृधे ।
सिन्धावेवापतंस्ते च वृष्णीनां वाण-शिक्षया ॥

तदेवं साल्ववाहिनीपतिं[1] प्रति कुम्भसम्भवस्य मनोभवस्य सप्तविंशतावहोरात्रेषु युद्धेन कृतयात्रेषु दुर्निमित्तविलोकं लोकं प्रति निमित्तं विधाय कुरुवृद्धाद्यनुज्ञामात्मनि निधाय त्वरया द्वारकां सन्निधाय सममेव प्रविष्टयुधं हलायुधं पुररक्षणाय प्रणिधाय सोऽयं दैत्यानामवदायकः सर्व्वनायकः कलहायमानं वैरायमाणमभ्रायमाणप्रायतया शब्दायमानं दुर्दिनायमानं साल्वमेवाभियुयुजे ॥

यत्र लीलायमानतया स्वयं सुदिनायमानः सञ्जातः ॥

तदाविशन्नुरगरिपुध्वजः स्वकैः
परैरपि त्वरितमलोकि सर्व्वतः ।
रविर्यदा विशति सुरेन्द्र-दिक्तटं
न वीक्ष्यते स्फुटमथ केन वा तदा ॥

तदेवं स्थिते ।—

यदा कार्ष्णिः पार्ष्णिग्राहितां जग्राह तदा ।—
शीर्णसैन्य-निकरेण शार्ङ्गिणो
शक्ति[2]माशु किरता विकुर्व्वता ।

(१) समुद्रं । (२) शस्त्रविशेषं ।

दारुकः स्ववपुषास्तृतप्रभु-
लक्ष्यतामगमि[१] सौभपालिना ॥

अथापतन्ती शक्तिः सा महोल्कावदलक्ष्यत ।
या कृष्णवाणरक्षोभि[२]र्व्योमान्तगैरभक्ष्यत ॥

अथ वरैः षोडशभिः शरैराविध्य विध्यच्चित-चरणैः परितः परीतैस्तैः साल्वं गलितपल्लव-शाखा-कुलैरावृतं शाखिनमिव चकार ॥

तदैवापरिमाणैर्बाणैः साल्व-पुरमपि सम्मुख-विमुखनिर्गतचुण्डमण्डलावगुण्ठिततयासीहुण्ड-वनमिवाचचार ॥

तदेवमाचर्य्य विचारयति स्म ।—

नानेन निरवसान[३] ज्ञानवलयोर्वितानेन मम युद्धकौतुकमुद्बुद्धं स्यात् ॥

तस्माद्भक्तिविनाकृतजनकृतज्ञानवलनिकृतिता-रहितप्रकृतिरेवाहमज्ञदुर्व्वलसम्भवां तत्तद्विकृतिं प्रत्यापयिष्यामीति ॥

तत्र तस्यान्यमायावशादज्ञानादौ वास्तवतायावादिनस्तु वादरायणेरास्ताडनविषयतामनैषीत् ॥

---

(१) गमयामासे ।　(२) रूपकं ।
(३) अनन्त ।

"एवं वदन्ति राजर्षे"इत्यादिना ॥

अथ तटस्थतामटन् कृष्णस्तस्य धृष्णुजः शरविसरस्पर्शमिषमवलम्बमानः स्वचापं लम्बमानमाचचार ॥

ततश्च कृतहाहाकारे लोक-वारे सौभेशाने च विकत्थमाने मुरमथनस्तत्कथनमन्यथयन् गदापातेन तमतीव सव्यथं चकार । न पुनः कुतुकसंयोजनाय प्राणैर्वियोजयाञ्चकार ॥

अथ पुनरुपेक्षितः सौभमहीक्षित्तस्मादन्तर्दधे, दधे च मायावितानं ॥

यत्र खलु देवकी-सन्देशहर-वेषः पुरुषविशेषः परुषमिदं गोविन्दं विन्दमानं चकार ।—

पिता ते ऽपयापितः साल्वेनेति ॥

गोविन्दश्च तत्र शोकमिव विन्दमानः सन्दिहान इव च पुनरिदं ददर्श ॥

यथा साल्व एव पुरतः स्व-पुरतः श्रीवसुदेवमिव किमपि दूरतः समानीय क्रूरकर्म्म विनिर्म्ममे ॥

तदेवं दृष्ट्वा तदाभासेऽपि क्षमामस्पृष्ट्वालम्भित-तद्विरोधं वोधमेव प्रबोधयंस्तं सौभस्थमेव बुबुधे रुरुधे युयुधे च ॥

यत्र चेदं पूर्व्वमवादीत् ।—

अरे ! भूरिमाय ! रे वञ्चक ! कति वञ्चना सञ्चेत-
व्येति ॥

युद्धन्तु यथा ।—

सर्व्वैरोजोभिरस्त्रैरपि युधमभितः
सन्दधद्बन्ध्ययत्नः
स्वाल्वः खल्वत्र जज्ञे हरि-विशिखफलं
त्वन्वगाल्लक्ष्य(१)मेव ।
तस्मिंस्तिष्ठन् सवर्म्मा सधनुरपि दल-
न्मूर्द्धतां स प्रयास्यं-
स्तत्पूर्व्वं तद्वदासीद्यदमनुत दशां
भाविनीं भूतरूपां ॥

गदा हरेः परमिह सौभमातनो-
न्न चूर्णितं जनमपि चैतदाश्रितं ।
उडुम्वरं यदि मुसलेन कुट्यते
कथं हठात्कृमि-पटलः पलायतां ॥
तथा चूर्णीकृतं जज्ञे तदयोमयपत्तनं ।
यथाम्बुधिजनिस्त्रीणां नेत्राञ्जनदशां ययौ ॥

---

(१) कर्म्म ।

यदाऽब्धावपतत् पूर्णं सौभ-चूर्णन्तु सर्व्वतः।
तदा जलार्णवस्तस्मादुत्तस्थुर्धूर्म्मिका इव ॥

सालवस्तु पूर्व्वमजहादतिधूर्त्तचेता-
स्तच्चूर्णनान्न तु कमप्युपदेष्टुमैष्ट।
यावन्निजोष्ठ-पुटमुद्धटयेत्स ताव-
त्काष्र्णी गदा न सहते सहसा विलम्वं ॥

गदा-वलं वीक्ष्य हरेः स मूढधी-
रुद्यम्य यां रौद्र-गदां दधावथ।
तस्याविदूरेऽस्तु कथा तदास्पदं
भुजां शरेणायममुष्य चाच्छिनत् ॥

तथापि वितथाभिनिवेशभरेण सव्यकरेण युद्ध-व्यवसायिनस्तस्य ॥

अरुणाच्छविचक्रसङ्गमा-
दुदयाद्रिप्रभमूर्त्तिरच्युतः।
तमसातिसमस्य(१)विग्रह-
प्रथमांशं विचकार वैरिणः ॥

यदा सौभं तथा सालवः पपाताम्भसि वारिधेः।
तदा स्वर्दुन्दुभिध्वानः कल्लोलध्वनिनाक्रमि ॥

---

(१) अतितुल्यस्य।

अथ स्निग्धकण्ठः समापनमाह स्म ।—

यदर्थं साल्वान्तप्रधनभवचिन्ता-चयमगा-
द्व्रजस्वामिन् ! प्राणप्रणाशनकरं गोकुलजनः ।
स एवायं पूर्णां सपदि भवदङ्कं विरचयन्
रुचीभिः स्वाभिस्तं विरचयति फुल्लं तव सुतः ॥इति॥

अत्र व्रजवन्दिनश्च तद्वन्दितामापन्नवन्तः ।—

यथा ।—

पार्थ-क्रतुराजप्रथ ! । दिव्यद्रवसम्पद्रथ ! ॥
शब्दप्लुतदिग्दन्तिक ! । आप्तस्वकपुर्यन्तिक ! ॥
दृष्टोद्भटसौभक्रम ! । स्पृष्टोन्नतिभाग्विक्रम ! ॥
बाणाञ्छितसाल्वादिक ! । शस्त्रप्रतिशस्त्राधिक ! ॥
काण्डस्तृतसौभस्थल ! । साल्वच्छललङ्घिच्छल ! ॥
अज्ञं प्रति दत्तभ्रम ! । विज्ञं प्रति सद्विभ्रम ! ॥
छिन्नप्रतिहन्त्रस्त्रक ! । त(१)त्ताडनजिच्छत्रक ! ॥
सौभत्वयकृत्सद्गद ! । धूतप्रतिकृत्तन्मद ! ॥
तद्दक्षिणदोर्हृच्छर ! । चक्रक्षिततत्कन्धर ! ॥
एवं कृततत्तत्क्रिय ! । त्वं राजसि गोष्ठप्रिय ! ।
वीर ! ॥ इति ॥

---

(१) रिपुकर्तृकं ।

तदेवं सर्व्वे कथामापूर्य्य सुखपूर्य्यमाणतया तूर्य्यं वादयन्त इव यथास्वं पथा चलितवन्तः ॥

अथ रात्रावपि तदेतन्मात्रा वार्त्ता श्रीराधा-माधव-सदसि पदतामादधे । या खल्वेकपद्यमयी प्रतिपद्यते ॥

यथा ।—

भाति यद्वत्प्रियो लब्धः पुष्णान्नेष त्वदाशिषा ।
राधे ! वार्त्ताऽप्यथो तस्य श्रवसी तव पोक्ष्यति ॥

॥ इति ॥

तदेवं सुखवशान्तस्तथा सर्व्वे निशान्तमासन्ना रहसि तु श्रीराधा स्व-कान्तामिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु नष्ट-
सात्वतास्पष्टानन्दमष्टाविंशं
पूरणम् ॥

ऊनत्रिंशं पूरणम् ।

अथ भाविकथान्तरावतारणाय क्रमात् प्रमाणं निरूप्यते ॥

तदेवं तत्र मङ्गलभजने स्थिते व्रजजने पुनरत्र दुःस्थिते पूर्णिमा-वृन्दे अपूर्णमनस्तया विविक्तमनु विविक्तवत्यौ ॥

तथा हि ।—

यदा केशिमथनस्य व्रजान्मधुरागमनसमनन्तर-मेव तज्जनदुःखमीक्षितुमक्षमतया तदतिदूरक्षिति-स्थितितां गतयोर्मधुमङ्गलसङ्गतवृन्दा-पूर्णिमयोश्चि-रमेकान्तवननिशान्ततासीत् ॥

तदा च नानासम्वदमानयोरनयोः सम्प्रति सम्वदनमेवं बभूव ॥

यथा ।—

यदा साल्वयुद्धमुद्बुद्धं तद्दुःखेन च गोष्ठं रुद्धं तदा तत्तद्वृत्तं विन्दमाना वृन्दा सरुदितमुदितवती ।—

भगवति ! किमनन्तरमन्तरं भवितेति न प्रविशति मे हृदयं ॥

अथ पूर्णिमा गद्गदपूर्णा गदति स्म ।—

मम च विगमितसर्व्वा लोकेन शोकेन वपुरपि न स्फुरति ।किमुत पुरःस्थितमास्तां तावदपुरःस्थितं ॥

वृन्दाह ।—

योगमायाया भवत्याः स्वगोपनार्थमेव तपस्वि-वेषेण भवन्त्याः कथं मध्ये मध्ये ज्ञानं पराहन्यते ॥

पूर्णिमाह ।—लीलाशक्तिरूपवत्या भवत्या यथा ॥

वृन्दाह ।—तच्च कथं ? ॥ पूर्णिमाह ।—

या काचिदेका रतिप्रेमप्रणयरागानुरागमहाभाव-पर्य्यन्तवृत्तिमयी प्रीतिनाम्नी हरेः शक्तिर्विराजते सा सर्व्वतः प्रबलायास्मदादीनां परमाश्रयरूपं श्रीकृष्णमपि शश्वन्मोहयति ॥

यथा ।—

"ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् ।
उभावपि वने कृष्णो विचिकाय समन्ततः" ॥

इति ॥

वृन्दाह ।—

तदेत[1]दपि सार्व्वत्रिकं न दृश्यते । कारणन्तु न परामृश्यते ॥

पूर्णिमाह ।—

सप्रेमभक्तानां निकटीभावत एव सा शक्तिः श्रीकृष्णेऽपि रुचिं प्रकटय्य प्रकटीभवति ॥

वृन्दाह ।—प्रस्तुते किमायातं ? ॥

पूर्णिमाह ।—परमप्रेमवतां श्रीमति ब्रजे वसतां सङ्गाद्वयमपि किं बहुना ? श्रीकृष्णः स्वयमपि प्रेम-गङ्गा-प्रवाहमनुमग्ना उन्मग्नाश्च भवन्तः[2] सम्विदमसाम्विदञ्च प्रतिपद्यामह इति ॥

वृन्दाह ।—तर्हि कास्मदाशाया गतिः ? ॥

पूर्णिमाह ।—

भवत्या इव स्वप्नेऽपि परिदेवनामेव सेवमानायाः कृतक्षपणायामनन्तरक्षपायां कोऽपि गोपितात्मा पुरुषः पुस्तकमिदं मम हस्तविन्यस्तं चकार । विचारय तदिदमिति वदन् पुनरवदन्नेव कुत्रापि चचार च ॥

---

(१) ज्ञानपराहननं । (२) सन्तः ।

ततस्त्वमत्र काचकामलामलकारदुष्पारवाष्पानुमोचनपरलोचनायां मयि लोचनायमाना भव ॥

वृन्दा तु तद्वन्दमाना प्रोवाच ।—

पर्णेषु स्वर्णवर्णेष्वमरपतिमणिप्रख्यतावर्ण्यवर्णै-
र्निर्व्वर्ण्यैर्गाढतम्यामपि चितमभितो रत्नसङ्कीर्णगात्रं
आमुक्तस्वच्छमुक्ता गुणमिदमनु यत्
पुस्तकं कृष्णशोभां
तद्वस्त्रादिप्रयुक्तां स्वयमिह स इव
प्रादुरस्तीति विद्मः ॥

पूर्णिमा सानन्दमाह ।—

तर्हि परममर्हितमेव तदिदमस्मन्मनः सम्विदं विदितां करिष्यतीति त्वरितमेव वाचय ॥

वृन्दा सप्रमदवृन्दं तद्वाचनास्पदमाचचार ।—

प्रथमं तावद्वहिर्विहितान्नामवर्णान् निर्व्वर्णयन्ती वर्णयामास ॥

अत्र कलितत्वद्भागधेयं श्रीमद्भागवतभागसम्भाग(१)जागरूकं पाद्मोत्तरखण्डस्य खण्डं निध्येयं मध्ये मध्ये तत्तत्पोषणाय सञ्चितं किञ्चिदन्यदन्यदपीति ॥

---

(१) अनुगामित्यर्थः ।

अथ प्रथमं प्रथमं पठ्यतामिति पूर्णिमा-कथनामन्तरं वृन्दा पपाठ ।—

अथ श्रीभागवत-पद्यानि ।—

'तस्मिन्निपतिते पापे सौभे च गदया हते ।
नेदुर्दुन्दुभयो राजन् ! दिवि देव-गणेरिताः ॥
सखीनामपचितिं कुर्व्वन् दन्तवक्रो रुषाभ्ययात् ।
शिशुपालस्य साल्वस्य पौण्ड्रकस्यापि दुर्म्मतिः ॥
परलोकगतानाञ्च कुर्व्वन् पारोक्ष्यसौहृदं ।
एकः पदातिः संक्रुद्धो गदापाणिः प्रकम्पयन् ॥
पद्भ्यामिमां महाराज ! महासत्त्वो व्यदृश्यत ।
तं तथा यान्तमालोक्य गदामादाय सत्वरः ॥
अवप्लुत्य रथात्कृष्णः सिन्धुं वेलेव प्रत्यधात्"

इत्यादि ॥

तदन्ते च ।—

"कृष्णोऽपि तमहन् गुर्व्या कौमोदक्यास्तनान्तरे ।
गदानिर्भिन्नहृदय उद्वमन् रुधिरं मुखात् ॥
प्रसार्य्य केशान् बाह्वङ्घ्री धरण्यां न्यपतद्व्यसुः ।
ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं ॥
पश्यतां सर्व्वभूतानां यथा चैद्य-वधे नृप ! ।
विदूरथस्तु तद्भ्राता भ्रातृ-स्नेहपरिप्लुतः ॥

आगच्छदसि-चर्म्मभ्यामुच्छ्रसंस्तज्जिघांसया ॥
तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना ।
शिरो जहार राजेन्द्र! सकिरीटं सकुण्डलं ॥
एवं सौभञ्च साल्वञ्च दन्तवक्रं सहानुजं ।
हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः ॥
वृतश्च वृष्णि-प्रवरैर्विवेशालङ्कृतां पुरीम् ॥इति ॥

पूर्णिमा प्राह स्म ।—

अत्रेदमधिगतं यदा साल्ववधः सम्वृत्तस्तदा गदामादाय दन्तवक्रः सन्नद्धस्तत्र चंक्रम्यते स्म । श्रीकृष्ण-गदयाप्युत्क्रम्यते स्मेति ॥

अथ तदन्ते तदन्तेवासिनी वृन्दा सन्दिदेह ।—

भगवति! तदिदं मम मतिमतीतं ।

कदा नामावधारितवान् विदूरधामा दन्तवक्रनामा तत्क्षणारब्धसाल्ववधाभिधानं । अवधारयतु वा कथं तदैव दैवतमिव दूरनिजदेशात्तद्देशं प्रविवेश । तत्रापि गदापाणिः सन् पदातिरेव केवल एव चेति कथमिव ॥

पूर्णिमा प्राह स्म ।—

उत्कृष्टं पृष्टं । किन्तु तदनन्तरवाचनयापि रोचय निजवाचं ॥

वृन्दा तदपि वाचयति स्म ।

अथ पाद्मोत्तरखण्ड गद्यानि ।—

"अथ शिशुपालं निहतं श्रुत्वा दन्तवक्रः कृष्णेन योद्धुं मथुरामाजगाम। कृष्णस्तु तच्छ्रुत्वा रथमारुह्य तेन योद्धुं मथुरामाययौ। तयोर्दन्तवक्र-वासुदेवयोरहोरात्रं मथुरा-द्वारे संग्रामः समवर्त्तत। कृष्णस्तु गदया तं जघान। स तु चूर्णितसर्व्वाङ्गो वज्र-निर्भिन्नमहीधर इव गतासुरवनी-तले पपात" ॥

॥इति॥

तदेवं वाचयित्वा वृन्दा पप्रच्छ ।—

तदिदं पुराण-द्वयं प्रत्युत परस्परं विरुद्धमिव बुद्धमिति ॥

एतदुत्तरं पूर्णिमायाः पुनस्तत्तद्वचनलब्धविज्ञान-पूर्णितायाा उत्तरं ॥

न हि न हि ! ॥ किन्तु ।—

श्रीमद्भागवतस्य तावदसम्बद्धभाषिता न सम्भवति ॥

तथा पुराणान्तरेण "सम्भवति चैकवाक्यत्वे वाक्यभेदो न न्याय्य"इति वाक्यैकवाक्यतान्यथा-नुपपत्त्या तदिदं गम्यते ॥

यत्र प्रथमं शाल्वस्येव शिशुपालेन सह राजसूयमनागतस्य तस्य[1] पृथ्वीप्रकम्पनगतिसम्पन्नतया महासत्वतया सिन्धुतया वज्रनिर्भिन्नमहीधरतया च पठितया सहसा प्रबलतमतां प्राप्तः सोऽयमित्यवगतस्य स्मरहराराधनं तर्क्यते। यत एव वराभासेन निर्वास्यतः प्रदीपस्येव प्रज्वलतस्तस्य निजपूर्वदेहहिरण्याक्षतदाविर्भूतमहादेहादितयावगतस्यातिदूरादपि पादघातप्रतीकसङ्घातयोरनुसन्धानमदुःसन्धानमवधीयते ॥

तत्र च सति मनोरथपथगति-प्रथकस्य मुरमथनरथस्य च वैभवं सुसम्भवमत्रगम्यते ॥

तथा हरिलिप्सितसंप्रहारलीलां वलयितुर्मनोजवतां कलयितुस्तत्तद्वृत्तसञ्चारणाविशारदस्य श्रीनारदस्य च साहायकमुदीक्ष्यते ॥

तदेवमेव श्रीभागवते ।—

"सखीनामपचितिं कुर्वन् दन्तवक्त्रो रुषाभ्ययात् ।
शिशुपालस्य साल्वस्य पौण्ड्रकस्यापि दुर्मतिः"

इत्यत्र साल्वोऽपि गणितः ॥

---

(१) दन्तवक्त्रस्य ।

पाद्मे च "कृष्णास्तु तच्छुत्वे"ति गदितं । किन्तु "महासत्वो व्यदृश्यते"ति यच्छ्रीभागवत-वचनं तत्तु दृष्टोऽप्यसौ श्रीनारद-वचनेन विज्ञानतत्त्व इति गम्यते ॥

तथा च सति निहतशिशुपालं श्रीगोपालमिन्द्र-प्रस्थादकृतप्रस्थानं निशम्य मथुरामागम्य पथि निर्द्वन्द्वं तं प्रति द्वन्द्वयुद्धेन परिपन्थिताचरणाय स्थितः प्रागेव तं द्वारकां प्रस्थितमाकलय्य संशय्य कृतविचारचक्रः स खलु दन्तवक्रस्तत्तच्चक्र-पाणिसंय[१]च्छीलासुखसारदेन श्रीनारदेन साल्व-वधादिकमवधारयामासे ॥

द्वारका-नाथश्च तथा तत्कथनया तदागमन-साक्षात्कारप्रथनया च मनोवदतीतपथेन तेन रथेन[२]तत्रापयामासे नूनमिति मत-द्वयमनून-मेकमतं स्यात् । तदिदमपि व्यक्त[३]मद्य श्व एव विशेषाद्व्यक्तं भविष्यति । पुनरुत्तरमुत्तरविषयी-क्रियतां ॥

(१) युद्ध । (२) कर्त्तृ । (३) नूने ।

अथ वृन्दा पठति स्म ।—

पठन्ती च नटन्तीवासीत् । तत्र पूर्व्ववत्तद्वयं यथा ।—

कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य्य नन्दव्रजं गत्वा सोत्कण्ठौ पितरावभिवाद्याश्वास्य ताभ्यां साश्रु-कण्ठमालिङ्गितः सकलगोपवृद्धान् प्रणम्याश्वास्य वहुवस्त्राभरणादिभिस्तत्रस्थान् सर्व्वान् सन्तर्प्प-यामासेति ॥

तदेतत्पठित्वा च वृन्दा पुनरुच्छलद्वाष्पं पप्रच्छ ।—

तदिदमपि किं श्रीमद्भागतसम्मतं ? ॥

पूर्णिमा पूर्णमनाः प्राह स्म ।—

दृश्यतामुत्तरविभागः ॥

वृन्दा पुनः श्रीभागवत इति पठित्वा पपाठ ।—

"तास्तथा तप्पतीर्वीक्ष्य स्व-प्रस्थाने यदूत्तमः ।
सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः" ॥

इति ॥

पूर्णिमोवाच ।—मथुराप्रस्थानस्थानमिदं वचनं ॥

वृन्दा पुनः पपाठ ।—

"यात यूयं व्रजं तात ! वयञ्च स्नेहदुःखितान् ।
ज्ञातीन् वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं" ॥

इति ॥

पूर्णिमा जगाद ।

कंसवधाद्दिनकतिपयानन्तरं श्रीव्रजेशादिव्रजव्राजे तदिदं श्रीकृष्ण-वाक्यं ॥

वृन्दा पुनः पपाठ ।—

"हत्वा कंसं रङ्ग-मध्ये प्रतीपं सर्व्वसात्वतां ।
यदाह वः समागत्य कृष्णः सत्यं करोति तत्" ॥
इति ॥

"आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ।
प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः" ॥
इति च ॥

पूर्णिमोवाच ।—

तदिदमुद्धवसन्देशतया बुद्धं । अत्र च द्रष्टुमिति दर्शनमेव पुरुषार्थ इत्यर्थः ॥

"पित्रोः प्रियं विधास्यत" इति तदेकपुरुषार्थत्वेऽपि तयोरभीष्टं नित्यनिजलालनारूपमित्यर्थः ।

पूर्णिमाह ।—पुनर्वाच्यतां ? ॥

वृन्दा वाचयति स्म ।—

"मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्ति यत् ।
अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथ ॥

पूर्णिमाह ।—

सोऽप्येष श्रीमदुद्धवसन्देश एव । अत्रास्मच्छ्लोक-पदानां "मयी"त्यादिना त्रिरावृत्तिस्तत्र च प्रथमतः "कृष्ण" इति विशिष्य शिष्यमाणयोरपि "मा मा"-मित्यनयोर्विभक्तिविपरिणामेनानुवृत्तिमभिप्रेत्य कृष्णाकारेणैव स्वप्राप्तिः प्रकरणनिगमनायामभि-प्रेता । किन्त्वन्यद्वाऽप्यतां ? ।

वृन्दा प्राह ।—

अस्ति चात्र किञ्चन हारिवंशवचनं ।—

"अहं स एव गो-मध्ये गोपैः सह वनेचरः ।
प्रीतिमान् विचरिष्यामि कामचारी यथा गजः"॥
॥ इति ॥

पूर्णिमा चाह ।—

तदिदं कंसवधादुत्तरमुग्रसेनं प्रति श्रीकंसजित्-प्रत्युत्तरं मद्व्याख्यानसाक्षितया लक्षितं ॥

अथ वृन्दा तदैत(१)दुक्तिविषयीकृत्य नृत्यन्तीव तदिदमुक्तवती ।—

सत्यं सत्यसङ्कल्पस्य तस्य वचनं नासत्यता-मृच्छेत् यदि च श्रीभागवतादेव पुनर्व्रजागमनश्रवणं

(१) तदैतदित्यत्र तदेतदिति वा पाठः ।

साक्षात्कर्णसुखरचनमालोचयामि तदा तत्परम-
मेव रोचनं स्यात् ॥

पूर्णिमाप्युत्सुकतापूर्णमुवाच ।—

उल्लेखय तदुत्तरलेखं । कदाचित्तदपि सम्मदाय कल्पेत ॥

वृन्दा सानन्दमूचे ।—अस्ति किञ्चित् ।

यथा श्रीभागवत एव ।—

"यर्ह्यम्बुजाक्षापससार भो ! भवान्
कुरून् मधून् वाथ सुहृद्दिदृक्षया ।
तत्राब्दकोटिप्रतिमः क्षणो भवे-
द्रविं विनाक्ष्णोरिव नस्तवाच्युत !" ॥इति॥

पूर्णिमोवाच ।—

तदिदं भाविभारतयुद्धानन्तरं श्रीद्वारका-पते-र्द्वारकाप्रवेशे द्वारकाप्रजा-वचनं ॥

अत्र वृन्दा निवेदयामास ।—पद्यमिदं विशद्यतां ? ॥

पूर्णिमाथ वर्णयामास ।—

यथा "कुरूनि"ति कुरुदेशस्य तथा "मधूनि"ति मथुरादेशस्य समुद्देशः । सुहृदोऽप्यत्र द्वारका-प्रस्थानात्परस्ताद्व्रजस्था एवेति व्यवस्थापनं ॥

यथा ।—

"बलभद्रः कुरुश्रेष्ठ ! भगवान् रथमास्थितः ।
सुहृद्दिदृक्षुरुत्कण्ठः प्रययौ नन्द-गोकुलं" ॥ इति ॥

वृन्दोवाच ।—

तदिदं कालान्तरभावीति च सम्भावितं स्यात् ।
न तु परं दन्तवक्रसंपदनन्तरभावीति ॥

पूर्णिमा विमृश्य पुनर्दृश्यतामित्युपदिदेश ॥

वृन्दा पुनरुवाच ।—

आं ! आं ! पुनः श्रीभागवतीयं पद्यमेकं प्रति-पद्यते ।—

"अपि स्मरथ नः सख्यः ! स्वानामर्थ-चिकीर्षया ।
गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः" ॥ इति ॥

तदेतद्वाचयित्वा वृन्दा पुनरुवाच ।—

किमनेन समुन्नेयं ? ॥

पूर्णिमा प्राह स्म ।—

तदिदं कुरुक्षेत्रयात्रायां श्रीराम-भ्रात्रा निजस्नेह-पात्राणां व्रजतनुगात्राणां दुःखात्त्राणाय भङ्ग्या शत्रुपक्षक्षपणमेवावधितया प्रतिज्ञातं । शत्रुपक्ष-क्षपणञ्च सविदूरथ-दन्तवक्र-संपदन्तमेव ॥

तदनन्तरं हि स्वयं शस्त्रहस्तता संन्यस्ता स्यात् ।

तस्मादिदमपि सर्व्वसुखसम्पद्पद्मपुराणमतं श्रीमद्-भागवतभागवगतं ॥

ततः कश्चिद्दन्तवक्रवधं कुत्रचिन्मन्यतां नाम । तदनन्तरन्तु श्रीकृष्णस्य व्रजागमनमवश्यमेव मन्तव्यं ॥

इतीदं प्रोच्य भगवती पुनः प्रोवाच ।—

किञ्चिदन्यदस्ति ॥

वृन्दा तु "तथैवाध्वगवेषेणे"त्यादिना पूर्व्वं दर्शितं श्रीरामस्य व्रजादागतस्य श्रीकृष्णेन सम्वादरूपं हरिवंश-वचनमेव पपाठ ॥

अथ तदभिप्रायं पूर्णिमा प्राह ।—

अत्र यद्व्रजाद्गतं राममग्रजं रहसि रामानुजः प्रत्येकव्रजजीव-कुशलं पृष्टवान्; यच्च ।—
"सर्व्वेषां कुशलं कृष्ण ! येषां कुशलमिच्छसी"ति तस्मादुत्तरं लब्धवांस्तस्माद्भाविनिजसङ्गम-मङ्गल-मपि तत्र द्वयोरपि भावितं वभूव । तत्रोदासीनतायां तत्राप्युदासीनता स्यादिति ॥
अथ तेन निदिग्धधीरपि वृन्दा सन्दिग्धिमाचचार ॥

पद्मपुराणमिव कथमच्छद्म न तद्व्रजप्रत्यागमनं वचनसद्म चकार स च पुराणसारः ॥

पूर्णिमा बभाषे ।—

श्रीमद्भागवतं खल्विदं श्रीकृष्णभागवतंस इति शंसन्ति । तच्च निज-रहस्यमिदं न व्यक्तं वक्तुं व्यवस्यति । तच्च गर्व्वस्थेम्ना स्वतन्त्रम्मन्यतया नानान्यसम्पत्कामनाधीनानां तदुदासीनानां मत्यवगुण्ठनार्थं प्रेम्णा गोकुललोकम्मन्यतया तमुपासीनानां विशिष्टतन्निजाभीष्टस्पष्टश्रवणविहीनानां वाढमुत्कण्ठनार्थं चेति ॥

वृन्दोवाच ।—

पूर्व्वेषां मत्यवगुण्ठना समुचिता । परेषामुत्कण्ठना तु किमर्थं समुदिता ॥

पूर्णिमा वदति स्म ।—

उत्कण्ठया[१] सह प्रेमा[२] धत्ते मिथुनतां यदा ।
अङ्गजं[३] हरिसङ्गाख्यं तदा भजति नान्यदा ॥

वृन्दा चिरमानन्दान्निरीहतया स्थित्वा प्राह ।—

जन्मारभ्य कियद्वर्षानन्तरं कंसान्तकस्य यदुपत्तनाद्व्रजागमनशन्तममिदं जनिता ॥

---

(१) कलत्रभूतया । (२) पतिरूपः । (३) पुत्रं ।

पूर्णिमा समाधानमाह ।—

भारतरीत्या भारतयुद्धानन्तरं युधिष्ठिरस्य प्राज्यं राज्यं तस्य षष्टिवर्षत एव जनिता । श्रीविष्टरश्रवाश्चार्ज्जुनसवयस्कताविशिष्टतया युधिष्ठिरस्य वर्षत्रयकनिष्ठस्तदानीं सप्तपञ्चाशद्वर्षतामाप्स्यतीति लक्ष्यते ॥

तत्र तु तद्युद्धतः पूर्व्वादज्ञातवासमयवर्षत्रयोदशकात् पूर्व्वं साल्व-दन्तवक्र-धूर्व्वणमिति तस्य व्रजागमनसमयविचारणायां वर्षाणां चतुश्चत्वारिंशदेवावशिष्यते ॥

तदुत्तरकालतः प्रकाशान्तरेण पुर्य्यां स्थितस्य पृथिवी-पालने तु भारताच्छ्रीभागवतं मतं विलक्षणमिति तदेकवाक्यतायामशक्यतया कल्पभेदकल्पनमेव कल्पते । न तु तदत्र प्रयोजकं । ततस्तदस्तु ॥

प्रस्तुतं तु प्रस्तूयतां ? ॥ वृन्दोवाच ।—

"कृष्णोऽपि तं हत्वे"ति गद्यानन्तरं पाद्म-पद्यद्वयमिति लिखित्वा लिखितं ॥

"कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमाचिते ।
गोप-नारीभिरनिशं क्रीडयामास केशवः ॥

रम्यकेलिसुखेनैव गोपवेषधरः प्रभुः ।
बहुप्रेम-रसेनात्र मास-द्वयमुवास ह" ॥ इति ॥

अथास्य वृन्दा तात्पर्यं पर्यनुयुक्तवती ॥

पूर्णिमा चोवाच ।—

"गोप-नारीभि"रित्यत्र नृ-नरयोर्वृद्धिश्चेति जातावेव स्त्रीप्रत्ययविधानात् गोपजातिभिर्नारीभिरिति गम्यं ॥

तृतीयस्कन्धे देवहूतिमुद्दिश्य कर्दमं प्रति श्रीशुक्ल-वचने ।—

"सा त्वा ब्रह्मन्नृपवधूः काममाशु भजिष्यती"तिवत् ॥

दृश्यते च तदनुवादिमृत्युञ्जयसंहिता-वचनं ।—
"स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतं ।
गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः ॥
मुक्ताहारलसत्पीनतुङ्गस्तन-भरानताः" ॥इति॥

गौतमीये च ।—

गोपकन्यासहस्रैस्तु पद्मपत्रायतेक्षणैः ।
अर्च्चितं भावकुसुमैस्त्रैलोक्यैकगुरुं परं" ॥इति॥

"ब्रह्मरात्र उपावृत्त"इत्याद्युक्ताहिलक्षणेनानिशमित्यनेन च तत्पतिम्मन्यादिषु वास्तवाभीरिणां

विवाहादिवञ्चनार्थं "नासूयन् खलु कृष्णाये" त्याद्युक्तादिशा या मया योगमायया सृष्टास्तासु पुनर्व्यक्तीक्रियमाणासु पूर्व्वासां परदारत्वभ्रमापक्रमानन्तरं सङ्कोचमोचनं गम्यते ॥

त[1]च्चावश्यं तत्रा[2]वगन्तव्यं तत्र[3] हि सर्व्वे गुणा लज्जानुगुणा[4] एव कीर्त्त्यन्ते ॥

तथा हि हरिवंशे श्रीनारदेन तस्य प्रशंसेयं यादवसंसदां कर्णावतंसवदाचरति स्म ।—

"यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि" ॥
इति ॥

तदेवमेव "रम्यकेलिसुखेनैवे"त्यनेन "बहुप्रेम-रसेने"त्यनेन चात्र व्रजे तत्केलिसुखस्य सर्व्वमनोरमत्वं नानाप्रेमरसदत्वं च दर्शितं स्यात् ॥

तदेवमेव च पूर्व्वं यदसूयाराहित्यं तेषु मायया सम्पादितं तच्च महाविरहेण व्यक्तरहस्यास्वप्येतासु निर्व्यूढं स्यात् ॥

(१) परदारत्वभ्रमं । (२) श्रीकृष्णे ।
(३) श्रीकृष्णे । (४) लज्जानुवर्त्तिनः ।

किञ्च ।—

या श्रीभगवतः प्रतिकल्पमवश्यम्भाविताद्दशता स्वभावावतारलीलातत्प्रेयसीप्रेमप्रभावव्यञ्जनाय तत्प्रियजनरञ्जनाय च खेलन्ती जनककन्यायामिव गोपकन्याश्रेण्यां तस्य नित्यकान्तास्मीति ज्ञानं यद्यप्यावृतवती तथापि प्रेमाणमावरीतुं न शक्तवती ॥

यः खलु प्रेमा ताद्दशतल्लीलापरवशतया तस्या इव तस्याः परहस्तपतनावस्थायामपि तत्पातिव्रत्यं प्रतिपालयिता स एवायत्यामपि तां दुःखरूपां शमयित्वा मेलयिता स्यादेवेति मास्मान्यथा मन्यथाः ॥

तथा हि ।—

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह"-मिति तत्तद्वचनं प्रसिद्धं तत् खलु परदारतापक्रमरचनापूर्व्वकतन्मिलनार्थमेव तासां सचते।

भक्तानां याद्दग्मनोरथप्रकारता ताद्दगेव मदाकारताविष्कार इति हि तत्र विवक्षितं। तत्प्रकारता च तच्छ्रेणीनामित्थमेव ॥

———

अहो! कदाचिदेवं भाग्यमस्माकं भविता यदन्यपत्नीत्वप्रतीतिरयत्नीभूय दुःस्वप्नतया मिथ्या स्यात्तत्पत्नीत्वमेव जागरतया त्वरया सत्यं स्यादिति ॥

आस्तामिह(१)पर(२)पुरुषे रागिस्त्रीणां तथा रीतिः अन्यत्र(३)च तत्सदृशां गृहिणीभावः सदापीष्टः। तथा च ताभिरेवाभिप्रेतं ॥

"गोप्यः किमाचरदयं कुशलं स्म वेणु-
र्दामोदराधरसुधामपि गोपिकानां।
भुङ्क्ते स्वयं" ॥इति ॥

"अपि वत! मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते
स्मरति स पितृ-गेहान् सौम्य! वन्धूंश्च गोपान् ॥
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्यधास्यत् कदा नु" *इत्य-

"आर्य्यपुत्र"इत्यनेन तत्र पतित्वं व्यज्य"नः

* इत्याद्युक्तं। अत्र यः खल्वस्माकमार्य्यपुत्रशब्दवाच्यस्य प्रत्युस्तस्य स्वीयास्त इत्यभिमानस्तत्र गुप्तमस्ति तमेवैताः किङ्कर्य्य इति मत्वापि कदा स्वयं व्यक्तमङ्गीकारिणा तेनास्मानङ्गीकरिष्यत इति। इत्याधिक्यं कस्मिंश्चित् पुस्तकेऽस्ति ॥

(१) कृष्णरूपे। (२) परम।
(३) परपुरुषे जारे।

किङ्करीणा"मित्यादिना तथा तदीयस्वीकारः प्रकटमेव स्यादिति व्यञ्जितं ॥

तदेतदात्मनः श्रीमद्व्रजागमनं व्रजागमनमनु च तासु स्वीयताप्रकटीकरणमेव शुभङ्करणमिति श्रीमद्व्रजेन्द्रनन्दनेन स्वयमेव व्यञ्जितं ॥

"धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ।
प्रत्यागमन-सन्देशैर्वल्लव्यो मे मदात्मिकाः" ॥

इति तद्वचनं हि तासु स्वीयतां स्वीयतायामपि तदेकस्वरूपतां तथापि विदूरस्थिततया विसू-रित[1]पूरिततां तत्प्रत्यागमनमपि प्रत्याययति ॥

तथा च सति यथा तासु विरहस्य दुःसहता तथा परकीयताख्यातेश्चेति ख्यापयति । अथवा ता[2]मिमां ततो[3]ऽप्यधिकामधिगमयति । ततस्ता[4]मवश्यमेव नश्यन्तीं करिष्यामीति पर्यवसाय-यति ॥

वृन्दा प्राह ।—

युष्मद्भावितमेवायुष्मद्भविता ॥

---

(१) अनुतापो विसूरितं ।
(२) परकीयताख्यातिं • (३) विरहतः ।
(४) परकीयताख्यातिं ।

पूर्णिमाप्याह ।—

श्रीकृष्णास्वदिताधरासु विजितश्रीषु व्रजस्त्रीषु सा
मायामात्रमयी भवेद्विवहनाद्युत्था परोच्छिष्टता ।
मन्यन्तामुभयत्र भक्तिरहिताः सत्येति तां दुर्दशां
हा ! धिक् तां किमु तत्पराः स्थिरतया
वाञ्छन्ति शृण्वन्ति च ॥

वृन्दा पप्रच्छ ।—

मास-द्वयमिह वासश्चेत्कथ "मेवं सौभश्च साल्वश्चे"-त्यादि वीक्षया तस्य प्रतीक्षया रणरङ्गसङ्गतै-र्यदुसंघैः सहैव द्वारकान्तःप्रवेशः सदेशरूपः स्यात् ॥

पूर्णिमा सहासमिवाह स्म ।—

न जानासि ता इमास्तस्य योगमायायाः प्रक्रिया ।
यथा ब्रह्ममोहनानन्तरं दर्शितं ॥
"एकस्मिन्नपि यातेऽब्दे प्राणेशं चान्तरात्मनः ।
कृष्ण-मायाहता राजन् ! क्षणार्द्धं मेनिरेऽर्भकाः ॥
इति ॥

वृन्दाह ।—

तर्हि व्रजमागत्य हरिणा चिराय यद्‌यत्कृतं तत् किं द्वारकावासिभिर्न ज्ञातं ? ॥

पूर्णिमाह ।—

पूर्व्वमज्ञातमपि दारुक-मुखादवधार्य्य ज्ञातमनुभूतञ्च । येन तत्प्रजाभि"र्यर्ह्यम्बुजाक्षापससारे"ति प्रोक्तं ॥

अथ वृन्दा सानन्दापि समुत्कण्ठया ततः कण्टक(१)मुद्धर्त्तुमिच्छति स्म ।—

यथाह ।—

"यर्ह्यम्बुजाक्षापससारे"त्यादिरीत्या "मासद्वयमुवास हे"ति नीत्या च पुनर्व्रजाद्व्रजनं व्रजराजसूनोरुपलभ्यते ॥

पूर्णिमोवाच ।—

वाचि श्लेषय यदि पाद्मवाचां शेषः स्यात् ॥

वृन्दा च वाचयति स्म ।—

अथ तत्रस्था नन्दादयः सर्व्वे पुत्र-दार-सहिताः पशु-पक्षि-मृगादयश्च वासुदेवप्रसादेन दिव्यरूपधराविमानमारूढाः परमं वैकुण्ठमवापुरिति ॥

कृष्णस्तु नन्दगोपव्रजौकसां सर्व्वेषां निरामयं स्व-पदं दत्त्वा दिवि देव-गणैः संस्तूयमानो द्वारवतीं विवेशेति च ॥

(१) सन्देहं ।

पुनर्निभाल्य वृन्दा तदेतदाह ।—

तदेतत्पदमेव महागोलोकाख्यं तच्च सर्व्वोर्द्ध्वमेव वर्त्तत इति ब्रह्मसंहिता-वचनं चात्र दृश्यते ॥

यथा ।—

"गोलोकनाम्नि निज-धाम्नि तले च तस्य
देवी-महेश-हरि-धामसु तत्र तत्र ।
ते ते प्रभावनिचया विहिताश्च येन
गोविन्दमादिपुरुषं तमहं भजामि" ॥इति॥

तथा मोक्षधर्म्मस्य नारायणीयोपाख्यान-वचनं च।

"एवं वहुविधै रूपैश्चरामीह वसुन्धरां ।
ब्रह्मलोकं च कौन्तेय ! गोलोकञ्च सनातनं" ॥इति॥

अथ पुनश्च निरूप्य वृन्दा सविस्मयमाह ।—

अहो ! हरिवंशे गोविन्दाभिषेकं रचयितुमागतस्य शचीपतेर्वचनमिदमिति लिखितं तस्य सर्व्वगततामपि शंसद्दृश्यते ॥

यथा ।—

"तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि ।
स हि सर्व्व-गतः कृष्णमहाकाशगतो महान् ॥

उपर्य्युपरि तत्रापि गतिस्तव तपोमयी ।
यां न विद्मो वयं सर्व्वे पृच्छन्तोऽपि पितामहं" ॥
इति ॥

किन्तु तदिदं विशद्यतां ॥ पूर्णिमा प्राह ।—

"साध्या" इति सर्व्वेषामस्माकं प्रसादनीया इत्यर्थः। "सर्व्वगत" इति श्रीकृष्ण-विग्रहवदचिन्त्यशक्तितया विभुरित्यर्थः। तथापि सर्व्वोर्द्धता तादृगुपासकानां तथैव स्फुरणादिति गम्यते। महाकाशो ब्रह्म। "आकाशस्तल्लिङ्गा"दिति न्यायात्। "तद्गत" इति तदनुभवोपर्य्यप्यनुभवनीय इत्यर्थः। "तपोमयी"ति पारमैश्वर्य्यमयीत्यर्थः। "यां न विद्म", इति ब्रह्मापि दुर्ज्ञेयतया न सम्यक् प्रकाशयतीति भावः ॥

अथ वृन्दा पुनर्वाचितवती ॥ श्रीभागवते ।—

"नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपाल-महोदयं ।
कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥
ते चौत्सुक्यधियो राजन् ! मत्वा गोपास्तमीश्वरं ।
अपि नः स्व-गतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥
इति स्वानां स भगवान् विज्ञायाखिलदृक् स्वयं ।
सङ्कल्प-सिद्धये तेषां कृपयैतदचिन्तयत् ॥

जनो वै लोक एतस्मिन्नविद्याकामकर्म्मभिः।
उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन्॥
इति सञ्चिन्त्य भगवान्महाकारुणिको विभुः।
दर्शयामास लोकं स्वं गोपानां तमसः परं॥
सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनं।
यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः॥
ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः।
ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा॥
नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः।
कृष्णञ्च तत्र छन्दोभिः स्तूयमानं सुविस्मिताः" ॥

इति ॥

अथ वृन्दा वदति स्म।—किमत्र सुखसत्रमायातं ?

पूर्णिमोवाच।—

तदेवं यन्निज-पदं तेषामेवास्पदतया तेषामेव दृष्टि-पदमकार्षीत्तदेव पश्चाद्दयतारी[१]दिति तत्र परामृश्यते॥

तत्र "ते तु ब्रह्महृदं नीता" इत्यत्र यत्राक्रूरस्तुतवांस्तं ब्रह्महृदं कृष्णेन तत्तीर्थमहिमानं लक्ष्यं

(१) ददौ।

विघातुं नीता मग्नाश्च पुनः कृष्णेनैवोद्धृत्य वृन्दावनमानीतास्तस्मिन्नेव नराकृतिपरब्रह्मणस्तस्य लोकं ददृशुर्न त्वक्रूरवज्जलमध्य इति न चान्यथेति च गम्यते। पुरेऽप्येतत्प्रसङ्गाद्भाविकाले इत्यर्थः। "पुरा पुराणे निकटे प्रवन्धातीतभाविषु" इति हि कोषकाराः॥

"लोकः स च सूक्ष्मा"मिति "तमसः पर"मिति "सत्यं ज्ञानमित्यादिस्वरूप" इति च प्रकृतिगुणास्पृष्टतया चिच्छक्तिविलास एवेति लभ्यते॥

तथा।—

"अपि नः स्वगति"मिति "न वेद स्वां गति"मिति "गोपानां स्वं लोक"मिति "कृष्णश्च तत्रे,,ति च न परमव्योमादिरूपः किन्तु ब्रह्मसंहितादिकृतश्लोकः स्फुटमप्राकृतगोलोकस्वरूप एवायं श्रीमद्व्रजेशलोक इति पर्य्यवसीयते॥

"तत्र छन्दोभिः स्तूयमान"मिति तज्जन्मादिलीलावर्णिनीनां श्रुतिवरवर्णिनीनां साक्षिता तु तत्रापि पुरः स्फुरति कृष्णे तेषां निजसुततादिमात्रताज्ञानाय पार्षदान्तरदर्शनानुक्तिस्तेषां गोपानामेव तत्रत्यतत्परिकरताव्यञ्जनायेति ज्ञेयं॥

यत एव तदेकरुचीनां श्रीनन्दादीनां परमानन्द-निर्वृतिर्विस्मितिश्च घटते। स्वलोकतापामप्यवता-रावसरे तेषां तस्यादर्शने कारणं "जनो वा" इति। "सालोक्यसार्ष्टी"त्यादिपद्ये "जना" इतिवज्जनशब्दो ऽयं तदीयस्वजनपरः॥

"तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं।
गोपाये स्वात्म-योगेन सोऽयं मे व्रत आहितः॥

इति॥

श्रीकृष्णस्यैव तत्र च मनसैव स्वनिष्ठाप्रतिष्ठा-रचनाद्वचनादत्र स तु व्रजजनः परमस्वजन एव स्पष्टः। साधारणजनवाचित्वे तत्कृपा सर्व्वस्यापि जनस्य व्यापिन्यभविष्यत्। "स्वां गति"मित्यपि न समगंस्यत॥

ततश्च।—

परमस्वजनोऽयं मम व्रजवासिजनः प्रापञ्चिके लोके याः स्वाविद्यादिभिर्द्देवतिर्य्यगादिरूपा गत-यस्तासु भ्रमंस्तन्निर्व्विशेषतयात्मानं मन्वानः स्वां गतिं गोलोकलक्षणां न जानातीत्यर्थः॥

अत्र कारणन्तु।—

"इति नन्दादयो गोपाः कृष्ण-राम-कथां मुदा।

कुर्व्वन्तो रममाणाश्च नाविन्दन् भव-वेदना"-मित्यनुसारेण मदीयलौकिकलीलाशक्तिरेवेति भावः ॥

तदज्ञानादेव च "नन्दस्त्वतीन्द्रिय,,मित्यादिकं घटत इति ॥

तस्माद्रूपदेव खल्विदं दर्शितं । तदेव तेभ्यः पश्चाद्दत्तमिति गम्यते ॥

वृन्दा प्राह ।—

हन्त ! कथं त एते मद्वनादन्तर्हिततामाप्स्यन्ति । श्रीकृष्णेन पुनर्वियोगश्च लप्स्यन्ते ॥

पूर्णिमा प्राह ।—किञ्चिदन्यदस्ति चेद्वाच्यतां ?

वृन्दा प्राह स्म —

अथ वाराहवचनमिति किञ्चिदन्यदपि सञ्चितमस्ति ॥

तद्यथा ।—

"तत्रापि महदाश्चर्य्यं पश्यन्ते पण्डिता नराः ।
कालिकह्रदपूर्व्वेण कदम्वो महितो द्रुमः ॥
शतशाखं विशालाक्षि ! पुण्यं सुरभिगन्धि च ।
स च द्वादशमासानि मनोज्ञः शुभशीतलः ॥

पुष्पायति विशालाक्षि ! प्रभासन्तो दिशो दश" ॥

इति ॥

तथा ।—

"तत्राश्चर्य्यं प्रवक्ष्यामि तच्छृणु त्वं वसुन्धरे ! ।
लभन्ते मनुजाः सिद्धिं मम कर्म्मपरायणाः ॥
तस्य तत्रोत्तरे पार्श्वेऽशोकवृक्षः सितप्रभः ।
वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ।
स पुष्प्यति च मध्याह्ने मम भक्तसुखावहः ॥
न कश्चिदपि जानाति विना भागवतं शुचिं"

इत्यादि ॥

अत्र "तस्येति" ब्रह्मकुण्डस्येत्यर्थ इत्युक्त्वा पुनः पूर्णिमोवाच ।—किञ्चिदन्यदप्यस्ति ॥

वृन्दा सानन्दमुवाच ।—

अस्ति चान्यत् स्कान्दमथुरा-माहात्म्ये ।—

"ततो वृन्दावनं पुण्यं वृन्दादेवीसमाश्रितं ॥
हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितं" ॥इति॥
वत्सैर्वत्सतरीभिश्च सरामो बालकैर्वृतः ।
वृन्दावनान्तरगतः सदा क्रीडति माधवः" ॥

इति च ॥

अथादिवाराहवचनञ्च ।—

"कृष्णक्रीडासेतुबन्धं महापातकनाशनं ।
वलभीं तत्र क्रीडार्थं कृत्वा देवो गदाधरः ॥
गोपकैः सहितस्तत्र क्षणमेकं दिने दिने ।
तत्रैव रमणार्थं हि नित्यकालं स गच्छति" ॥इति॥

अतएव विशिष्टमिदमुपदिष्टं गौतमीये ।—

"वृन्दावने वसेद्धीमान् यावत्कृष्णस्य दर्शनं" ॥

इति ॥

अथात्र वृन्दा पप्रच्छ ।—

सम्प्रति चिराय प्रोषितत्वेन परामृश्यमानस्य तस्य सदा क्रीडनमत्र कथं घटते ? ॥

पूर्णिमा प्राह ।—

वैकुण्ठाद्व्रजेन्द्रध्रुवादिकृपार्थं मध्ये मध्ये पृथिवीमागतस्य च यथा तन्नाथस्य तत्र नित्यावस्थानं प्रोच्यते तद्वदत्रापि सचते(१) अनाद्यनन्तकालं तत्र विहरतस्तस्य निमेषमात्रमेव तत्तत्काल इति ॥

अतः परं किञ्चिदस्ति तत्तु वद ॥

वृन्दा प्राह ।

एतदनन्तरं बृहद्गौतमीयपद्यानि प्रतिपद्यन्ते ।

---

(१) घटते ।

पूर्णिमाह ।—वाच्यन्तां ? ॥

वृन्दा च वाचितवती ।—

यथा; नारद उवाच ।—

"किमिदं द्वात्रिंशद्वनं वृन्दारण्यं विशाम्यते ! ।
श्रोतुमिच्छामि भगवन् ! यदि योग्योऽस्मि मे वद ॥

श्रीकृष्ण उवाच ।—

इदं वृन्दावनं रम्यं मम धामैव केवलं ।
अत्र मे पशवः पक्षि-मृगाः कीटा नरामराः ॥
ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयं ।
पञ्चयोजनमेवास्ति वनं मे देहरूपकं ॥
कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी ।
अत्र देवाश्च भूतानि वर्त्तन्ते सूक्ष्मरूपतः ॥
सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् ।
आविर्भावस्तिरोभावो भवेन्मेऽत्र युगे युगे ॥
तेजोमयमिदं रम्यमदृश्यं चर्म्मचक्षुषा ॥इति॥

पूर्णिमा प्राह ।—

आयातमत्र च प्रकटाप्रकटलीलाप्रकाशतामयं प्रकाशद्वैविध्यं ॥

अत्र"मे पशव"इति"तेजोमय"मिति चोक्त-
त्वात् ॥

तदेवं जातसुखवृन्दा वृन्दा पुनः पप्रच्छ ।—

तदिदञ्च सर्व्वं पर्य्यक्(१) तात्पर्य्याय पर्य्या-
लोच्यतां ॥

पूर्णिमोवाच ।—अनेनेदं गम्यते ? ॥

गोलोकाख्यं तद्वैभवं सदैव वृन्दावनभवं ।
किन्तु त्वं व्रजवासिजनवदेव सम्प्रति न तदव-
गच्छसि। यथा पृच्छया अपि तदज्ञानं वाराहवचना-
ल्लभ्यते। तदेतदेव च नित्यधाम तेभ्यस्तेन दर्शितं।
तदेव च तेषां नित्यप्राप्यतया वर्णितं ॥
"अर्के चेन्मधु विन्देत किमर्थं पर्व्वतं व्रजे"दिति
न्यायेन दूरे तेषां गमनञ्च व्यर्थमिति ॥

वृन्दाह ।—सत्यं सत्यं ? ॥

द्वयोरभेदेनैव व्यवस्थारचनं हरिवंशस्थतत्प्रसङ्ग-
सङ्गतशक्र-वचनं चात्र दृश्यते ॥

"स तु लोकस्त्वया कृष्ण ! सीदमानः कृतात्मना।
धृतो धृतिमता वीर ! निघ्नतोपद्रवान् गवां ॥
इति ॥

(१) सर्व्वत्र ।

किन्तु ।—

अथ "तत्रस्था नन्दादय" इत्यादिपाद्म-गद्य-द्वयं विशद्यतां ॥

पूर्णिमा व्याचचक्षे ।—

"श्रीमन्नन्दाद्या व्रजस्थिताः स्व-स्व-पुत्रैः स्वयं श्रीकृष्णादिभिः स्व-स्व-दारैः श्रीयशोदादिभिः सहिता वसुदेवादागतस्य तस्य कृतनिजागमन-सङ्कल्पसम्वादेन प्रसादेन पूर्व्वतोऽपि परमापूर्व्वरूप-धराः परस्परदृक्सुखकराः सर्व्वत्र मनोरथपथ-प्रापकतदीयरथमारूढाः तत्त्वमात्रानभिज्ञेषु तत्त्वा-न्तरविज्ञेषु च तत्तेजसा गूढा महसाधःकृताशेषं श्रीवृन्दावनस्य पूर्व्वोक्तप्रकाशविशेषं पराभिर्मा-भिरकुण्ठं गोलोकाख्यवैकुण्ठं तत्र च गोकुल-कमलं यमुनाया उत्तरपाराद्दक्षिणपारमवाप्य प्रापु"रिति ॥

तच्च निरामयं कृतपुनर्विरहव्याधिविलयं स्वपदं निजनित्यास्पदं पुत्र-दार-सहिता इति पूर्व्व-सूचिततत्पुत्रतोचितरूपेणात्र स्थितिरेव यदुपुर-समुचितस्वरूपेण तु द्वारवतीप्रवेश इति सर्व्वमेव सद्देशरूपं । किन्तु गोपनार्थं लोकेषु चमत्क्रिया-

रोपणार्थमेव च सेयं विमानप्रक्रिया । पारेऽवारे वा वसतु स तु घोषस्तां(१)विनापि ब्रह्मह्रदमज्जनानन्तरं वसत्र(२)सज्जनं(३)लभेत ॥

नाध्यातिष्ठेद्यदि यदुपुरात्प्राप्य गोष्ठं स भूयः
सर्व्वं तर्हि प्रतिहततरसं सर्व्वथा स्याद्वृथा च ।
जन्मानन्दः प्रतिलवव्ययः श्रीचितिः स्नेहवृद्धि-
र्लीलापूर्त्तिर्विरहमभितः सान्त्वनं चात्र तस्य ॥

अथ वृन्दा पप्रच्छ ।—

यद्येवं पश्चादपि सर्व्वव्रजप्राणास्तत्त्राणमाचरितवांस्तदा पुरा मथुराप्रस्थान एव न कथं वा रचितवान् ॥

पूर्णिमा प्राह ।—

रसपोषाय प्रतिकल्पमीदृशमेव लब्धसातत्येन लीलानैयत्येन स्थापितमपि तदिदं पृच्छत्या भवत्या निजमुत्कण्ठितमेव मच्छ्रोत्रयोरुपकण्ठीकृतं बादरायणादिभिरपि कृतलालसासङ्क्रमस्य श्रीभगवल्लीलाक्रमस्य वैयर्थ्यन्तु न समर्थनीयं ॥

---

(१) विमानप्रक्रियां ।
(२) गोष्ठौके । (३) सङ्गं ।

यतः ।—

पुनरुदयजशर्म्मपोषिधर्म्मं
स्वयमुपशर्म्म[1]हरेः प्रवासमात्रं ।
व्रजमपि तं[2]हते रसस्य पूर्त्ति[3]
यदि वलयेत तदा तदेव[4] न स्यात् ॥

तस्माद्व्रजरससम्पदर्थं तदभ्यर्थनीयमिति ॥

तदेवमेव स्वयमुक्तं; "नाहन्तु सख्यो ! भजतोऽपि जन्तू"नित्यादि ॥

तदेतद्व्याख्याय पूर्णिमा पप्रच्छ ।—

किञ्चिदस्ति वान्यत् ? ॥

वृन्दा सानन्दमुवाच ।—

भगवति ! भागवतीयमन्ते किञ्चिदञ्चितं दृश्यते ॥

पूर्णिमा प्राह ।—कामं वाच्यतां ? ॥

वृन्दा तच्च वाचयामास ।—

यथा ।—

"जयति जन-निवासो देवकी-जन्मवादो
यदुवर-परिषत्स्वैर्दोर्भिरस्यन्नधर्म्मं ।

(१) अमङ्गलं । (२) प्रवासमात्रं ।
(३) कर्त्री ।
(४) प्रवासमात्रं । प्रवासमात्रं विना समृद्धिमत्सम्भोगस्याभावात् ।

स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रज-पुर-वनितानां वर्द्धयन् कामदेवं ॥ इति ॥

पूर्णिमोवाच ।—

तदित्थमाख्याता मम व्याख्या । यत् खल्वयं दशमस्कन्धान्तवर्त्ती श्रीशुकसिद्धान्तस्तत्र चात्र च तस्य विच्छेदं निरस्य नित्यविहारमेव व्याहरति ॥

यतः स्वदोस्तुल्यैर्यदुकुल्यैरधर्म्मवहुलराजकुल-व्याकुलतार्थं देवकी-जन्मप्रसिद्धिमुरीकृत्य कृतकृत्यः "सुस्मितश्रीमुखेण" व्रजस्य पुरस्य च वनितानां कामप्रायप्रेमवर्द्धनसुखेन सर्व्वतोऽपि शश्वदुत्कर्षेण हर्षेण सदा विराजत इति लभ्यते ॥

तत्र हेतुः ।—

तत्र तत्र स्थावरजङ्गममात्राणां विरहदुःखहन्ता तत्तदुपासकस्वजनहृदये तथा स्फुरंश्चेति ॥

तदेतदुक्तिकौशलाद्द्वाविमौसलादिलीलानामपि मायिकत्वमेव प्रत्यायितं । क्षीरनीरनिधिशायिन एव तदेतद्रूपावतार इत्यादिव्यवहारश्च तादृशनित्य-विहारगोपनार्थ एवेति च ॥

———

अथ श्रीभागवतीयं पद्य-द्वयं सा पठति स्म ।—

"द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात् ।
वर्ज्जयित्वा महाराज ! श्रीमद्भगवदालयं ॥
नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः ।
स्मृत्याशेषाशुभहरं सर्व्वमङ्गल-मङ्गलं" ॥ इति ॥

अत्र विष्णुपुराणीयन्तु किञ्चिद्विशिष्टमपि । "यदुदेव-गृहं त्वेकं नाप्लावय"दिति । "विष्णु-क्रीडान्वितं स्थान"मिति च ॥

पूर्णिमा प्राह ।—

तदिदं वृन्दावननित्यविहारस्य दृष्टान्ततयाऽपि घटितं ॥

अथ वृन्दा श्रीभागवतीयं पद्यं पुनः पपाठ ।—

यथा ।—

"एषां घोषनिवासिनामुत भवान् किं देव ! रातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति ।
सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता
यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते" ॥

इति ॥

पूर्णिमा पूर्णामिदमुवाच ।—

तदेतत्कैमुत्यविधिना प्रस्तुत्य व्रजवासिनां तेन सम्वासमत्यलोकपरिवृढः[१] परमहृद्यं चकारेति सर्व्वं शान्तं ॥

पुनः पूर्णिमा प्राह ।—किमप्यन्यद्धन्यमस्ति ? ॥

वृन्दाह । तदपि श्रूयतां ।—

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां
यद्गोकुलेऽपि कतमाङ्घ्रि-रजोऽभिषेकं ।
यज्जीवितन्तु निखिलं भगवान्मुकुन्द-
स्त्वद्यापि यत्पद-रजः श्रुति-मृग्यमेव ॥

पूर्णिमा सहर्षमाह ।—

पूर्व्वनिर्णयादेव तदिदं ब्रह्मा स्वपुरुषार्थतया वर्णयामास ।—पुनर्द्दृश्यतां ? ॥

वृन्दा सानन्दमाह ।—

देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपर्षानिलैः
सीदत्पालपशुस्त्रियात्मशरणं
दृष्ट्वानुकम्प्युत्स्मयन् ।

---

(१) प्रभुः ।

उत्पाट्यैककरेण शैलमबलो[1]

लीलोच्छिलीन्ध्रं यथा

बिभ्रद्गोष्ठमपान्महेन्द्र-मदभित्

प्रीयान्न इन्द्रो गवां" ॥इति॥

अथ पूर्णिमा वर्णयामास ।—

तदेवं श्रीबादरायणिरपि तस्य गवेन्द्रतां निजाश्रयतया श्रावयामास ॥

सोऽयं यत्र गोपालादीनां तेनापरित्याज्यतां व्यञ्जयामास ॥

तथैव हि तत्र श्रीगवेन्द्रस्यान्तःप्रतिज्ञा ।—

"तस्मान्मच्छरणं गोष्ठं" इत्यादि ॥

अथ पुनर्वाच्यतां ? ॥

वृन्दा तां वन्दमाना प्राह ।—

ग्रन्थनापूर्णतयानया पूर्णीकृतास्मीति किम्वान्यद्वाच्यता वाच्यतामासीदतु ॥

किन्तु समाज्ञापयन्तु तत्र भवत्यस्तदिदं पुस्तकं नायकमिव हारविन्यस्तं करोमीति ॥

पूर्णिमाह ।—साम्प्रतं ? ॥

---

(१) बालः ।

अथ वृन्दा च तथा कृतवती ॥

इति श्रीमदुत्तरगोपालचम्पूमनु भावि-
कथाप्रमाणप्रथानूनमूनत्रिंशं
पूरणम् ॥

त्रिंशं पूरणम् ।

अथ सर्व्वसुख-सारेण तत्तत्पुराणानुसारेण तत्कथा[1]प्रथनीया ॥

यथा पुनः प्रातः सपुत्रव्रजराज-सदसि कृत-मनोरथायां कथायामुत्कण्ठया मधुकण्ठः समधुरकण्ठमिदमवादीत् ।—

दन्तवक्रः खलु पूर्व्वं चक्रधरं विजेतुं देवता-चक्रा-राधनं चेक्रीयमाणस्तं राजसूयमपि नागतवान् । यदा तु शिशुपालस्तत्र चक्रलब्धकालः सम्वृत्त-स्तदा सोऽयं भ्रष्टद्वितीयचक्रशकटचक्रवद्वृत्त्या विघटमानतामासादयामास ॥

आसाद्य चाचिराय चित्तं विषाद्य चिरादेव विचारमुपसाद्य दुश्चरतपसा नातिचिरेण चण्डी-पतिं किल प्रसाद्य तस्माद्धिरण्याक्षसदृक्षतालाभाद्धृष्णा-

---

(१) आगमनकथा ।

गसौ कृष्णं जेतुं तृष्णागपि तच्चक्र-प्रभाववक्रमना-स्तदसम्भावनया भावनया सङ्कीर्णीभूय तदिदं निर्णीतवान् ॥

शक्रप्रस्थाद्द्वारकां प्रति कृतप्रस्थानं तं कुत्रचिन्नि-र्द्वन्द्वमुपलभ्य निर्द्वन्द्व एव समभ्यस्य(१) द्वन्द्वयुद्ध-मुद्धुरं करिष्यामि । तच्च सर्व्वजयप्रदयानया रुद्र-प्रसादलब्धपदया(२) गदया परञ्चरिष्यामीति ॥

तदेवं सोऽयमुन्मादादधिगत्य गदामात्रं सङ्गत्य सञ्चरत्यन्तरमन्तरापरत्यन्तरवन्मधुपुरमागत्य गत्य-न्तरापेक्षया तत्प्रस्थानमवेक्षाञ्चक्रे । स्वं मृगय-मारास्य मृगयोरागमनमिव मृगः ॥

अथ सर्व्वक्रमपारदः श्रीमन्नारदः स्वच्छया यदृ-च्छया गत्वा तं देशमृच्छन्नैव-मिश्रं निवेद्यव्याधित-मिव साधिं ददर्श च परामर्श च । सोऽयम-कस्माद्विलक्षणाकारतया हिरण्याक्ष इव गदा-मात्रमहामात्र(३)तया वित्रासितलोकाक्षः समीक्षते। तदेनं तेन लक्ष्मीलक्षितक्रोडेन(४) घातयिष्या-मीति ॥

---

(१) पौनःपुन्येन ।   (२) व्यवसायया ।
(३) प्रधान ।   (४) उत्सङ्गो वराहो वा ।

तदेवं देवस्पृश्यचरणरजाः स विरजा विमृश्य स्वेन दृश्यमानेनानेन दृश्यमानः पुरःसरतामनुससार । अनुसृत्य च सव्याजं व्याजहार ।—

करूपराज ! चेदिह चेदिराजप्राणपराजयाविराज्यमानतया शिर्यामिव सम्भज्य तदिदं रूपमासज्य वर्त्तसे । तर्हि सम्प्रति द्वारकां प्रतिगत्य प्रत्यनीकतया[१] कृतसौभपतिपरलोकगतिः स द्वारका-पतिः श्रमपतितयुयुत्सामतितया तव जयास्पदं भवेदिति तत्र कथं न गच्छसि ? ॥

अथ दन्तवक्रः ससम्भ्रमक्रममुवाच ।—

हन्त ! हन्त ! बाल इव किं वा लपसि ? साल्वश्च खल्वसौ दिव्यसंस्थामाजगाम ॥

देवर्षिरुवाच ।—

तुभ्यं शपे न खल्वभ्याख्यान[२]मिदं । सौभमपि सुभूतिता[३]मवाप । यतो गदास्पदाग्निसात्कृततया लोहामृतचूर्णसरूपतापूर्णं तज्जातमिति ॥

दन्तवक्रस्त्वभाषत ।—

---

(१) शत्रुतया ।　　(२) मिथ्या ।　　(३) सुभस्मता ।

सोऽयमुदन्तश्चेदलं दन्तवक्रस्य जीवनेन ॥

तदेवं वदन्नेव सपदि वातूलवदेव स्वप्रतिकूलानुकूलमजानन् द्वारकां प्रति प्रस्थितवान् ॥

देवर्षिस्तु तस्य तदुन्मादभित्तचित्ततामध्यवस्यन् रहस्यपि वहु विहस्य मनोवन्मनोरथ-पथं गच्छन्नच्छमनास्तत्त्वणानिहतसौभपतिं सदेकगतिं कृष्णं पुना रणरङ्गतृष्णामिव रणाङ्गनमेव सङ्गतं सङ्गतवान् सङ्गमितवांश्च दन्तवक्र-प्रसङ्गं ॥

दर्शयामास च तं हिरण्याक्षमिव कृतविपत्परामर्शं। यः खलु पूर्व्वं दृष्टश्च न परामृष्टतामवाप। श्रीकृष्णश्चान्तर्व्रजागमनतृष्णागेव सदासीदिति तन्मिषमासाद्य तदन्तशात्रवगात्रवेधपर्य्यन्तं निजव्रजागमनाय प्रतिज्ञातमानन्तर्य्य(१)मासद्य सद्य एवागच्छन्नस्मीति सर्व्वमनुज्ञाप्य मनोजव-व्रजनाय सारथिमाज्ञाप्य तदवस्थ एव प्रतस्थे ॥

तत्र च।—

एवं शौरेः सरथमवहद्दारुकश्चारुकर्म्मा
नास्यालब्धि द्रुतिरपि यथा किन्तु गम्याभिलब्धिः।

---

(१) नैकट्यं।

एका रेखा त्वरितमुदभूत्तैजसी द्वारवत्याः
पुर्य्या यावन्मधुपुरमिति प्रोचिरे यत्र देवाः ॥

तदनु च ।—

पश्चात्पश्चादतूर्णं क्रमजवलनया तैजसी पङ्क्तिरेषा
लुप्तासीदग्र्यमस्या वलयमिह पुनः सुस्थिरं वर्त्तते स्म
यस्मात्कृष्णः समञ्च(१)त्तिमिरमिव तदा
दन्तवक्रं न्यचायीत्
कृष्णं यस्मिन् विवस्वत्यधिपुरुषमिवा-
लोकयद्दन्तवक्रः ॥

अथ हरिरमुकं गदापदातिं
स्वरथमभिप्लवमानमीक्षमाणः ।
सविनयवदवातरत्पुरस्ता-
न्निजगदयापचितिं(२) विधातुमस्य ॥

यत्तर्ज्जति स्म तरसा स हरिं लघिष्ठ-
तन्निष्ठमेव विदधुस्त(३)दमर्त्यलोकाः ।
तस्मि(४)न्मुहुर्यदकरोद्गदया प्रहारं
कौमोदकी च विषयं त(५)ममुष्य चक्रे ॥

---

(१) गच्छत् ।　　(२) चयार्च्चयोरपचितिः ।
(३) तर्ज्जनं ।　　(४) श्रीकृष्णे ।　　(५) प्रहारं ।

अहोरात्रमात्रं तदैवं विजह्रे
हरिर्नातिमात्रं(१) व्रजं यद्दिदृक्षुः ।
अतस्तस्य(२) विघ्नं तमेवाशु निघ्न-
न्नुरोमर्द्द(३)मस्याद्गदा-पातनेन ॥

शिशुपालस्य रक्तानि चक्रमेव पपाविति ।
गदां रुष्टामिवापुष्णाद्दन्तवक्त्रासृजा हरिः ॥

तत्र यदा तु दन्तवक्त्रः स्वस्थानात् प्रतस्थे तदा तद्भिया वेदूरथस्तद्भ्राताविदूरत एव तदनुचारिता-माचचार ॥

यथा ।—

भ्रातुरुद्धुरतयातिचिन्तित-
स्तस्य दन्तकुटिलस्य वर्त्मना ।
कर्म्मणा च समताङ्गतस्तदा
माथुरं पुरमयाद्विदूरथः ॥

यदा गदा-घातमहन् हरिस्तं
विदूरथस्तर्हि समाजगाम ।
एकत्र कीटे ज्वलितेऽपिचान्यः
कथं ज्वलन्तं ज्वलनं विशेन्न ॥

---

(१) असततं । (२) व्रजदर्शनस्य ।
(३) मर्द्दयित्वा ।

युक्तमेव गदया किल पश्यन्
भ्रातरं निहतमत्र स मूर्खः।
चर्म्ममात्रवृतिरुद्यतखड्गः
कालचक्रधरमेनमियाय ॥

खड्गचर्म्मधरपाणिते वपु-
स्तद्वदेव युधि सुष्ठु तिष्ठतु।
मस्तकेन किमिति ब्रुवन् स्फुटं
चक्रकीर्णमकरोत्त[1]दच्युतः ॥

अन्ये युद्धविशारदा निजरिपोर्लीनं वपुः कुर्व्वते
नात्मानं तदिदन्तु गोपनृपते ! पुत्रस्य तेजस्तव।
पूर्व्वं यद्वदघासुरस्य शिशुपालस्यापि तं[2] लीनतां
स्वस्मिन्नानयदाशु पश्यति जने तद्वद्वयोरेतयोः ॥

तदेवं सर्व्वानरीन् हत्वापि तेषां तरणियाने[3] सोऽयमरित्र[4]तामवाप ॥

अथ द्वारकापुरदिक्पुरःस्थं दन्तवक्रहतिस्थलं तन्मधुपुरपुरद्वारं लोके "दतिहा"नाम्ना लब्धप्रसिद्धिसारं हित्वा व्रजगमनलालसां गृहीत्वा

(१) मस्तकं। (२) आत्मानं।
(३) रविमण्डलगमने।
(४) अरीन् त्रायते। पक्षे अरित्रं कोंमिपातक:

मुहुरपि लब्धविश्रान्तिं विश्रान्तिमागम्य स्नानविधानानि सङ्गम्य कृतकृत्यतां गच्छन्नितः परं स्वीयमस्त्रं न प्रयुञ्जीय क्वचिदपीति सञ्चक्लृपे ॥

ततश्च ।—

निजचिन्तामात्रविधानान्निधान[1] देवताचितसन्निधानतया नानादानसमुचितघनप्रधानानि विप्रादिसाच्चक्रे । कृत्वा च यदा शीघ्रं व्रजं वीक्षकस्तं भ्राजकः सम्भ्रमति स्म तदा ।—

स्नानादुत्थितमेतदेतदिति सन्दिग्धिप्रदं कम्पितं
रोम्णां जृम्भणमश्रुगद्गदमपि
द्राग्य[2]न्नपृच्छत्प्रभुः ।
मद्गोष्ठं क्व नु सम्प्रतीति यदिह
स्वां हेतुतां स्पष्टयत्
प्रष्टव्यानपि तां दशां नयदत-
स्तम्भत् क्षणान्न कत्यपि ॥

अथ मधुमथनः कथञ्चित्कथयन्तं कञ्चिदालिङ्गनसङ्गमनया रभसाद्दृगम्भसाभिषिञ्चन् कृतदिव्यविमानावमानेन निजविमानेन यमुना-पारमभ्र-

(१) निध्यधिष्ठातृ (२) गच्छन् ।

स्तत्तत्कौतुकालोकाय तमनुसञ्चरतां सुरलोकलोकानां मनः[1]प्रमनस्तया[2] चञ्चलं चकार ॥

तदेवं स्थिते निरन्तरतत्परताभासिनां व्रजवासिनां वृत्तं वृत्तं करिष्यामः ॥

यदा खलः खल्वसौ साल्वः कृष्णावगाढद्वारां द्वारकां सौभद्वारावगीर्णवानिति दूताद्वर्णनमाकर्ण-नमानीतवन्तस्तत्प्रभृतिनिरन्नतामापन्नास्ते पन्न-[3] जीवना इव वभूवुः ॥

तत्र च दिनयामिनीयामेषु यमवत्कृतविया-मेषु[4] तदन्तिमदिनं पुनरन्तकनिभममन्यन्त । दूतानां दुःखस्यूतानां तत्र तत्र स्तम्भात् पथिका-नामपि दन्तवक्रसमिदुदन्तपर्य्यालोचनार्थमसञ्चरणा-दपारकृच्छ्राकूपारमनु ममज्जुरिति ॥

यत्र खलु ।—

केचिद्वह्निं शरणमविदुः केऽपि गम्भीरनीरं
शस्त्रीमन्ये गरलमपरे केचनापात्य[5]मेव ।

---

(१) कर्म्म । (२) उत्कण्ठिततया ।
(३) स्खलित । (४) विरामेषु ।
(५) भृगुं ।

इत्थं हा धिग्मतिविषमतामेकचित्तेऽपि गोष्ठे
सुष्ठु प्राप्ते प्रतिजनमगादाशु निर्णायकत्वं(१) ॥

अथ तमिममाधिव्याधिमीत्सन्तं(२) चिकित्सन् सर्व्वेषां पुरोहितः स खलु पुरोहितस्तु व्रजमहीक्षितमभिहितवान् ॥

भवानपि कथं विस्मृतिपथं प्रस्थितवानस्ति। सर्व्वानेकत्राधाय सर्व्वत्राणाय पूर्व्वत्रागतभवत्त्ना-(३) कृतसुखसत्रायमाणलिपिकृष्णपत्रालोकनया लोकय तदीयागमनमयं समयं ॥

व्रजराज उवाच।—

समयेन शमये कथं स्यात्। यदसौ शास्त्रविरोधपात्रतां गतः ॥

पुरोहित उवाच।—

तस्य वचनं खलु विधिनापि नान्यथा रचनं कर्त्तुं शक्यते। तस्मान्मम वचनात्तां पत्रीं सकृदपि कर्णयोः सचमानां कुरु ॥

अथ व्रजराजेन तत्रानुमते मिथः सङ्गते च सदसि पुरोधसि च वाचिततल्लिपिवचसि सर्व्वेषां

---

(१) कर्त्तृ। नायकराहित्यं। (२) वर्द्धितुमिच्छन्तं।
(३) भवद्ध्वानि।

नेत्रनीरदावरुणासूक्तादिव तदुक्तान्मिलदुत्कर्ष वर्षन्तः कं वा न वर्म्मयामासुः । पत्रञ्च तत्कर्णपात्रं कृतमस्ति ॥

यथा ।—

नेन्द्रप्रस्थं द्वारकां नापि किन्तु
श्रीमन्नेतत्पत्रमेवावसामि ॥
एतत्तस्मादञ्चले रक्षणीयं
मत्प्रत्याशा-व्यत्यये लक्षणीयं ॥ इति ॥

तदेवमत्र पत्रे वाच्यमानेऽवाच्यां दिशि पाञ्चजन्य-जन्यमानध्वनिरध्वनि मथुरायाः पृथुराविर्बभूव । आविर्भूते च तस्मिन् कर्णानाममृतभूते परस्परं वीप्सया ज्ञीप्स्यमानः सचमत्कारं जय जय कार-वहलं कोलाहलं कुर्व्वन्तः सर्व्वेऽप्यानन्दगर्व्वेण तदभिमुखं मुखरीकृतचरणपातसुखं धावन्ति स्म ॥

यथा ।—

स्त्री-वाल-वृद्ध-वलिता ब्रजवासिनस्ते
कृष्णागतिं यदुपुरादनुमाय शङ्खात् ।
एवं द्रवन्ति चपलं स्म यथा विदुर्न
स्वात्मानमप्यहह ! किं पुनरग्रपश्चात् ॥

अथ पुनः पर्य्यगिङ्ग[१]च्छङ्ख-ध्वनिनिरर्गल-रथघर्घरस्वनस्वर्गजनकृतसर्गजयकारवर्गं शृण्वन्तः सर्व्व एवात्मानं प्रमदेनावृण्वन्तः स्तम्भारम्भमलभन्त ।

तथापि चलन्त एव यदा गदाधररथ-ध्वजारूढ-गरुडमद्राक्षुस्तदा तु पदमपि पदं दातुमसम्पद्यमानाः सद्य एव स्थगितगतयस्तरव इवावतस्थिरे ॥

यदा चैवं तदा नेत्रमात्रं प्रस्थापयन्तः सर्व्वात्मना तदवस्थतामेवाजग्मुः ॥

शङ्खध्वानवुधा मुदा व्रजजना यस्मात्तदुद्दिश्य तं गच्छन्तः पथि दूरदूरतरतः सम्वीक्ष्य वैलक्ष्यतः ।
यस्मिन्नायरव[२]प्लुतं मुहुरधुः सांराविणां[३]तद्दशा-दद्याप्या "ऽऽयर" इत्यदः पदममी चाचक्षते माथुराः ॥

तत्र च ।—

सुरेशानां वाद्यैर्जयजयरवाद्यैः सुरतरु-
स्फुटत्पुष्पासारैर्मधुपनुतसारैर्मुहुरपि ।
रथाध्वन्यध्वानै[४]र्जनरवनिदानैः शवलितः
सुहृद्भिः श्रीकृष्णाः परिमिलनतृष्णः समसजत् ॥

---

(१) इङ्खिगतौ । (२) आगमरव ।
(३) रवसंघातं । अदन्तोऽयं शब्दः ।
(४) रथस्य अध्वन्यो यो ध्वानः ।

ये ते[१]कम्पमिता व्रजेशवलिता-

स्तानात्मनास्तम्भयत्

क्षोणीपातविशङ्कया सममपि

प्रेम्णाथ येन प्रभुः[२] ।

शक्तिं तस्य[३] पराञ्च पश्य यदमुं

कम्प्रीभवन्तं चिरात्

स्तब्धीकृत्य तदङ्गसङ्गनिविडं

कुर्व्वन् स पर्व्वण्यधात् ॥

ततश्च घनमिव घनरस[४]वर्षहर्षप्रदघनं[५] । तडित्वन्तमिव तडि[६]दम्बरमागतवन्तं । अभ्रमिवात्मानं विभर्त्तुमभिमुखलसदभ्रं[७] ॥

जलधरमिव जल[८]वदङ्गधरं । स्तनयित्नुमिव गद्गदगदगर्जितस्तनयित्नुं[९] । धाराधरमिव विलोचनाम्वुधाराधरं तमुपलभ्य परिरभ्य च निदाघदग्धवनभाग इव जागरूकरोमाङ्कुरतां व्रजजनव्रजः स वव्राज ॥

---

(१) प्रसिद्धाः । (२) श्रीकृष्णः ।
(३) प्रेम्णः । (४) जल । पक्षे निविडरस ।
(५) देहं । (६) तडिदित्यव्ययं समीपार्थे ।
(७) गतिं । (८) पक्षे डलैक्यं ।
(९) शब्दायमानं ।

तत्र च ।—

दिविजभविकगर्जासङ्गिपीयूषवर्षं
पशुपसुखजगर्जस्पर्शिदृग्वारिवृष्टिः ।
द्वयमिदमिह भूयः सङ्गरीभूय शुष्क-
द्रुमसमुदयसङ्कून् साङ्कुरान् मङ्क्षु चक्रे ॥

दुर्भिक्षक्रमपीडितानिव चिरं जीर्णज्वरार्त्तानिव
द्रुह्यद्बन्धनसङ्गगानिव कृतानेकातिकृच्छ्रानिव ।
पश्यन्मीलितदृष्टितां समभजत्पित्रादिकान् श्रीहरिः
स्वस्पर्शादथ दिव्यरूपवलितानुत्फुल्लदृष्टिर्बभौ ॥

ततश्च ।—

माता तातस्तदेताद्बितयसवयसः
क्ष्मासुराः सर्व्ववृद्धा
ज्यायांसश्चानताः प्राग्दनुकुलरिपुणा
सास्रमाशीशिषंस्तं ।
*श्लिष्टाः प्राक् स्वेन तुल्या व्यवहृतिसमता-
मागमन् जन्मना ये
प्राग्रासं(१)स्ते तदा तु प्रणतिविरचना
कर्म्मणा प्रागभूवुः ॥

---

(१) लघव इत्यर्थः ।

तदेवं स्थिते।—

गावोऽप्यत्र तदीयसौरभमरुद्विस्तारमाविस्तरा-
माघ्रायागतशीघ्रताः समभजंस्तं तत्र ता यूथशः।
यस्मिन् रम्भणशब्दयुक्खुरघटासङ्घट्टघण्टारवैः
सार्द्धं गोप-शताततं झरिझरीत्युन्नर्द्दितं व्यानशे॥

कृत्वा दण्डवदानतिं मुररिपुर्यर्हि क्षितिं सङ्गत-
स्तर्ह्याघ्राय गवां ततिर्मुहुरमुं
लीढे स्म वाष्पाकुला।
यर्ह्युत्थाय तदीयकण्ठघटनाकृद्बाहुरेष स्थित-
स्तर्ह्येषा च तदङ्गसङ्गतगला दुग्धं स्म दुग्धे स्वयं॥

दूराद्दूरान्मुरारेः प्रसृतपरिमलेनाहृता ये मृगाद्या
भूमिष्ठा व्योमनिष्ठाः पुनरिह विहगा-
श्चात्र ये चित्रदङ्गाः।
ते पूर्व्वे सम्यगाप्ता वरण(१)गणदशां-
ते परे च्छत्रचर्य्या-
मासन्ना गोष्ठगोष्ठीमपि सकृदजय-
न्नाद्यया सेवयाद्य॥

जात्या परं परिचिता न जवा(२)त्परन्तु
व्यक्त्यापि तर्हि हरिणा हरिणादयस्ते।

---

(१) प्रकारो वरणः शालः। (२) शीघ्रं।

आसन् परं परिचिता इति नास्ति किन्तु
प्रेमावलोकसुधया पुरु शीकिता[१]श्च ॥

तदेवं स्थिते वृन्दा-मधुमङ्गलाभ्यां कृतसङ्गमङ्गला पूर्णमनाः पूर्णिमा तूर्णमेव चिरचिरहार्त्तिदिग्ध-स्निग्धजनसम्मर्दमार्द्दितविवेकानिर्व्वर्णनं त[२]दभ्य-र्णमाजगाम । आगम्य च रम्यमिदं त[३]मुवाच ।––

आधि[४]समाधिं[५]सावधिं विधाय समवधीयतां ।
सेयं भवद्विरहचूर्णीकृतावयवजालापि तदेतदा-शया पूर्णायित[६]जीवितकाला पूर्णिमाहमस्मि ।
ताविमौ च तदेताद्विधभाविलङ्गिम[७]मङ्गलौ वृन्दा-मधुमङ्गलौ स्त इति ॥

तदेतन्निशम्य सेयं पौर्णमासीति समधिगम्य व्रजराजराज्ञीयुवराजमुखाः सुखादभिमुखा भवन्त-स्त[८]त्परिसरं परि नमःपुरःसरतया पुरःसरन्तः[९]

---

(१) शीक सेवने । (२) श्रीकृष्ण ।
(३) श्रीकृष्णं । (४) मनःपीडा ।
(५) आवरं अङ्गीकारं । (६) क्यच् ।
(७) मनोहरं । (८) पौर्णमासी ।
(९) अग्रे गच्छन्तः ।

सकम्पसम्पदञ्जलिरञ्जि[1] नयननिष्पतन्मेघ-पुष्प[2]तया त[3]न्निष्ठनयनतया च तिष्ठन्ति स्म ॥

सा च शीतलविलोचनजलसम्पतनलब्धसम्पत्कम्पसङ्कुलपुलककुलकलिला पित्रोः पुत्रस्य च कलेवरं सुखकरेण करेण वरेण च वरेण्यमाचरन्ती तदिदं व्याजहार ।—

भो ! व्रजपतिदम्पती ! वियोगसंयोगसन्धिसमयं प्रति सम्प्रति धीरतात्मानं धारयेथाथां । यदायुष्मतः खल्वस्य चागतमात्रस्य विश्रमाय कल्पते ॥

ततश्च "स्वस्थे हि चित्ते प्रसरन्ति बुद्धय" इतिन्यायादायतिसुखमपि सदायतीभाव[4]मापद्येत ॥

तथा चोपदिशन्ति ।—

धर्म्मान्तवर्षादिमसन्धिसङ्गतिः
सुदुःसहाय ज्वलनाय कल्पते ।
एषा जगत्प्राणमपि प्रतापय-
त्यतः प्रतीक्षेत तदीय[5]-शीतलां ॥

---

(१) अञ्जलिं रञ्जितुं शीलं यस्य मेघपुष्पस्य ।
(२) जल ।　　(३) पौर्णमासी ।
(४) वृद्धिभावं ।　　(५) जगत्प्राणस्य हरेः ।

तस्मादत्र घनच्छाये[१] घनच्छाये[२]तरुनिकाये धीरतामाविशन्तः समन्तादस्य समुपविशत ॥

अथ तथाविधाय कृष्णां मध्ये निधाय तया सह जगत्सु[३] व्रजसत्सूपविशत्सु श्रीमदुपनन्दादिषु च लब्धानन्दादिषु श्रीदाममुखेषु च प्रपञ्चितसुखेषु वृन्दा-मधुमङ्गलयोश्च लब्धतत्सङ्गमङ्गलयोर्द्यावाभूम्योश्च लब्धसुखातिभूम्योः श्रीव्रजपतिदम्पत्योश्च मुहुरपि तमुपगुह्य विमुह्य च सन्दृश्य विमृश्य च लब्धवाष्पसम्पत्योः सा पुनरुवाच ।—

इन्द्रप्रस्थं यावदत्याजि साल्वः
पर्य्यक्राथि द्रागथो दन्तवक्रः ।
गोष्ठे चाया[४]द्यत्र तावन्न पीतं
न स्नातं वानेन वां देहजेन ॥

किं वहुना ?

वहु नमस्कृत्य भवतः पुरस्कृत्य वद्धाञ्जलिधामा दारुकनामा पुष्कल[५]सारथिरप्ययं शुष्कदारुवदेव दृश्यते ॥

---

(१) मेघकान्तौ । (२) शोभे ।
(३) सर्वेषु । (४) अगमि यातेर्लुङि । (५) वर ।

तस्मादस्य सुखसम्पदुत्थाय समुत्थाय व्रजमेव व्रजन्तस्तत आनीय स्नानीयमुखसुखकरसन्तर्पणा-व्रजं समर्पयथ । यावदशेषमङ्गल-मूलं गो-धूलं श्रीव्रजप्रवेशदेशरूपमुपलभ्यत इति ॥

अथ श्रीकृष्णः सर्व्वान् सगद्गदं जगाद ।—

कथमधुनापि स्वमनो धुनानास्तदवस्था एव यूयमस्थात। मम व्रजवासाय कृतविघ्नाः पापनिघ्नाः[१] साल्वदन्तवक्रान्ताः सर्व्व एवाश्रान्ताः[२] शत्रवस्तत्र भवतां भवतां शापादपकृताः कृतान्तमुखनिशान्ता जाताः । तत्र च दन्तवक्रः सविदूरथः संरुद्धमथुरा-द्वारपथः समाप्ततामवाप्तवान् ॥

ततः सर्व्वमेव मङ्गलं सङ्गतं। व्रजप्रवेशे तु साम्प्रत-मिदमभिनिविवेशे। मदीयपुनर्व्रजसमागमभागधेया-चरणाः श्रीमदार्य्य[३]चरणा मामादायागच्छन्तस्ते साल्वापाततस्तत्रापाततः समुपद्रवान्तः क्लान्त-जनमनः शान्ततार्थं मया रक्षिताः ॥

तस्मात्तानानीय सम्प्रीय व्रजप्रवेशमङ्गलं कुर्य्या-मिति मह्यं नितरां रोचते ॥

---

(१) अधीनाः ।　　(२) निरन्तराः ।　　(३) राम ।

पूर्णिमोवाच ।—

तदपि स्यादद्य तु सर्व्वेषां सुखमनवद्यं कर्त्तुमुचितमिति ॥

तदेवं सानन्दं शृण्वन् पूर्णिमा-निदेशमेव सदेशरूपतया वृण्वन् कश्चन गृहगृहवृहल्लोकः सस्पृहं निजनिजमोकः संहाय प्रतिहायनं तन्नाम्ना समुच्चितानि समुचितानि वस्त्रादीनि तत्रानीय चितानि चकार ॥

श्रीकृष्णस्तु तानि सर्व्वाणि सुपर्व्वणामपि खर्व्वितगर्व्वाणि वीक्ष्य व्रजवासिनां पुनरङ्गसङ्गतरसनावसनादीनि शरदन्त(१)नलिनानीव मलिनानि समीक्ष्य पौर्णमासी-मुखमसुखमीक्षामास ॥

सा पुनरिदमवादीत् ।—

सर्व्वेणापि व्रजवासिना सेयं पूर्व्वपूर्व्ववद्भवदेकसम्प्रदानताध्यवसेयतयारब्धा कुरुभुवि भवल्लब्धा च सामग्री भवदेकाग्रीयताकृते(२)धृतव्यग्रीभावा गावश्च नान्यथा प्रथयितुं शेकिरे ॥

सर्व्वस्वानि पुनरसुरसङ्गरकारिणस्तव मङ्गलाय यज्ञपुरःसरतया सुरभूसुरसादेव चक्रिरे ॥

---

(१) हेमन्त । (२) तवाग्रे रक्षणार्थं ।

विशिष्टानि वा यानि कानिचिदवशिष्टानि तानि च सौभयुद्दमुद्दुद्दमवधार्य्य वार्य्यविप्रवर्य्यद्वाराहुत-भुजि जुहवामासिरे ॥

निजनिजगात्राणि परं कर्त्तव्यताशेषपात्राय पूर्णाहुतिमात्राय(१) त्राणानि विदधिरे ॥

तस्मात्केवलभवद्दुःखविद्रावणाय विद्रावितसम्प-द्राशितयाऽदरिद्रायि ॥

अथ दानवारिर्निजनयनवारिकरवारिततमाचरन्न-धिदारुकमिदं चारुवर्णं कर्णसमभ्यर्णतया वर्ण-यति स्म ।—

आनय शस्तानि वस्त्रालङ्करणानीति ।

तदनु व्रजाङ्गभूतानि च निजाङ्गसेवकयूथानि तत्सम्भूतानि चकार ॥

ततस्तानि च तेन सारथिना सह मनोरथस्था-नीयरथस्थानि वस्त्रादीनि समानयन्ति(२)पुनस्त-दवस्थानि पश्यन्ति पर्य्यन्तं नाप्नुवन्ति स्म ॥

मुररिपु-पुरः(३)पर्य्यन्तभूरियं तु तैर्दूरतः पूरिता बभूव ॥

ततश्च । स्नानीयवस्त्राभरणानि चिन्तामणीनपि

---

(१) कर्त्तव्यताशेषस्य पात्रं पूर्णाहुतिमात्रं ।

(२) शश्वन्तः ।　　(३) अग्र ।

प्रादिशदेष तेभ्यः स्वयञ्च दामोदर(१) केलिरीतिर्बभार खर्व्वाणि तदर्पितानां ॥

अत्र च विशेषः ।—

हत्वा तं दन्तवक्रं दनुजकुल-रिपु-
गोष्ठमात्मार्थसर्व्व-
त्यागि प्राति(२)स्म चिन्तामणिभिरथ निधि-
श्रीभिरात्मीयतातं ।
किञ्चामीषामसङ्ख्याभरणगण-शतं
बिभ्रदप्येष कृष्ण-
स्तैरेतैः स्वस्वदत्तं पदमथ कलय(३)
न्नैच्छि नान्यैर्वितीर्णं ॥
चक्राद्यं स्यन्दने स्वं परिकरमदधात्
क्षत्रियावास-योग्यं
वेणुं यष्टिं शिखण्डादिकमपि जननीं
याचमानः स्ववेशं ।
आदायाघाय चाङ्क कमपि रुचिभरं
व्यञ्जयत्कञ्जनेत्र-
श्चित्रं(५)चित्रं(६)च वाष्पादिभिरघविजयी
दारुकं चारु चक्रे ॥

(१) खर्व्वाणां परिधानात् । (२) पूरयति ।
(३) परिदधत् । (४) विचित्रं । (५) कर्ब्बुरं ।

ये तत्तत्सन्विधानैः परिचरणकृतः
　　　　सम्भ्रमात्पूर्णकार्य्या-
स्तत्राप्यन्ये समन्ताद्भ्रमणगतिधरा-
　　　　ये भ्रमध्वस्तकृत्याः ।
ते सर्व्वे तुल्यभावं ययुरतिरतिभाक्-
　　　　चित्तभावेन यद्वा-
मात्या एवाग्रिमत्वं यदभवदजित-
　　　　स्तेषु पूर्णाम्बुनेत्रः ॥
किं ज्यायान् किं कनीयान् किमु तुलितवयाः
　　　　किं वशः किं वशी वा
सोऽयं स्यादित्थमागात्परिचितिपदवीं
　　　　कोऽपि कस्यापि नात्र ।
द्वार्व्वत्याः सङ्गतस्य व्रजमरिजयिनः
　　　　श्रीव्रजेन्द्राङ्गजस्य
श्रान्तिं तस्यापनेतुं व्रजमहितजना
　　　　यर्हि जोघूर्णति स्म ॥
आस्तां सा स्नेहचर्य्या मुरजितिविदधु-
　　　　र्य्याममी दारुके यां
स्वस्मिन् सा चास्तु दूरे हयचमनु यां
　　　　सापि न क्वापि दृष्टा ।

एतस्य स्यन्दने यां किमपरमनया[१]
　　　　दारुकाख्यः स तत्रा-[२]
वश्यं वश्यत्वमाप्तः समय-कतिपयं
　　　　चित्रमित्रं[३]वभूव ॥
कृष्णः कंसं निहन्तुं प्रवसनसमये
　　　　यादृशान् यत्प्रमाणान्
गोष्ठस्थान् दृष्टपूर्व्वानकृतचिरतया-
　　　　गत्य तद्वद्ददर्श ।
तस्यान्तर्ध्यानलग्नं भवति यदनिशं
　　　　तत्कथं वा वराकः
कालः कल्पेत कल्पस्थितिरपि[४] स वला-
　　　　न्नेतुमन्यामवस्थां ॥
सिद्धे स्वे स्नानवस्त्राभरणविधिमुखे
　　　　साधिते चात्मपित्रा-
दिस्थे[५] श्रीमान्मुकुन्दः सममशनसुखं
　　　　तर्हि तैः सम्वभार ।

---

(१) स्नेहचर्य्यया ।　　(२) व्रजे ।
(३) तुल्यं ।　　(४) वहुरपीत्यर्थः ।
(५) स्वयं वस्त्राणि धृतानि पित्रादीन् धारितानि ।

निर्वृत्ते तत्र(१) चायं शकटघनघटा-
मध्यलब्धं शताङ्गं
शार्ङ्गी सङ्गम्य रम्यं सखिवलयशता-
सङ्गवानङ्गति स्म ॥
वाद्यैर्गीतैः सनृत्यैर्जय-जय-निनदैः
पुष्पकीर्णप्रकारै-
र्वेदाशीःस्वस्तिघोषैः प्रमदकलकलैः
स्यन्दनाऽनः-स्वनाद्यैः ।
उत्सर्पन् गोपवर्गस्त्रिदशसमुदय-
श्चावसर्पन्समन्ता-
देकीभूतस्तदासीद्व्रजगृहमविशद्
यर्हि कंसादि-शत्रुः ॥
कुर्वन्नारात्रिकं स व्रजजन-निचय-
स्तस्य रत्नात्मदीपां-
श्चिन्तारत्नप्रसूतान् करमनु विदध-
न्नावकाशं जगाम ।
तर्ह्यागत्य क्रमं यं प्रथममलभत-
द्रागनेनैव तत्र

---

(१) भोजनसुखे ।

श्रेणीभूतः समन्तादुभयविधतया
तत्पथिस्थश्चकार ॥
तावच्छ्रीगोपराज्ञीमनु शतशतशः
स्त्रीषु रत्नानि(१) रत्ना-
न्यादायातिप्रमोदादथ पुरपुरत-
स्तस्य नीराजनानि ।
नृत्यैः सङ्गीतवाद्यैः सजय-जय-रवै-
स्तत्र कुर्वन्ति(२) शश्व-
द्देवीनामप्युडूनामपि नभसि गता-
न्यत्र वृन्दानि जिग्युः ॥

हरिमथ जननी पिता च लब्ध-
स्वजनसहस्रवृतिः स्ववृत्तिमूलं ।
धनमिव विगतं समेत्य दुर्गा-
त्परसदनादुदितं गृहं निनाय ॥

ततश्च ।—

नववासतया सप्रसवकुठ(३) वाटिकाभव्यनि-ष्कवाटसगव्यघटशकटवाटमङ्गलसङ्गतगृहव्रजावासं व्रजावासमभीक्ष्य तत्र च भद्रकुम्भादिभिर्भद्रवेशं

---

(१) श्रेष्ठानि कर्त्तृणि ।
(२) स्त्रीरत्नस्य विशेषणं । (३) वृक्ष ।

वहिरुपवेशं निरीक्ष्य तस्मिन्विस्तीर्णे मृदुलतूलिकादिभिरास्तीर्णो मुरशमनः समं ज्ञातिभिर्वलितगोपवेशमुपविवेश। चणकतिपयमपि तेषां स्वरसमयं[१] समय[२]मयन्नयमय[३]मयामास ॥

आत्मम्भरितां नेत्रे, कुक्षिम्भरितां पुरा[४]श्रवसी ।
उदरम्भरितां नासे, मधुरिपु-मधुरिम्णि जङ्गतः[५]
पशुपां[६] ॥

तदेवं प्रमदं चित्वाक्रममनु सर्व्वमनुज्ञां सुज्ञानतया[७] याचित्वा स्नेहकातरमनसं मातरं सम्भालयितुमखिलसखिभिः सममन्तःपुरं विवेश ॥

ततश्च तत्रापि सत्रा[८]तया स्वागमनेन त्रातया पितृव्यपत्नीप्रभृतीः स्निग्धप्रकृतीः सपत्नीभूय भूयः सान्त्वयन्नत्वरयानुज्ञां वरयामास ॥

तदनु च किञ्चित्किञ्चिदन्यदपि दुष्पारवाष्पधाराजनन्या जनन्या सञ्चितं सखिभिः सममदन्नञ्चितं चकार ॥

तदनु च जननीनीतमभिनीतं[९] रमणीयतया

---

(१) अवसरं । (२) गच्छन् ।
(३) शुभावहविधिं । (४) पुरायोगेऽतीते लट् ।
(५) यङ्लुक् । (६) षष्ठी ।
(७) सुबोधतया । (८) सह (९) योग्यं ।

प्रणीतं शयनीयं सखिभिः सममखिलसुखधाम-
नामा रामानुजः समाजगाम ॥

माता तु सुष्वापयिषां याता तदीयसङ्कोचमरोच-
यन्ती श्वस्तनतल्लालनमालोचयन्ती तदुपचाराय
चचाल ॥

अथ निजपरिचारकप्रवेका-
श्चिरविरहाचिरयोगकं प्रदेहाः ।
परिचरणमकार्षुरस्य यद्य-
त्तदखिलमभ्यसनात्परं सिषेध ॥

अथ कृतशयनावलम्बने घनश्यामघने सखीनां
सखिता सेयमखिलान्सुखयति स्म ॥

यथा ।—

त्तोणीभारं विधूय स्वरधिपतिमपि
स्थापयित्वाधिपत्ये-
स्वं गोष्ठं हृष्टमत्या व्रजितवति हरौ
तेन सार्द्धं सखायः ।
अङ्गान्यालिङ्ग्य तस्य श्रितशयनतया
वृत्तमापृच्छ्य सान्ना
वक्त्रेणास्पृश्य वक्त्रं हृदयमपि हृदा
सक्थिसक्थ्ना निदद्रुः ॥

अथ कथकः समापनमाह स्म ।—

आवाभ्यां प्रथमं यदुक्तमसकृन्नास्ते वियोगस्तव
श्रीगोपेन्द्रसुतेन वाढमिति तन्नादृत्य शुश्रोथ यत् ।
जाड्यं तत्परमावयोर्मुहुरदः प्रस्तावमातन्वती-
र्य्यच्छुद्धं मिलनं स्फुटं कथयतोः
सम्प्रत्यसौ नन्दसि ॥

तदेवमानन्देन सन्नकण्ठे मधुकण्ठे सर्व्व एव सश्लाघमूचुः ।—

सुखं वा दुःखं वा तदुभयविनाभूतमथवा
तदेतद्युग्मं वा युगपदिति वेद्यं न हि यया ।
तयाप्यस्मद्दूरस्थितचरहरेरस्य कथया
स्फुरद्भूतानूक्त्या विजितसुधयास्मानसि च तं ॥

इति तेषु च शिष्टेषु सुखाविष्टेषु व्रजवन्दिनः प्रस्तुतवस्तुतः सर्व्वनन्दितां विन्दमाना ववन्दिरे ॥

खलसाल्वकहृद्दलनाच्छुभकृत्
प्रवरर्षिमुखादवकर्ण्य सुखा-
दथ हृज्जवजिद्रथभागाभिजिद्
गमनः(१) सहसा रमयन्महसा

---

(१) अभिजयति यद्गमनं ।

मधुरानिकटं मधुजित्प्रकटं
रदवक्रकदृ(१)ग्गदयाम्बुजदृग्
निहतं कृतवानिह तं भृतवा-
नखिलं जगतः सखितां प्रगतः
सविदूरथहृत् प्रविदूरसुहृत्
तमगोकुलजान्रमयन् कुलजान्
रविजापरतः(२) प्रविशन्निरतः
परमध्वनिभृद्दरतः सुखधृद्
व्रजभूवपुषां स्वजयप्रजुषां
परितः स्वमिमान् परियन् रतिमान्
जवनीसुखपृ(३)ग्जनकाननदृग्
जनमुद्वलयं जनयन्नलयं(४)
व्रजभूवसतिव्रजमावसति
स्वजनेरयनं(५) स्वजने नयनं(६)
जय नन्दज ! हे जय दस्वमहे ॥

अथ रजन्यामपि जनितप्रभायां श्रीराधिका-सभायां जातश्रीकृष्णप्रभायां मधुकण्ठ उवाच ।—

(१) द्रष्टा । (२) पारे । (३) पृची सम्पर्के ।
(४) लयरहितं यथा स्यात् । (५) स्वजन्मस्थाने ।
(६) नयनरूपं ।

तदा साल्वस्योपद्रवमनु समस्तव्रज-जनः
समन्ताद्वह्वयाद्यं शरणमवगच्छन् स्थितिमधात् ।
विना कृष्णप्राणाः पशुप-रमणी-मस्तक-मणि-
रमूषामस्त्यन्तर्यदि विरहवह्निः किमपरैः ॥
यदा तादृग्जाता परमकुदशा तर्हि निखिलाः
समं स्वप्ने पश्यन् व्रजमनु हरेरागतिशुभं ।
मिथस्तच्चावोचन्निति कलितविश्वासमथ त-
त्पथं पश्यन्त्यस्ताविगलितनिमेषाः समभवन् ॥
यदा शङ्खध्वानं श्रवसि कृतवान् स व्रजजनः
प्लुतप्रायं गच्छन्नघहरमुपेयाय रभसात् ।
अपि स्तब्धास्तर्हि प्रथममभुरेतस्य दयिता
मनस्त्वं या याता न वपुरभिमानं लवमपि ॥
यदा तन्वस्तासां न हितमनुगन्तुं समशकन्
सुहृद्वृन्दं तर्हि द्रुततरमनोभिर्न यदमूः ।
त(१)दालोकाऽस्तोकस्फुरदमृतधाराभिरभितः
पुनः शक्तीकुर्व्वत् परपदमगात् प्रत्युपकृतः ॥
तदा कृष्णे सर्व्वान् स्पृशति तदनु स्पर्शमविदु-
र्मुदा मूर्च्छाभाजोऽप्यनुलवममूस्तं न तु परे ।

---

(१) श्रीकृष्णः ।

स मूर्च्छाऽमूर्च्छानां न खलु घटते तत्तदिति चे-
त्प्रभावस्तत्पृष्टेर्भवति विपरीतत्वकृदपि ॥
अमूषां तेषां वा भवतु कविताहं कियदपि
स्फुटं यस्माद्भावः कलयति चिरं निश्चितिदशां ।
न तु श्रीराधाया भवति खलु यस्यां प्रतिपदं
मनःक्षिप्तिर्म्मुर्च्छा चलनमचलत्वं पर[१]मपि ॥
यदा चक्रे वेषादिकमघरिपुस्तर्हि तदनु-
ज्ञया सर्व्वे चक्रुस्तदनुकृतिमेता[२] बत ! विना ।
अमूर्य्यत्प्रेम्णा तं स्वमिव कलयित्वा समनस-
स्तदा तेनैव स्वं[३] परिकृतमितीमां मतिमयुः ॥
प्रवेष्टुं गोष्ठं यर्ह्यभिरुचितमासीन्मुररिपो-
स्तदा यानं तासां गतिरभवदस्यापि च परं ।
न चेदन्योन्यं दृग्विसृतिगुणवल्लीवलयिताः
कथं विश्लेषार्त्ताः पदमपि नयेरन् पदममी ॥
यदा गोधुग्वृन्दे मदकलकलां दोलवलिते
प्रसूमुख्यस्त्रीभिः स खलु निरराजि प्रतिगतः ।
तदा कम्पंस्तम्भं नयन-सलिलं वर्णविकृतिं
स्वरच्छेदं स्वेदं पुलकमपि मूर्च्छां ययुरमूः ॥

---

(१) रहस्यं । (२) गोपीः । (३) आत्मा ।

सुहृद्भिः सार्द्धं यर्ह्युपशयनमागान्मुरहर-
स्तदा ताभिर्मेने तदिदमविचित्तं सममपि ।
वयं भस्मीभूतास्तदमिलनतः स्याम किमतः
सुखं श्यामः सोऽयं व्रजमपि पुनः प्राप्य लसति ॥
यर्ह्यायासीद्व्रजपदमसावुद्धृतक्ष्मातिभारः
सर्व्वैस्तर्हि स्वनयनपदं राधयाप्याशु नीतः ।
विच्छित्यापि प्रतिहतनिमेषाक्षिसास्रं सकम्पं
पश्यन्तीयं पुनरमुमविश्रान्ति(१)रात्रीमनैषीत् ॥

अथ मधुकण्ठः समापनमाह स्म ।—

तदा हरेरसङ्गश्च त्वं सङ्गं मम मन्यथाः ।
साम्प्रतं विपरीतं तं मौनं नस्तत्र साम्प्रतं ॥
एवं सा कथकाहूतश्रुतिः स्मृतिविकासिनी ।
भजमानात्मरमणां रहो धामान्वसेवत ॥

इति श्रीमदुत्तरगोपालचम्पूमनु पुनर्व्रजदेश-
केशवप्रवेशशंसनं त्रिंशं पूरणम् ॥

———

(१) यथा स्यात् ।

एकत्रिंशं पूरणम् ।

अथ प्रातः श्रीव्रजराज-सभायां श्रीव्रजयुवराज-विराजमानायां स्निग्धकण्ठ उवाच ।—

तदेवं व्रजमङ्गलस्य व्रजान्तःपुरमनु सायं मङ्गल-सङ्गमे सर्व्वेषां हृदयङ्गमे जाते प्रातः श्रीव्रज-वासिव्रातः श्रीमद्व्रजत्रातारि सङ्गम्य पुनः स्वजी-वनं रम्यं विधातुं बहिस्तस्य सङ्गमसमयं पश्यन्नेव तस्थौ ॥

यथा बहिस्तथान्तःपुरमनु पुरन्ध्रीसमुदयश्च व्रजपालयित्रीमनुगम्य पर्य्यगवतस्थे ।

तदेवं स्थिते श्रीव्रजराज-तनयश्च कलितप्रात-रुचितनयः सहजाविनयः सखिभिरखिलैः सह मातुः सदनमाससाद ।—

आसन्नस्तु हरिः पुनश्च नववन्मात्रादिभिः पात्रतां नेत्राणां बलितः[१] सशास्त्रवजयी

शैघ्र्यातिमात्राकुलः ।

(१) प्रापितः ।

तत्तत्प्राथमकल्पिकक्रमवशात्कुर्व्वन्नमः सर्व्वतः
पूर्णाशीर्व्वचनः सबाष्पमचिरादध्यास्तमध्यासनं ॥
तृष्णां मातुः स्तन्यं सदमृतमथास्विद्वयभवं
भजन् सर्व्वाङ्गेषु स्तपनमिव कृष्णः पुलकवान् ।
उरःकम्पं विभ्रच्चरणयुगमस्या निजदृशोः
सुधातुल्यैर्नीरैः शिशुरिव सिषेच प्रतिमुहुः ॥

आयातस्य यदुस्थलादतिचिरा-
दैत्यान् विजित्याजित-
स्यान्येद्युर्निजबाहुयुग्मवलित-
स्यङ्गानि सर्व्वाण्यपि ।
पश्यन्ती परिचित्य पूर्व्वतुलया क्रन्दन्त्यनुक्रोशभा-
गुद्गीतप्रभमात्मनीनजनतां सारूरुदन्तत्प्रसूः ॥

अथ कातरतां गतयोर्मातृ-सुतयोः सर्व्वाभिरखर्व्वाश्रुधाराभिरनर्व्वाचीनाभिः(१) सकातर्य्यं मातर्य्यलमुपालम्भपर्य्यवसायिनीभिः कृतानुतापनिवारणयोर्विश्वसुखकारणयोः क्षणकतिपयं व्यतिवीक्षणसुखमुदभूत् ॥

---

(१) वृद्धाभिः ।

ततश्च पोगण्ड[१] इवासनाय[२]मात्राकृष्य कलस-निजार्द्धास्तरणास्तथा माणवक[३]इव स्वहृदि विधाय तया विहिताभरणाः कृतमङ्गलाचरणाः चरणानां गणमीक्षणानां[४] पर्व्वणा सर्व्वमखर्व्वं चकार ॥

अथ कथमपि प्रणीततदनुज्ञानुसरणसखि-कुलावरणः सकलसुखनिधानं पितुः सन्निधानमपि सम्बभाज ॥

तस्यां संसदि सङ्गमृच्छति विधौ[५]
कल्लोलकोलाहलः
श्रीमान् वार्धिरिव स्फुरन् जनगणः
प्रोत्सर्पदङ्गः स्थितः ।
क्षुद्व्यालोलचकोरका इव तमावृत्य व्रजेशादय-
श्चक्षुस्त्रोटिभिरंशुपानकृतिनोऽप्युच्चैर्न तृप्तिं ययुः ॥

ततश्च ।—

कैशोरं मुरलीशिखण्डकलनं[६] ज्ञातेय[७]मप्यात्मनः
प्राक् साम्यादनुभावयन्पुरगतिक्लेशं स विस्मारयन् ।

---

(१) विकलाङ्गस्तु पोगण्डः । (२) उपवेशनाय ।
(३) अर्द्धहारो मानवकः । (४) दृशां ।
(५) कृष्णे । (६) गृहणां ।
(७) ज्ञातिव्यवहारः ।

स्व-स्वप्रेमविधाविधानपटुतां तानानयन्तर्हि य-
त्पश्यंस्तस्य पुनः पुराय गमनं न श्रद्दधे दारुकः ॥
सर्व्वे तात-पितृव्य-तत्समजना विप्राश्चिता मस्तकं
क्लिन्नं नेत्रजलैरलं विदधिरे कृष्णस्य साशीःस्थिति ।
स्वेदैस्तद्वदुरः सुहृद्वितत्यः पाल्यास्तथाङ्घ्रिद्वयं
वाष्पैः सुष्ठु यथाभिषेकजमहः-[१]
स्तस्मिन्[२]जना मेनिरे ॥
तस्मिन्[३]मागध-सूत-वन्दि-निवहाः
सङ्गीतविद्यावुधा
भेरीदुन्दुभिकाहलादिविदुरास्तत्तत्कला भेजिरे ।
कृष्णप्राप्तिसुखासवातुलमदाद्बाला युवानस्तथा
वृद्धाः किं वहुना ? स्त्रियश्च ननृतुः
स्वैरं गृहान्निर्गताः ॥
पूर्व्वं जन्म महामहे मुररिपोर्य्यद्गोकुलस्था जनाः
स्त्रीपुंसा निखिलाश्च नृत्यवलिताः
क्रीडाकुलं भेजिरे ।
तस्मादप्यलमत्र[४]शर्म्मवलिताश्चिक्रीडुरत्युत्सुकाः
स्थाने त[५]न्निविलब्धिवदस्युहृतत-
लक्ष्म्याभिदा तादृशी ॥

(१) साम्प्रतमिदं । (२) सदसि । (३) महसि ।
(४) आगमनमहे । (५) योग्यं ।

तस्मिन् दुग्ध-हवि-र्दधीनिरजनीतैलानि चात्युन्नता
द्देशात्केचन तेषु वाढमाकिरन् वर्षाम्बुवाहा इव ।
येषूच्चैर्निपतत्सु ते पुनरलं नृत्यन्त एव स्थिता
देवाद्यैर्जयकारमन्त्रसचितैः पुष्पैः स्तवैश्चार्चिताः ॥
कृष्णं मित्राणि गोपाधिपमुखसहजा-
श्चित्रसम्बन्धिवृन्दा-
न्यन्यानन्ये तथा श्रीव्रजपतिदयितां
यातृमुख्याः पुरन्ध्र्यः ।
राधाद्या[1]स्तद्वयस्या[2] विहरणवलना-
मानयन् ये तु सर्व्वे
ऽप्युच्चैरानन्दवृन्दग्रहवलिततया
नाविदुः किञ्चनापि ॥
हरिं वद हरिं वदेत्यलमनल्पजल्पं नटन्
पठन् हरिपराक्रमं क्रमजशत्रुजत्रु[3]च्छिदं ।
हसन् वसनदोः करप्रकरकर्षहर्षप्रद-
*श्चुकूर्द मधुमङ्गलः सममशेषमङ्गन्निव[4] ॥
क्रीडन्तः किल यान् मुदा द्विजवरान्
सूतान्नटान् वन्दिन-

(१) कर्म्मभूताः । (२) कर्त्र्यः ।
(३) स्कन्धसन्धिः । (४) आगिमतौ । व्याप्नुवन्निवेत्यर्थः ।
* प्रसह्य मधुमङ्गलः कुतुकसङ्करं सङ्गतः । इति पाठान्तरं ।

स्तत्तद्दिव्यधनस्य दानमहसा
तृप्तान् व्यधुर्गोदुहः ।
अन्योन्यत्र[1] च तर्हि तस्य[2] रुचिकृ-
च्चित्रप्रभस्यार्पणं
चक्रुस्ते[3] मिथ इत्यवापुरखिला
एव स्फुटं दातृतां ॥

तदेवमक्रीडित्वा. सुचिरं क्रीडित्वा जलमवगाह्य त[4]दतिवाह्य[5]च शस्तवस्त्रालङ्कारादीनि सर्व्व-जनांस्तृप्तिभिर्नैपथ्यकारिजनानपि व्रजक्षिति-पालनकारी धारयामास पुनराहारयामास मधुरा-न्नानि । दारुकस्तु सर्व्वेषां स्वस्मिन् कृतवरिवस्या-खर्व्वेण पर्व्वेह लभमानः सात्वत-कुलमधुरं पुर-मपि विसस्मार ॥

तदेवं स्थिते श्रीकृष्णस्तु व्रजेश्वरादीन् कति-पयानप्रियतया विधाय सखिभिरखिलैः सह गवा-मवलोकनाय वनाय जगाम ॥

गवान्वेषं कर्त्तुं वनमनुययौ नन्द-तनयः
समन्ताद्धावस्त[6]द्विनिमितमकार्षुः प्रथमतः ।

---

(१) परस्परत्र । (२) धनस्य । (३) द्विजवरादयः ।
(४) जलावगाहनं । (५) समाप्य । (६) अन्वेषणं ।

यतस्तस्या मोदं विसृमरमनघाय परित-
स्तमेवावृण्वानाद्रुतगतिविदूरादभिययुः ॥
हुङ्कारघोषपरिपोषसतोषमेन-
मावृत्य नृत्यचलिता इव चानुसृत्य ।
नन्दादिभिर्भरिभयीत्यपि रुध्यमानाः
कृष्णं निरुध्य लिलिहुर्व्यतियुध्य चात्र ॥
गास्तर्हि च स्वरविशेषविशिष्यमाणा-
वेणुस्वनेन विनिरुध्य स तत्र तत्र ।
प्रत्येकमीक्षणकरः स्मृतनाम पृच्छ-
न्नूचे विचिन्त्य पितृभिः सखिभिश्च तद्वत् ॥
प्रतिस्वं पश्यन् गानयनसलिलान्यस्रवदसौ
तदीक्षा सार्द्रान्तर्व्रजनृपमुखश्च व्रजजनः ।
यथादेशः सोऽयं वत ! सुरनदीमातृकदशा-
मतीत्यापि स्निग्धः समजनि चिराय प्रतिदिशं ॥
तदेवं गाः पुनः पुनरनुलोमयन्[१] स सोमवदनः प्रणिधाय नियुक्तगोपालपाल्या सहपाल्या विधाय श्रीव्रजराजादीनग्रे निधाय गो-गृहनिकायं सन्निधाय गो-दोहनादिकसुखमनुसन्धाय पूर्ववदेव देव-

---

(१) लोमानि आनुकूल्येन मार्जन् ।

समुचिताऽऽरात्रिकादिभिरर्च्चितस्तामपि रात्रिं जननीजनितभोजनादिना लब्धशस्तः कृतसमस्तसखिसुखातिशयतया शयनलीलया पूर्व्वजरामपूर्व्वंवदतिवाहयामास ॥

तदनन्तरमहर्मुखे च सञ्चितसर्व्वसुखे श्रीमानुपनन्दः श्रीमन्नन्दनन्दनमानन्दान्निमन्त्रयन् सकललोकानां निर्यन्त्रणां निमन्त्रणां कृतवान् ।

तदेवमहरहः परममहत्त्वहतया श्रीमदभिनन्दादयश्च लब्धसम्बन्धतदनुसम्बन्धादयश्च तदनुबन्धमविन्दन्त ॥

तत्र च ।—

तं तस्यागममङ्गलक्षणमथारभ्य व्रजे सर्व्वतः
कंसाद्याहतिगोकुलागतिकथागीतां गवाद्यादिकं ।
नित्यं नित्यमगाद्वरामुपचितिं(१) तत्रापि यस्यालयं
गच्छत्येष यदा तदा पुनरियं(२) लक्षात्मना लक्ष्यत ॥
यदवधि यादव-नगरात्पुनरपि हरिरेष गोष्ठमायातः ।
गोत्राणां(३) गोत्राणां,(४)
गोत्राणामपि(५) समागतं शर्म्म ॥

---

(१) वृद्धि । (२) उपचितिः । (३) गोवृन्दानां ।
(४) ज्ञातीनां (५) गोरक्षकाणामपि ।

अत्रेदं दारुकश्चारु चिन्तयामास ।—

दैतेयान् घातुक[१]स्तत्र पूर्य्यद्धा स्थितवान् हरिः ।
किन्तु व्रजस्य वश्यः स्यात्परार्द्धमिव[२] दायकः ॥

अथ कथकः समापनमाह स्म ।—

तदेवं दर्शं दर्शं सपरामर्शं लेखास्तदिदमुल्लेखयामासुः ।—

यः प्रागासीद्व्रजान्तर्विहरणकुतुका-
दंशिकावेत्रपाणिः
स श्रीगोपेन्द्रजन्मा यदुसदनमगा-
त्कंसमुख्यान्निहन्तुं ।
तस्मिंश्चक्रादिहस्तः खगपतिगगति-
स्तान्निहत्यात्र सम्प्र-
त्यागत्यास्ते पुरावल्लसितचितकला-
नाट्यमेतस्य पश्य ॥इति॥

तदेवं परमहिते सुखसहिते दिनकतिपयेऽतिवाहिते प्रस्तावान्तरन्तु प्रातःप्रस्तोष्याम इति श्रीव्रजेश-सभायां कथां सम्प्रथय्य निशि श्रीराधासदसि कथान्तरं स्निग्धकण्ठः समुद्रावयामास ॥

---

(१) घातयितुं ।   (२) परार्द्धस्यदातेव ।

यथा ।—

तदेवं शरच्चण्डचण्डद्युतिमण्डलमिव विरहं विरहय्य विधु[1]रुत्पलवलयानिव व्रजनिलयानुत्फुल्लयामास ॥

तथापि तस्य तत्प्रेयसीनां च परस्परमन्तस्तृष्णा घृष्णमासीत् ॥

समयमनागम्य नव्यं न व्यतिगम्यं[2]स्यादिति तस्माद्विरम्य च स्थितिरासीत् । तत्र तस्यान्तर्विचारं तावत्प्रचारयामः ॥

तासां मम च परस्पर,तृष्णान्तर्दाहिनी यदपि ।
तदपि न रुच्या[3]शमयितु-
मधुनापि ह्रीः परावुद्धिः ॥

तथा हि ।—

लोकाल्लज्जां सुष्ठु सज्जन्पुराहं
कंसध्वंसं व्याजमाचर्य्य यातः ।
आयातश्च प्राणमासां विभर्त्तुं
नाद्याप्यन्तः सा तु मां हा ! जहाति ॥

(१) श्रीकृष्णः पक्षे चन्द्रः ।　　(२) परस्परमिलनं ।
(३) रुचियोग्यया ।

वृत्तं[१] कुरुक्षेत्रगतं पुरा य-
त्तप्ते कटाहे जलविन्दुतुल्यं ।
आसीत्त[२]दन्वेषिजनेन शून्यं
व्रजे तु तत्तद्विपरीतमेव ॥

ततः कतिचित्कालगतीः प्रतिपालयन्नुदासीन-वदासीनः स्यां । तदेतत्क्षणं विचारयन् भाव्यन्य-द्विचारयामास ।।

हन्त ! हन्त ! किमुदासीनतया वा प्रत्यासीदतु। यस्मादाजन्मविहारसारनिजागारपरिहारमाचर्य्य चिरविरचितायामपि तस्यां[३] तासामुन्मादमासाद-यन्तीनां मद्भावः प्रत्युत सर्व्वप्रत्यक्षतामापन्नः ।

यथा च तद्विदमिदं जगदेव त्रिददस्ति । तत्र मम यदुस्थाने प्रस्थाने "निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धवान्धवा" इति ताः प्रोच्य "विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द! दामोदर ! माधवे" तीति । तथा "ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिका" इति प्रोच्य मया परम-साधोरुद्धवस्य प्रस्थापने ।

---

(१) चरित्रं । (२) वृत्त । (३) उदासीनतायां ।

"कृष्णादूते व्रजायाते उद्धवे त्यक्तलौकिका" इति। "गायन्त्यः प्रिय-कर्म्माणि रुदन्त्यश्च गतह्रिय" इति । "काचिन्मधुकरं दृष्ट्वेति च ॥

यत्रोद्धवस्यापि वचनमिदं ।—

"या दुस्त्यजं स्वजनमार्य्य-पथञ्च हित्वे"ति ॥

तथा श्रीरामस्य व्रजागमने । तासामपि वचनमिदं ।—

"मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄरपि ।
यदर्थे जहिम दासार्ह! दुस्त्यजान् स्वजनान् प्रभो"!

॥ इति ॥

अतएव "किमिह वहु षडङ्घ्रे! गायसि त्व"-मित्यादावगृहाणां न इति व्यक्तमेव श्रीराधया प्रोक्तं। तस्माल्लज्जा तु मयि सर्व्वतः सज्जतामगादेवेति तासां परदारता यदि परिहारमापद्येत तर्ह्येव पूर्व्वमपरमपि सर्व्वं समञ्जसमञ्जसा भवति। किन्तु प्रायः कृताभिप्रायमदीयान्तर्य्यामित्वादि-सम्पदि मुन्यादिसंसदि कथारीत्या प्रतीतं तासु मत्परपत्नीत्वं तादृगलौकिकमामकरीत्या(१)निरस्य वैरस्यं प्रत्याख्यायते ॥

(१) गोपीनां तत्पतीनाञ्चेत्यादिमदीयैश्वर्य्यादिरीत्या कर्त्र्या ।

अत्र तु मुन्यादिदुर्ल्लभमद्बन्धुभावाकुले गोकुले लौकिकरीत्या परं[१]प्रत्याख्यातव्यं ॥

तत्र कालप्रतीक्षा तु न तितिक्षां लक्षयति । स एव हि कालस्तासु कालतां कलयेत् । साम्प्रतमपि न किमपि साम्प्रतं लक्ष्यते ॥

यत्र खलु ।—

हा ! हन्त ! हन्त ! वदनान्यतितप्तपद्म-
प्रख्यानिमां विकलयन्ति सदापि तासां ।
तत्रापि कोमलतमं वत ! राधिकाया
वक्त्रं विचिन्त्य मनुवे क्वचनापि नास्मि ॥

तदेव विचारवारां निधेः पारं गन्तुमपारयति गोविन्दे वृन्दा-मधुमङ्गलाभ्यां सङ्गता पौर्णमासी समयामास । समय्य च तस्य रहसि रचितामवस्थां मनसि तु निचितामनवस्थां हृदि विरचय्य तदभिवादननिजाभिवदनयोरनन्तरमन्तर[१] मनुषज्य तदिदं सस्मितमुवाच ।—

अहो ! चिन्तामणेरपि निजार्थिभरणे चिन्ता दृश्यते ॥

---

(१) अवसरं ।

श्रीकृष्ण उवाच ।—

कस्मादिदमकस्माद्वदसि ? ॥

पौर्णमासी उवाच ।—

यस्मादुपलब्धार्थतायामपि तत्रालब्धस्वार्थता दृश्यते ॥

श्रीकृष्ण उवाच ।—रुच्यं चेद्वयक्तमुच्यतां ? ॥

पौर्णमासी उवाच ।—

"रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वन" इति समानप्रसिद्धतायामपि कीदृगस्मिन्नसिद्धता । येन रुक्मिण्यादीरिव न राधादीरङ्गीकरोषि ॥

श्रीकृष्णस्तु सलज्जस्मितमुवाच ।—

गोकुललोककुलन्तु नेदृशमालोकयति ॥

पौर्णमासी सानुतापमुवाच ।—

गोकुल-लोकानां नैष दोषः । किन्तु दैवहताया ममैव । यतो राधादिपितृवर्गाणां कन्यापात्रीकरणाय भवदेकसर्गाणां(१) वसुदेवानुगतगर्गमन्त्रणया किल तत(२)इच्छ्यावितानां भवत्येव तत्पर्य्यवसायनातात्पर्य्यया मया तु मायया कालयापनाय सर्व्वत्र च ब्रजे जागरकल्पस्वप्नकल्पनयाऽन्यत्र

---

(१) निश्चयानां । (२) निश्चयात् ।

विवाहभ्रमं सङ्क्रमय्य(१) तेषां(२) तत्र तत्र निज-निजजामातृभावः सम्भवन्नप्यनुशय(३)विषयतया जनितः ॥

श्रीकृष्ण उवाच ।—

जनित इति चेत्तर्हि दोष एवायातः ॥

पौर्णमासी सहासमुवाच ।—

स्वयं तु न ते स्यदन्यत्र भीष्मकवत् तं भावं साक्षाद्व्यवसाय-विषयं(४) कृतवन्तस्तर्ह्यत्र(५) वा स्वप्नदोषादुत्पन्ने को दोषः ॥

श्रीकृष्ण उवाच ।—

तथापि यथा तथा तासु निर्दूषणमेव दूषणमायातं। तासामन्यत्र पतिताप्रतिभानात् तेषां शय्या-सङ्गतिसन्धानाच्च ॥

पौर्णमासी उवाच ।—

द्वयमपि न वयं मन्यामहे ।

"यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग !
स्त्रीणां स्वधर्म्म इति धर्म्मविदा त्वयोक्तं ।

---

(१) प्रत्याय्य । (२) राधादिपितॄणां ।
(३) ताप । (४) षष्ठीतत्पुरुषः ।
(५) जामातृभावे ।

अस्त्वेव मे तदुपदेशपदे त्वयीशे
प्रेष्ठो भवांस्तनुभृतां किल वन्धुरात्मा" इति भवति[१] तासामेव वचनं भवत्येव पतित्वस्थापनमाचरति। तनुभृन्मात्राणां चेत्प्रेष्ठादिरूपस्तर्ह्यनन्यस्पृशमीदृशं भावविशेषं स्वभावतः परामृशन्तीनामस्मादृशां प्रेष्ठविशेषतया कान्त एव भवानिति भवदनुवृत्तिरेव वृत्तिरिति हि तत्रार्थः[२] ॥

तदेवमेव याः "शुश्रूषन्त्यः पतीन् काश्चित्" त्वां प्रति प्रतस्थिरे तास्त्वन्याः काश्चि"दन्तर्गृहगताः काश्चि"दित्याद्युक्त्या त्वल्लाभानर्हदेहा जातत्वत्स्नेहाः साधकचर्य्यः सम्प्रति तदर्हदेहलाभेन त्वत्परिचर्य्याकर्य्य एव गम्यन्ते ॥

"यत्पत्यपत्यसुहृदा"मित्याद्युक्तवतीरुद्दिश्य प्रयुक्तन्तु ।—

"नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान्
व्रजौकसः"

इति श्रीशुकस्य वचनं रासप्रसङ्गजमपि साङ्गं समयसङ्गमङ्गीकरोति । मायायाः सर्व्वदा सर्व्वशक्ति-

(१) त्वयि । (२) यत्पत्येति वाक्ये ।

त्वेन त्वदेकभक्तित्वेन च त(१)दपरिच्छेदातिरिक्तिं(२) दारशब्देन च तेषां त(३)दविविक्तिं प्रसक्तीकरोति । ये विवाहसमये त्वदवराणां वराणां वञ्चनाय मायया कल्पिताः श्रीराधादिभ्यः परतया विवेक्तु-मशक्याः स्वे स्वे दारास्तानेव स्वपार्श्वस्थान् मन्य-मानाः शय्यायामपि तदाविविक्ततया जानन्त इति ह्यत्रार्थः । अतस्तासां न तत्र तत्र विवाहसम्मतिर्न च तदीयशय्यासङ्गतिरिति ॥

तदेवमेव भवताप्युद्धावितमुद्धवसन्देशे ।—

"मामेव दयितं प्रेष्ठमात्मानं मनसा गता" इति ॥

"वल्लव्यो मे मदात्मिका" इति ॥ ताभिरपि ।—

"अपि वत ! मधुपुर्यामार्यपुत्रोऽधुनास्त" इति ॥

श्रीशुकेनापि रासे ।—"कृष्णवध्व" इति ॥

दुर्व्वाससापि तापन्यां ताभिः कृते प्रश्ने ।—

"स वो हि स्वामी भवती" ति ।

ब्रह्मणापि ब्रह्मसंहितायां ।—

"श्रियः कान्ताः कान्तः परमपुरुष" इति ।

---

(१) गदारान्तरकल्पमायाः ।
(२) आतिशयं । (३) शुकवचनं कर्त्तृ ।

मन्त्रराजयोस्तत्तन्मन्त्रद्रष्टापि गोपीपदानन्तरं जनेत्यस्यान्ते वल्लभायेति ॥

यत्र खलु गौतमीये तन्मन्त्रव्याख्यायां "गोपीति प्रकृतिं विद्या"दित्यादिपद्यद्वयेन पूर्व्वपूर्व्वत्र ब्रह्मत्वेनेश्वरत्वेन च विकल्प कल्पतया निरुक्तस्य तन्नाम्नः पुनरनेकजन्मसिद्धानामित्यादिपद्येन सर्व्वोत्तरपक्षे गोपीनां पतिरेवेति भ्रमान्तरनिवारणकृते सावधारणं व्याख्यापर्य्यवसानं पर्य्याकल्पते ॥

तस्मादमूषा[१]मन्येषां वान्यत्र पत्यादिशब्दप्रयोगश्चान्यथाख्यातिमनुसृत्य केवलप्रकृतिप्रत्यययोगमवलम्बमानं वृत्यन्तरमबलम्बते। पातीति पतिरिति ॥

अतो रासार्थं तासां हर्षेण समाकर्षे "मातरः पितरः पुत्रा भ्रातरः पतयश्च व" इति भवज्जल्पविलासश्च परिहासाय कल्पमानः परोच्छिष्टताश्लिष्टजुगुप्सावशविरसतां नावहति ॥

पुत्राश्च ते यातृम्मन्यानामेव पुत्राः पुत्रतयाति-

(१) श्रीगोपीनां लोकानां।

दिश्यन्ते। यानुद्दिश्य मुनयस्तु "पाययन्त्यः शिशून् पय" इत्येवाहुर्न तु सुतान् स्तनमिति॥

तस्माद्वर्गरचनावञ्चनायात्मना प्रपञ्चितमिदमसञ्चितं[1] वयमेव करिष्यामः॥

यथा गोकुले लोका अपि यथावदालोकेरन्निति॥

अथ मधुमङ्गलः सकष्टमाचष्ट।—

व्रजस्य लोके तव सङ्गतेर्मुदं
गते तथामूर्म्मलिनत्वमागताः।
यथासि ते तण्डुलमण्डले ययु-
र्निष्कास्यदुर्व्वीजकणावलेस्तुलां॥

वृन्दोवाच।—

अकस्मात्त्वल्लाभाद्व्रजजनवदुत्फुल्लतनुतां
गतास्ते[2] प्रेयस्यः स्फुटमिति कथा सा न वितथा।
तवौदास्ये किन्तु प्रययुरधुनाम्लानिमतुला-
ममूः श्रीराधा तु प्रवलयति धूमं निजतनोः॥

पौर्णमासी उवाच।—

शृणु सङ्क्षेपतः सम्प्रत्यौदास्ये तव केशव!।
यदा वाष्पायते राधा-धूमायन्ते तदादिशः॥

---

(१) विघट्टितं। (२) तव।

आश्रयाशत्वविख्यातिर्विहः सर्व्वत्र लभ्यते ।
प्रेम्णश्च तव गोविन्द ! सा चेन्निन्दामवाप्स्यसि ॥

अथ स च गोकुलकुलजरमाजनभागः[१] पतत्-परागसमागतरागनिजभालाविभागमार्ज्जनव्याजा-दुकूलाञ्चलसम्वलनया निजार्त्तिजलमपसारयन् व्याजहार । यथा भद्रं भवति तथा तद्व्रजितं क्रियतामिति ॥

तदनु च वृन्दा-मधुमङ्गलाभ्यां पूर्णपरिसरा पूर्णिमा तदभिप्रायं सुज्ञाय सुखविहाराय च तमनुज्ञाय समानवासनया क्वचन च निर्ज्जने कृतसम्वासानां तासां सकाशमयामास ॥

ततश्च ।—

गोकुले तासां मण्डलीं ज्योतिर्मण्डले लब्धोपराग-चन्द्रमण्डलीमिव सुस्निग्धतादिग्धगहने वात्या-व्यत्यासितलतापङ्क्तिमिव काव्यमीमांसाशास्त्रा-विज्ञविज्ञ-सदसि सत्कवितामिव विलसदन्यपुमर्थ-साधनसाधुवर्गे भगवदनन्यकामनामयभक्तिमिव म्लानिं गच्छन्तीं वीक्ष्यानच्छहृदयतां गच्छति स्म ॥

---

(१) भाग्यरूपः ।

गत्वा च शुभाशिषा विषादमपनयन्ती तदिदं तावद्वदति स्म ।—

सरसीभवन्तु ते ते, घनरसपूर्णे महागुणे सरसि ।
मलिनीभवतितराञ्चे,न्नलिनीजातिस्तदालिनीनां किं[१] ॥

तदेवमाकर्ण्य च भूमिं निर्व्वर्ण्य वैवर्ण्य[२]मत्य-जन्तीषु वैवर्ण्यमेव च भजन्तीषु तासु कापि तासां सखी सगद्गदं गदति स्म ।—

नलिनीजातिः कथमिव,
नलिनी भविता न सा सरःस्थापि ।
वृश्चिकराशिगत[३]श्चे,-
न्न रविश्छविमादिव[४] तनुते ॥

पौर्णमासी उवाच ।—रवेर्नायमनयः ॥
किन्तु समयगतेरेव ॥

सोवाच ।—

योगचर्य्यावर्य्याया भवत्याश्चर्य्याय किमपि ।
तस्मादस्माकमिव तासां समयस्य गतिरस्मान् विस्मापयते ॥

---

(१) तेषु तेषु पूर्णेषु पदार्थेषु । (२) अन्तरराहित्यं ।
(३) श्लेषे तु असतां समूहगतः । (४) मेषराशिगतवत् ।

पौर्णमासी सास्रमुवाच ।—

न भवेदद्यादितः[1]काचिदवद्या तस्य[2]गतिः । यदयं सकलसुखदायकः श्रीलगोकुल[3]कुलनायकः पुनरपि गोकुलमवलम्बते स्म ॥

सम्प्रति चानन्दघन[4]समयं लभमानः सहस्र-गुणममृत[5]मपि वर्षिष्यति न तु स्नेहाशव-[6]दात्माश्रयवर्त्ति[7]गणं घर्षितं करिष्यति। परन्तु पर-माभीलनिलीनानां भवदालीनां समीहितं कर्ण-निहितं कर्त्तुमिच्छामः ।

अथ सा सखी पुनरुत्कराठायुक्ताप्यश्रुकण्ठतया क्षणकतिपयं कुण्ठायते स्म ॥

तदनन्तरन्तु सर्व्वासां समयलेखपत्रं तस्याहृग-मत्रं करोति स्म ॥

यथा ।—

व्रजे वयं द्विधा वृन्दा वृन्दावनगता मताः ।
एकाः कन्यागणो गण्यागण्यानास्मिंश्च काश्चन ॥
द्वितीयानामियं सम्वित् सम्वित्सद्मानि धीयतां ।
जगत्यस्मिन्नसर्व्वज्ञैः सर्व्वज्ञैरपि सर्व्वशः ॥

(१) अद्यप्रभृति । (२) समयस्य
(३) श्लेषे रश्मि । (४) श्लेषे मेघ । (५) श्लेषे ।
(६) दीपवत् । (७) श्लेषे वर्त्तिका ।

यथाख्यातिर्गवां पत्युः पत्युस्तद्वद्गृहस्य नः ।
वाङ्मात्रेण धवत्वं स्याद्धवत्वं स्याद्द्रुमेष्वपि ॥
यदि कृष्णात् परं कान्तं[1] कान्तं[2] वेच्छाम गोचरं ॥
स्वसात्कुर्य्यात् कृष्णवर्त्मा[3] कृष्णावर्त्मान्यथा-स्मकान् ॥
एवं विशाम सङ्कल्पं[4]सङ्कल्पं ज्वलने वयं ।
येन लज्जामतिक्रम्य मतिक्रम्यं[5]लभेमहि ॥
इतः किमन्यत्कान्तस्य कान्तस्य च मुदं वहेत् ।
यस्य सा ह्रीरभूदस्मदस्मदन्तर्विमर्द्दिनी ॥
यदि तस्य गता लज्जा ता तस्य च कुलस्य च ।
प्रवेक्ष्यामः पुनर्वह्नावह्नायाकाङ्क्षितातये ॥
अथ सम्वित्कुमारीणामारीणा[6]श्रुभृतामियं ।
तं विना न नवाऽश्वासान् नवा[7]श्वासान् भजेमहि ॥ इति ॥

तदेवं सुवचनामत्रिकायां पात्रिकायां वाच्यमानायां सभायामपि वाष्पेण पाच्यमानायां पौर्णमासी सानुशयं स्वाशयमौर्णावीत् ॥

---

(१) पतिं । (२) वाञ्छितं ।
(३) श्रीकृष्णपदवी । (४) व्याकुल । (५) बुद्धिगम्यं ।
(६) आरीणाः सर्वतः स्रुतः । (७) नूतन ।

प्रत्युत तासां साक्षाद्वचसः स्वकर्णयोरचनाय भावपरीक्षासूचनाय च विरुद्धरचनमिव वचनमिदं प्रचारयामास ॥

अयि ! विपश्चितः ! काश्चिदेवं निश्चिन्वन्ति । ताः खलु रमणे रामावरजे प्रेममात्रं क्षेममात्रं क्षेमपात्रतया मन्यन्ते । रमणे प्रेमा च रामाणां निरोधमयाभ्यां लज्जाभयाभ्यां सज्जां गतां सज्जति ॥

तर्हि ता अपि यन्निरोधनाम्नाऽभिहितान्निजहितादुद्विजमानाः परदारतां निवारयितुं लिप्सन्ते तन्न युक्तमिति ॥

तदेतन्निशम्य क्षणं विरम्य च सवैवर्ण्यमितस्ततो निर्व्वर्ण्य तास्तदिदं स्वयं वर्ण्यमाचरन्ति स्म ॥

तासामेव तन्निरोधः समुद्बोधमाप्नोतु । न पुनरन्यासां । अन्यास्तु तदिदं वोढुमप्यधन्या भवन्ति । तत्प्रेमनामा भावस्तल्लाभनिरोधस्यानुरोधमयः स्यादिति(१) ॥

किन्तु "यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि

---

(१) वोढुं ।

तस्याङ्घ्रियुगं नवं नव"मित्येव वोढुमुद्युक्ता भवन्ति ।

तदेवं वर्णयित्वा लुप्तवर्णपदं रुदतीषु सुदतीषु बाष्पपूर्णा पौर्णमासी तदिदं चिन्तयामास ॥

हरेर्नित्याः कान्ता इति न हि विदुर्ये व्रजरमा(१)
मतं तेषां तासां तदुपपतिताप्युक्तमफलं ।
विदुर्येता नित्याः परमहह ! तेषां पुनरसा-
वभूषु स्याद्वालिः कथमनुगलोकं सुखयतु ॥

तस्मान्नाहमासामवरपतीत्वदुष्कीर्तिरक्षणार्थमेतन्मतमाक्रुक्षं(२) ॥

किन्तु कुक्षिगतं भावमेवामूषां निरकुक्षं(३) । वस्तुतस्तु । पतित्वस्यासम्भव एव किल सम्भवति भाववतीनां तस्यौपपत्येनापि भजनं ॥

सम्भवेऽपि त(४)दनङ्गीकृत्य कथं त(५)दभ्युपगन्तव्यं । स्वयमेव चाभिरुद्धवे श्रृणवति जारतातिरस्कृता । "निःस्वं त्यजन्ति गणिका जारा भुक्त्वा रतां स्त्रिय"मित्यनेन ॥

---

(१) हरेः कान्ता इत्यन्वयः । (२) आक्रोशं कृतवती ।
(३) निष्कासितवती । कुक्षनिष्कोषणं । (४) पतित्वं ।
(५) औपपत्यं ।

अथ पुनः साशीर्वचनमुवाच ।—

हे राधे ! हन्त ! चन्द्रावलि ! वत ! ललिते !

हे विशाखे ! ऽङ्ग ! भद्रे !

भोः श्यामे ! पश्य पद्मे ! कलय शिविसुते[१] !

किञ्च शृण्वन्तु सर्व्वाः ।

युष्मच्चिन्तामणीन्द्रः स खलु हरिमणिः

कामितं वः सुपूर्णं

तूर्णं कर्त्तास्मदाद्यास्त्विह[२] परिचरण-

ब्राह्मणादिप्रकाराः ॥

अथ वृन्दाप्युवाच ।—

वृन्दावनं भवद्वृन्दावनमेतद्द्वयं हरिः ।

न हास्यतीति जीवामि यन्न हास्यति[३]गीरसौ ॥

अथ मधुमङ्गलश्चाललाप ।—

अस्मि च मधुमङ्गलकः,

पुनरपि मधु[४]मङ्गलत्वमापत्स्ये ।

अधिमधु ऋतु वः पाणौ,-

कृत्य स पाणौ[५] करिष्यते कृष्णः ॥

तदेवं तासामवाधाय समाधाय तां गच्छन्तीमनु

---

(१) शैव्ये । (२) चिन्ताभयौ ।

(३) हास्यवशाचरति । (४) चैत्र । (५) परिणीय ।

व्रजन्ती नित्यं सखितामात्रसुखिनी काचन सखी-श्रेणी तया[१] रहस्यमन्वयोजि[२] । सभायां खलु विषमभावानां प्रसादलाभहेतोरपि नावभासयन्ति गम्भीरस्वभावाः स्वमतं ॥

तस्मान्निःशलाकतावलादिदमालयामि । नापल-पत स्वमतमिति । तास्तु सगद्गदं जगदुः ।—

यथा सीतादेव्या दशमुखकृतार्त्तिर्विपदभू-
यथा वा रुक्मिण्या विवहनविधिश्छेदिपकृते ।
तथा राधादीनां परगृहगतिर्या वत ! विपत्
कथं तस्या नित्या स्थितिरभिमता हन्त ! सुहृदां ॥

पूर्णिमा स्वगतमाह ।—सत्यं सत्यं ? ।

यतः ।—

शशभृतिराहोश्छाया,
चिराय नेति[३] व्यनक्ति कुतुकञ्च ।
नित्यावस्थिति लाञ्छन,-
मखिलस्वान्तं विरञ्जयति[४] ॥

स्पष्टन्तु तदिदमाह ।—

परगृहिणीतया तासां परनिगृहीतत्वे सत्येव

(१) पूर्णिमया ।　　　(२) पृष्टा ।
(३) हेतोः ।　　　(४) विरक्तं करोति ।

भवतीनां साहाय्यसुखमतिशाय्यस्तीति तत्कथं परित्यज्यते तास्तु मलिनलपननलिनमालपन्ति स्म ॥

भगवत्यवधीयतां ?

ताः खलु दैवतस्तावन्निजप्राणवल्लभस्य वल्लभत्वे- नालाभाल्लुब्धमहादुःखास्तत्र च स्वस्यान्यहस्त- पतिततया जुगुप्सितं मन्यता शुष्कास्तत्र च प्रिया- प्रियविप्रकर्षसन्निकर्षाभ्यां लब्धमनोधर्षास्तत्र च निरन्तरशङ्कमानैः पतिम्मन्यादिभिर्मङ्क्षुर्मङ्क्षु- कृतनिवारणभर्त्सनादिनिकर्षा(१)स्ततस्तत एव "दुःसहप्रेष्ठविरहतीव्रतापे"ति प्रसिद्धतादृगवस्थाभ्यो ऽपि महानुरागतः पीडनाद्दहलदहनाकारकारागार- वसतिं मन्यतया निगीर्णसर्व्वत्तणां क्षणमपि कल्पं मन्वानाः सम्प्रति तदीयमहाविरहसमयं विरहय्य चात्मनस्तदुपेक्षतामुत्प्रेक्ष्य लज्जामात्रपर्य्यवसानता- मासज्य च धिक्कृतम्मन्यादशमीमपि दशां तत्वानाः किं वहुना ? वहिरन्तःसुकुमारतायामपि कौमारत एव व्याघानुविद्धस्निग्धकाननप्रत्यासन्त्यपरित्यागि-

---

(१) समूहाः ।

मृगीवत् प्रखरदरापारपरपारवश्यलब्धविचित्र-दुर्गतिसम्प्लुततया पश्यतां शृण्वतामपि हृदयं धुन्वानारसोऽयमिति मन्यमानेन निष्करुण-कौतुकेन केनचि[१] द्देवोपेक्षितुं शक्यन्ते न पुन-रन्येनेति काली[२] कालीव[३] कल्पान्तायकल्पता ॥

अथ भगवतीरोदनसम्पत्कम्पसम्पातपातजात-मूर्च्छा[४] रासां मूर्च्छारालिङ्गनामृतसङ्गाद्विगतजूर्त्ती[५] र्विधाय शुभाशिषा वाञ्छितमहसि निधाय तदीय-स्वसखी सन्निधानगमनाय सम्विधाय निजपर्ण-शालामागतवती। वृन्दा च निजवनं। मधुमङ्गलस्तु सर्व्वमिदं मङ्गलवृत्तं श्रीमति व्रजमङ्गले प्रसङ्गसाङ्गं चकार ॥

पुनश्च पूर्णिमा सखीद्वारा स्वहृदयं परीक्षमाणाया राधाया बाधातिशयं निशम्य रम्यमिदं सन्देशपत्रं तस्याः सदेशं प्रेषयामास ।

यथा ।—

नाम[६] श्रीमतिराधिका तव पिता

भानुः प्रसूः कीर्त्तिदा

(१) असूयत्वात् कृष्णेनेति नाम न प्रकटीकृतं ।
(२) का सखी । (३) दुर्गेव । (४) मुर्च्छाः ।
(५) पीडाः । (६) अभिधा ।

श्वश्रूर्नन्दवधूः सखी च ललिता
शार्द्धं विशाखादिभिः ।
आरामः किल कृष्णकाननततिः
कान्तः स कृष्णः सदा
नाहं किञ्चिदवेदिषं तदपरं
नो वेद्मि वेत्स्यामि न ॥

तदेवमेकान्तभक्तानामेकेषां तव कान्तं प्रति प्रार्थना च नितान्तं विश्रान्ततामाप्स्यति ॥

गोपेशौ पितरौ तवाचलधर ! श्रीराधिका प्रेयसी
श्रीदामा सुवलादयश्च सुहृदो नीलाम्वरः पूर्व्वजः ।
वेणुर्वाद्यमलङ्कृतिः शिखिदलं नन्दीश्वरो मन्दिरं
वृन्दाटव्यपि निष्कुटः परमितो
जानामि नान्यत्प्रभो ! ॥ इति ॥

अथ कथकः समापनमाह ।—

प्रस्ताव्यान्तरन्तु प्रातः प्रस्तोष्यामः ।

यस्मादेव भवन्तौ तौ सम्भवन्तौ मिथोऽप्यमू ।
सर्व्वानस्मानखर्व्वेण गर्व्वेणा धिनुतः सदा ॥

इति स्निग्धकण्ठसमापनकण्ठसूक्तानिदिग्धता-स्निग्धाः सर्व्व एव यथायथं वासमासन्नाः ॥

श्रीराधा-माधवौ च सस्पृहं विलासगृहं जगृहतुः ॥

इति श्रीमदुत्तरगोपालचम्पूमनु श्रीराधादि-
वाधासमाधानमेकत्रिंशं
पूरणम् ।

द्वात्रिंशं पूरणम् ।

अथ व्रजयुवराजविराजमानव्रजराज-सभाया-मन्येद्युश्च सर्व्वसुखधन्ये मधुकण्ठ उवाच ।—

तदेवं व्रजस्य व्रजमङ्गलस्य[१]च शर्म्माभिमानेषु शश्वदुल्लासभासमानतासमानेषु[२] निरन्तरतरत-मतारहित[३] हरिहितसङ्गानेषु चित्रवादित्रनर्त्तन-प्रधानेषु[४]विचित्रसमित्र[५]कंसामित्रकेलिवितानेषु च तत्र तत्र सम[६] मत्र सत्र[७] स सुखसत्रनिदानेषु प्रतिरात्रिन्दिवमभिन्नवत्त[८]त्रूविन्दमानमासीत् ॥

तत्र च सति सरथः सारथिर्यथावदेवावस्थित इति व्रजपतिप्रभृतीनां मनः सन्दिग्धतादिग्धं बभूव ॥

---

(१) श्रीकृष्णस्य । (२) एकरूपेषु । (३) एकरीति ।
(४) प्रचुरेषु । (५) ससख । (६) युगपत् ।
(७) स्थावरजङ्गम ।
(८) अभिमान-गान-केलि-वितानमिति त्रयं ।

अत्र तु सति परमतिमतिमान्[१] श्रीमाञ्जनन्द-कुलनन्दनः क्वचिदानन्दकथायां सविनयेन नयेन कारिताभिमुख्यान् पितृमुख्यान् पप्रच्छ ।—

हन्त ! कथमद्यापि वः परितोषस्य केनचिन्मोष इव दृश्यते ॥

अथ सर्व्वे रूक्षस्निग्धताञ्चितं हसन्तः शंसन्ति स्म ।—

अस्मत्परितोषस्य मूलं परमानुकूलः स भवानेव । ततः किं तस्य पर्य्यनुयोगचर्य्यया ? ॥

अथ श्रीमान् व्रजचिन्तामणिस्तामिमां चेतसि चिन्तामाचचार ॥

नामी तावन्मम काञ्चिदन्य[२]चिन्ततां चिन्तीं कुर्व्वीरन् । किन्तु रथस्थितिमेव मत्प्रस्थितिकारण-मवधारयेरन्निति ॥

स्पष्टं चाचष्ट ।—

भवन्मनोरथविशेषश्लेषार्थमेव सोऽयं रथः स्वीकृत-पथतां न प्रथयति ॥

तत्र कथमिव निजचिन्तामन्यथयथ ॥

---

(१) परिशुद्धिकः ।　　(२) प्रेयस्याभिप्रायेण ।

यतः ।—

हित्वा वः परिदेवनापरिवृतान् कंसं निहन्तुं गत-
स्तत्रानेकतदेकचर्य्यदनुजध्वंसाय लब्धग्रहः ।
तस्मिन्नात्मबलोद्भवा[१]विवचनान्निर्व्यूढयुष्मद्बल-
त्प्राणः सोऽहमिहागतोऽपि भवत-
स्तप्तोऽस्मि हा ! किं पुनः ॥

अथ तदेवमाकर्ण्य व्रजराज-मुखं निर्व्वर्ण्य सर्व्वेऽपि तं निवेदयामासुः ॥

तर्हि द्वारकावदागारमत्र यदि स्यात्तदा तदस्माकं सुखसत्रं भवति । तस्मादन्यथा स्थितिस्तु भवतः स्फुटमस्माकं व्यथां जनयिष्यतीति ॥

तदेवमाकर्ण्य भूमिं निर्व्वर्ण्य स तु मनसि विचारमाचचार ॥

आगारपदमेते दारपर्य्यवसानतां गमयन्ति । नास्मन्मनः सारन्तु जानन्ति ॥

तस्मादात्मसहायपौर्णमास्यादिसाहायकं[२] सञ्चारयितुमाचरितमञ्चितानुसारं कृतयमुनाविदारं भ्रातृ[३]सारमत्राकारयितास्मि । मदीयमातुः प्रिय-

---

(१) आत्मा च बलोद्भवौ च । (२) समूहं ।
(३) बलदेवं ।

यातरं तन्मातरमपि । यस्मादेव चात्मनि पूर्व्ववद्-पूर्व्वव्रजवाससुखानि साधयिष्म इति ॥

स्पष्टं च व्याचष्ट ।—

तर्हि भ्रातरं तन्मातरमपि व्रजमेवाव्राजयिष्याम इति ॥

सर्व्वेऽप्यूचुः ।—

तर्हि सर्व्वदाराकाशर्व्वरीपर्व्व(१)शर्व्वरीनाथाद्दरयत(२)श्चकोरवारस्य तस्मादपारदशारदसम्भारसारस्यापि लाभः समजनि ॥

अथ कंसारिर्दारुकं प्रति रहसि चारु निदिदेश भोः सूत ! मदीयस्नानीयदानीयद्रव्यविशेषानयनाय प्रभूतजवप्रथेन रथेन द्वारकां प्रस्थाय दन्तवक्रादिवधमभिधाय ममात्र तु भूतभविष्यत्कालप्रभूततामात्रं तत्र व्यक्तमविधाय मातृमिश्राः श्रीमदार्य्यमिश्राः समानीयन्तामुद्धवश्च तेषामनुषङ्गितया विधीयतां ॥

किन्तु तेषु रहस्येवं निवेदयितव्यं यथात्र व्रजासक्ततया प्रतीतस्य मम शीघ्रविनिवर्त्तनमेव लक्ष्यमनुवर्त्तत इति । पुनश्चादिदेश ।—

(१) कर्म्मभूतं ।   (२) याचमानस्य ।

श्रीमदग्रजेन व्रजान्नीते ते शुक-शारिके चानेष्ये इति ॥

अथ व्रजात्प्रचलितवान् स दारुकः
समागतः सपदि कुशस्थलादपि ।
वलादिकत्रयमिह यत्र साक्षितां
नयंस्तदानयदिति चित्रमादधे ॥

हरेर्व्वाचा ज्ञात्वा पथि कृतगतिर्धेनुक-रिपो-
रुपव्रज्यां चक्रे व्रजजनिजनः प्रागिव हरेः[१] ।
तथाप्यस्मि[२]न्नेकं समधिकमभूत्प्रस्फुटतरं
यदन्तर्वभ्राजे स्वयमपि हरिस्तद्गणागतः ॥

व्रजाधीशं रामः ससुतममिलद्यर्हि सगणां
व्रजाधीशां रोहिण्यपि पशुपरामावलयितां ।
तदा सर्व्वं गोष्ठं प्रमदभरपुष्टं तदभव-
द्यथा दिव्यैर्लोकैर्द्विगुणमिदमित्येव ददृशे ॥

नीराजनादिकं तर्हि रामस्याकारि पूर्व्ववत् ।
कृष्णाद्वैततयाऽलोकि तथापि यदपूर्व्ववत् ॥

अथात्र स्निग्धकण्ठः सहासमाह स्म ।—

पुत्रीं पुत्रं चापजह्रू व्रजेश-
स्यात्मार्थं यः शूरपुत्रश्छलेन ।

(१) हरेरिव प्राक् । (२) उपव्रजने ।

त[१]त्पुत्रेण ह्रीभवन् पुत्र एष
स्वीयं तातं पश्य शश्वत्पिपर्त्ति ॥इति॥

अथ मधुकण्ठ उवाच ।—तदारभ्य च ॥

आस्तां रामस्य सा वार्त्ता तां पश्यन्नुद्धवस्य च ।
गोपालसमताचित्रां दारुकश्चित्रतां ययौ ॥

उवाच च दारुकः स्वबुद्धमिदं रहस्तमुद्धवं । मयायं मायामयवल्लजजन्मनां कृतप्रचारपद्व्यवहारव्यवहारः[२]पथि भवत्सु भवत्सुप्रतीत-[३]मतीत इति न प्रथितश्चक्रे । त[४]एत एव त-[५]मेतं गोचरयितार[६]इति चिन्तयाञ्चक्रे च ॥

तत्र[७]तु भवन्तोऽपि तन्मायया तद्रूपीभवन्तो दृश्यन्ते ॥

तस्मादतीव चित्रायमाणं मां कथञ्चित् त्राप-माणः स भवान् भवतादिति ॥

उद्धव उवाच ।—

मुग्धधी[८]रपि भवान्मुग्धतामदुग्ध । यः स्वप्रभोः

---

(१) वसुदेव ।
(२) कृतं प्रसिद्धपदवीनां विघट्टनं येन तादृशव्यवहारः
(३) भावे निष्ठा । (४) बलदेवादयः (५) व्यवहारं ।
(६) ज्ञापयिष्यन्ति । (७) व्यवहारे । (८) दृश्यधीः ।

सर्व्वेष्वदक्षिणास्थरथकुटुम्बीति संज्ञात्रयमयः स भवान्नाद्यापि तदिदं विदन्नस्ति। व्रजवास्तव्या वा स्तव्याः कस्य न स्युः। येषां पादरजः सज-नाथ विधिरप्यात्मनः सुविधिमभ्यर्थयत इति ॥

अथ प्रकृतमनुसरामः। ततः सर्व्वसुखजनन्यां तस्यां रजन्यां मुहुर्मुहुरपि ॥

अन्तर्वहिर्द्रववशाद्वपुषी[1] मिथस्त-
द्धाश्लेषशर्म्मणि विशन्निभयो[2]र्जनन्योः।
रामाजितावनुशयादिव[3] हार्द्द[4] वाचा
स्वत्रा[5]वधानरचनौ वियुतिं व्यधत्तां ॥

तदेवं तस्यां रात्रावतिमात्रानन्दगात्रायां तत्प्रभृति च प्रातः प्रातरनुसृत्य श्रीराममाहृत्य तेन सह सहतातं श्रीरामसहजातं परावृत्य पितृव्यमुखा-हृत्य गोपाः क्रमान्निमन्त्रयामासुः। रोहिणीमपि व्रजमहीपतिपत्नीसहितां। यत्र सर्व्व एव व्रजः परस्परनिमन्त्रिततयासीदित्यतिशयितुमसमर्थतया लज्जायन्त्रित एवाजनिष्ट ॥

---

(१) विशोः कर्म्मभूते। (२) विशस्तुल्ययोः।
(३) तापदिव। (४) प्रेम।
(५) स्वस्मिन्।

अथ निमन्त्रणायामतूर्णा पूर्णायां पुनः सर्व्वान् महापर्व्वणा स्वयं श्रीव्रजयुवराजः सभाजयामास ॥

यत्र कंसवधादधस्ताद्व्रजेश्वरादीनां व्रजप्रस्थापने यद्वेणुशृङ्गादिकं स्वप्रतिनिधिभावाय सह रामेण स्वयं स्तोककृष्णसुबलयोरर्पितवान् तेन(१) तावन्यै(२)श्च धन्यैरगण्यैर्निजालङ्कारैरलङ्कृतवान् परैरपरानपि सखीनिति । किं बहुना ? सन्देशहरानपि तानाचरितगतागतिचरानानाय्य तत्तन्न्याय्य वस्तुभिः स्तुतिभिश्च पुरश्चकारेति सर्व्वसुखं वर्व्वर्त्ति स्म ॥

स्वयन्तु प्राचीनबहुविधतत्तन्निजस्पृहितं वेणवादिकं जनन्या गृहसङ्गृहीतं गृहीत्वा गृहीत्वा सखिभिः सह सहरामं विहरति स्म ॥

अथ प्रकृतमेव सेवध्वं । श्रीरामः समागत्य द्वितीयं दिनं सङ्गत्य श्रीहरेः प्रेम्णावगुण्ठिताः काश्चन विस्फुटहृदयताकृदुत्कण्ठाः स्फुटमुद्भवद्धारा शुभाशीर्भिः सान्त्वनगीर्भिश्च मङ्क्षु सन्धुक्षयामास ॥

---

(१) वेणुशृङ्गादिना । (२) स्तोककृष्णसुबलौ ।

तदेतच्च शुकशारिकायुग्मं मद्द्वारा प्रहितं श्रीमन्मदनुजेन च परमहिततया निजनिकटे निहितं सम्प्रति च मादृगिव व्रज एवानीतं तदीयसत्यसङ्कल्पताजल्पनजल्पमयं पद्यं स्वयं भवतीभिरध्यापनीयमिति वाचिकञ्च प्रस्थापयामास ॥

तत्र च द्वित्राहोरात्रानन्तरमुद्धवेन सत्रारहसि रोहिणी-रामाभ्यां पूर्णिमाभ्यासः सादरमभ्यासेदे। यत्र वृन्दा-मधुमङ्गलसङ्गलग्ना पूर्णिमा तान् सङ्गमितमङ्गलतया पूर्णितमनसः सन्धाय प्रस्तावपरम्परयात्रकीयाय श्रीकृष्णविवाहाय श्रीव्रजराजसमीहितं तत्कर्णाभ्यर्णमाचचार ॥

यत् खलु मधुमङ्गलात् कर्णयोः सङ्गतवती ।

तत्र कन्याश्वाङ्गीकृतस्वनिर्णयाभ्यां लब्धवर्णाभ्यां रामोद्धवाभ्यां रोहिणीकर्णपथमारोहयामास । तदिदमव्याजं व्याजहार च ॥

जाते तु व्रजप्रजापतेः पुरतस्तदेतत्प्रस्तावजाते मन्मतमेव स्वेन सम्मतमिति वक्तव्यं न तु स्वयं किमपि व्यक्तव्यमिति ॥

तदेवं पौर्णमास्या सहैकमत्येन सातत्येनानन्दारामाव्रजधामागता रामादयः श्रीव्रजपतितत्पत्नीभ्यां

तदर्थमनुयुक्तास्तदुक्तामेव रीतिं प्रयुक्तां निर्म्ममिरे ॥ ततश्च व्रजपतिजम्पती तदभ्यासमेवाभ्याजग्मतुः । तदनु च तदनु नयादिकं विधाय तदनुज्ञया सन्निधाय च तदिदं निवेदयामासतुः ॥

तपः प्रभाववत्या भवत्याः प्रसादादपत्यस्य प्रत्यागमनं प्रत्यासन्नं । अनन्तरं तु निजान्तरस्य दुरन्तलषितान्तर(१)माख्यातुं लज्जा सज्जावः । यदधुना तस्य वधूसम्पत्तये च प्रयतते चेतोवृत्तिः ॥

पौर्णमासी सानन्दमुवाच ।—

श्रोतृवक्त्रोरैकमत्यं यदि स्याद्दैवयोगतः ।
तदालिप्सितभावानां सिद्धिः शकुनविन्मतः ॥ इति ॥

शकुनशास्त्रानुसारेण लब्धमनोरथपारेण मनसा पृच्छामः ॥

भवतोरत्र कुत्र गोपगोत्रजायां मनोरथः प्रथते तत्कथ्यतां ॥

अथ व्रजराज्ञी विज्ञापयामास ।—

काश्चिद्धन्याप्रभृतयः कात्यायन्याराधनधन्याः

---

(१) अपारवाञ्छितान्तरं ।

कन्यास्तस्मिन्नेव स्वन्यासात् कन्यात्वं रक्षितवत्यः सन्तीति ताः प्रत्यधिकमिति ॥

पौर्णमासी उवाच ।—

कथमसाधारणा राधादयस्तासां साधारणा अपि न क्रियन्ते ॥

तावूचतुः ।—

हन्त ! ता भवदन्तरमागताश्चेत्परमशन्तमा एव भवेयुरिति कथन्तरां नोररीक्रियन्तां ॥

किन्त्वमूः कतमाः ॥ पौर्णमासी उवाच ।—

धन्यानां वृषभान्वादीनां कन्या एव ॥

तावूचतुः ।—सुध्यादिगुरो ! तदिदं न बुध्यामहे ॥

पौर्णमासी सहासमुवाच ।—

ताश्च कन्या एव न पुनरन्यादृशाः ॥

व्रजराज उवाच ।—कथमिव ? ॥

पौर्णमासी उवाच ।—

यदा किल वसुदेवमन्त्रणैकसर्गतया गर्गस्तासां वर्गमन्यत्र प्रादेशयितुं(१) तत्पितॄनुपादिदेश ॥

तदा भवदादिमनोरथविज्ञया मया प्रेरितया

सर्व्वत्र व्याप्नुवतः स्वप्नस्य सम्पादकव्यवसायया मायया तासामन्यत्र विवाहभानं निर्व्वाहितं ।

तत्पतिम्मन्यानामन्यायादिप्रवृत्तिमनु च मायावृत्तिरूपास्तासां स्वरूपाश्च मध्ये मध्ये परानिध्येयतया[१] निर्व्वाहिता इति ॥

तस्मात् ।—

कौमारः सन्नाजितः, कौमारीभिः समं गोष्ठे ।
द्वन्द्वीभावं गच्छन्, निर्द्वन्द्वीभावमागन्ता ॥

अथ तौ तदेतन्निशम्य तम्यन्ते[२] नलिनवदमलिनमुखसुषमसुखसमाधिसाधीयांसौ तूष्णीकतयापि तां[३] पुष्णीतः स्म ॥

यतः ।—

हेमन्तामरदीर्घिकाविसरवन्कल्पद्रुवन्यस्थली
च्छायावद्धरिचन्दनस्वरसवच्छुभ्रांशुनिर्य्यासवत् ।
राधादीयकुमारतानपगमं व्यञ्जद्वचस्तन्मुनेः
सद्यः स्पृश्यतयाभिमृश्य जहतुस्तापं व्रजाधीश्वरौ ॥

अथ क्षणं विरम्य सगद्गदं जगदतुः । वत्स किं तदिदं तद्वत्समाधिगच्छति ॥

---

(१) परादृश्यतया ।
(२) रात्र्यन्ते । (३) पौर्णमासीं ।

पौर्णमासी उवाच ।—अथ किं ?

किन्तु मदाद्युपदेशाज्ज्ञात्वापि लज्जां सज्जंस्तत्र न सज्जते ॥

व्रजराज्ञी प्राह स्म ।—

राधिकादिकानामपि का वार्त्ता ? ॥

पौर्णमासी उवाच ।—

ताश्च तथा स्वयमेव माम्प्रति सम्प्रति चाविश्वकुः ।

यथा ।—

लब्धेऽप्यनूप[1]वासे,
　　वत ! चातकजातयश्चिरं परितः ।
केवलवारिधरामृत-
　　तृष्णाज्वालासु जुह्वति प्राणान् ॥इति॥

तदेवं सति यादृत्तदलाभमेव तासां तदाशया घूर्णमाणानामप्युपायमजानानां तत्प्रतिकूलवासपाशयन्त्रणासहनं सम्भवति न तु तल्लाभेऽपि तदङ्गीकरणं ॥

तथा हि ।—

तमस्यन्धे भ्रान्ता भयदघनघूके चिरतरं
चकोर्य्यः स्वन्देशं सितरुचिसनाथं यदि ययुः ।

---

(१) जलप्रायमनूपं स्यात् ।

तदा त[१]द्वान्ध्वेयुर्न पुनरथ माथं निजमिताः
कथं मायाभर्त्तुर्गृहमभिलषन्तु व्रजरमाः ॥

व्रजराज उवाच ।—तत्पितॄणां का वार्त्ता ? ॥

पौर्णमासी उवाच ।—

ते च मदुपदेशादवगतरहस्याः परमावेशादिद-
मूचुः ।—

कृष्णासारतनया[२] यदि तीर्णा-
व्याघ्रचक्रगहनाद्भवितारः ।
कृष्णसातनयं[३]परमेताः
सम्भवेयु[४]रखिलाः स्वसमानं ॥

व्रजराज उवाच ।—

गर्गस्तावदस्मत्सम्विदर्गलं[५]वचनसर्गमातनोत् । यदेतादृशां कञ्जदृशां कञ्जदृशा सम्बन्धे सति तद्विरहादन्धे तमसि सर्व्व एव व्रजः पतिष्यतीति । तस्य तु समाधानं दुर्घानं[६] ॥

पौर्णमासी सहासमाह स्म ।—

स खलु भाविनीं तादृशीं गतिं प्रतीत्य मति-

(१) अन्धतमसं ।
(२) कृष्णाः सारो येषां वृषभान्वादीनां पुत्र्यः ।
(३) नन्दतनयं । (४) प्राप्नुयुः ।
(५) प्रतिज्ञानिवारकरूपं । (६) दुष्करं ।

मेतामुत्थापितवान् । न हि भवद्व्रजे परममङ्गला तासामङ्गसङ्गतिस्तस्य व्रजे सङ्गभङ्गाय सङ्गच्छेत ॥

अथ व्रजराजौ सोच्छ्वासमिदं व्याजह्रतुः ।—

तदिदमन्ये लोकाः कथं मन्येरंस्तासां श्वशुरम्मन्यादयो वा ॥

पौर्णमासी उवाच ।—

तत्र वयमेव समाधानमाधास्यामः भवद्भिस्तु श्वःसर्व्वोऽपि व्रजः पर्व्वोदयमाचर्य्य निमन्त्रणचर्य्ययाऽऽकार्य्यतामिति ॥

अथ तौ च तदेतत्कर्णपीयूषमास्वाद्य तत्पदमभिवाद्य गृहमासाद्य वाद्यप्रभृतिभिर्विप्रादीनाहूय भूयश्च श्रीकृष्णागमनवन्महोत्सवमुच्छ्रयामासतुः ॥

तादृशमन्त्रणाया निमन्त्रणायामासतुश्च सर्व्वं व्रजमिति स्थिते निरन्तरदिनान्तरवृत्तान्तःकर्णान्तरमानीयतां ॥

अथ प्रातः प्राततमहामहा(१)व्रजमहीपतिमहाशयः सर्व्वंसहामपि मुदान्दोलयामास ॥

यत्र सर्व्व एव खर्व्वसङ्ख्यास्तदीयसमीपमीयन्ते (२)हम ॥

---

(१) सान्तमहः ।　　(२) हम्मगतौ दैवादिकः ।

तत्पत्नी महाशया च पूर्णमहाऽऽशया पौर्णमासीं समीपमध्यासीनां विधाय सर्व्वाः समानाययामास ॥

यत्र[१]श्रीराधाप्रभृतयश्च यद्यपि लब्धबाधाभृतयस्तथापि व्रजराज्ञ्याः समाज्ञावज्ञात्रस्तास्तत्राजग्मुः ॥

याः खलु प्राणवल्लभस्य निजवल्लवपल्लीसमागमनेन हर्षातुलवर्षाभिर्लब्धसम्पदोऽप्यत्रग्रहण्यग्रावल्ल्यं कुरपाल्य[२] इव जातशरन्तापविसरतप्तजीवनाः[३] पल्लल्य इव घनाशक्यास्थितिमयसमयवितर्क्यमाणनिजल्लयाश्चातक्य इवालोक्यन्त । तद्दृश्वरी व्रजेश्वरी तु सास्रतया पूर्णिमा-मुखं निर्व्वर्णयामास ॥

यत्र विलोकयमानाश्च ताः श्लोकपचरितादिगणिता व्रजेश-वनिता वाष्पसलिलकलिलनिजविलोचनान्तर्विरोचमानत[४]त्प्रतिविम्वसम्वलनलक्ष्य[५]तया भगवतीमालक्षयन्ती तस्यां[६] समर्पयन्तीवालक्ष्यत ।

---

(१) समानयने । (२) श्रेण्यः । (३) जलानि । (४) राधादि । (५) मिष । (६) भगवत्यां ।

भगवती च दृशा तादृशता[1]मनुकुर्व्वती ताः स्फुटमङ्गीकुर्व्वती बभूव। अभिहितवती च। सर्व्व-निमन्त्रणामयं खल्विदं पर्व्व। तस्मात्सर्व्वतः सर्व्वाः समाहूयन्तामिति ॥

तदेवमाकर्ण्य प्रतिगृहं निर्व्वर्ण्य च काश्चिदागताः कर्णलग्नतया भगवतीं प्रति वर्णयामासुः ॥

आश्चर्य्यमाश्चर्य्यं यत्खलु राधाप्रभृतीरेता निज-निजगृहे च लब्धधृतीरपश्यामेति ॥

पौर्णमासी उवाच ।—

यान्तु पुनरन्याश्च सन्यायवचनाः ॥

अथ तथा कुर्व्वत्यः पूर्व्ववदन्याश्च विज्ञप्तिं कुर्व्वते स्म ।—

ततश्च सर्व्वेषामाश्चर्य्यपर्य्यायतया व्रजेश्वरसभा-पर्य्यन्तं वृत्तमिदं वृत्तं बभूव ॥

व्रजेश्वरश्च भगवत्युपदेशपात्रतया व्रजवासिस्त्री-पुंसमात्रमेकत्र चकार ॥

भगवती च तत्र ध्यानमाचचार। ध्यानमाचरन्ती च विष्णुमायां निध्यान[2]पदवीमानिनाय ॥

---

(१) तद्दर्शनतां।　　(२) दर्शन।

ततश्च सा ।—

श्यामाष्टपाणिपरिवेष्टितपार्श्वयुग्मा
चक्रादिशस्त्रवलिता खगसिंहवाहा ।
देवादिभिः परिणुतप्रसरत्प्रभावा
सर्व्वैः समुन्नतमुखैः परितो व्यलोकि ॥

तदनु च विहङ्गमसिंहप्रष्ठमेवाधितिष्ठन्ती यथायथं सर्व्वानुपतिष्ठन्ती तदिदं वदति स्म ।—

सन्देहं मा कथञ्चित्कुरु पितरिह हे मातरन्यस्त्ववर्ग!
स्वैरं प्रागेव गर्गप्रतिहतिविहतिं कुर्व्वती काञ्चिदासं ।
कुर्व्वे स्माहं सरूपा यदनु च पशुपा
मत्कृतास्ता द्वितीया
द्वारान्स्वान्मन्यमानाः परिणयशयनं
मापुरादिस्थितानां ॥

जानामि या निजभ्रातुरङ्गीकार्य्या इति स्वयं ।
ताः कथं रक्षितुं दोषादुपेक्षे सर्व्वतः क्षमा ॥

पूर्व्वमपि मया तदीदृगपूर्व्वं जनकात्मजायाहितं हव्यवाहनसहायतया विहितं ॥

यदा खलु रावणस्तस्याः कलुषायतापसतादम्भमर्ज्जन् निर्ज्जनवनमागतस्तदातङ्कसङ्करतयात्मानं[1]

---

(१) अग्नि ।

स्तुवानाममूमावसथाग्निर्हंशोः पथ्याविर्बभूव सर्व्वत्र विभूय वोभूयमानया मया मायया गोपयन्नन्यां तादृशिम्मन्यां तत्रारोपयन् पूर्व्वां मय्यर्पयामास ॥

अपनीतवति तु परां रावणे कालाल्लक्ष्मणाग्रजवाणादलिततया कलिते परामेव परीक्षादहनदाहपरिक्षीणाभीक्षयित्वा पूर्व्वान्तु पूर्व्ववदनाकुलपातिव्रत्यां सत्यां सीतां दर्शयामास ॥

यत् खल्विदं सर्व्वलोकदुर्मनस्ता प्रशमनाय कूर्म्मपुराणमनु स्वयं वेदव्यासः सव्यासतया निजगीतायां गीताञ्चकार(१) ॥

किन्तु ।—

अन्याः सन्तु सहस्रशः पतिपरा
नामूः स्तुवे या निजं
लोकं धर्म्ममपि श्रिता न हि पुनः
स्वं स्वं पतिं केवलं ।
गोपीः स्तौमि जनप्रसिद्धमपि या-
स्तं तं विहाय स्फुटं
निर्णीय स्वरति प्रतीतिविभवात् कृष्णं पतिं मेनिरे ॥

---

(१) गीतं कृतवान् ।

आयत्यां फलमत्यासत्यां तु मेनिर इत्यत्र भेजिरे इत्येव पठनीयं ॥

ततश्च ।—

यत एतासु शुद्धत्वं ध्रुवं तस्मात्कृपा हरेः ।
सा चेत्कः क्षमते धर्म्मलोपा यासां मनागपि ॥

शुद्धत्वादिकं चोक्तमनेन स्वयमेव । "न पारये ऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि व" इति ॥

अन्येषां त(१)द्धर्म्मलोपाक्षमत्वं गर्गवाक्येन भवद्भिरेवोपलब्धं ॥

"य एतस्मिन् महाभागे प्रीतिं कुर्व्वन्ति मानवाः ।
नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः" ॥
इति ॥

अथ सर्व्वस्मिन्नुत्फुल्लारविन्दवदुल्लासशवलिते वहलकोलाहलसम्वलिते पुनरपि शुश्रूषाकलिते हसन्तीव साह स्म ।—

किं पुनः पुनरुक्तेन ? । युक्तेन सता सर्व्वेणापि सतां खर्व्वेण साक्षादेव लक्ष्यतामिति ॥

---

(१) राधादि ।

तदेतत्प्रोच्य तत्तद्दिशमवलोक्य काञ्चिदप्यपरिमोच्य द्रुतमन्तर्ध्यानमात्रादन्तर्धानवर्त्मना स्वकल्पितास्ताः सर्व्वा एव तत्पर्व्वान्तरमानिनाय ॥

याः खलु प्रतिविम्बावल्य इव विम्बावलीनां राधादीनां साधारणतयात्मानमवधारयन्ति स्म ।

इति स्थिते पुनः कात्यायन्युवाच ।—

यथा वसरमेतासामुभयासां कृता मया ।
प्रकाशना गोपना च व्यक्तं तेन न तद्रहः(१) ॥

सम्प्रति तु । तादृशसुदृशां कतिपयाभिरुभयासां भेदः सम्वेदनविषयान्तर्नीयतां ॥

अथ तदेतदवधार्य्य व्रजेश्वर्य्यादयः स्वयमेवोभयाः पर्य्यालोचयामासुः । पर्य्यालोच्य चापवार्य्य चान्योन्यं निवेदयामासुः ।—

मणीनां काचानामपि वहिरुदीत्याधुतभिदां
परीक्षां पृच्छद्भिर्दृगपि च परीक्ष्येत वणिजां ।
तथा राधादीनां तदनुकृतिभाजामपि भिदा
कृते देव्यादिष्टा वयमिह परीक्ष्या विरचिताः ॥

देव्युवाच ।—

सरूपकं द्वयं द्वयमेकत्र कृत्वा पर्य्यवलोक्यतां ।

---

(१) रहस्यं ।

अथ तथा कृत्वा तास्तथा पुनरूचुः ।—

दूरे भास्वन्मूर्त्तेः, शशलाञ्छनमूर्त्तिराभाति ।
निकटे निकटे तस्याः, सा पुनराभाव्ययाय जाघटि॥

अथ व्रजराज उवाच ।—

सर्व्वमङ्गले ! किमतःपरं मङ्गले प्रतिपत्स्यते ? ॥

देव्युवाच ।—

तात ! प्राचीनाः स्व-स्वपितृभवनं गच्छेयुरर्व्वाचीनास्तु स्व-स्वपतिभवनमिति ॥

तदेवं सुखसचितकर्णाः सर्व्वे एव वर्णा जय-जयकारमङ्गलं रचयामासुः ॥

सर्व्वशोकापनुदतया मुदं सङ्गता सर्व्वमङ्गला[1] चानुज्ञापनपूर्व्वकं निजालयमङ्गति स्म ॥

ततश्च ।—

हरेस्तत्कान्तानामपि त[2]दभितः सात्त्विक[3]गुणे
समुद्भूते हर्षाद्व्यतिकरवशादप्यपि हिते ।
स चामूश्च क्लान्तिद्वयमनुनिजां कान्तिमभजन्
यथा वर्षालोपादुडुपतिरुडूनाञ्च ततयः ॥

---

(१) देवी । (२) अनुज्ञापनं । (३) भाव ।

जनास्तदा महसि विधाय भोजनं
नृपालयान्निजनिजमन्दिरं ययुः ।
निजां निजामपि पितरः सुतां गृहं
महीयसा सपदि महेन निन्यिरे ॥

अथ स्निग्धकण्ठः पप्रच्छ ।—

भोजनात्पूर्व्वं दुर्व्वाससः समासन्नताप्यासीदिति निशम्यते ॥

मधुकण्ठ उवाच ।—

सत्यं सत्यमानन्दात्तदपि स्मरणाय मन्दायते स्म ।

सम्प्रति तु प्रतिपद्यतां ।—

यदा तु वृषभान्वादयः कृतसुकृतम्मन्या निज-निजकन्या-गृहं विनीषन्ति स्म । तदानीं तास्तु तत्र सर्व्वजनतास्तु ताश्च न सहसा त(१)दङ्गी-कुर्व्वन्ति स्म ॥

तदिदं च स प्रसङ्गीकुर्व्वन्ति स्म ॥

यद्यपि हैमवती तथा दर्शितवती तथापि पर-वास(२)कृतवासा(३)नामासामस्माकं पावकं विना-मान्यत् कलङ्कपावकं स्यादिति सम्प्रति तु न तात-

(१) गृहनयनं ।　(२) गृह ।　(३) स्थिति ।

वैश्मप्रवेशः सदेशरूपः[1] स्यात् । किन्तु शुद्धता-निर्व्वहणवहदहनसात्कृतदेहा भवनं युक्तं । यथा च सङ्कल्पं तथास्माकमपि शिरसि क्लृप्तं प्रतिस्वं प्रतिज्ञापत्रं वर्त्तते । तदलमति विस्तरेण ॥

अथ तदेतन्निशम्य तन्मातरस्तु कातरतया ताम्पस्त[2] तदधृष्यतया[3] कृष्यनिजनिजपतिं प्रतिदर्शयामासुस्ते चान्यांस्ते चान्यास्ते च पतिप्रभृतीनिति सर्व्वेषां चमत्कारमयः समयः समवर्त्तत ॥

तत्र तन्नेत्रामत्रीकृतं पत्रमपि यथा ।—

वचसि मनसि काये जागरे स्वप्नभावे
स्खलित[4]मिह यदि स्याद्गोपराजात्मजान्नः ।
सपदि खलु तदास्मन्मूर्त्तिरायातु जूर्त्तिं
सदसि पशुपपातुः सत्परीक्षाहुताशे ॥ इति ॥

तदेतद्दर्शनाकर्णनया दुःखदूयमानगात्रेषु व्रजवासिमात्रेषु पूर्णिमानुस्मृतिवशाद्विचलद्वल्कलवासा दुर्वासाः समाससाद ॥

स खलु तदा तपः प्रभाकरः[5]शिवपत्नी[6]

---

(१) समञ्जसः । (२) प्रतिज्ञापत्रं ।
(३) तया तया परिभाव्यतया । (४) स्खलनं ।
(५) सूर्य्यः । (६) दुर्गा ।

पितरं(१) गोभृतां(२)प्रवरं सङ्गत्य निर्व्वापितप्राय-
तीव्रभावः सर्व्वमुदमुदयात् कुर्व्वन्नदृश्यत ॥

सर्व्वजनतया युगपन्नमस्कारादिना तत्कृपादृष्टि-
रामृश्यत च । यदनु स्वयमाह स्म ।—

सोऽहं सर्व्वभयदधामा दुर्व्वासोनामास्मि ।

भयदता(३) च मम निरुपधिसर्व्वहितेऽस्मिन्
कृष्णतयाभिहितेन कस्यचिदैश्वर्य्यमर्म्मानुभवमय-
धर्म्मादिकमुपाधिं विना भजनं दृश्यत इति परा-
यणतया परामृश्यतां ॥

तं(४) विना त(५)त्तु भवतामेवेति तत्र च राधा-
दीनामसाधारणमिति नात्र मम तादृशता(६)
प्रत्युत वशीभावभृशता च ॥

ततः सम्प्रत्यपि राधादीनां बाधामवधार्य्य गतस्य
मम निवेदनं श्रवसि धार्य्यतां ॥

न खल्वेतास्वन्यथा प्रथा कार्य्या । पूर्व्वं हि मया-
प्येतासु कोऽयमस्माकं कृष्ण इति प्रश्नसमेतासु

---

(१) नन्दं । श्लेषे हिमालयं ।
(२) गोपानां श्लेषे गिरीणां ।
(३) शुद्धभक्तदर्शनान्मम भयदतेति भावः ।
(४) उपाधिं ।　　(५) भजनं ।　　(६) भयदता ।

स्वयमेवापूर्व्वमिवेदं निवेदितमस्ति । "स वो हि स्वामी भवति" इति ॥

य(१)देव तापन्यामपि जल्पतां प्राप्तमस्ति । एतासां विरहव्याधिमवधाय महिषीषु लब्धप्रावीण्यायां रुक्मिण्यामपि तद्वदेऽस्मिन्माधवेऽपि मयापराधः कृतः । यदेव स्कन्दपुराणाद्द्वारकामहिमादिषु मम दुर्यशः कृतशंसनमस्तीति ॥

अथ सर्व्वेऽपि ससम्भ्रममिदं निवेदयन्ति स्म ।—

भगवन्नमूर्न सम्प्रत्यस्माभिरन्यथा प्रत्ययविषयी क्रियन्ते ॥

किन्त्वेता एव समवेताः सङ्कोचं रोचयमानाः शोचन्मनस्तया वर्त्तन्ते ॥

अथ पुनर्मुनिः सुनिरूपितहासं ताः प्रति प्राह स्म ।—

भो ! मातरस्तथापि यद्येवङ्कारतया मातरिश्वमित्र(२)परीक्षां प्रतीक्षध्वे तदा किं तावता प्रयासेन ? प्रयासे च कृते भवत्यातिमात्यप्रतापेन वह्निरपि भस्मसाद्भविष्यति ॥

---

(१) निवेदितं । (२) वायुसख ।

तस्मान्मम तपसां ज्वाला न क्वचित्प्रतिहन्यन्त इति ताः प्रविश्य सपथं निर्द्दिश्य महाज्वलनरूपं मामुद्दिश्य हस्तमस्तं कुरुध्वमिति ॥

तदेतदभिधाय सर्व्वानप्यादाय श्रीव्रजेन्द्रकुलरत्नमपि यत्नतस्तेषु सन्धाय ताः प्रान्तर[१] देशलब्धान्तराश्चकार ॥

अथ लब्धप्रान्तरप्रदेशमाकस्मिकरश्मिभस्मिती-कृतसदेशदेशमग्निवेशमात्मानं विधाय यदासामास तदा तदर्च्चिःप्रवेशं प्रवेशं तमुद्देशमुद्देशं हस्तं प्रसारयन्ती सानन्दानां तासामलकनन्दानां[२] ततिः स्वयमलकनन्दावदेव शीतलासकलानपि शीतलांश्चकार ॥

तत्र च ।—

परीत्तायां तस्यां मुनिदहनमह्नाय विशती-
रमूः साध्वीः पश्यन् स्व[३] कृतनयनान्तस्रवजलाः ।
निजाश्रूण्यावृण्वन्नपि मुररिपुर्व्यग्रितमनाः
पुरासीन्नश्चित्तं विकलयति सम्प्रत्यपि यतः ॥

विचारतास्त्विदं प्रतिपद्यामहे ॥

---

(१) प्रान्तरं दूरशून्योऽध्वा ।

(२) कन्यकालकनन्दा स्यात् । इतित्रिकाण्डशेषः ।

(३) श्रीकृष्णा ।

न चेदेताः शुद्धा भवति न हरेरासु करुणा
तया सन् दीप्राश्चेत्किमनलवराकः कलयतु ।
स चास्तां कः स्याद्वावडवदहनः कः खररुचि-
र्भवेद्वा कः कालानलकिरणरुद्रः स्वयमपि ॥
यदानन्यां वृत्तिं हरिमनु निजां व्यक्तुममुका
दधत्यः सत्यं(१) तं मुनिदहनमाविश्य निरयुः ।
तदा पक्ष्माप्येकं न वसनदशानां(२)मलिनता-
मयासीदेताः प्रत्युत नवकुमारीश्रियमधुः ॥

अनन्तरन्तु मुनिः सुनिरूपितसर्व्वानुज्ञापनः श्रीकृष्णारामसुखापनस्तर्ह्येवान्तरधादिति स्थिते भोजनादिचानुष्ठिते । किमधिकमधिगमयितव्यं तासु सर्व्वस्तव्यत्वं ॥

यतः ।—

प्राचीनश्वशुरम्मन्यादिभिश्चामूः सुपूजिताः ।
तेभ्यश्चाभ्यस्तविनयास्त्रिलोकीस्तव्यतामयुः ॥

ततश्च ।—

भौमैर्दिव्यैश्च पुष्पैर्जयजयनिनदैर्गीतवादित्रनृत्यै-
र्दानैर्यानैः प्रयाणैर्द्विजपठितशिवै-
स्तत्प्रसूतातवर्गाः(३) ।

(१) शपथं । (२) अञ्चल । (३) कर्त्तारः ।

ताः[१] कन्या गोपराज्ञीप्रभृतिवरदृशः

किञ्च गोपच्चितीच्चि-

न्मुख्यागत्वामुनीशामपि चलितवती-

र्निन्यिरे स्व-स्वगेहं ॥

नीताश्च ताः परमविनीताः श्रीकृष्णमात्रानुयात्रावृताः परमापन्निर्गताः परलोकादिवागताः पितृभ्यां मेनिरे । परमसौकुमार्य्येण कौमारवर्य्येण सङ्गता एव चानुबभूविरे ॥

तथा हि ।—

तदामूर्न्निर्म्मायापतिनिलयकारावसतयो

विशुद्धाः शुद्धान्तेष्वखिलसुहृदां सम्मदकृतः ।

चणं मातुः क्रोडेच्चणमथ पितुर्दृष्टिविषये

चणं तद्बन्धूनां प्रणयवलये लालनमयुः ॥

एताः कृष्णस्य कान्ताः पर[२]मिति निखिलै-

र्ज्ञाततत्वाः समं[३] तै-[४]

रिष्टास्तस्यैव हेतोः पितृमुखजनता-

भिश्च संलाल्यमानाः ।

---

(१) कर्म्मभूताः । (२) केवलं ।

(३) युगपत् । (४) निखिलैः ।

नाश्रृण्वन्नाप्यपश्यन्न च किमपि परं
द्रागवुध्यन्त किन्तु
स्वान्ते तस्यैव रूपं गुणामपि शतधा-
नाम चावृत्तमार्च्छन् ॥

अथ स्निग्धकण्ठः सोत्कण्ठं पप्रच्छ ।—

धन्यादीनामपि कन्यानामार्त्तानां का वार्त्ता ? ॥

मधुकण्ठः प्राह ।—

धन्यादयश्च ता धन्यास्तासां प्रतीक्षामीक्षमाणाः परीक्षापर्य्यन्तं स्थितास्ताभिः सममेव यथास्वं पितृधाम जग्मुः ॥

स्निग्धकण्ठ उवाच ।—ततः कीदृगनन्तरं वृत्तं ? ॥

मधुकण्ठ उवाच ।—

अथ त्रिचतुरेषु वासरेषु परमानन्देन गमिता-वसरेषु पूर्णिमा तत्तत्कन्यापितॄणां मनस्तन्मन-स्कारेण पूर्णीकृत्य स्वमपि तेन(१) तूर्णीकृत्य श्रीव्रजराजविराजमानं समाजमाजगाम ॥

आगम्य च तं रम्य च तं रम्यहासमाह स्म ।—

आभीरवृषभवृषभान्वादयस्तत्र भवतः ॥

(१) मनस्कारेण ।

कुलं परिहसन्तः सन्तिः । न खलु तत्रा[१]भीर-वैशत्वं शुद्धं किन्तु यादव-क्षत्रियजन्मतासन्मततयान्यथा बुद्धमिति ॥

तदेवं तेषां नर्म्मरचनं वचः सम्बन्धानुबन्धं सचमानमाकर्ण्य सहासं भ्रातृन्निर्व्वर्ण्य स्थितवति व्रज-महीक्षिति तदीयसभ्यमपि कञ्चन तस्मिन्नुपलभ्य मधुमङ्गलः स्मितसङ्गतमुवाच ।—

तेऽप्यम्बष्ठायामस्मद्ब्राह्मणाप्रष्ठा[२]दुद्भूतावैश्याभीराभिधा न तु शुद्धवैश्यतया परामृश्यन्ते प्रत्युतास्मद्व्रजमहीपतिपितामहाय यदुपरिवृढाय[३] देव-मीढाय परमकुलेन तत्पितामहभगिनीपतिकुलेन कन्यादत्तेति तदन्या रीतिर्न गण्या ॥

तस्मान्मा कर्कशगर्व्वमोदकचर्व्वणं कुर्व्वन्तु किन्तु पूर्व्वजानेव पश्यन्त्विति ॥

तदेवं ज्ञाततदीयहार्द्दतामधुरेषु त्रिचतुरेषु वासरेषु लब्धानन्दविसरेषु तन्नर्म्मणा लब्धशर्म्मतां गतानां श्रीमतो बलस्य बलानुजस्य च पृथग्गणतया चरणानुरागिकन्यापितृणां दूतामङ्गलवालि-

(१) श्रीमन्नन्दकुले । (२) न्यूनात् ।
(३) श्रेष्ठाय ।

वलयसम्भूताः क्रमतः श्रीमन्नन्दमहाराजसमा-जमाजग्मुः ॥

आगम्यागम्य च श्रीराम-रामानुजयोर्जामातॄतां तत्तन्मातरपितरादिषु च तत्तत्सम्बन्धपातॄतां(१) सूचितवन्ति। महावसूचित(२)मूल्यानि रचितमङ्गला-नुकूल्यानि वस्तूनि महाराज-पुरतः स्तूपयाञ्चक्रुः॥

ततश्च तदवगम्य रम्यस्मितवशम्वदवदनतया किं किमिदमिति वदन् व्रजराजस्तान् किञ्चिल्लज्जया-सज्जयामास ॥

अथ च ।—

सम्मान्य भोजनादिकं विश्राण्य च विश्रमयां चकार । न केवलं व्रजराजः किन्तु क्रमशस्तस्य भ्रातृसमाजश्च तथा व्यवजहार ॥

तेषु वस्तुषु यथायथं श्रीरामकृष्णार्थं प्रस्तूय-मानेषु पूर्व्वः(३)पूर्व्वमपि विवहनमहं विनापि कृत-सर्व्वमनस्कारेण स्वयमङ्गीकारेण मार्जिततदनु-रागर्णः(४) कर्णप्रवेशितवर्णतया निर्व्वर्णयामास ॥

---

(१) पालकतां । (२) धनोचित ।
(३) बलदेवः । (४) ऋणः ।

अपूर्व[१]स्तु गुप्ततारचिततत्तदपूर्व्वस्तत्र सत्रपतया पूर्व्वमश्रुतवानिवासीत् । पुनस्तु मातरपितरादीनामपरितोषं भ्रातुश्च तत्परित्यागदोषं विचारयन्निव तदजानन्निव च तानि स्वीचकार ॥

यत्र च ।—

बरार्हं कन्यानां पितृभिरुपढौकाय[२] घटितं
सवस्त्रालङ्कारं हरिरधृतहृद्यावृतमुखः ।
अथाप्येतर्ह्येव द्यवि भुवि च पर्व्वाण्युदभवं-
स्तरोरन्तर्मूले रसमनुसृते भान्ति विटपाः ॥

यदा हरिः स्वयमुररीचकार स
प्रहापितां श्वशुरकुलैरलङ्क्रियां ।
तदा भुवि द्यवि च सवाद्यगीतिका[३]
समं मदादधुनुत राधिकादिकाः[४] ॥

यत्र च ।—

श्रीदामन्नेज मा त्वं सुबल ! पुलकितां
मुञ्च हंहो ! सुभद्र !
प्रस्वेदं मास्म धेहीत्युपधिचिचितया[५]
कृष्णमन्वेव जल्पन् ।

(१) श्रीकृष्णः । (२) उपायनाय ।
(३) सवाद्या या गीतिका कर्त्री । (४) कर्म्मभूताः
(५) छलप्रकारेण ।

तस्योद्वाहार्थचर्य्यां सदसि मधु[१] समा-

ह्वानविप्रः सनर्म्म

प्रेयान् कुब्जदृशन्तं मुहुरवकलयन्

मन्दमन्दं जहास ॥

अथ व्रजराजश्च तान् दूतान् वहु सम्प्रदानसम्भृतान् विधाय प्रतिसम्बन्धिगृहानिबन्धनं वहूपकरणप्रवन्धं निधाय विसर्ज्जयामास ॥

यत्र श्रीराधादीनामपि वधूभावमनवधृतमेव तत्तदुपदानभङ्गीभिः सप्रसङ्गीचकार ॥

तत्र च ।—

व्रजेश्वरीप्रहितपरिक्रियां यदा

वहन्नमूः सहनिजधर्म्मचारिणा ।

तदुत्थया परिमलधारया हरि-

र्विदूरगोप्यजनि तदाधिवासितः ॥

तदेवमपि त्रिचतुरेषु वासरेषु परमानन्देन गमितावसरेषु दिनान्तरे तु पौर्णमासी स्व-स्वगृहमध्यध्यासीनानुदासीनानिव वीक्ष्य कन्यातातपशुपजातप्रवीणान् सर्व्वान् सहासमाह स्म ।—

---

(१) मधुमङ्गलनामेत्यर्थः ।

यद्वदाकारत एव परस्परविवाहयाचनप्रकारं निर्व्वाहयामास(१)मन्ये तद्वद्विवाहमपि निर्व्वाहयितु-मिच्छथेति ॥

अथ तेऽपि हसित्वा तदिदमाहुः स्म।—

वयं किं जानीमः ? ॥

किन्तु तदानीमिदानीमपि तत्र भवत्य एव सर्व्व-मनुभवन्त्यः सन्ति ॥

पौर्णमासी उवाच।—

आस्तां तावद्वामतारामता। सम्भूय ज्योतिर्विदः समाहूयन्तां ॥

ततश्च हसद्भिर्गोपसद्भिर्निजनिजकुलाभिमानव-द्भिरपि हृदि तत्सम्बन्धानुरागवद्भिर्वहिः पूर्णिमाज्ञां प्रतिपालयद्भिः समाहूते च प्रभूते विप्रादिगणे तूर्णितमनाः पूर्णिमा व्रजनृपद्वारवरानुसार(२)दैव-ज्ञांस्तत्तत्कन्यापितॄणामनुचारकानपि तानेकानुज्ञान् विधाय परममङ्गललग्नं लग्नं निर्णीय तद्वर्णदूतं प्रभूतं प्रणीय च तिलकाग्रिमवहुलसामग्रीभि-स्तत्तदग्रीयजनानग्रीयान् विधाय श्रीव्रजनृपते-रग्रमानिनाय ॥

(१ यूयं। (२) कर्म्मणयता।

तत्र चाग्रजवैवाहिकलग्नं निर्णीयावरजस्य च निर्णीतवन्तः ॥

तत्रावरजस्य यथा ।—

ललितमाधवपूर्णमनोरथं[1]
समय[2]मैक्षत दैवविदाङ्गणः ।
इह गवागमनक्षणसङ्गतं
विधिभ[3]मेव शुभं समवुध्यत ॥

अथ व्रजराज उवाच ।—

भगवति ! तदेकमेव गोधूललग्नं सर्व्वासामेव शुभसंलग्नमिति तदेकमग्नता युक्ता । किन्तु कन्यानामगण्यानां यौगपद्यं कथं सम्पद्यतां ॥

मधुमङ्गलः समन्दहास उवाच ।—

राजन् ! किन्तावदत्र चिन्तास्पदं ? मत्प्रियमित्रस्य विचित्रं वैभवमस्ति ॥

ततस्तत्प्रतिनिधिताविधिं विधातुं कुत्रापि शस्त्रं कुत्रापि वस्त्रं कुत्रापि मुकुटं कुत्रापि लकुटं कुत्रापि चार्च्चा[4]कुत्रापि चर्चा कुत्रापि माल्यं कुत्रापि यत्-

---

(१) ललितमाधवाख्यनाटके पूर्णमनोरथनामानमङ्कं । पक्षे-माधव वैशाख ।

(२) अवसरं । नाटकपक्षे सिद्धान्तं ।

(३) रोहिणीं ।

(४) प्रतिकृतिं ।

किञ्चिन्निर्म्माल्यं कुत्रापि वेणुं कुत्रापि चरणरेणुं प्रस्थापयिष्यामः ॥

अथ पौर्णमासी कन्याजनकजनानां मुखं समीक्ष्य व्रजेन्द्रं प्रति विहस्योवाच ।—

हसतु नामायं कटुभाषी वटुर्मया तु योगमायया तथा योजनीयं यथा भवदुद्भवं सम्भवतां भवतां तत्र तत्र सर्व्वत्र च सममेव देवबद्दुर्भावः प्रादुर्भावः स्यात् ॥

व्रजराजः सानन्दमुवाच ।—

या काचिदकस्मादस्माकं सिद्धिः सा सर्व्वा सर्व्वदापि सर्व्वत्रापि चार्व्वागभवन्त्या[१]भवत्या एवेति प्रसिद्धिस्तस्माद्भवदनुगतानेवास्मान् विद्धि ॥

पौर्णमासी उवाच ।—

व्रजजनानामपि स्वामिन्ननुगम्यानुगामित्वं पश्चाद्विचार्य्यं । सम्प्रति तु श्रीकृष्णरामावाकार्य्य-तिलककार्य्यं पार्य्यतां[२] ॥

अथ व्रजपुरुहूतः स्वजातिप्रसूतं द्विजातिसम्भूतं वन्दिमागधसहितसूतं श्रेणीप्रभूतमपि जनं निज-समाजमन्वाधाय तद्वदन्तःपुरमपि तत्तत्पुरन्ध्री-

(१) निकटीभवन्त्या । (२) सम्पूर्य्यतां ।

धुरन्धरं विधाय स्वस्तिवाचनादिस्वस्तिसन्धाय स्तववाद्यगीतकृतसंस्तवं हृष्टदेवगणवृष्टनवपारिजातप्रसवं तत्तत्कन्यापितृसौवस्तिक[१]प्रशस्तहस्तलब्धश्लेषविशेषक[२]विशेषं श्रीकृष्णाराममस्तकन्यस्तं कारयन् सुखविकारान्निजगाम्भीर्य्यं प्रत्यस्तमपि न विदाञ्चकार ॥

तथा हि ।—

श्रीमान्नन्दः प्रसिद्धः स च चिरविरहा-
त्पुत्रमाप्तः स पुत्रः
स्वभ्रान्त्याहारिताभिर्निजनिधितनुभिः
सद्वधूभिश्च वव्रे ।
यर्ह्येवं तर्हि देयं प्रचुरतरमदा-
दित्यदः किं नु वर्ण्यं
यन्नात्मानं ददे[३] तद्वियुतिभयवशा-
देव तस्ये[४]ति मन्ये ॥

अथ विप्रकुलाय यथेच्छं प्रतीच्छते प्रयच्छता महेच्छेन[५] व्रजपतिनाऽपाङ्गसङ्गीकृतः स मधुमङ्गलः सङ्गतमिदमाह स्म ।—

(१) पुरोहित । (२) तिलक । (३) प्रदानं ।
(४) पुत्रस्य । (५) महेच्छस्तु महाशयः ।

अस्माकं विस्मायकं किं भवतां वेश्मनि विद्यते । यच्च विश्वविस्मयनिधानं किमपि निधानं[1] विद्यमानं तदपि चास्मासु हस्तन्यस्तमेवेति किं याचितमाचितं वा कर्त्तव्यं ॥

तदेवं हसितविलसिते पर्य्यवसिते ।—

अथ भविकजुषां स्नुषावलीनां
निज-निज-रोचिषि योग्यमम्बरादि ।
निजमहितहितद्विजप्रधानै-
र्व्रजनृपतिः प्रजिघाय सम्प्रधानैः ॥

अथ कथकः समापनमाह स्म ।—

यः पूर्व्वं यदुपत्तने मुररिपोरासीद्विवाह-क्रमः
स्फीताः स्मः किल तेन[2] गोपसदने
यश्चात्र तेनाप्यथ ।
किन्त्वाद्ये हृदि वाचि च प्रतिगते-
शम्यात्मना[3] स्म स्थिता
हंहो ! पश्यत साम्प्रतं वयमिता
भद्रश्रिया[4] नन्यतां[5] ॥

---

(१) निधिः । (२) विवाहक्रमेण वयं स्फीताः स्मः ।
(३) शमयुक्तेनात्मना । श्लेषे शमी वृक्षस्वरूपेण ।
(४) उत्तमया श्रिया । श्लेषे चन्दनेन । (५) अभेदं ।

तदेवं कथां यथावत्मातर्विधाय निशीथिन्यां हरि-प्रेयसी-कथायामतिप्रथां सन्धाय मधुकण्ठः श्रोतृभिः समं स्वधाम जगाम ॥

श्रीगोविन्दमनुविन्दमाना श्रीराधा च कन्दर्पा-रामामिति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु सर्व्वसमा-धानाधानपर्व्वपर्व्वणां नाम द्वात्रिंशं पूरणम् ॥

त्रयोत्रिंशं पूरणम् ।

अथ वासरान्तरप्रातरवसरे श्रीव्रजराज-सभाभास्वरे रजन्याञ्च श्रीराधामाधव-रहःसभाकृतसुखजन्यां यत्र यथायुक्तं तत्र तथा मुक्तकण्ठः स्निग्धकण्ठः कथयामास ॥

अत्र तु क्रमोपलम्भाय तत्तदेकत्र सम्भावयिष्यामः ॥

अथ राम-विवाहक्षणमनूपलक्षणं कृष्ण-विवाह-मङ्गलं प्रसङ्गसङ्गतं क्रियते ॥

यस्मिन्निह वसुदेववंशतया लब्धस्वपुत्रभगिनी-भावश्रीरेकानंशापि व्रजराजाभ्यामाकृष्टिमन्त्र-वद्वृन्दाद्वारा रचितप्रणयमययन्त्रणया निमन्त्रणया सन्निकृष्टिमानीतासीत् ॥

तत्र प्रथमतः समङ्गलगीतवाद्यारम्भः शर्म्म-सम्भवं सम्बभार ॥

यथा ।—

हरिपरिणयनेऽस्मिन्नेकदा कोटिसङ्ख्ये
समजनिषतपञ्च[1] वाद्यगीतप्रकाराः ।
भुवि दिवि वत ! चित्रं ये तु सञ्जायमाना[2]
जनितमकृषत द्रागभव्यमन्योन्यगामि ॥

सर्व्वं समारम्भि सवाद्यगीतं
न वाद्यगीतं वत ! तद्वदस्ति ।
इतीव देवाश्च तदुद्यमान्तः[3]
स्वयं त[4]दूरीकृतिमुद्दितेनुः ॥

तत्र प्रवचनीय[5]त्वं गेय[6]त्वं वाथ ये ययुः ।
अपि प्रवचनीया[7]स्ते गेया[8]श्चासन् प्रशंसतां[9] ॥

ततश्च ।—

सामग्रीणां मण्डपानां फलाना-
मुल्लोचानां[10] तोरणानां तरूणां ।
निर्म्माणेन द्योस्थितानां विमान-
श्रीवृन्दानां गोकुलं जैत्रमासीत् ॥

---

(१) सङ्ख्या । (२) सन्तः । (३) मध्ये ।
(४) वाद्य । (५) प्रवक्तीति प्रवचनीयः ।
(६) गायतीति गेयः । (७) कर्म्मणि ।
(८) कर्म्मणि । (९) जनानां । (१०) वितानानां ।

तदेवं सति च ।—

उद्धर्षे वृद्धिमृच्छत्यनुजनमभितश्चेतसः फुल्लतासी-
दित्येवं तर्कयामः स्फुटमुभयमिदं
चन्द्रमःकैरवाख्यं ।
किम्वा चन्द्राब्धिनाम द्वयमिदमभव-
द्विश्रुता यत्परस्मा(१)
त्प्राचः(२) सम्भूतिरेवं पर(३)मनु च मता-
फुल्लता प्राच(४) एव ॥
द्वार्व्वत्यां ते विवाहा युगपदपि हरेः
शोडशानां सहस्रं
प्रागासन् यत्र पित्रादिकमखिलकुलं
तावदासीद्धितीदं(५) ।
आश्चर्यं कोटिसङ्ख्ये परिणयनविधा-
वत्र तु स्मर्य्यमाणे
स्रोतस्वत्योघवृन्दं जलनिधिवलये
यद्वदाभाति तद्वत् ॥
गोष्ठं तावन्निरस्तप्रमिति नरमिदं
चित्रामतूप्यनन्तान्

(१) अब्धेः ।　(२) चन्द्रस्य ।　(३) अब्धि ।
(४) चन्द्रात् ।　(५) प्रागुक्तं ।

प्रत्येकं तद्विवाहान् सममखिलजना

व्यापुरेतद्विचित्रं ।

तत्राप्यन्यद्विवेकातिगमिह यदहो !

धाम तत्तु नासी-

दत्यास्तीर्णं(१) तथा ते क्वचिदपि च निजं

नाविदुर्व्यूहभेदं ॥

तदेवं पूर्णिमा पूर्णितयोगमाया-प्रभावे तु तत्र लब्धभावे श्रीरामावरजस्य सद्य एव सम्पद्यमान-मनवद्यमुद्वाहभव्यं निखिलमेव वर्णयितव्यमिति स्थिते जगच्चेत्कवितामृच्छेद्युगपत् क्रमशोऽथवा तथापि तद्वर्णयितुं लब्धवर्णा(२)भवेन्न हीति तत्र च श्रीराधापाणिग्रहणमसाधारणमिति तदेव यथा-मति गिराराधयिष्यामः ॥

यथा ।——

मण्डपाद्यथ पदा व्रजेशितु-
र्द्वार्यलक्षि वृषभास्करस्य च ।
केवलं न हि नटास्तदा नटन्
वाद्यकौतुकितया जनाश्च ते ॥

---

(१) व्याप्तं ।　　(२) विचक्षणः ।

उत्साहस्तेष्वस्ति सर्व्वत्र नित्यः
कृष्णस्यार्थे किं पुनस्तद्विवाहे ।
तालप्रोद्यद्वाद्यसन्धस्तु तेषा-
मुद्वाहं तं(१) युद्धवत् पुष्पति स्म ॥

हंहो ! सत्त्वरमेहि देहि नय रे यातादयन्ते परे
कुर्व्वन्त्येतदपूर्व्वपर्व्वरचनं हे याचनं मे शृणु ।
एवं केवलसेवकप्रभतया मान्याश्च ते मान्यता-
मुज्झन्तो महसीह शर्म्मवलिताः
कर्म्मद्रुतं निर्म्ममुः ॥

अथाधिवासवासर(२)मासद्य सद्यः सम्पद्यमान-सुखविकासभासमानमुखसुधाकरकरसुधानिकरा-ऽर्पणया प्रणयाद्वरवधूमातरावन्यानपि निजनिज-गण्यानतिधन्यान् पुरन्ध्रिजनानात्मवदेव सक्षणा-नाचरन्त्यौ तैर्नीरन्ध्रमङ्गलकृतिभिर्मिथः सङ्गलसदा-कृतिभिः प्रतिस्वमालयान्तस्तत इतश्चरन्त्यौ वभूवतुः ॥

तत्र लब्धपर्व्वाणः प्रायशः सर्व्वा एव तावन्म-ङ्गलगानं वितानमानयन्त ॥

---

(१) विवाहं । (२) विवाहप्राग्दिनं ।

यत्र च ।—

गायन्त्यस्ताः कृष्णराधा-विवाहं
तत्तन्मात्रोरालये स्नेहभाजः ।
प्रागन्योन्यं प्रेर्य्यशश्वद्विकासं
हासं हासं गापयामासुराशु ॥

गानञ्च तत्र तत्र पौर्णमासीशिक्षितं यथा ।—

राधा[१] राकाशशधर ! मुरलीकर ! गोकुल-
पतिकुलपाल ! ।
जय जय कृष्ण ! हरे ! ॥

राधावाधामोचन-सुखरोचन-
विदलितगोकुलकाल ! ।
जय जय कृष्ण ! हरे ! ॥

राधासुकृतवशीकृत-मङ्गलभृत !
तिलकितगोकुलभाल ! ।
जय जय कृष्ण ! हरे ! ॥

राधापरिकरपुण्यद ! नैपुण्यद ! गोकुल-
रुचिपुविशाल ! ।
जय जय कृष्ण ! हरे ! ॥

---

(१) रूपकं ।

राधानिजगतिधर्म्मद ! पुरुशर्म्मद !

हतगोकुलरिपुजाल ! ।

जय जय कृष्ण ! हरे ! ॥

राधाजीवनजीवन ! गोव्रजधन !

गोकुलसरसि मराल ! ।

जय जय कृष्ण ! हरे ! ॥

राधामोदरसाकर ! सरसिजवर !

गोकुलमण्डलनाल ! ।

जय जय कृष्ण ! हरे ! ॥

राधाभूषणभूषण ! गतदूषण !

गोकुलहृदि भूपाल ! ।

जय जय कृष्ण ! हरे ! ॥ इति ॥

तदेवं मङ्गलमाचर्य्य परस्परं सुखमपवर्ज्य(१) वरं वधूमपि यथावसथं यथायथं स्नपयामासुः ॥

तत्र वरस्नपनं यथा ।——

परिहितमृदुलान्तरीयमात्रं
परिहृतवेषगणश्च मज्जनाय ।
वृतिरहितहरिन्मणीन्द्रशोभा
विजयिनमैक्षत कृष्णमत्र लोकः ॥

---

(१) दत्त्वा ।

सतैलमुद्वर्त्तनमाददानाः
स्निग्धाङ्गलावण्यममुष्य वीक्ष्य ।
उद्वर्त्तिताऽभ्यक्तजलप्लुताभं
मत्वाऽमुमस्थुः स्थगिताश्चिराय ॥

अभ्यक्तस्नातवद्दृष्टमपि तत्तत्क्रियाचितं ।
तमकुर्व्वन्नमी स्निग्धमाङ्गल्यमितिबुद्धयः[१] ॥

स्नानानन्तरमुच्चकैरुचिधरं तं शक्रनीलप्रभं
वीक्ष्यामन्वत तत्कृतिप्रणयिनस्ते स्वं सुपूर्णक्रियं।
या राजन्ति रुचः प्रतिक्षणनवा-
स्तास्मिन्नमूः सर्व्वतो
भद्रा[२] स्तेषु[३] कथं प्रसादपदतां
कुर्य्युर्न्न त[४]ल्लिप्सुषु॥

परं न तस्मिन् स्नपकावलीनां
यशोवभूवाजितकान्तिवृद्ध्या ।

---

(१) इति बुद्धिर्येषां ते । पश्चान्माङ्गल्यमित्यनेन समस्तस्या-
समस्तेन नित्यापेक्षेण सङ्गतिरिति न्यायात् चकेण हत-
वेदिप इतिवत् ।
(२) सर्व्वतो मङ्गलाः ।
(३) प्रणयिषु ।
(४) प्रसाद ।

ततु[1]स्नातकाना[2]मपि तत्र वृत्त-[3]

स्वस्ति श्रुतीना[4]मुदभूदतीव ॥

तदेवममी तस्य कनककलसलसदमलसपरिमल-जलस्नपने कृतसमापने सयत्ननिर्म्मितरत्नपीठान्तर-मधितिष्ठतः सपरिनिष्ठमङ्गमार्ज्जनादिजमपि सुख-मार्ज्जन् स्म ॥

यत्र ।—

सुमार्ज्जयन्नस्य सुकोमलेन

वस्त्रेण कश्चित्तु निरीक्ष्य गात्रं ।

अन्याहृ[5]गाभं भयलोलनेत्र-

स्तन्नेत्रभावं परिपश्यति स्म ॥

प्रत्युद्गमनीयं त,त्कमनीयं श्रीहरौ दधाति ।

केचित्परिधापनमिह,

कुर्व्वन्ति स्मापिधापनं[6]केऽपि ॥

अथ तूलिकानुकूलितासनमध्यमध्यासीनस्य तस्य वेशविनिवेशश्चित्तं सावेशं रचयन् झटितीष्टनिर्व्वाह-

---

(१) यशः ।

(२) समाप्तवेदाध्ययनानां ।　　(३) अतीत ।

(४) स्वस्तिपाठानामित्यर्थः ।

(५) अतिकोमलत्वात् ।　　(६) आच्छादनं दुर्दृष्टिभयात् ।

विवाहकथाविलम्बाय सम्पत्स्यत इति विवहन-यात्रायां किञ्चिदतिमात्रात्मतया[१] वर्णयिष्यते ॥

किन्तु सङ्क्षेपत एवाद्य तस्य वचसि निक्षेपः क्रियते ॥

तथा हि ।—

उष्णीषः शकलीन्द्रकुण्डलयुगं ग्रैवेयकं कौस्तुभः
केयूराद्मिमुद्रिकान्तिमततिर्मुक्तावलीसन्ततिः ।
काञ्चीनूपुरहंस[२]कांशुकचितिर्मध्ये घनश्यामता
तत्रत्यानघिनोत्तदस्तु घिनुते सर्व्वांश्च सम्प्रत्यपि ॥

तदेवं स्थिते शुभसमयमयमङ्गलपालनाय मातृ-द्वयमुखेण पतिवत्नीप्रमुखेण सुखेन निजद्विज-बालनायक[३]मुखेन समाकारितः श्रीमद्व्रजराज-कुलदेवस्तदेव सर्व्वमङ्गलसङ्गलसन्मण्डलरचना-मण्डनं मण्डपमाजगाम ॥

अथ वधूस्नपनमङ्गलं सपूर्व्वरङ्गमुच्यते ।—

यदवधि श्रीराधिकादीनां पितृसदनासदनमासीत्तद-वधि परमोत्कण्ठावगुण्ठितस्यापि कौस्तुभकण्ठ-स्याधिकमधिकं लज्जा सज्जा वभूव ॥

(१) अतिमात्रस्वभावतया ।
(२) पादकटक । (३) उत्तमबालक ।

मम तासु ममताभागनुरागसागरस्य तरङ्गलेश-श्चान्यमनः सद्देशसङ्गं मागमदिति ॥

तदेतन्मर्म्माविद्भिः[१] काभिश्चिन्मर्म्माविद्भिरिव तदुदासीनता व्यञ्जनाभाग्भिर्निभृतवाग्भिर्मिथः सम्वदनं[२] कुतश्च नावधारयन्तीं श्रीराधां वाधा-वशमानिनाय ॥

सा तु जातु च नात्मनि तदङ्गीकारनिलयतां विचारविषयतामानयति ॥

यतः ।—

परमोत्कतासोत्कम्पमनस्तया विश्वमविश्वस्ति-विषयमेव करोति[३] । यतः सुमनायमानतावसर-मप्युन्मनायमानतया विमनायमानतापरिसरं नयन्ती तदा तदाचरितवर्णनात्कृताकर्णनाद्गदामर्द्द-नपदा[४]द्गदा[५]दिव निजशोच्यतां सोसूच्यमानाच्छे-कवचसा[६] सखीरुवाच ।—

पूर्व्वं यदासौ विदूरभूरास्ते स्म तदा खलु यथा तदुदासीनतामपि दीनतामानिनाय न तु सम्प्रति

---

(१) मर्म्मज्ञैः ।　　(२) कर्त्तृ ।　　(३) श्रीराधा ।

(४) गदामर्द्दनकरणकात् ।　　(५) रोगात् ।

(६) छेकोक्तिर्वक्रभणितमिति त्रिकाण्डशेषः ।

तथा । तस्य तदनुव्रतस्य च व्रजस्य सौख्यमेव मम सौख्यमिति ॥

सख्य आचख्युः ।—

अयि ! कृशाङ्गि ! तदिदं नामृशामः ॥

यतः ।—

स्फुटमपीदं मुखपुटसम्भिन्नं करोषि ॥

सोवाच ।—अयि ! सवयसस्तदिदं वदामि ।

यदा तस्य विदूरस्थितितास्माकं मनसि स्थिता तदा त[1]द्भावनया तथागति[2]रभविष्य[3]दधुना गोकुलस्थितिभावनया पुनरित्थमेव स्यादिति ॥

सर्व्वाः सास्रमूचुः ।—

हन्त ! भवत्या सातत्यादेव वयं ज्वालिताः । सम्प्रति च मासमाधिकमस्माकं जातं सुखजात- मन्यथा मन्यथाः ॥

सोवाच ।—

तस्य गोकुलागमनादप्यधिकं सुखकिमव- धीयते ॥

सर्व्वा ऊचुः ।—

तस्य भवदङ्गीकरणां भवदिव यत्प्रसङ्गसङ्गिक्रियते ।

---

(१) विदूरस्थिति । (२) विदूरस्थितिः ।
(३) भावनासदृशी सिद्धिरिति न्यायेन ।

सोवाच ।—

मानवह्निना दग्धे वपुषि शीतलजलदिग्धता-
माचरत ॥

पुनस्तस्य ताप एव तदा पन्नाशायापन्नः स्यात् ॥

सर्व्वा ऊचुः ।—

न खलु जलसेकेनेव वचनविवेकेन त्वां सान्त्वयामः । किन्त्वमृतातिरेकेणेति मन्यतां ॥

सोवाच ।—कथमिव ? ॥

सर्व्वा ऊचुः ।—

अस्माकञ्चरास्तत्र प्रस्थापितचराः समागततराः सन्तिः । ते च तस्य रहस्यभावमिमं कथयन्ति ॥

यदा ते तातेन प्रहितमपि जामातुरुचितं
दुकूलालङ्कारादिकमवहदात्माङ्ग[1]मजितः ।
तदा भिन्दंस्तस्मिंस्तनुरुहगणाः कञ्चुकवरं
तथा कम्पः काञ्चीमपि मुखरयंश्चित्रमजनि[2] ॥

तथा च ।—

तदा ते तातेन प्रहितमतुलं रत्नतिलकं
वराहंन्तर्ह्येष स्वमुखसुखवर्णं दधदपि ।

---

(१) प्रति ।　　(२) सकर्म्मकोऽपि जनिः जनयति स्म ।

मिषात्तत्कान्तीनां[1]पिहितमिव कुर्व्वन् सदसि च स्वगाम्भीर्य्यं रक्षन् निखिलजनसौख्यं व्यतनुत ॥

तस्मादमूश्चमूरुनेत्रे वयं सवयसस्तव चरणापात-माचरामः। समाचरास्माकं स्मायकं सुखमिति ॥

तदेवं प्रसङ्गे कृतासङ्गे तस्याः कापि धात्रेयी समागत्य सप्रणयकोपं वितत्य बभाषे।—

अयि! सुतनु! किमत्र वितनुषे ?।

तवाधिवाससमयः समयामास। त्वां सनाम-व्याहारमाकारयति। सा बृहदीश्व[2]रीति ॥

अथ तदेतद्वर्ण्यमानमाकर्ण्य सर्व्वा एव सानन्दं स्यन्दमानबाहुतया तद्बाहुमान्दोल्य तामुत्तोल्य मातृसदनमासादयितुमुद्यमयामासुः ॥

उद्यमसमय एव च श्रीव्रजराजद्वारि श्रीवृष-भानुद्वारि च हारिदुन्दुभ्यादिकमुन्ननाद ॥

यदा मुहुर्दमदमदुन्दुदुन्ध्वति
स्व नान्वितं शुभतमवाद्यमानशे।
तदा सखीतातिरपि सापि चेतसा
समं स्खलत्पदमगमत्प्रसूसदः ॥

---

(१) मिषादित्यान्वयः। (२) मातरमभिप्रेत्य।

गत्वा च ताः प्रागुन्नीतगीतमङ्गलकलसादिसङ्गिनीनां तासां सभां भासयामासुः ॥

अथ विलज्जमानामेनां सजन्ती सा शुभ्रदन्तीततिर्म्मातॄणामाज्ञयानया सह स्नानधाम समाजगाम ॥

ततश्च ।—

वस्त्रालङ्करणवती सती लसन्ती
स्यादेषा भृशमिति भावना तु यासां ।
स्नानार्थं लघु वसनं परं दधाना
ताश्च स्वातुलरुचिचित्रतां(१) निनाय ॥

ततश्च ।—

उद्वर्त्तनं परिमलान्वयिपक्वतैलं
चान्यत्र योक्तुमुचितं न तु राधिकायां ।
स्निग्धं सुगन्धिरुचिरं हरिचन्दनान्तः
सारद्रवादपि वपुस्तदिदं हि तस्याः ॥
स्निग्धं सुगन्धिरुचिरं स्वत एव गात्रं
नोद्वर्त्तनादिवलितं ललना वितेनुः ।
किन्त्वत्र मङ्गलविधौ समयो(२)यमेवं
तस्यां तदा युयुजुरीषदिव स्पृशन्त्यः ॥

(१) कर्व्वुरतां । (२) आचारः ।

अथ वीध्र[१]ऽव्यवसायेन लोध्रकषायेण तां हृताङ्ग-तैलामाचर्य्य लब्धपरभागेण कालेयकाङ्गरागेण च परिचर्य्य शश्वददोषतत्तदोषधिसन्धीयमान-मानस-हरवल[२]परिमलजलपूरकृतपूरणारत्नकुम्भरत्नं शुभ-वस्तूपसम्पन्नधूपस्तूपधृतवासनयत्नं त्रिलोकीलक्ष्मी-सिंहासनगर्व्व—निर्व्वासनकर—कनकासनासन—[३]सम्भृतप्रयत्नं सद्मरत्नस्नानवासस्थानमासादया-मासुः ॥

आसाद्य च समङ्गलगीतं परस्परसङ्गलवणिम-परीतं स्नपयामासुः ॥

किन्तु ।—

स्वस्मिन् हरिवरतायाः,

स्मरणाद्घर्म्माम्भसा स्नाता ।

अन्यत्स्नानं राधा, व्यवहृतिसाधारणं दध्रे ॥

मङ्गलगीतं यथा ।—

जय माधवविधुसङ्गिनि ! राधे ! ।

माधवलाभविधुताविधु[४]राधे ॥ ध्रु ॥

---

(१) वीध्रन्तु विमलार्थकं । (२) मनोहरं वलं यस्य ।
(३) उपवेश । (४) विधुरन्तु प्रविश्लेषे ।

माधव-परिणाय[१]लसदधिवासे ! ।
माधव-हृदयस्फुरदधिवासे[२] ॥
माधव-नेत्र-मधुप-मधुमाधवि ! ।
माधवदयिताजनगणमाधवि[३] ! ॥
माधवमधुकरसुखमुखकमले ! ।
माधव-हृदि रेखाकृतिकमले ! ॥
माधव-वक्षसि मदसम्वाधे ! ।
माधवभाविनि ! वस जितवाधे ॥
माधव-मनसि रुचा रसदापि ।
माधववनमनु विहर सदापि ॥इति॥

अथ मधुकण्ठः पप्रच्छ ।—

ललिता-विशाखे खल्वष्टसु नायिकास्वपि स्पष्टं गणिते । ततस्तयोरत्र वा तत्र वा स्थितिरिति व्यवस्थितिः क्रियतां ? ॥

स्निग्धकण्ठ उवाच ।—तदुक्तमेव पूर्णिमया ।—

यन्मया विभुतामयानेकता सर्व्वत्र निर्व्वाधं साधयिष्यत इति । प्रस्तुतमनुसन्धीयतां ॥

अथ सङ्कोचकारणसाधारणसखीलोचनविस्ता-

(१) विवाह ।　　(२) अधिकगन्धे ।
(३) स्वाधीनमर्त्तृके ।

रणामावार्य्य तिरस्करिणीं प्रसार्य्य प्रणयिनीमुद्-
वार्ज्जनमङ्गमार्ज्जनं यथा ।—

तस्या मार्ज्जनमङ्गराजिरभजत् स्नाता[१]न द्दक् कैरव-
द्वन्द्वं यद्विधुवैभवस्फुरणतः पूर्णार्द्रभावं मुहुः ।
तैलं तत्र तु कारणं मिषतया विख्याप्य वस्त्रद्वयं
प्राणालयः परिधाप्य कृष्णनयनां[२]
वेषास्थलं निन्यिरे ॥

ततश्च तस्यां वेशे लब्धविनिवेशे सति ।—

सीमन्तालकनासिकाश्रुतिभुजावक्षोनितम्बाङ्घ्रियुक्
स्वर्णद्योतितरत्नमौक्तिकमयालङ्कारशोभाकरी ।
कृष्णस्फूर्त्तिजकम्पघर्म्मपुलकस्तम्भाश्रुभिर्ल्लज्जया
गुणैरप्युदितैः सुशोभितवपुः श्रीराधिका दिद्युते ॥

तदनु दर्पणसमर्पणमनु सख्यास्तया सह वचन-
प्रतिवचने ।—

इन्दुर्निर्म्मञ्छ्नपात्री प्रकटमुपरि य-[३]
द्भ्रम्यते तस्य धात्रा
पद्मं निर्म्माल्यमप्सु प्रतिदिशमपि यत्
क्षिप्त[४]मेवास्ति तस्य ।

(१) राजेर्विशेषणं । (२) असिताक्षीश्च ।
(३) हेतोः । (४) धात्रेत्यन्वयः ।

आदर्शश्चायमर्च्चापदमभिकरणं

तस्य सम्पाद्यते(१) य-(२)

त्किं तत्(३) प्राणालि ! त(४)त्ते मुखमिह सुचिरं

पश्य राधे ! विभाति ॥

अथ ललितगतिकलकमलमुख(५ कलहंसीततिरिव सखीततिरमूममूदृशराजहंसीमिव विराजमानां मध्ये निधाय प्राग्वर्णितलसदखण्डशुभमण्डपतल-कृतोपवेशपेशलपुरन्ध्रीणां नीरन्ध्रमानन्दं सन्धाय सभामासां भाजयामास। सभाजयामास च कनका-सनासनचामरचालनादिभिः ॥

तदेवं धन्ययोरनयोर्वरकन्ययोर्युगपदेव तत्र तत्र प्राङ्मुखतया कृतोपवेशयोर्लब्धमातृतद्यातृ-मुख-परन्ध्रिसदेशयोरधिवासमङ्गलसासन्नं जातं ॥

तत्र च ।—

मान्याभिर्वरकन्ययोस्तनुरुचि(६)व्यत्यस्तरोचिश्चितं

(७)भालान्तस्तिलकद्वयं निजनिज-

स्थाने सङ्गीतादिकं ।

---

(१) यदन्तं सखीवचः । (२) हेतोः ।

(३) श्रीराधावचः । (४) तदादि सखीवचः ।

(५) ललितौ गतिकलौ यस्याः । कमलं मुखे यस्याः सा च सा च ।

(६) गौरं कृष्णस्य कृष्णाराधायाः । (७) विन्यस्तं ।

यद्यद्वर्णामभीक्ष्यते[१]ऽपि मिथः स्फूर्त्यैकतामागते
शश्वद्भ्रान्तिवशाद्विलज्जिततया कम्पं दरानञ्चतुः ॥

ततश्च ।—

दर्भाग्रैरभिषिच्य तद्वरवधूयुग्मं पृथक् स्नातका-
स्तत्तद्वेदविधा विधानमदधुः पश्चादिदं प्रोचिरे ।
दाम्पत्यं युवयोरमा-मधुजितोः साम्येन सम्पद्यता-
मित्याशीर्ज्जनरीतिरेव लपितं नस्तूर्द्ध्वमस्माद[२]पि ॥

तदनु च पुरन्ध्रयः ।—

वासयोग[३]मधिवासनाय ता-
श्चिक्षिपुर्वरवधूतनू अनु ।
यस्तु तत्र मिथुने भव[४]न्मिथो
वासयोग इति सङ्गतिं गतः ॥
श्रुतिद्वयं तत्र न केवलं तयो-
र्यवाङ्कुरेणाङ्कुरित तदा ऽपधुः ।
मनोरथं[५]चाथ कृतानि सर्व्वतो
भद्राणि यद्भान्ति सदैव तादृशां ॥

---

(१) वरकन्ये । (२) रमा-मधुजितोः साम्यादपि ।
(३ चूर्णानि वासयोगाःस्युः । (४) वर्त्तमानः ।
(५) मनोरथं च यवाङ्करेण मिवनोद्यमेन । यवःस्तबवत ।

ऊर्णाकङ्कणबन्धान्मणिकङ्कणशुभ्रमप्यनयोः ।
मणिबन्धद्वयमरुचत् कान्ति[१]मङ्गलमपीह सद्धेतुः ॥

मृत्स्नागन्धशिलादिवन्दनविधिं तत्राधिवासे बहि-
र्दध्रे माधवराधिकाख्यमिथुनं मङ्गल्यवर्य्याकृते ।
मन्येऽन्तः स्फुरितं यदत्र च निज-
प्राथ्र्यं ववन्दे[२] तु तत्
किं तन्न श्रुतमन्तरङ्गबहिरङ्गेत्यादिशब्दस्मृतेः ॥

तदेवं विधां विधाय तैलकृतप्लवहारिद्रविद्रवमपि तयोर्वस्त्रकृतास्तरे मस्तके न्यस्तं कुर्व्वत्यः पूर्व्वज-[३]वरवर्णिनी पूर्व्वकं पतिवत्न्यः पूर्व्वादिदिक्षु स्थिता दूर्व्वाग्रेण स्नावयाम्बभूवुः ॥

तत्र परस्परं गापयाम्बभूवुरपीदं ।—

राधामाधवयुगलं । स्नेहरागमयतैलहरिद्रा[४]परि-
वलतां मुहुरचलं[५] ॥ ध्रु ॥
नवमिदमवतान्मिथुनं
गोकुलगोकुलवसतीन् सर्व्वान् ।
कुरुतादपि पुरु[६] गुरुसुखसन्ततिसन्ततगर्व्वान् ॥

---

(१) कृष्णस्य । (२) मिथुनं ।
(३) ब्राह्म । (४) कर्त्री ।
(५) दृढं । (६) प्रचुर ।

भृशमपि विहरतु हरतु च चित्तं हरतु च दुःखं नित्यं ।
प्रथयतु कान्तिं कान्तिमपीह प्रथयतु महिमादित्यं ॥
सकल(१)सकलगुणमिह

गुणयतु पुनरनुनयतान्निजलोकं ।
नयननयन(२)पदसम्पद-

मयतां दयतां(३) शश्वदशोकं(४) ॥
जीवसुजीवननिजरूपामृतभृतमपि कुर्व्वदशेषं ।
राजतु राजतु लाजयिविभवं

विभवतु विस्मितशेषं ॥इति॥

अथ रक्षामन्त्रलक्षाभिमन्त्रणाया तत्तदक्षाम-प्रभावसमधिकसम्पदोषधियन्त्रपरतन्त्रतया च प्रत्यूहस्य यन्त्रणाया कृतशुभतन्त्राभ्यां(५) ताभ्यां तत्र तत्र गुरूणामाज्ञया मात्रोर्मात्रोराज्ञया च गुरूणामभिवादनमनुपुरून्नतसुखसदनं तेषामभि-वदन(६)मासीत् ॥

यथा ।—

कृष्णोऽसौ परमरमापतिस्तथा-
सौ राधा स्यात्परमरमास्मदीयगोष्ठे ।

(१) कलासहित । (२) नीतिः ।
(३) ददातु । (४) शोकाभावं ।
(५) प्रधानाभ्यां । (६) आशीः ।

यस्मात्ते[1]वयमिह नित्यमेव शर्म्म
स्वं तत्त्वरुचिभवमुच्चकैर्भजामः ॥

अथ तौर्य्यत्रिकशौर्य्यवहलकोलाहलतया निज-निजपल्लीमतल्लीचयमध्यस्थदेवालयमयमध्यस्थलं सकलवेदसारायनं लक्ष्मीनारायणं सभाजयितुं पृथक् पृथक् क्रमतया वरः सहव्रजनरवरः कन्या च सा सहव्रजजनीका धन्या जगाम ॥

तत्राश्चर्य्यमिदमासीत् । यदावरः स सुवेशः प्रविवेशः । तदा तत्कान्तावन्तर्हिते लक्ष्मीहिते[2] केवला लक्ष्मीरिव व्यलक्ष्यत । तदेवं कन्यया कृत-प्रवेशे सदेशे केवलो लक्ष्मीहितः । उभयोर्निजनिज-क्रमेण बहिरपक्रमे पुनरवहिते[3] तत्र तत्र यथा-वदेव देवताद्वयमिति ॥

लोकास्तु तस्य[4] तस्या[5] आवरणं ज्योत्स्नान्ध-कारगताभिसारवेशस्येव मन्वन्तः ॥

तदेतदवधार्य्य मधुमङ्गलः साश्चर्य्यमाह ।—

हीही पश्यत पश्यत मन्मित्रदम्पत्योः खनिपत-

(१) वहुवचनं ।　　(२) नारायणे ।

(३) अवधानविषये कृते सति ।　　(४) नारायणस्य ।

(५) लक्ष्म्याः ।

दाम्पत्यादविरलता । यदियं नारायणमपि सोऽपं लक्ष्मीमपि नात्म-कान्तिसात्करोतीति ॥

अथ समापनाय प्रकृतमनुसरामः । ततः कृत-सुरार्च्चनौ विविधवाद्यगीतान्वितौ निजं निजममूं गृहं वधुवरौ[१]पृथग्जग्मतुः ॥

तदा वहिरिदं वभौ हृदि पुनस्तयोरन्यथा वरं सपदि कन्यकान्वगमदेष चामूमिति ॥

तदेवं क्रमतः सभाद्वयं यथास्वं कथनमाकर्ण्य कथकादीनां स्वस्वावासप्रस्थानं निर्वर्ण्य वर्ण्य-मानपरस्पराभिगमनमेव मिथस्तन्मिथुनं रहसि साक्षादधिगमयामास ॥

इति श्रीमदुत्तरगोपालचम्पूमनु श्रीराधा-माधवाधिवासप्रसाधनं नाम त्रयस्त्रिंशं पूरणम् ॥

---

(१) उत्तरपदे हृस्वत्वं । इकोह्रस्वोऽङ्यो गालवस्य ।

चतुस्त्रिंशं पूरणम् ।

अथ पूर्ब्ववदेव सभाद्वयकथायुगलमेकीकृत्य कथयिष्यामः ॥

यत्र मधुकण्ठ उवाच ।—

तदेवं नक्तमपि सर्व्वं गीतनृत्यादिपर्व्वणानुरक्तं विधाय वर-कन्ययोः सम्प्रदायः क्षणादिव प्रभातमायातवान् ते धन्ये वर-कन्ये पुनः काञ्चित्क्षणान्निमेषवेषतया निन्याते काञ्चित्तु युगसहस्रसमुदायतया ॥

यतः ।—

कदाचिद्ध्यानान्तर्व्वलयितसमाधी वर-वधू
जनौ साक्षात्तुल्यं स्वपरिणयभव्यं ददृशतुः ।
कदाचिच्चिन्ताभिर्व्विकलितमती कर्हि भविता
प्रभातं तद्यस्मिन् परिणयनमित्याममृशतुः ॥

अथाचरितजागरे वहलवाद्यकोलाहले
समुद्यदरुणप्रभाविवृतरागसाम्ये व्रजे ।

हरिं तमपि राधिकामपि च तां यथा स्वङ्गतः
शुभाय सवयोजनः स्नपनमङ्गलं निर्म्ममे ॥

तत्र च प्रथमं सर्व्वसुखसाधिकायाः राधिकायाः स्नानानन्तररचनां प्रचारयिष्यामः ॥

गौरकान्तिररुणाम्बरा पुनः
स्वप्रकाशनवता सुखप्रदा ।
राधिकेयमुदिता त्रिदिद्युते
यद्वदाद्विशशभृ[१]त्कला द्वयी ॥

यस्या[२]मङ्गानि विद्युत इव, केशा विद्युत्वन्त इव । ग्रीवाद्यधरावयवाः स्वर्णवर्णसुरलताया विभागा इव । भ्रमरकशोभिसुखं कमलायमानत[३]त्कुसुममिव । भालं बालकलाधर इव, नेत्रे तारके इव । भ्रूलता त्रिन[४]तेव, नासिका विशिखविशेष इव । कर्णयुगलं सुवर्णवर्णलताग्रयुग्ममिव । कपोलद्वयं निस्तल-तत्फलद्वन्द्वमिव । मुखं पद्मरागद्वारधरवृत्तकनक-पात्रमिव । दन्तपङ्क्तिस्तदन्तःस्थापितमेघमुक्त-मुक्तावलिरिव । मृदुस्मितवाक्कुसुमितवल्लीसुरभि-रिव । वासदलं[५] नव्यदलमिव । वक्षःसुदुर्ल्लभलक्ष्मी-

(१) शुक्लद्वितीयाचन्द्रः । (२) राधायां ।
(३) सुरलता । (४) धनुः । (५) अधरः ।

स्थलमिव तत्र चालक्ष्यं किमपि द्वयं निधिकल-सद्वयमिव । उदरं चलदलकिसलयदलमिव । तनुतनूरुहलेखा तन्मध्यसम्बध्यमानरेखेव । मध्य-प्रदेशमनुमध्यमं देवशिल्पिकल्पितवेदिमध्यमिव । नाभिस्त(१)दातिसनीडगभीरतीर्थमिव । चरणपर्य-न्ततान्यमन्यद्विचित्रपरिधानमङ्गयुगं विविधरङ्ग-मण्डितं करिशुण्डाप्रधानयुग्ममिव । नखरकान्ति-धरचरणयुगलं त(२)द्धृतसशीकरनवपल्लवतल्लज इव । भुजाद्वन्द्वमखरनालहेमारविन्दिनीनालद्वन्द्वमिव । करद्वन्द्वमपि कमलद्वन्द्वमिवेति योग्ययुग्मयुग्म-तया सर्व्वं शुशुभे ॥

अपि च ।—

कौटिल्यमेव केशानां वेशः । चिल्लीचूर्णकुन्तला-वल्येव पत्ररचना । अविच्छेद(३)तिलककृतवर्ण-भेद एव तिलकं । विलोचननीलोत्पलप्रतिभासा-(४)वेव कर्णावतंसौ । स्मितप्रतिच्छविरेव गन्धवहा-(५)मुक्त(६)मुक्ताफलं । सै(७)व च वक्षसि कृतविहारा-

(१) मध्यम ।　(२) शुण्डायुगलं ।
(३) निरन्तर ।　(४) प्रतिविम्बौ ।　(५) नासा ।
(६) बद्ध ।　(७) स्मितप्रतिच्छविः ।

हाराः। मृदुलमर्म्मरसिचयादुच्छलत्कान्तिविलास एव काञ्चीकलापः। तिलकवत्तत्तदलङ्कारकारणकरेखा एव ग्रीवाभुजादिभूषणसम्भाराः। किं वहुना? स्वयमुत्तमाङ्गमेव सर्व्वेषामङ्गानामुत्तमालङ्कार इति॥

तदेवं विस्मयप्रयुक्ताः पुनरुक्ता इव ताः[(१)]।

श्रीराधिकायाः प्रसाधिका यदारम्भत एव स्तम्भमागतवत्यः। तदा चिरादेव तदीयवेशरचनाय चातुरीमाचरितवत्यः।

तथा हि।—

यस्याः कान्तिभिरुच्चै,
र्भर्त्सितकान्तिः समत्सरः सोमः।
तत्तापज्वलदङ्के,
स्वहृदि कलङ्केन सङ्गतः शङ्के॥
अपि दुर्व्वर्णा[(२)] यस्या,
रुचिमनु रुचिरां सुवर्णतां याति।
तस्मादपरसुवर्णा,
स्थाने[(३)]दुर्व्वर्णतामयते॥

---

(१) व्यर्थीभूता इत्यर्थः। (२) रजतं।
(३) योग्यः।

यस्याः साङ्गान्यङ्गा,-

न्यङ्गीकुर्व्वन्ति दर्पणाच्छवितां ।

द्विगुणविभूषणशोभां

गुणयन्तीव च विमृश्य दृश्यन्ते ॥

यस्या भाल-कपोल-

द्वय-रदनालिद्विता[१] सुधाद्युतयः[२] ।

यन्मुखमनु सुखभाज[३],-

स्तत्सुषमां किं स[४]लाञ्छनीजुषतां ॥

तस्या वेशविधाने,

नेत्रनिधाने समागताः सख्यः ।

चित्रन्ति स्म प्रत्युत,-

तच्चित्रद्युतिविभूषिताः परितः ॥

पञ्चभिः कुलकं ॥

अथ मातृभिराम्रेडित,-

मर्थे[५] तस्मिन् कुमारीभिः ।

प्रणयजकोपविमिश्रं,

विश्राव्यामूः[६] प्रवर्त्तितास्तत्र[७] ॥

---

(१) युग्मं ।　(२) चन्द्रमसः ।

(३) चन्द्रमोविशेषणं ।　(४) प्रसिद्धश्चन्द्रः ।

(५) प्रसाधने ।　(६) प्रसाधिकाः ।　(७) प्रसाधने ।

यत्र च तस्याः केशा,

वेशार्थं वस्त्रमार्ज्जनं याताः।

जातास्ते तु सुजाताः,[१]

सर्व्वासामभिनिवेशाय ॥

अपि घनरुचिजयगण्याः,

शीर्षण्या[२]स्ते परस्परं मिलिताः।

भङ्गं[३] सुबहुं वहन्तः,

कृष्णा[४]मपि भङ्गमानयन्महसा ॥

अपि घनजयिरुचिधन्या,

शीर्षण्यानां समाचिति[५]स्तस्याः।

अचलाप्यूर्म्मिमदङ्गी,

प्रचलज्जलाङ्गीं जिगाय कालिन्दीं ॥

यद्यपि धूपं गमिताः,

शमितार्द्रत्वं[६] गताश्चिकुराः।

तद्यपि च सार्द्रामजयं,-

स्ततिमतिमवधूमयोनीनां ॥

---

(१) कोमलाः : (२) केशाः।

(३) कौटिल्यं। पक्षे तरङ्गं। (४) यमुनां।

(५) समाहारः।

(६) आर्द्रं आर्द्रत्वं। अन्यथार्द्रसार्द्रयोरेकपर्य्यायता न स्यात्।

तत् कैशिकमालीभिः[१],
प्रसृतं चक्रे परिष्कर्त्तुं ।
अपि तस्यै[२] पुरुरुरुचे,
स्निग्धश्यामा हि तद्भासः ॥
कङ्कतिकासङ्कलिताः,
केशास्तेऽमी परस्परं वलिताः ।
स्तुतिभिस्त्रपया नूनं,
व्यतिपिहितं स्वं यथास्वमाचेरुः ॥
अथ कुसुमादिश्रेणी,
मिश्रावेणीव्यरोचतामुष्याः ।
गङ्गादिकसंसङ्गा-
द्वेणीभावङ्गता यथा कृष्णा ॥
सा पुष्पितया वेण्या,
रुरुचे पुष्पेषु तूण्येव ।
अजितं विजितं रचय,-
त्तस्या दृष्टं हि काण्डपृष्ठ[३]त्वं ॥
शिरसि ग्रथितकचानां,
वलये रत्नावली वलिता ।

---

(१) केशवृन्दैः । (२) राधिकायै ।
(३) शस्त्राजीवी काण्डपृष्ठः ।

सन्तमसाचितनभसि,
　　प्रथते तारातर्तियद्वत् ॥
अथ सिन्दूरजरेखा,
　　शुशुभे तस्याः शुभे शिरसि ।
कृष्णघने रुचिसुघने,
　　रोहितलेखेव या कलिता ॥
अथ मुक्तावलिवलिता,
　　भाले ललिता ललाटिका(१) कलिता ।
अभिनवशशधर-मूर्त्ति,-
　　स्पृ(२)गुपरि पूर्त्तिर्यथा भानां ॥
चिल्लीमृगमदवल्ली,
　　मध्ये(३)लसति स्म भालमेतस्याः ।
अलिपालिद्वयपलितं,
　　पर्णं वा(४)स्वर्णवर्णकञ्जस्य ॥
अगुरुद्रवकस्तूरी,-
　　तिलकं रेजे सरोजाक्ष्याः ।
यत् किल तिलकं जज्ञे,
　　सर्व्वेषामेव वेषाणां ॥

---

(१) ललाटिका पारिपाट्या ।　(२) पूर्त्तेति विशेषणं ।
(३) द्वन्द्वानन्तरं बहुव्रीहिः ।　(४) इव ।

नेत्रे तस्याः क्षेत्रे,
कृष्ण(१)रुचीनामितीव तत्रैव ।
उप्तं कृष्णफलार्थं,
कज्जलबीजं तदालीभिः ॥

अञ्जनरेखाव्याजा,-
दस्या नेत्रत्रि(२) भागान्तं ।
निजवाणं किल जानन्,
जाग्रत्फलमाचरत्कामः ॥

कर्णौ स्वर्णलताग्रे,
यत्र च मणिकर्णिके पुष्पे ।
नासाकीरत्रोटिः,
शुशुभे मुक्ताफलेन यत्कोटिः ॥

या नासा तिलपुष्पं,
युक्ता मुक्ताफलेन राधायाः ।
अस्त्राग्रं फलमिति तां,
कृष्णः पुष्पायुधास्त्रमूहेत ॥

अवतंसद्वयफुल्लं,
कर्णद्वन्द्वं रराज राधायाः ।

(१) श्लेषः ।　　(२) तृतीय ।

नेत्रालि-द्वयमसक्त-
द्वलातिवल्गुस्फुटं स्म यत् स्पृहया ॥
विलसति कस्तूरिकया,
चित्रं यत्र स्म गण्डान्तः ।
त[1]त्कलयन् स्वकलङ्कंविधु,-
रपि सुतरां कलङ्कमौहिष्ट[2] ॥
रुरुचे चिबुकममुष्या,-
मगुरुजगन्धस्य बिन्दुना शितिना ।
यद्वत्पक्वरसाल,-
स्याधः[3] सुप्तेन भृङ्गेण[4] ।
रेजे कपोलमकरी,
सा सा कस्तूरिका लिखिता ।
या प्रियकुण्डलमकर,-
द्वयसुभगप्रेयसीप्रतिमा ॥
कटकाभुजयोरस्याः,
कटकाः[5] सन्तु प्रियं जेतुं ।

---

(१) गण्डान्तः कर्मभूतं । (२) वृतवान् ।
(३) कर्त्तृ । (४) करणेन ।
(५) भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियामिति नानार्थे । वरूथिनीबलं सैन्यं चक्रं चानीकमस्त्रियामिति पर्याया-
चक्रमत्र सैन्ये ।

अथ कथमङ्गदयुगलं,
प्रसभं तस्मिन्ननङ्गदं भविता ॥
श्यामस्तवकौ मुक्ता,-
वदनौ तत्पारिहार्य्ययोः[१] कलितौ ।
किम्वा पाणिसरोज,-
च्युतमधुपानान्वितौ मधुपौ ॥
जितनवकल्पद्रुदले,
वृषरविपुत्र्या भुजा[२]दले विमले ।
मुद्रालिद्युतिसुकले[३],
रेजतुरुद्यत्कले[४]परितः ॥
तस्या नखमणिलक्ष्मी,-
मनुराजन्ती सदूर्म्मिकाश्रेणी ।
तामनु सवयस्ततिरिव,
शोभां लोभान्विता लेभे ॥
मणिवन्धौ भणिवन्धा,-
दपि जज्ञाते मनोवन्धौ ।
अपि करशाखामुद्राः,
क्वचन विशाखावयस्य[५] मुद्राः स्युः ॥

(१) आवापकपारिहार्य्यौ । हस्तसूत्रे । (२) करौ ।
(३) दातृभोक्तृणी । सुकलोदातृभोक्तरीत्यमरः ।
(४) उद्यत्कला ययोः । (५) विशाखाया वयस्यस्यानन्ददाऽयः ।

ग्रैवेयकसखहारा,-
हारा[१]स्ते स्युः कदाचिदप्यत्र ।
हरि[२]रत्नं वत ! तर्ह्यपि,
यस्मात्तत्राथ नायको व्यजनि ॥
घनरुचिकञ्चुकरुचिरा,
त्रिविधमणीनां विराजिता राजिः ।
इन्द्रधनुःप्रतिमाया[३]
मुक्ताश्रेणीवलाकया रुरुचे ॥
मृगमदकृष्णाचोली,
कुङ्कुमचित्रा विचित्रतामूहे ।
पीताम्वरपरभागा[४],-
त्पीताम्वरतां[५]गता तत्र ॥
सुभग-कटी[६]रक-घटना,
महसा घटिता पटी तस्याः ।
प्रकटी चक्रे सुदृशां,
स्व-विषयदृष्टेर्नटी-भावं ॥

---

(१) हरिसम्बन्धिनः ।
(२) हरिसम्बन्धसम्भावनासूचनामाह हरीति ।
(३) त्रिविधरत्नपङ्क्तिः ।
(४) पीतं अम्बरं येन परभागेन तस्माद्धेतोः ।
(५) कृष्णतां ।   (६) कटि ।

यद्वैवाहिकवस्त्रे,
शास्त्रेष्वानन्दपटपदं ख्यातं ।
कर्म्मण्यन्निति[१] सिद्धं,
विस्तारार्थात्पटे[२]स्तत्किं ॥
मणिरसना वत ! मध्ये,
वद्धा सत्येव सा तस्याः ।
कथमथ हरिचित्तं वा,
वद्धं कुर्य्यान्न त[३]द्विघ्नः ॥
तस्या गजगामिन्या,
मणिहंसकनूपुरध्वनयः ।
घण्टाटण्टन[४]तुल्या,
दध्युः[५] कम्पं सपत्नीषु ॥
कृतचरणाम्वुजचरणा[६],
विहृमञ्जीरौ तु खञ्जनौ मञ्जू ।
हरिरपि य[७]त्कलकलने[८],
हरितां[९] जयवन्मुदाऽमनुत ॥

(१) सूत्रेण ।
(२) चौरादिककथादिगतपटधातोः । पटविस्ताररचने ।
(३) हरिचित्तवन्धनः ।　(४) अनुकरणं ।
(५) सम्भावनायां ।　(६) चरगतौ ।
(७) राज्ञः प्रस्थाने कमलो पारिखञ्जनफलश्रवणं दिग्जयसूचकं ।
(८) श्रवणे ।　(९) दिशां ।

अनुनखचन्द्रावलि,

सा शुशुभे पादाङ्गुरीयकश्रेणी ।

नक्षत्रालिसदृक्षा,

यस्मि(१)न्नक्षीणि कैरवन्ति स्म ॥

स्पर्शात्पदतलमस्याः,

कोकनदाभं तदा जज्ञे ।

लाक्षारसस्तु मिथ्या,

कीर्त्तिं तस्मिन्नियर्त्ति स्म ॥

अकुरुत रक्तकयुगलं

प्रच्छदयुगऽलं स्वसादऽलङ्करणं ।

तदपि च निर्ज्जल-जलधर,-

वृत-शशधरवद्व्यलोकि तत्सर्व्वं ॥

याः पूर्व्वं निज-निजयाद्दशावयस्या-

स्तस्याः श्रीरसरसिका बभूवुरेताः ।

पश्यन्त्यामथ मुकुरं तदीययास(२)-

न्नावेशः स यदभिदा निदानमासीत् ॥

तदेवमेतां प्रसाधितां प्रसादितामपि कम्रां नम्रामपि ॥

---

(१) शोभने ।

(२) श्रीराधासम्बन्धिन्या दशा तस्याः श्रीरसरसिकाया सन्नित्यर्थः ।

मङ्गलसङ्गतप्रदेशं मातॄणां पेशलसंदेशमेवश-
यन्त । ज्योतिष्मदोषधीना[1]मोशधीशकलामिव ।

ततश्च तां पटुवटुभिः कृतस्वस्तिवाचनस्वस्तिकां धृतवैष्णवमन्त्रन्यासप्रशस्तिकां मङ्गलवलयनिलयं निलयं सहचर्य्यया सहचर्य्यः सञ्चारयामासुः ॥

ततः सखीभिः सह नर्म्मशर्म्मा
कृष्णातितृष्णाकुलमर्म्मधर्म्मा ।
कथञ्चनेयं वत ! कल्पकल्पं[2]
दिनं विचिक्षेप विकल्पकल्पं ॥

अथ वरयात्रावर्णनपात्राय कल्पते स्म ।—

तत्र तस्य वेशरचनावचनानामादितः शोभां श्रोतृलोभाय वर्णयिष्यामः ॥

इन्द्रनीलमुखनीलगणाना-
मिन्द्र एष वररूपवरेशः ।
तद्विवाह-विधये स्नपिताङ्गः
कान्तिभिः स्वमपि सुष्ठु जिगाय ॥

यत्र चाखिलं कान्तिरेवेति सकलं लावण्यमेवेति

(१) कर्म्मधारयः ।　　(२) तुल्यं ।

समस्तं सौरभ्यमेवेति । कृत्स्नं कौमल्यमेवेति न विवेक्तुं शक्यते ॥

तथा निखिलं भूषितमेवेति भूषणमेवेति वा तद्वदुपमेयमेवेत्युपमानमेवेति वानयनादीनां प्रकाशनीयमेवेति प्रकाशकमेवेति वा विचारपदवीं नारोहति ॥

यत्र च मुखमिव[1] मुखमित्यादिरनन्वयनामाप्युपमासुखकृदन्वयमापद्यते ॥

यत्र च मुखमिव नेत्रं नेत्रमिव मुखं कमलं जयति दन्तकान्तिवन्मृदुस्मितं मृदुस्मितवद्दन्तकान्तिः सितकान्तिं तिरस्करोतीत्यादिकमुपमेयोपमा नामापि सुतरामनुपमानत्वं प्रपद्यते यत्र च मुखं निजद्वितीयतया राधाया मुखमेव स्मारयति नेत्रमपि तस्या नेत्रमेव पुरःस्फुरद्रूपं करोतीत्यादि स्मरणानामालङ्कारः सर्व्वमलङ्कारं विस्मारयति ॥

यत्र सौन्दर्य्य-सम्राजः[2] स्वेनैव वैभवं विभव-[3] देव राजते ॥

---

(१) मुखनेत्रयोः कमलजये नेत्रमुखे उपमाने । एवमग्रेऽपि ।
(२) रूपकं । (३) व्याप्नुवत् ।

तथा हि ।—

विश्वदृष्टिप्रसारवृष्टिसमाकृष्टिरेवाभिषेकः । श्रीद्भालमेवार्द्धकलाधराकारतिलकं। निस्तलाकृति-शस्तमस्तकमेव मेघडम्बरच्छत्रं। चलदपाङ्गस्मित-च्छवी एव चामरे । सर्व्ववशीकरणाकारणमुखमेव पूर्णपूर्णराजचय[१]पराजयसामग्री । सर्व्वान्तर-ज्योभिनवयौवनमेव शौर्य्यं । त्रिनतभ्रूयुगमेव त्रिनता। खगपतिचञ्चुसमताचुञ्चुघ्राणमेव वाणा-विशेषः । भङ्गीविन्यासस‌ङ्गिकर्णावेव पाशौ । पृष्टदीर्घताजुष्टभुजावेव परिघौ । कामाङ्कुशा[२] एवाङ्कुशाः । त्रिरेखी[३]कृतसर्व्वोत्कण्ठकण्ठ एव कम्बुराजः । करचरणस्थितचक्रमुखलक्षणचक्र-[४]वालमेव चक्रं[५]। स्थूलताविलसदूर्व्वादिभागावेव जयस्तम्भौ । विस्तीर्णताकीर्णश्रोणिफलकमेव देशवलयः । गम्भीरताभिराजिनाभिरेव कमला-करः[६]। अतिसुन्दरतुन्दमेव बलिवलयावासः । विचित्रपद्माकारनेत्रे एव चिन्तामणी । लक्ष्मी-

---

(१) राजा चन्द्रोपि । (२) नखाः त्रिकाण्डशेषे ।
(३) त्रिगुः । (४) समूहः । (५) सैन्यं ।
(६) शोभा ।

निधानवक्ष्यस्थलमेवावरोधः । श्रीमत्पदद्वन्द्वमेव सर्व्वेषां सुखास्पदं पदमिति ॥

अथ परमहितनिहितावर(१)लक्ष्मीधनाः सापघ-नास्तत्परिष्कारगणा वर्णयिष्यन्ते ॥

मुकुटं रत्नप्रभवं,
मूर्द्धनि कृष्णस्य सर्व्वदिग्द्योतं ।
उदयगिरेर्वरशिखरे,
ऽद्योततचण्डांशुमण्डलं यद्वत् ॥

श्यामस्निग्धमभङ्गः,
सद्भावस्वच्छरत्नसम्वीतः ।
शुशुभे केशवकेशः,
किम्वा राधामनःसारः ॥

कुङ्कुम-तिलकं भाले,
तद्युपमेयं-मुराराते: ।
श्यामल-शशधर-शकले,
यदि गुरुरीक्ष्येत कुत्रापि ॥

राधा-वदनं चन्द्रः,
स तदनु कर्त्ता परश्चन्द्रः ।

---

(१) कृत्रिम ।

इति हरिरित(१)रतिपूर्त्ति,-
स्त(२)त्प्रतिमूर्त्तिं विभर्त्ति किं तिलकं ॥

कृष्ण-भ्रूयुगलन्त,-
द्धनुरनुकृदपि स्फुरच्चित्रं ।

यत्खलु विनापि वाणं,
तामपि राधां स्वयं जयति ॥

राधा-मुखेन्दुलोभा,-
त्तदक्षियुग्मञ्च कोरतां किमगात् ।

सम्प्रति यत्तदलाभा,-
च्चञ्चलमूर्त्ति(३)स्म चञ्चूर्त्ति ॥

एकं मराडनमङ्गं,
मण्डयदेकं यथास्वमाभाति ।

जयतात् कुराडलयुगलं,
युगपच्छ्रुतिगराडमराडनं यत्तु ॥

श्रवसोर्न परं भूषण,-
मासीत् कृष्णस्य कुण्डलद्वन्द्वं ।

अपि गराडद्वितयस्य,
प्रतिविम्बं यद्व्यलोकि तस्यात्र ॥

---

(१) प्राप्त ।　(२) चन्द्र ।　(३) सतु ।

कर्णलतायुगमानिशं,
भूषणदम्भात्प्रफुल्लमेतस्य ।
युक्तं तदिदमिदं य,-
न्मुहुरपि राधा-वचःसुधासिक्तं ॥
नित्यं केशिनिहन्तुः,
पूर्णां कैशोरमुद्राति ।
मात्रा न सिविन्यस्ता,
मुक्ता पुनरेतदाचर(१ न्नव्यं(२ ॥
श्रीहरिनासा सक्रम,-
मुन्नतशिखरा कुतूहलं तनिता ।
भ्रु-भुजङ्गी यदि तस्याः,(३)
खगपति-चञ्चुभ्रमेण घूर्णेत ॥
रञ्जितमजनि तदोष्ठं,
न हि वहिरङ्गात् परं(४)रागात् ।
राधाधरसंस्पर्शं,
प्राप्ति हृदिजादन्तरङ्गा(५)च्च ॥
अधरस्तस्यामृतखनि,-
रिति राधाया विनिश्चितं सत्यं ।

(१) लड् । (२) स्तव्यं ।
(३) सकाशात् । (४, केवलं ।
(५) रागात् ।

अन्तर्दन्तावलिमिष,-
मिह लसतश्चन्द्रलेखे द्वे ॥
चिवुकं तमसः खण्डन,-
मथ मण्डनमस्य वक्त्रस्य ।
इति किल मण्डनमन्य,-
न्मण्डन(१)लोकश्चकार नैवात्र(२)।
मुखमघशत्रोस्त(३)न्मह,-
हर्षव्यक्तेर्मुखं(४)जातं ॥
प्रेक्षाकारिणि(५)तां(६)य,-(७)
द्दर्पणतुलया समर्पयति ॥
दर्पणमपि किं मनुषे,
निजमुखतुल्यं मुरारातेः ।
इति किल सम्मुखवलितं,
तस्य व्यदधादमुं(८)कोऽपि ॥
कंसद्विषि यः कण्ठः,
स तु जगदुत्कण्ठ(९)माचचारेति ।

---

(१) पचाद्यच् । (२) चिबुके । (३) विवाह ।
(४) द्वारं । (५) जने ।
(६) हर्षव्यक्तिं । (७) मुखं ।
(८) दर्पणं । (९) उदग्रीवं ।

यक्तं स इव द्रष्टुः,
स्वत उत्कर्षं स यद्वाष्टि ॥

नन्दति नन्दजहृदयं,
रेखारूपश्रियेति विख्यातं ।

तस्मिन्[1] विभवति या सा,
तां राधाख्यां त[2]देव जानाति ॥

वक्षसि दक्षिणभागात्
प्रभवति[3] तनुरोमदक्षिणावर्त्तः ।

श्रीवत्साख्यः किम्वा,
कान्तास्मृतिजान्तरावर्त्तः ॥

ग्रैवेयकहाराणा,-
मुपमाकृष्णास्य तर्हि स्यात् ।

विद्युद्वकपङ्क्तीना,-
माश्रयतां चेद्व्रजेत नव्याब्दः ॥

पृथुतरहीरकचन्द्रे,
कौस्तुभसूर्य्ये लसत्तारे ।

उरसि हरेः शुभशोभा,
या स्यात् किं व्योम्नि सापि वीक्ष्येत ॥

---

(१) हृदि । (२) कृष्णाहृदयमेव ।
(३) व्यक्तीभवति ।

नवरत्नोचितमङ्गद,-
युगमिह दोष्णोर्व्यराजिष्ट ।
यद्वज्ज्योतिश्चक्रं,
ग्रहनवकान्वयि विभाति तत्तुल्यं ॥
मणिवलयोर्मीवलया,
हरिसेवायां रुचिं जग्मुः ।
त इमे गुरुशिष्याभा,
गुरुलाघवतो वितर्क्यन्ते ॥
अङ्गदवृत्ता(१)वलया,-
स्तद्वद्वृत्ताश्च मुद्रिकासङ्घाः ।
क्रमतः श्रितलघवो ये,
लघवोऽप्येषां तथा(२) युक्तं ॥
साङ्गदवलयप्रतिसर,-
मुद्रिकदोर्युग्ममंशु(३)मासन्नं ।
मूलाद्विकचहरिन्मणि,-
रुचि-तरुशाखायुगं यद्वत् ॥
भवति च हरिदोः शोभा,
हरिमणितरुशाखया काम्या(४) ।

---

(१) वृत्तं वर्त्तुलं चरित्रञ्च ।　　(२) लघुत्वं ।
(३) किरणं ।　　(४) वाञ्छनीया ।

अतिकनकश्रीराधा,-
मिलनं तस्या(१)मनोदूरे(२) ॥
तद्वाहोर्गिरिधरणं,
नस्तौम्यायासरिक्तं(३) तत् ।
यत्स्मरणादपि कम्प,-
स्ता(४)वपि धर्त्तुं तमुद्यमं(५) वन्दे ॥
राधाया हृदि मुकुरे,
प्रतिविम्वाभां सदा व्रजतः ।
इति किल कृष्णनितम्वौ(६),
विम्वतया तौ निरूपितौ कविभिः ॥
भृङ्गलहंसकनूपुर,-
सङ्गः शोभां तथा वाद्यं ।
अतनोत्तत्किं पाणि,-
ग्रहणं स्वगतः स(७) तस्य(८)वेत्ति स्म ॥
जङ्घासक्थिश्रोण्य,-
प्यूर्द्धक्रमपुष्टमच्युते दृष्टं ।

(१) प्रागुक्तशाखायाः ।
(२) अलभ्यमित्यर्थः । (३) श्रमशून्यं ।
(४) वक्षोजाभिप्रायेण । (५) विवाहरूपं ।
(६) स्त्रीकट्याः पश्चाद्भागो नितम्ब इत्युपलक्षणं । त्यागेन सह प्रथिमानमाततान नितम्वभाग इति चन्द्रापीडवर्णने कादम्बर्य्यां पुरुषकट्यामपि दर्शनात् ।
(७) कृष्णस्य । (८) सङ्गः ।

तत्क्रम[1]महता त[2]त्त,-

द्विषयकरागेण राधयापोषि ॥

अन्तर्वसनं[3]वव्रे[4],

यदपि श्रोण्यूरुजानुजङ्घादि[5] ।

तदपि च शोभां तस्य,

स्फुटमनुकुर्व्वद्विभाति स्म ॥

अथ कञ्चुकमपिधानं,

दध्रे वीध्रं[6] स गोपालः ।

मृदु हरिचन्दनचर्च्चा,

तुल्यं यदलक्षि तद्गात्रे ॥

पुरटपटस्फुटघटिका,

मणिगणकिर्म्मीरिता तस्य ।

मध्यमबन्धं[7]कृत्वा,

स्वामुत्तमतां निरीक्षयाञ्चक्रे ॥

---

(१) जङ्घादित्रयं क्रमेणोत्तरोत्तरं महत् ।

(२) जङ्घादि ।　　(३) कर्त्तृ ।

(४) आवृतवत् । प्राचीरं प्रान्ततो वृत्तिरिति दर्शनात् ।

(५) कर्म्म ।　　(६) वीध्रन्तु विमलार्थकं ।

(७) श्लेषे मध्यमं उत्तम एव बध्नाति । उत्तमनीचयो-
स्तत्राक्षमत्वात् ।

श्यामलरक्तौ चरणौ,
नखशशिचित्रौ हरेः कलितौ ।
राधाया रसरागौ,
किल तौ लसतः प्रसादसम्वलितौ ॥
कृमिजनिवसनस्यूते,
दध्रे स्वच्छे उपानहौ यत्र ।
सुभगां पदयोः स्वस्या,-
प्यथ रुचि[१]मघजिद्व्यनक्ति स्म ॥
दध्रे स वैजयन्तीं,[२]
जगति जयन्तीमशेषरोचींषि ।
या खलु भूषणचक्रे,[३]
शोभां चक्रेऽत्र वैजयन्तीव ॥
रेजुर्वनमालायाः,
पञ्च च वर्णा हरेर्वपुषि ।
मुनि-दयनीय-दयाकर,-
मित्र-वधूनां यथा भावाः ॥
प्रच्छदवस्त्रं चित्रं,
लक्ष्मीभागपि जहार परभागं[४] ।

---

(१) पदयोः कान्तिं स्वस्य इच्छा ।
(२) मालां । (३) बृन्दे । (४) परस्य भागं ।

सासाद्यन्तःशोभा,
तस्मिन्नुदिता विलक्षणा दृष्टा ॥
पीताम्बरताचित्र,-
प्रच्छदवलिता मुरारातेः ।
राधा-रुचिरिव नाना,
भावच्छन्ना विराजते तत्र ॥
लीलाकमलं सन्तत,-
विमलं कलयंस्तदा कृष्णः ।
सौरभभजनव्याजा,-
दास्यन्ते नावृणोत्त्रपया[१] ॥
मस्तकघाटापृष्ठ,
श्रोणीजङ्घाङ्घ्रिशोभायां ।
पश्चाद्देशगतायां,
पतिता दृष्टिर्निवर्त्तते न पुरः ॥
राजतु वहु नेपथ्यं,
व्रजनृप-तनयस्य दिव्यभूदिव्यं ।
तादृशमुरलीलकुटी,
पिञ्छान्यस्माकमुच्चकैः प्राणाः ॥

---

(१) आसन्नोच्छ्वाहहेतुकया ।

मृगमदकर्पूरागुरु,-
गुरुपरिमलवासबासयोगेन ।
वासनयोगादासन,-
सुस्थोऽप्यजयद्दिशः कृष्णः ॥
राधायाः सौरभ्यं,
तस्मादस्माच्च कृष्णस्य ।
अभिगमनाद्द्यतिमर्द्दं,
कुर्व्वज्जगदेव मुग्धमुद्विदधे ॥
ध्वनिभृदलङ्कृतिदीव्य,-
दर्थं सरसं हरेरङ्गं ।
श्रव्यङ्काव्यमधीत्य,(१)
श्रीराधा यद्विनिर्म्ममे दृश्यं ॥ इति ॥

अथ कथकः समापनमाह स्म ।—

न हि राधाकृष्णाङ्गे,
पर(२)मिह निहितास्तथा भान्ति ।
अपि जनताहृद्वचसो,-
स्ते तद्वेषा धृतारुचिं दधति ॥

---

(१) स्मृत्वा श्लेषे पठित्वा । (२) केवलं ।

तदेवं ।—

कथामाश्रुत्य तामे,तां न रहःशयनञ्च तौ ।
प्राप्तमप्यम्बमन्वा,तां पुनस्तत्रैव लालसौ ॥

इति श्रीमदुत्तरगोपालचम्पूमनु विविधा-
लङ्कारमय-राधाकृष्णालङ्कारसमयमयं
चतुस्त्रिंशं पूरणम् ॥

———

पञ्चत्रिंशं पूरणम् ।

अथ पूर्व्ववदेव कथाद्वयमेकीकृत्य कथयिष्यामः। यत्र स्निग्धकण्ठः प्राह स्म ।—

तदेवं तस्य वरस्य वेषे शेषेणापि वर्णयितुं शेषे लब्धविशेषे जाते प्राते(१) च नान्दीमुखादिशाते द्विजातेन तातेन तद्बन्धुजातेन मातृसङ्घातेन देव्यादि-भगिनीसम्पातेन च यथायथं मङ्गलसङ्गमितस्य तस्य विवाह-निर्व्वाहनयात्रावर्णनपात्राय कल्पयिष्यते ॥

तथा हि ।—

यदा ज्योतिर्व्विद्भिः सदसि कथितं यात्रिकतया
पलं तर्हि क्ष्मापिस्वर्रापभृतवाद्यं समजनि ।
यदा जातं वाद्यं हरिरपि तदा सर्व्वमनसा
समं हर्षं विभ्रद्द्विकगतिशर्म्मं व्यतनुत ॥

उद्यद्दुन्दुभिवृन्दशब्दवलवद्वाद्यन्तरान्तर्गतैः
सङ्घट्टाकुलरत्नधोरणा(२ घटा घण्टारवैराहते ।

(१) आपूर्णे । (२) यान ।

कृष्णस्यानुदिशं निजस्फुरणक-

स्कान्तेः प्रयाणे दधा-

दीव्यन्ती त्रिदिवे च तद्विधगति-

स्तद्व्यूह[1] भेदभ्रमं ॥

वाद्यानां कोटियुक्तैस्तव रवनियुतै-

र्दिव्यभौमैः समन्ता-

न्मिश्रीभूतं मिथस्तैर्न परमिह तथा

चान्यदप्यत्र विद्धि ।

उत्क्षिप्ता ये व्रजस्थैः कुसुमसमुदया-

स्ते तु दिव्यैः पतद्भि-

स्तैरन्यैः पृक्तिमाप्ताः परिचयरचने

नापुरुच्चैर्विविक्तिं ॥

यत्र च यथान्तरन्तःपुरस्तान्माला वैजयन्तीनां[2] वै[3]जयन्तीनां। स्वर्गवाद्यविद्यैरपि समभिवाद्यानि वाद्यानि । तौर्य्यत्रिकशुभरता भरताः । पुरोधः पुरोगमाः पुरोगमागुरूणां शकटाकाराणि विमानानि विमानानि[4] । यत्र चोभयतः सुहृदामात्मसम्मयानानि यानानि । धृतचामरादिपरिकराः[5]

---

(१) वाद्यादिव्यूह । (२) पताकानां ।
(३) निश्चये । (४) असङ्ख्यानि । (५) सामग्री ।

परिकराः[1]। रामदामादीनां सुखलस[2]दुद्भवाः[3]
सदुद्भवाः। सैव्यसुग्रीवमेघपुष्पवलाहका वला-
हकाः[4]। विसरत्कृष्णकान्तिघनरसा घनरसाः।
दारुकस्तथा कृष्णः क्रमतः सारथी रथी परस्ता-
न्नानासामग्रीसङ्गिनः सङ्गिनः। नानाश्रेणिजना[5]
श्रेणिजनाः॥

सर्व्वतः कौतुकविभावका विभावकाः। वरकीर्त्ति-
वन्दिमुखा वन्दिमुखाः। उपरि भवकमलभव-
मुखाः सुपर्व्वाणः सुपर्व्वाणः[6] विष्णुपदस्था[7]
विष्णुपदस्थाः[8] वृष्टिश्च सुमनसां[9] सुमनसा-[10]
मिति॥

दारुकसारथियुक्तं युक्तं सैव्यादिवाजिसङ्घेन।
हरिरिह रथमारूढः स्वरुचा तस्तार देवयानानि[11]॥
सुरवर्त्मेति नामासीत्प्रसिद्धं यस्य तन्नभः।
सुरवर्त्मतया साक्षाद्व्रजवासिभिरैक्ष्यत॥

---

(१) सेवकाः। (२) तृतीयासमासस्ततो बहुब्रीहिः।
(३) नाम। (४) घोटकाः।
(५) जनयन्ति। (६) सोत्सवाः।
(७) वैकुण्ठवासिनः! (८) आकाशस्थाः।
(९) देवानां कर्त्तरि षष्ठी। (१०) पुष्पाणां कर्म्मणि षष्ठी।
(११) विमानानि।

पुष्करस्थानि[1] तत्राऽऽस्य पुष्कराणि द्युयोषितां ।
हरे[2]रंशुसहस्रेण घस्रेऽस्मिन् फुल्लतामयुः ॥

तत्र च ।—

काश्चित्पुष्पाणि वर्षन्त्यःस्तब्धाः श्रीविधुकान्तितः ।
तथापि केशविस्रस्तैरगच्छंस्तैः कृतार्थतां ॥
काश्चिन्मङ्गलगायन्त्यः स्वरभङ्गं गता मुदा ।
तत्रापि स्निग्धकण्ठत्वाल्लोकं निन्युर्दशां निजां ॥
अन्या वरस्य माधुर्य्यात्कन्याभावमुपागताः ।
याताभेव निजस्त्रीणामावेशादमरा अपि ॥
पतन्त्य इव याः काश्चिद्विमानादभवन्नमूः ।
त[3]त्कान्ताश्चक्रुः कृष्णकान्तयश्चात्मनो दिशं ॥
पश्यन्त्यः कृष्णमपराः कण्टको[4]द्भदन्तुरैः ।
आश्लिष्य रक्षतः कान्तान् स्वपतीकैरविव्यथन् ॥
काञ्चीं गलन्तीमेकास्तु प्रेक्षमाणा रुचिं हरेः ।
मुहुर्मुहुः स्वकान्तेन स्तभ्यमानां च नाविदुः ॥

कृष्णस्य नेत्रान्तशरः सुरस्त्रिया
नेत्रान्तमाविश्य तदाविशन्मनः ।

---

(१) आकाशस्थानि ।　　(२) श्लेषेण सूर्यस्य ।
(३) तासां ।　(४) सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ।

तदीयभर्त्तुस्तदगाहिलोक्य ता-
मितीव लज्जालुनया न निर्ययौ ॥

एकाः श्रीमुखचन्द्रमस्य नयनेनावृत्य तेनेऽभ्यतां[१]
मन्यन्ते स्म परा दृगम्बुजयुगं वक्षःस्थलं काश्चन ।
काश्चिद्दोर्नवनीलरत्नजनियुग्यूपद्वयं तत्परा-
श्चैवं किन्तु न जानते स्म निखिलं
राधार्पितं तस्य यत् ।

तदेवमनन्ते[२]पि तत्तद्विभवेनानन्ते मधुमङ्गलस्तु यष्टिं मुहुरूर्द्ध्वं क्षिपन्नूर्द्ध्वगत्या कूर्द्द[३]न्नासीत् ॥

सर्व्वे सहासं पप्रच्छुः ।—

भो ! वटो ! किं कर्त्तुं प्रकटोऽसि ? ॥

मधुमङ्गल उवाच ।—

भोस्तुन्दपरिमृजा[४] ! वाढमृजवो यूयं । न पश्यथ किं न पश्यथ ? । यदेता मम वयस्यं वश्यं विधातुमवतरन्त्यः प्रतीयन्ते । तदेतानि वारयाणीति ॥

ततश्च ।—

किञ्चिज्जयाद्भयात् किञ्चिदुद्गले मधुमङ्गले ।
सांराविणं[५] व्यावहासी[६] चात्रासीद्व्रजयात्रिणां ॥

---

(१) आक्रमतां ! (२) नभसि । (३) उत्प्लुत्य ।
(४) अलसाः । (५) सर्व्वतो रवः । (६) परस्परहसनं ।

तदेवं हासादिकोलाहलवहलवाद्यव्याजमानन्दमेव श्वशुरपुरान्तःपुरसमाजं वेशयन् स्वयमपि सर्व्वेषां लोचननीरजविरोचनतया श्रीकेशवस्तदीय सदेशं विवेश ॥

विधुरन्यो भानु-धाम प्रविशन् क्षीणतां व्रजेत् ।
सोऽयं पुनः प्रतिपदं पूर्णतामेव सङ्गतः ॥

यत्र च ।—

श्रुतवती सहसा स्ववरागति-
प्रथितवाद्यगतीर्वृषभानुजा ।
अधृत कम्पभरं मुहुरेव साऽ-
कृत सखीकुलमाकुलमत्र च ॥

हन्त ! कृष्णमुदिरश्च तद्योगा-
दुत्तरोत्तरतया समीपतां ।
शश्वदुत्कलिकिकाश्च भूयसीं
चातकीव वत ! राधिका ययौ ॥

अथ त्रिविधमानाय्य(१)मानाय्य होमस्तोमं विधाय स्वधा द्रव्यं सन्धाय नान्दीमुखश्राद्धं राद्धं कुर्व्वति श्रीवृषभास्वति सर्व्वाणि तत्पूपक्षलक्षाणि

(१) हविः ।

चित्रवादित्रादिभिरतीतनिजकक्ष्याणि वरमुप- व्रजन्ति स्म ॥

यत्र चोभयमपि तद्वरकन्याकुलं क्षपतिमिलमानं किल सागरसमुद्रमसाहारसारतामेवात्मनि जाग- रयामास ॥

यत्र च सर्व्वत ऊर्द्ध्वमुदयन् विधुर्विधूतमर्य्यादता- मासादयामास ॥

ततश्च ।—

स्त्रीपुंमास्ते लक्ष्मचामरद्वै-
र्नीराज्यामुं तत्र निर्म्मञ्छ्य तद्वत् ।
स्वेनाप्येनं चालिताभ्यां कराभ्यां
शाश्वाश्वश्रुः साधु निर्म्मञ्छिताङ्गं ॥

दर्शं दर्शं वरमघारिपुं ते तु भानोः स्वलोका-
स्तत्कन्यायाः सुकृतविभवं फुल्लदङ्गाः शशंसुः ।
किञ्चाचख्युर्गुणततिरसावस्य सङ्ख्यामतीता
शोभां नाञ्चद्यदि तु दयिता
राधिका हन्त ! न स्यात् ॥

पुनर्विमानचारिणीनां वचनं तत्रापरिचितवर्तीनां यथा ।—

मुखं यत्राम्भोजं प्रतिलवनवश्रीवलयितं
दृशावुद्यात्तरे विलसितविहारेण चलने[१] ।
वपुश्चाम्भोदानां वलयमध ऊर्द्धं प्रतिदिशं
सदानन्दस्पन्दं कलय किमिदं हन्त ! किमिदं ॥

परिचितवतीनान्तु ।—

सावित्री ब्रह्मणः स्त्री हिमगिरि-तनया
चन्द्रमौलेस्तथा मा
श्रीविष्णोरस्य रुक्मिण्यपि सुमुखि ! भवे-
द्वाढमक्ष्णां सुखाय ।
रूपं स्वस्यापि विस्मायकमयमभितः
शोभयन् ! स्वीयमासी-
द्वासे यासां रुचा ता यदि न हि विवहे
दस्तु[२] राधा तु मूर्द्धि ॥

अथ विविधवस्त्रसंस्तारणया रत्नभुवीव विरचितायां निजान्तःपुरवर्त्मभुवि चावतारिते सर्व्वसुहृत्परिवारिते वृन्दावनपुरन्दरे श्रीमति वरे श्रीमान् भानुरपि सहर्षनिजपर्षत्पाल[३]वलयेन सह पद्भ्यामेव स्वयमुपवव्राज ॥

---

(१) चञ्चले ।　(२) भिन्नवाक्यं　(३) सभापाल ।

तत्र च ।—

पूर्व्वं ददर्श शतधा,
पस्पर्श च तं चिराय वात्सल्यात् ।
तदपि तदानीं पश्य-
न्नवमिव चक्लृपे सचित्रकल्पाय[१] ॥

ततश्च क्षणं तद्वीक्षणमाचर्य्य निर्म्मञ्छनारात्रिकाभ्यां परिचर्य्य पुष्पावलिं विकीर्य्य तं नम्रं प्रतिकम्रमाशीर्व्वचनं वितीर्य्य व्रजराजादिभिः सार्द्धं व्यक्तिपरिष्वज्य तमेव चाग्रतः प्रसज्य सर्व्वसुखसम्पद्धखण्डतण्डकं[२] मण्डकमेवानिनाय ॥

चन्द्रमण्डलमिव तारामण्डलं नीलनिधिकलसमिव वा तन्मङ्गलसदनं साक्षान्मङ्गलाधिदैवमिव वा तन्मङ्गलवलयं ॥

यत्र च ।—

रम्भास्तम्भचतुष्टयेन फलसञ्जुष्टेन कोणेषु या
मुक्ता दामवितानतोरणचयेनोर्द्धं वृताद्योतिना ।
कुम्भभ्राजितदीपराजिवलिता रत्नाङ्गचित्राचिता
वेदिःसा विशता तु कृष्णशशिना कृष्णांशुना चार्च्चिता ॥

---

(१) तुल्यतया सम्पद्यते स्म । (२) परिष्कार ।

पुरस्ताद्द्वोपेन्द्रप्रभृतिगुरवः पार्श्वयुगले
वयस्या रामाद्याः क्रमवलनयाप्युद्धवमुखाः ।
परस्तादप्यासन् सुररिपु-रिपोर्दारुकपुरः-
सराः सेवाकारा इति परिषदेषां विरुरुचे ॥

तदेवं सति तूर्द्वाबिका[1]कृते प्रग्रीवा[2] वलिवलित-चन्द्रशालिका सञ्चारिकासु कासुचित्तूष्णीकामेव पुष्णानासु कासुचित्तु जपकल्पं जल्पन्तीषु कासाञ्चिन्नर्म्मगालिशर्म्मगीतिर्यथा ।—

पश्य सखीजन ! सोऽयं कस्य । सुविचारयदपि
चित्तं क्वचिदपि नान्तं लभते यस्य ॥ ध्रु ॥

सुचिरोपार्ज्जित-सुकृतशतायुत-
निर्ज्जिततरुणसमाजौ ।
वर्षीयांसावपि यं तनयं लेभाते व्रजराजौ ॥

यस्य च पितरावति सरलाविति
जगति समन्ताद्वित्तं ।
चतुरशिरोमणिवरता यस्य च
वशयति जगतां चित्तं ॥

सर्व्वः स्निह्यति ममतां
सचयति घोषो यत्र सदैव ।

(१) उदूग्रीवत्वं ।　　(२) गवाक्ष ।

मातरपितरादिक्रमभि-

मनुते यश्च न सर्व्वं नैव ॥

व्रजपति-वंशो यादृग्, न भवति नामुदत्र क्वापि ।

सोऽयं गुणरूपादिक,मीदृग् भजते चाद्य तदापि ।

यस्य च लक्ष्मावपि वनिमानी

स्वयमपि सर्व्वं दाता ।

वृषभान्वन्वयलक्ष्मी

येन च याचयते व्रजपातेति ॥

अथ मधुमङ्गलः प्रजजल्प ।—

हौं हो दासीतनूजाभिराभिरस्मदीययुवराजाय गालिरेव दीयते । तस्मादासां शासनार्थमेता एव तेनानना(१)द्दौ दासीतया ग्राहयितव्या वाढं पश्चादेव तु भार्य्यानया कन्येति ॥

अथ वटुरयं कटुभाषी गृह्यतां गृह्यतामिति तासां वचनं कर्णे रचयन् श्रीव्रजराज-समीपं जवादाजगाम ॥

आगम्य च जगाद ।—कथमधुना पलायध्वे ? ॥

यदि चाहं मित्रेण सह गत्वा तत्र तत्र सहकृत्वा(२)राजयुद्धा(३)चाभविष्यं तदा व्रजसम्बल-

(१) कृष्णेन द्वारा मया । (२) सहकृतवान् ।
(३) राजानं योधितवांश्च ।

नाथ कथमेतावान् विलम्बः सम्भवमवाप्स्यत् । सम्प्रति च सहकृत्ववर्य्यः सन्त्वर्य्य[1] पश्यथास्माकं विस्मापकतामिति ॥

तदेवं हासकोलाहले वहले प्रवलेत्क्षणकतिपयं सर्व्वमन्यद्विस्मृतिमयमासीत् ॥

ततश्च ।——

पीठं सवस्त्रद्वययज्ञसूत्रकं
पाद्यादिदत्तं श्वशुरेण सूत्तमं ।
जग्राह कृष्णः पृथुशर्म्मणा स तु
त्रपामवापात्र विदन्नयोग्यतां ॥
यदा च पीठं श्वशुरेण दत्तं
तदेप्सितं प्राप्तममंस्त कृष्णः ।
सम्मानमात्रादतिथिः स्वभोज्य-
प्राप्तिं विनिश्चित्य मुदं प्रयाति ॥
यदा च मन्त्रेण सगां समर्पया-
ञ्चकार जामातरि तर्हि सोऽप्यदः[2] ।
तेनैव वक्ति स्म मुदा सदाप्यसौ
तृणं सवार्य्यस्तु न चान्यदर्हति ॥

---

(१) सम्यक्त्वरां कृत्वा । (२) वक्ष्यमाणं ।

ततश्च ।—

स्वाभीष्टं वरमुपलभ्य हृष्टचित्तः
कर्त्तव्यं प्रतिवृषभानुरस्मृतात्मा ।
स्वैरेव स्फुटमिह दारुयन्त्रतुल्य-
श्चाल्पत्वं दधदथ कार्य्यमर्ज्जति स्म ॥

आनर्च्च व्रजपतिमुख्यमुख्यवर्गं
दिव्यैस्तैरथ वृषभानुरर्थजातैः ।
किं त्वस्मिन् यदिह मुहुश्च नर्म्मजातं
तच्छर्म्मावहत यथा तथा परं न ॥

अथ मस्तकमवधुनानः स मधुमङ्गलस्तत्र चाह ।—

तदिदं कञ्जनयनपरिणायनं मम पुनरतीव मङ्गल-मङ्गयति स्म ॥

यदेतावन्तं समयमयमहमेव वैहासिक इति सर्व्वै वभाषिरे ।—

सम्प्रति तु मद्वदेव ते सम्प्रतीतिं गता इति ॥

तदेवं स्थिते मङ्गलाष्टकपाठे चानुष्ठिते परमानु-कूलं गोधूलमुपलभ्यसमुपलभ्यमानसुखतया सकलशुभरूपं वरमन्तःपुरमन्तरङ्गसहितं पुरोहित-सहितः सहितं वृषभानुनिर्नाय ॥

नीते च तस्मिन् परमाभिनीते वरे सर्व्वा एवान्तः पुरवनिता ध्वनिता भरणाः सर्व्वतः समुदिता मुदिता वभूवुः ॥

ततश्च ।—

चित्राज्ञामातृभावाद्धवमयकुतुकादादरादप्यमूषां
वृन्दं तत्तद्विचित्रं सपदि तमगमद्द्रष्टुमुत्कण्ठदृष्टि ।
माता श्रीराधिकायाः स्वयमथ सवयः-
　　　　सङ्गता दूरदेशा-
द्रत्नैर्नीराज्य निर्म्मञ्छितमकृत निजे
　　　　नोत्तमाङ्गेन चाङ्ग[१] ॥

अथ वरं वरमासनमुपवेश्य गोधूलमूलदेश्य-[२] मनु सर्व्वशिरोमणिकन्यासुधन्यां[३] पुरन्ध्रयस्तस्य परिक्रमक्रमशस्तां तत्पुरस्तान्मिथः सम्मुखतया निवेशयामासुः ॥

आनीयमानामवलोक्य कन्या-
मुच्चासनस्थां तु वरानुजाताः ।
तदूर्द्ध्वमुन्नम्य वरं सपीठं
सहासखेलं मुहुरुन्ननन्दुः ॥

---

(१) पुनः ।　　(२) ईषत्समाप्तौ ।　　(३) कन्यां ।

मिथः सम्मुखतया जाते तु निवेशशाते समय-विलम्बमिवासहमाने समाने वर-कन्ययोरिन्द्रनील-सुवर्णसवर्णसान्द्रवर्णज्योत्स्ना[१]द्वये तथा स्फुर-दुत्पलकमलपरिमलसमपरिमलद्वितये च व्यति-मिलिते सुखशिथिलिते च तयोरङ्गे स्तब्धतत्प्रसङ्गे च तत्रकीयसङ्के तदिदमासीत् ॥

द्रष्टुं समर्थे गुरुसंसदि स्फुटं[२]
नैवेति नेत्रे वर-कन्ययोर्मिथः ।
शक्तिं समादाय मनःस्थितां तदा
निमीलनेऽपि स्फुटव[३]त्प्रतीयतुः ॥

यदपि मीलितमक्षियुगं तयो-
र्मिलितचित्तमभून्मिथ ईक्षितुं ।
तदपि मीनवदुच्छलदेव त-
द्वहिरपि व्यतिवीक्षितुमैहत ॥

अथ मुहूर्त्तविदः कांस्यवाद्येन वैवाहिकमुहूर्त्तं शशंसुः ॥

ततश्च ।—

सेयं पितृप्रसूर्निखिलसुखानां पितृप्रसूर्जाता क्षणदा च क्षणदेति विविच्य हितमनासि समस्त-

(१) कान्ति । (२) मन्ये । (३) गत्यक्षवत् ।

सदसि कृतविहितः पुरोहितः समधीत सर्व्वतन्त्रः स्फुटपाठिततन्मन्त्रः कन्याविश्राणनं प्रति निज-यजमानं नियोजयामास ॥

ततश्च ।—

कम्प्रेणार्द्रकरेण साश्रु जनकस्तस्याः करं कम्पितं
कम्पभ्राजिकरे हरेर्विनिदधे यर्ह्युल्लसल्लोचनः ।
तर्ह्येवान्वहनव्यभव्यविभवव्याजिप्रथा सञ्जकं
वाद्यं प्रादुरभूद्भुवि द्यवि च यद्विश्वाभिवाद्यं बभौ ॥

तदनु च गवादीनां दाने परमावदाने सति[१] ।—

अथात्र कोदादिति मन्त्रवाच्यं
पाणिग्रहे तस्य न कोऽप्यजानात् ।
दातृग्रहीतृत्वमनुक्रमास्मिन्
कामस्य यत्तद्धर एव वेद ॥

अथ शुभसमयो यमीक्ष्यतां तन्मिथ इति गौरव-यन्त्रणान्यतन्त्रौ । दृशमपि नवदम्पतीकिरन्तौ सूखमिव रक्षितुमत्र[२]मीलतः स्म ॥

---

(१) समाप्ते सति ।

(२) अत्र दृशि निमिषतः स्म । पक्ष्मणावरणं चक्रतुरित्यर्थः । मीलन्मीलक्ष्मीलनिमेषणे चक्षुषः पक्ष्मणावरणे इति मनो-रमा वृत्तिः ।

अन्यात्रापाङ्गता[१]मागादपाङ्गस्तद्दिनावधि ॥
स राधा-कृष्णयोर्यस्मिन्मिथः सङ्गेन साङ्गितः[२] ॥
आदिष्टौ देवतां ध्यातुमाचार्य्येण वधू-वरौ ।
तयोर्मिथस्त्वेकसर्ग[३]मनुस्त्वं विविदे न हि ॥

अथ तदुल्लासेन मङ्गलगानं कुर्व्वति सममङ्गना सङ्केतेनान्तरङ्गजनेन सा कन्या वरस्य सन्निहित-न्यासेन धन्या विदधे ॥

यद्यपि सम्प्रति नव्या हरि-रमयोः सा किशोरताभ्युदिता। तदपि विवाहे तस्मिन्नतिसङ्कोचात्कुमारतेवासीत् ॥

तत्र गानं यथा।—

अद्य समस्तं सफलं जातं। श्रीराधाया विवहन-
मिह यच्छ्रीकृष्णेन विभातं ॥ ध्रु ॥

तस्या जननीजनकमहाकुलमपि
लोकानां स्वकुलं।
अपि सम्पत्कुलमपि लीलाकुलमपि
वयःकुलमतुलं ॥
तत्र भावकुलमपि सङ्गतिकुलमपि
कुलमपि विरहाणां।

---

(१) अपकृष्टां गतां। (२) साङ्गीकृतः। (३) एकतान।

पुनरपि सम्प्रतिशुभकुलमपि कुलमविरत-

सुखनिवहाणां ॥

श्वश्रूश्वशुरसुखान्वयमस्या गास्यामः

सखि ! किलकं ।

एनामपि परि परिणायि जातं तदिदं

तत्कुलतिलकं ॥ इति ॥

तदेवं जातमिलनं तन्मिथुनमन्येनान्यदिव मन्यते स्म ॥

यतः ।—

यदपि च कनकविलासा,

राधाकृष्णश्च जिष्णुनीलाभः ।

तदपि च वैदूर्य्याभं,

तद्युगमैक्षिव्यतिद्युतिभिः ॥ इति ॥

एवं तयोः सापरभागलक्ष्मी-

र्विडम्बितान् सर्व्वजनानकार्षीत् ।

वैवाहिकं कार्य्यमनन्तरार्हं

यथा न ते कर्त्तुमधात्तमन्त ॥

गुरोरथाज्ञामनुगम्य दम्पती-

मान्यानुवद्धां चलता मिथः स्पिती ।

प्रदक्षिणीकर्त्तुममू हुताशनं
समुत्थितौ सर्व्वतनूरुहैः सह ॥
प्रदक्षिणावर्त्तममू हुताशनं
प्रदक्षिणं चक्रतुरत्र दम्पती ।
ततस्तदावेशवशेन निर्म्ममुः
सर्व्वस्य नेत्राण्यपि तं प्रदक्षिणं ॥
जनेन सङ्कीर्णतया न शेकतु-
र्मिथो विदूरे गतये वधू-वरौ ।
स्पृष्टिश्च धृष्टिं तनुतेतरामतः
परिक्रमे तौ ययतुर्विमूढतां ॥
गुर्व्वाज्ञया यर्हि सगर्भ(१)दत्तान्
लाजान् जुहावाथ वरायताक्षी ।
तदा सलज्जं करपद्ममस्या
गतागतेनाप तडिद्विलासं ॥

लाजैर्होमेषु पृष्ठात् करयुगलधृतिः
सुभ्रुवः स्कन्धदेशा-
लम्बः स्पर्शश्च वक्षःस्थलमभिदयिते
नेति यद्यत्प्रदिष्टं ।

---

(१) सहोदर ।

तद्वक्तुं नेश्महे किं कृतमिति सहसा
यत्र वक्तुश्च लज्जा
सज्जेत्तद्वा कथं स[1]स्वयमथ कुरुता-
मन्तरा पारवश्यं ॥
कन्याया दक्षिणाङ्घ्रिं दृशदमथ वरः
स्पर्शयेद्दक्षिणेन
स्वेनाल्पां पाणिनेति श्रुतिभिरभिहितं
निर्म्मिमाणः स एषः ।
पूर्व्वं गोवर्द्धनाद्रिं यदपि च धृतवा-
नश्रमेणेति वित्त-
श्चित्रं चित्रं तथापि प्रचलकरतया
नात्र शक्तिं जगाम ॥

स एष वां राजति दम्पतित्वे
हुताशनः साक्षिपदं दधानः ।
एवं गुरुः सोऽयमुवाच त[2]त्तु
स्वभावसिद्धं न तयोर्व्विवेद ॥

ततः साप्तपदीनस्य[3] सिद्धये सप्तयान् क्रमान् ।
अतिक्रान्तावमू कान्तावमूल्लोकान्[4] वितर्कय ॥

(१) वक्ता ।　　(२) दम्पतित्वं ।
(३) सख्यं साप्तपदीनं स्यात् ।　　(४) सप्त ।

अथ स सप्तपदीक्रमे परिक्रमे च लब्धक्रमे ध्रुवविलोकनशातं जातमिति पत्न्या तत्प्रच्छकाय पत्ये सत्येनासत्येन वा वक्तव्यमिति स्थितिं सेयमपूर्व्वव्यवस्थितिमाचचार ॥

तथा हि ।—

यदा पृच्छन्नीचैर्ध्रुवमिह किमालोकितवती
त्वमित्थं कान्तस्तद्दर्शनवदधती ह्रीभिरपि खं ।
तथा सेयं मिथ्याप्यनभिदधती तर्हि परमं
ध्रुवं मन्वाना तं लवमलपदालोकयमिति ॥

तदनु वर-वधूभ्यामग्रपश्चात् स्थिताभ्या-
मनसि पशुपराजः प्रच्छदेनावृताभ्यां ।
यदनु नतिमवाप्तास्तेऽपि सर्व्वे सभाज्याः
सदसि नमनमेकं कोविदैर्यद्द्वयधायि ॥

तनयमथ शुभाशीराशिनिर्म्मञ्छितं द्रा-
गरचयदथ गोपाधीश्वरस्तां स्नुषाञ्च ।
यदनु मुखममुष्याः सत्प्रचारेण पश्यन्
वृषरविकुलविप्रान् दानवृन्दैः पुपोष ॥

ततश्च परममधुर-वर-वधूभ्यामभ्यास एव चतुरस्रवेद्यां कनकासने कृतासने(१) स्त्रीकुलाचारप्रचार-

(१) वरवधूभ्यां ।

समयः सोऽयमिति सर्व्वस्मिन् पुरुषवृन्दे वहिर्न्निन्दमाने श्वश्रूप्रधाने गणे चाद्रर्चित रोपणाय कृताभियाने वरवशीकरणाय काभिश्चित्कार्म्मणं[1] कर्म्मसनर्म्मसशर्म्म च समारब्धं । मर्म्म तु नोपलब्धं ॥

तथा हि ।—

राधादृशोः श्रवणयोरपि यस्य राधा
राधा नसोर्मनसि च प्रतिभाति राधा ।
तं कार्म्मणेन तु तदीयवशं विधित्सु-
र्न्नारीगणः[2] स जहसे वत ! मर्म्मविद्भिः ॥

आचारादथ दयिता कचान्तराले
सिन्दूरं निदधदसौ वरो ललज्जे ।
श्वश्रूणां परिषदि तत्र धार्ष्टर्ययोगा-
त्कम्पेन प्रतिपदतक्रियाहतेश्च ॥

अथ तत्तत्कर्म्मणि भोजननर्म्मणि च लब्धशर्म्मणि शय्यां पर्य्यापनाय[3] याचितः श्रीपतिरपत्रपया भोजनादिमहितवहिर्विहितसभस्थाहितपितृपितृव्यादिहलभृदुद्धवादिसहितस्वजनजनमध्यमेवासीदति स्म ॥

---

(१) वशीकरणं ।　　(२) लज्जायां हेतुद्वयं ।

(३) प्रापणाय ।

यत्र गणचक्रके[१] नर्म्मचक्रं मधुमङ्गलः सङ्ग-
मयन्नास्ते ॥

अन्तःपुरे तु ।—

रविसखतनयागुरूपदेशा-
द्विजनगृहं गमिता निजप्रियाभिः ।
हसितमनुरुषेव तत्र निन्ये
वर-हृतधी-रजनीममूममूभिः ॥

मधुमङ्गलस्य तु नर्म्म यथा ।—

रूक्षास्यतामपि यदा मधुमङ्गलोऽसौ
तद्भोजनादिमहसि छलवानुवाह ।
सर्व्वस्य हासविभवाय तदापि जज्ञे
यर्हि प्रहासमुखतां किमुताङ्ग ! तर्हि ॥

तथा हि ।—

यद्व्यञ्जनं व्यञ्जितवेशवार[२]वाः[३]
सुभागमस्मिन् किल रूक्षतां दधत् ।
प्रसन्नतामन्यतरत्र चासकौ
वैहासिकः सग्धिजनानजीहसत् ॥

---

(१) धार्म्मिकानान्तु सम्भूय भोजनं गणचक्रकमिति त्रिकाण्ड-
शेषः ।

(२) वेशवारः परिष्क्रिया । (३) जल ।

कृते च भोजने कञ्जनेत्रः स्वजनेन सह नाना नृत्यादिकौतुकेन स्वयं जाग्रदेव रात्रिमपि जाग्रतीमिव चकार। यत्र चान्तःपुरमपि तद्वदानन्दधुरं[१] बभूव ॥

तदेवमतिचित्रायां रात्रावतिवाहितायां शुभप्रभातेन चातिहितायां स निजसमाजः श्रीमान् ब्रजराजः स्नेहबन्धिनं स्वसम्बन्धिनं प्रति स्वस्य गृहप्रस्थानाया गृहीतवान् ॥

यत्र ज्योतिर्ज्ञानपि स्वसाहाय्यमानाय्य तदनुज्ञामपि गृहीतवान् ॥

श्रीमान् स च वृषभानुर्वृषभानुरिव भुवन-[२] द्रव्याणि सङ्गृहीतवान्। पर्ज्जन्य[३]सन्ततये च पर्य्यर्पितवानिति कृतं वर्षासाराणामिव हर्षाधाराणां तेषां गणनया ॥

यानि[४] नेत्रयोरिव श्रोत्रयोरपि शर्म्मनिर्म्माण्ति स्म ॥

---

(१) तद्वदानन्दधुरं यत्र ।
(२) श्लेषे जल ।   (३) श्लेषे मेघ ।
(४) द्रव्यानि ।

यत्र च ।—

द्वैतेनास्मिन् विवाहे व्रजधरणिपति-
जन्ययात्रा विभूते(१)
र्लंघेन श्रीविराजद्वृषरविनिलया-
न्तोषमुच्चैर्जगाम ।
किन्त्वा साद्यद्वितीयां(२) निजतनुज-तनो-
स्तत्तनूजातलक्ष्मीं
त(३)च्चाशेषं तथा तन्निजगृहवलितं
व्यस्मरत् किञ्च विश्वं ॥

तत्र तु ।—

दुहितुरुपरि माता तत्र तातश्च वाष्प-
प्रसरकृदलपद्यल्लुप्तगीस्तत्तु लोकः ।
वितरणमनुतस्या जातमित्यध्यगच्छत्
पुरुकदनमभूद्यत् प्राक् तदुत्थं न वेद ॥

ततश्चान्तःपुरं जामातरमानाय्य स खलु न्याय्य-चरितः पुनरपि परितस्तं परिष्कृत्य मधुरभोजना-दिना सम्भृत्य स्वपत्न्या सम्मन्त्र्य स्वकरगृहीत-

---

(१) श्रीनन्दस्य या स्वीया विभूति जन्ययात्रायां तस्या द्विगुणा दत्ता श्रीवृषभानुना ।
(२) पत्नीं । (३) विभूतिद्वैतं ।

तत्करतया तातेति तमामन्त्र्य तदिदं सास्त्र-
मुवाच ।—

सेयं मम वालिका वाल्यादेव जलतामवलम्ब-
मानावलोक्यते । तस्मादस्मिन् दोषे तु न स्वयं
सरोषेण भवितव्यमिति ॥

श्लोकयन्ति चात्र ।—

जामातर्वत ! कृष्णसास्वतनुजा त्वय्यर्पिता त्वत्परा
किन्त्वस्यां सहतां भवान् करुणया दोषं तमेतं मुहुः ।
धीमत्यामपि तातजाड्यमिव यद्बाल्याद्धरीदृश्यते
यत्रावां पितरावपि स्फुटममू विद्मः स्म हेतुं न हि ॥

तदेवं स धन्यात्मा वहुसद्व्यवहारेण मुहुरपि तं
सन्तर्प्य पुनश्च तस्मिन् कन्यां समर्प्य पुत्रानपि
समर्पितवान् ॥

कथमपि दुहिता जामातरावतिकातरात्मा पुन-
स्तादृशविसर्ज्जनवितराय सम्प्रदानीकृतवांश्च ॥

अथ जामातरि तत्तत्प्रणामादिपुरःसरं वहि-
रायाते दुहितुः सम्वस्त्रणाशस्तं मस्तकं यौगपद्येन
पितरावाश्लिष्य चक्षुःपयसा स्नपयन्तौ प्रशंसन्तौ
च सा शंसं शशंसतुः ॥

भर्त्तारं धिनुचेतसा त्वयि तथा
श्वश्रूं वधूकर्म्मणा
तन्नाथं सुचरित्रताचितह्रिया
सर्व्वांश्च कीर्त्तिश्रिया।
किंशिष्मस्त्वयि पुत्रि ! या स्वयममूं[१]-
स्तत्त[२]त्तया जानती
कृष्णाद्या न परेषु थूत्कृतिमधा-
स्तत्तद्भमं धर्त्तृषु॥

ततश्च।—

आर्य्या मातृ-पितृष्वसृ-स्वसृमुखा
नेत्राम्बुभिः सम्प्लुताः
पर्य्याश्लिष्य पृथक् प्रतिस्वमपृथ-
ग्मङ्गल्यसङ्गीतयः।
उद्यद्गद्गदमित्रचित्रगदिताः पूर्णास्त्रमस्या मुखं
पश्यन्त्यः कथमप्यमूमनु वरं प्रस्थापयाञ्चक्रिरे॥

अथानु कान्तगन्तृदुकूलपरिवृतसुखगमनानुकूल-गन्त्रीमनु तां कुलजां वधूं गन्त्रीं विधाय श्वशुर-कुलेन प्रहीयमाणा[३]मादाय कुलद्वयसङ्कुलतया

(१) श्रीकृष्णादीन्। (२) भर्त्तृकादिभावेन।
(३) विधायेत्यनेन समानकर्त्तृकत्वं प्रस्थापनस्य।

पूर्व्वादप्यपूर्व्वं वाद्यादिपर्व्वसम्विधाय गृहाय कलितभ्राजे व्रजयुवराजे तदुपरि तथा पर्व्वविदधाने च सुपर्व्वराजे द्यावा-पृथिव्या(१)वात्मनोरभेदमेव वेदयाम्बभूवतुः ॥

विप्रस्तावक-सूत-मागध-नटादीनां गणं दुर्गणं
तद्वासस्य वहिर्निरूप्य सहसा मृग्यापि गोपाधिपः ।
वृष्टिं तत्र धनस्य तावदकरोत् ते यावता वारशस्तद्वोढुं न हि शेकिरे किमपरं रात्रिं तथा भेजिरे ॥

श्रुतेऽभिलषितस्नुषावलितपुत्रसङ्गस्फुरद्विचित्रवरवादने व्रजपतेर्गृहाधीश्वरी ।
जडीकृतशरीरता विधुतशक्तिरप्युन्नमद्दयावलिवलात्परं भविककार्य्यमाचीचरत् ॥

यशोदा-पूर्णिमातुल्या रोहिणी-प्रतिपत्तुला ।
तदाजनि ययोः सङ्गस्तत्र पर्व्वतयाजनि ॥

यत्र शस्तवस्त्रसमास्तृतानां पथामुभयतः श्रेणीकृतानां नवप्रसवसमावृतानां तरुजातिषु समाहृतानामधिमध्यमध्यमध्यस्तां पल्लवग्रस्तमुखीं-पूर्णां गर्गरीं गर्गरीमभितः प्रदीपान् परिजना दीपयामासुः ॥

---

(१) द्यौश्च पृथिवी च निपातनात् ।

यत्र च मधुकरनिकरझङ्कारव्याजेन तादृशतरु-गर्गरीवर्गश्च मङ्गलगानमङ्गीकरोति स्म ।—

यल्लोभात् किल त्वोभाविलतया सुरभीकृतसमीपाः सर्पिर्दीपाः कज्जलधारामोचनव्याजादपरमधुकर-व्रजं सञ्जगृहुः । दीपवृक्षा[1]स्तु ध्वजभृद्व्रजा इव सकज्जलध्वजा[2]भान्ति स्म ॥

यच्छोभालोभावृतमनसः सुमनस[3]स्तत्र न सुमनसः सस्रृजुः ॥

तत्त[4]त्स्थानस्य नाम्ना कलयति तु जने
जन्यवाद्यं क्रमेण
प्रोद्यत्कोलाहले तद्भवति सुखवाशा-
द्वारमाप्ते वरेऽपि ।
यद्वच्छ्रीराधिकागान्निजदयितवती तद्वदन्याः सजन्यं
संसज्य स्वं तमेकं पतिमनु सदनस्यासदन्नग्रदेशं ॥

मुररिपुरिह वाद्यपुष्पवर्ष-
प्रथितसुखेन सुखेच[5]राभिगीतः ।
मुहुरपि मिषलोकित[6]स्वकान्ता
स्थितिलसदन्तरयान आजगाम ॥

---

(१) सुवर्णादिविरचिताः । (२) सदीपाः । (३) देवाः ।
(४) अधुना तत्रागत अधुना तत्रागत इति क्रमेण । (५) देव ।
(६) मुहुर्मिषेण परावृत्य स्वकान्तायानं पश्यन्नित्यर्थः ।

स्पर्शं स्मरन्ती हुतभुक् परिक्रमे
लब्धं हरेर्मुद्रितया न मध्यगा ।
तस्य स्फुरन्तं[१] च करं नुदन्ती
श्रीगोपपातुर्जगृहे गृहं वधूः ॥
निजजनिसदनाद्व्रजेश-गेहं
वृषरविजा प्रविवेश दिव्यवेशं ।
उदयगिरिवरस्य पूर्व्वदेशा-
द्विधुवरमूर्त्तिरिवान्तरिक्षमध्यं ॥

तदेवमेवापरासु श्रीकृष्णापतिव्रतासु सर्व्वासु चार्व्वागागतासु लोकेषु च सपुलककुलं दत्ता-वलोकेषु ॥

ता नन्दनन्दनव्यूढास्तदा नन्दपटावृताः ।
आनन्दघटया मूढाश्चानन्दं[२] पर्य्यनन्दयन् ॥

मधुमङ्गलस्तु जातसुखमङ्गलं सर्व्वानर्व्वागादाय दुन्दुन्दमादिति दुन्दुभिवाद्यमास्वाद्यमाधाय नर्त्तनं वर्त्तयामास ॥

ततश्च ।—

श्रीकान्तमग्रे विधायान्तःपुरपुरःस्थलेऽतिविस्तीर्ण-

---

(१) मनांसि ।　　(२) नन्दपर्य्यन्तं ।

गणातायामपि सङ्कीर्णतां विना यानयानादत्र-
तीर्णवतीषु स्नुषातातिषु जिष्णुचापपुरस्ताद्वर्त्तिष्णु-
सवारिवारिदशोभा[१] लोभनास्पदं वभूव ॥

यत्र च शोभितसर्व्वा वल्यो राधाचन्द्रावल्योः श्रीकान्तस्य तस्य सव्यापसव्यसम्वलितयोस्तत्-कान्तिसंक्रान्तिशवलितयोः प्रतिच्छविपरम्परया परपरासु च दर्शितनिजव्यूहावलिकयोस्तयोर्विमुता-मिवान्तःपुरलोका विलोकयन्ति स्म ॥

तास्तु सर्व्वास्तदेकपत्न्य[२]श्चैकपत्न्य[३]श्च निज-निजप्रान्तमनु तं कान्तमेवेति स्थिते ।—

आगच्छद्व्रजवरराजगेहलक्ष्मी-
नीराजक्रमविधये सुतस्नुषाणां ।
मुग्धात्मा भवदिह रूपदिग्धचिन्ता-
दुग्धानि स्तनयुगलाम्वरादवोढ ॥

आरात्रिकं न खलु साङ्गमसौ विदध्या-
दारात्रिकं विरचयेद्धत ! यद्यपीति ।
तस्याः सकम्पकरपल्लवधारिणीभिः
पर्य्यापितं पुनरदः सहचारिणीभिः ॥

(१) कर्त्री ।　　(२) स एवेकः पतिर्यासां ।
(३) एकपत्नी पतिव्रतेति त्रिकाण्डशेषः ।

रोहिणी तु तद्वदेव स्नेहमोहिततया सहचारिणी बभूव न तु साहायकतयेति स्थिते तस्मिन्नारात्रिके च सुस्थिते ॥

उदनमदनमच्छ स्वैरनीराजनाया
मणिततिरिह कृष्ण-प्रेयसीनां मुखाग्रे ।
अपि किल शशिवृन्दान्यत्यपूर्व्वाणि वीक्ष्य
व्यतनुत ननु तारामण्डलं ताण्डवानि ॥

अत्र च महिला गायन्ति स्म ।—

अहो ! पश्य चित्रं गोप(१)कुलराजिमहिमानं ।
य इह सुतकर्म्मणे परिणायनशर्म्मणे-
ऽचिनुत कमलागणसमानं ॥ ध्रु ॥
यदनु किल राधिकां निखिलसुखसाधिका-
मचित सकलसमुदयसारं ।
अधिय(२)दपि भव्यता मुहुरपि च नव्यतां
वहति(३)वहलफलम(४)पारं(५) ॥
उचितमपि तादृशं(६) स हि तनयमीदृशं
लब्धमरचयदमलरूपं ।

---

(१) नन्दे । क्विबन्तसप्तमी ।　　　　(२) यत्रापि ।
(३) प्रापयति ।　　　　(४) यथा स्यात् ।
(५) द्वितीयं कर्म्म ।　　　　(६) पूर्व्वोक्तं । उचितमेव ।

अपरहृतमप्यलं प्रणयकृतसद्बलं[१]
सबल[२]महृत निजकुलभूपं[३] ॥
त्रिजगदतिचारकं हृदयमतिभारकं
धर्त्तुमभितोऽपि न शक्यते ।
त[४]दिह परमं सुखं विवहनाद्यमुन्मुखं
हृदि वसतीति च वितर्क्यते ॥ इति ॥

यदा च ता हरिपरिणीति सम्भृता
रमाद्दताव्रजपतिवासमागताः ।
पुरा यथा न्यधित हरेर्न जन्म[५] त-
त्तदा तथा न्यधिषत[६] वैभवश्रियं ॥

अथ मातृतद्यातृप्रभृतयः सुतस्नुषामुखतुषाकरं मुहुर्विलोकितीकृत्य मुहुरलङ्कृतीकृत्य मुहुर्निर्म्मञ्छितीकृत्य च दृग्भिरमृतधारां वर्षन्ति स्म ॥

ततः कमललोचनः सङ्कोचान्निजमोचनाय मातॄः प्रणम्य रम्यवरवेश एव व्रजेशविभ्राजितदेशमाससाद ॥

श्रीव्रजेश्वरी तु नन्दितसर्व्वबन्धूनां नववधूनां तत्र च सर्व्वाधिकायाः श्रीराधिकाया बहुधा लालनं विदधती नावधिमवाप ॥

(१) यथा स्यात् । (२) बलदेवसहितं । (३) श्रीकृष्णं ।
(४) हेतोः । (५) वर्त्म । (६) धृतवत्यः ।

तत्र श्रीराधिकाया यथा ।—

वक्त्रं पश्यति मस्तकं नसिदधात्यङ्गं समालिङ्गती-
त्यादिस्नेहविसारिता वलनया श्रीमद्व्रजाधीश्वरी ।
तामेकां मुहुरार्द्रयन्त्यपि वधूमार्द्रीचकारान्तिकान्
सान्निध्याद्द्रवताविधायिगुणपान(१)द्येव सर्व्वानपि ॥

श्रीमान् विधुस्तु पूर्णवरशोभालोभाय न शितिरूपतया जातगौराम्वरच्छविजितजातरूपतया नक्षत्र(२)मालासम्वलकज्योतिस्तूपतया च यदा स्फुटमुद्गच्छति स्म तदा पारावाररहितलोकवारवारां निधिरुल्लोलकोलाहलं कलयति स्म ॥

आशीर्व्वाद-नति-स्तुति-श्रुति-गिरां सङ्गीतविद्याश्रियां
वाद्यानां च दिवस्पृथिव्यनुगतप्रावल्यभाजां तदा ।
यः शब्दस्तुमुलः स तु स्वयमपि प्रत्यङ्गमप्येकलां
कृष्णार्थं विदधद्दधार भगवच्छास्त्रस्य तुल्यस्थितिं ॥

अथ तत्र व्रजराजस्तेन विराजमानतया निविश्य दिश्यदिश्यगुणिजनानां गुणगणमाविश्य तेभ्यश्चालभ्यधनानि प्रादेश्य वन्धुजनान्निज-वेश्म प्रवेश्य नानारसं नानारसमपि निवेशयामास ॥

---

(१) करणोपमाने । (२) हारविशेषः ।

[१२२]

तत्र च ।—

भोग्याना(१)मुत भोग्यानां(२)
सङ्ख्या सङ्ख्यावता(३)मपि ।
सङ्ख्यानाय न कल्पेत कल्पे(४)तत्रापपात्यपि ॥

तदेवं दिव्यपक्षिण्यामिव चमत्कारं वञ्चयित्वा गतायां तस्यां पक्षिण्यां सुखदे वृत्ते च वृत्ते सद्वृत्तेन श्रीव्रजराजेन समाजेन सह सर्व्व एव विवाहपर्व्व-सङ्गताः परार्द्धमतीत्य वर्द्धमानाः सार्द्धदिव सत्रप-मधिकृत्य समर्द्ध्यमाना बभूवुः ॥

तदनु च तास्तु हरिणनयना हरिपरिणयना-लब्धगर्व्वाः सर्व्वाश्चतुर्थदिनकर्म्मणा लब्धशर्म्म-तामवापुः ॥

तत्र च ।—

राधामाधवयोः समासनयुजोस्तुर्य्येऽह्नि पाणिग्रहा-
त्स्नानं वसनं विलेपरचनं माल्यं मणीनां कुलं ।
निर्म्मञ्छावलिमन्वनेकमसकृन्नीराजनं ध्यायतः
स्वान्तं मे सुखतां प्रयाति न सुखं
भिन्नं क्वचित्पश्यति ॥

---

(१) भोगविषयाणां । (२) भोगमर्हतां ।
(३) पण्डितानां । (४) काले ।

समशनमदधाद्यसक्रियाचारलब्धं
मिथुनमिदमजैषीद् द्यूतके यन्मिथश्च ।
तदिदमुभयमासीन्नाद्भूतं यद्वयतिस्ते
सततवलितसर्गे भोगवर्गे जये च ॥

यः स्यात्कङ्कणमोचनाख्यकुतुके
प्रेयान् प्रियावाजन-
स्तद्ग्रन्थिव्यतिमोचने द्रुततरः
श्रेयान् स इत्थं प्रथा ।
तत्र श्रीयुतराधिका तु दधती लज्जां विलम्बान्विता
चक्रे स्वप्रभकं प्रताङ्कतमपि स्वं कान्तमग्र्यक्रियं ॥

वीक्ष्य ब्रह्मशिवादयः परिणयं कृष्णस्य नानाविधं
यद्यद्वस्तु निचिक्यिरे वहुतरं तत्प्रीतिदानं प्रति ।
तत्तु श्रीव्रजजन्मनामतिमतिं प्रीतिं तथात्मावधि
श्रीमद्दान[१] मवेक्ष्य ह्रीभिरखिलं
निर्म्मञ्छनं निन्यिरे ॥

अथ पञ्चमेऽहनि निमन्त्रणप्रपञ्चमञ्चन् पूर्व्ववदेव सवधूकः सह वन्धुभिः प्रतिश्वशुरगृहमसुरमर्द्दनः ससुखमर्हति स्म ॥

---

(१) महादानं ।

तत्र च सम्भोजनपर्व्वानन्तरमम्भोजलोचनः सर्व्वासामपि तासामर्व्वाचीनवधूनां केलिकुञ्चिकाद्वि(१)कुञ्चितनयनाभिः(२)सञ्चितसर्व्वानन्दनर्म्मद्वितीयानयनपर्व्वानुभूय भूपश्च गृहमाजगाम ॥

यत्पर्व्व चारभ्य साङ्गसभ्याङ्गनानि मन्त्रणया प्रेमपरतन्त्रतया च मुहुरभ्यर्णतामायारचितसमाधानमयराधादिसाधारणाकायाश्च ताः श्रीवल्लभसम्वलितराधादिवल्लवीनां तन्मातरपितरादीनामपि प्रीतिदानवितरपात्रीबभूवुः ॥

यतः पूर्व्वमेता एवास्मन्मर्य्यादां पर्य्यापयामासुरिति । ते सख्यादिप्रख्यां प्रीतिं प्रख्यापयामासुः ॥

स्वपाणिग्रहणान्तरं यथावसरमन्यदपि कौतुकमनुभूतवाननुभावितवांश्च ॥

यत् खलु स्वापत्यया कौमार एव स्थितानां श्रीदामादीनां विवाहनमिति ॥

अथ स्निग्धकण्ठः समापनमाह स्म ।—

यत्पर्व्व व्रजदुग्धसिन्धुजरमापाणिग्रहाख्यं हरे-
रालोक्यापि सरस्वती स्वयमपि श्लोकेन न ह्यण्वपि ।

---

(१) स्याल्लिकाकेलिकुञ्चिकेति त्रिकाण्डशेषः ।
(२) कुञ्चिताक्षीभिः ।

तर्ह्यन्ये कवयः क्व वा स्थितिपदं गच्छेयुरेवं स्थिते तत्रानन्वयिवर्णनं रचितवानात्मा मम ह्रीच्छति(१) ॥

तत्र च ।—

यद्यप्यभूत्तत्र विचित्रसुभ्रुवां
कृष्णेन पाणिग्रहणे सहायकः ।
तथापि मासः(२)स विभाति दृश्यतां
राधाख्यया माधवसंज्ञयापि च ॥

माधवस्वच्छपक्षश्रीः सा जीयाद्वरशर्म्मदा ।
विधुराधायुग्मभावे निर्व्वाधान्तरदूतिका ॥

अत्र मधुकण्ठः सानुशयमाह स्म ।—

हन्त ! यद्यपि सर्व्वशक्तमं सन्ततमेव सन्ततं तथाप्यस्मन्मनः कमपि मनस्कारं विना विकारमासीदिति ।

यद्वृन्दावनीयरासादिविलासानन्दिन्याः कालिन्द्या द्वारकावरोध एव रोधाय कल्पते स्म ॥

स्निग्धकण्ठ उवाच ।—

भ्रातर्माऽत्र तिलमात्रं तृप्तरपात्रं मनः कृथाः । तस्याः खलु विशाखारूपेणात्र वर्त्तमानायाः शाखा-

(१) ह्रीच्छलज्जा ।　　(२) वैशाखः ।

न्तरमेव तत्र वर्त्तते । या च गोपकन्यारूपेणातीवात्र धन्या विभातीति ॥

मधुकण्ठ उवाच ।—

विशाखा कथमत्र गोरी दृश्यते यमुना खल्वन्यत्र श्यामा परामृश्यत इति ॥

स्निग्धकण्ठः सस्मितमुवाच ।—

श्रीराधिकावेशसाधिका तदावेशाधिका सा पेशस्कारी संगृहीतशलभी-भावं लभते स्म ॥

यथा प्रतिकल्पं(१) जन्मतारासाधारणतामपि तन्नामाभेदकारणतामानयतीति ॥

अथ पुनः समापनमाह ।—

राधामाधवयोर्व्विवाह इह यः काव्यस्य निर्व्वाहन-
स्वस्त्यर्थं निहितस्तयोश्च स भवेद्रागस्य निर्व्वाहकः ।
रागः सोऽप्यनुपद्रवस्थितिमिथः
सङ्गास्पदस्तत् त्यज-
न्नात्मीयास्पदमन्तरा विवहनं
शोच्यं जनुः प्राप्नुयात्(२) ॥

तदेतदुपलक्षणतयान्यासामपि तदुपलक्ष्यं । तत्र च पूर्व्वार्द्धमेवं परीवर्त्तनीयं ।—

---

(१) भवतारकाले । (२) दृथ्याद्वृथा जन्मतां । इति पाठान्तरं ।

दाम्पत्यं व्रजसुभ्रुवामघजिता यज्जातमेतत्परं ।
काव्यस्य प्रथते न निर्व्वहनकृत्
किन्त्वेषु रागस्य च ॥ इति ॥

तदेतदाकर्ण्य तु वर्ण्यमानं
विवाहवृत्तं चिरकालवृत्तं ।
तामेव साक्षादिव वीक्ष्य रात्रि
रहस्यमू धामनि दीव्यतः स्म ॥

इति श्रीमदुत्तरगोपालचम्पूमनु श्रीराधा-
माधवविवाहनिर्व्वाहः पञ्चत्रिंशं
पूरणम् ॥

षड्त्रिंशं पूरणम्।

अथ तस्या एव रजन्याः श्रीराधा-माधवसभा-
कथा पृथक् प्रथ्यते ।

यत्र मधुकण्ठस्निग्धकण्ठावनुक्रमेणाहतुः स्म ।—

तदेवं स्थितेऽपि हरिणा सह हरिणीनेत्राणा-
ममूषां मिलनयुक्तिर्न मीलितासीत् ॥

यतः ।—

सङ्कोचकारणशते विगतेऽपि कुल्य-
स्त्रीपुंसयोरुचिभृतोर्व्यतिसङ्गमाय ।
लज्जा तु तत्र(१)कलयापि कृतानुषङ्गा
सर्व्वं व्यतीत्य सहसा जडतां तनोति ॥

तथा हि ।—

वाढं प्रागौपपत्यभ्रममनु तदिदं
तर्कयेत् कोऽपि नेति
श्रीगोपीगोपराजात्मजमिथुनकुलं
जानदाक्रीडदेव ।

(१) व्यतिसङ्क्रमे ।

सम्प्रत्युदाहृतः स्यादिदितमिति विद-
तन्मुहुर्लज्जमानं
क्रीडायां सुष्ठु सज्जत्यपि मनसि मिथः
शश्वदौदास्यमाप ॥

श्रीव्रजेश्वरी तु तत्तन्नाम्ना शय्यामात्राणि तासा-
माशा-पात्राणि सज्जयति स्म ।—

तथापि तत्र तत्र सुतस्यानासज्जनं श्रवसि मज्ज-
यन्ती त्रपा-कृपाभ्यां कृपणमना बभूव ।

तदेवं स्थिते सप्रेयस्या(१)स्तस्य मनः पुनरविकल-
विकलतामप्यतलस्पर्शितया कलयति स्म ।—

तत्र प्रत्येकं प्रेयसीनां यथा ।—

मिथ्याभूतस्य मादृश्युपपतिरिति गी-
र्नैव सङ्कोचचर्य्या
सङ्गस्तस्मिन् कथं स्यादिति पशुप-रमा-
वृन्दमागाज्जडत्वं ।
लज्जां माधुं सहायानपि विदधदमू-
मेव पर्य्येति पर्य्य-
न्यस्मिन् किं तत्र कुर्य्याद्यदपि हृदि जन-
स्तृष्णया धृष्णगस्ति ॥

---

(१) तस्येत्यस्य विशेषणं ।

पुनश्च तासामेव ।—

अपयाते भय-जाते
स्वयमथ साम्राज्यमागता लज्जा ।
स्त्रीत्वादिव नः स्त्रीणां
मर्म्म ज्ञात्वा विमर्द्दयत्यभितः ॥

श्रीमत्प्रेयसश्च यथा ।—

हा ! मद्विश्लेषदूनाः कृतपरिनयना
एव सङ्गं मयामू-
र्नायाता ह्रीर्वराकी भवति जगति का
हन्त ! विद्युर्जनन्यः ।
त्यक्ष्यन्ति प्राणकांस्ताः किमहह ! करवै
स्रोतसोः सङ्गमान्त-
र्घूर्णायां घूर्णमानः किमपि न हि मना-
ग्धीरतां धारयामि ॥

नाथं मां नाथमानास्ता विजह्युर्नान्यथा व्यथां ।
राधा मन्नाथसम्बाधा[१] प्राणबाधां तु यास्यति ॥

तदेवं स्थिते वृन्दा तु पौर्णमास्या मन्त्रं विन्दमाना स्ववचसा यन्त्रयितुं तदिदं श्रीगोविन्दं रहसि निवेदयामास ॥

---

(१) मत्कामनासङ्कीर्णा ।

हन्त ! पूर्व्वं लोक-धर्म्मयोर्मर्म्म-बाधा भवतीति भवता तथा तथा व्यवसितं ॥

सम्प्रति तु तदुभयं किमिव न सम्प्रतीच्छते ॥

श्रीकृष्णः सावहित्थमाह ।— कथमिव ? ॥

वृन्दोवाच ।—

स्वयं जानतापि भवता कथमजानता विद्यते । तासां दुःसहजीवननिर्व्वहणता पुनरस्मत्प्राण-विरहमावहति ॥

श्रीकृष्ण उवाच ।—

नाद्यापि ताभिः किं सुखमभाजि ? ॥

वृन्दाह ।—

"अभाजी"ति सत्यमेव किन्तु भजे रूपमिदं न तु भजेः ॥

श्रीकृष्ण उवाच ।—

दुःखसदनादाकृष्टा एव तास्तर्ह्यद्यापि कथं हृष्टा न विद्यन्ते ॥

वृन्दा सप्रणयरोषमुवाच ।—

बाडवाग्निः सुधाब्धिर्व्वा न तासां स स उच्यते ।
किन्तु तौ ते क्रमात् कृष्ण ! विश्लेषः श्लेष एव च ॥

तत: सम्प्रति विश्लेषं प्रति तु ।—

स्तम्भे भद्रा निमग्ना वपुरनु चलने
श्यामला रोमहर्षे
शैब्याऽश्रूणोर्विपक्षा वचनविकलता-
स्वेषि चन्द्रावली सा ।
धर्म्मस्पन्दे विशाखा स्मितिमनि ललिता-
लीनतायां च राधे-
त्यष्टाभिर्वादमष्टावुदरमभिकृताः
प्राणनाथेन रक्ष्याः ॥

तदेवं रहसि निविशमानेन तेनानेनाभिनिविश-मानया देव्या सह सम्वादे व्याकृते कर्त्तव्यतावाधेन मनसि प्रत्याहृते मधुमङ्गलेन सह सहसा पौर्ण-मासी समाससाद ॥

आसद्य च तमाशीर्व्वादेन विशद्य वृन्दां प्रत्याह स्म ।—

भवतीमेवान्विच्छन्ती तदेतन्मङ्गलसङ्गितां सङ्गतास्मि ॥

वृन्दा सानन्दमुवाच ।—

आज्ञाप्यतां ॥

पौर्णमासी उवाच ।—

तदेतन्मम व्रजमङ्गलं प्रति निवेदनाय च सम्पत्स्यत इति पुरत एवास्य प्रथयामि ॥

तथा हि ।—

तदिदं मया व्रजराज्ञीं प्रति विज्ञापयितुं गतमासीत् ॥

यत् खलु पूर्व्वं तदिदमपूर्व्वं संकल्पितं । माधवेन राधादीनां दाम्पत्यसम्पत्त्यनन्तरं मया लक्ष्मीनारायणाराधनं साधयितव्यं । तच्च तन्निर्व्विशेषदम्पत्याराधनत इति ॥

वृन्दाह ।—ततस्ततः ? ॥

पौर्णमासी उवाच ।—

ततश्च तया सन्तुष्य मम वचनमपुष्यत । तदिदमच्छमपृच्छ्यत च । तादृशदम्पती च कावत्र परामृश्येते ॥

ततो विहस्य मया रहस्यमुक्तं । यद्दाम्पत्यसम्पत्त्यर्थं तत्रैव तन्निर्व्विशेषता प्रतिपद्यते नान्यत्रेति ॥

वृन्दाह ।—ततस्ततः ? ॥

पौर्णमासी उवाच ।—

ततश्च व्रजपति-पत्नी तदेतन्निशम्य रम्यमिदमाह स्म ।—

कुत्र किं यावत्तदाराधनमिति ॥

अथाहमवोचं निर्ज्जनवनमनु मासमेकं याव-दिति ॥

वृन्दाह ।—तत्किमाज्ञापितं व्रजराज्ञ्या ? ।

पौर्णमासी सस्मितमुवाच ।—

किं राधादिभिश्चश्रुम्मन्यवरवृन्दावदियमपि दुःसाधा । परन्तु यथा मदिच्छा तथैव हि तदिच्छा स्यात् ॥

वृन्दाह ।—विस्तीर्य्य तदाराधनमुदीर्य्यतां ॥

पौर्णमासी उवाच ।—

प्रातः श्रीव्रजराजदम्पतिसमाज्ञप्त्या हरिं राधिका-द्याभिः सङ्गमानयन्त्यनुदिनं पूज्यं विधास्ये दिनं । सन्ध्यायां च तथा निशामिति यथा पक्षद्वयं पूरितं स्यादेवं मुरहः स्वयं प्रति तदभ्यर्च्चाविधेया मया ॥

वृन्दा पुनरतिसानन्दमाह ।—

अधुना किमाज्ञाप्यते ? ।

पौर्णमासी उवाच ।—

आज्ञाप्यत इति कथमुच्यते ? किन्तु भवदीशितायं विज्ञाप्यते । यथा नाऽनन्याश्रितजनस्य मनस्ययं सिद्धकल्पः सङ्कल्पः प्रणश्यति ॥

श्रीकृष्णः सस्मितमाह ।—

यथा न मम सङ्कोचः स्यात्तथा रोचनीयं ॥

पूर्णिमाह ।—

अरविन्दाक्ष ! मन्दाक्षं खलु नाम्ना मन्दाक्षमेव । तदादरः कथमानन्दाय कल्पतां ॥

मया च तदेतद्भवदसङ्कोचरोचनार्थमेव पर्यालोचनं कृतमस्ति तस्मादन्यथा न शोचनीयं ॥

श्रीकृष्णः प्राह ।—

सर्व्वान् हित्वा कुत्रचिदेकत्र स्थाने(१) स्थाने(२) स्थाने(३) सङ्कोचः स्यादेव ॥

पूर्णिमाह ।—

तदेतदपि प्राज्यपूजायां तदनुज्ञा साम्राज्यमसङ्कोचार्थमेव तत्र प्रार्थितं । भवता तु दिवा गोचारणं सम्भवता नक्तं चाव्यक्तं कुत्र कुत्रचिद्भवता(४)

(१) स्थले ।　　(२) स्थितौ ।
(३) युक्तं ।　　(४) विद्यमानेन ।

पुरा यथा वर्गकोटिसंसर्गः समाधीयते सम्प्रति च तथा समाधातव्य एव ॥

अथ तदेतन्निशम्य रम्यस्मिततया मौनमालम्बमाने वनमालिनि वृन्दा तदिङ्गितमपाङ्गसङ्गि विधाय सानन्दमुवाच ।—

जीयाद्गोकुलजीवातुस्तारकाशोभनोदयः ।
श्यामानन्दिस्वच्छपक्षः श्रीराधाराधचन्द्रमाः[(१)] ॥

पुनरपि सगद्गदमाह ।—

भगवति ! कदा तदिदमुपक्रमणीयं ॥

पूर्णिमाह ।—

अद्य सन्ध्या यथा न वन्ध्या स्यात्तथा क्रमणीयं ॥

वृन्दाह ।—मय्याज्ञाप्यतां ? ॥

यथा पुष्पसमयेऽस्मिन् समये प्रतिपुष्पकुञ्जं तदाराधनधनानि समाचीयन्ते ॥

पूर्णिमाह ।—

मम निष्किञ्चनायास्त्वमेव काञ्चनमिति किमधिकमाज्ञाप्यं ॥

---

(१) राधाराधितचन्द्र इत्यर्थः । पक्षे राधानक्षत्रं राधो-मास ।

वृन्दा सस्मितमाह ।—

पूर्व्वंवदेव सङ्कुलाभिसारादिरीतिरायातास्तीति तद्विशेषश्चाज्ञाप्यतां ॥

पौर्णमासी उवाच ।—

यथा मन्त्रः कृतस्तथा निर्यन्त्रणं मया सोऽयमभिसारयितव्यस्त्वया तु सर्व्वसामञ्जस्याय साधारणतया सर्व्व एव श्रीराधादिगणा इति ॥

अथ वृन्दा स्व-मनः प्रत्याह ।—

अत्र चेयं दाम्पत्यनीतिरित्थमप्यदाम्पत्यरीतिं तिरस्करोति ॥

यतः ।—

पत्न्याः सङ्गे विविक्ताङ्गे(१) शुचितां(२) गच्छति त्रपा ।
परस्या(३) भय-निन्दाभ्यां क्लिष्टे तद्रूपतां न तु ॥
अनाचारा(४) त्तथा गोप्याचारा(५) ल्लज्जा भवेन्नृणां ।
पूर्व्वाभयादभिन्नात्मा परा लज्जा परं मता ॥

---

(१) विजनमङ्गं यस्य । पक्षे शुद्धाङ्गे ।
(२) पूतत्वं शृङ्गारत्वञ्च ।　　(३) अपत्न्याः ।
(४) परपत्नीगमनादिरूपात् ।
(५) निजपत्नीगमनादिरूपात् ।

ततश्च ।—

शृङ्गाररस्य भयानकेन मिलने हानिर्हि या माधुरी
तस्य स्यादुदितेति सर्व्वकविभि-
र्व्वाढं कृते निर्णये ।
प्राचा(१)सत्यमधर्म्मजा मिथुनता धत्ते वृता व्यग्रतां
धर्म्म्या चापरया(२) परन्तु कतरा
रस्येति निर्णीयतां ॥

किञ्च ।—

एके ह्रेपणमात्रा-
दितरे साध्या विभीषिकारचनात् ।
ज्ञाते तेषां तत्त्वे
विपरीतोपायमिच्छवः पृच्छ्याः ॥

तदेवं सति कादाचित्की भीस्तु भवतु नाम पूर्व्वं सप्रयोजनप्राया पुनस्तु कदर्थनामात्राभिप्राया स्यात् ॥

यतः ।—

नामूषां सहजानुरागविभुता
भीनिर्म्मिता किन्तु भी-

---

(१) भयानकेन । (२) लज्जया ।

र्लङ्घ्या स्यान्न तु वेति कौतुकमय-
　　　　ज्ञानार्थमन्तःकृता ।
तज्ज्ञातं यदि धर्म्मसेतुदलना-
　　　　त्तस्याः पुनर्विस्तृतिः
शुद्धोऽप्यग्निपरीक्षयाग्निषु यथा
　　　　स्थाप्येत तद्वन्मता ॥ इति ॥

तदेवं सर्व्वेऽप्यानन्दनतामानन्दिततामपि विन्दमाना यथायथं पथन्ति स्म ॥

अत्र स्निग्धकराठः प्रच्छन्नं पप्रच्छ ।—

भ्रातः ! कथमस्या वर्षीयस्याः स श्यामलः सर्व्वलोकादिव लज्जां न सज्जति स्म । न वा देवता-भूदेवताभ्यां वृन्दा-मधुमङ्गलाभ्यामिति कश्चिदनुयोक्ष्यति । तत्र किमुत्तरं दातव्यं ? ॥

मधुकण्ठश्च तथा प्राह ।—

भवान् खल्वेतन्नानुभवन्निव दृश्यते । पूर्णिमासौ रासारम्भे “योगमायामुपाश्रित” इति श्रीशुकनिर्द्दिष्टा सर्व्वत्र लीलापर्व्वणि तस्य विशिष्टा शक्तिरेव । वृन्दा तु वृन्दावनलीला । मधुमङ्गलश्चात्र श्रीनारदप्रकृति-र्नर्म्मप्रकृतिरेवेति ॥

अथ स्पष्टमाचष्ट।—

श्रीव्रजराज्ञी तु तदशेषं श्रीव्रजराजं विज्ञाप्य सुतस्नुषाश्चाज्ञापयामास॥

व्रजवासिमात्राणां तत्र यात्रां च वर्जयामास॥

पौर्णमास्याः प्रभावभावनया न च तत्र भयादिकं भावयामास॥

पौर्णमासी च श्रीकृष्णमेवमनुज्ञाप्य तद्वधूरप्य-नुज्ञापयामास॥

यत्र तासामभीप्सित-सिद्धिमपि सूचयामास॥

यथा।—

पूजायामन्यस्यां, पूजाकर्त्तुः परं फलं कलितं।
पूज्यानामपि वस्तुत,स्परमं सद्यो भवेदत्र॥

अथ सा श्रीराधावर्गनिमन्त्रणं सद्य एव सम्प-द्यमानमाचचार॥

चन्द्रावल्यादिकाः प्रति तु यथायथं ताराचन्द्रादि-वद्ध-प्रतीक्षां लक्ष्यं चकार॥

कृत्वा च मधुमङ्गलसङ्गता सन्ध्यातागमनावां तस्यां सन्ध्यायामेवागत्य व्रजपत्यनुज्ञानुसारतः कञ्जलोचनं निज-कुञ्जमेवापयामास॥

यत्र च मधुमङ्गलः श्रीमधुसूदनं रहसीदं सहास-मुदितवान् ।—

अद्य च पद्मजलोचन! तमेव सङ्कोचं रोचयसि तर्हि विवाहः कं निर्व्वाहं वहति स्म ? ।

श्रीकृष्णः सप्रणयरोषं तस्मिन् पाणिघात-लेशं जोषयन्नाह ।—रे ! धृष्णक् ! तूष्णीमास्वेति ।

अथ वृन्दा स्व-करेण पूर्व्वं कुञ्ज-वृन्दानां सञ्चस्करे । तथा राधिकादिवृन्दं स्व-वृन्दसहिता सहिता(१) सुमनःसम्वृतिधीरयमुना-नीरसमीरसर्व्वलोभास्पद-शोभा-पुञ्जं कुञ्जविशेषं सञ्जयामास ॥

तत्र श्रीकृष्णस्य गमनं यथा ।—

पीताम्वरावृततनुस्तनुयष्टिपाणि-
र्वेणुप्रवेशरुचिसङ्करभृङ्गलश्रीः ।
कृष्णः करेण कलयन् मधुमङ्गलांसं
प्रेम्णानुपूर्णिममगादथ तन्निकुञ्जं ॥

तासां यथा ।—

वसितनवनवांशुकप्रधाना
मणिकनकाभरणानुशिञ्जभाजः ।

(१) सह ।

मिषचितगुरुदिष्टिकृष्णमिष्टं
वरवनिताः सह वृन्दयाभिसस्त्रुः ॥

अथाश्रमेण पूर्णिमाश्रमे गतमात्रे सर्व्वसुखपात्रे मधुरमुखारविन्दे गोविन्दे समूढरुचिगूढकुञ्जपुञ्ज-स्थापितराधादिवृन्दा वृन्दा तत्र समयामास निशा-मयामास च तदिदं ।—

भगवति ! कथं विलम्बमालम्बध्वे ? कुञ्जसज्जिता राधादयः खलु निदाघान्तक्लान्तचातक्य इव क्षणमपि चाशक्यप्राणधैर्य्यास्तकर्यन्त इति ॥

अथ तदेतन्निशम्य वाष्पपूरितगलौ पूर्णिमा-मधु-मङ्गलौ वचनविकलौ सविकारेण विलोचनाद्या-कारेण कमललोचनमनुचलनाय याज्ञां कलया-म्बभूवतुः ॥

ततश्च ।—

राधां प्रति प्रतिपदं व्रजति स्म यर्हि
श्रीमान् विधुः क्रमवशात् क्रमते(१) स्म तर्हि ।
त(२)न्मासि माधवतया विदितेऽभिनीतं(३)
स्यादित्थमेव किमु तद्वलितं(४) चकार ॥

---

(१) स्फीतीभवति ।　　(२) स्फीतीभवनं ।
(३) युक्तं ।　　(४) वेष्टितं ।

गत्वा च कुञ्जानामुपरि सुमनोभिः सुमनोहरं मणिमयमित्रं चित्रं ददर्श। तले च तल्पादिभिराकल्पं न तु राधिका तदाराधिका(१)वा॥

तदा च विस्मिततया(२)विस्मिततया च तस्य(३) परिस्पन्दं(४)पश्यति परिस्पन्द(५)मपि विन्दमाने श्रीगोविन्दे वृन्दा जगाद।—

नूनं राधिकादिकास्तादृशतया संस्कृतादस्मादकस्माच्छ्रीगोकुलराजकुलचन्द्रागमनसम्भावनया सम्भृतान्निभृतात्कुञ्जाल्लज्जायां लब्धमज्जा मद्गमनानन्तरं कृतनिःसज्जनाश्च सम्प्रति सम्यगेतस्मादस्मदुपलभ्यमानतदीयसौरभ्यपूरे किञ्चिद्दूरे विश्रम्य वर्त्तन्ते॥

पौर्णमासी उवाच।—

भवत्या तावन्मन्नाम्ना समाहूय ताः समागम्यन्तां किम्वा निशाम्य समागम्यन्तां॥

अथ वृन्दा तथा विधाय पुनः पूर्णिमां सन्निधाय च सस्मितमाह स्म।—

किं ब्रुवे? ताः खलु तथा लज्जां सजन्ति स्म यथा

(१) राधासखीः। (२) विगतस्मिततया।
(३) कुञ्जस्य। (४) रचना स्यात्परिस्पन्दः।
(५) कम्पं।

गृह एव सज्जेयुः। परन्तु भवदाज्ञावज्ञाभयात्परमत्र भवतीं प्रतीक्षन्ते कथं मद्वचनादागच्छन्तु ॥

किन्तु ।—

यदा विदूरे मुरशत्रुरासी-
त्तदा तथा रीतिरदर्शि तासां ।
अस्याधुना सौरभतर्पिताना-
मन्येति दूते किल धूर्त्तता स्यात् ॥इति॥

अथ तदेतन्निशम्य पूर्णामनाः पूर्णिमा तत्र सङ्क्रम्य रम्यमुखीरमूर्व्रीडितवतीरपि निजाम्रेडितबलादा-गमयामास ॥

अमूषामागमनं यथा ।—

कृत्वा पुरस्तादथ पौर्णमासी-
मानम्रमूर्द्धा मृदुचञ्चदङ्घ्रिः ।
राधाप्रधानागमदालि-पालिः
स यत्र कान्तस्त्विषमातनोति ॥

तत्र च ।—

तरङ्गिणी-पतिना तरङ्गिण्य इव त्रियामारमणेन त्रियामा इव सुमनःसमयेन सुमनस इव षड्जादि-स्वरजातेन तदीयजातय इव विद्युत्वता[१] विद्युत

(१) दर्शनक्रिया ।

इव तेन मिलन्त्यस्ताः परस्परं परम्परमपि रुचि-वैभवं बिभ्रति स्म । मिलित्वा च ।—

अन्यत्र नेत्रे यदपि व्यसारयत्
प्रियावलिः सा च हरिश्च तत्प्रियः ।
तथापि दृष्टिर्विततान धृष्टतां
ग्रीवाश्च कृष्टां व्यतनिष्ट याणवपि(१) ॥

तदेवं सति तूर्णितमनाः पूर्णिमा तु जाया-धवौ तावथ राधा-माधवौ सनीतिभिर्याचनाचण(२)रीति-भिरेकासनगतौ विततान ॥

यत्र च ।—

एकस्मिन्नासने तन्मिथुनमुपविश-
न्नीलपीतद्युतीना-
मिन्द्राभं संक्रमेण च्छविविनिमिततां
धारयद्भूतभेदं ।
पश्यन्ती पौर्णमासी परिचयवुधता-
माशु सानाव्रजन्ती
दण्डार्द्धं(३) खण्डवुद्धिः पृथुगुपचरितुं
तत्र चित्रायते स्म ॥

(१) ईषदपि । (२) प्रसिद्ध । (३) घटिकार्द्ध ।

अथ कथमपि परिचयं वितत्य वृन्दायामुत्तरसाधकतामनुमत्य बृहद्गौतमीयविधिविस्रब्धतया स्वासाधारणभजनीयराधामाधवपूजामेवारब्धवती। पूर्व्वं हि लक्ष्मीनारायण-पदं तद्वयञ्जकताभाजनमेव व्याजहार ॥

तत्र च नायिकाष्टकमनुस्पष्टगणनयोरपि ललिताविशाखयोस्तदाचरणतामेव रुचितामाचितवती ॥

तथा हि। तयोस्तदेकहितयोरात्मनि निर्णयः।—

काश्चित्तं तु भजन्तु गोपनृपजं तेनात्मनः शर्म्मणे
काश्चित्तस्य तथात्मना न तु वयं तत्तच्च वुध्यामहे।
किन्तु श्रीगणलोभनीयमधुरश्रीभाजि तस्मिन् परां
राधा यत्परमौचितीं भजति त-
दृष्ट्या सुखं मन्महे ॥

अथ सभाजनकर्णसुखदं सभाजनं वर्णयिष्यामः।—

विविधकुसुमक्लृप्तं तत्र संक्लृप्तमेषा
व्यतनुत हरि-राधाराधनायासनं तत्।
कनकमणिजनीति(१) प्राक् प्रतीतं दृशा य-
त्तदनु परिचितं यन्नासया च त्वचा च ॥

(१) जन्मेति।

अरचयदथ यत्तु स्वागतं वागमुष्या-
स्तदतिमधुरभावेनामृतं द्रागजैषीत् ।
इति किल नयन[१]ञ्च स्वाश्रु[२]तज्जि[३]द्व्यतानी-
द्यदिह विषयि-वृन्दं[४] स्यान्मिथः स्पर्द्धितर्द्धि ॥
महयितु[५]मिह लक्ष्मीयुक्तनारायणाख्यं
भवदुपहितमस्मिन् कुञ्चतः[६] किं भवन्तौ ।
इति दरहसितश्रीपूरकर्पूरयुक्तं
व्यतर[७]दमलपाद्यं पूर्णधीः पौर्णमासी ॥
अकृत चयमनर्घं[८] पूर्णिमा शुभ्रमर्घं
स्वय[९]मनुमतवन्तौ स्वीयमर्घं[१०] तमेतौ ।
वशयति किल पूजाभासलेशश्च तौ चे-
द्ललितरतिविलासस्तद्विधस्तूर्द्ध्वमस्तु ॥
इयमथ यददाद्वा रम्यमाचम्यमम्भ-
स्तदनु मधुरता या कस्तु तां प्रस्तुवीत ।
प्रतिफलित[११]मभूद्यत्तत्र कान्तास्यमस्मा-
दरचयदधिकान्तं शर्म्म शीत्कारकारि ॥

---

(१) कर्त्तृ ।　　(२) कर्म्म ।
(३) अमृतजित् ।　　(४) इन्द्रियं । श्लेषेण विषयभोगि ।
(५) पूजयितुं ।　　(६) सङ्कुचतः ।
(७) ददौ ।　　(८) अमूल्यं ।
(९) आत्मनः ।　　(१०) मूल्यं ।　　(११) प्रतिविम्बं ।

अदिशत मधुपर्कं पूर्णिमा यश्च ताभ्यां
स पुनरतिमधुश्रीमोदनार्थं बभूव ।
मिथुनवदनपद्म-न्यस्तसौरभ्ययोगा-
दधररसमिवान्योन्यस्य यत्तर्हि दध्रे ॥

तदधररसपर्कं तं रसं माधुपर्कं
मिथ इह मिथुनं तत् त्यक्तुमीशीत नैव ।
इति किल सहसा साचम्यनीरं न्यतारी-
त्तदपि हृदि स लग्नः क्षालनं केन यातु ॥

स्नपनमथ मुनीशा प्रस्तुतं वीक्षमाणा
निशि तदुचितमासीन्नेति तन्नाचचार ।
विधिमथ च समाप्तं कर्त्तुकामानुकल्पं
मुकुरकलितमेतन्(१) मोदमाना चकार ॥

वितरितुमथ वस्त्रं सा क्षणां प्राप किन्तु
ह्रियमभिमृशती न स्वैरसम्वस्त्रणाय ।
इति विधिभृतिहेतोर्दर्शितं यत्तु दूरा-
न्मिथुनमनु तथापि च्छायया(२) सीत्कृतार्थं ॥

स्फुटमधिदशवर्षां गौतमीये यदिष्टं
व्रजवरपति-सूनोरर्च्चने यज्ञसूत्रं ।

---

(१) स्नपने। (२) प्रतिबिम्बेन।

अवसरमिह तस्य प्राप्य तद्वेश्यवेश्यं
रुचिमनु वितरन्ती तां(१)तरन्तीयमासीत् ॥
अधित मिथुनतन्वोरप्यलङ्कार-सङ्गं
कुसुममयमपूर्व्वं तर्हि सा पौर्णमासी ।
मणिमयमपरं यः स्वर्गवर्गस्थमुच्चै-
रजयदतुललक्ष्म्या मोदलक्ष्म्या तु वाढं ॥
शुभसुरभिमथादादङ्गरागं तमेषा
त(२)दतनु-तनु-गन्धं प्राप्य यः सुष्ठु वल्गून् ।
विदधदनुगलोकं वासितं तच्च कुञ्जं
निखिलमकृत तद्वत्काननं तच्च सर्व्वं ॥
स्रजमतनुत गौरी कृष्णयोरत्र युग्मे
बहुरुचिमथ यां यामन्यथातर्कि सा सा ।
हरिधनुरिह विद्युद्विद्युदभ्रा(३)दुपेत्य
स्वलषितमुपसीदत्तच्छ्रिया लीयते स्म ॥
दिशि दिशि कृतपूर्त्तिर्धूमयोनीयमानः
सदगुरुगुरुधूमस्तत्र सन्तन्यते स्म ।
वरपरिमलवृष्टिं यस्तु कुर्व्वन् समन्ता-
त्तनुरुहकुलहृष्टिं शष्पसृष्टिं चकार ॥

---

(१) रुचिं ।　　(२) मिथुनं ।　　(३) किवन्तं ।

अरचि य इह दीपः स स्फुरन् दम्पती त-
त्तनुरुचिमनुभान्त्या स्वीयकान्त्या पुपोष ।
इयमिह गुणपूर्त्तिर्नातिचित्राधिमूर्त्ति[1]
प्रतिसखि यदमूर्त्तं भावमप्याततान[2] ॥
अरचि च फल-मूलं यत्तु वृन्दावनीयं
मिथुनमनु निवेद्यं तत्र वीक्षस्व चित्रं ।
यदलमशनतः प्रागेव सौरभ्य-पूरं
प्रवहदतिविदूरं तृप्ति-क्लृप्तिं चकार ॥
तदनु मदनबीजेनानुजप्तं मुनीशा
मिथुनमनुददे तन्नव्यताम्बूलवर्य्यं ।
यदनु च दुरवाप-प्रार्थनायां निजाया-
मनुमतिमनु तस्मान्निःससज्जाथ लज्जा ॥
रचयितुमथ तां सा हृद्यविज्ञप्तिचर्य्या-
मरचयदतुलाभैर्वैभवैः सेवनानि ।
रुचिररुचिविराजच्चामरच्छत्रनीरा-
जनमुखसुखसारैर्लास्य-हास्यादिभिश्च ॥

सा च विज्ञप्तिर्यथा ।—

यत्प्राप्तुं स्पृहितं मया विरचिता यार्च्चा च ताभ्यां मम
स्वान्तं पूर्णमपि स्पृहान्तरमथ श्रथ्नाति तच्छ्रूयतां ।

---

(१) मूर्त्तौ । (२) पुपोष ।

त(१)द्वीजाङ्घ्रिपतुल्यतां द्वयमगादेतत्तु तस्मिन् फलं
यज्जायेत विविक्तविश्रमसुखं वामत्र कुञ्जान्तरे ॥

अथ तदेतन्निशम्य सलज्जायमानरम्यनयनयो-
रमयोर्मुनिवर्य्याकार्य्य-पर्य्यायं व्याजमाचर्य्य वृन्दा-
मधुमङ्गलाभ्यां सह स्वयं व्यवधानमभ्यादद्दे ॥

आल्यश्च तं समयं प्रतिपाल्य कुञ्जस्य वहि-
रितस्ततः स्वयमुपविश्य कर्णोन तं पुनरन्तःप्रविश्य
स्थिताः ॥

तदनन्तरन्तु ।—

राधा तद्विरहं महानलतयानुस्मृत्य तस्मिन्नलं
रासक्ष्मादिकुरुस्थलान्तमिलनं सर्पिष्टयाध्याय च ।
तञ्च प्राग्व(२ दनुस्फुरत्तनुतया मत्वा प्रियं तत्पुरः
सम्मोहं मुहुरागता तमसकृद्वयग्रान्तरं निर्म्ममे ॥

अथ तेन सम्भ्रमात् क्रमादेव वहिरुपलम्भं
लम्भिता तु ।—

सा तत्तद्विरहं पुरा गततया स्मृत्वा मुहुस्तत्पदो-
र्भालं सन्दधती समन्दरुदितं तौ(३)रोदनेनार्द्रयत् ।

---

(१) स्पृहावीजं अर्थां अङ्घ्रिपः ।
(२) यथा द्वारकां गतः स्फुरन्नासीत् । (३) पादौ ।

कृष्णास्तां परिरभ्य पृष्ठमनु सोऽप्यश्रूणि सुस्राव त-
द्रात्रौ तत्र तयोर्विलासकणिकाप्याप्नोतु कुत्रोदयं ॥

तावत्तत्परिकल्य तुल्यवयसः सान्त्वार्थमन्तर्गता
दम्पत्योः प्रतिपद्य विक्लवदशां तां भेजिरे प्रत्युत ।
आलिङ्ग्याथ मिथः सवाष्पविविध-
क्षोभेण पर्य्याकुलाः
प्रत्यूषं प्रतिपेदिरे कथमपि प्रेयान् स ताश्च प्रियाः ॥

ततश्च । प्रातः कथञ्चिद्बहिरागतेषु तेषु ।—

अस्राक्तानि च लोचनानि दशना
स्पृष्टानि चोष्ठाधरा-
ण्यस्रस्तानि च कैशिकानि वलित-
ग्रन्थीनि वस्त्राण्यपि ।
तासु प्रेयसि चावलोक्य रजनी-
प्रान्ते तदा पूर्णिमा-
वृन्दाद्या न रहःकलामनुममुः
किन्त्वादिदुःखस्मृति ॥

ततश्च ।—

दम्पती प्रति पूर्णिमा पूर्णास्रमिदं बभाषे ।—

———

यद्यपि वियोगदुःखं, मनसस्त्यक्तुं न हीशाथे ।
पातुं तदपि सदाऽस्मा,नभ्यस्य तमाशु विस्मर्त्तुं ॥

अथ लज्जां सज्जन्तावमू किञ्चिदप्यप्रोच्य नमूतयैव तदभिरोच्य पृथक् पृथक् व्रजाय वव्रजतुः ॥

तत्र प्रेयसी स्व-प्रेयसीभिर्निर्ज्जनवर्त्मना वव्राज । अजित्वा च प्रातःकृत्यपूर्व्वकमात्मानं परिष्कृत्य व्रजेश्वरी-चरणानुचर्य्यामाचचार ॥

प्रेयांस्तु क्रमशः सनर्म्मवटुना तत्तद्रहःसेवकैर्मित्रैश्चित्रजनैः पथि श्रितगतिः प्राप्य व्रजं तेषु च । कैश्चित्तैरुचितैर्गतान्तरगृहः स्नानादिभिः शोभितः पित्रोस्तत्तदशेषलोकवलयस्याप्यच्छि-सौख्यं दधे ॥

तदेवं मुहूर्त्तपूर्त्यां तौ पुनः पूर्णिमादिभिर्व्वनानयनमनुभूय पुनस्तत्पूजां सम्भूय मध्यन्दिने कृत-दिनेश-किरणविस्तरणे निर्ज्जने घनच्छायामञ्जु-कुञ्जमनु कुसुमपुञ्जतल्पमेवानल्पसुखाय तन्निवेदन-वशम्वदतया भजतः स्म ।

तत्र च कृष्णस्तद्विलाससतृष्णस्तां मुहुरनुनिनाय ।

तथापि तस्या दुःखवश्यतामेव व्यस्यन्त्यामतएव तस्मिन् मलिनां दृष्टिमेव न्यस्यन्त्यामत एव

संहितमानायामिव तस्य मुहुरपि हस्तयमानायां(१) सख्यस्तु तन्मनः प्रख्यापयामासुः ॥

विरहव्याकुलतया वहुलप्रकारविकारमस्या मनः कियद्वर्णयिष्यामः । सम्प्रति प्रतीतन्तु प्रथयिष्यामः ॥

हा ! यादृग्विरहक्रमः समभवत्तादृग्न यद्याशया
स्तब्धः स्याद्वत तर्हि जीवनमिदं
क्कासीत धिङ्मादृशां।
तन्नासीत यदा च माधव ! तदा चेदागतिस्ते भवे-
द्वाष्ठे सा तव दुष्टुकष्टनिचिति-
र्वा कुत्र माया(२)त्प्रभो ! ॥ इति ॥

ततश्च तस्य तासामपि दुष्पारे वाष्पे वाष्पेण(३) समं समन्ताद्वहिर्लब्धनिष्पाते श्रीकृष्णस्तस्या मुखमार्ज्जवेन मार्ज्जयन् कथमपि ताम्वूलं सम्वलयति स्म ॥

यथा ।—

वियोगार्त्तिं तीर्त्वा प्रियहृदि गतापि स्मृतिवशा-
दुदस्रासीदेषेत्यनुनयगिरा शश्वदमुना ।

---

(१) हस्तं निरंस्यन्त्यां। (२) मा माने।
(३) उष्मणा।

वितीर्णं ताम्बूलं मुखमनु चिरस्यापि सुमुखी
न गीर्णं न त्यक्तं व्यतनुत न दष्टं तिलमपि ॥

नाचर्व्वयत ताम्बूलं सेयमित्यघमर्द्दनः ।
तत्र स्व-चर्व्वितं प्रादान्मुखमुन्नमयन्मुहुः ॥

तदेवं तामेतावत्प्रसाद्य पुनस्तद्वद्व्रजगमनादिकं विनिष्पाद्य रजनीशयनमासाद्य कान्तेन भिक्षिता सखीभिश्च शिक्षिता कान्तमनु शान्तं विलोचनान्तमाचचार ॥

यत्र च ।—

यद्यद्वृन्दावनभुवि, कुरुभुवि चाभूद्द्वयोर्मिलनं ।
तद्विस्मृतिरप्यासी,दनुरागस्तन्नवं नवं कुरुते ॥

ततश्च ।—

हस्ताब्जं बाहुवल्लीमपरमवयवञ्चामृशन्यश्च शाखे-
नालिङ्गन् साङ्गमुच्चैरनुनयचतुर-
स्तां प्रसन्नां चकार ।
कृत्वा चामूं निजेनाप्यधरजमधुना-
मोहयन्नागराणां
सोऽयं चूडामणीन्द्रः क्रममनु रमणं
रोचयामास कृष्णः ॥

तत्र च ।—

नहिकारं चाटुकारं द्वयोरत्र सखीजनः ।
आकर्णयन्नमूं रात्रिं शर्म्मपात्रीं विनिर्म्ममे ॥

अत्र रात्रेरवशेषेऽपि तयोरनवधानश्लेषे सखी-
भिरेवं प्राभातिक-रागमयमुपजगे ।—

सखि ! दम्पत्योरनयोर्युगलं ।
कुरुते किमपि च न स्मृतियुगलं ॥ ध्रु ॥
कैरविणी-कुलमलिरिह विसृजति ।
तदपि विहारं कम्वा न सृजति ॥
विसिनीकुलमथ दिशि दिशि विलसति ।
तदपि च नतरां वहिरनु विकसति ॥
दिनकरसारथिरुदयं गच्छति ।
तत्र च नयनं नाण्वपि यच्छति ॥
तारावलिरथ रुचिमुत्कलयति ।
एतत्पुनरिह तामुच्छलयति ॥
वीणा-ततिरपि कलमाकलयति ।
तदपि च मौनं नितरां वलयति ॥
दधिमथनं व्रजनिलये निनदति ।
आकारितमपि तदिदं न वदति ॥

उद्गाना[१]दपि तदिदं[२]कविरपि ।

वहिरुपलम्भं न नयति रविरपि ॥इति ॥

तदेवमपि तयोरावेशमत्यजतोर्विशाखा तु शाखा-व्यवहिततया विलोकं विलोकं स्वल्पास्मितमल्प-मल्पमिदं जजल्प ।—

सखि ! ललिते ! पश्य पश्य तव वयस्ययो रीतिर्भ्रमपरीतीभवित्री विभाति ॥

ललितापि तथाह स्म ।—

सखि ! सत्यमित्थमात्थ । यत्खलु प्रेयस्या-मस्यामेष प्रेयसः स्फुरति वेषः प्रेयसि तु प्रेयस्या इति ॥

विशाखा प्राह ।

तन्मन्ये द्वयमन्योन्यमभिमानविनिमयमवाप । यत्परस्परनेपथ्यपरायणतायामपि वैपरीत्य-मुवाह ॥

ललिताललाप ।—

अत एतदनुरूपं विलासमपि लब्धरूपं निरूप-यामि । भवतु; सम्प्रति शृणुवः किमाह प्रेयसी ॥

---

(१) उच्चैर्गानात् । रविपक्षे उद्यात् । गाङ गतौ ।

(२) कर्म्मभूतं ।

विशाखा वक्ति स्म।—

तदिदमियं सास्त्रमाश्रावयति।

पुराभीक्ष्णां स्वप्ने मिलनकृदसावद्य च तथा
मिलित्वा तां मां त्वं छलयितुमलं मा किल शकः।
महामोहं गत्वा तव विलसितेनाहममुना
पुनर्जाग्रद्भावं वत ! कथमयिष्ये(१)शुभमते(२) ! ॥

ललिताह।—

हन्त ! पूर्व्वमियं चिरन्तनविप्रयोगनिदाघतर्ष-चारमरु(३)दन्तर्वर्त्तमानासीदद्य तु सद्यस्तनसम्भोग-हर्षवर्षाविलासझञ्झानिल(४)शीतलदेहलतापि प्राचीनतापसंस्कारं न मुञ्चते। द्वयो(५)रपि तयोः(६) प्रगल्भतया क्षुभितताञ्च सञ्चिनुते॥

विशाखा प्राह।—

किमद्यापि विलम्बसे ? रविविम्बमुद्यद्वर्त्तते॥

ललिताह।—

लघुलघुत्वमभ्यन्तरं शान्तमगमनतया गच्छ॥

---

(१) अय गतौ। (२) सम्बुद्धिः।
(३) चारवायुर्निदाघज इति त्रिकाण्डशेषः।
(४) झञ्झानिलः प्रावृषिज इति त्रिकाण्डशेषः।
(५) संयोगवियोगयोः। (६) चारझञ्झयोः।

अथ विशाखा तथाविधाय सन्निधाय स्मितमपिधाय च प्रेयसी-वेषं प्रेयांसमवादीत् ।—

[1]सखि ! प्रातर्विभातं सर्व्वं पश्य तस्मादेनं वयस्यमादाय वहिर्विराजस्व ॥

अथ तदा मिथुनमपि मिथः पश्यत् किञ्चिल्लज्जामानञ्च ॥

प्रेयसी तु प्राह स्म ।—

प्रियसखि ! तव सखासौ मयि खलु कामपि मोहनीं विद्यामारोहयामास । येन भ्रमः समजायत । तस्मादहो ! वत ! हहा ! तदिदं यथा ललिता न पश्यति तथावश्यमाचर ॥

अथ विशाखा स्मित्वा कम्पिपञ्चशाखतया सयाथातथ्यं तयोर्नैपथ्यं प्रथयामास । प्रथयित्वा च मिथः प्राणप्रतिमं तन्मिथुनं कुञ्जशयनाद्वानिनाय । आनीतञ्च त[2]दभिनीतसखीभिः सविधादसविधात्पुनः पूर्णिमादिभिरवलोकयामासे ॥

---

(१) वस्त्रविनिमयेन तयोक्तिः ।　　(२) युक्तं ।

ततश्च ।—

सम्भ्रमात् प्रतिगतं विचप्रचां(१)

वेशमस्य मिथुनस्य पश्यत ।

इत्थमुन्मदगिरः सखी-तते-

र्देवतेव विशति स्म सा(२) हृदि ॥

अथ पूर्णिमापि समीपमागतास्तीति निशम्य रम्यस्वभावा लब्धलज्जावाधा राधा-सखीनामधि-मध्यं लीनतया स्थिता। श्रीकृष्णस्तु नम्रतयाति-कम्रवदनं स्वव्रजमेव वव्राज पश्चादसौ(३) च ॥

अथ पूर्ववत् पुनर्वनागमने दिवस-समापने च जाते नक्तमिदं निज-प्रेयसि राधा निवेदयति स्म।—

मम सुखविधये सदा समस्तं

निजसुखमाचरतः स्म नादृतं ये ।

प्रियतम ! ललिता-विशाखिके ते

धिनु लसिते न पराश्च मत्परायाः ॥

श्रीकृष्णः प्राह ।—

प्रिये ! ते ताश्च व्याजे व्यज्यमान एव तन्मंस्यन्ते। स खल्वत्र क्रमतः स्यात् ॥

(१) विचितश्च प्रश्चितश्च यस्यां क्रियायां सा विचप्रचा ।
नानाप्रकारवैतथ्यमिति यावत् ।
(२) विचप्रचा । (३) प्रिया ।

सा तु स्मित्वाह ।—

मम वेशं विधाय प्रथमं प्रवेशमाचर ॥

श्रीकृष्णः प्राह ।—प्रियतमे ! तथा क्रियतां ॥

अथ कृतबहुविलासेन परिहासेन तया तथा रचितः श्रीमानजितस्तेनातिगोपिना[1] तद्वेषेण ते सङ्गम्य विकस्वरेण श्रीराधिका-स्वरेण रम्यमिदं सूचितप्रणयमूचिवान् ।—

भो ! वयस्ये ! युवयोर्व्वयस्यं परिहस्य रहस्यमत्रागतास्मि । तस्माद्युवयोरुपगात्रं मम गात्रं क्षणमात्रं शयनपात्रं क्रियतां ॥

इति तथा विधाय शयितः संहितराधावेषः स राधा-दयितः स्वैरमेव राधेति मत्वा ताभ्यां बहु परिहसितः पुनरुवाच ।—

सखि ! विशाखे ! किं कुरुते ? स पुरुषोत्तमस्तदवमृश्यतां ॥

अथ विशाखा तत्र गत्वापि ततः शङ्कां मत्वा तदीहामूहितुं चिरं निलीय तस्थौ ॥

अत्र तु स नागरचन्द्रः स्वविलसितमेव लसितं चकार ॥

---

(१) गोपीमतिक्रान्तां तेन ।

अथागतायामनिर्धारितवृत्तशाखायां(१) विशाखायां ललिता स्वलज्जानिःसज्जनाय(२) तस्यामनादरमिव विधाय मिषात्तद्वृत्तान्तविशेषानयनं प्रतिज्ञाय तां तदन्तिके रक्षित्वा स्वयमलक्षितं तत्र स्थित्वा कुतुकानन्तरं(३) च मनसि बहु जहास । हसित्वा च तत्रैव स्थानान्तरे निलीय स्थितां श्रीराधिकामपि लब्धवती ॥

पुनरेवं तेन प्रेयसा प्रेयसीभ्यामपि ताभ्यां मिलित्वा सा तद्वदखिलाः सखीर्व्रीडयामास ॥

तदेवं रात्रावत्रानेककुतुकसत्राणि विस्तार्य्यापरस्यामपि तस्यां स विदग्धशेखरस्तया परमवल्लभया सह विहरति स्म ॥

तदा तु सा पुनरन्यत्प्रार्थयामास ।—

अयि ! नाथ ! तद्विदमपि मम नाथितं प्रथितमाचर । चन्द्रावलीवालिताः सर्व्वा एव वयं निदाघलता इव विरहदहनजातदहनाक्रान्तां गताः । ततः सर्व्वासामपि तदुपशमपूर्व्वकाणि पर्व्वाणि चक्षुषोः समक्षाणि कर्त्तुमिच्छामः ॥

---

(१) भागायां । (२) क्षपाय ।
(३) विशाखया सह रत्यनन्तरं ।

श्रीकृष्णः प्राह ।—

भवती यदि लब्धाभूल्लब्धा एवाखिलाः प्रियाः ।
न लब्धा यदि लब्धा स्यान्न काचिदपि सुन्दरि ! ॥

तथापि यदि तव सुखमुन्मुखं स्यात्तदामूरपि तत्र समूहमानयिष्यामि ॥

किन्तु पूर्णिमायां याचस्व । यथा सा तासामपि साम समासादयति ॥

अथ सर्व्वसुखपरीतायामतीतायामपि तस्यां तमस्विन्यां विशाखापर्य्यायनाम्नी(१) विशाखया भगवतीं निवेदयामास ॥

सा पुनरेवमाह स्म ।—

मया पूर्व्वं चन्द्रतारादि-बल-प्रतीक्षा लक्ष्यीकृता ।
तत्र किमसाधारणं समाधानं ॥

विशाखा वक्ति स्म ।—

अत्र वाञ्छितसर्व्ववरिवस्यया प्रियवयस्यया तदिदमयुक्तं ॥

व्रजेऽपि तं विना जातः स कालः काल एव नः ।
तत्रा(२)भिमुख्यं यत्र(३) स्या
त्तं मुख्यं मन्महे सखि ! ॥

---

(१) श्रीराधा । (२) श्रीकृष्णे । (३) काले ।

पूर्णिमा सस्मितमाह ।—

तस्याः सम्मतिरेव सर्व्वमङ्गलसङ्गतिं धास्यतीति ॥

अथ वृन्दां प्रत्यप्याचचक्षे ।—

त्वं तावदधिगततत्तन्निशान्ता विज्ञापितार्व्वाचीन-वृत्तान्ता सर्व्वा मन्नाम्ना साम्ना निमन्त्रय ॥

अहं पुनरस्यां सर्व्वसुखसम्पदवन्ध्यायां सन्ध्याया-मागम्य वनमालिनं रम्यवनमिदमानयिष्यामि ।

अथ वृन्दा च तथाचचार ॥

तासु श्रीराधायाः प्रणयलब्धोदयां दयां चाधि-गमयामास । ततश्च वल्लीनामिव तासामुत्कलिकां विकास्य वनपालिका तद्दामोदं दामोदरमासादयितुं पौर्णमासीमासीदति स्म ॥

पूर्णिमा तु पूर्णितमनास्तामाह ।—

अथास्यां रात्रौ रात्रौ चेन्मन्मथाक्रान्तमित्यादि तत्रानुक्रान्तकृष्णार्च्चामनु मम स्वान्तं संक्रान्त-मस्ति । ततस्तद्विहितमुपहारं हारं हारं रासविहारं कारयस्व ॥

अथ सायं सा वृन्दया श्रीराधा-चन्द्रावल्याद्याः सर्व्वा एव प्रणयविनयनयप्रावल्याद्वनमानायया-मास ॥

आत्मना तु तासामात्मायुतवल्लभं[1] वल्लभमानिनाय राधा तु तासु तारासु चन्द्रमूर्त्तिरिव, वलच्च-पक्ष-तिथिषु पूर्णिमापूर्त्तिरिव, सर्व्वर्त्तु-सम्पत्तिषु वसन्त-सुषमेव, अलङ्क्रियाप्रक्रियासूपमेव, काव्य-श्रेणिषु रसध्वनिप्रतिपत्तिरिव, हरिरतिजातिषु महाभावसम्पत्तिरिव चमत्काराधायिनी वभूव ॥

अथ पूर्णिमा तस्मिन् घने यामुन-कुसुम-वने सुखप्रभविष्णुतापदे तारा-वारसम्भविष्णुविष्णुपदे चन्द्रेण कला इव कृष्णेन ता योजयामास ॥

तदा तु ।—

पूर्व्वं या नहि सङ्गताः प्रियतमं तासां स तत्सङ्गमा-
रम्भः स्तम्भमुखं विकारमदधाद्यत्तत्तु युक्तं ब्रुवे ।
तेनालङ्कृतसङ्गमा मुहुरमूः सङ्गम्य राधादिकाः
सुदीप्तं निखिलं च तं यदभजं-
स्तत्तत्र कस्मा[2] द्वद[3] ॥

अथ तूर्णतयामूराश्वास्य परिष्वज्य च पूर्णिमा निजकलाविर्भावितरत्नस्थल्यां वृन्दासङ्गमितनाना-शोभावल्यां रङ्गस्थानाखण्डले कार्णिकाकारशङ्कु-

(१) आत्मकोटिप्रियमित्यर्थः ।
(२) हेतुः ।　(३) हेतुं ।

सारसदलक्लृप्तिकमलाकृतिमण्डले मध्यमधिकृत्य माधवमध्यस्तं विधाय परितस्तद्वधूरुपवेशयामास ॥

तासु तु श्रीराधां पुनरपेक्षिता साधारणनिवेशतया तां सर्व्वोपरि वितितां[१] सन्ती निजसदेश एव रक्षितवती ॥

ततश्च वागूदेवताकाशतः सपरिहासमाह स्म।—

मध्ये तमालमधिरोप्य समं समन्ता-
ज्जाम्बूनदद्युतिलताः समयोजयस्त्वं।
तद्यौषधीशकलसेन सुधाभिषेकं
पूर्णेन चात्र कुरु यत् खलु पूर्णिमासि ॥

तदेवं सस्मितमाकर्णयन्ती पूर्णिमा पूर्णकारिनिरीक्षणेन निर्व्वर्णयन्ती सहसा चन्द्रमसमपूर्णमपि पूर्णं चकार ॥

तस्या मुनेराज्ञया राज्ञ[२]स्तस्य तथाभ्युदयान्ततक्षणमेव तामसकुलं नाशमासन्नं। यत्र तदनु मति[३]पूर्व्वाका[४]सा काचित्तिथिरपि राका बभूव।

---

(१) विततं चिकीर्षन्ती। (२) राजा चन्द्रः मामार्थं।
(३) कलाहीने सानुमतिः।
(४) शुक्लचतुर्दशीत्यर्थः। तृष्णो विकल्पः।

यत्रोडुप एवासौ तत्र महारासरसविहारे स्वयमुडुपतां[१] व्यञ्जयामास ॥

पूर्णिमा पुनस्तत्रान्यदपि श्रीकृष्णमभि तदिदमाश्चर्यमाचचार ।—

तस्यास्तस्या[२]दक्षिणांशे त[३]मावाहनमुद्रया ।
सा चकर्ष स[४]यात्राशु प्रतिदीपवदागतः[५] ॥

ततश्च ।—

मण्डलेषु स्थलाभावादिव राधां तदा तु सा ॥
मध्यस्थकृष्णरूपस्य वामभागे न्यवीविशत् ॥

तत्र च सति ।—

दिक्ष्वष्टासु प्रसूनप्रकरवरवनं मध्यतः प्रस्फुटश्री-
रत्नाङ्कस्फारपद्मं हरिहरिरमणी-
मण्डलं तस्य चान्ते ।
श्रीराधा-माधवाख्यं मिथुनमथ वभावन्तरे तत्र चैकं
यत्रच्छत्रं प्रजातं निखिलगुणकला-
सान्द्रताचारुचन्द्रः ॥

अथ यथाविधानं रासवलयसभाजनं सनीराजनं विधाय पूर्णिमयेदं ययाचे ।—

(१) प्लवतां। (२) प्रेयस्याः।
(३) कृष्णं। (४) कृष्णः।
(५) बहुधाभूय प्रत्येकं सर्व्वासां दक्षिणांशे स्थित इत्यर्थः।

चिराय तदिदं जातमस्माकमभिलषितमचिराय फलमिच्छति। यत् पुनरपि रासविलासविलोकनमिति॥

तदिदमुपलभमानः श्रीवल्लवी-वल्लभश्च यथोपदेशं सदेशवल्लभतया समुत्थाय सर्व्वसुखसम्पदुत्थाय(१) रासरागं नानाविभागरूपप्रतिरूपतया वंशीभिः शशंस॥

यत्र च।—

स्रोतांसि स्तब्धभावं कठिनतरशिलाः
सार्द्रतामुन्नतस्था
नीचीनत्वं नतस्थास्तदितरपदवीं(२)
तद्वदन्ये तदन्यत्।
वंशी-गानेन यर्हि द्रुतमघदलिनः
प्रापुरेताश्च तर्हि
श्रीगोप्यः स्वीयलज्जाग्लपनमदतया
रेमिरे रासलीलां॥

शिञ्जितानि मुरलीरुतान्युत
स्फारलास्यमुदयापयन्मिथः।

---

(१) उत्थानाय। (२) उन्नतत्वं।

वाद्य-गीत-वलनाय सङ्गता
यत्र मोहमभजन् सुर-स्त्रियः ॥

उद्यत्यावेशपुष्टे नटनपटिमनि
स्फारतां भूषणानां
वंशीनां चाभिजग्मुः स्वनितविलसिता-
न्येवमन्नान्यदीयं ।
वाद्यं गीतञ्च गच्छद्दिफलतमदशा-
मुच्चकैस्तध्यमासी-
द्गीयाग्रे जघन्यः स्वयमनुभजते
मौनमन्याविनोऽपि ॥

गाङ्गेयद्युति-नीलरत्नमहसः सौन्दर्य-साराकरा-
स्ते गोपीचय-कृष्णमूर्त्ति-निचयाः स्वेनैव चेतोहराः ।
किं वक्तव्यमहो ! यदि स्वयममी सङ्गीतलीलामिता
येषां तत्र विसृत्वराङ्गरुचयोऽप्युच्चैरनृत्यन्निव ॥

परस्परालिङ्गनचुम्बनाद्यधु-
स्तत्राङ्गहार(१)च्छलतः प्रिय-प्रियाः ।
तल्लाघवा(२)द्व्यक्तिमनागतं मना-
गप्यागमल्लाघव(३)मत्र नाण्वपि ॥

---

(१) अङ्गहारोऽङ्गविक्षेपः । (२) शैघ्र्यात् । (३) अल्पतां ।

चिरमतिविरहार्त्ता लब्धसङ्गाः पुनस्ते
सुखवलितमनृत्यन् दम्पतिव्यूह-सङ्घाः।
इति भवति रहस्यं यद्विदित्वा तदेव
स्वयमभिलषति स्म प्रेमतः पूर्णिमापि ॥

वीक्ष्य प्राग्वदशेषसत्परिकरैः स्वै[१]रुच्चकैराचिते
रासे कृष्णममूर्विदूरभवनाल्लब्धं चिराद्वागयतः।
स्तम्भस्वेदविवर्णतास्वरभिदा रोमाञ्चबाष्पाश्रुभिः
पूर्णैर्ज्ञानलयेऽपि कान्तिमदधुर्ज्ञानेऽपि या दुर्लभा ॥

तदेतद्वीक्ष्य खेचरीभिर्विचारितं।—

यः पुरासामभून्मारः[२] साम्प्रतं मदनः[३] स तु।
आसीत् कृष्णस्य दूरत्वादूरत्वं कारणं यतः ॥

असाक्षयन्ती[४]कक्षात्वं या क्षयन्ती[५]पुरा स्थिता।
सा राधा पश्य साराधा[६] साराधा[७] ते न दीव्यति ॥

अथ परस्परस्नेहमयस्वेदातिमात्रामत एव शिथिलितगात्रानपि तान् दम्पतीनवलोक्य श्लोकयचरिता

---

(१) आत्मभिः। (२) योगार्थमभिप्रेत्य।
(३) मदयतीति। (४) साक्षादकुर्व्वती।
(५) क्षित्यै। मौवादिकः। क्षयं प्राप्नुवती।
(६) सारमाधत्ते। (७) साराधना आराध्येन सहिता।

सम्प्रतीदं विश्राम्यतु काम्यमानमन्यदनुमन्यता-मिति पौर्णमासी निवेदयामास ।—

अथ तथा मण्डलीमण्डिततया निविशमानं दम्पतिमण्डलं श्रीखण्डादिभिर्दुग्धखण्डादिभिरपि सपर्य्यामापयन्ती पृथक् पृथक् कुञ्जकृतशय्यासु सुखमय्या लीलया पर्य्यापयामास ॥

ततश्च ।—

चिरात्कृच्छ्राल्लब्धः प्रणयिहरिरेकः प्रणयिनी
महापद्मे[१] नोद्यत्तदनुगुणितव्यूहसुभगः ।
विदग्धानां चूडामणिरखिलवैदग्ध्यगुरुणा
रह[२]श्चेत् कस्तर्हि प्रथयतु कविस्तत्र कवितां ॥

यत्र तु ।—

तस्मि[३]न्नत्रमजस्रमेजन[४]मने-
ज[५]द्रोमहर्षः स्फुर-
द्धर्षः[६] स्वेदजवारिहारिनिगद-
स्पृग्गद्गदः सत्पदः[७] ।

---

(१) कर्त्रा । (२) रहः श्रृङ्गारगुह्ययोः ।
(३) सुरतयुद्धे सात्विकामिथो जितवन्त इति भावः ।
(४) कम्पं । (५) स्थिरः । (६) धर्षः क्षोभः ।
(७) व्यवसायः ।

वैवर्ण्यं जितवर्ण्य[1]मन्तरवहिः
स्तम्भश्च[2] हृकूस्तम्भकः
कान्तानङ्ग-रणे स्व-संहृतिरणां[3]
विभ्रद्विजिग्ये मिथः ॥

सर्व्वाभिसार[4]स्तं जेतुमाजितं जज्ञिवा[5]नसौ ।
तथापि विजयस्तस्य विषमेषु रणेऽजनि ॥

तदेवं कुञ्जेषु क्व वन पुलिनेषु क्वचिदनु-
स्थलं क्वापि क्रीडामरचयदसौ ताभिरनिशं ।
यदि क्वाप्यावेशाद्व्यभिचरति कुत्रापि मिलनं
तदाजग्मुर्मानादिकमपि पुरावद्वरदृशः ॥

यतः ।—

निवारणा दुर्लभता च योषितां
मता सपत्नीरचिता रसप्रदा ।

---

(१) जितं वर्णनीयान्तरं येन ।

(२) अन्तस्तम्भः प्रलयो वाह्यस्तम्भस्तम्भ एव ।

(३) विभक्तेः कर्म्म ।

(४) सर्व्वसैन्यस्यैकीभावः सर्व्वाभिसारः सर्व्वासाभि-
सारश्च ।

(५) जातः ।

यज्जातिरत्नावलिवर्णनं यथा
सा[१]सा[२]परस्त्रीषु पराचिता[३]त्तिदा ॥

यदाष्टानां नायिकानां गणनया स्पष्टतार्थं प्रोषितभर्तृका स्वाधीनभर्तृका प्रोषितपतिका स्वाधीनपतिकेत्येवमेव निगद्यते न तु प्रोषितजारेत्याद्यप्यनूद्यते ॥

गच्छतु तावद्गतं प्रस्तुतन्तु संस्तूयतां ।—

भवेदसौ यर्हि हरि-प्रियावली
परस्परं सेर्ष्यतया विशृङ्खला ।
हरिर्मिथस्तर्हि युनक्ति चातुरी-
सुरीतिभिस्तामखिलामपि स्वयं ॥

तदेवं लब्धविकासे बहुकेलि-विलासे कदाचिन्मिलित्वा च तास्तदधीता विद्या विलोकयामासुः ॥

यत्र च ।—

वेदास्तदङ्गकुलमङ्ग[४]कलाश्च साङ्गाः
सान्दीपनेरधिजगे स भवांस्त[५]दस्मान् ।

---

(१) निवारणा ।　(२) दुर्लभता ।
(३) परैःकृता ।
(४) पुनः ।　(५) हेतोः ।

तानीक्षयत्विति पृथक् सकृदेव तस्मा-
दन्वीक्ष्य विद्म इति ताः स्मितयुक्तमूचुः ॥

यदा तु स्वयं पूर्णिमातिथिरतिथिवदागता तदा स तु कृतपक्षद्वयी(१)क्षणः शशलक्षणः श्रीराधा-सपक्षविलक्षणरासकेलिं संलक्ष्य सुखलक्षवान् पक्षतिं(२) प्रति चिराय गतिस्तम्भमवाप ॥

सदा तु ।—

अरराध(३)वृथा(४)कृष्णः सतृष्णः स प्रतिक्षणं ।
अचकृष्णा(५)न्मुहुः सापि मनसा वचसा तु न ॥

अथ दिनकतिपये पूर्णिमया पूर्णितपूजाचये परमानन्देन विन्दमानसमये तत्र चार्व्वाङ्गाविर्भूतं नव्यमिव कैशोरमारभ्य पूर्व्ववत्प्रातिदिनपूर्य्य-माणकैशोरमये कदापि राधा-विशाखयो रहसि सम्वादमिमं हरिरपह्नुत्य श्रुत्यधिगतं व्यतानीत् ॥

यथा विशाखोवाच ।—

सखि ! परमानन्दकन्दलमयेऽप्यस्मिन् समये तव कलिकायमानां काचिदुत्कलिकावकल्पते । तां कथं न विकासयसि ? ॥

---

(१) शुक्लकृष्णपक्षौ । (२) प्रतिपदं ।
(३) राधामाराधयत् ।
(४) अप्रस्तावेऽपि । (५) कृष्णामाकृष्यत् ।

श्रीराधाह ।—सखि ! सत्यं ब्रवीषि । किन्तु
भवतीनामपि सा भवेदेव ॥

विशाखाह ।—का सा विकास्यतां ॥

श्रीराधाह ।—

यथा सर्व्वातिशायिकायाः कस्याश्चिन्नायिकायाः लब्धनिजाभीप्सिततायामपि कापि लिप्सा कविभिः कवितामानीयते तथैव दैववशादस्माकं जाता ॥

विशाखाह ।—सा च का ? ।

श्रीराधाह ।—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालती-सुरभयः
प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवा-रोधसि वेतसीतरु-तले चेतः समुत्कण्ठते ॥
इति ॥

तदेवं सहसा रहसः शृण्वन्नेव तां भुजाभ्यामावृण्वानः स ब्रजसुभ्रूकुसुमधन्वा तन्मुखविम्बं चुम्बन्नुवाच ।—

साधूक्तं प्रेयसि! साधूक्तं। किन्तु "कृष्णा-रोधसि तत्र कुञ्जसदन" इति पठनीयं । यस्मादद्य सद्य एव श्रीमत्पितृचरणाननुचरन्निज-चारुकौमार-प्रचारमयविहारसारसन्दीपितवरकालिन्दी-दक्षिण-पारसन्दितं वृन्दावनमेव सञ्चरितुं गोचरयिष्यामीति ॥

तदेतद्विचारयति चक्राङ्कितचरणे पूर्णिमा वृन्दया सह विन्दति स्म । विन्दमाना च वृन्दा-मुखमीक्षते।

सा पुनराह ।—

वृन्दावनचन्द्र! सेयं वृन्दा निवेदयति ॥

"वृन्दावनं गोवर्द्धनं यमुना-पुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीती राम-माधवयोर्नृप ! ॥
इति श्रीभागवत-गाथा ॥

ततश्च ।—

विना भवन्तं त्रितया(१)मर्कजा
परिणमत्काननधाम ताम्यति ।
तस्मान्नखाकारसुधाकराकर-
खाङ्किमालङ्कृतमाशु तत्कुरु ॥

---

(१) वृन्दावनादि ।

अथ श्रीकृष्णाः सतृष्णं तदनुजानन् भगवती-मनुज्ञापयंश्च श्रीपितुरनुज्ञापनाय व्रजमाव्रजित-वान् । श्रीराधादयः पूर्णिमादयश्च यथायथमिति ॥

अथ कथा समापनाय स्निग्धकण्ठः श्लोकयामास ।—

यथा भवदभीप्सितं सुमुखि ! सम्यगुद्यत्फलं
प्रजातमथ तादृशं तदिह मादृशः सम्प्रति ।
अनेकवृजिनात्ययादहह ! मादृशा[1]गोकुलं
समेत्य निरवर्णि[2] यत् प्रमदसम्पदावर्णि[3] च ॥
सर्व्वासां हरिलम्भनार्थमभव-
च्छ्रीराधिके ! केवलं
रागस्ते प्रबलस्तथैव विरहा-[4]
त्त[5] त्प्राप्तये स[6] प्रभुः ।
श्रीवृन्दावनगुप्तनित्यवसतिं
यः[7] साधयन् सर्व्वदा
स्वेषां स्वाश्रयिणामपि व्रजभुवां
त्राणाय सम्पद्यते ॥

---

(१) स्निग्धकण्ठवचः ।
(२) दृष्टं । (३) वर्णितं । (४) विरहमतिक्रम्य ।
(५) हरि । (६) रागः । (७) रागः ।

अथ यथा कथयत्कथकस्तथा
स्वमनुभूय हरिः सह राधया ।
निजविहारभरं कथया समं
न हि विवेद विभेद(१) समन्वितं ॥

इति श्रीमदुत्तरगोपालचम्पूमनु श्रीमाधव-
राधादि-व्यतिषङ्ग-दिव्यमङ्गलं नाम
षट्त्रिंशं पूरणम् ॥

---

(१) भिन्नं ।

सप्तत्रिंशं पूरणम् ।

अथ श्रीव्रजराज-सभाकथायां मधुकण्ठ उवाच ।——

अथ लब्धसर्व्वमनोरथसम्पदन्तरे समनन्तरे दिनान्तरे व्रजराजविराजमानपरिषदभ्यन्तरे समुदन्तानामन्तरमासाद्य श्रीगोविन्दस्तदिदमवादीत् ।

यदि राज्ञां समाज्ञा भवति तदा रथः सोऽयं द्वारकापथमनुसरतु तथा मामनुविन्दमानं गो-गोपवृन्दं कालिन्दी-दक्षिणपारगतवृन्दावनमेव विन्दतां।

व्रजराजः सानन्दमाह ।——

तात ! सर्व्वेषामपि तदिदमेवाविशिष्टमिष्टं ।
किन्त्वत्राप्यस्ति किमपि विशिष्टं ॥

श्रीकृष्णः प्राह ।——काममाज्ञाप्यतां ॥

व्रजराजः सास्रमुवाच ।——

नाना त्वद्विरहानलान्तरदशामासाद्य माद्यद्भया-
नाद्यापि प्रतियन्ति पुत्रक ! वहिर्लोकाद्यथा क्रूरकात् ।

एते त[१]द्व्रजवासिनः स्वमपरे जानन्तु नेत्युच्चकै-र्वाञ्छन्तीति तथा स्वयं रचयितुं

श्रीमान् भवान् बुद्धिमान् ॥ इति ॥

अथ मधुकण्ठस्य मनः कथा ।—

श्रीकृष्णस्तु तूष्णीकामवलम्ब्य विविवेच ।

एते खलु मम माधुर्य्यपूर्य्यमाणस्नेहमयदेहा न तु मदीशताज्ञानवलितेहास्तथापि यदित्थं प्रार्थयन्ते तन्मम सान्दीपनिसन्दीपितविद्यताज्ञानेन सम्भवतु नाम किन्त्वमी न कदाचिदपि निजमहिमसमीहाः[२] । तथापि चाहं पुनरेषु समुत्कर्षमेव वर्षन् हर्षमाप्नोमि तथा सम्पदमेव सम्पादयन् स्वम्पदं सम्प्रतिपद्ये ॥

तस्मादशेषसम्पदुपरिचरं सर्व्वविष्णुपदवरं सर्व्वानप्येतान् परि कारितालोकचरं[३] गोलोकमेव लम्भं तत्र च सर्व्वनयनचमत्कारवाहं रथविहारं निर्व्वाहयिष्यामीति ।

अथ मधुकण्ठस्य स्पष्टकथा ॥

(१) हेतोः । (२) पचाद्यच् ।
(३) पूर्वं कारितालोकचरं । दर्शयामास लोकं स्वं गोपानां तमसः परमित्यादौ ।

अथ कृष्णस्तेषां तदिष्टं सुश्लिष्टं वेदयन् निवेदयामास ॥

तात ! तत्र वृन्दावन एव तादृगवकाशतां ब्रह्मह्रदमज्जनादुन्मज्जन्तः स्वस्थानं सज्जन्तश्च भवन्तः सर्व्वं एवानुभवन्तः सन्ति स्म ॥

तादृशदुर्निर्देशदेशप्रवेशनादिविद्या च मया विद्या-तीर्थादावन्त्यादधीतास्ति ।

तस्मान्नपूर्व्ववत्तीर्थान्तरावगाहनाद्यपेक्षा वीक्ष्यते । किन्तु सोऽयं मम रथ एव सर्व्वमेव मनोरथं प्रथयिष्यति ॥

अथ सर्व्वेऽपि प्रोचुः ।—

यद्येवं सर्व्वे जानीयुरत्रैव वृन्दावने निजवृन्दानुगततया गुप्तः स वृन्दावन-पुरन्दरः सर्व्वदा वर्त्तीति तदा कश्चित्कश्चित्त्वं दीनदयाधीन इति विपश्चि(१)दत्रागत्य त्वामुद्दिश्य विक्रुश्य स्वार्थसाधनाय यत्र कुत्रापि नेष्यति । ततश्च पूर्व्ववदस्माकं कदर्थना स्यात् ॥

---

(१) इति ज्ञातवान् । कश्चित् ।

अथ श्रीकृष्णः सात्मस्मितमाह ।—

तथा रथस्य मतिप्रथा भविता यथा न कश्चिदपि निश्चितमनुभविता ॥

अथ सर्व्वे प्रोचुः ।—

तत्र च यमुना-गोवर्द्धनादिकं वृन्दावनान्तर्गतं तथा पूर्व्वदृष्टमेव द्रष्टुमिच्छामः । तत्कथं सम्भवति ?।

श्रीकृष्णः सस्मितमाह ।—

तत्तदेकमेकमेव वस्तुप्रपञ्चाभिव्यक्ततदनभिव्यक्ततया द्विधा प्रकाशमानं वर्त्तते । भवद्भिः पूर्व्वं दृष्टमपि शीघ्राकृष्टतया न सम्भालितं । तस्मात् किञ्चित् काश्चिदपूर्व्वत्वेऽपि नान्यथा मन्तव्यं ॥

अथ सर्व्वे त एतदाकर्ण्य ससुखं तन्मुखं निर्वर्ण्य वर्णयामासुः ॥

वक्तुं योग्यमिदं न यद्यपि तथाप्यद्य स्फुटं ब्रूमहे
सर्व्वेषां वहिरन्तरं च करणं नस्त्वत्प्रयोज्यं परं ।
तस्मात्त्वं कुरु तद्यथा यदभितो यद्येन यस्मै यतो
यस्य[१] द्रागपि यत्र सुष्ठु भविता
नित्यं तवालोकनं ॥

---

(१) सम्बन्धि ।

अथ व्रजराज उवाच।—

एवमपि यथा तत्रापि मद्गात्रादीनामानकदुन्दुभ्यादीनां दीनान्तरता न स्यात्तथा प्रथनीयं॥

श्रीकृष्ण उवाच।—

भवतां शुभानुध्यानेन तदपि सिद्धं बुध्यामह इति॥

एतदुक्त्वा च श्रीलाङ्गलभृदुद्धवयोर्मुखं लसदुद्भवं स सुखमीक्षित्वा दारुकमाह स्म।—

सारथे! रथेनानेन यथेह सर्व्वसमाधानं स्यात्तथेहस्व॥

त(१)च्च सर्व्वव्रजसमावेशित्वं त्रिलोकीलोकालोकातीततया गोलोकधामप्रवेशित्वञ्चेति॥

अथ वन्दारुकतया दारुकः प्राह स्म।—

यद्यपि नाहं विशेषं वेद्मि तथापि यथादिशन्ति शरणागतानुगताचरणाः श्रीमदीशचरणास्तथैव सेत्स्यतीति॥

अथ क्षणादेव तथा लक्षणं रथस्य प्रथितिमाचरंस्तं प्रति तं(२)गोचरयाञ्चकार॥

ततश्च।—

तज्ज्योतिर्मयमेव यानमिति तर्ह्यह्नाय वह्नेरिवस्फारत्वं प्रतिपद्य तत्र च गवावासादिचित्रां गतां।

---

(१) समाधानं। (२) रथं।

त्वं तेजो भुवनेषु तन्वदुरुधा लोकेन नालोकि यत्
क्वेदं तिष्ठति चाजनिष्ट च कुतः सङ्गंस्यते कुत्र च ॥
अपरैस्त[1]द्दुरालोकं स्वालोकं[2]व्रजवासिभिः।
तत्र दृष्टान्त एकः स्याच्छ्रीकान्तः[3] स तु नावरः ॥

तदेवं सति सर्व्व एव व्रजवसतिर्गोवर्द्धन-तल-निलय[4] मिव त[5]दुपरिवलयं तेन सह विवेश ॥

ततश्च।—

उत्सर्पज्ज्योतिरालीर्विभव-वशतया
तं रथं तूर्द्ध्वभाजं
चर्म्माक्षा मेनिरे तद्व्युपरिगततया[6]
तत्पदोपासकाश्च।
कृष्टा ब्रह्महृदात्प्रागपि मुरजयिना-
लम्भिता गोमिनो[7]याँ
तां वृन्दारण्य-मध्ये गतिमिह सुगतं[8]
तद्विदश्चार्व्वपश्यन् ॥

---

(१) तेजः। (२) सुदर्शी।
(३) यथा कृष्णोऽपरैर्दुर्दर्शोऽपि गोपीनां सुदर्शः।
(४) यथा प्राग्गोवर्द्धनविवरं। (५) रथ।
(६) ये उपासते ते च। (७) गोपाः।
(८) वृन्दारण्यगतिं सुगतं प्राप्तं रथं।

तत्र यमुना-दक्षिणपारीणादयस्तु ।—

नारूढा ये रथं ते च कृष्णं रूढानुरागकाः ।
पूर्णिमा-वृन्दयोर्योगादनुजग्मुश्चरस्थिराः ॥
तत्रान्यच्चित्रमालोकि सर्व्वैश्च व्रजवासिभिः ।
ये[१] प्रागदृश्यतां प्राप्तास्तेऽप्यदृश्यन्त तत्र हि ॥

रथं विभुर्गतमथ सिद्धकार्य्यतां
व्रजेश्वरस्पृहितवशात्कुशस्थलं ।
वपुर्वहूकृतिकृति[२]विद्ययानय-
द्बलादिभि[३]स्त्रिभिरित[४]मात्मना च तं॥इति॥

देवास्तु पूर्व्वमन्तर्धानदृष्ट्या दुःखस्पृष्टाः सम्प्रति यान् दृष्ट्वा स्फुटमुल्लसन्तस्तव-जयकार-वाद्यप्रकार-वारं भासयन्तः सङ्गमेव सङ्गता वभूवुः ॥

तदेवं कथकः कथयित्वा मनसि तु तदिदं कथयामास ।—

किन्तु व्रजजनास्तथा गच्छतस्ता[५]न्नाध्यक्षमध्यगच्छन् केवलं गोकुल एव स्थितानपश्यन् । दारुकश्च न तान् गोकुलस्थानपश्यत् किन्तु रथ एव स्थितान् ॥

(१) पर्ज्जन्यादयः ।　　(२) कुशल ।
(३) बलोद्धवरोहिणीभिः ।　　(४) प्राप्तं ।
(५) बलादीन् ।

तदेवं व्यूहभेदेन लब्धे श्रीकृष्णादीनां व्रजेऽवस्थाने श्रीमदुद्धवस्याप्यत्र च तथा स्थितिर्युक्ता ॥

यतः ।—

"आसामहो !" इति यदर्थितमुद्धवेन
प्राप्तं तदेव खलु यत् त्रितयाङ्गमित्थं[१] ।
स्वस्याग्रिमा गतिरमू[२] र्नितराममूषां
वृन्दावनं[३] सदनमात्मपति[४] र्मुकुन्दः ॥

किञ्च ।—

तत्र तत्र च लीलायां देहव्यूहं प्रपन्नास्ते[५] चित्त-व्यूहमपि प्रपद्यन्ते । तञ्च तञ्च प्रपद्य तत्तल्लीला-रसाभिनिवेशवशतया न सर्व्वत्र सर्व्वं प्रति-पद्यन्ते । किन्तु यथास्वमेव । नहि लक्ष्मी तद्भेदाः सीतादिस्वभेदानां खेदादिकं स्पृशन्ति ॥

अथ यदवश्च तेषां तावन्तं विलम्बं नाजानन् किन्तु स्वल्पमात्रं ॥

---

(१) इत्थं वक्ष्यमाणप्रकारेण त्रितयाङ्गं यत्प्रार्थितं तत् प्राप्त-मित्यन्वयः ।

(२) व्रजदेव्यः । एकं प्रार्थितं ।

(३) तासां सदनं वृन्दावनं द्वितीयं प्रार्थितं ।

(४) आत्मपतिर्मुकुन्द इति तृतीयं । (५) यदवादयः ।

यः खलु मासद्वयमयोऽपि व्रजे वहलसमयव्रज-
तयासीत् ॥

तच्च सर्व्वमस्य पूर्व्वपूर्व्वलब्धयोगमायावलत्वान्ना-
पूर्व्वं मन्तव्यमिति ॥

तदेवं विभाव्य पुनर्गोलोकप्रवेशकथामाविर्भाव्य
स्पष्टमाचष्ट ।—

इच्छामात्रात्प्राप्तचित्रा विशेषान्
कृष्णाज्ज्ञात्वा कौतुकं चाप्तवन्तः ।
लब्धांशा[1]स्ते गोपकाः प्रेमवृद्ध्या
तत्रामा[2]न्तोऽप्यन्तरुच्चैर्विजह्रुः ॥

श्रीकृष्णाश्च द्राक् स्वयं सर्व्ववन्यां
पश्यन् धन्यां रामचित्रः समित्रः[3] ।
क्रीडन् धेनूश्चारयन् वेणुगानं
कुर्व्वन् सर्व्वं शर्म्मपूर्णं चकार ॥

अथ लब्धतत्प्रवेशस्य गोलोकप्रदेशस्य परिपाटी
पुनरन्यत्र ब्रह्मसंहिताद्यनुसंहिताप्यत्र तु नेत्राभ्या-
मुद्घटितीक्रियते ॥

---

(१) भागाः । (२) अमाने प्रेमवृत्तिर्हेतुः
(३) सहित इत्यर्थः ।

किन्त्विदमप्यनुसन्धेयं ।—

यद्यपि भवदङ्गजता, साक्षादस्येति नेशता योज्या।
तदपि महागुणदृष्ट्या,
दृष्ट्या कविभिः परेशता कविता ॥ इति ॥

तथा हि ।—

स खल्वयं लोकः प्राकृतदृष्टीनां प्रकटे वृन्दावन एवाप्रकटं वर्त्तते। इति पूर्व्वमत्र च प्रकटितमस्ति ॥

तथा च सति ।—

चिच्छक्तिव्यक्तवैचित्र्यं ब्रह्मज्योतिरदः पदं ।
गोकुलाख्यायोग्यलीलं श्रुतिस्मृतिविलोकितं ॥

अस्मिन् यद्यद्भासकं भासितं वा
तत्तत्सर्व्वं भाति कृष्णस्य योग्यं ।
यस्मादिष्टं न ह्यनिष्टं तु किञ्चि-
च्चिच्छक्तिः सा सौति तस्यार्च्चनाय ॥
लक्ष्म्यैकयैव वलितं प्रति विष्णुलोकं(१)
गोलोक एष जयतीति यदाह शास्त्रं।
लक्ष्मीसहस्रशतसम्भ्रमसेव्यमानः
कृष्णः स एष वलते खलु तत्र साक्षी ॥

---

(१) अवतेः कर्म्मं ।

अतीत्य ब्रह्माण्ड-प्रचयमथ वैकुण्ठवलयं
समूहं भक्तानामपि मधुरिपोर्मूर्त्ति-निचयं।
अयं लोको धत्ते विधिकलित[१] पूर्व्वाण्ड-पटलं
रमा-कोटीः सर्व्वस्तुतगणमघारेर्वपुरपि॥

चिन्तारत्नानि सन्ति स्फुटमपि तु न त-
द्भूमितान्यत्र सिद्धा
सिद्धा वा स्यात्तथापि स्फुरति घनमितः
कामनान्नापरार्थः।
मुक्तिर्नैवेति लब्धे तदुपरि च विभु-
र्याातुगोविन्द-भक्ति-
स्तस्याश्चूडामणिर्या तदुदयवलिता
भूरियं केन तुल्या॥

अन्यत्र कल्पतरुता निजजातिमात्रे
व्यक्ता भवेदिह तु सार्कतरौ च चित्रा।
एष त्रिवर्गमपि यत् परमं विमोक्षं
रुच्यं हरेर्भजनमप्यतुलं ददाति॥

अमृतमपि च पीत्वा देववर्गः कदर्थं[२]
भजति सलिलमात्रं चात्र किं वर्णयामः।

(१) कलितपूर्व्वेत्यर्थः। (२) असुरोपद्रवं।

अमृतपदुरवापध्यानकृष्णाङ्घ्रिपद्म-
स्फुटमधुरिम-धारावाहि यल्लालसीति ॥

गावो यत्र मुकुन्द-वेणुरणितास्वादेन पुष्टाङ्गता
जुष्टाः स्वस्तनपर्व्वताज्झरमुचश्चिन्वन्ति दुग्धाम्बुधिं।
गोलोकः स यथा परीत्य विलसन् ख्यातेन तेनानिशं
श्वेतद्वीपतया प्रसिद्धिमयते मन्त्रेषु यन्त्रेषु च ॥

श्वेतद्वीपप्रथितिति तददः किञ्च गोलोकनाम
श्रीकृष्णस्य स्फुरति भुवनं तत्कृपामात्रगम्यं।
जानन्तश्चेदिदमपि मता दुर्ल्लभाः क्षोणिपृष्ठे
तिष्ठत्वेषां तदधिवसतां चारु वार्त्ता तु दूरे ॥

उपरि विमानावलिभि-
लोकपमुख्या ग्रहाश्च भान्तीह।
गोकुलशब्दाल्लब्धा
लौकिकलीला हि तत्र विस्रब्धा ॥

यत्र वासुदेवमुख्यवृन्दमावृत्तित्वमेति।
अस्तु तत्र चान्यदन्यदन्यलोकवन्द्यवस्तु ॥

तदेवमुपरि परीवारपरीतमपि परितः सुदुस्तर-पारावारतीरक्षीरपारावार(१) सीमतया प्रतीतमपि भगवद्वपुर्व्वत्तमिममसीमप्रदेशं देशं कथयन्ति ॥

---

(१) समुद्र।

यत्र चाष्टासु काष्ठासु धारित्रनिभविचित्रलोकाः सलोकतां गता विलसन्ति । तस्य चान्तर्धाम्नाम-भूमि[१]र्वृन्दावननाम्नी गोचारण-भूमिः । तथापि किञ्चिद्वचसा तदञ्चितं करिष्यामः ॥

स्वर्णक्षोण्यां तमालागरुडमणिभुवि
स्वर्णपुष्पाः सुवर्ण-
प्रख्ये वृक्षे पलाशा[२]न्यसितमणिसमा-
न्येवमन्यत्र किञ्च ।
तेषां यद्येकपत्रं प्रतिकृतिकलया
कर्त्तुमिच्छेद्विधाता
श्लोकेताहर्निशम्वा तदपि न हि यशः
किञ्चिदप्यञ्चतीव ॥

कुञ्जाः क्वचिद्रत्नगृहाङ्कतां गता
वृक्षाः क्वचिद्राजगृहाधिकस्पृहाः ।
वल्ल्यः क्वचिल्लास्यकलाकलापिका
स्थल्यः क्वचिद्रत्नतुलाऽतुलाञ्चिताः ॥

एकस्यां दिशि पङ्कजादिविलसन्नद्यः परस्यां प्रसू-
नादिक्ष्मा हिमवालुकाभसिकता
मध्ये तु यासामिह ।

---

(१) अगोचरा । (२) पत्राणि ।

एता रासभुवः क्वचित्क्वचन ताः पुष्पाटवीरन्तरा(१)
क्वाप्यद्रिस्थितरत्नभूतलगता राजन्ति सर्व्वोपरि ॥

चित्रभ्रमं दधति ते तरवो न याव-
द्वाता वहन्ति कुसुमादि विलोलयन्तः।
चित्रान्ति तेऽपि च खगा न यदा ह्रियन्ते
कंसारिवंशरणितादिकमाधुरीभिः ॥

शिलीवक्त्रा भेरी-ध्वनिमवरवाद्यं चलदलाः
कुहूकण्ठा गानं दधति शितिकण्ठा नट-गतिं।
तदेवं भ्राजन्ते वहुविधकला यत्र विपिने
विना यत्नं रङ्गस्थितिकुलमयं तद्विलसति ॥

गीतं केचन केऽपि वाद्यमनिशं केचिच्च नृत्यं खगाः
सम्मोदादनुकृत्य विभ्रति रुचिं वृन्दावने सर्व्वतः।
किन्तु श्यामल-गौरकान्ति-वलिता ये तत्र ये चाप्यमी
तत्तन्नामविहारस्तवकरुतास्तेऽस्माकमन्तर्गताः ॥

परस्परं तत्र मृगाः(२)ससौहृदा
भान्तीति चित्रं नतरां विमृश्यतां।
प्राणा हि तेषां स्फुटमेकतां गताः
कृष्णात्मना यद्विलसन्ति सर्व्वतः ॥

(१) पुष्पाटवीनां मध्ये। (२) सिंहादयः पशवः।

प्रान्तर[1]गोष्पद[2]भूमिषु

हरिमणितुलितानि भान्ति तार्णानि ।

गावो मृगाश्च यासु, श्रीहरिपरिपाल्यतातुल्याः ॥

गाश्चारयन्ति विरहन्ति मिथो हसन्ति

श्लिष्यन्ति बिभ्रति कलां रतिमावहन्ति ।

अत्र व्रजान्तिमवने हरि-राम-मुख्याः

साहूतमना निखिलचेतनमार्द्रयन्ति ॥

कृष्णस्तत्र च पूर्व्वपूर्व्वरिपुजित् केलीन्द्र-जालं कदा-

प्युच्चैर्मित्रजनस्य संसदि मुहुः कुर्व्वन्नपूर्व्वायते ।

आसीद्भीषणता पुरा रिपु-ततेः सत्या न सा साम्प्रतं

तादृग्या कुतुकं परं प्रसवति प्रत्यक्षता कारिणां ॥

गावः शुभ्राः सशृङ्गद्वयशफचयभू-

जातरूपांशुरागाः[3]

स्थूलाम्भःकुम्भदूधः[4] स्रवदमृततया

सार्द्रितान्तप्रदेशाः ।

---

(१) दूरशून्यमार्गे । (२) गोसेवित ।

(२) शृङ्गद्वयसहितशफचयो भूर्येषां जातरूपांशूनां तद्वद्रागो यासां । पक्षे रागोऽनुरागः ।

(४) अम्भः कुम्भवदाचरत् ।

आयत्या[1] वालधीज्या[2] नवतनयमती-
त्यापि कृष्णप्रसङ्गा-
सङ्गादुद्यद्रवाङ्काः सुखमुखरमुखाः
स्नेहदेहाः स्फुरन्ति ॥

दध्यम्बुधेस्तरल[3]भाग्नवनीतपिण्ड-
प्रख्यानि शावकनिभान्यमृतद्युतेश्च ।
कृष्णास्य च स्मितसुधापरिणामरूपा-
ण्यस्मिंश्चरन्ति विहरन्ति च वात्सकानि[4] ॥

नित्यं नित्यमुदञ्चिकान्तिविशदा-
स्तारुण्यवाल्यांशभू-
चापल्यातिमनोहरा निजगणा-
सङ्गातिरङ्गाकुलाः ।
प्रत्यग्रामलशृङ्ग[5]भावितरणा[6]
नानागतिद्योतिता-
स्ते ते वत्सतरा हरेर्विलसित-
प्राया रुचिं बिभ्रति ॥

शुभ्रा भस्मप्रमुखरजसः शृङ्खला-घण्टिकाभ्यां
सर्पस्रक्का[7]द्विगुणितजटाबन्धतुल्याङ्गशृङ्गाः ।

---

(१) दैर्घ्येण हेतुना । (२) पूज्या । (३) तरङ्ग ।
(४) वत्सवृन्दानि । (५) वाद्यं । (६) रणः युद्धशब्दो वा ।
(७) सर्परूपा स्रक् येषु ।

अप्पित्ता(१)क्षाः सदुदयलसच्चन्द्रमः-खण्डपुण्ड्रा
यस्मिन्नुग्रा(२)इव विदधति क्रीडितं तस्य भद्राः(३) ॥

गाः पालयतां तेषा,मास्तामाह्वानगाननृत्यादि ।
अपि सहजं गदितादं, तत्तन्मधुरिम्मधुरां धरति ॥

तथा हि ।—

गोलोकलोक(४)मात्रमेवं वर्णनापात्रमाचरन्ति ।—

माध्वीकजैत्रमधुरस्वरमक्षराणा-
मुच्चारणाद्विजितवेदविदादिगर्व्वं ।
कृष्णार्थतृष्ण(५)रसभावकुलाकलङ्का-
लङ्कारमीरितमपि(६)स्फुटमत्र गानं ॥

अकाले हंसालीर्व्वलयति(७) विदूराद्विकलय-
त्यलं दिग्दन्तीन्द्रान् दिविजभरता(८)नुन्मदयति ।
गतिः कृष्णादीनां यदिह तदहो ! किं कविजन-
स्तदीयं नृत्यं वा कथयतु वयःकोटिभिरपि ॥

तत्र कंसारिवंशी तु सर्व्वावतंसायते ॥

---

(१) अग्नि ।　　(२ रुद्रा ।　　(३) वृषाः ।
(४) जन ।　　(५) वहुव्रीहिकर्म्मधारयौ ।
(६) वचोऽपि ।
(७) आकर्षति जयतीति यावत् । वल सम्भक्तौ ।
[८) नटान् ।

यतः।—

सर्व्वेषां स्फुटमत्र भृङ्गमवधिं कृत्वा[१] तदावासिनां
सर्व्वाण्येव सदा हरेरनुभवे साहाय्यमातन्वते।
किन्त्वेतेषु[२]च वेणुरेव परमं सौहृद्यमापद्यते
यस्माद्दूरतरादपि द्रुतममुं कंसद्विषं शंसति॥ इति॥

नद्यश्च यत्र विविधद्युतिनीरवत्यः
सद्रत्नजद्रवनिभाः परितः स्रवन्ति।
या वंशिका कलवशात्कठिनाः कदाचि-
द्रत्नाङ्गताप्रकटिना महसा स्फुरन्ति॥

शैलाश्च वेणुरवसार्द्रशिलाखिलाङ्गाः
पङ्कप्रभा हरिपदावलिलब्धमुद्राः।
याताः पुनः प्रकृतिमप्यथ तेन मुद्रा
चित्रेण भूषिततमाः सुखमावहन्ति॥

नाना सरांसि कुमुदाम्वुजजातिजात-[३]
युक्तानि मान[४]गुणयोर्जलसिन्धवन्ति।
यत्र स्फुरद्विधवति व्रजराज-सूनो-
र्वक्त्रं विभाकरति रत्नवतंसयुग्मं॥

---

(१) सर्व्वाणीत्यन्वयः।
(२) भृङ्गावधिषु। (३) वृन्द।
(४) मर्य्यादा।

तटिनी कृष्णानाम्नी

स्मरयति नाम्ना रुचा च तं कृष्णं ।

मानसगङ्गा पुनरथ

मानसरूपा विभाति तस्यात्र ॥

यदपि कमलवन्धोरात्मजा वाहिनी सा
तदपि कमलपालिं केवलां नानुपाति ।
अपि निज[१]हितसोमां[२]गन्धसोमा[३]लिमेषा
विदधति कुलतुल्यं[४]सर्व्व[५]मच्छस्वभावाः ॥

तदादिनदीनाञ्च ।—

गाः पाययत्यपि च खेलति वारि मित्रै-
स्तीरे सुखं निविशते तरुधाम्नि शेते ।
जाग्रन्[६]तु चित्रमिह जीवन[७]जीवजात-[७]
केलिं विलोकयति गोकुलराज-पुत्रः ॥

श्रीवृन्दावनदेश एष रुचिरः पुष्पादिभिर्भूषितः
कृष्णा-मानसगङ्गयोर्वलनया मालाद्वयभ्राजितः ।

---

(१) नित्य ।		(२) चन्द्रां ।
(३) कैरवं स्याद्गन्धसोममिति त्रिकाण्डशेषः ।
(४) विधेयं ।		(५) अनूद्यं ।
(६) सन् ।		(७) जल ।
(८) वृन्द ।

श्रीगोवर्द्धनशैलरत्नतिलकश्चक्रादिलक्ष्माङ्कितः(१)
श्रीकृष्णार्च्चनदीक्षिताकृतितया
चित्तं सतां कर्षति ॥

तद्देश-सन्निवेशश्च स्वयमेवं निर्द्देशमर्हति। श्रीवृन्दा-वनाह्वयवन्यामध्ये धन्यानां यत्परमं ध्येयं श्रीकुला-कुलं गोकुलं कमलतुलं भवति तस्मादुदगर्द्धपूर्व्वयोः(२) कृष्णा सर्व्वेषां सर्व्वतृष्णां पूरयति। हुताशनदिशः कतिपयदेशस्तु हुताशनवेश एव व्रजवासिनां प्राक् कृतव्रजवहिरङ्गजनसङ्गानङ्गीकारया वनया(३) वासनया भासते ॥

अथ दक्षिणार्द्धपश्चिमयोर्विपश्चितः सर्व्वतः पर्व्वतानकान्(४)पर्व्वतान् वर्णयन्ति। येषां समीपे स्रवन्ती मानसगङ्गानामस्रवन्ती विराजते ॥

तत्र यद्यपि गोवर्द्धनवहुस्थान(५) सौगन्धिक-(६) धवल(७)शोण(८)राङ्कवा(९)ष्टकूट(१०)वरसानुमुख्याः

(१) पदचिह्न। (२) दिशोः।
(३) वासना विशेष्यं। (४) विस्तानकान्।
(५) वहतानो इति भाषा। (६) एवं सौंधिया।
(७) धवारी। (८) सुमहरा।
(९) रां काली। (१०) अटोर।

सुख्याता महीयांसस्ते महीधरा महीयन्ते तथापि ते च सर्व्वे गोवर्द्धनलक्ष्या[१]स्तदुपलक्षणतया लक्ष्यन्ते ॥

स च श्रीगोवर्द्धनस्तस्य गोकुलकमलस्य दक्षिणस्यां दिशि दृश्यते। यमुनासदेशे चेशानदेशे शोभिततटः श्रीमान् भाण्डीरवटः सुष्ठु भ्राजते। तत्र श्रीगोवर्द्धनस्तु प्रथमं प्रस्तूयते। स हि संहितमहाधनमणिपरिपाटी पटीयसा शुभजुषा वपुषा विश्वविलक्षणविश्वकर्म्मघटिताङ्ग इव सङ्गच्छते ॥

यस्य च क्वचित्क्वचिन्मिथः कृतरागमरकतपुष्पराग[२] शिलायुगलरुचिपूरात् कृष्णरामतृष्णया दूरादपि तत्तद्भक्तिशूराः पर्य्यावर्त्तन्ते[३]। क्वचन च स्वर्णरेखालब्धरुचिरवर्णहरिन्मणिभागमागम्य श्रीव्रजेशस्य यः सूनुर्या च स्नुषा तयोः सुषमया तुषारयन्ति वृत्ततद्दर्शनतप्तचित्ता देव्यश्चित्तवृत्तिं। क्वचिदपि स्फटिकगण्डशिलाखण्डमण्डलमण्डनतया स्वयूथभ्रमात्तत्र कृतक्रमा यूथभ्रष्टा गावः प्रनष्टान्वेषिभिर्विसृभ्यमाणकृष्णोपदिष्टतया लभ्यन्ते ॥

---

(१) आश्रयाः। (२) शुभ्ररत्नभेद।
(३) कुत्रापि गच्छन्तः।

क्वापि च कन्दरामन्दिराणीव श्रीगोविन्दानन्दितया सम्पद्यन्ते। नग[1]वराणां वारा[2] नगराणीव। यत्र फलादिकं क्रय्यमिव पर्य्यवस्यति। यत्रैव कलकलकलाः पक्षिकलाप क्रयनयमयसंलापजना इव लक्षिताः क्रियन्ते। यत्रैव च मणिशिलासनयुगलानि श्यामशुभ्रलावण्यराजमानराजप्रकृति[3] निवेशधन्यानि पण्यकरस्थानतया गण्यन्ते॥

यत्र यत्र च पत्रपुष्पादिदुष्पाराश्छत्रवारा इव केचिद्वृक्षसाराः समक्षाः सन्ति। तेषु केषुचिच्चमरीगुलुच्छाश्चामराणीव दृश्यन्ते॥

कुत्र च कृतनिर्झरिणीविसराः ससरोवरनिर्झराः सेवापरिकरायन्ते॥

यतः।—

ऊर्द्धस्नानावगाहाचमनमुखसुख-
प्रापका निर्झरास्ते
धाराभिस्तादृशीभिर्विदधति वृषितान्
सीम्नि तांस्तानुपायान्[4]।

(१) वृक्ष। (२) समूहाः।
(३) नृपमन्त्रि। अर्थाद्बलकृष्ण। (४) स्नानाद्युपायान्।

मध्ये गोवर्द्धनाद्रेः सरसि सरसिज-
भ्राजि मध्यस्थगेहे
स्नेहेनातिप्रसक्तान् दयिततमजनान्
खेलयत्येष कृष्णः ॥

अत्र च ।—

उच्चास्थितः क्वचन धेनुकमीक्ष्यते स्वं
सत्रोपविश्य सखिभिर्लसति क्व चापि ।
सम्विश्य गूढमपि कुत्र च रत्नदर्य्यां
वर्य्या(१)मुपार्ज्जयति केलि-कलां मुकुन्दः ॥

किं वहुना ? ।

श्यामद्युतिप्रथितमूर्त्तिरनेकधातु-
चित्रः सदा शुषिरवंशजगानरम्यः ।
पीताम्वरः(२)सकलभूमिभृदादिवन्द्यो
गोवर्द्धनः स(३)इव गोधनभृद्विभाति ॥

एवं भाण्डीरश्च स्वयं खण्डमण्डलपतिरपि तत्केलिकला-कलापमण्डिततया तदीयसेवापण्डित-तया च तत्र स्तोत्रपात्रतां विन्दते ॥

---

(१) श्रेष्ठां ।
(२) पीतमम्वरं येन इति तु श्लेषः ।
(३) पीताम्वर इव ।

यथा ।—

राष्ट्रं यस्य वनं स्व-नाम्न विदितं नानाप्रजाभूरुहा
देशाध्यक्षजनाः सपक्षिपशवः पुर्य्यन्तरं स्व-स्थलं।
राजार्हासनमात्मकुट्टिमवरः पट्टाङ्गनावीरुधः
श्रीभाण्डीरवनस्पतिर्नरपति-श्रीभिः स विभ्राजते॥

ऊर्द्ध्वं योजनमस्ति तिर्य्यगपि तद्भाण्डीरनामा वटः
पत्रैर्मारिकतच्छविर्नवदलैरुद्यत्प्रवालप्रभः ।
सस्यैः[१]कामदुघस्तथापि सुमहागेहायते श्रीहरे·
र्यत्रावान्तरगेहकोटिघटनां ते कोटरा बिभ्रति॥

यस्मिन् विस्तीर्णदीर्घा रवि-दुहितुरुप-
र्य्याशया[२] पारमाप्ताः
शाखाः पुष्पाटवीनामपि हरित[३]मिता-
भान्ति पल्यङ्कतुल्याः ।
हिन्दोल्याभाश्च वल्ल्यः[४]सुरभिसुमनसां
यत्र यत्रापि कृष्ण·
स्तत्तल्लीलासु तृष्णग्विहरति परितो
ऽप्यावलीभिः सखीनां॥

---

(१) फलैः।
(२) दिशा। (३) दिशं।
(४)वटजटाः।

तदेवमनयोर्भाण्डीर-गोवर्द्धनयोर्विदूरभवनयोरपि निज-निज-कृष्णसेवनमात्रतृष्णातया किल तत्र तत्र स्थिरासनयोः समानवासनयोरुन्नतशिरस्तया परस्परमालोकनमिवालोक्यते । ययोश्च द्विज-वरा[१] गत्यागतिधराः परस्परसन्देशहरा इव दृश्यन्ते ॥

याभ्या[२]मगजिष्णुभ्या[३]मनुचरिष्णुभ्यां विरा-जमाना सेयं वृन्दावन-लक्ष्मीः सर्व्वर्त्तुलक्ष्मीमात्मसा-त्करोति ॥

यत्र क्वचन सदा परमशीतलजलवाहिनीनां कासाञ्चन वाहिनीनां वहलगन्धवाहं वहति प्रदेशे विनापि तत्तदृतुदिनानि निज-निज-समयावेशा-ल्लब्धनिज-निज-समवायवासदेशसदेशप्रवेशा निखि-लहारीत-किखि-वर्गा यथा विभागं सखेलकृतना-दसर्गास्तत्र तत्र त[४]मशेषशेखरं सपरिकरं कुतुकिनमाचरन्ति ॥

क्वचन च भास्वदुद्भास्वरभास्वन्मणिज्ज्वलन-

(१) पक्षिणः । श्लेषे विप्राः ।
(२) गोवर्द्धनभाण्डीराभ्यां ।
(३) अगेन्द्राभ्यां । "शैलवृक्षौ नगावगौ" ।
(४) श्रीकृष्णं ।

ज्वालप्रज्वलितस्थल-निकटस्थले लब्धस्व-समया-(१) वलेपा(२) जिह्मालि-तल्लजाः कर्ण-शूलमूलताशङ्का-कारणक्रूरभङ्कारधारया सर्व्वं विदूरं कुर्व्वन्तस्तं हसितशस्तं (३)कुर्व्वन्ति ॥

क्वचन च वारिधाराधरतिर्य्यक्प्रसारशिखरि-शिखरनिर्भरासारस्फुटवर्षवाररचितसुखसारनिस्त-र्षचातकभणितप्रतिभणितशब्दमणिकन्दराद्यागार-वेशदेशस्तं कृतप्रवेशं केशवं सम्वेश(४) सुखमनु-भावयति ॥

क्वचन च कंसारिवंशी-गानविशेषादशेषानेहः(५) फुल्लकमलस्थलकमलप्रधाने स्थाने हंस-पिकादि-लीला-निधाने सरागं वंशीधरममुं यथाविभागं रासकुञ्जविलासलीला-पुञ्जं कञ्जनेत्राः परितः सञ्ज-यन्ति ॥

सर्व्वगारिमध्येयमध्ये तु क्रमजाततत्तदृतुजातस्या-द्यन्तरन्त(६) सन्धिसम्वन्धि(७) सन्ततशन्तमसुखं सुखरूपमपि तं सुखयति ॥

---

(१) निदाघ। (२) गर्वात्।
(३) श्रीकृष्णं। (४) शयन।
(५) कालो दिष्टोऽप्यनेहापि।
(६) आदिमध्यान्त।
(७) तद्वान्तर।

यथा ।—

दुष्प्रापानन्तपुष्पाद्युपहृतिकृतिनः
　　कोकिलाद्याखिलाद्या-
नानीय स्वीयवर्गान् विसरदवसरा-
　　स्तृष्णया कृष्णमत्र ।
निर्म्मानाः[१] सेवमानाः सदमृतमृतवः
　　स्वस्य कान्त्या विभान्त्या
वर्षन्तः सन्ति सन्तः[२] सततमपि यतः
　　सर्व्वदा पर्व्वदाः स्युः ॥ इति ॥

कृत[३] मतिविस्तरेण मतिदुस्तरेण ॥

अथ तदन्तः श्रीमन्नन्दभूपभवनस्तूपगोकुलरूपमणिमहापद्मं महापद्मपत्रं[४] वर्णयिष्यामः ॥

यस्य च सर्व्वसुखसत्राणां पत्राणामाग्रिमसन्धिषु रुचिररचनानिर्व्वन्धिषु जितपरमव्योमस्थानानि गोस्थानानि विभ्राजन्ते ॥

येषु कल्पसाला[५] एव गवां शालाः । येषां मध्यं

---

(१) मानरहिताः ।

(२) साधवः । अर्थान्तरन्यासः ।

(३) अलं ।

(४) महापद्मं सङ्ख्यानि पत्राणि यत्र ।

(५) वृक्षाः ।

मध्यमधिकृत्य श्रीगोकुलसम्पदध्यक्षस्य गवां धामानि धामानि[१]तन्वन्ति। परितः परितः पुनरन्येषां। यत्र मध्यमध्यस्थिततदध्यक्षगोस्थानेषु गवावलोकार्थमुपवेशसमावेशाय निरावृतिकुट्टिम[२] निविष्टानि मणिवेश्मानि निर्द्दिष्टानि॥

तेषु सर्व्वेषु।—

दिवा नूत्नैर्वत्सैर्निशि सुरभिजिद्भिः सुरभिभि-
स्तृतं सन्ध्या-युग्मे हरि-बल-सुहृद्भिश्च पतिभिः।
गवां स्थानं तत्तन्मनसि मुनिराजाश्च[३] निदध-
न्निजां कान्तिं कान्तिं[४]जनयति
जनाः के किल परे॥

गवामाहूतिः सा मुहुरपि च सा दोहनकला
हरेः सा सा चात्र प्रचुरहसिताद्या विलसितिः।
स्व-मित्रैः सा क्रीडागृहगतिरसौ चास्ति सुखभृ-
न्मुहुर्यद्द्रष्टॄणां दृगपरदृशं लालसयति[५]॥

---

(१) तेजांसि।
(२) मणिजटितभू।
(३) शुकादीनां।
(४) अभिलाषं।
(५) ते पश्यन्ति न वयमित्येवं रूपतया।

सदनवनयोरागमनगमनन्तु पत्राणामेव सन्धि-सम्बन्धिभिः पथिभिः प्रथितं ॥

तत्र चेदं वर्णयन्ति ।—

श्रीमद्व्रजस्य पदवीषु गुरुप्रथासु
श्रीकृष्णतत्परतया विलसत्कथासु ।
सा वृत्तिरुर्व्ववरवर्णसमाश्रितासु
स्वर्व्वासिनः श्रुतिसमां प्रतियन्ति रीतिं ॥

तेषामपि पथां यथायथमुभयतः प्रमदवनपात्र-तया मोद-सन्दोहेनावालसम्मदसत्राणि पत्राणि तानि विराजन्ते ॥

यानि च किञ्चित्कुञ्चितकमलपत्रवदेवालवाल-सङ्गसङ्गततया वहिर्जनदुर्लङ्घ्यतामञ्चन्ति । शाखिनां घनशाखतया न च स्फुटमूर्द्धादपि दृष्टि-परामृष्टिं गच्छन्ति ॥

ये च राजान्तःपुरं गन्तारः पन्थानः कथितास्ते तस्य[१]कर्णिकासङ्गतस्य सुवहुमुखशतस्य मणि-वद्धक्रमसोपानवद्धतयालम्बमाना वृन्दावनवन-वृन्दमालम्बमानास्तन्मकरन्दस्यन्दसमास्वादसुखा-दस्पन्दजिह्वा इव दृश्यन्ते ॥

(१) अन्तःपुरस्य ।

यस्य[१] कर्णिकाकारस्य किञ्जल्क-वारनिभप्राचीर-मभिस्पृशन्तस्तदन्तः सदाभीर-निकराणां सपरिकराणां पुरोहितानां पुरोहितानां श्रेणीरूपाणां[२] श्रेणीरूपाणामपि यथास्थानं निवासाः सविकासा विलसन्ति ॥

ये खल्वन्तर्धाममण्डल-मार्त्तण्डस्य परिवेषा इव सुवेषा लक्ष्यन्ते ॥

तद्वासिनश्च ते गोकुल-पतेः सम्पदंशभागितया तदंशा इति व्यपदिश्यन्ते ॥

तेषु च ।—

ये सद्भावसमाः स्फुरन्ति पितृभिः
कृष्णस्य ये भ्रातृभि-
र्ये सख्यप्रथया विहारपरमैर्ये वा निषेवापरैः ।
विभ्राजिव्रजवासिनाशुभजुष-
स्तान्नूतनागन्तुका[३]
नामीभ्यः[४] पृथगीक्षया कलयितुं
लोकाश्चिरादीशते ॥

---

(१) अन्तः पुरस्य ।

(२) एकशिल्पोपजीविनां ।

(३) कर्त्तारः । (४) पित्रादिभ्यः ।

किञ्च ।—

मातस्तात ! भ्रातरित्यादिमाह्वां
कुर्व्वंस्तत्तत्तुल्यभावेषु कृष्णः ।
तत्तल्लोका(१)द्यप्यलं तेषु मोदं
दत्ते यत्ते सर्व्वकं विस्मरन्ति ॥

अथ तस्मादावरणादभ्यन्तरमसाधारणान्तरमशेषसभाखण्डलं सभामण्डलं परितश्चकास्ति ॥

यत्र च स्व-वासिजनमनुकुर्व्वन्तः परस्परसम्मुखतया(२) सुखमिव वलमाना विमानावतारा इव गृहसारा विराजन्ते ॥

ये खलु जातरूपेण(३) जातरूपा वैदूर्य्यमणिभिर्दृष्टिप्राचुर्य्यमिव हीरकलसितैः सततमधीरहसितमिव विसृमररागपद्मरागैर्महानुरागमिव लावण्ययुक्ताऽमलमुक्तावलिभिर्विसरदजस्रसम्मदास्रमिव मदकलकलविङ्कादि-कलैः कलकलमिव परस्परं व्यञ्जयन्तः सन्ति ॥

तदेवं सति वहिरन्तःसदनजनाः सहजकनकासनगणमध्यासीनाः श्रीकृष्णराम-कथा यथायथं

(१) मात्रादेः । (२) अनुकरणे हेतुः ।
(३) हेम्ना ।

प्रथयन्तस्तत्तद्भावभावनतया शारीरस्वभावमपि विस्मरन्तीति किं वर्णनीयं ॥

यद्वा यदा तु कदाचित् क्वचिदसौ श्रीमन्नन्दकुल-चन्द्रमा निज-कान्तिभिस्तेषां चकोरवाराणामिव पारणां पूरयति तदा ते निज-निज-जन्म च नव-नववन्मन्यन्ते ॥

तत्रैव श्रव्यदृश्याभिधंविविधमहा-
काव्य-वृन्दं सचित्रं
कृष्णस्याजन्मलीलावलिवलिततमं
दर्शयन्तः सुविज्ञाः ।
तं तात-भ्रातृ-बन्धुप्रभृतिनिज-जना-
नेकलक्षेण[1] सौख्या-
दासीनं नन्दयन्तश्चिरमपि विगतं
त[2]त्तदध्यक्षयन्ति[3] ॥

तदेवं परितः परिसृतं कक्ष्याद्वयं प्रख्यापितं । तयोरप्यन्तःपञ्चकक्षी तु साक्षाद्व्रजक्ष्मापतेरेव निवासः श्रीनिवासतया श्रीनिवास-वासतया च सर्व्वेषामपि सर्व्ववासनां पूरयति ॥

---

(१) सौख्ये हेतुः । (२) जन्मादि ।
(३) प्रत्यक्षयन्ति ।

तत्र मध्यमं प्रकोष्ठं पुनः सर्व्वतः श्रेष्ठतया मध्यमतामतिक्रान्तं शुद्धान्त इति कथ्यते ॥

यस्य पश्चिमायाः काष्ठायाः पश्चापि प्रकोष्ठा निखिलसाध्वीश्वर्य्या श्रीगोष्ठाधीश्वर्य्याधिष्ठीयन्ते ॥

उत्तरस्याः साम्बालेन प्रलम्बकालेन । पूर्व्वस्याः सर्व्वेश्वरेण श्रीगोष्ठाधीश्वरेण । दक्षिणस्याः स्वयं गोकुल-लक्ष्मीनाथेन मद्विधनाथेन । तदेवं कक्ष्या-सप्तकमयी सर्व्वेषामपि जीवनस्य लक्ष्या[१] सेयं राजधानी विराजते ॥

यत्र खल्वन्तरन्तः प्रतिकक्ष्यमुपर्य्युपर्य्येकैकाधिक-भूमिकतया गृहानयनस्पृहां वृंहयन्ति ॥

अत एव ।—

यद्यपि मणिमयलक्ष्मीः, सर्व्वा सेयं पुरी भवति ।
तदपि शिरोवन्मध्यः, कोष्ठः सर्व्वाङ्गतः[२]श्रेष्ठः ॥

अस्य मध्ये महामहिमध्येयतानन्दितनिज-भक्तं मेर्व्वाकार-कुट्टिमानिविष्टस्तम्भपंक्तिसक्तं सर्व्वमुकुट-भानं कुटप्रधानं विराजते ॥

यच्च निकेतनं विराजत्केतनं चलत्पताकाखेलया-चेतनमिव चिन्त्यते ॥

---

(१) आश्रयः । (२) सकाशात् ।

यत्र च सखिभिः स कदाचिदारूढः प्रथित-जिष्णुनीलकान्तिविजिष्णुकान्तिभिरुपगूढः सर्व्व-गोलोक-लोकं लोकयन्तं लोकयन् युगपदेव प्रमद-मूढं करोति ॥

यथा ।—

चक्षूंषि सिञ्चति मनांसि मुहुर्धिनोति
प्राणान् बिभर्त्ति पुलकेन तनूस्तृणोति ।
तेषां तदा बत ! यदा मणिकुट्टिमाग्र-
मारुह्य गोकुल-विधुः किरणां तनोति ॥

अस्तु तावत्तत्स्थतदवस्थजनानां वार्त्ता । सा च पुरी तादृशप्रेमविकारमुरीकुर्व्वतीव[१] महद्भिरुरी-क्रियते ॥

तथा हि ।—

यस्यां पताकालिरनेकरूपा
वातेन नाना मुखतां प्रयाता ।
चित्रालि[२]नेत्राः परितःफुरन्तं
व्यक्तं हरिं पश्यति पश्य पश्य ॥
कुम्भाः सुधाकान्ति[३]समाः स्व-कान्तिभिः
पूर्णा गृहाणामधिशेखरायिताः ।

---

(१) विस्तारयन्तीव । (२) श्रेणी । (३) चन्द्रः ।

मङ्गल्यरूपाणि वपूंषि विभ्रते
हरेः सदाभीप्सितसर्व्व-पर्व्वसु ॥
सद्मावलीनां पटलेषु[(१)] शुभ्र-
प्रभाः प्रभान्ति स्फुटरत्नविम्वाः ।
श्रीमद्व्रजेन्द्रात्मजकेलि-वृन्दा-
दिव प्रफुल्लाः पुलकप्रकाराः ॥
मयूर-पारावत-पक्षि-मुख्याः
क्रीडन्ति चित्रं प्रणदन्ति चारु ।
भक्ता इवामी च विचित्रयन्ति
श्रोत्रे च नेत्रे च सुरारि-शत्रोः ॥
चित्राणि रत्नप्रचितानि भित्ति-
ष्वाभान्ति तत्तद्रुचिरोचितानि ।
जन्मादिलीलाव्रजराज-सूनो-
रद्यापि यानि प्रथयन्ति सन्ति ॥
सद्मानि शश्वद्विलसन्ति[(२)] सर्व्वत-
स्तदीयसद्भक्त-यशांसि[(३)] विभ्रति ।
अभ्यन्तरे[(४)]ऽलिन्दमुखे च सानुगः
स्वं नाम[(५)] विन्यस्यति येषु माधवः ॥

---

(१) छदिःसु ।　(२) शतृ ।　(३) अर्थाद्भक्ततुल्यतां ।
(४) हृदिरूपं मुखे नामेत्याभिप्रेत्येदं ।
(५) प्रकाश्ये । पक्षे अभिधां ।

विचित्रशोभामणयः सुभासुराः
सभान्तरालं रचयन्ति चित्रितं।
नेयान् परं तेषु गणाः परश्च य-
द्दोषा(१)पि दोषातिलका(२)भवन्ति ते॥

तस्यां समन्तान्मणिजाङ्गनानि
स्वच्छानि सद्भक्त-मनः समानि।
स्थाने(३) ततस्तानि हरेस्तदीय-
व्रातस्य चाभासतनूर्वहन्ति॥इति॥

कुलकमष्टभिः॥

किञ्च।—

लोको दिव्यातिदिव्यस्तमनुसमधिकं
गोकुलं तत्र लोका
ब्रह्मादीनां विमृग्यास्थितिपदरजस-
स्तेषु तृष्णाकू स कृष्णः।
योऽयं जीवातुरत्नप्रतिकृतिरथवा
जीवनस्याङ्गमित्थं
ज्ञातः कुत्रापि गत्वा प्रतिमिलिततया
येषु शश्वद्विभाति॥

---

(१) रात्रौ। (२) दोषातिलकः प्रदीपः इति त्रिकाण्डशेषः।
(३) युक्तं ततो युक्तमित्यन्वयः।

तदेवमनभिव्यक्तचिद्वस्तूना[1]मपि प्रस्तुततत्प्रेमाभिप्रेयते । किमुत तत्प्रेममयचिद्विलासभासमानानां । किमुततरां चिरविरहदहनानन्तरममृतमिव तमुपलब्धवतां तस्य च पुनरगमनं विस्रब्धवतां तेषामिति तात्पर्य्यं पर्य्यवसीयते ॥

यतः ।—

आजगाम यदुपत्तनादसौ
माधवः किल यदा तदा व्रजः ।
आगतोऽयमिति वर्द्धिसम्मदा-
दद्यतामिव सदाधिपद्यते[2] ॥

यर्ह्यायातः स यदुसदनाच्छ्रीव्रजेशाङ्गजन्मा
तस्मादूर्द्ध्वं परपरदिनं शर्म्मधर्म्माजनिष्ट ।
तत्तत्कृच्छ्रात्तदनुमिलनं सूचयद्गीत-वाद्यं
स्वाद्यं कर्त्रीं निखिलजनता य[3]न्नयन्ती[4] न वेद॥

ये ये चासन् प्रकटविभवे स्थावरा जङ्गमाश्च
श्रीमद्वृन्दावनभुवि त एवात्र कृष्णं प्रपद्य ।
आनन्देन प्रततरुचयस्तं प्रति स्वं भजन्तः
स्वस्मादन्यत्किमपि न विदुः श्रेयसां चारु पात्रं ॥

---

(१) चिद्रहितानां ।　　(२) अधिगच्छति ।
(३) परपरदिनं ।　　(४) क्षेपयन्ती ।

वृक्षाः शैला ह्रदिन्यः खग-मृग-निचया
वन्यदेव्यः सुरभ्यः
सेवातृष्णाः सखायः पितृमुखगुरवः
किञ्च कान्ता व्रजस्थाः।
कृष्णाद्विच्छिद्य कृच्छ्रात्प्रतिमिलिततया
स्निग्धतादिग्धभावं
बिभ्राणास्तस्य कान्तीर्नव-नव-तुलया
शश्वदेव प्रतीयुः॥

शृण्वन्ति जिघ्रन्ति विलोकयन्ति
स्पृशन्ति कृष्णं व्रजवासिजीवाः।
अहो! चिरात्प्राप्तममुं त एके[१]
लिहन्त्यपि प्रत्यहमूढतृष्णाः॥

जन्म श्रीप्रभृतीनि केशिनिधनप्रान्तानि गायन् व्रजः
कृष्णस्याचरितानि सौख्यमयते
य[२]स्तानि[३] त[४]च्छर्मणे।
यद्यत्कंसवधादि सुष्ठु तदपि प्रोह्याय भूयः सुखं
यात्युच्चैर्विजयी निजं गृहमसा-
वागत्य य[५]न्नन्दति॥

---

(१) गवादयः। (२) हेतोः। (३) चरितानि।
(४) व्रज। (५) यतः।

जन्मारभ्य हरेर्निजा यदभव-
　　द्बाढं रमाक्रीडता-
नन्दन् तेनपुरा व्रजक्षिति-जन-
　　श्चित्रं न तत्र क्वचित् ।
द्वार्व्वत्यामपि भूतिरस्य यदभूत्
　　स्फारास्तते नाप्यलं
सौख्यं याति स य(१)त्प्रियः किमुत त-
　　त्यागेन चेद्यागतः ॥
दत्ते यस्तुलसी-दलं लवमपि
　　द्रागुत्तमर्णां तम-
प्यङ्गीकृत्य वशीभवत्ययमिति
　　ख्यातं मुनीनां मतं ।
तस्मात् सर्व्वसमर्प्पिणां व्रजजनं
　　हित्वा गतः सद्द्रुहां
नाशायाथ विधाय तं पुनरिहा-
　　यातोऽप्यसौ लज्जते ॥
वाढं ह्रीच्छति तत्र(२) चाय(३) मगतिं
　　पित्रादिलोकं व्रजं

(१) यतः ।　　(२) श्रीकृष्णे ।　　(३) आगच्छं ।

हित्वा भूतिमुपार्ज्जयं[१] जनपदे
दूरे वरेण्यामिति।
जिह्रेत्येष च स व्रजः स्वयमम् -[२]
मौज्झीदसौ नः कृते
द्रागित्थं मिलतोत्थशर्म्म तु परं
त[३]च्छादनायाजनि॥
दूरं गत्वा विचिन्वन्निव जगति च यै-
स्तुल्यभावानतोषं
सर्व्वत्र प्राप्य भूयः स्वकसदनमगा-
त्तैर्व्रजस्थैरपूर्व्वं।
क्षेमश्रीप्रेममात्रं सततमभिलष-
न्नर्थमेत[४]न्निधीस्ता-
नुद्दिश्यत्तातमुख्यान् हरिरयमुदय-
द्गर्व्ववान् पर्व्व याति[५]॥
पाल्यानां सद्गति-श्रीः स्फुरति सवयसां
दिव्यसत्कर्म्म माता-
पित्रादीनां विलोकः प्रणयिवरदृशा-
मेष कृष्णः परात्मा।

---

(१) अहं। (२) भूर्तिं।
(३) लज्जा। (४) प्रेमाश्रयान्। (५) प्राप्नोति।

ते[१]तस्याप्यङ्घ्रि-युग्मं भुज-युगमभितो-
ऽप्युत्तमाङ्गं हृदन्तः
कञ्जं पूर्व्वक्रमेणोत्युभयक[२]पुरुषा-
कारमाभाति गोष्ठं ॥
मातुर्लालनमेत्य सम्मतिमितस्तातस्य च भ्रातृभिः
सार्द्धं धेनुगणावनाय विपिनं गत्वा चरन् क्रीडितं ।
आगम्याथ गृहं समस्तसुहृदामीदृक् प्रतीतिं भज-
त्येष श्रीव्रजराज-नन्दनशशी श्वासो[३]न एषामिति ॥

अथ कथकः समापनमाह स्म ।—

हंहो ! सौख्यं सुरद्विट् कटुकटकघटा
प्रष्ठ[४]कंसादिकांस्तान्
हत्वा तत्क्लिष्टचित्तां पितृमुखजनतां
निर्वृतां सुष्ठु चक्रे ।
किञ्चान्यः स्व-प्रियाणां[५] पतिरिति वहिरा-
ख्यातिदुःखानि हत्वा-
तत्तद्विश्लेषपीडाच्छिदयमतिजग-
द्दृष्टि[६] गोष्ठे विभाति ॥

---

(१) पाल्यादयः । (२) गत्यादि । मङ्घ्रियुग्मादि ।
(३) गत्यागतिभरत्वात् । (४) श्रेष्ठ । (५) प्रेयसीनां ।
(७) यथा स्यात् ।

अत्र च ।—

तत्तत्केलिकला-कलापकलनाः कृष्णस्य विश्लेषिता
तृष्णाकु चित्ततया पुनर्ब्रजमुपा-
यातस्य वर्ण्याः कति ।
सोऽयं गोकुलबन्धु-वृन्दवलितः श्रीमान् सभा-मण्डले
गोपाखण्डल-सूनुरत्र निवसंश्चित्तं हि बध्नाति नः ॥

इति वाक्स्तम्भं सम्भवन्[१] मधुकण्ठः साञ्जलितया वाष्पपुरासञ्जनं सव्रजं कञ्जविलोचनमालोचयन् क्षणकतिपयं विलक्षणतया तस्थौ ॥

श्रीब्रजराजस्तु नन्दितसर्व्वसमाजस्तं सभ्रातरं[२] भूयश्च भूयश्च भूयः[३] समाहूय स्व-वपुषा सम्भूय निज-नयनामृतेनाभिषिषेच । तयोः[४] सर्व्वतृष्णां तर्पयन् समर्पयामास च कृष्णाय स्वयं ताविति कृतं[५] सर्व्वव्रजसाहितब्रजराजकृततत्तद्गणेयदानादिगणनया ॥

सव्रजवधू-व्रजा ब्रजराजवधूरपि यां तदीयमहासुकृत-परिणामरूपां कृपामकृत सापि कतिपयं

---

(१) प्राप्नुवन् । (२) मधुकण्ठं ।
(३) अधिकं यथास्यात् ।
(४) मधुकण्ठ-स्निग्धकण्ठयोः । (५) प्रलं ।

वर्णनीया । यस्यामच्छायां निज-सुतस्य च्छायावद्देव ता[१]वधिगतवती ॥

अथ श्रीव्रज-वन्दिनस्तं वन्दमाना मङ्गलमाचरन्ति स्म ।—

य: श्रीमान् व्रजराजसिन्धुजविधुः
स्वां कीर्त्ति-कान्तिं किरन्नच्छिद्रं त्रिजगत्पुपोष नितरा-
मास्तां व्रजान्तःकथा ।
गत्वा दूरतरं च गूढतमसां नाशाय भूयः समा-
गच्छद्गाढमसौ सदा विजयतामस्मद्दृशां गोचरे ॥

अथ वन्दनं ।—

श्यामपुरन्दर ! धामधुरन्धर !
दुष्टविनाशन ! जुष्ट-विपाशन[२] !
सन्मदसागर-जन्मदशाधर[३] !
पूतनिभाकृति-पूतनिकामृति-
त[४]न्मृति[५]तारक ! सत्कृतिपारक !
शाकटभञ्जन,भा[६]गटदञ्जन-

(१) मधुकण्ठ-स्निग्धकण्ठौ ।
(२) सेवमानपाशविमोचन । (३) तादृग्जन्मदशां धरति ।
(४) पूतनिका । (५) संसार ।
(६) भागिति मर्द्दनविशेषणं ।

लोचनमर्द्दन ! रोचननर्द्दन[१] !
संहितरोदन ! वंहिततोदन[२] !
गर्गकृताह्वय-वर्गभृता[३]न्वय !
दानवमारुत-दानवलानुत[४] !
वन्धुरसेलित-वन्धुरखेलित[५] !
भक्षितमृत्तिक-लक्षितवृत्तिक[६] !
दर्शितविश्वक ! मर्शितरक्षक[७] !
मातृसु विस्मय-धातृशुचिस्मय !
तर्णकमोचक ! वर्णकरोचक[८] !
शोभनचौर्य्यक-लोभनशौर्य्यक !
मातृसमीक्षण-यातृ[९]सभीक्षण[१०] !
मातुरुरोजप ! जातु रुदन्नप-
हृत्य हविर्द्रुत-कृत्यतयाद्भुत !
दुष्टुभयादित[११]सुष्ठुतयासित[१२] !

---

(१) नर्द्दशब्दे । (२) वर्द्धितव्यथ । (३) पुष्ट ।
(४) खण्डनवलेन हेतुना सम्यक् स्तुत । अत्र स्तुतौ खण्डनवलं हेतुः ।
(५) रसेन स्तुतं तादृक् खेलितं यस्य । (६) वहुव्रीहिः ।
(७) अतिशयार्थे । (८) तन्मोचनवर्णनाकर्त्तृ ।
(९) प्राप्त । (१०) नेत्र । (११) गत । (१२) वद्ध ।

भिन्ननगद्वय ! भिन्ननमन्मथ[१] !
जातविशोचित-तातविमोचित !
हृद्यग[२]कानन-वर्त्मगतानन[३] !
गो-कुल[४]सङ्गत-गोकुल[५]श[६]ङ्गत !
वत्सवनार्द्दन[७] ! वत्सवकार्द्दन !
दीर्णमयात्मज-तीर्णमहाव्रज[८] !
सर्व्वजना[९]दघ-गर्व्वजयानघ !
कालियजिन्नटनालियशोनट[१०] !
चारितधेनुक-मारितधेनुक[११] !
अस्तप्रलम्बक ! शस्तकदम्बक[१२] !
भावमुधाभय-दावसुधाधय[१३] !
बोधनगर्द्धन[१४] ! गोधनवर्द्धन-

---

(१) भिन्नाः स्निग्धा नमन्तश्च ये तत्प्रचुर ।
(२) गोवर्द्धन । (३) तत्सम्मुख ।
(४) गोवृन्द । (५) व्रज । (६) भव्यं ।
(७) वत्सान्वनेऽर्द्दयति गमयतीति ।
(८) निस्त्रीणां महाव्रजो यस्य । (९) अत्तीति क्विप् ।
(१०) कालियजित् या नटनालिः तया यशो नटयति । कर्म्मधारय-तृतीयासमासौ ।
(११) प्रेङ्खयति पूर्व्वस्य लघुत्वं तु चारणभेदात् । (१२) नेत्र ।
(१३) भावेन भावनामात्रेण मुधा व्यर्थीभूतं भयं यत्र तादृशो यो दावः स एव सुधा तत्प्रभावतो गुणाभानेन सुधारूपः तं धयति पिबतीति ।
(१४) बोधनाभिकाङ्क्षायुक्त ।

पर्व्वतयाजन[१]पर्व्वतया जन-
धर्म्मवरप्रथ ! शर्म्मभरग्रथ !
तद्धरणीधर[२] ! सद्धरणीधर !
धृष्टसुरेश्वरवृष्ट[३]सुजित्वर !
कामगवी[४]सुरधामग[५]ठक्कुर !
सिक्तदादिकनिक्तमाधिक[६]! ॥ वीर ! ॥

स एष कृष्ण ! सम्प्रति त्वमत्र गोपतिं प्रति
प्रशस्तमङ्कमाश्रितः सलोभचेतसार्हितः ।
भवन्तमेनमीक्षितुं निमेजयाय शिक्षितुं
मनस्तु वष्टि योगितां नयद्व्रजेद्वियोगितां ॥

अपि च ।—

पैत्रविमोषक-जैत्रविदोषक-
पाशिभयभ्रम-नाशिजयक्रम !
सन्ततगो-कुल-सन्ततगोकुल-
दर्शनयायुत[७] ! दर्शन[८]संस्तुत !

---

(१) पूजन । (२) गोवर्द्धन एव धरणी तद्धर ।
(३) जलादि । (४) सुरभी । (५) इन्द्र ।
(६) कामगव्यादिका ये निक्तसमाः शुद्धास्तेभ्योऽधिक ।
(७) सन्ततं विस्तृतं गोकुलं रश्मिसमूहो यस्मिन् तादृशं यन्नित्यं गोकुलं तस्य दर्शनया युक्त ।
(८) शास्त्र ।

नागसुदर्शन,भाग(१)सुदर्शन ! (२)

रत्नानिपातन,यत्ननिघातन-(३)

तक्षित(४)यक्षक ! रक्षितपक्षक !

तर्ज्जदरिष्टद,गर्ज्जदरिष्टद ! (५)

वेशितमञ्जुज,केशितनूरुज ! (६)

कंसकमारण,शंसककारण-(७)

सङ्गततत्पुर ! रङ्गततः(८)पुर(९)

एव वपुर्हर ! देववदम्बर !

सद्वरवायक, सद्वरदायक !

मालिसुदामक,पालिसुधामक !

कुब्जि(१०)वपुःसुद,गुञ्जित(११)तादृग्-

गङ्क(१२)तदर्पित,सङ्गतकल्पित-

---

(१) भाग्यरूप ।　　(२) बहुव्रीहिः ।

(३) हनम ।　　(४) छिन्न ।

(५) तर्जश्च अरिष्टदश्च गर्जश्च योऽरिष्टस्तं द्यति छिनत्तीति ।

(६) रुजति ।　　(७) नारदादि । तेन हेतुना ।

(८) रङ्गं तनोतीति रङ्गतत् रङ्गविस्तारकस्य रजकस्येति यावत् ।

(९) प्रथमतः ।　　(१०) कुब्जो रोगभेदस्तद्युक्त ।

(११) उज्ज आर्जवे ।　　(१२) सम्बोधनं ।

चन्दन(१)रूषित ! वन्दनतूषित ! (२)
पृष्टमखस्थल ! सृष्टमहाबल !
खण्डितचापक ! दण्डितशापक(३) !
सङ्गपराऽऽदिम ! रङ्गपदाग्रिम !
हस्तिपदारक,(४)हस्तिपमारक !
अंसगदन्तक ! कंससदन्तक !
मल्लजनक्रथ,तल्लज ! मुन्मथ !
मारितकंसक ! तारितशंसक !
प्राज्यदयाहुक, राज्यदयाहुक !
जङ्गत(५)यादव, सङ्गत ! माधव !
युक्ततयासज-दुक्तचयाद्वज-
यापिततातक ! धापितशातक-
तन्निजताप्रथ(६) ! सद्विजताव्रत !
गौरवभूमत,गौरवभूगत(७) !

---

(१) तया अर्पितं यथा स्यात्तथा कल्पितं यच्चदनं ।

(२) तूष तुष्टौ ।

(३) आक्रोशक । (४) हस्तिश्रेष्ठ ।

(५) कुटिलतया गत ।

(६) धारितसुखकां नन्दनिजतां प्रथते ।

(७) आदरजातमतेन गुरुभूमिप्राप्त । तृतीयासमासः ।

शास्त्रकथाञ्चित ! शास्त्रकलाञ्छित[१] !
पञ्चजनाद्दर, सञ्चयसुन्दर !
धर्म्मनृपा[२]र्च्चित ! शर्म्मकृपाञ्चित !
कालवशं गुरु,बाल-वपुः पुरु-
दक्षिणाय[३]न्नथ दक्षिण[४]सत्पथ !
सद्मसमागत ! पद्मसमायत-
लोचनबन्धुर ! रोचनशन्धुर[५] !
सस्मृतगोब्रज ! सम्भृतशुग्ब्रज !
त[६]त्प्रहितोद्धव ! तत्प्रहितोद्धव[७] !
तच्छ्रुतशान्तिक ! [८]संप्लुत[९]कान्तिक !
दूतगमागम, सूत[१०]शमाशम !
मागधयोधन ! सावधरोधन[११] ! ॥ वीर ! ॥

---

(१) शास्त्रसम्बन्धिन्यो याः कलास्ताभिराञ्छित आयत ।
आञ्छि आयामे ।

(२) यम ।

(३) तत्करोतीति ।　　(४) उदार ।

(५) रोचनी मञ्जुधुरायत्र ।　　(६) तत्र ।

(७) तस्य व्रजस्य प्रकृष्टं हितमेवोत्सवो यस्य ।

(८) तस्माच्छ्रुता शान्तिर्येन ।

(९) व्याप्त ।

(१०) प्रसूत ।

(११) अवधेन सह रोधनं येन ।

अहो ! स एष भो भवन् ! व्रजेश-गोचरे भवन्
निजां कथां परामृशन् सुखायसे ह्रियं स्पृशन् ।
तदाऽस्मदीयमन्तरं[1]मदेन माद्यदन्तरं[2]
न चान्यदन्यदीहते कृपेदृशी यदीहते[3] ॥

अपिच ।—

राजप[4]यशःचित ! राजपदार्च्चित !
सप्तदशाहव, तप्तदशाद्रव-
दन्धजरासुत, वन्धजयाऽऽनुत !
यावनराड्जय, भावनतामय-
विद्रवपण्डित ! विश्रव[5]मण्डित- !
भास्मितकालक ! [6]सस्मितभालक !
अङ्ग[7]जरासुत-रङ्गजवद्रुत !
अब्धिपुरीचिर-लब्धिपुनः स्थिर !
भीष्मकजाहृति-भीष्मकलाकृति-
सन्दितदुर्ज्जन ! नन्दितपूर्ज्जन !
सत्पतयाजित, सत्य ! [8]सथाहित !
जाम्ववदीडित ! जाम्ववतीश्रित !

---

(१) चित्तं । (२) मध्यं । (३) यदि ईहते ।
(४) क्रथकैशिक । (५) यशः ।
(६) कालयवन । (७) पुनः । (८) पत्नी ।

हेलि(१)सुतावर ! केलिसुधाकर !
उज्जयनीजनु, रुज्जयनादनु-(२)
भद्रितयाभृत, भद्रिकयावृत(३) !
अर्पितभाद्रिक ! (४)जायितमाद्रिक(५) !
भूमिज(६)कालक ! भूमिज(७)पालक !
अन्यसुता(८)मर, धन्यसुताकर-
पीडनसज्जित ! पीडनवर्ज्जित !
निर्ज्जरपादप, निर्ज्जर(९)पादप-
हार(१०)जगन्मद, सारजयद्ध्रद !
शम्वरदारण, डम्वर(११)कारण !
शङ्करमोहन ! शङ्करमोहन(१२) !
वाणकरायुत, दान(१३)कलायुत !
पण्डितपुण्ड्रक ! (१४)दण्डिकपुण्ड्रक !

---

(१) सूर्य्य । (२) पश्चात् ।
(३) मङ्गलयुक्ततया भृता या भद्रा तया वृत ।
(४) अर्पितमाङ्गलिक । (५) पत्नीकृता माद्री येन ।
(६) नर । (७) जनमात्र । (८) पार्थिवे तनये सुतः ।
(९) इन्द्रं वर्ज्जयित्वा । (१०) ह्वाति । (११) आटोप ।
(१२) भव्यकरणमेवोहनं यस्य । (१३) खण्डन ।
(१४) तिलक ।

काशिकचक्रक,(१)नाशिकचक्र(२)क !
कौरवभूगत, पौरवसङ्गत !
नन्दनृपादिक, नन्द(३)कृपाधिक !
गर्भकषड्भय, दर्भक(४)निर्भय !
वल्यतुलाञ्चित ! (५)वल्य(६)कुलाञ्चित !
चैद्यमहागद, वैद्यमताऽगत !
सौभविलापक ! कौभविकापक !
रागतमात्पुर, मागत ! माथुर-(७)
मत्र च नारद, मन्त्र-चयादद(८)
कुल्यमतङ्गज, तुल्यकरूषज-
पञ्चमुखप्लुत ! (९)पञ्चमुख(१०)स्तुत !
वन्द्यपुनर्व्रज, नन्द्यपुनर्बज-

---

(१) काशिनृपसैन्यव्यूह।
(२) सुदर्शन। (३) मोद। (४) मेलक।
(५) वलिना अतुलं अञ्चित। (६) वलार्ह।
(७) रागातिशयान्मथुरं पुरमागत।
(८) य प्रत्ययः।
[९) तादृशिकरूषजे पञ्चमुखस्य सिंहस्येवाप्लुतं यस्य।
[१०) रुद्र।

नागतिसम्मद, भा[(१)]गतिशर्म्मद !

दात[(२)]कुविक्रिय, तातकुल-प्रिय !

शर्म्मतुला[(३)]धृत, कर्म्मकुलावृत ! ॥ धीर ! ॥

व्रजेशदृष्टिवश्यतां यता[(४)]त्वया च दृश्यतां

निरिङ्गतां गतोऽप्यसि त्वमत्र नापि तृप्यसि ।

कथं वयं तवेदृशं सुखं स्तवाम ये भृशं

निरुद्धकण्ठजाततताःस्फुटं समूकता[(५)]मताः ॥

अपि च ।—

तातजनन्यप,यातपथि ग्लप-

नाथसमस्तक,नाथसशस्तक !

मित्ररतिह्रद, चित्रगतिप्रद !

उद्वहमागम,मुद्वहनासम !

लक्षविवाहक,पक्षविगाहक !

उल्लसदन्तर,फुल्लदनन्तर-

लज्जनमज्जक ! [(६)]सज्जनसज्जक[(७)] !

---

(१) वन्ध्या या पुनर्व्रजनान्द्रमी अपुनर्व्रजना आगतिस्तस्यां सम्मदभाक् ।

(२) छिन्न । (३) मानार्थयन्त्र । (४) गच्छता ।

(५) मूकतया सह वर्त्तमानाः ।

(६) फुल्लत् विकसत् यत् अनन्तरे वाहिर्लज्जनं लज्जा तत्र मज्जक ।

(७; मेलक ।

पूर्व्ववनं पर,पूर्व्वमनःपर-
मागत(१)तत्कृत, रागतयावृत-
सद्व्रजरञ्जक,सद्व्रजसञ्जक !
अञ्छवनाचल,(२)कञ्छगणाचल(३) !
शीलकुलाकुल,लील ! तुलातुल(४) !
तातजनन्यनु,यात(५)कुलान्यनु-(६)
शान्तिदशर्म्मद,कान्तिदनर्म्मद(७) !
इन्द्रमणिद्युष,दिन्द्रमहोजुष(८) !
तुण्डलसत्तम ! कुण्डलसत्तम !
शुभ्रतरस्मित,(९)शुभ्रकराश्रित !
रोचनखञ्जन,लोचनरञ्जन !
सुन्दरनासिक ! कुन्दरदाधिक !

---

(१) पूर्व्वं वनं प्राचीनलीलाकाननं यमुनादक्षिणपारगं वृद्व वृन्दावनं परेषां पूर्व्वेषां च मनः परं तदागत ।

(२) पर्व्वत । (३) स्थिर ।

(४) तुलया सदृशेन न विद्यते सादृश्यं यस्य ।

(५) अनुगत ।

(६) लक्ष्यीकृत्य । (७) यथोचित ।

[८] इन्द्रमणीनां ये द्युषदिन्द्रादिकन्द्रा स्तेषां तेजोयुक ।

[९] चन्द्र ।

यत्नवसत्कल ! (१)रत्नलसद्गल !
अङ्गदकङ्कण,सङ्गसदङ्कन ! (२)
हारिहृदन्तर ! (३)हारिहृदन्तर ! (४)
तुन्दरमालय(५)सुन्दरतामय-
नाभिसरोव,रता(६)भिमनोहर !
चीनपटीवृत, पीनकटीभृत !
सक्थिगताक्रम, शक्तिगणासम !
जानुयुगासित, भानुतयाचित !
चित्रदभ्रङ्कृति(७)चित्रदलङ्कृति-
लोभितषट्पद, शोभितटत्पद !
गो-गणबालक ! (८)गोगणपालक !
मन्द्रक(९)वेणुक ! चन्द्रकरेणुक(१०) !

---

(१) यत्नेन वसन्ती कला यत्र।
(२) सल्लक्षण । (३) तारयुक्तवक्षोमध्य ।
(४) मनोहरं हृदन्तरं मनोविशेषो यस्य ।
(५) पद्म । (६) तत्तया ।
(७) पदयोश्चत्वारि विशेषणानि ।
(८) गोसङ्ख्यानां गोपानां बालक ।
(९) मन्द्रं कायतीति ।
(१०) चन्द्रके रेणवो यस्य ।

वेत्रगहस्तक ! नेत्रगशस्तक !
मित्ररुचिस्मृत, चित्ररुचिस्तृत(१) !
केलि(२)कलाहस ! केलि(३)सल्लालस !
सन्नत-वत्सल ! (४)सन्नतवत्सल(५) !
सौहृददत्तक ! सौहृद(६)रत्तक !
सज्जनिताधन, तद्वनिताधन(७) !
नित्यनवं सुख, मित्यलमुन्मुख-
माश्रिततापर, मार्द्रितमाचर !
गोपसदन्वय(८) गोपसमन्वय
कृष्ण ! सदाशय, तृष्ण ! सदा जय ॥ धीर ! ॥
निजं पदं व्रजाभिधं समित्य नित्यमुद्विधं(९)
प्रियैर्जनैर्विराजसे परं कियत्कृपायसे(१०) ॥

---

(१) मित्रैरुचिभिः स्मृता याश्चर्य्या रुचिः कान्तिस्तया छन्न।
(२) नर्म्म। (३) क्रीडा। (४) सन्नता वत्सला येन।
(५) सन्नतेषु वत्सं वक्षो लाति ददातीति।
(६) सुहृद्वृन्द।
(७) सज्जन्मतया विख्यातानां वनितानां धनरूप।
(८) गोपानां सदन्वयं गोपायति यस्तादृक् समन्वयो मिलनं यस्य।
(९) नित्यां मुदं विधत्से।
(१०) कृपायतेऽनुकम्पतेऽनुक्रोशत्यपीत्याख्यातचन्द्रिका।

न भावमावृणीमहे न यत्पृथग्वृणीमहे ।
तदन्यदुह्णुनीमहे मनस्ततः पुनीमहे ॥

भृत्यान् पालय वत्सलान्प्रमदय क्रीडासहायानव
प्राणप्राणसमाः पराश्च जनताः संरक्ष रक्षामणे ! ।
तच्च(१)श्रीव्रजवन्यधन्यविहृतिप्राचुर्य्यतः सिध्यति
त्वां तत्कृष्ण ! सदैन्यकाकु वृणुम-
स्तन्नित्यमाविष्कुरु ॥

अथ तस्यामेव निर्व्वाहिरञ्जनायां रजनावसौ मधुकण्ठः कंसजिदुपकण्ठस्थितराधा-सदसि कथां प्रथयामास ।—

यदा कृष्णा-पारादनयत हरिर्गोकुल-जनं
पदं गोलोकाख्यं निभृतमिह वृन्दावन-भुवि ।
तदा यद्यत्पूर्व्वं विविधमनुभूतं स्थलजलं
तदेवापूर्व्वं सत्स्फुटमकलि तस्मिन् निखिलकैः ॥

यथा च गोलोकदेशे विमानेन प्रवेशे श्रीराधिकादिकाः सम्भ्रमादधिकानवधाना जाता इति तासां भ्रमापनयनाय क्रमाद्दर्शितं कलितसुखजन्यां

(१) भृत्यपालनादि ।

तस्यां रजन्यां निगूढतानिरूढपुनर्लीलासतृष्णेन श्रीकृष्णेन ॥

एतद्गोकुलरूपरत्नकमलं विभ्राजते यत्र च
श्रीमत्तात-पुरं विभाति यद्वा-[१]
ग्वः शुभ्रमन्तःपुरं।
एतस्मिन् किल यत्र मद्वररमा यूयं मया क्रीडितं
कुर्व्वन्त्यो भवितास्थ नो ह विषयाः
कस्यापि-कस्या[२]पि च ॥

अस्मिंश्चित्रमिषेण भान्ति विभवा
वृन्दावनस्थाः सदा
यांस्ते लोभवशाद्व्रजन्ति[३] सततं
तत्रस्थभृङ्गादयः।
आस्तां तद्वत ! युष्मदक्षि-पटला-
न्यप्यत्र भृङ्गक्रियां
गच्छन्ति प्रतिदृष्टि हन्त ! मम त-
द्भ्रान्तिं वलाद्विभ्रति[४] ॥

(१) दक्षिणादिकयं।
(२) ब्रह्मणोऽपि।
(३) वनभ्रान्त्या। (४) पुष्यन्ति।

अथ तदेतदाकर्णिन्यस्ता वरवर्णिन्यस्तं प्रति तदिदं वर्णयामासुः ।—

गोकुलयुवराज ! स्वच्छन्दामन्दशन्दस्थलविहार-लब्धच्छन्दानां शतकोटिसङ्ख्यया कृतभवदानन्दाना-मस्माकमस्मान्नतरां शर्म्म[१] मर्म्म स्पृशति । तस्मादस्मत्कामनारामं धाम काममन्यदपि कामयामहे ॥

अथ स्मित्वा रत्नशिलावरणमयतत एव च भित्वा स च प्रोवाच ।—

मणिभिर्गृहमणिभिः[२]कलिततमोनिर्याणेन सुया-नेन[३]तलस्थलकृतसोपानेनागच्छत तदिदमच्छ-धाम निशामयत च ॥

तथा हि ।—

यद्वत्पूरुपरि प्रकामसुभगा तद्वत्तले विस्तृता
सूर्य्येन्दुप्रभरत्नसङ्कटनया धर्म्मोष्टदिष्टा[४]वलिं ।
एकान्तत्वनितान्तकान्तविभवा क्रीडाकरार्थावहा
युष्मत्केलिकला विनाकृतिदुता सेयं
पुरी दृश्यतां ॥

---

(१) कर्त्तृ ।　　(२) दीपैः । त्रिकाण्डशेषे ।
(३) स्वस्त्यर्थे ।
(४) काल । रात्रिन्दिवरूप ।

पातालस्य तुलामितेऽत्र शशभृद्द्योरत्न[१]रत्नस्थले
सद्वातायनजातवात[२] सुरभि-[३]
व्राते लसत्पल्लवे ।
ये वृन्दाविपिनस्थिरास्थिरवपुः-
पञ्चालिकानां[४] गणा-
स्तेऽमी तत्त[५] दनुक्रियामपि कला-
योगादलं बिभ्रति ॥

यस्याः पृथुतरमध्यं
लसति मदैश्वर्य्यसम्बध्यं ।
परितस्त्वियमथ भवतीः
प्रति[६] भवती[७]ति प्रथावती वसतिः ॥

अथ तथापि न तथा सुखमवापुरिति पुनर-
मूरूचिरे ।—

निपुणगुणविस्मायकतदिदमप्यस्माकमवध्य-
तीतमपि मणिगृहसंग्रहमध्यं पदं वन्दी गृहवद-

(१) चन्द्रसूर्य्यरत्न । (२) कान्त ।
(३) सौरभ ।
(४) पुत्तलिकानां ।
(५) स्थिरास्थिरवपुषां ।
(६) भवतीनांभाणे । (७) प्रेकाद्मायाहि ।

स्पृहयामन्दीभाव्यते । किन्तु स्वल्पमपि वनकल्पं कल्पतरुवनवत् स्पृहयानल्पीभाव्यते ॥

तस्मात्पूर्व्वानुभवधन्यं वन्यं किञ्चिदन्यदश्चितुं वाञ्छामः ॥

अथ श्रीकृष्णश्च व्यस्यमाननिज-तृष्णातया किञ्चिद्विहस्य तस्य[१] सहस्रधा गणितद्वारगमणिशिला-वरणानि निरस्य सहस्रपत्रपत्रपत्रास्थितप्रमदसत्र-भानप्रदप्रमदवनानि निजपरिमलपद[२] तदन्तः-सदनसदङ्गननिभानि निभालयामास । समभ्यर्ण-तया वर्णयामास च तदिदं ।—

कुञ्जा वृक्षाश्च रत्नालय-चयसुहृदः
　　कान्तिसम्वास[३]लाभा-
द्वृत्ता[४]नीराशयाश्च स्फटिकमुखमणि-
　　क्ष्मासु मैत्रीमवाप्ताः ।
वल्ल्यश्चारालचिल्ली[५]परमतमसखी-
　　भावकमूाः समन्ता-

---

(१) पदस्य ।

(२) स्थान ।

(३) सहवास ।　　(४) सुहृदोवृत्ता ।

(५) कुटिलभ्रू ।

दुद्यान-स्तोम एष प्रणयमय इति
व्यञ्जयन्तः स्फुरन्ति ॥
पुष्पाद्युद्योतिकुञ्जा मणिमयनिलया-
श्चात्र भेदं न याता-
स्तस्मादेत[१]न्मतेन प्रकटमधिगते-
नालिपालि[२]! प्रवच्मि।
यूयं पूर्व्वं वनस्थाः पुनरिह गृहगा
मत्प्रियाः स्थेति लोके
विख्यातिं मा मनुध्वं द्वय[३]मिदमभिदा-
शालि किन्तु प्रतीता ॥

यद्यद्वृन्दावन-भुवि महावैभवं राजमानं
सारं तस्य स्वमनु समगादेतदुद्यान-वृन्दं।
स्थाने तच्च व्रजकुल-भुवां[४]श्री-कुलं[५]यत्र युष्म-
द्रूपं भागान्निज-निजतया वश्यतामानयेत ॥

अत्र सर्व्वा विराजन्ते वृन्दावन-विभूतयः।
भवतीषु यथा सर्व्वरमाणां कान्तिभूतयः ॥

(१) कुञ्जादि। (२) सम्बोधनं।
(३) युष्मदस्मदात्मकमुभयं।
(४) व्रजौकसां। (५) लक्ष्मीवृन्दं। कर्त्तृ।

अथ तथापि प्रचितनिज-विहारधनादिषु यमुना-गोवर्द्धनादिषु निज-वल्लभानां निर्ज्जनगमनगर्द्धनस्य वर्द्धनतामालोकयंस्तत्र प्रच्छन्नद्वारमपि स्वच्छय-(१)न्नालोकयामास। श्लोकयामास च तदिदं।—

वृन्दारण्यं समन्तात् कलयत तदिदं
तच्च गोवर्द्धनाद्रिं
ताञ्चादित्यप्रसूतां सरितमथ महा-
रासभूमीममूञ्च।
याश्चर्य्या कान्तिरेषा निखिलमतिगता-
नानयाप्यन्यदूह्यं
लोकातीतः पदार्थः किमिह न तनुते
वैभवं स्वं विभूय॥

किञ्च।—

क्वचन क्वचन विहारे, प्रागत्रालोकि यद्दृगाश्चर्य्यं।
तस्मादद्दृष्टपूर्व्वं, मत्वा नेदं सभेदमामृश्यं॥

तान्येतानि च वन्यसत्त्वान्यत्र लब्धसत्त्वानि(२) दृश्यन्तां॥

(१) प्रकाशयन् प्रकटयन्नित्यर्थः।
(२) लब्धप्रशस्तत्वानि।

यथा।—

वम्भण्यन्ते भृङ्ग-सङ्घा वेभिद्यन्ते च कुट्मलान्।
अशाश्यन्ते[१]पुष्परसानरार्य्यन्ते[२]च सर्व्वतः॥
जेगीयन्तेऽपि काश्चैते जेजीयन्ते परस्परं।
पेपीयन्ते मधून्युच्चैर्दोधूयन्ते वधू-मनः॥
अटाट्यन्ते[३]पक्षि-घटा बोभुज्यन्ते फलादिकं।
चेक्रीयन्ते नीडमूर्णोनूयन्ते[४]त[५]च्च यत्नतः॥
जेघ्रीयन्ते कोकूयन्ते सासद्यन्ते[६] जेगिल्यन्ते[७]।
लोलुप्यन्ते[८]सोषुप्यन्ते चञ्चूर्य्यन्ते[९]शावास्तेषां॥
प्रनरीनृत्यन्ते तं, प्रपनीपद्यासिताम्भोदं।
रोरूयन्ते चक्रं,म्यन्ते ते ते शिखण्डिनः परितः॥
चञ्चरीति[१०] देदिवीति, दन्दशीति[११] जंहनीति।
अर्य्यरीति[१२]चाकरीति[१३]
सन्मृगालिरात्तकेलि[१४]॥

---

(१) अतिशयेनाश्नन्ति।
(२) अतिशयेन कुटिलं ऋच्छन्ति। (३) कुटिलं अटन्ति।
(४) अतिशयेनाच्छादयन्ति। (५) नीडं।
(६) लुपसदचरजपजभदहदंशगृभ्यो भावगर्हायां।
(७) गर्हितं गिलन्ति। (८) गर्हितं लुम्पन्ति।
(९) निन्दितं चरन्ति। (१०) गर्हितं भक्षयन्ति।
(११) गर्हितं दशति। (१२) कुटिलं ऋच्छति।
(१३) अतिशयेन क्षिपन्ति। (१४) यथास्यात्।

अथ तथापि प्रचितनिज-विहारधनादिषु यमुना-गोवर्द्धनादिषु निज-वल्लभानां निर्ज्जनगमनगर्द्धनस्य वर्द्धनतामालोकयंस्तत्र प्रच्छन्नद्वारमपि स्वच्छय-(१) न्नालोकयामास । श्लोकयामास च तदिदं ।—

वृन्दारण्यं समन्तात् कलयत तदिदं
तञ्च गोवर्द्धनाद्रिं
ताञ्चादित्यप्रसूतां सरितमथ महा-
रासभूमीममूञ्च ।
याश्चर्य्या कान्तिरेषा निखिलमतिगता-
नानयाप्यन्यदूह्यं
लोकातीतः पदार्थः किमिह न तनुते
वैभवं स्वं विभूय ॥

किञ्च ।—

क्वचन क्वचन विहारे, प्रागत्रालोकि यद्दृगाश्चर्य्यं ।
तस्मादद्दृष्टपूर्व्वं, मत्वा नेदं सभेदमामृश्यं ॥

तान्येतानि च वन्यसत्त्वान्यत्र लब्धसत्त्वानि(२) दृश्यन्तां ॥

(१) प्रकाशयन् प्रकटयन्नित्यर्थः ।
(२) लब्धप्रशस्तत्वानि ।

राधे ! गोवर्द्धनाद्रेः शिरसि घनरस-

स्फारभासां विकासा-

च्चूडारत्नद्वयाभं तव मम च तमः-(१)

शान्तिकृत्तद्विभाति ॥

पुनर्वृन्दारण्ये रविदुहितरि श्रीहरिगिरौ

तथा भाण्डीरे यद्यदपि तव कुण्डे विहरणं ।

भविष्यत्येतन्मे हृदयमधितिष्ठत्प्रथमतः

स्वनिष्ठं तत्(२) कुर्व्वद्वृषरवि-सुते ! ऽन्यद्भ्रमयति ॥

प्रागुच्चैर्विरहेष्वहं त्वमपि च स्व-प्राणमाश्वासितं

कर्त्तुं यान् वत ! चित्तमोदकनिभान्

भावानकुर्व्व(३) स्फुटं ।

ते(४) चैते सखि ! सन्निधिं प्रति गताः

साक्षादहो ! मन्मनः

प्रत्येकं स्वकभोगसम्भृतिकृते

तृष्णाग्वितत्य स्थिताः ॥

सत्यं सङ्गिनि ! साम्प्रती च वल्लव-

लीलावलीचारुता

---

(१) दुःख ।   (२) विहरणं ।

(३) त्वञ्च अहञ्च द्वयोरेकशेषे आवामकुर्व्व ।

(४) भावाः ।

स्वान्तं क्लान्तमतिप्रवासमहसा
नः सर्व्वतः पुष्यति ।
किन्तु प्रागगतपूर्व्वरागमुखतन्नानाङ्गकेलि-प्रथा
पुष्णाति स्व-रसैरिमा(१)मपि शिफा
वीथीव शाखा-ततिं ॥
ततो नानालीलाविदधदहमालीभिरनव-(२)
स्व-वृत्तान्तं(३) गीतप्रचुरमभिनीतञ्च परितः ।
त्वया सार्द्धं शृण्वन् प्रकटमनुपश्यंश्च वहुधा
गतागन्तृप्रेमाण्यसकृदनुभूतानि करवै ॥
ततश्च ।—
आरामः परिचीयतां सखि ! सखी-
बृन्दं समानीयतां
लीलाधाम विधीयतां निज-कला-
केलिस्त्वया चीयतां ।
रासाद्यं मुहुरीयतां(४) मम रति-
स्तत्रापि सङ्गीयतां
सर्व्वं सुष्ठु विजीयतां किमधिकं
मर्द्धीविशे धीयतां ॥ इति ॥

---

(२) लीलावतीचारुतां । (२) पुरातन !
(३) पश्यन् शृण्वंश्चेत्यन्वयः ।
(४) प्राप्यतां । इण गतौ ।

तदेवमादिवहुसम्वादितया तां सुखाकुर्व्वंस्तत्त-दपूर्व्वसुखकेलिपर्व्वसतृष्णः श्रीकृष्णस्तां रजनीं जनितकौतुकतया गमयामास ॥

यत्र प्रथमतस्तु तां सर्व्वस्तुतां सखीभिः सम्व-लितामङ्ककलितां विधाय मणिखचितचामीकर-चितरङ्गमनु रासरङ्गमेव देवयामास ॥

यथा ।—

यद्वत्पूर्णविधूः सतारकगणस्तद्वत्प्रसूनाटवी-
मध्यस्थामलरासमण्डलमतिस्वच्छां रुचिं यच्छति।
यद्वत्तत्र[१] तमालहेमलतिका-
वृन्दान्यपि स्पर्शनात्[२]
स्पन्दं स्पन्दमटन्ति तद्वदनटद्गोविन्दगोपी-ततिः॥

अथ रजन्यन्तरे लब्धान्तरे श्रीराधिकायामेव तदर्थसाधिकायां जातायां रविकन्या-रोधसि बन्यायां श्रीहरिरसावन्याभिरपि रासमुल्लासयामास ॥

यत्र च ।—

तत्तन्निज-निज-कलया घनं[३] घनं[४] शुषिरं[५]

---

(१) रासमण्डले। (२) वायोर्हेतोः।
(३) कांस्यादि। (४) निविडं।
(५) वंश्यादि।

शुषिरं(१) ततं(२) ततमानद्धं(३) चानद्धं विदधे ।

विधाय च ।—

मध्यस्थानात् कृष्णराधाभिधानाद्-
युग्मात्प्राप्ता प्रातिविम्वीमवस्थां ।
कृष्णव्यूहश्रीव्रजस्त्री-ततिः सा
रेजे तस्मिन्मण्डले रासनाम्नि ॥

शुभ्रश्रिया रासमही शशीयते
स्वच्छाभया रासमहीयते नदी ।
नदीयते चारुमुखाब्जरोचिषा
राधादिकालिर्वनमालिना सह ॥

गानाङ्घ्रिनूपुरनितम्वकमध्यवाहु-
नेत्रभ्रुतालकलया लसितं ततान ।
हस्ताद्धि(४)वाद्य(५)मिव चाह दृगन्तचित्ते(६)
तासां विना हरिमुपेयतुरन्यकं न ॥

आस्यं गायति नूपुरादि तनुते वाद्यं पदे नृत्यतः
श्रोत्रे द्वे नयने च सभ्यजनतां
यान्ति स्म तस्मिन्निति ।

---

(१) सच्छिद्रं । (२) वीणादिकं ।
(३) आनद्धं मुरजादिकं । (४) कर्तृ ।
(५) कर्म्म । (६) कर्त्तृणी ।

रासे पश्यत सम्प्रदायवलना कृष्णाङ्गनानाङ्गणे
ऽनन्तेऽत्र प्रतिमूर्त्ति चेत् किमुत सा

सा सामुदायी स्थितिः ॥

नृत्यति स्म यदा कृष्णास्तासां तर्हि मनोनटः ।
अनटद्भ्रूनटीभ्यां द्रागनुकुर्व्वंस्तदेव सः ॥

कृष्णां कान्ततयानुपेत्य पुरतः

स्वं नित्यकान्तन्तु ता-

स्तत्राप्यन्य-करे निपत्य च वला-

न्निर्वाह्य धर्म्मं निजं ।

तत्रापीष्टममुं कथञ्चन रहः

प्राप्यापि विश्लेषिताः

पुण्यात्तं पतिमेत्य शर्म्मवलनां

सम्भृत्य नृत्यं व्यधुः ॥

सरोजाभं रासस्थलमिह दलेषु प्रणयिनी-
ततिर्मध्ये राधा विलसति तमामित्यपि मतं ।
अहं त्वन्यद्वक्ष्ये प्रमदगतिवृष्णागमतितया
स्फुटं श्रीकृष्णस्य स्फुरति हृदयं तद्बहिरपि ॥

तदिदमपि भङ्गीभिरङ्गीकृतं स्फुटभाषितया तु
स्फुटमिदं क्रियते ॥

कामं सन्तु हरेर्दृशोः श्रवणयोर्नासापुटस्य त्वचो
जिह्वायाश्च सदापि वृत्तितुलिता गोप्यः सहस्रायुतं ।
किन्तु स्वैरतया ब्रवाम न पुनः सङ्कोचितां चिन्महे
श्रीराधा वत ! सेयमस्य नियतं सर्व्वा मनोवृत्तयः ॥
यद्यप्येषा वकारेर्हृदयकमलगा हृद्वहिर्भूतिरेखा
राधामुष्या[१] स्तथापि द्रुतयति मम हृद्
द्रागिह स्नेहचर्य्या ।
यस्यां लब्धे सखीनामपि सति सततं
सेयमेनं स्व-कान्तं
सेवाभिश्चार्द्रयन्ती परिचरणकरी-
श्चित्रमूर्त्तीः करोति ॥
तस्मात्-कर्व्वुर[२]रत्नकर्व्वुररुचा वल्ली-तरूणां गणे
चिन्तारत्नगृहे महासनवरे प्राणालिभिः प्रावृता ।
अन्याभिः परिवीजिता प्रियतमस्योत्सङ्गसङ्गं गता
रोमाञ्चाचितघर्म्मवारिवलिता राधैव सा राध्यते ॥
कम्पः सम्पदमेति घर्म्मसलिलं
शीर्णाति[३]रोम्णां कुलं
हृष्यत्यस्रमभिस्रवत्युदितमप्यालम्वते कुण्ठतां ।

---

(१) श्रीराधायाः ।　　(२) हेम ।　　(३) स्रवति ।

चित्तं वर्ष्म च गच्छति स्तिमिततां मे पश्यतो माधवं
राधायुक्तमहो ! मदान्न च पुनः स्वं धर्त्तुमत्रोत्सहे ॥
इति वैवश्यवश्यतां स्वस्य व्यस्य मधुकण्ठः कुण्ठ-निखिलेन्द्रियगणः परमप्रेमचणः[१] स्व-भ्रात्रा स्तम्भितविग्रहः सन् ग्रहगृहीत इव मुहूर्त्तं मूर्त्तभावमाससाद ॥

न च स एव केवलतया किन्तु सहसहजन्मा च तन्मयतामवाप ॥

न च तावेव स्वयं त[२]द्देव सेवमानावास्तां किन्तु तया[३]साजितया सभाजितया सभया च समम्-इति स्थिते मुहूर्त्तेन सर्व्वस्मिन्नपि सुस्थिते तया सभया ताभ्यां नानादानाभ्यासः कृत इति वर्णनया कृतं ॥

यतः ।—

परिष्वङ्गश्रेण्या प्रियतमसुहृद्भिर्मुररिपो-
स्तथा राधाप्राणालिभिरतिसुखप्रेक्षणरुचा ।
सराधश्रीकृष्णेन च निज-पदस्पर्शवितर-
श्रियाङ्गीकृत्ये[४]मौ वत ! किमनयोर्नेह रचितं ॥

(१) ख्यातः । (२) मूर्च्छनं ।
(३) राधया । (४) तृतीयान्तं ।

ततश्चाभीष्टं वरयतामिति विशिष्टकृपया समादिष्टौ तौ परमशिष्टौ वरयामासतुः ॥

यदपि करुणयावामङ्घ्रिपार्श्वे निवासं
वरमनुगतवन्तावत्र विस्पष्टमावां ।
तदपि च पुनरेवं हन्त ! वृन्दावनेशौ
प्रकटमभिलषावो यद्युवां वर्णयाव ॥

अथ सख्यानन्दिन्यः काश्चिद्वन्दिन्यः पूर्वचम्पू-कथामनुविन्दमानास्तत्र वन्दन्ते स्म ।—

श्रीमति ! राधे ! श्रीमतिराधे ! (१)
भानुतनूजे ! मानुत(२)पूजे !
घोषवरश्री, पोषकरस्त्री-
सङ्ग-वरिष्ठा, त्वं घननिष्ठा
वन्दिततृष्णा,नन्दितकृष्णा
लोकहितार्थं, श्लोकचितार्थं(३)
सर्व्वगचित्रं(४), पर्व्वगमित्रं(५)
सम्मतभागा(६),ज्जन्म तवागा-

(१) श्रियश्च मतिश्च राधयति ।　　(२) लक्ष्मीस्तुत ।
(३) यशसा चितोऽर्थो यत्र ।
(४) सर्व्वगतं चित्रमाश्चर्य्यं यत्र ।
(५) पर्व्वगाणि मित्राणि यत्र ।　　(६) भाग्य ।

यत्र च रूपं, सत्रसरूपं[१]
कृष्टसमस्तं, सृष्टसुशस्तं
तातमुखानां, जातसुखानां
चार्जनि शङ्का, राजचिदङ्का[२]
तैरवरोधे, स्वैरनिरोधे
रङ्गयुगाप्ता, सङ्गतिमाप्ता[३]
शर्म्मदत्वाल्या, नर्म्मदलाल्या
खेलितलोला, हेलितचोला
धूलिषु भान्ती शूलिषु यान्ती
कर्द्दमदिग्धा, नर्द्दनिदिग्धा
भ्रातृनिरुद्धा, मातृविशुद्धा
स्तन्यसुपुष्टा, जन्यनुजुष्टा[४]
क्वापि च मात्रा, स्वापितगात्रा
श्यामलनाम्ना, श्यामसुधाम्ना-
प्यश्रुतत[५]त्वा,दद्भुतसत्वा
वंशजगाना, हंशसमाना-

(१) सदादानतुल्यं। (२) कंसज्ञानलक्षणा।
(३) कौतुकयुग्भिराप्ताभिर्निजाभिः सखीभिः सङ्गतिमाप्ता।
(४) वधूभिरनुसेविता।
(५) नेत्राम्बुव्याप्त।

ताडितकल्पा, नाडित[१]जल्पा
पाति च ताते, वाति सुवाते
केशवगन्धा, वेशविसन्धा[२]
सूचित[३]भीत्या, सू[४]चितरीत्या
त्वं तव पित्रा, स्वन्तरवित्रा[५]
जातु सुतेष्टा,[६] दातुमथेष्टा[७]
तस्य सपात्रं, यस्य तु गात्रं
श्यामलधाम, श्यामलनाम-
स्वान्तमभीष्टः,[८]कान्त[९]ततीष्टः[१०]
क्रूरनिरुद्ध्या, शूरजवुद्ध्या
गर्गनिदेशा, दर्गलवेशा-
दन्यगदानं, गण्यसमानं
वालतया ना, त्रालमजाना[११]
देहविवृद्धिः, स्नेहसमृद्धि-

---

(१) नडक् भ्रंश इति वोपदेवः।
(२) अमर्य्यादा। (३) ज्ञापित। (४) सुष्ठु।
(५) सुष्ठु अन्तःपालकेन। (६) प्रीतिविषयरूपा।
(७) वाञ्छिता। (८) तस्य पात्रं स इष्टः।
(९) रम्य। (१०) पूजितः।
(११) न ज्ञातवत्यासि।

श्वेति सदागा,(१) श्वेतितरागा
वर्णासमेधा, कर्णगवेधा
नव्यशिरस्या,(२) स्तव्यशिरस्या।(३)
घ्राणसभास्या,(४) प्राणसमास्या(५)
तन्मधुरिम्णा, शर्म्मवरिम्णा
त्वद्धृदयार्त्या, तद्धृदवाप्त्या
शंयुतलोकैः, संयुतशोकै-(६)
र्ल्यतथाभू(७), र्वाल्य(८)दयाभू-(९)
स्तावदथान्या, भावक(१०)मान्या-
स्सत्कुलभावा, स्त्वत्तुलभावा
वाञ्छितकान्ता, लाञ्छिततान्ता
द्रागतशाता, स्ता वत जाता ॥ देवि ! ॥

शिशुवचसि च सर्व्वं शीलरूपादखर्व्वं
जगदपि धृतहर्षं निर्म्ममे जातकर्षं ।

---

(१) गतवत्यासि। (२) केशा। (३) श्रेष्ठा।
(४) नासिकया सप्रभमुखा। (५) स्थिति।
(६) स मधुरिमा यत्र तादृशेन शर्म्मवरिम्णा शंयुतलोकैः।
(७ लुङ्। (८) बाल्ये। (९) भूमिः।
(१०) उपासक।

मुहुरपि तु भवत्या विस्फुरत्कान्तिमत्या
समरचि निजलोकः शङ्कया जातशोकः ॥

अपि च ।—

कालियमर्दे, ज्वालिविनर्दे
यूयमयध्वे, भूयसि घध्वे
क्ष्माऽजितवीक्षा, माजितदीक्षा[१]
जातविमोहाः, प्रातरथोहा-
पोहविसृष्टाः, श्वोऽहनि दृष्टाः
सद्मनि चैता,[२] स्तद्वदथैताः
कंसनिहन्त्रा, वंशजमन्त्रा-
दाचितचित्ताः, साचितवित्ता-[३]
स्तत्प्रभृति त्वं तत्प्रकृतिस्वं[४]
लोभयमाना, शोभयमाना
धैनुक[५]पाले,[६] धैनुककाले[७]
तत्र दिनान्ते, सत्रभकान्ते[८]

---

(१) अजक्षेपणो आक्षिप्तनियमाः सत्यः ।
(२) आगताः । (३) संयोजितध्याना । सच समवाये ।
(४) स्वो ज्ञातावात्मनि स्वं । (५) धेनुवृन्द ।
(६) कृष्णे । (७) मृत्युरूपे सति ।
(८) सत्रतुल्यकान्ते सति ।

तस्य विलोके, सस्यद[१]लोके[२]
ताभिरुपेता, साभिकचेता[३]
द्रागथ कान्तं, रागनितान्तं
तं त्वमपश्यः, शन्तमवश्यः
सोऽपि वत ! त्वां गोपितसत्त्वां
वाढमपश्य, द्राढमनश्य-
द्धैर्य्यकथापि, स्थैर्य्यमथापि
स्वं[४]युतवन्तौ, शंयुभवन्तौ[५]
गेहमुपेते, स्नेहनिकेते[६]
त्वा[७]त्वय[८]लोक, स्त्वानयदोकः
कालविलम्बे, कालविलम्बे
दैवपरीते, चैवमतीते
दुष्खजशूले, दुष्खनमूले
छद्मपतीनां, सद्मगतीनां
संयति काले, संयातिजाले[९]
भीतिपरीता, नीतिमतीताः

---

(१) जव। (२) सति। (३) सकामचेतसा सह वर्त्तमाना।
(४) स्वीयं स्थैर्य्यं। (५) राधाकृष्णौ।
(६) प्रिये कृष्णे। (७) त्वां। (८) गृह।
(९) मिथ्यापतीनां यानि सद्मानि तेषु गतीनां काले संयति सङ्कुच्छमाने सति। कीदृशे। संयतये संग्रामाय जालरूपे।

कालिक[1]कुण्डे, कालिकतुण्डे[2]
मज्जनकामा, वर्ज्जनवामा-
स्तत्र गतास्ताः, स्वत्र[3]हृतास्था-
नाथविलग्नाः[4], पार्थसि मग्नाः
सूरसुता वः[5],सूरतभाव-[6]
स्त्रावितचक्षु,र्भावि विवक्षुः
स्थानमनैषी,न्मानमचैषीत्
पूर्णिमया[7]सा,[8]पूर्णितभासा-
सान्त्वय[9]दुक्त्या, सान्त्वनयुक्त्या
तद्वरवल्या[10],गत्वरशल्या
गेहमनिष्टं, चेह निदिष्टं
ताभि[11]रयित्वा, ता[12]भिय[13]मित्वा
ह्रासमशङ्कान्, वासकलङ्का-
नङ्ग[14]भवत्यः, सङ्गतवत्य-

---

(१) कालिय ।　(२) कालस्य मुखे ।
(३) स्वस्मिन् ।　(४) कृष्णासक्ता ।
(५) षष्ठी ।　(६) कृपालुता ।
(७) द्वारा ।　(८) पूर्णिमा ।
(९) लङ् ।　(१०) पूर्णिमावरेण वलाहां ।
(११) पूर्णिमादिभिः ।　(१२) ता भवत्य इत्यन्वयः ।
(१३) भयं ।　(१४) पुनः ।

स्तद्वदनन्ता, पद्वदलन्ता-
भाग्मिलनेहा, ह्याविलदेहा[१]
त्वादृशरामा, हा ! कृशधामा
स्पष्टतयासीत्, कष्टमयासी-[२]
द्रागभृतान्तः, स्रा[३]गथ कान्तः
कीर्त्तितकान्ताः, कीर्त्तिनितान्ताः
क्रष्टुमभूद्वः, स्त्रष्टुमपूर्व्वः
स्वैरवलाद्यं, वैणववाद्यं ॥ देवि ! ॥
अनभिमतनिशान्तं, तत्तु गत्वा स्व-कान्तं
मनसि विदधती त्वं, पर्य्यरत्तः सतीत्वं।
यदि हृदि तव राधे !, सोऽप्यमुच्चैरवाधे
वसति कथमहृद्यं, तर्हि तिष्ठेदमृद्यं[४] ॥

अपि च ।—

या वरलीला, क्ष्माधरशीला
तत्प्रभृतीनां, तत्र कृतीनां
सन्ततसारा, नन्तविहारा
येऽप्यतिकर्ण्या[५], स्ते कति वर्ण्याः

---

(१) अनन्तापद्युक्तामलन्तां भजति यन्मिलनेहादि तेनाविलदेहा।
(२) छुक्। (३) झटिति। (४) अपरामाव्यं।
(५) कर्णाहानतिक्रान्ताः।

माधवगाना, गाथवितानाज्ज्ञानविनाशे, प्राणमिताशे[१]
पूर्णिमयात्रा, प्यूर्णित[२]गात्रा
त्वम्प्रतिकर्त्तुं, स्वम्परिकर्त्तुं
हा ! श्रमपीता, स्वाश्रमनीता[३]
पूर्णिमयाथो, पूर्णितपाथोधि-प्रभकान्तः, च्चिप्रमितान्तः[४]
प्राघटि यर्हि, प्राकटि तर्हि
त्वाञ्चरणाग्र, प्राञ्चल[५]जाग्रद्रीतिमकार्षी, द्रीतिमहार्षी-
त्तोयदकान्तः, सोऽयमघान्तस्तत्पदरागं, सत्पदभागं
प्रापुरनिन्द्य, प्राण[६]पुलिन्द्यः
स्वोपरमाणां,[७]गोप-रमाणां

---

(१) प्राणमात्रेण मिता निर्णीता आशा यत्र तादृशे ज्ञान-विनाशे सति ।

(२) आच्छादित ।

(३) प्रतिकर्त्तुं त्वं स्वाश्रमं नीता । पुनः किङ्कर्त्तुं । सपरिच्छदं सशोभं कर्त्तुं । श्रमपीता खेदग्रस्ता ।

(४) समीपः । (५) सरल । (६) जीवन ।

(७) स्वेम्य उपरमन्ति ।

चाद्भुतदेहा,[१] भानुतदेहा-
स्तद्विधरागे, सद्विधभागे[२]
शारद[३]मासं, शारदमासं
त्वं भजमाना, तं[४]यजमाना
रागनितान्तं, द्रागधिकान्तं
सर्व्वसमेता, स्वर्व्वमुदेता[५]
नर्म्मणि भीता, शर्म्मणि नीता
तेन[६]सगीता, नेन परीता-[७]
सैकतदेशा,[८]सैकतयेशा
लुप्तविहारा,[९]सुप्तविचारा
माधवमात्रा, राधनयात्रा-
नन्यमनस्का, धन्ययशस्का
लब्धवयस्या[१०], रुद्धरहस्या
स्वेषिविनीता, द्वेषिविगीता-

---

(१) तथा ईहा यासां ।

(२) साति । (३) शुद्धचन्द्रं ।

(४) शारदमासं । (५) असर्व्वमुदा इता प्राप्तवती ।

(६) श्रीकृष्णेन । (७) श्रीकृष्णेन सह परीतं ।

(८ प्राप्तमासैकतदेशं यया ।

(९) सा त्वं एकतया ईशेनालुप्तो विहारो यस्याः ।

(१०) लब्धो वयस्यः श्रीकृष्णो यया ।

र्य्यांद्रिगमाप्ता,[१] स्वाङ्घ्रिपदाप्ता[२]
प्रेमजकोपात्, स्थेमविलोपात्
प्राणप[३]मुक्ता, त्राणवियुक्ता
स्वाभिरुपेता, ताभिरुतेता
स्वेषणधामा, न्वेषणकामा
शान्तविहारं, कान्तविचारं
कान्तमयाता,[४] तान्ततयाता-
मायतसौरी, मायत[५]गौरी
या भवती सा, लाभवतीशा
सत्रसमाना, तत्र च गाना-
दाहृतकृष्णा, व्यापृततृष्णा-
र्य्यर्च्चितमाना, तच्चितमाना
नर्म्मदहासा, शर्म्मदरासा
नीरगखेला, तीरगहेला
त्वं हरिकान्ता, स्वं परि[६]शान्ता
गेहमितापि, स्नेहजतापि
स्वान्तरमग्ना, ऽर्थान्तरलग्ना
कृष्णागताशी, धृष्णगयासीः ॥ देवि ! ॥

---

(१) द्वेषिभिर्जनैर्विगीतापि अङ्घ्रिपर्य्यन्तानामाप्ता ।
(२) चिह्नाप्ता । (३) प्रिय । (४) अप्राप्ता ।
(५) दीर्घ । (६) लक्ष्यीकृत्य ।

अमितगणसपत्नी, जैत्रमास्ते सपत्नी
भव दिवसुयशस्ते, हन्त ! सर्व्वप्रशस्ते।
तदपि परमलीला, विश्वविभ्रमायिशीला
त्वमथ न तदजानाः, कृष्णतृष्णैकताना ॥

अपिच।——

तत्प्रभृति त्वं, तत्र कृतित्वं
केलिषु याता, मेलितशाता
कान्तविसृत्या, कान्तविहृत्या
कर्हि च युक्ता, कर्हि च मुक्ता
शङ्करयात्रा, शङ्करगात्रा[१]
हौरिकपर्व्वा, गौरि सगर्व्वा
घसृगगीता, जसृपरीता-
रिष्ट-वधान्ते, त्विष्टदकान्ते
सन्दितनर्म्मा, नन्दितशर्म्मा
तुण्डविभात्री, कुण्डविधात्री
पर्व्वतराजे, पर्व्वसमाजे
सज्जितभासा, रञ्जितरासा
सा मधुरायां, धामधुरायां
स्नाग्गतकान्ता, ऽनारततान्ता

(१) शङ्करयात्रायाः शङ्करोति गात्रं यस्याः।

वल्लभवार्त्ता, पल्लववार्त्ता-[१]
प्युद्भवदृष्ट्या, द्युद्धतधृष्ट्या
षट्पदमात्रं, तत्पदपात्रं[२]
सम्प्रति मत्वा, तम्प्रति गत्वा
क्लान्तिनिदान, भ्रान्तिजमान-
व्याकुलजल्पा, वातुलकल्पा
वाचिकमर्म्मा,भ्याचितशर्म्मा
तर्ह्यपि कष्टं, गर्ह्यमनष्टं
क्वापि च मत्वा, तापितसत्वा
रामनिदिष्टं, सामविशिष्टं
भूय उपेता, यूयकमेता-
स्तद्गृहणान्तः[३],सद्गृहकान्त-
श्लाघिततर्षा, द्राघितहर्षा
स्वागमनाशा, भागविनाशा-[४]
ङ्गीकृतिरीत्या, श्रीपतिनीत्या
श्रद्धितचित्ता, तद्धितवित्ता[५]
नाथनिदेशे, नाथ च देशे
स्वे पुनरेता,स्तेपुरपेता

---

(१) विस्तारजीविका । (२) साचिवे ।
(३) उपरागमध्ये । (४) अनश्वर । (५) धना ।

गोकुलमेते[१],गोकुलकेते[२]

स्त्वत्र भवत्य, स्तत्र भवत्य-[३]

स्तं सपदीता, ध्वंसमतीताः[४]

सम्प्रति माया, दम्पतितायां-

मन्यगतायां, धन्यगतायां

तत्परिणीता,स्तं परि नीता-

स्त्वं पुनरेषा, सद्गुणवेषा

सर्व्वसपत्नी, गर्व्वसयत्नी

भावमतीता, भावपरीता-

ग्रणयगवृन्दा, रणयगवृन्दा

स्वान्तरवस्था,कान्तवशस्था

मन्दसुहासा, चन्दनवासा

शन्दविकासा, मन्दविलासा

छन्दनिरासा, स्कन्दनयासा[५]

नन्दनिवासा, नन्दचिदासा[६]

नन्दजभासा[७], कन्दरवासा[८]

---

(१) प्राप्ते। (२) कृष्णे। (३) पूज्याः

(४) जीविता इत्यर्थः।

(५) अभिप्रायस्य यो निरासः क्षेपस्तस्यास्कन्दनो दूरीकर्त्ता-
यासः प्रयासो यस्याः।

(६) नन्दगृहानन्दचेता उपवेशो यस्याः। (७) आवन्तोऽयं।

(८) नन्दजस्य भासा भाः तस्याः कन्दरे वासो यस्याः।

कन्दलहासा,(१) कन्दसमा सा
राजसि राधे ! राजनिराधे ॥ देवि ! ॥
चिरविरहविदूना, कान्तमुत्कं यदूना-
मधिप-सुखविताना,(२)दागतं विन्दमाना।
अपुनरुदितबाधा, तं विलासेन राधा
वशयति शुभवेषा, यावताद्भव्यमेषा ॥

तदेवमप्यवधाय पुनः स्व-वर्णितसुखमन्तरुपधाय बहु नमस्कुर्व्वन्तौ परमगुणवन्तौ तत्प्रसादवसनादिकं धारयन्तौ निश्छलप्रेमबाष्प-धारया वर्त्म-पिच्छिलं भावयन्तौ सूत-सुतसन्तौ निजालयं कलयामासतुः। सखायश्च सुखातिशयमयतामयमाना निजं निजमयनमयन्ति स्म ॥

सखी-प्रभृतयश्च परमशर्म्मभृतयः(३)स्वस्वावसर-विसरानुरूपं तत्तद्वस्तूपाददानाः सावधानाः सेवा-निधानायन्ते स्म।—

श्रीराधा-कृष्णौ च निज-तत्तत्पूर्व्वकथानुभवेन परस्परस्फीततृष्णौ परमसुखकल्पे दिव्यतल्पे शयानतामयानन्दं विन्दतः स्म।—

(१) अङ्कुर इव हासो यस्याः।
(२) राजसुखं त्यक्त्वा। (३) भूतिर्मूल्यं।

किं वहुना ? अनयोः स एष व्यवहारः सर्व्वदा सहचरीणां हारवद्विहरति ॥

शश्वद्ध्यायति दूरगास्थिति[१]मिथः सूक्ष्मप्रणश्चायति[२]
प्राज्या[३]न्तर्गतमातुनर्म्म तु सखी-
मध्यास्थितं पश्यति।
राधा-माधवनामधेयमिथुनं विघ्नानतीत्यामितान्
दाम्पत्ये स्थितमत्र वा यदि रहःप्राप्तं तदा किं पुनः ॥

तथा हि।—

राधा-कृष्ण-युगं मुहुर्विघटनामुत्तीर्य्य दाम्पत्यभाक्
प्रत्येकान्तमुदस्त्रमेकतरगस्वापान्तरन्त[४]मिथः।
वक्रं पश्यति मार्ष्टि लोचन पुटं नासाग्रमुद्दण्डय-
न्निंस्ते गण्ड-युगं हृदा हृदि मिलल्लेलीयते शर्म्मणि ॥

ततश्च।—

प्रागारब्धमभूत्तदेतदमलं चम्पू-द्वयं यत्कृते
तच्चेदं हृदि शुद्धमाविरभवल्लोक-द्वय[५]स्यामृतं।
राधा-कृष्णपरस्परव्यतिकरानन्दात्मना येन[६]ते
याता दिव्यगतिं वयं सुखमयं सर्व्वोद्धमध्यास्महे ॥

अथ तादृशतया लब्धभृशतायामपि व्रजविलोक-नेच्छायां तदेत[७]द्देवान्तरङ्गतां सङ्गच्छति ॥

(१) सत्। (२) पश्यति। (३) गुरु।
(४) मध्ये मध्ये। (५) इहामुत्र च।
(६) अमृतेन। (७) वक्ष्यमाणं।

यथा ।—

श्रीमद्वृन्दावनेन्दोर्मधुप-खग-मृगाः
श्रेणिलोका द्विजाता
दासा लाल्याः सुरभ्यः सहचरहलभृ-
त्तात-मात्रादि-वर्गाः ।
प्रेयस्यस्तासु राधाप्रमुखवरदृश-
श्चेतिवृन्दं यथोक्तं(१)
तद्रूपा लोकधृष्णक्प्रमदमनुदिनं
हन्त ! पश्याम कर्हि ॥ इति ॥

श्रीकृष्ण ! कृष्णचैतन्य ! ससनातनरूपक ! ।
गोपाल ! रघुनाथाप्त ! व्रजवल्लभ ! पाहि मां ॥

पवन-कला(२)मिति सम्ब,द्विन्दन् वृन्दावनान्तःस्थः ।
जीवः कश्चन चम्पूं, सम्पूर्णाञ्चकार वैशाखे ॥

अथवा ।—

विद्या-शरेन्दु(३)शाक-
मितिप्रथमचरणः प्रचारणीयः ।
लीलानां रस-पूर्त्तिं,र्मयकादर्शि क्रमादत्र ॥
स्वस्वाग्रहतस्तासां, काचन केनाप्युपास्यतां नाम ॥

---

(१) क्रमेण । (२) १६४६ । (३) १५१४ ।

किन्तु ।—

रसिकजन-सुखार्थं साधयामास शश्वत्
क्रममनु रस-पूर्त्तिं सूदवत् कृष्णचन्द्रः।
क्रममनुरसयन् यः पूर्त्तिमाप्नोति पूर्त्यां
सफलमिह[१]परं स्यात्तु वैदग्ध्यमस्य[२] ॥

तदेतदेव "तद्भूरि भाग्य"मित्यादिप्रार्थनागर्भेण वेदगर्भेण[३] निर्णीतं ॥

"प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयासि भूतले।
प्रपन्नजनतानन्द-सन्दोहं प्रथितुं प्रभो!" ॥इति॥

किन्त्वेतेषु[४] रसनिकेतेषु मम तु विज्ञापनमिदं ।—

काचित्काचिदिति प्रोच्य प्रगुप्ताः श्रीशुकेन याः।
नाम्ना तासां रहःकेलिं व्यज्य प्रजाति मन्मनः ॥

ततश्च ।—

मया स्वीये काव्ये निखिलरस-योगं ज्ञपयता
कृतं धाष्टर्यं कष्टं वत ! हरिरमा-ह्रीकृदसकृत्।
विधातव्यं धीरैर्यदि हृशि तदा तन्न तु गिरी-
त्यमुं चाटुं भीतः प्रकटयति सोऽयं कविजनः ॥

---

(१) जने। (२) हरेः।
(३) ब्रह्मणा। (४) भक्तेषु।

।थवा ।—

मया यन्मत्काव्यं सरसमिदमित्थं ज्ञपयता
कृतं धार्ष्ट्यं क वत ! कुलवधू-ह्रीकृदसकृत् ।
तदस्पृष्टास्ताः ः ुर्यदतिकविधीश्रीवृतिवृता
जगच्चित्ताद्दूरे रहसि हरि-सेवां विदधति ॥

इति श्रीमदुत्तरगोपालचम्पूमनु सर्व्वसुख-
सम्पदवलोकश्रीगोलोकदेशप्रवेशः
सप्तत्रिंशं पूरणम् ॥

पूर्णोऽयं श्रीकृष्णपूर्णव्रजनामा तृतीयो विलासः ॥
सम्पूर्णा चेयं श्रीमदुत्तरचम्पूरिति ॥
समाप्तोऽयं श्रीगोपालचम्पूनामा ग्रन्थः ॥

श्रीगोपालचम्पू-पूर्वचम्पू-सूचीपत्रम्।

अथ प्रथमं पूरणम्।

तत्र विषयाः,— मङ्गलाचरणं, तद्व्याख्यानं, श्रीकृष्णशब्दस्य व्युत्पत्तिलभ्यार्थकथनं, "गोपालचम्पू" इति करणकारणवर्णनं, अथ सामान्यतया श्रीवृन्दावनधामवर्णनं, तत्र श्रीगोवर्द्धनाःरिष्टकुण्डयुगल-यमुना-तत्पुलिन-भाण्डीराटवीनां वर्णनं, श्रीनन्दव्रजवर्णनं, तस्यैवा-प्रकटविलासरूपगोलोकरूपवर्णनं, प्रकटधामवद्स्यापि व्यष्टिरूपेण तत्तद्वर्णनं ॥ १—५० ॥

द्वितीयं पूरणं।

तत्र विषयाः,— कथा प्रस्तावना, प्रभाते गोलोकद्वारि दुन्दुभि-नादवर्णनं, सिंहद्वारस्थचन्द्रशालिकारोहि-सूत-मागध-वन्दिनां पूतनारि-पूतनावधादिलीलावर्णनं नटनञ्च, तदा च श्रीगोपाल-ललनाकुलानां श्रीगोपाल-लीलागानं, स्व-स्व-गृहलब्धरमणसङ्गविरामानभिलषणीयानां, कृष्णप्रियाणां प्राभातिकगानतः स्वाङ्गश्लथादिवर्णनं, तत्र सर्वा-धिकाया राधिकायाः मूर्च्छावर्णनं, सखिभिः श्रीकृष्णोच्छिष्टताम्बूल-दानतस्तस्या मूर्च्छापनोदनं, प्राप्तचेतनया च तया श्रीकृष्ण-गुणानां मूर्च्छापादकत्ववर्णनं, तद्दिने श्रीव्रजेश्वरीनिदेशतः श्रीराधादीनां तद्-गृहगमनवर्णनं, यशोदां प्रति श्रीराधायाः प्रणामः, तदनुज्ञया च तथा-

परगुरुजनान् प्रति प्रणामः, ललितादि सखीनाञ्च तथाचरणं, श्रीरोहिणी-निदेशतः श्रीराधादिसखीनां पाकादिसादगुण्याय रसवतीप्रवेशवर्णनं, दासीजनैः सवयस्यश्रीकृष्णरामयोर्गात्रोद्वर्त्तनस्नानादिसम्पादनं, तेषाञ्च श्रीव्रजेश्वरीगृहप्रवेशः, श्रीकृष्णेन स्वयोर्मात्रोर्वन्दनं, पौर्णमासीमिलनं, व्रजवासिभिस्तदभिवन्दनं, तया च तेषामाशीर्भिरभिनन्दनं, ततो मधुमङ्गलसङ्गमः, श्रीमद्‌व्रजराज-सभायां 'सर्व्वं एव पर्व्वणीह सम्वलिता वर्त्तन्त" इति कस्यचित् वालकस्य मुखात् श्रुत्वा सपरिकररामकृष्णयोर्मातृद्वयानुज्ञातयो राजसभागमनं, श्रीकृष्णस्य जन्मनक्षत्रोत्सवः, श्रीकृष्णस्य मधुमङ्गलप्रमुखसखिभिः सह विविधनर्म्मणा भोजनलीला, वालकानां श्रीयशोदां प्रति श्रीकृष्ण-वनगमन-याच्ञा, तैः सह श्रीकृष्णस्य वनगमनवर्णनं, श्रीव्रजराज-सभायां केनचित् सवलद्वयेन सुताचार्य्येण (रत्नचूड़ेन) श्रीकृष्णरामयोः स्तुतिपाठः, रत्नचूड़-सुमति-नामतद्वंशोपतिभ्यां सह श्रीव्रजराजोपनन्दयोरालापः, सुमति-यमल-पुत्रयोः स्निग्धकण्ठ-मधुकण्ठयोः परिचयः, ताभ्याञ्च सह श्रीव्रजराजस्यालापः, ततः सभाभङ्गे सर्व्वेषां स्व-स्व-स्थानं प्रतिगमनं, ससखिवल-कृष्णयोर्गोचारणार्थं वनगमनं, तत्र तयोर्मधुमङ्गलेन सह परिहास-लीला, श्रीकृष्णस्य वेणुध्वनि-वर्णनं, सगोगोपालकयोः श्रीकृष्णरामयोरालयागमनवर्णनं, श्रीकृष्णस्य ललनादि, तस्य च जनकादिभिः सह सान्ध्यभोजनान्ते सभागृहगमनं, तत्र कुमारसूताभ्यां सह सुमति-रत्नचूड़योरागमनं, ताभ्यां स्निग्धकण्ठ-मधुकण्ठाभ्यां सह श्रीकृष्णस्य प्रणयालापः, तेन तयोः श्रीयशोदासदेशनयनं, तया च तयोः सत्कृतिः, ततः श्रीकृष्णेन तयोः श्रीराधासन्निधप्रापणं, श्रीराधां विलोक्य तयोः प्रेमवैवश्यं, श्रीकृष्णेन च तयोः स्वस्थताधानं, तेन पुरस्कृत्य सङ्गिभिस्तयोर्मातुलगृहं प्रति प्रस्थापनं श्रीगोविन्दस्य मोहनमन्दिर-प्रवेशानन्तरं सम्वेशनं, तस्य च प्रियाभिः सह तात्कालिकलीला-वर्णनं ॥ ५१—६६ ॥

तृतीयं पूरणम् ।

तत्र विषयाः,— गोलोकवर्त्तिसभायां सरामदामादेः कृष्णस्याङ्ग-सौष्ठवादिकथनं, इतिहासश्रवणाय यथोचितस्थाने श्रीयशोदादि-गोपीनां श्रीनन्दादिगोपानाञ्च समुपवेशनं, मधुकण्ठ-स्निग्धकण्ठौ प्रति नन्दस्य "किञ्चिदुद्दङ्कथ्यता"मिति जिज्ञासा, मधुकण्ठेन श्रीनन्दादीनां वंशचरित्रादिशंसनं, श्रीनन्द-यशोदयोः स्वप्ने भाविपुत्ररूपदर्शनानन्तरं मिथोरहसि श्रीद्वादशीव्रतानुष्ठानादिमयसम्वादः, पूर्णे च व्रतवर्षे भगवता तयोरन्तिके प्रादुर्भूय वरप्रदानं, मधुमङ्गलेन सह श्रीपौर्णमास्या व्रजागमनं, तस्मिन्नेव दिने श्रीवसुदेवप्रहितायाः श्रीरोहिणीदेव्या नन्द-भवनसमागमनं, "कोऽप्यपूर्व्वो वालः कयाचिद्दिव्यकुमारिकया आत्मानं पिधाय व्रजराजहृदयान्निजहृदयं प्रविश्य दृश्यवत् स्थित" इति निद्रा-परतन्त्रायमाणायाः श्रीयशोदायाः स्वप्नवृत्तान्तकथनं, श्रीवलदेवस्य जन्म-रूप-जातकर्म्मादिवर्णनं च ॥ ९७—१४७ ॥

चतुर्थं पूरणम् ।—

तत्र विषयाः,— "यशोदा सुतमसूत" इति विज्ञापयितुं रोहिणी-प्रेरितायाः कस्याश्चिद्दृद्धाया गोष्ठमध्यावस्थितानामुपनन्दादीनामन्तिके पुत्रोद्भवव्यञ्जनं, उपनन्दस्याज्ञया श्रीनन्दादिभिस्तस्याः पत्ये गोष्ठस्थ-धेनुसंघसमर्पणं, गृहमागतानां तेषां यथाविधि पुत्रजन्मोत्सवाद्यनुष्ठानं, नानोपायनधृतकराणां सुरञ्जितबहुमूल्यार्हवसनभूषितानां गोपगोपी-प्रभृतीनां नवप्रसूतकुमारसन्दर्शनार्थं श्रीनन्दालयसमागमनं, श्रीव्रज-राजेन यथाविधि नान्दीमुखादिजातकर्म्मसमाधानं, वेदविन्पुरोहितादि-विप्रैः सार्द्धं श्रीनन्दस्य स्वान्तःपुरवर्त्तिसूतिकागारद्वारागमनं, शिशु-

निजालङ्कृत्यर्थं कौतुकेन खट्टोपरि वस्त्राच्छादितबालकरक्षणकारिणीनां, श्रीरोहिण्यादिव्रजपुरन्ध्रीणां वाञ्छितालङ्कारादिसमर्पणप्रतिश्रुतस्य श्रीनन्दस्य पुत्रमुखदर्शनं, श्रीनन्दक्रोड़गतं बालकं दृष्ट्वा श्रीयशोदाया रोमहर्षस्तम्भादिसात्त्विकभाववर्णनं, श्रीनन्देन विप्रैर्मैधाजनककर्म्मसम्पादनं, व्रजपुरपुरन्ध्रीणां सङ्गीतं, तैल-हरिद्रा-नवनीत-दध्यादिभिः परस्परं सेचनलेपनाद्यात्मकक्रीड़नञ्च, दध्याद्याप्लावितप्राङ्गनस्य क्षीराब्धित्वेन श्रीनन्दस्य तु मन्दराचलत्वेन ताभिरुत्प्रेक्षणं, श्रीनन्दस्य धनादिदानं, उत्सवान्ते यमुनास्नानादिसमाधानं च ॥ १४८—१६७ ॥

पञ्चमं पूरणम् ।—

तत्र विषयाः,— वसुदेवप्रेरितानुचरेण श्रीनन्दव्रजमागत्य देवक्या गर्भनाशादिवर्णनं अष्टमगर्भोद्भवायाः कन्याया अङ्गसौष्ठववर्णनं कंसमुपदिश्य तस्याः परिकरेण सहान्तर्द्धानं कंसस्यसन्तोषाय तदुचितकरप्रदानोपदेशकथनञ्च, तस्य दूतस्य मथुरागमनं, श्रीयशोदाया जातकस्नानविधानकथनं, श्रीनन्देन गोकुलरक्षायै उपनन्दादीन् निरूप्य मथुरां गत्वा कंसाय करप्रदानं, श्रीनन्दवसुदेवयोर्मिलनं मिथः दुःखविषयककथोपकथनञ्च, श्रीवसुदेवोपदेशेन श्रीनन्दस्य पुनर्व्रजागमनं, पूतनायाः श्रीनन्दभवनगमनधृष्टतादिवर्णनं पूतनावधवर्णनञ्च ॥ १६८—२०१ ॥

षष्ठं पूरणम् ।—

तत्र विषयाः,—श्रीनन्द-नन्दनावलोकनाय बाल-वृद्ध-युवक-युवतीप्रभृतिव्रजजनानां नन्दभवनागमनं, मासत्रयवयःप्राकट्यावस्थितस्य श्रीनन्द-सुतस्याङ्गसौष्ठव-कलभाषणाङ्कारोहणादिवर्णनं, तत औत्था-

निकलीलावर्णनं, शकटभञ्जनलीलायां शकटवर्णनं, तदधःस्थितबालक-सौष्ठववर्णनं, शकटासुरस्य मोचनं, तन्मोचने देवानामुत्प्रेक्षावचनं, शकटपतनध्वनिश्रवणान्ते गोपानां मिथः प्रश्नोत्तरे, तत्रागतानां गोपानां बालकान् प्रति जिज्ञासा, तन्मध्येऽस्फुटवाक्यस्य कस्यचिद्बालस्या-पूर्व्वकथनं, तदनादृत्य गोपैर्यथास्थानं शकटरक्षणं, पृथग्गृहावस्थि-तयोः श्रीरोहिणीनन्दन-यशोदानन्दनयोरेकत्र मिलनं, तयोर्जनकजननी-परिचितिप्रदानं, नामकरणं कर्त्तव्यमिति मत्वा तद्विज्ञापनार्थं श्रीनन्देन श्रीवसुदेवान्तिके रहसि सेवकप्रेरणं, पुत्रयोर्नामकरणार्थं श्रीवसुदेवस्य गर्गं प्रति श्रीनन्दभवनगमननिवेदनं, गर्गस्य श्रीगोकुलगमनं, ततः श्रीकृष्णरामयोस्तेन नामकरणं, रिङ्गनलीलाविषयकसङ्गीतवर्णनं, श्रीरामकृष्णयोर्गतिशिक्षा-वाक्शिक्षावर्णनं, तयोः परस्परं कथनं, बाल्यचापल्यवर्णनं, ताभ्यां मातृवञ्चनस्य च वर्णनं ॥ २०१—२३४ ॥

सप्तमं पूरणम् ।—

तत्र विषयाः,— मधुकण्ठस्याज्ञया स्निग्धकण्ठेन वर्षमात्रप्राक्-स्यस्य श्रीकृष्णस्य जन्मदिनोत्सववर्णनं, यशोदाकर्त्तृककृष्णमुखचुम्ब-नादिलालनं, कंसप्रेरिततृणावर्त्तस्य व्रजागमनादिवधान्तवर्णनं, विनष्टे च तृणावर्त्ते देवानामुत्प्रेक्षावाक्यं, श्रीकृष्णस्य बाहुक्षेपन-नृत्यादिबाल्य-लीलावर्णनं, जृम्भमाणस्य श्रीकृष्णस्यानने श्रीयशोदाया विश्वदर्शनं श्रीयशोदया श्रीनन्दस्य समीपे तद्वर्णनं, मृद्भक्षणलीलावर्णनं, फलविनि-योगलीलावर्णनं, बाल्यलीलावशतः कृष्णस्य धेनुछागतोकानां दोहनानु-करणं, गोपीभिः श्रीकृष्णस्य बाल्यलीलाविषयकसङ्गीतं, श्रीकृष्णस्य बाल्यचातुर्य्यादिनानाविधलीलावर्णनं, श्रीकृष्णस्य चौर्य्यादिलीला-विषये व्रजपुरन्ध्रीणां यशोदायाश्च परस्परं कथोपकथनं ॥२३५—२६०॥

अष्टमं पूरणम् ।—

नवमं पूरणम् ।

द्दीनां तदस्थानमाहात्म्यकथनं, तत्र सर्व्वेषां गमनं, गोपीनां श्रीकृष्ण-विषयकसंकीर्त्तनं, यशोदा-रोहिणी-राम-कृष्णानां परस्परं प्रश्नोत्तरे, सर्व्वेषां श्रीवृन्दावन-प्रवेशवर्णनं ॥ २८८—३१० ॥

दशमं पूरणम् ।

तत्र विषयाः,— श्रीराम-कृष्णयोः कौमारशोभावर्णनं, श्रीकृष्णस्य वस्त्रपरीधानं, श्रीराम-कृष्णयोर्वत्सचारणं, सखिभिः सह श्रीकृष्णयोर्नानाविधक्रीड़नचातुर्य्यं, देवगणैः रामकृष्णयोरङ्गकान्तिवर्णनं, श्रीरामादीनां धातृगणाहृतभोज्यभोजनं, कंसस्य वत्सासुरप्रेरणं, तद्विषये श्रीराम-कृष्णयोः परस्परं प्रश्नोत्तरे, वत्सासुरमारणं, देवानां तच्छ्लाघावाक्यं कुसुमवर्षणञ्च, मन्त्रिभिः सह कंसस्य मन्त्रनानन्तरं वकासुरप्रेरणं, गोष्ठमध्ये वकासुरं दृष्ट्वा वालकानामुत्प्रेक्षावचनं, वकासुरविनाशनं, तन्मरणे देवानां नर्त्तन-वाद्यादिवर्णनं, वकं प्रति कृष्णाभिप्रायमुत्प्रेक्षमाणानां देवानामुपहासवाक्यं, कृष्णेन सह वालानां गृहागमनवर्णनं, तच्छ्रुतवतां गोपानां परस्परं कथोपकथनं कंसप्रेरितव्योमासुरस्य वृत्तं तन्निधनञ्च, व्योमनिधनं दृष्ट्वा देवानां कुसुमवर्षणानन्तरं श्रीकृष्णाभिप्रायवर्णनं, ततः कथासमापनं ॥३११—३३७॥

एकादशं पूरणम् ।

तत्र विषयाः,— वनभोजनद्रव्यसंगृहतां श्रीकृष्णादीनां वनगमनशोभावर्णनं, स्वस्वभोज्यद्रव्याणि वन्यवृक्षशाखायां निवध्य रक्षणं, श्रीकृष्णस्याज्ञया वालानां परस्परं यष्ट्यादीनामपहरणं, विहङ्गमादिस्वभावमङ्गीकृत्य नानाविधक्रीड़नं, कंसस्याज्ञया अघासुरस्यागमनं,

---

द्वादशं पूरणं ।

त्रयोदशं पूरणम् ।

चतुर्दशं पूरणम् ॥

पञ्चदशं पूरणम् ।

तत्र विषयाः,-श्रीकृष्णस्य श्रीराधा-गृहगमनादिविविधलीलावर्णनं, श्रीराधादिसखीनां जन्मवृत्तान्तकथनं, कौमारमध्यमध्यासितायाः श्रीराधायाः कैशोराङ्कुरवर्णनं, श्रीराधादिगोपीनां विवाहप्रस्तावादि-विविधसिद्धान्तः, पूर्वानुरागवर्णनं ॥ ४३४—४८९ ॥

षोड़शं पूरणम् ।

तत्र विषयाः,— सखिभिः सह श्रीकृष्णस्य वनगमनादिबाल्य-लीलावर्णनं, श्रीरामेण प्रलम्बासुरविनाशनं, दावाग्निं पीत्वा श्रीकृष्णेन गो-गोपाल-रक्षणं, श्रीराम-कृष्णादिगोपबालानां स्व-स्व-भवनागमनं, स्व स्व-पित्रोरन्तिके तत्तल्लीलावर्णनं ॥ ४९०—५०९ ॥

सप्तदशं पूरणम् ।

तत्र विषयाः,— श्रीराधाकृष्णयोः परस्परं स्पृहावाक्यं, प्रातर्वन-गमनसमयानुष्ठितहासादिवर्णनं, सायमागमनसमये श्रीकृष्णसौष्ठवादि-दर्शनेन गोपीनामुत्कण्ठादिवर्णनं, गृहनिरुद्धानां श्रीराधादिसखीनां मनःअवस्थावर्णनं, वर्षावर्णनं, गोपीनां विविधवाक्यं, श्रीकृष्णस्य दिग्-दर्शनकथनं, शरद्वर्णनं, वेनुशिक्षा, गोपीनां श्रीकृष्णविषयकनानाविध-कथोपकथनं ॥ ५१०—५३७ ॥

अष्टादशं पूरणम् ।

ऊनविंशं पूरणम् ।

विंशं पूरणम् ।

एकत्रिंशं पूरणम् ।

तत्र विषयाः,—"कौमारमारभ्य कृष्णः पतिः स्यात्" इति वासनावतीनां कृष्णभावयतीनां व्रजसुन्दरीणां तद्विषयकप्रार्थना, वृन्दाया व्रजसुन्दरीः प्रति माससाध्ययोगमायाराधनोपदेशादिकं, परस्परं व्रजसुन्दरीणां परीहासप्रायतया सङ्केतरूपेण स्वस्वाभिप्रायकथनं, व्रजाङ्गनानां कात्यायनीव्रतानुष्ठानं, ताः प्रति तेन श्रीकृष्णस्य प्रसन्नता, श्रीकृष्णेन ताभ्यो वरदानं, श्रीराधादिप्रेयसीनां भावना, तासामुद्वेगश्च, वृन्दया श्रीकृष्णाय श्रीराधा-हस्तलिपेः प्रदानं, श्रीकृष्णस्य वंशीनादमुपश्रुत्य श्रीराधादीनां तन्निकटागमनं, तेन च तासां प्रत्याख्यानं, मिलनविषये श्रीकृष्ण-मधुमङ्गल-पौर्णमासी-वृन्दादीनां परस्परं कथोपकथनं, तद्दर्शनादिकञ्च वर्णितं ॥ ६३४—६८१ ॥

द्वात्रिंशं पूरणम् ।

तत्र विषयाः,— सखिभिः परिवृतस्य श्रीकृष्णस्य श्रीवृन्दावनगमनानन्तरं वनशोभावर्णनं, श्रीकृष्णरामौ प्रति क्षुधार्त्तानां गोपानां क्षुधाप्रशमनप्रार्थना, तदादेशात् तेषां याज्ञिकविप्रगणसमीपेऽन्नयाच्ञा, तद्दाने विप्राणामनङ्गीकारः, तत्पत्नीः प्रति बालानामन्नभिक्षा, ताभिश्च तत्समर्पणं, तद्दाननिषेधाद्विप्राणामनुतापः ॥ ६८२—७०६ ॥

सप्तविंशं पूरणम् ।

तत्र जलविहारादिविविधवाक्‌चातुर्य्यवर्णनं, श्रीकृष्ण-गोपीनाञ्च स्वस्वभवनगमनं ॥ ८०८—८२८ ॥

अष्टाविंशं पूरणम् ।

तत्र विषयाः,— सर्व्वेषां व्रजवासिनां अम्बिकापति-पूजानार्थं आम्बिकवनगमनं, कृष्णेन सर्पग्रस्थनन्दस्य मोक्षणं, श्रीकृष्ण-चरण-स्पर्शात् तस्य सर्पदेहत्यागान्तरं दिव्यदेहप्राप्तिः, सर्व्वेषां स्वस्वभवन-गमनं ॥ ८२९—८३८ ॥

ऊनत्रिंशं पूरणम् ।

तत्र त्रिविधरहःक्रीड़ावर्णनं ॥ ८३९—८६२ ॥

त्रिंशत् पूरणम् ।

तत्र विषयाः,— शङ्खचूड़-विनाशनं, होड़िकाक्रीड़ायां दूतीमधुमङ्गलयोर्मिथः परिहासवाक्यं, गोपीनां होड़िकाविषयक सङ्गीत ॥ ८६३—८८८ ॥

एकत्रिंशं पूरणम् ।

तत्र विषयाः,— कंसप्रेरितारिष्टासुरनाशनं, तद्विनाशे देवानां श्रीकृष्णाभिप्रायकीर्त्तनं, सखिभिः सह गोष्ठगमनसमये गोपीनां यथाकालोचितस्वस्वभावविषयकसङ्गीतसमूहवर्णनं, दूतीनां श्रीकृष्णं लक्षीकृत्य छलेन परिहासवचनं, दूतीभिः सह श्रीकृष्णस्य नर्म्मवचनं, एवमपि अपरदिनजातगव्यादिविक्रयव्याजतः क्रीड़ाविवादादिविविधविचित्रचरित्रवर्णनं ॥ ८८१—९२४ ॥

द्वात्रिंशं पूरणम् ।

तत्रविषयाः,— "श्रीराम-कृष्णौ वसुदेव-सूनौ" इत्यादिकंससमीपे नारदस्योक्तिः, कंसेन व्रजं प्रति केशिदानवप्रेरणं, केशिदानवोपद्रव-त्रस्तान् व्रजानाश्वास्य श्रीकृष्णेन तस्य नाशनं, तद्विनाशहृष्टदेवाना कुसुमवर्षणं श्रीकृष्णाभिप्रायवर्णनञ्च, यमुनास्नानानन्तरं व्रजागमनं ॥ ९२५—९३१ ॥

त्रयस्त्रिंशं पूरणम् ।

तत्र विषयाः,— श्रीकृष्णेन व्रजाव्यवहितवासकारणोद्भावनं, भाविकारणं विभाव्य कृष्णस्य नानाविधोद्योगवर्णनं, श्रीकृष्णान्तिके

सम्पूर्णमिदं श्रीगोपालचम्पू-
पूर्व्वचम्पू-सूचीपत्रं ।

—:○:—